Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्री आत्मा[illegible]-श्री [illegible] वल्लभ
सूरीश्वर शिष्य [illegible] राज श्री
विवेक विज[illegible] [illegible]कालय
नंबर

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनायनमः ॥

# ॥ श्रीशत्रुंजयमाहात्म्यं ॥

छपावी प्रसिद्ध करनार.

पंडित श्रावक हीरालाल हंसराज.

( जामनगरवाला. )

संवत्—१९६५. सने १९०८.

किं रु.—१२—०—०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

☞ જામનગર જૈનભાસ્કરોદય છાપખાનામાં છાપ્યું.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ श्रीजिनाय नमः ॥

# ॥ अथ श्रीशत्रुंजयमाहात्म्यं प्रारभ्यते ॥

॥ श्लोकबद्धं ॥

( कर्त्ता श्रीधनेश्वरसूरिः )

ॐ नमो विश्वनाथाय । विश्वस्थितिविधायिने ॥
अर्हते व्यक्तरूपाय । युगादीशाय योगिने ॥ १ ॥

अर्हच्चक्रिश्रियः स्वामी । चामीकरसमप्रभः ॥ स्तुत्यः सत्कृत्यलाभाय । श्रीशांतिः
शुभ्रतांतिकृत् ॥ २ ॥ हेलांदोलितदैत्यारि——जेरासंधप्रतापहृत् ॥ स्मरणीयं स्मरं कुर्वन् ।
श्रीमान्नेमिः पुनातु वः ॥ ३ ॥ यस्य दृष्टिसुधावृष्टि—दानादहिरहीश्वरः ॥ जातस्तापत्रयान्मु-
क्तः । स श्रीपार्श्वो मुदेऽस्तु वः ॥ ४ ॥ सुराद्रिं सुरनाथस्य । संशयापनयाय यः ॥ अकंप-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यन्निधा वीरः । श्रीवीरः श्रेयसेऽस्तु सः ॥ ५ ॥ श्रेयःश्रियः पुंडरीकं । पुंडरीकं शिवश्रियः ॥
पुंडरीकशिरोरत्नं । पुंडरीकं नमामि तम् ॥ ६ ॥ जिनानादीश्वरमुखान् । पुंडरीकमुखान्
मुनीन् ॥ ध्यात्वा शासनदेवीं च । कुर्वे सच्चरितोद्यमम् ॥ ७ ॥ श्रीयुगादिजिनादेशात् । पुंड-
रीको गणाधिपः ॥ सपादलक्षप्रमितं ॥ नानाश्चर्यैकरंवितम् ॥ ८ ॥ श्री शत्रुंजयमाहात्म्यं ।
सर्वतत्त्वसमन्वितम् ॥ चकार पूर्वं विश्वैक—हिताय महितं सुरैः ॥ ९ ॥ [illegible]॥ वर्द्धमान-
नियोगेन । सुधर्मा गणभृत्ततः ॥ ह्रस्वायुष्कान् नरान् जानन् । तस्मात्संक्षिप्य तद्व्यधात्
॥ १० ॥ चतुर्विंशतिसहस्रात् । तस्मादालोच्य सारतः ॥ स्याद्वादवादवशतः । कुर्वन् बौद्धान्
गलन्मदान् ॥ ११ ॥ सर्वांगयोगनिपुणो । भोगाद्भोगेऽपि निःस्पृहः ॥ नानालब्धिप्रबुद्धात्मा ।
राजगच्छैकमंडनम् ॥ १२ ॥ सच्चारित्रपवित्रांगो । वैराग्यरससागरः ॥ श्रीमान् धनेश्वरः सूरिः ।
सर्वविद्याविशारदः ॥ १३ ॥ शत्रुंजयोद्धारकर्त्तु—रष्टादशनृपेशितुः ॥ वलभ्यां श्रीसुराष्ट्रेश—शि-
लादित्यस्य चाग्रहात् ॥ १४ ॥ तत्प्रतिश्रुतितुच्छ्यं तत् । माहात्म्यं सुखबोधकृत् ॥ वक्ति श-
त्रुंजयस्याहे—र्भक्त्या शृणुत हे जनाः ॥ १५ ॥ पंचभिः कुलकं ॥ किं तपोभिर्जपैः किं वा ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 

किं दानैः सत्फलैरपि ॥ शत्रुंजयस्य माहात्म्य–मेकवेलं निशम्यताम् ॥ १६ ॥ बंभ्रम्यते कथं धर्म–वांछया सर्वदिङ्मुखम् ॥ गयापि पुंमरीकाद्रेः । स्पृश्यतामितरैरलम् ॥ १७ ॥ आसाद्य मानवं जन्म । श्रुत्वा शास्त्राण्यनेकशः ॥ सफलीक्रियतां सर्वं । शत्रुंजयकथाश्रुतेः ॥ १८ ॥ जिज्ञासा यदि तत्वेषु । धर्मे धीर्यदि वास्ति वः ॥ त्यक्त्वा तदान्यत्सकल–ममुं श्रयत सद्गिरिम् ॥ १९ ॥ नास्त्यतः परमं तीर्थं । धर्मो नातः परो वरः ॥ शत्रुंजये जिनध्यानं । यज्जगत्सौख्यकारणम् ॥ २० ॥ त्रिधार्जितं कुलेश्याभिः । पापमापत्प्रदं जनाः ॥ स्मृत्यापि पुंमरीकाद्रेः । क्षिपंत्यपि सुदारुणम् ॥ २१ ॥ सिंहव्याघ्राहिशबर–पक्षिणोऽन्येऽपि पापिनः ॥ दृष्ट्वा शत्रुंजयेऽर्हंतं, भवंति स्वर्गभाजिनः ॥ २२ ॥ सुरासुरमनुष्यादि–भवेष्वालोकितो न यैः ॥ शत्रुंजयस्ते पशवो । न शिवोदयभाजिनः ॥ २३ ॥ अन्यतीर्थेषु सद्ध्यान–शीलदानार्चनादिभिः ॥ यत्फलं स्यात्तदधिकं । शत्रुंजयकथाश्रुतेः ॥ २४ ॥ तत् शृण्वंतु महाभक्त्या । माहात्म्यं गिरिभूपतेः ॥ यस्य श्रवणमात्रेण । संपदः स्युर्निरापदः ॥ २५ ॥

वृतो वृंदारकैर्वर्द्ध–मानोऽन्येद्युः सद्युतः ॥ शत्रुंजयं द्विधा शत्रुं–जयं पर्वतमागमत् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




॥ २६ ॥ ततो विततसंरंभ-मकंपंत विभौजसां ॥ आसनानि जिनान्नंतुं । त्वरयंतीव तानलम्
॥ २७ ॥ विंशतिर्भवनस्थेंद्रा । द्वात्रिंशद्व्यंतराधिपाः ॥ द्वौ ज्योतिरिंद्रौ दश चा-प्यूर्ध्वलो-
कनिवासिनः ॥ २८ ॥ चतुःषष्टिमिता एव-मिता देवैर्वृता घनैः ॥ शत्रुंजयं जगन्नाथ-भूषितं
पाकशासनाः ॥ २९ ॥ [illegible]॥ आलोकयालोक्य लोकैका-लोक्यं कौतुकतो गिरिम्॥ मूर्धानं
दुधुवुर्देवाः । सेवकांश्चेतदुज्जगुः ॥ ३० ॥ अहो महोदितैरत्नै-र्निःसपत्नैर्मरीचिभिः ॥ पवित्र-
श्चित्रितो भाति । सर्वस्फातिभृतो गिरिः ॥ ३१ ॥ सुवर्णशिखरैः शोभा-संभृतः शिखरी सु-
राः ॥ सर्वपर्वतनाथत्वा-न्मुकटैरिव मंडितः ॥ ३२ ॥ सुवर्णरूप्यरत्नाद्यैः । शृंगैः कर्बुरितांब-
रैः॥ पुनानोऽयं समं द्यावा-भूम्यावघहरोऽभवत् ॥ ३३ ॥ स्वर्णगिरिब्रह्मगिर्यु-दयार्बुदमुखै-
र्वरैः ॥ अष्टोत्तरशतेनोच्चै-र्भाति शृंगैरयं गिरिः ॥ ३४ ॥ सर्वतः सिद्धायतनै-रर्हद्वेश्मविभू-
षितः ॥ यक्षालयैरलंकृतोऽसौ । सिद्धशैलो विभासते ॥ ३५ ॥ यक्षकिन्नरगंधर्व-विद्याधरसुर-
व्रजैः ॥ अप्सरोभिः सदा सेव्यो । भाति शत्रुंजयो गिरिः ॥ ३६ ॥ मुमुक्षवो योगिनोऽत्र ।
विद्याधरनरोरगाः ॥ कंदरासु पवित्रासु । ध्यायंत्यर्हन्मयं महः ॥ ३७ ॥ रसकूपीरत्ननिधि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिव्यौषधिभिरन्वितः ॥ सदा शत्रुंजयोऽस्त्येष । सर्वपर्वतगर्ववित् ॥ ३८ ॥ कस्तूरीमृगयूथै-
श्च । मयूरैर्मत्तकुंजरैः ॥ संचरच्चमरीवृंदैः । सर्वतो भात्ययं गिरिः ॥ ३९ ॥ मंदारपारिजातक
–संतानहरिचंदनैः ॥ विचित्रश्चंपकाशोक–सल्लकीकुलसंकुलः ॥ ४० ॥ केतकीकुसुमामोद–
सुरभीकृतदिङ्मुखः ॥ झरन्निर्झरिणीवारि–झंकारमुखरः सदा ॥ ४० ॥ मालतीपाटलाका-
रा–गुरुचूतमुखैर्द्रुमैः ॥ शत्रुंजयो राजतेऽयं । सदापुष्पः सदाफलः ॥ ४१ ॥ त्रिभिर्विशेषकं
॥ कल्पवृक्षघनछाया–लीनाः किन्नरनायिकाः ॥ गायंत्यो जिननाथस्य । गुणान् पापं क्षिपं-
त्यमूः ॥ ४२ ॥ गिरिर्झरन्निर्झरांबु–शीकरैरेष तत्प्रियः ॥ मुक्तिसीमंतिनीहार– कृते मुक्ताः
किरन्निव ॥ ४३ ॥

इतः कलापिनो वारि–शीकरैर्निर्झरोद्भवैः ॥ मेघोदयभ्रमभ्रांतो । नृत्यंत्यर्हत्पुरोऽन्वितः ॥
॥ ४४ ॥ इतः पातालनाथोऽयं । सहस्रफणमंडितः ॥ जिननाथपुरो भाति । नाटयन् दिव्य-
नाटकं ॥ ४५ ॥ इतः संनृत्तनेपथ्याः । खेचर्यो वर्यगीतयः ॥ वीणाहस्ता विलोक्यंते । गृणं-
त्योऽर्हद्गुणावलीः ॥ ४६ ॥ परस्परं विरुद्धा ये । सत्त्वा आजन्मतोऽपि ते ॥ त्यक्तवैरा रमं-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेऽत्र । जिनाननविलोकिनः ॥ ४७ ॥ इतः शत्रुंजयां पश्य । नदीं पूर्वाब्धिगामिनीम्॥ कृता-
मिव पुण्यरेखां । पश्यतां भवतामपि ॥ ४८ ॥ तालध्वजनगोत्संगे। तटीनी तटिनीपतेः॥
अटंतीह तटं भाति । यास्ति शत्रुंजयापगा ॥ ४९ ॥ दिश्युत्तरस्यां पश्याब्ध–पयःप्राप्तमहो-
दयाम्॥ इंद्रेण निर्मितेत्यैंद्रीं । तटिनीं स्फुटनीरजाम्॥ ५० ॥ कपर्दिकां नदीं दिव्य–जलकल्लो-
ललालितां ॥ पश्यांभोरुहमध्यस्थ–हंससारससेवितां ॥५१॥ प्रभोः पश्चिमदिग्भागे । ब्राह्मी
विश्वोपकारिणी ॥ सरित्सलिलसंपूर्णा । भाति पापापहारिणी ॥ ५२ ॥ शत्रुंजयेंद्री नागेंद्री।
कपिला यमला तथा ॥ तालध्वजी च पद्मांगा । ब्राह्मी माहेश्वरी तथा ॥ ५३ ॥ साभ्रमती
शवलापि । वरतोयाजयंतिके ॥ भद्रा चेति महानद्य । इमा भांति चतुर्दश ॥ ५४ ॥ सूर्यो-
द्यानममानश्रि । पूर्वस्यां दिश्यदोऽद्भुतं ॥ स्वर्गोद्यानमपाच्यां च। स्वर्गोद्यानसमानरुक् ।५५।
प्रतीच्यां च सुराश्चारु । चंद्रोद्यानमिदं महत् ॥ लक्ष्मीलीलाविलासाख्यं । कौबेर्यां विपिनं
ह्यदः ॥ ५६ ॥ चतुर्दिग्भ्यः समागत्य–लक्ष्मीधम्मिल्लसन्निभैः ॥ अदीप्यतामीभिरयं । श्री-
शत्रुंजयपर्वतः ॥ ५७ ॥ सौधर्मेंद्रनियोगेन । धनदेन विनिर्मितं ॥ कुंडं कश्मलसंघात–वि-

For Private And Personal Use Only

घात्यैंद्रमिदं पुरः ॥ ५८ ॥ सरः स्फुरच्चंद्रिकाभ्र–जलोर्मिरवराजितं ॥ भरतस्य यशोराशि–
रिवैतद्भाति भारतं ॥ ५९ ॥ ईषत्पवननिर्धूत–तरंगावलिलालितं ॥ सरः कपर्द्दियक्षस्य । पश्य
कस्य सुखाय न ॥ ६० ॥ मुक्तिसीमंतिनीशोभा–समालोकनदर्पणं ॥ तटागं विकसद्भागं ।
मुनेः पश्य तपस्यतः ॥ ६१ ॥ सर्वतीर्थावताराख्यं । चांद्रं सौरं च सत्पयः ॥ कुंडमन्यदपि
सृष्टु–र्नामभिः पश्यतामराः ॥ ६२ ॥ इतस्तपांसि तनुते । मुनिरेष विशेषधीः ॥ विचित्रच-
रित्रस्यास्य । शृणु वार्त्तां सकौतुकां ॥ ६३ ॥

पुरा चंद्रपुराधीश । आसीत् कीनाससंनिभः ॥ सोऽयं कंडुरिति ख्यातो । नृपः पाप-
कृतां प्रभुः ॥ ६४ ॥ न देवान्न गुरुन् वृद्धान् । न मातॄन्न पितॄन् मनाक् ॥ मन्यते मदिराम-
त्तो । वित्तोद्धतमनाः स हि ॥ ६५ ॥ पापानामपि वर्द्धते । संपदः प्राच्यपुण्यतः ॥ पश्चात्स-
मूला नश्यंति । तृणवह्निशिखा इव ॥ ६६ ॥ सुप्तो ध्यायति मुग्धोऽसौ । परदारान् परश्रियं
॥ लोकार्द्दनं घनोपायै–र्धनापायकृते रतः ॥ ६७ ॥ प्रातः समुत्थितः सोऽथ । लोकानाकार-
यत्यपि ॥ आदत्ते संपदस्तेभ्यो । गतक्रोधोऽपि तत्प्रियाः ॥ ६९ ॥ प्रायो नृपतयः पुण्यात् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्राप्त संपूर्णसंपदः ॥ तदेव ते छिंदंतीह । ततो दुर्गतिगामिनः ॥ ७० ॥ कदर्थनां विधायैवं ।
लोके कोके शशीव सः ॥ क्षयेण क्षीणदेहोऽथ । धर्मं मित्रमिवास्मरत् ॥ ७१ ॥ सर्वतोऽ-
स्ति सुखं यावत् । तावत् किंचिन्न मन्यते ॥ प्राप्ते कीनाशपाशे तु । धर्मं स्मरति मूढधीः ॥
॥ ७२ ॥ अन्यदा स सभासीनः । सर्वतः क्रूरसेवितः ॥ यावदस्ति परद्रोह–चिंताग्निः क्लि-
ष्टमानसः ॥ ७३ ॥ तावन्नभस्तः केनापि । कल्पद्रुमदलस्थितः ॥ मुक्तोऽपतदधो दिव्य–श्लो-
कस्तत्र पुरः स्फुरन् ॥ ७४ ॥ [illegible] ॥ धर्मादधिगतैश्वर्यो । धर्ममेव निहंति यः ॥ कथं शु-
भायतिर्भावी । स स्वामिद्रोहपातकी ॥ ७५ ॥ इत्यमुं पत्रलिखितं । श्लोकं सोऽवाचयन्मुदा
॥ अवबुध्य तदर्थं च । चेतस्येवमचिंतयत् ॥ ७६ ॥ अहो मया महामोह–मायाधारेण चे-
तसा ॥ चरितं पापमाकष्टं । स्पष्टं फलितमप्यदः ॥ ७७ ॥ मयाभिभवदासाद्य । संपदो म-
त्स्यवन्मुधा ॥ स्वात्मायं ग्रासलुब्धेन । बद्धः संसृतिजालके ॥ ७८ ॥ न्यायमार्गानुगो नृपो ।
भवेद्भवयुगेऽभयः ॥ असन्मार्गरतो लोके । कुलराज्यक्षयाय सः ॥ ७९ ॥ चिंतातुरश्चचाले-
ति । मुक्त्वा राज्यं नृपो निशि ॥ मुमूर्षुर्मूर्खमुख्योऽसा–वब्धिपाताज्झंपया ॥ ८० ॥ या-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वध्याति बहिः कंडू–रुदंमभुजदंमभृत् ॥ तावद्भामनवद्यांगीं । पुरतः पश्यतिस्म सः ॥ ७१ ॥
अतर्कितैव सान्येत्य । पुच्छमुद्भ्राम्य कोपतः ॥ अताम्यद्विषाणाग्रैः । स्वैरिणी वैरिणीव तं ॥
॥ ७२ ॥ पूर्वानुभूतिवशतः । खड्गमुद्यम्य कंडुराट् ॥ दधावे तांप्रति क्रुद्धः । स्पर्द्धमानो यम-
श्रिया ॥ ७३ ॥

ततो गौरपि संक्रुद्धा । युद्धाय समधावत ॥ फूत्कारं यमसीत्कार–सन्निभं कुर्वती भृशं
॥ ७४ ॥ कोपेनाभिपतंतीं तां । न्यहन्भूपोऽसिना रयात् ॥ द्विधाऽभिनत्तत्करंकात् । योषित्
काचिद्विनिर्ययौ ॥ ७५ ॥ भीषणांग्यतिरक्ताक्षी । नर्त्तयंती च कर्त्तिकां ॥ साहवायाह्वयद्भूपं ।
निष्ठुराक्षरया गिरा ॥ ७६ ॥ अरे त्वया पशुर्दीना । हता गौः शस्त्रवर्जिता ॥ यद्यस्ति कापि
ते शक्ति–स्तद्युध्यस्व मया सह ॥ ७७ ॥ श्रुत्वेति हेतुसहितं । तस्या आस्याद्वचः स च ॥
सस्मितां तां प्रतिप्राह । अशुचिः खड्गदत्तदृक् ॥ ७८ ॥ भवती युवती काचित् । कदलीद-
लकोमला ॥ अहं तु क्षत्रियः शूरः । शस्त्रशास्त्रविशारदः ॥ ७९ ॥ तद्युद्धमावयोः किं स्या-
त् । प्रशस्यं वद मानिनि ॥ सिंहो मृगीरणं क्वापि । याचतेऽमर्षवानपि ॥ ८० ॥ इति वि-





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रांतवचसं । सापि तं दक्षमुज्जगौ ॥ न वाक्शूरास्मि नृपते । नवानिव नवाहवे ॥ ९१ ॥
श्रुत्वेति नृपतिः खड्ग–पाणिस्तां प्रति संचरन् ॥ स्वं तत्कर्त्तिकया विद्ध–मपश्यद्रक्तनिर्झरं
॥ ९२ ॥ सावदच्च नृप ज्ञातं । स्वपौरुषमितस्त्वया ॥ उत्तिष्ठोत्तिष्ठ युद्धाय । सज्जोऽसि यदि
सांप्रतं ॥ ९३ ॥ निशम्येति गिरं कंभू–श्चेतसीति व्यचिंतयत् ॥ अहो पराङ्मुखे दैवे । ना-
र्याहमपि निर्जितः ॥ ९४ ॥ तावद्बलं महस्तावत् । तावत्कीर्त्तिरखंडिता ॥ यावत्पुराकृतं पु-
ण्यं । न म्लानिमधिगच्छति ॥ ९५ ॥ पुण्यमेव प्रमाणं स्या–दंगिनां शुभकर्मणि ॥ क्षीण-
तेजाः कियत्कालं । तपत्यपि विभाकरः ॥ ९६ ॥ पुण्यैः संप्राप्यते सर्वं । सुखदायि सदा-
यति ॥ तदेव हीनपुण्यस्य । विषवद्दुःखदायकं ॥ ९७ ॥ योऽहं गजघटां धृत्वा । लीलया
पुच्छचामरे ॥ पुरोदलालयं व्योम्नि । जितः सोऽप्यनयाधुना ॥ ९८ ॥

इति चिंतयतस्तस्य । स्मृतिमार्गमुपागमत् ॥ राज्यत्यागो महारोगात् । क्रोधात्सुरभि-
संहतिः ॥ ९९ ॥ पुनस्तेनातिदुःखी स । चिंतयामासिवानिति ॥ चलितोऽहं मृतेः स्मृत्वा ।
भीतोऽस्मि सुरभेः कथं ॥ १०० ॥ प्रसंगान्मरणं मुक्त्वा । कृतं गोवधपातकं ॥ आयातमेव



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तन्मेही । तच्चापि कुगतिप्रदं ॥ १ ॥ अनासादितपुण्यः सन् । जंतुर्भवति दुःखितः ॥ विना
नीवीं सुदक्षोऽपि । पुमान् सीदति दीनवत् ॥ २ ॥ अधुना विपदंभोधि—निमग्नः करवाणि
किं ॥ लग्ने प्रदीपने कूपः । खन्यमानः सुखाय न ॥ ३ ॥ इत्यलं शोचतस्तस्य । तावद्देव-
सुंदरी ॥ रे मूढ प्रौढपापाढ्य । किं चिंतयसि दुःखितः ॥ ४ ॥ पूर्वं राज्यमदांधेन । धर्मद्रो-
हः कृतस्त्वया ॥ अधुनार्त्तावुपेतायां । धर्मं स्मरसि किं पुनः ॥ ५ ॥ न धर्मादपरो धन्यो ।
मन्यते धीधनैर्यतः ॥ प्रांतकाले स्मृतो यः स्व—द्रोहिणं तारयत्यपि ॥ ६ ॥ न धर्मबुद्धिस्ते
चित्ते । किं तु रोगोरगार्त्तितः ॥ पुण्यं स्मरसि रे मूढ । त्वं मया हि परीक्षितः ॥ ७ ॥
त्वद्गोत्रदेव्यंबिकाख्या । सैषा त्वत्सत्ववीक्षणे ॥ सादरा सुरस्त्रीरूपं । विरचय्य मुदागमं ।८।
अद्यापि कोपकलुषं । विद्यते नृप ते मनः ॥ न शुद्धधर्मवासार्हं । न च साम्यामृतप्लुतं ।९।
गच्छ त्वं सर्वदेशेषु । भ्रम तीर्थान्यनेकशः ॥ धर्माराधनवेलां ते । कथयिष्यामि निश्चितं ।१०।

इत्युक्त्वा सा तिरोभूता । कंडुराडित्यचिंतयत् ॥ अहो जागर्ति मे भाग्यं । यत्साक्षाद्
गोत्रदेव्यभूत् ॥ ११ ॥ प्रयते स्वमनःकुंभि—दमनाय दिवानिशं ॥ यथासौ मोक्षलक्ष्मीर्मे—



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 ऽध्यक्षतामधिगच्छति ॥ १२ ॥ प्रत्यूषे चिंतयित्वेति । किंचिद्दिग्मुखमप्यसौ ॥ प्रतस्थे स्वस्थ- 
चित्तत्वा—न्न मनागपि दुःखितः ॥ १३ ॥ भ्रमन्नेवं भुवो भागे । विध्यातक्रोधपावकः ॥ सम-
 चित्तः स सत्वेषु । गिरिं कोल्लाकमासदान् ॥ १४ ॥ इतश्च पश्चिमे यामे । यामिन्या जात-
मत्सरः ॥ पूर्ववैरी तदा यक्षः । प्रत्यक्षस्तत्पुरोऽभवत् ॥ १५ ॥ करालदृग्गदापाणी—रक्तास्यो
भ्रमयन् भ्रुवं ॥ सोऽवदत्तं प्रति क्रोधो—द्रेकोद्धततरं वचः ॥ १६ ॥ स्मराधेन त्वया हत्वा ।
यन्मां मत्कामिनी हृता ॥ स्मरसि म्रियसे तेना—धुना त्वं देवतं स्मर ॥ १७ ॥ मदाधेन वि-
धीयंते । पापान्यापातसौख्यतः ॥ समये दारुणानि स्यु—स्तानीति समरं कुरु ॥ १८ ॥ इ-
त्युक्ते मौनमाधाय । स्थिते नरपतौ सति ॥ तमुत्पाट्य महायक्षो—तरिक्षं क्षणतो ययौ ॥१९॥
ततः पर्वतमध्यस्थ—गुहायां स च गुह्यकः ॥ प्रक्षिप्य विविधैर्बंधै— र्बबंध नृपतिं क्रुधा ॥ २०॥
ताड्यमानः सोंघ्रिघातैः । पिष्यमानश्चपेटया ॥ पूर्वनिर्मितपापानां । प्रायश्चित्तमिवामृशत् ॥ 
॥ २१ ॥ पर्वताग्रे समुद्देऽपि । कंटकिद्रुवनेऽवटे ॥ क्षेपं क्षेपं गुहाक्षिप्तं । तं मुक्त्वा स तिरो-
दधे ॥ २२ ॥ रक्षितः प्राक्तनैरेव । कर्मभिर्दत्तशर्मभिः ॥ सोऽन्यथा तस्य निर्घातै—स्त्रैलोक्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मपि दीर्यते ॥ २३ ॥ ऊरन्निर्ऊरसंपृक्ता–नर्कस्पृड्मारुतैर्नृपः ॥ क्रमात्सचेतनश्चिते । चतुरोऽ
थ व्यचिंतयत् ॥ २४ ॥ अहो प्रागुप्तपापद्रोः । पल्लवोऽयमनून्मम ॥ पुष्पं फलं पुनर्न्नावि ।
डुर्योनिनरकादिषु ॥ २५ ॥ सहसारन्यते पापं । तन्मदांधैर्नराधमैः ॥ क्रंदन्निरपि न स्वात्मा
। शक्यो मोचयितुं यतः ॥ २६ ॥ इत्यमात्मकृतानर्थ–विकत्थनपरो नृपः ॥ तत्क्षयाय शु-
न्नध्यानी । तीर्थमुद्दिश्य सोऽचलत् ॥ २७ ॥ आत्मवत्सर्वसत्वान् स । पश्यन् द्वेषविवर्जितः
॥ यत्र तत्रापि बभ्राम । पुण्यप्राप्तिकृतोद्यमः ॥ २८ ॥

इतश्च शासनसुरी । तस्यांबा पुरतः स्थिता ॥ साक्षाद्भूता प्रसन्नास्या । पुरांगीकृतवाक्
स्थिता ॥ २९ ॥ जगाद वत्स गष्ठ त्वं । श्रीशत्रुंजयपर्वतं ॥ तत्र हत्यादिपापानि । यास्यंति
विलयं तव ॥ ३० ॥ [illegible] ॥ त्वत्पूर्वपुंसां सद्भक्ति–रंजिताहं पुरा तव ॥ सुन्नाषितमवोचं त–
दधुना तीर्थमप्यदः ॥ ३१ ॥ मुग्धः किं तीर्थलक्षेषु । संसारी बंभ्रमत्यहो ॥ एकं शत्रुंजयं
चैक–वेलं किं न स्मरत्यसौ ॥ ३२ ॥ यदा शत्रुंजयः साधु–पूजितो वा स्मृतः स्तुतः ॥
श्रुतो वा हकूपथं प्राप्तः । तदा कर्मक्षयो न्नवेत् ॥ ३३ ॥ पाप्मनां शल्यरूपोऽयं । धर्मिणां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वशर्मदः ॥ कामिनां कामितंदाता । जीयात् शत्रुंजयो गिरिः ॥ ३४ ॥ विना तपो विना दानं । विनार्चा शुभ्रभावतः ॥ केवलं स्पर्शनं सिद्ध—क्षेत्रस्याक्षयसौख्यदं ॥ ३५ ॥ निबिडं तव कर्मेदं । नरकादिगतिप्रदं ॥ शत्रुंजयं विना नान्यैः । क्षीयते सुकृतैः क्वचित् ॥ ३६ ॥ इयत्कालं मया वत्सो—पेक्षितोऽसि समत्सरः ॥ अधुना तीर्थनाथस्य । योग्योऽसीति च क-थ्यते ॥ ३७ ॥ अप्येकवेलमेतस्य । सेवनं विश्वपावनं ॥ भवलक्षार्जितं पापं । व्यपोहति समंततः ॥ ३८ ॥ शत्रुंजयसमं तीर्थ—मादिदेवसमः प्रभुः ॥ जीवरक्षासमो धर्मो । नास्ति विश्वत्रये वरः ॥ ३९ ॥ मुक्तिसीमंतिनीपाणि—ग्रहणाय सुवेदिका ॥ शत्रुंजयो जयत्यत्र । पर्वतप्रभुरद्भुतः ॥ ४० ॥ संसारसागरे मज्ज—ज्जनसंघातसंश्रयः ॥ अंतरीपो विमलाद्रि—र्भा-ति मुक्तितटाश्रयः ॥ ४१ ॥ शत्रुंजयो जयन् पापं । चिन्वन् धर्मं ददन् सुखं ॥ पुनानः स-कलान् लोकान् । गिरिर्जयति शाश्वतः ॥ ४२ ॥ भवांस्तत्र पवित्रात्मा । साम्यांभसि नि-मज्जनात् ॥ आत्मारामममुपास्याशु । तीर्थयोगेन सेत्स्यसि ॥ ४३ ॥ इति श्रुत्वा गिरेः प्रौढ—महिमानं महीपतिः ॥ देवीमुखसरोजांत—र्निर्गच्छन्मधुसंनिभं ॥ ४४ ॥ पीयूषैरिव संसिक्तः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षालितः पयसेव सः ॥ ज्योत्स्नयेवोक्षितः सद्यो । हृदयं वैशद्यमासदत् ॥ ४५ ॥ कुलकं ॥
स नत्वा जगतोऽप्यंबा–मंबां कंबूज्ज्वलाशयः ॥ चचालाचलमुद्दिश्य । चारुचारित्रसंस्पृहः
॥ ४६ ॥ आतीर्थाप्तिकृताहार–परिहारः स हारिभिः ॥ हृतस्वांतो गिरिगुणैः । पथि संचर-
तिस्म च ॥ ४७ ॥ मानसध्यानयोगेषु । संकथास्वपि पार्थिवः ॥ शत्रुंजयं यथाख्यातं ।
स्पृशन् स प्राप च क्रमात् ॥ ४८ ॥ सप्तभिर्दिवसैः शृंगं । ददर्श च गिरेः पुरः ॥ नेत्रे तद्दर्श-
नोत्कंठे । वदतिस्मेति कंडुराट् ॥ ४९ ॥ युवयोः पुण्यसंभारैः । प्रत्यक्षोऽयं महागिरिः ॥
संजातस्तदमुं नेत्रे । विनिभालयतं बहु ॥ ५० ॥ कुलकं ॥

इत्थं प्रमोदवान् कंडुः । पथि प्राप्य महामुनिं ॥ ननाम निषसादाथ । तन्मुखे दत्तलो-
चनः ॥ ५१ ॥ संवेगसंगतं ज्ञात्वा । मुनिर्ज्ञानी दयोज्ज्वलः ॥ नृपं देशनया सद्यो–ऽनुज-
ग्राहेति सादरं ॥ ५२ ॥ धर्मोऽस्तु कोऽसि वत्स त्वं । गच्छन्नसि गिरीश्वरं ॥ सत्सत्वधरस्तत्त-
त्वं । श्रुणु चारित्रलक्षणं ॥ ५३ ॥ कर्मकक्षदवित्रं त–च्चारित्रं पंचधा जगुः ॥ यदंचत्पंचम-
गति–प्रदं सर्वविदो जिनाः ॥ ५४ ॥ आद्यं सामायिकं चान्य–च्छेदोपस्थापनीयकं ॥ सूक्ष्म-



For Private And Personal Use Only

क्रियं परिहार–विशुद्धं च यथोक्तिमत् ॥ ५५ ॥ चारित्रेण विना ज्ञान–दर्शने पंगुवद् वृथा ॥
वंध्यमंधवदप्येत–देताभ्यां परिवर्जितं ॥ ५६ ॥ यत्सुधायुक् हेमघटः । सौरभ्यं हेम्नि यद्वरं ॥
यच्चंडे चंदनालेपो । मुद्रायां यन्मणिस्थितिः ॥ ५७ ॥ यत्पर्वणि महादानं । दाने यद्भासना-
न्विता ॥ शत्रुंजये जिनध्यानं । तच्चारित्रयुतं मतं ॥ ५८ ॥ [illegible] ॥ मुनिवाण्येति संहृष्ट–स्त-
स्मादासाद्य सद्व्रतं ॥ द्विधा परिग्रहोन्मुक्त–स्तीर्थं प्राप प्रसन्नदृक् ॥ ५९ ॥ आरुह्य शीलस-
न्नाहः । शैलं कंडुर्व्रतास्त्रभृत् ॥ दयाखेटकसंयुक्तः । पापारिं हतवान् रयात् ॥ ६० ॥ स मू-
र्त्तिमादिदेवस्य । दर्शं दर्शमतृप्तिवान् ॥ निर्निमेषं सरोमांच–श्चक्षुर्व्यापारयद्धनं ॥ ६१ ॥ इह
शृंगाग्रभागेऽसौ । तप्यते दुस्तपं तपः ॥ क्षीणकर्माधुना ज्ञान–मवाप्स्यति शुभोदयः ॥६२॥
क्षेत्रं महाविदेहाख्यं । गतोऽभूवमहं सुराः ॥ श्रीमत्सीमंधरस्वामि–मुखादश्रौषमित्यपि ॥
॥ ६३ ॥ महापापोऽपि हि पुमान् । श्रीशत्रुंजयसेवनात् ॥ विशुद्धः सिद्धिभाग् भावी । य-
थायं कंडुभूपतिः ॥ ६४ ॥

अथान्येऽपि सुराः सर्वे । द्योतयंतोंबरं रुचा ॥ नंतुं जिनान् समाजग्मु–स्तुंगरंगतरंगि-


॥ १६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णः ॥ ६५ ॥ दुःकर्मसूदनीं दुष्टा–दर्नीं राजादनीं ततः ॥ कृपात्प्रदक्षिणीकृत्य । नेमुर्वीरं सु-
रेश्वराः ॥ ६६ ॥ ततः कांश्चिन्मुनिवरान् । नानालब्धिमहानिधीन् ॥ अष्टांगयोगनिपुणान् ।
महिमोदयमेदुरान् ॥ ६७ ॥ ध्यानाधीनात्मनः कांश्चि–त्कांश्चिन्मौनावलंबिनः ॥ वदतो धर्म-
माहात्म्यं । कांश्चिज्जपपरान् मुनीन् ॥ ६८ ॥ व्यावर्त्तयतश्च परान् । जपमालामणीगणान् ॥
मिथः कथाः प्रकुर्वाणान । कायोत्सर्गरतान् परान् ॥ ६८ ॥ पद्मासनसमासीना–न्दीनान्
जनितांजलीन् ॥ आदिदेवमुखांभोज–विलोकनपरान् परान् ॥ ६९ ॥ तीक्ष्णरश्मौ दत्तने-
त्रान् । कांश्चित्पुस्तकसत्करान् ॥ तप्यमानांस्तपः कांश्चित् । तीर्थसेवां प्रकुर्वतः ॥ ७० ॥
कांश्चित्समग्रसिद्धांत–तत्त्वविद्याविशारदान् ॥ श्वेतांबरधरानुग्र–परिषहसहान् परान् ॥ ७१ ॥
अंतरंगारिविजये । वीरान् सत्त्वैकवत्सलान् ॥ चतुर्दशोपकरणीं । प्रतिलेखयतः परान् ॥७२॥
मूर्त्तानिव शमरसान् । धर्मानिव वपुष्मतः ॥ परितो वीरनाथस्य । तत्र नेमुः सुरेश्वराः ॥
॥ ७३ ॥ **अथाग्निः कुसकं** ॥ अथो मिथः स्पर्द्धमाना । रत्नसारैः सुरेश्वराः ॥ आरेभिरे सम-
वस–रणस्य रचनामिति ॥ ७४ ॥ ससृजुः सुगंधि वायु–कुमारा वायुवीजनं ॥ ववृषुर्जलदा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वारि । सौरज्ञोल्लासज्ञासुरं ॥ ७५ ॥ वज्ञौ सलिलसंसिक्ता । ज्ञूमिः शत्रुंजयोपरि ॥ वापा-
य पुण्यवृक्षस्य । श्रेयःफलकृतः किमु ॥ ७६ ॥ आयोजनं सुमनसां । श्रेणीं जानुमितां सुराः
॥ अकिरन् पंचवर्णाम–धोवृंतामुन्मुखीमिह ॥ ७७ ॥ बध्वा रत्नचयैश्चित्रै–स्तां महीं ज्ञिन्न-
वर्णकं ॥ अवाकिरन् व्यंतरेंडा । निर्ज्ञरं कुसुमोत्करं ॥ ७८ ॥ कुट्टिमोपरि पुष्पाणि । तानि
चित्राणि रेजिरे ॥ मदनेनेव शस्त्राणि । त्यक्तानीव पुरः प्रज्ञोः ॥ ७९ ॥ चतुर्दिक्षु व्यंतरेंडा
–स्तोरणानरुणानिह ॥ चक्रिरे यैर्दिङ्मुखानि । सरागाणि विज्ञौ बभुः ॥ ८० ॥ रूप्यवप्रो
वह्निर्दीप्रो । भुवनेंद्रैर्विनिर्ममे ॥ जगन्नाथशुज्ञध्यान–निधानमिवमूर्त्तिमत् ॥ ८१ ॥ आयोजनं
महीं व्याप्य । स्थितः पिंडो विधुप्रज्ञः ॥ सत्रिज्ञागैककरयुक्–त्रयस्त्रिंशऽनुमितः ॥ ८२ ॥
धनुःपंचशतीमान । उच्चत्वे कुंडलाकृतिः ॥ हिरण्यकपिशीर्षालि–मालितः शुशुज्ञे स कौ ॥
॥ ८३ ॥ ~~त्रिभिर्विशेषकं~~ ॥ धनुःसार्धसहस्त्रं तु । मुक्त्वा तस्यांतरावनीं ॥ ज्योतिष्कविबुधाश्च-
क्रुः । कांचनं वप्रमुत्तमं ॥ ८४ ॥ प्राकृवप्रायतदीर्घस्य । तस्योपरि ज्ञृशं बभुः ॥ दीप्राणि क-
पिशीर्षाणि । चारुरत्नमयानि हि ॥ ८५ ॥ रत्नशालस्तु तस्यांत–र्विचित्रो रश्मिवीचिज्ञिः ॥

For Private And Personal Use Only

वैमानिकनिकायेन । निर्मितः पूर्वमानभृत् ॥ ८६ ॥ दिव्यप्रभावसंपूर्णै–र्निर्मिता मणिभि-
र्घनैः ॥ विविधा कपिशीर्षालि–स्तदुपर्यशुभदृभृशं ॥ ८७ ॥ विश्वभ्रमणसंतप्तान् । प्राणिनः
स्वेदभित्तये ॥ वीजयंत्यो बभुस्तत्र । वैजयंत्यो विचित्रभाः ॥ ८८ ॥ हिरण्यकिंकिणीक्वाण
–क्वणिताशेषदिङ्मुखः ॥ व्यराजत रत्नमय–स्तत्रोपरि महाध्वजः ॥ ८९ ॥ प्रतिवप्रं प्र-
भादीप्रै–रत्नैश्चत्वारि रेजिरे ॥ द्वाराणि सत्कपाटानि । प्रवेशायेव संपदां ॥ ९० ॥ इंद्रनील-
मणिजातां–स्तोरणान् वीक्ष्य नाकिनः ॥ तरुणानां हि वप्राणा–मदधुः श्मश्रुविभ्रमं ।९१।
स्फुरद्धूपघटीधूम–भूमव्यापितदिङ्मुखाः ॥ प्रतिद्वारं महाशाला । नाशयंतस्तमो बभुः ।९२।
प्रतिद्वारं व्यधुर्देवा । हेमपद्मालिमालिनीः ॥ वापीः सद्वार्भिरापूर्णाः । स्नानायार्हन्नमस्यतां
॥ ९३ ॥ आद्यद्वितीयवप्रांत–र्देवछंदं दिवौकसः ॥ विदधुः प्रभुविश्रांति–हेतुमीशानदिङ्मुखे
॥ ९४ ॥ सप्तविंशति चापोच्चं । रत्नप्राकारमध्यगं ॥ मणिपीठं व्यधुर्देवा–स्तदंतश्चैत्यपादपं॥
॥९५॥ पूर्णं समवसरण–मपि यस्य सुपल्लवैः ॥ गतातपभयासीन–सर्वलोकमभात् शुभं
॥ ९६ ॥ तदधस्तपनीयस्य । सिंहासनमभासत ॥ सपादपीठं विष्टंभि–मणिभिर्भानुबिंब-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वत् ॥ ९७ ॥ छत्रत्रयं त्रिभुवन–प्रभुत्वप्रथिमानुगं ॥ सिंहासनोपरि दधुः । सुराः सद्भक्ति-
भासुराः ॥ ९८ ॥ सहस्रयोजनोत्सेधो । धर्मध्वजः पटस्फुटः ॥ शिवारोहणनिःश्रेणि–रि-
वारोचत कांचनः ॥ ९९ ॥ प्रतिवप्रं प्रतिद्वारं । तुंबरुप्रमुखाः सुराः ॥ दंभिनोऽथ प्रतिहाराः।
स्फारशृंगारिणोऽभवन् ॥ १०० ॥

एवं विधाय समव–सरणं शरणं श्रियः ॥ व्यंतरेंद्राः पुनः सर्वं । शेषं कर्म न्यवर्त्तयन् ॥
॥ १ ॥ सुरसंचारितस्वर्ण–पद्मदत्तपदांबुजः ॥ नवतत्वेश्वरो दाता । निधीनामपि तावतां ॥
॥ २ ॥ स्तूयमानोऽर्थिभिर्वाक्यै–श्चिंत्यमानः स्वमानसैः ॥ श्रवणैः श्रूयमानश्च । वीक्ष्यमा-
णोऽक्षिकोटिभिः ॥ ३ ॥ जगतो जीवितमिव । सर्वस्वमिव धर्मिणां ॥ पूर्वद्वारेण समव–स-
रणं प्राविशत्प्रभुः ॥ ४ ॥ त्रिभिर्विशेषकं ॥

सद्धर्मचक्रिणस्तस्य । धर्मचक्रं पुरोऽभवत् ॥ स्वर्णपद्मस्थितं पाप–तमोभास्करमंडलं ॥
॥ ५ ॥ चैत्यद्रुमः प्रभोः प्राप्य । क्षणादेव प्रदक्षिणां ॥ नवपल्लवपुष्पाढ्यो–ऽभवदात्ताभिमा-
नवत् ॥ ६ ॥ तीर्थाय नम इत्युच्चै–रुच्चरन् धर्मचक्रभृत् ॥ पूर्वाशाभिमुखः सिंहा–सनमध्या-

For Private And Personal Use Only

स्त तत्ववित् ॥ ७ ॥ व्यंतरा विभुरूपाणि । व्यधुर्दिक्षु परास्वपि ॥ यद्भेजे तैश्च तत्साम्यं ।
प्रभावः प्रभुभूरयं ॥ ८ ॥ आगत्य पूर्वद्वारेण । रत्नप्राकारमध्यगं ॥ प्रदक्षिणीकृत्य विभुं । न-
 त्वा नुत्वा च भक्तितः ॥ ए ॥ दिश्याग्नेय्यां न्यविक्षंत । साधवः स्वामिसंमुखाः ॥ तद्र्धाः स्व-
र्गिस्त्रियस्तस्थुः । साध्व्यस्तासां च पृष्टतः ॥ १० ॥ [illegible] ॥ प्रविश्य दक्षिणद्वारा । नाथं न-
त्वाथ तस्थिरे ॥ नैरुत्यां भवनज्योति–र्व्यंतराणां स्त्रियः क्रमात् ॥ ११ ॥ प्रत्यग्द्वारा प्रवि-
श्याथ । ज्योतिर्भवनव्यंतराः ॥ वायव्यां दिशि नत्वाथ । नाथं ते समुपाविशन् ॥ १२ ॥ स-
मागत्योत्तरद्वारा । नमस्कृतजिनांघ्रयः ॥ वैमानिका नरा नार्य । ऐशान्यामवतस्थिरे ॥१३॥
द्वितीयवप्रमध्यस्था । मृगसिंहाश्वसैरिभाः ॥ जिनालोकनमाहात्म्या–न्निषेद्धुर्गतमत्सराः ॥
॥ १४ ॥ देवासुरमनुष्याणां । वाहनान्यपि भूरिशः ॥ प्रांतवप्रस्थितान्यासन् । क्रमोऽयं भ-
गवन्मते ॥ १५ ॥ अपरेऽपि यथास्थानं । सिद्धगंधर्वकिन्नराः ॥ अभूवन् विभुवाक्यैक–पीयूषं 
पातुमुद्यताः ॥ १६ ॥ यद्योजनमिते सम–वसरणेऽपि कोटिशः ॥ मांति मर्त्योरगसुराः । स
प्रभावो विभुप्रभूः ॥ १७ ॥ तत्र सिंहासनासीनं । छत्रत्रयविराजितं ॥ चामरैर्वीज्यमानं च ।

सर्वातिशयभासुरं ॥ १८ ॥ सुप्रसन्नं प्रभापूरैः । प्लावयंतं जगत्त्रयं ॥ मध्यस्थदृक्दृष्टजनं । त्रैलोक्यैश्वर्यसुंदरं ॥ १९ ॥ सर्वसत्वहितं दिव्य-प्रभावप्रथिमावृतं ॥ जिनं दृष्ट्वा सुराः सर्वे । मुदमापुर्वचोऽतिगां ॥ २० ॥ त्रिभिर्विशेषकं ॥ शिरांस्यधूनयन् केचित् । केचन न्युंछनान्यपि ॥ विभोरुत्तारयामासु-स्तुष्टुवुः केऽपि नाकिनः ॥ २१ ॥

इतः सुराष्ट्रदेशाधि-नाथो गाधिनृपांगजः ॥ यादवो गिरिदुर्गेशो । रिपुमल्लोऽभ्युपागमत् ॥ २२ ॥ इत्थं समग्रलोकेषु । निषसेषु यथास्थिति ॥ विभोर्वचनपीयूष-पिपासुश्रवणेष्वथ ॥ २३ ॥ सौधर्मेंद्रः स्फुरद्भक्ति-हर्षाश्रुच्छुरितांबकः ॥ रोमांचकंचुकं बिभ्रत् । स्तोतुमेवं प्रचक्रमे ॥ २४ ॥ कुलकं ॥ जय स्वामिन् जिनाधीश । जय देव जगत्प्रभो ॥ जय त्रैलोक्यतिलक । जय संसारतारण ॥ २५ ॥ देवाधिदेव पूजार्ह । जय कारुण्यसागर ॥ शरणागतसंसारि-शरण्य करुणाकर ॥ २६ ॥ जय जंगमकल्पद्रो । जयार्हत्परमेश्वर ॥ परमेष्ठिन् जयानंत-जयाव्यक्त निरंजन ॥ २७ ॥ जय सिद्ध स्वयंबुद्ध । सर्वतत्वांबुधे जय ॥ जय सर्वसुखागार । जय नाथ महेश्वर ॥ २८ ॥ त्वमनादिरनंतस्त्वं । त्वमव्यक्तस्वरूपभाक् ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वामेव हि नमस्यंति । सुरासुरनरेश्वराः ॥ २९ ॥ त्वया मन्यामहे धन्यं । जगदेतज्जगत्प-
ते । नमस्तुभ्यमभेद्याय । परतर्ककुहेतुभिः ॥ ३० ॥ त्वत्तः शिवसुखानंदं । स्पृहयेऽहं तदी-

श्वर ॥ तव माहात्म्यमतुलं । त्रिबुधा अपि नो विदुः ॥ ३१ ॥ त्वयि देव परं ब्रह्म । प्रापैकं
सर्वतत्त्ववित् ॥ भगवन् सर्वदा मुक्तिं । त्वदायत्तां ततो जगुः ॥ ३२ ॥ जगदुद्धर्तुमासोऽसि ।
मानवं रूपमीश्वर ॥ अन्यथा वक्तृवंध्यासौ । सृष्टिरसृष्टिवद्भवेत् ॥ ३३ ॥ सर्वदेवेषु देवत्वं ।
त्वदर्शनैव जायते ॥ परेऽपि वीतरागत्वे । मुक्तिमाहुर्यतो बुधाः ॥ ३४ ॥ निश्चयेन जगत्पू-
ज्य—स्त्वमेव परमेश्वर ॥ रागद्वेषोपरुद्धानां । तत्वतोऽनर्हणा मता ॥ ३५ ॥ भाग्यहीना न
पश्यंति । भवंतं त्वन्यदेववत् ॥ चिंतारत्नं न सुलभं । भवेद्भुव्यन्यरत्नवत् ॥ ३६ ॥ यथा
त्वयि प्रभावर्द्धि—र्विश्वाश्चर्यकरी विभो ॥ न तथान्येषु धिषण्येषु । कथं भानुप्रभा भवेत् ॥
॥ ३७ ॥ यत्र संचरसे नूनं । स्युर्न तत्रेतयः क्षितौ ॥ योजनानां शते साग्रे । महिमा मह-
तामहो ॥ ३८ ॥ ध्येयस्त्वमेव भगवन् । ज्योतीरूपो हि योगिनां ॥ अष्टकर्मविघाताया—
ष्टांगयोगः कृतस्त्वया ॥ ३९ ॥ स्वामिनामपि यः स्वामी । गुरूणामपि यो गुरुः ॥ देवाना-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मपि यो देव–स्तस्मै तुभ्यं नमो नमः ॥ ४० ॥ जले वा ज्वलने वापि। कांतारे शत्रु संकटे॥
सिंहादि रोगविपदि । त्वमेव शरणं मम ॥ ४१ ॥

इति स्तुत्वा जिनाधीशं । सुराधीशः स्वभक्तितः ॥ निषसाद प्रभोर्वाचः । पातुं चात-
कवत्पयः ॥ ४२ ॥ सर्वभाषासमानार्थाः । सर्वसत्वहितंकराः ॥ सर्वातिशयसंपूर्णाः । सर्वत-
त्वैकसुंदराः ॥ ४२ ॥ यथार्थसुभगाः शांता । आयोजनमनुव्रताः ॥ वाचस्त्रिजगतामीश ।
उच्चचार जगन्मुदे ॥ ४३ ॥ युग्मं ॥ मृगनाभिर्यथा गंध–गुणेनानर्घ्यतामिता ॥ कृतकोऽसौ
तथा कायो । धर्मेणोत्तमां व्रजेत् ॥ ४४ ॥ धातवः सप्त च मला । बहिरंतर्वसंति ये ॥ ते-
नाशुचिरयं कायः । सर्वथैव निरर्थकः ॥ ४५ ॥ तेनाप्यहंयुर्मूढात्मा । प्रौढकर्मवशंगतः ॥ अ-
जरामरमानित्वा–यथेष्टं संचरत्यहो ॥ ४६ ॥ शस्त्रैर्नानाविधैस्तोयै–र्ज्वलनेन द्विधा विषैः ॥
रिपुभिर्व्याधिभिस्तीव्रै–रकालमरणैरपि ॥ ४७ ॥ शीतोष्णादिभिराघातै–र्जरयेष्टविपत्तिभिः
॥ इत्यादिभिर्महादोषैः । कायोऽयं क्लिश्यतेतरां ॥ ४८ ॥ युग्मं ॥ इत्थंभूतमसारं हि । दे-
हमासाद्य हे जनाः ॥ जगत्सारं जगत्पूज्यं । धर्मं कुरुत सत्वरं ॥ ४९ ॥ चिंतारत्नमनर्घ्यं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चेत् । प्राप्यते काचसंचयैः ॥ रेणुना चेत् हिरण्यं चेत् । सुधाब्धिर्नीरबिंदुना ॥ ५० ॥ गृहे-
ण यदि साम्राज्यं । देहेन सुकृतं यदि ॥ कस्तदा तन्न गृह्णीया-त्तत्वातत्वविचारकः ॥ ५० ॥
न माता न पिता भ्राता । न सुहृन्न च नृपतिः ॥ कश्चित्त्राता विना धर्मं । ततः सेव्यः स
एव हि ॥ ५१ ॥ सद्धर्माधिगमोपायै-रौचित्याचरणेन च ॥ सद्ज्ञानक्रियया जन्म । श्लाघ्य-
तामेति धीमतां ॥ ५२ ॥ धर्म एव जगन्नाथ-पदवीमर्हति स्फुटं ॥ यस्याज्ञानुगता लोकाः ।
स्युस्त्रैलोक्येऽपि नायकाः ॥ ५३ ॥ सेवनेन नृपादीनां । किं वृथात्मा विडंब्यते ॥ येन तत्रा-
पि नृपत्वं । दत्तं तं धर्ममाश्रय ॥ ५४ ॥ न लभ्यते विना धर्मं । किंचित् शर्म विचारय ॥
एके सहंति दुःखानि । परे सद्भोगभाजिनः ॥ ५५ ॥

रागादीनां वशे भूया । मा कदापि यतस्त्वमी ॥ स्वल्पसौख्यं विधायाथ । क्षिपंति नरका-
दिषु ॥ ५६ ॥ द्रोहिणो विषया एव । नापरे संति तर्कये ॥ आरंभरम्या यद्भूत्वा । तेंतः स-
र्वस्वघातिनः ॥ ५७ ॥ तमोवत्ते प्रसर्पंति । सर्वतस्त्वनिवारिताः ॥ येषां सद्धर्ममार्त्तंडो । न
स्फुरत्यतितीव्ररुक् ॥ ५८ ॥ प्रमादपटलध्वस्त-ज्ञाननेत्राः कुमार्गगाः ॥ पतंति नरकारण्ये ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुःखौघश्वापदाकुले ॥ ५९ ॥ जानंतोऽपि न जानंति । धर्ममाहात्म्यमुज्ज्वलं ॥ प्रत्यक्षमिष्टलाभेन । क्षितिचंद्रार्कदर्शनात् ॥ ६० ॥ प्रत्यक्षंपुण्यपापानां । फलमेतद्विभाव्यते ॥ दिनदोषासुखदुःखाव–बोधस्वापनिदर्शनात् ॥ ६१ ॥ प्रभवंति न यत्क्षुद्रा । रक्षःसिंहोरगादयः ॥ स्फुटं धर्मस्य माहात्म्य–मेतत्स्फुरति सर्वतः ॥ ६२ ॥ प्रमादः सर्वथा त्याज्यो । धर्मशेही महाबलः ॥ हते धर्मेऽस्य देहे स्यु–र्व्याधिबंधविपत्तयः ॥ ६३ ॥ इत्थं विचार्य चित्तेन । पुण्यपापफलं स्फुटं ॥ येन कल्याणसंसिद्धिः । स्याद्भजध्वं तमेव हि ॥ ६४ ॥ एवं धर्मसुधास्यंदि । वचनं त्रिजगद्गुरोः ॥ निपीय निभृतं लोका । मुदमापुरखंडितां ॥ ६५ ॥ संतृप्ता इव पीयूषै–र्ज्योत्स्नया छुरिता इव ॥ निधानलब्धिसंपन्ना । इव भव्यास्तदाभवन् ॥ ६६ ॥ जगृहुः संयमं केऽपि । सम्यक्त्वमपरे पुनः ॥ दधुर्भद्रकभावं चा–परे भव्याः प्रमोदतः ॥६७॥ सौधर्मेंद्रः सदोभिद्रः । पुण्यकर्मणि भक्तिभाग् ॥ दृष्ट्वा शत्रुंजयं तीर्थ–मागतिं तत्र च प्रभोः ॥ ६८ ॥ श्रीयुगादिजिनस्यार्चां । पूजितां त्रिजगज्जनैः ॥ राजादनीं क्षरत्क्षीरां । तदधः पादुके प्रभोः ॥ ६९ ॥ नदीः सरांसि कुंडानि । पर्वतांश्चमहीरुहान् ॥ वनानि नगराण्युच्चैः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शिखराणि निरीक्ष्य च ॥ ६६ ॥ नमस्कृत्य जिनस्यांह्री । हर्षोत्कर्षवशंवदः ॥ पाणी च शे-
खरी कुर्वन् । लसद्रोमांचकंचुकः ॥ ६७ ॥ जगाद जगतामीशं । सुधासोदरया गिरा ॥ प-
र्षदां हर्षदायिन्या । प्रसत्तिगुणगर्भया ॥ ६८ ॥ पंचभिः कुलकं ॥ भगवन् जगदाधार । ज-
गत्तीर्थं त्वमेव हि ॥ त्वयाधिष्टितमेतत्तु । विशेषाद्भावि पावनं ॥ ६९ ॥ अत्र किं दीयते
दानं । किं तपः तप्यते विभो ॥ किं व्रतं च जपः कोऽत्र । सिद्धयः का भवंत्यपि ॥ ७० ॥
किं फलं प्राप्यते ध्येयं । किमत्र सुकृतं च किं ॥ कदायं पर्वतो जातः । किमर्थमिह का
स्थितिः ॥ ७१ ॥ सोऽयं नवीनः प्रासादः । कृतिना केन कारितः ॥ चंद्रज्योत्स्नेव रुचिरा ।
प्रतिमा केन निर्मिता ॥ ७२ ॥ प्रभोः पुरः खड्गधरौ । कौ सुरौ द्वारि संगतौ ॥ वामदक्षि-
णयोः पार्श्वे । के मूर्त्ती केऽपरे सुराः ॥ ७३ ॥ राजादनी तथा कैषा । तदधः कस्य पादुके॥
मयूरप्रतिमा कैषा । कोऽयं यक्षोऽत्र तिष्ठति ॥ ७४ ॥ का देवी विलसत्यत्र । मुनयः केऽत्र
संस्थिताः ॥ एताः काः का महानद्यः । कानि कानि वनानि च ॥ ७५ ॥ केऽमी द्रुमास-
त्फलिनः । सरः कस्य मुनेरदः ॥ अपराण्यपि कुंडानि । कानि कानि जगद्गुरो ॥ ७६ ॥

॥ २७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रसकूपी रत्नखानिः । किं प्रभावा गुहाश्च काः ॥ केऽमी पंच नराः स्वामिन् । सस्त्रीका लेपनिर्मिताः ॥ ७७ ॥ गायंत्यमी केऽत्र गुणान् । नाभेयस्य जनातिगान् ॥ दिश्यप्राच्यां गिरिः कोऽयं । कः प्रभावोऽस्य विश्रुतः ॥ ७८ ॥ शृंगाणि कानि कानीह । चतुर्दिक्षु पुराणि च ॥ कथमत्रागतो वार्द्धिः । केऽभवन् पुरुषोत्तमाः ॥ ७९ ॥ सेत्स्यंत्यत्र कियत्कालं । किंयद्रूपोऽस्ति पर्वतः ॥ भविष्यंति कियंत्योऽत्र । नाथोऽशराः सुमेधसां ॥ ८० ॥ इत्यादि सकलं स्वामिन् । कृपया वक्तुमर्हसि ॥ आश्रितेषु जगत्पूज्याः । स्वयं वात्सल्यकारिणः ॥ ८१ ॥ [illegible]भिः कुलकं ॥

श्रुत्वेति भगवान् वीरः । सौधर्मेंद्रमुखांबुजात् ॥ तीर्थप्रभाववृद्ध्यर्थं । भव्यानां बोधहेतवे ॥ ८२ ॥ श्रोतॄणां पापनाशाय । गिरा गंभीरया ततः ॥ उवाच तीर्थमाहात्म्यं । न संक्षिप्तं न विस्तृतं ॥ ८३ ॥ युग्मं ॥ सर्वतीर्थाधिराजस्य । शत्रुंजयगिरेः प्रथां ॥ वक्तुः श्रोतुश्च पुण्याय । सुरराज स्फुटं शृणु ॥ ८४ ॥ जंबूद्वीप इति द्वीपो । लक्षयोजनविस्तृतः ॥ संपूर्णशशिसंकाशो । निःसपत्नश्रिया त्वयं ॥ ८५ ॥ जंबूद्रुमः पल्लवौघै–र्नृत्यन् यत्रास्ति ह-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





धितः ॥ जिनचैत्यानि मङ्खाख्या–संगतानीति शाश्वतः ॥ ७६ ॥ सप्तवर्षोन्मिता वर्ष–धराः षट् तत्र शाश्वताः ॥ भरतं हैमवंतं च । हरिवर्षं विदेहकं ॥ ७७ ॥ रम्यकमैरण्यवंत–वर्षा-वैरवतस्तथा ॥ हिमवान् महाहिमवान् । निषधो नीलवानपि ॥ ७८ ॥ रूप्यश्च शिखरी वर्ष–धरा धाराधरा अमी ॥ प्राच्यप्रतीच्यपाथोधि–संगताश्चैत्यमंडिताः ॥ ७९ ॥ चतुर्भिः कला-पकं ॥ महाविदेहखंडांतः । कूटलक्षैरलंकृतः ॥ कांचनो मेरुरित्यस्ति । पर्वतः क्षितिना-भिगः ॥ ८० ॥ लक्षयोजन तुङ्गत्वे । वनराजिविराजितः ॥ शाश्वतार्हच्चैत्यचूला–चंचच्छतां-शुशोभितः ॥ ८१ ॥ [illegible] ॥ भरतं पुण्यभरितं । वयं मन्यामहे ह्यदः ॥ अपि स्युर्दुःषमा-काले । यज्जनाः पुण्यभाजिनः ॥ ८२ ॥

तत्र विश्वस्तकुर्नीति–र्निरीतिः प्रीतियुग्जनः ॥ सुराष्ट्रः सर्वराष्ट्रेषु । मुख्यदेशोऽयमुच्यते ॥ ८३ ॥ अल्पोदकेऽपि शस्यानि । स्वल्पपुण्येऽपि सत्फलं ॥ कषायापगमः स्वल्प–प्रती-काराश्च जायते ॥ ८४ ॥ निर्दोषाणि जलान्यत्र । पवित्राः संति पर्वताः ॥ सदा रसाढ्या व-सुधा । सर्वधातुमयोत्तमा ॥ ८५ ॥ पदे पदेऽपि तीर्थानि । सर्वपापहराणि च ॥ नद्यः पवि-



For Private And Personal Use Only

त्रनीरौघाः । सत्प्रभावमया ह्रदाः ॥ ९६ ॥ सरांसि विकसद्गंधि–सरोजानि समंततः ॥ कुंभा-
नि शीततसांबु–मंभितानि यदंतरा ॥९७॥ पदे पदे निधानानि । रसकुप्यो गिरौ गिरौ ॥ म-
हाप्रभावा औषध्यो । वृक्षा यत्र सदाफलाः ॥ ९८ ॥ निष्पद्यते स्वयं धान्य–मपि पूर्वोत्सव-
दूघनं ॥ पवित्रा मृत्तिका यत्र । तीर्थस्नानफलप्रदा ॥ ९९ ॥ वज्रवैदुर्यसूर्याश्म–मौक्तिकेंद्र-
मणीगणाः ॥ उत्पद्यंते स्वयं यत्र । पूजार्थं प्रथमप्रभोः ॥ ३०० ॥ रत्नाकरः स्फुरद्रत्नैः । कि-
रन् यस्य गुणानिव ॥ नृत्यत्यसावूर्मिहस्तै–र्गर्जन् भक्तिपरः प्रभौ ॥ १ ॥ तीर्थरक्षार्थमा-
नीतः । सगरेणाहमत्र यत् ॥ भिंभीरपिंभदंभेन । हसतीवेति सागरः ॥ २ ॥ चतुर्विंशति
रर्हंत–श्चेरुर्यत्र सुरार्चिताः ॥ चक्रवर्तिवासुदेव–बलदेवमुखा अपि ॥ ३ ॥ अनंता मुनयः
सिद्धाः । सेत्स्यंत्यत्र घनाः पुनः ॥ अभूवन् संघपुरुषा । यत्र धर्मधुरंधराः ॥ ४ ॥ उदयो
यत्र कृष्णाद्यै–रवापि रिपुमर्दनात् ॥ राजानो नीतिनिपुणा । अभूवन् बहवः परे ॥४॥ लो-
काराधनसंलब्ध–कीर्तयोऽरिनिषूदनाः ॥ त्यागिनः सुकृताधाराः । सर्वत्र समदृष्टयः ॥ ५ ॥
युग्मं ॥ सदार्जवा यत्र जनाः । प्रसन्नास्या विचक्षणाः ॥ संतोषिणः सदा हृष्टा । निंदामा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





त्सर्यवर्जिताः ॥ ६ ॥ स्वदारनिरता नित्यं । परदारपराङ्मुखाः ॥ सत्यवाचः सुकृतिनो । न परद्रोहबुद्धयः ॥ ७ ॥ शांता न वैरनिरता । मायालोजनृतो न हि ॥ उदारा विशदाचाराः। सुखिनो निवसंत्यमी ॥ ८ ॥ त्रिन्निर्विशेषकं ॥ नार्यः शीलगुणैरार्याः । पतिन्नक्तिपरायणाः॥ स्मितानना रूपवत्यः । परिवारेषु वत्सलाः ॥ ए ॥ गुरुन्नक्ता धवे रक्ताः । सुन्नगा नाग्यन्नासुराः ॥ बहुपुत्रान्विता लज्जा—सज्जा राजीवलोचनाः ॥ १० ॥ सकौतुकाः स्वल्परोषाः सुवेषा मुग्धबुद्धयः ॥ मृदुवाचोऽतिगंन्नीरा । यत्र संति गुणिप्रियाः ॥ ११ ॥ त्रिन्निर्विशेषकं ॥ पुत्रा मातृजने नक्ताः । पितुराज्ञाकराः सदा ॥ कलासु कुशलाः शांताः । सुशीलाः संन्नवंत्यमी ॥ १२ ॥ नृत्याः स्वामिषु सन्नक्ताः । कार्यकालेऽनुयायिनः ॥ सूराः स्वल्पेऽपि संतुष्टा। अनुरक्ताः प्रियंकराः ॥ १३ ॥ आशयज्ञाः सन्नायोग्याः । सुवाचः स्नेहला घनं ॥ स्वामिद्वेषिणि सद्वेषाः । संति ते तत्प्रिये प्रियाः ॥ १४ ॥ युग्मं ॥ आस्तिक्यौचित्यचतुराः । क्रमादाक्षिण्यशालिनः ॥ षड्दर्शनसमासेव्याः । क्षत्रिया यत्र सात्विकाः ॥ १५ ॥ गावः पीना बहुक्षीरा । महिष्योऽपि महाबलाः ॥ अचौरहार्याः सुशृंग्य—श्चरंति गतबंधनाः ॥ १६ ॥ तुंगा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 स्तुरंगास्तरला । वृषज्ञाः स्कंधबंधुराः ॥ संग्रामसागरद्वीपा । गजा यत्र विज्ञांति च ॥ १६ ॥ 
अन्येऽपि हि महासत्वा । न परज्ञातिमत्सराः ॥ न क्रूरा न ज्ञयोद्विग्ना–स्तिर्यंचो यत्र संति
 च ॥ १७ ॥ नगराणि महाशाल–मालितान्युत्सृतानि च ॥ अर्हच्चैत्यचलत्केतू–ल्लिखितद्युपु-
राणि च ॥ १८ ॥ जैनसाधुमुखांज्जोजो–क्तीर्णसिद्धांतसारतः ॥ विलीनांहांसि पुण्यानि ।
सलक्ष्मीकजनानि च ॥ १९ ॥ उच्चैः सौधानि हृद्यानि । ज्ञृतान्यखिलवस्तुज्ञिः ॥ कृतकृ-
त्यार्थसार्थानि । यत्र संति पुरंदर ॥ २० ॥ त्रिज्ञिर्विशेषकं ॥

तस्य श्रीमत्सुराष्ट्राया । देशस्य मुकुटोपमः ॥ शत्रुंजयपर्वतोऽयं । स्मृतोऽपि बहुपाप-
हा ॥ २१ ॥ ज्ञायते केवलज्ञाना–न्माहात्म्यं नास्य पार्यते ॥ वक्तुं तथापि देवेंद्र । कथ्यते
तव पृच्छतः ॥ २२ ॥ ज्ञात्वाप्यनुक्तिशक्त्या चे–न्मौनमाधीयते यदा ॥ तदा मूकरसास्वाद–
संनिज्ञत्वं प्रजायते ॥ २३ ॥ त्रैलोक्यैश्वर्यधाम्नास्य । नाम्नापि दुरितं व्रजेत् ॥ यथा श्रीपा- 
र्श्वनाथस्यो–त्कीर्त्तनेनाहिजं विषं ॥ २४ ॥ शत्रुंजयः पुंडरीकः । सिद्धिक्षेत्रं महाचलः ॥ सु-
रशैलो विमलाद्रिः । पुण्यराशिः श्रियः पदं ॥ २५ ॥ पर्वतेंद्रः सुज्ञद्रश्च । दृढशक्तिरकर्मकः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ मुक्तिगेहं महातीर्थं । शाश्वतः सर्वकामदः ॥ २६ ॥ पुष्पदंतो महापद्मः । पृथ्वीपीठं प्र-
भोः पदं ॥ पातालमूलं कैलासः । क्षितिमंडलमंडनं ॥ २७ ॥ शतमष्टोत्तरं नाम्ना–मित्याद्यु-
क्तममुष्य हि ॥ महाकल्पे विजानीयात् । सुधर्मोक्तेऽतिशर्मदं ॥ २८ ॥ चतुर्भिः कलापकं ॥
नामान्यमूनि यः प्रातः । पठत्याकर्णयत्यपि ॥ भवंति संपदस्तस्य । व्रजंति विपदः क्षयं ॥
॥ २९ ॥ तीर्थानामुत्तमं तीर्थं । नगानामुत्तमो नगः ॥ क्षेत्राणामुत्तमं क्षेत्रं । सिद्धाद्रिरयमी-
रितः ॥ ३० ॥ युगादौ प्रथमं तीर्थ–मिदमासीत् शिवप्रदं ॥ जज्ञिरेऽन्यानि तीर्थानि । शत्रुं-
जयगिरेरनु ॥ ३१ ॥ त्रैलोक्ये यानि तीर्थानि । पवित्राणि सुरेश्वर ॥ दृष्टानि तानि सर्वाणि
। दृष्टे शत्रुंजये गिरौ ॥ ३२ ॥ पंचदशकर्मभूमौ । नाना तीर्थानि संति हि ॥ शत्रुंजयसमं
तेषु । नापरं पापहृत् क्वचित् ॥ ३३ ॥ कृत्रिमेष्वन्यतीर्थेषु । पुरोद्याननगादिषु ॥ जपैस्त-
पोभिर्नियमै–र्दानेनाध्ययनेन च ॥ ३४ ॥ अर्जयंति हि यत्पुण्यं । तस्माद्दशगुणं भवेत् ॥
जिनतीर्थेषु जंबूद्रु–चैत्ये शतगुणं ततः ॥ ३५ ॥ शाश्वते धातकीवृक्षे । तत्सहस्रगुणं मतं ॥
पुष्करद्वीपचैत्येषु । रोचकेष्वंजने गिरौ ॥ ३६ ॥ क्रमात्तस्माद्दशगुणं । पुण्यं भवति वास-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व ॥ नंदीश्वरे कुंमलाद्रौ । मानुषोत्तरपर्वते ॥ ३७ ॥ वैन्नारेऽपि समेदाद्रौ । वैताढ्ये मेरुपर्व-
ते ॥ रैवतेऽष्टापदे चैव । क्रमात्कोटिगुणं न्नवेत् ॥ ३८ ॥ शत्रुंजयेऽनंतगुणं । दर्शनादेव त-
न्मतं ॥ सेवनात्तु फलं शक्र । यत्तद्वक्तुं न पार्यते ॥ ३९ ॥ त्रिन्निः कुलकं ॥ अशीतिं योज-
नान्याद्ये । विस्तृतोऽयमरे पुनः ॥ द्वितीये सप्ततिं तानि । तृतीये षष्टिमद्रिराट् ॥ ४० ॥ तु-
र्ये पंचाशतं चैव । पंचमे द्वादशापि च ॥ सप्तरत्नीं तथा षष्ठे । प्रन्नावोऽस्य पुनर्महान् ॥४१॥
हानिर्यथावसर्पिण्या–मुत्सर्पिण्यां तथोदयः ॥ मानस्यैतस्य तीर्थस्य । महिम्नो न कदापि हि
॥ ४२ ॥ पंचाशतिं योजनानि । मूलेऽस्य दश चोपरि ॥ विस्तार उच्छ्रयस्त्वष्टौ । युगादीशे
तपत्यन्नूत् ॥ ४३ ॥ नगोऽयमेव न परे । प्रलयेऽपि न यः क्षयी ॥ आश्रिता अपि यल्लोका
। लन्नंते सुखमक्षयं ॥ ४४ ॥ शत्रुंजयो रैवतश्च । सिद्धिक्षेत्रं सुतीर्थराट् ॥ ढंकः कपर्दी लौ-
हित्य–स्तालध्वजकदंबकौ ॥ ४५ ॥ मरुदेवो बाहुबलिः । सहस्राख्यो न्नगीरथः ॥ अष्टोत्तर-
शतकूटो । नगेशः शतपत्रकः ॥ ४६ ॥ सिद्धिराट् सहस्रपत्रः । पुण्यराशिः सुरप्रियः ॥ का-
मदायी चेत्यस्यास–न्नेकविंशतिरह्वयः ॥ ४७ ॥ त्रिन्निर्विशेषकं ॥ प्रत्येकं महिमाख्याने । यां-

॥ ३४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ति वर्षाण्यनेकशः ॥ तस्मात्प्रकटरूपाणा–मेषु केषांचिदुच्यते ॥ ४८ ॥
शत्रुंजये मुख्यशृंगं । सिद्धिक्षेत्रमिदं पुनः ॥ आरुह्यते हि लोकाग्र–मिहारूढैरयत्नतः ॥
॥ ४९ ॥ मेर्वादिभ्योऽप्ययं शैलः । शंके गुरुतरो गुणैः ॥ यमारूढा नराः सिद्धिं । लभंते क-
रगामिव ॥ ५० ॥ मेरुसम्मेतवैभार–रुचकाष्टापदादयः ॥ सर्वे तीर्थावतारास्ते । संति श-
त्रुंजये गिरौ ॥ ५१ ॥ इंद्रादयोऽपिये देवा । देव्योऽपि भुवनत्रये ॥ सेवंते यं सदा तीर्थ–राजं
सद्भतिकाम्यया ॥ ५२ ॥ नमः श्रीतीर्थराजाय । सर्वतीर्थमयात्मने ॥ यात्राफलं लभंतेऽपि ।
स्वस्थानस्थाः स्मृतेरपि ॥ ५३ ॥ अन्यत्र पूर्वकोट्या यत् । शुद्धध्यानेन शुद्धधीः ॥ प्राणी ब-
ध्नाति सत्कर्म–मुहूर्त्तादिह तध्ध्रुवं ॥ ५४ ॥ तीर्थानि पुण्यपर्वाणि । तपोदानान्यनेकशः ॥ नि-
त्यमाराधितान्येव । येन शत्रुंजयः स्मृतः ॥ ५५ ॥ नास्त्यतः परमं तीर्थं । सुरराज जगत्त्र-
ये ॥ यस्यैकवेलं नाम्नापि । श्रुतेनांहःक्षयो भवेत् ॥ ५६ ॥ पंचाशद्योजने क्षेत्रे । मुक्तिदे
स्पर्शनादपि ॥ मुख्यशृंगं पुनरिदं । स्मृत्या हत्यादि दोषहृत् ॥ ५७ ॥ आसाद्य मानवं ज-
न्म । प्राप्य बोधिं च सद्गुरोः ॥ न पूजितमिदं तीर्थं । येन तस्य वृथाखिलं ॥ ५८ ॥ श-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रुंजयमिदं तीर्थं । न यावत्पूजितं भवेत् ॥ गर्भवासो हि तस्यास्ति । तावता दूरतो वृषः ॥
॥ ५९ ॥ वृषः सद्वृषरूपेण । जिनपादतले स्थितः ॥ अत्रागतनरं वीक्ष्य । भजते भावतो
भृशं ॥ ६० ॥ कथं भ्रमसि मूढात्मन् । धर्मो धर्म इति स्मरन् ॥ एकं शत्रुंजयं शैल—मेक-
वेलं निरीक्ष्य ॥ ६१ ॥ कृता शत्रुंजये यात्रा । न येन जगतां गुरुः ॥ नापूजि हारितं तेन ।
स्वजन्म सकलं मुधा ॥ ६२ ॥ अन्यतीर्थेषु यद्यात्रा—शतैः पुण्यं भवेन्नृणां ॥ तदेकयात्रया
पुण्यं । शत्रुंजयगिरौ स्फुटं ॥ ६३ ॥ कर्मभ्यः पंकरूपेभ्यो । विमलीकरणाद्वयं ॥ विमलाद्रि-
र्भवद्भूतां । भद्राय स्तादघौघहृत् ॥ ६४ ॥ पुंडरीकाक्षि पश्येदं । पुंडरीकमितीरणात् ॥ श्र-
वणादपि दंपत्यो—रित्यभूदंहसां क्षयः ॥ ६५ ॥ प्रत्यहं पुंडरीकाद्रिं । ध्यायेद्यस्तु सुवासनः ॥
संसारतापमुन्मुच्य । स प्राप्नोति परं पदं ॥ ६६ ॥ एकेन पुंडरीकेण । निस्तापं जायते
जगत् ॥ द्वाभ्यां श्रीपुंडरीकाभ्यां । सौख्याद्वैतं भविष्यति ॥ ६७ ॥

एकदा पुंडरीकं यः । सेवते चैकमानसः ॥ तस्यैकं पुंडरीकं हि । सततं सुखमेधते ॥
॥ ६८ ॥ सरः समुद्रः शेषाहि—र्नालं दलततिर्दिशः ॥ पुंडरीकं गिरिर्देवः । कर्णिका जगतो

For Private And Personal Use Only

मुदे ॥ ६९ ॥ पुंडरीकेण गुरुणा । मोचिता जाड्यमंगिनः ॥ असत्पथं खंडयंति । प्रमा-
णपदमागताः ॥ ७० ॥ श्रिता येऽमुं पुंडरीकं । भ्रमरास्ते भवंति न ॥ ये पुनस्तं न
सेवंते तादृशास्ते मलीमसाः ॥ ७१ ॥ अवाप्य त्रिपदीं मर्त्याः । पुंडरीकममुं श्रिताः ॥
हसंति पुंडरीकं तत् । जलजं षट्पदाश्रितं ॥ ७२ ॥ पुंडरीकाभिधाधारि । धार्यते मूर्ध्नि भू-
मिपैः ॥ छत्रं न चेदखंडश्रीः । कथं तत्रातिवल्गति ॥ ७३ ॥ सद्द्रव्यं सत्कुले जन्म । सि-
द्धक्षेत्रं समाधयः ॥ संघश्चतुर्विधो लोके । सकाराः पंच दुर्लभाः ॥ ७४ ॥ पर्वतः पुंडरीकोऽयं
। पात्रं श्रीप्रथमप्रभुः ॥ परमेष्ठिः पर्युषणं । पकाराः पंच दुर्लभाः ॥ ७५ ॥ शत्रुंजयः शि-
वपुरं । सरित् शत्रुंजयाभिधा ॥ श्रीशांतिः शमिनां दानं । शकाराः पंच दुर्लभाः ॥ ७६ ॥
आध्यासितं महद्भिर्यत् । सत्तीर्थं तदुच्यते ॥ यदत्रैयरुरर्हंतो—ऽनंतास्तीर्थं ततो महत् ॥
॥ ७७ ॥ जिना आगता अत्रैयुः । सिद्धाश्चात्रैव वासव ॥ मुनयश्चाप्यसंख्याता— स्तेन तीर्थ-
मिदं महत् ॥ ७८ ॥ चराचराश्च ते जीवा । धन्या येऽत्र सदा नगे ॥ धिग् तस्य जीवितं ये-
न । न दृष्टं तीर्थमप्यदः ॥ ७९ ॥ मयूरसर्पसिंहाद्या । हिंस्रा अप्यत्र पर्वते ॥ सिद्धाः सि-

ध्यंति सेत्स्यंति । प्राणिनो जिनदर्शनात् ॥ ॥ ८० ॥ बाल्येऽपि यौवने वार्धये । तिर्यक्जातौ
च यत्कृतं ॥ तत्पापं विलयं याति । सिद्धाद्रेः स्पर्शनादपि ॥ ८१ ॥ तद्दानं तच्च चारित्रं ।
तच्छीलं तत्तपस्त्रिधा ॥ तद्ध्यानमेकवेलं यत् । श्रीशत्रुंजयसेवनं ॥ ८२ ॥ ईषद्धनलवोऽप्युप्तः ।
सत्क्षेत्रेऽत्र महाफलः ॥ श्रेयो यद् दिशति ज्ञानी । वेदैतन्न परः पुनः ॥ ८३ ॥ ये पुनर्द्रव्य-
लक्षाणि । विधिना बहुभक्तितः ॥ जिनार्चयात्र सफली—कुर्वते ते नरोत्तमाः ॥ ८४ ॥ यात्रां
पूजां संघरक्षां । यात्रिकस्तोमसत्कृतिं ॥ कुर्वाणोऽत्र सगोत्रोऽपि । स्वर्गलोके महीयते ॥
॥ ८५ ॥ यात्रिकान् येऽस्य बाधंते । नरा द्रव्यं हरंति ये ॥ पतंति नरके घोरे । सान्वया-
स्तेंहसां भरात् ॥८६॥ मनसापि यात्रिकाणा—मतोऽस्य द्रोहचिंतनं ॥ न कार्यं जन्मसाफल्य
—मिच्छतार्जयता सुखं ॥ ८७ ॥ अन्यतीर्थकृतं पाप—मेकजन्मानुगं भवेत् ॥ शत्रुंजये कृतं
तच्च । वृद्धिमेति भवे भवे ॥ ८८ ॥ स्वर्लोके यानि बिंबानि । भूतले यानि वासव ॥ पाता-
लेऽपि तदर्चातो—ऽप्यधिकेह जिनार्चना ॥ ८९ ॥ चिंतामणौ पाणिगते । किं दारिद्र्यभयं भ-
वेत् ॥ उदिते च रवौ किं स्यात् । तमिस्रं जनतांध्यकृत् ॥ ९० ॥ धाराधरे क्षरन्नीरे । किं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दवाग्निर्दहेद्वनं ॥ किमग्नौ शीतभीतिः स्यात् । किं मृगारौ मृगाद्भयं ॥ ९१ ॥ वैनतेयाश्रिते
पुंसि । नागाः किं प्रभविष्णवः ॥ किमातपभयं कल्प–वृक्षे प्रांगणसंगिनि ॥ ९२ ॥ शत्रुं-
जये तथा तीर्थ–नाथे संनिधिवर्त्तिनि ॥ पापभीतिः कथं चित्ते । चिंत्यते नरकप्रदा ॥ ९३ ॥
~~चतुर्भिः कलापकं~~ ॥ तावद्गर्जंति हत्यादि–पातकानीह सर्वतः ॥ यावत् शत्रुंजयेत्याख्या ।
श्रूयते न गुरोर्मुखात् ॥ ९४ ॥ न भेतव्यं न भेतव्यं । पातकेभ्यः प्रमादिभिः ॥ श्रूयतामे
कवेलं श्री–सिद्धक्षेत्रगिरेः कथा ॥ ९५ ॥ वरमेकदिनं सिद्ध–क्षेत्रे सर्वज्ञसेवनं ॥ न पुनस्ती-
र्थलक्षेषु । भ्रमणं क्लेशभाजनं ॥ ९६ ॥ पदे पदे विलीयंते । भवकोटिभवान्यपि ॥ पापानि
पुंडरीकाद्रि–यात्रां प्रतियियासतां ॥ ९७ ॥ एकैकस्मिन् पदे दत्ते । पुंडरीकगिरिं प्रति ॥
भवकोटिकृतेभ्योऽपि । पातकेभ्यः स मुच्यते ॥ ९८ ॥ न रोगो न च संतापो । न दुःखं
न वियोगिता ॥ न दुर्गतिर्न शोकश्च । पुंसां शत्रुंजयस्पृशां ॥ ९९ ॥ छिद्यंते नास्य पाषा-
णाः । खन्यते न महीतलं ॥ सकृन्मूत्रादि नो कार्यं । सुधियात्र मुमुक्षुणा ॥ ४०० ॥
गिरिरेव तीर्थरूपो । दर्शनस्पर्शनेन यः ॥ भुक्तिमुक्तिसुखास्वाद–दातासौ सेव्यते न कैः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ १ ॥ विशेषादादिदेवेन । भूषितोऽयं नगोत्तमः ॥ भिनत्ति घनपापानि । दुःकर्माणि तपो
यथा ॥ २ ॥ तप्यते चेत्तपस्तीव्रं । दीयते दानमुत्तमं ॥ सुप्रसन्नो जिनश्चेत्स्या–त्तदास्य क्षणसे-
वनं ॥ ३ ॥ सर्वाण्यपि हि तीर्थानि । संति पुण्यानि भूतले॥ प्रकाश्यते पुनस्तेषां । वाग्भि-
र्माहात्म्यमुच्चकैः ॥ ४ ॥ पुनस्तीर्थपतेरस्य । माहात्म्यमिह केवली॥ वेत्ति वक्तुं समर्थो न।
सोऽपि दृष्टजगद्गुणः ॥ ५ ॥ युग्मं ॥ श्रीयुगादिजिनाधीश–पादपंकजसेवनात् ॥ सेव्या
भवंति सर्वत्र । जगद्वंद्या निरेनसः ॥६॥ स्नात्रं कुर्वंति पयसा । शीतलेन सुगंधिना ॥ श्री-
युगादिप्रभोस्ते स्यु–रमलाः शुभकर्मभिः ॥७॥ पंचामृतेन कुर्वंतः । स्नात्रं श्रीजगदीशितुः
॥ ते प्राप्य पंचमं ज्ञानं । लप्स्यंते पंचमीं गतिं ॥ ८ ॥ श्रीखंडेनापि ये पूजां । प्रकुर्वंति
प्रभोर्नराः ॥ अखंडश्रीसहायास्ते । कीर्तिसौरभ्यभाजिनः ॥ ९ ॥ घनसारैर्जगत्सारा । नरा
अस्तारिविग्रहाः ॥ कस्तूरिकाभिर्गुरवो–ऽगुरुभिः कुंकुमैः समाः ॥ १० ॥ अर्चयंतो जिनं
भक्त्या । कीर्तिवासितविष्टपाः ॥ भवंत्यत्र सुराधीश । परत्रामुत्र नीरुजः ॥ ११ ॥ युग्मं ॥
पूजयंति जिनं पुष्पै–र्ये सुगंधिभिरादृताः ॥ सुगंधिदेहा पूजार्हा–स्ते स्युस्त्रैलोक्यवासिनां ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ १२ ॥ सुगंधिवस्तुभिश्चान्यैः । पूजयंतो जिनं मुदा ॥ सम्यक्त्वकलिताः श्राद्धाः । सिद्ध्यं-
त्यत्र समाधिना ॥ १३ ॥ धूपदानाद्विभोः पक्षो–पवासफलमाप्यते ॥ कर्पूरधूपाच्च फलं । भ-
वेन्मासोपवासजं ॥ १४ ॥ वासैर्वासितविश्वेशा । वासोभिर्विश्वभूषणाः ॥ पूजयंतो विभुं म-
र्त्या । भवंत्यमरपूजिताः ॥ १५ ॥ अखंडैस्तंडुलैर्मर्त्या । अखंडसुखसंपदः ॥ फलैः कलैर्ढौ-
कितैश्च । भवंति फलितेहिताः ॥ १६ ॥ स्तूयंते स्तुतिकर्त्तारो । दीपदा दीप्रदेहभाः ॥ नैवे-
द्यदा सुखैः सख्यं । विंदंति प्रमदान्विताः ॥ १७ ॥ आरात्रिकविधानेन । यशोलक्ष्मीसुखानि
च ॥ आरात्रिकमिदं दृष्ट्वा । नार्त्तिमासादयंति ते ॥ १८ ॥ नम्यंते नतिकर्त्तारो । गीयंते गी-
तपूजकाः ॥ विधीयते प्रभौ यादृक् । तादृक् फलमवाप्यते ॥ १९ ॥ प्रभोः पुरः कृते दीपे ।
प्रयाति भवजं तमः ॥ श्रीमंगलप्रदीपेऽपि । मंगलान्यापतंति च ॥ २० ॥ भूषयंति विभुं
भूरि–भूषणैर्भाग्यसंभृताः ॥ ये ते भवंत्यलंकारा । भुवनस्यापि पावनाः ॥ २१ ॥ जगन्ना-
थस्य यात्रार्थं । ये रथं ददते जनाः ॥ चक्रवर्त्तिश्रियस्तेषां । समायांति स्वयंवराः ॥ २२ ॥
नीराजनाप्रदानेन । नीरजस्कत्वमाप्यते ॥ प्रतापातपसंतप्त–रिपुराजिश्च राजते ॥ २३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्युः श्रियः सर्वतोमुख्यो-ऽमुष्मिन् दत्तेन वाजिना॥ गजेन गजगामिन्यः । कामिन्यः स्युः
शुभव्रताः ॥ २४ ॥ प्रभोः पंचामृतस्नात्र-कृते गोदानमुत्तमं ॥ दत्ते मुदा यः स भवे-द्भोप-
तिर्गजगर्वितः ॥ २५ ॥ चंद्रोदयमहाछत्र-सिंहासनसुचामरैः ॥ दत्तैर्जनाः पुनश्चैतान् । ल-
भंते न्यासगानिव ॥ २६ ॥ अत्र महाध्वजं योऽपि । ददन् गुरुनियोगतः ॥ अनुत्तरसुखं भु-
क्त्वा । पदं प्राप्नोति शाश्वतं ॥ २७ ॥ सुवर्णरूप्यकुप्यैश्च । कलशान् योऽत्र कारयेत् ॥ स्व-
प्नेऽपि न स्यात्तस्यार्त्तिः । कलशं चैति शाश्वतं ॥ २८ ॥ परिधापनिकां पुण्य-पट्टसूत्रादिगुं-
फितां ॥ कारयेद्यस्तु सोऽत्र स्या-द्विश्वशृंगारकारणं ॥ २९ ॥ पूजार्थं भूमिदानेन । भोगी
भवति भावभृत् ॥ ग्रामारामादिदानेन । सार्वभौमश्च बुद्धिमान् ॥ ३० ॥ परिधाय महामा-
लां । विधिनारात्रिकं दधन् ॥ स्वर्गिणः सेवकान् कृत्वा । भुनक्ति सुरसंपदः ॥ ३१ ॥

दशभिः पुष्पमालाभि-र्लभ्यं चातुर्थिकं तपः ॥ ततो माल्यैर्दशगुणैः । क्रमात् षष्ठाष्ट-
पाक्षिकं ॥ ३२ ॥ मासक्षपणमुख्यं च । तीर्थेऽत्र जिनपूजया ॥ लभंते मानवाः सारं । फलं
चैकाग्रसेवनात् ॥ ३३ ॥ युग्मं ॥ हिरण्यभूम्यलंकारै-र्दत्तैरन्यत्र नाप्यते ॥ यत्पुण्यं तदिहैके-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नो–पवासेनापि लभ्यते ॥ ३४ ॥ यत्तुदग्रेण तपसा । ब्रह्मचर्येण लभ्यते ॥ बहुकालादन्यतीर्थे । तदत्रैकोपवासतः ॥ ३५ ॥ प्रत्याख्यानाद्दशविधात् । पुंमरीकं मुनिं स्मरन् ॥ नरोऽत्राप्नोप्सितं सर्वं । लभते विघ्नवर्जितं ॥ ३५ ॥ षष्ठोच्छ्हनपुण्येन । लभंते सर्वसंपदः ॥ अष्टमोच्छ्हनाच्चाष्ट–कर्मणां क्षयतः शिवं ॥ ३६ ॥ न्यस्तदृष्टिः सूर्यविंबे । भुवं पादैकनिष्टया ॥ स्पृशन् मासोपवासेन । ब्रह्मचर्येण राजितः ॥ ३७ ॥ अन्यतीर्थेऽश्नुते पुण्यं । यत्तत् शत्रुंजये गिरौ ॥ एकेनापि मुहूर्त्तेन । सर्वाहारनिषेधनात् ॥ ३८ ॥ [illegible] ॥ रहितो रागदोषेण । ध्यायन्नर्हन्महोऽत्र च ॥ अष्टोपवासैर्मुच्येत । नरः स्त्रीवधपातकात् ॥ ३९ ॥ भ्रूणहत्या कुतस्तेषां । ये पाक्षिकतपःपराः ॥ मासं सत्तपसा ब्रह्म–चारिहत्यात्र नश्यति ॥ ४० ॥ लक्षाद्यंकाद्गणान्मर्त्यो–ऽस्मिन्नेकाद्युपवासजैः ॥ पुण्यैर्मुच्येत बोधिं च । लभते शिवशर्मदां ॥ ४१ ॥ प्रमार्जनाज्जिनगृहे । विलेपान्मालया क्रमात् ॥ शतसहस्रलक्षस्व–दानजं फलमाप्यते ॥ ४२ ॥ संगीतकेन नृत्यात्र । निर्मितेन विभोः पुरः ॥ यत्पुण्यं जायते शक्र । तद्वक्तुमपि न क्षमाः ॥ ४३ ॥ श्रुते शत्रुंजये पुण्यं । यत्स्यात्कोटिगुणं ततः ॥ निकटस्थे ह्यदृष्टेऽपि । दृष्टेऽनंतगुणं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च तत् ॥ ४४ ॥ दृष्टया दृष्टेऽत्र सिद्धाद्रौ । संघार्चनपरा नराः ॥ अर्जयंति महापुण्यं । लो-
काग्रावधियायि यत् ॥ ४५ ॥ त्रिशुद्ध्या तीर्थराजेऽत्र । चारित्रिप्रतिलाजनवान् ॥ प्राप्येत् का-
र्तिकमासस्य । तपसः फलमुत्तमं ॥ ४६ ॥



अस्मिन् शत्रुंजये तीर्थे । यतयः पूजिता न यैः ॥ तेषां जन्म च वित्तं च । जीवितं
च निरर्थकं ॥ ४७ ॥ जिनतीर्थेषु यात्रायां । जिनपर्वसु ये जनाः ॥ पूजयंति यतीन् ते स्यु–
स्त्रैलोक्यैश्वर्यजाजनं ॥ ४८ ॥ यतिः पूज्यो यतिः सेव्यो । यतिर्मान्यो मनीषिजिः ॥ यते-
राराधनाद्यात्रा । सफला निष्फलान्यथा ॥ ४९ ॥ निदानं वीतरागत्वे । प्राग्जवे गुरुवाग् य-
तः ॥ देवतत्वादपि ततो। गुरुतत्वं महद्विदुः ॥ ५० ॥ पात्रदानं महत्पुण्य–कृते स्यात् कृ-
तिनां सदा ॥ तीर्थेऽस्मिंस्तत्पुनर्येषां । तेषां हेम्नीव सौरजं ॥ ५१ ॥ अन्नैः पानैश्च वस्त्रैश्चा–
लयैश्चासनपात्रकैः ॥ ये यतीन् पूजयंतीह । ते जयंति श्रिया सुरान् ॥५२॥ अन्नवस्त्रादिजिः
सौख्य–संपन्नो गुरुमर्चयन् ॥ जवे तृतीये शुद्धात्मा । मुक्तिमाप्नोति तत्वतः ॥ ५३ ॥ श्ला-
घ्यं तदेव चित्तं स्यात् । तत् तत्वं सा च पुण्यधीः ॥ चारित्रिणो जगत्पूज्याः । पूज्यंते यत्



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सुभक्तितः ॥ ५४ ॥ ये गुरुं साक्षिणं कृत्वा । पूजयंति जिनं जनाः ॥ ते परत्रेह साम्राज्यं । प्राप्य गच्छंति सद्गतिं ॥ ५५ ॥ सहस्रलक्षसंख्यातै-र्विशुद्धैः श्रावकैरिह ॥ यद्भोजितैर्भवेत्पुण्यं । मुनिदानात्ततोऽधिकं ॥ ५६ ॥ यादृशस्तादृशो वापि । लिंगी लिंगेन भूषितः ॥ श्रीगौतम इवाराध्यो । बुधैर्बोधिसमन्वितैः ॥ ५७ ॥ निःश्रीकोऽपि मनःक्लेश-करोऽपि विरलो मुखे ॥ सेव्यः सदौषधमिव । कर्मरुक्परीक्षितैर्गुरुः ॥ ५८ ॥ वर्त्तमानोऽपि वेषेण । यादृशस्तादृशोऽपि सन् ॥ यतिः सम्यक्त्वकलितैः । पूज्यः श्रेणिकवत्सदा ॥ ५९ ॥ गुरोराराधनात्स्वर्गो । नरकश्च विराधनात् ॥ द्वे गती गुरुतो लभ्ये । गृह्णीतैकां निजेच्छया ॥ ६० ॥ अन्यान्यपि हि दानानि । कीर्त्तिलक्ष्मीसुखादिकान् ॥ यच्छंत्यभयदानं तु । फलं वाक्पथपारगं ॥ ६१ ॥ दीनादिभ्योऽपि यद्दानं । स्वर्गसौख्याय यद्भवेत् ॥ भवे भवेऽप्यखंडश्री-निदानं मर्त्त्यजन्मदं ॥ ॥ ६२ ॥ फलं यदत्र राज्यादि-लाभः प्रोक्तः स बोधिमान् ॥ पुण्यानुबंधिपुण्याय । विशेषान्मुक्तिलाभकृत् ॥ ६३ ॥ अन्यस्थानकृतं पाप-मिहोज्झति सुवासनः ॥ इह यद्विहितं कर्म । वज्रलेपं तु तद्भवेत् ॥ ६४ ॥ श्रीतीर्थेऽस्मिन्नान्यनिंदा । न परद्रोहचिंतनं ॥ न परस्त्रीषु लौ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ध्यत्वं । न परद्रविणेषु धीः॥ ६५ ॥ मिथ्यात्विषु न संसर्ग–स्तदुक्तेषु न चादरः ॥ निंदापि
तेषां नो कार्या । नाद्रियेत तदागमं ॥६६॥ वैरिण्यपि च नो वैरं । नो जिघांसात्र सादिषु ॥
द्यूतादिषु न चासक्ति–र्न कुलेश्याविचिंतनं ॥ ६७ ॥ इत्यादि सकलं पाप–कर्म विज्ञाय धी-
धनाः ॥ त्यजंतु जंतुसंघातं । स्तुत्यसत्कृत्यलिप्सया ॥ ६८ ॥ [redacted] ॥ जिनती-
र्थादियोगेषु । क्रिया मिथ्यात्वमिश्रिताः ॥ यः कुर्यात्स महापापी । ततः पुण्याप्तिरत्र का ॥
॥ ६९ ॥ अनर्थदंम विरतिः । प्रसक्तिस्तत्वचिंतने ॥ भक्तिर्जिने गुरौ रक्ति–र्वृत्तिर्दानेषु शा-
श्वती ॥ ७० ॥ चिंतनं सच्चरित्राणां । स्मृतिः पंचनमस्कृतेः ॥ भरणं पुण्यकोशानां । तरणं
भववारिधेः ॥ ७१ ॥ महातीर्थेऽत्र सद्ध्यान–देवार्चनतपोमुखं ॥ कार्यमत्र हि सत्कर्म । शि-
वशर्मार्जनोद्यतैः ॥ ७२ ॥ त्रिभिर्विशेषकं ॥ चतुर्विधेन संघेन । सहिताश्चात्र यात्रया ॥ अ-
र्जयंति तीर्थकृतः । पदं लोकोत्तरं नराः ॥ ७३ ॥ तीर्थमार्गेऽत्र यात्रोत्थं । यच्छ्रमांभः प्रमा-
र्ज्यते ॥ तैरेव निर्मलं देहं । लभ्यते तैरपापदं ॥ ७४ ॥ अत्र ये यात्रिकान् भक्त्या । वस्त्रान्नैः
पूजयंत्यमी ॥ विपुलर्द्धिसुखं भुक्त्वा । ते चांते मुक्तिभाजिनः ॥ ७५ ॥ अवारितं यथा काम–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मविश्रांतं च ये नराः ॥ ददते दानमानंदात् । सुखिनस्ते स्युरुच्चकैः ॥ ७६ ॥ स्वशक्त्यान्यानि पुण्यानि । कृतान्यत्र सुमेधसां ॥ नवद्वयविशुद्ध्यै स्युः । कुकर्मोर्मिविवर्जनात् ॥ ७७ ॥ इति संक्षेपतो दान–महिमायमुदीरितः ॥ तीर्थनूतस्य वृक्षस्य । राजादन्याः श्रृणु प्रथां ॥ ॥ ७८ ॥ राजादनी शाश्वतीयं । वृषनप्रनुनूषिता ॥ क्षरंती क्षीरधारा वः । क्षिणोतु क्षणतस्तमः ॥ ७९ ॥ यदधः समवासार्षीत् । प्रनुर्नानिनेरंइसूः ॥ तेनेयं वंदनीयैव । तीर्थात्तीर्थमिवोत्तमं ॥ ८० ॥ पत्रे फले च शाखायां । प्रत्येकं देवतालयः ॥ ततः प्रमादतोऽप्यस्या । नो छेद्यं हि दलादिकं ॥ ८१ ॥

यस्य प्रदक्षिणां कर्त्तु–र्नक्तिनिर्नरचेतसः ॥ संघेशस्योत्तमांगेऽसौ । क्षीरं वर्षति हर्षतः ॥ ८२ ॥ तस्यायतिः सुंदरा स्या–नवद्वयसुखाकरा ॥ अवर्षणान्न हर्षादि–कर्त्री तस्येर्षितेव या ॥ ८३ ॥ पुष्पैः ॥ सुवर्णरूप्यमुक्तानिः । पूज्यते चंदनादिनिः ॥ ततोऽसौ स्वप्नमागत्य । वक्ति सर्वं शुनाशुनं ॥ ८४ ॥ शाकिनीनूतवेताल–राक्षसाद्यैरधिष्ठितां ॥ एतां संपूज्य दोषेन्यो । मुच्यते मानवो ध्रुवं ॥ ८५ ॥ एकांतरतार्त्तीयिक–कालज्वरविषादयः ॥ प्रनवंति न



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्यांगे । यश्चैनां पूजयेन्नरः ॥ ८६ ॥ स्वयं निपतितं लात्वै—तस्याः शाखादलादिकं ॥ जीव-
वद्गोपनीयं हि । सर्वारिष्टविनाशकं ॥ ८७ ॥ यौ गृह्णीतो मिथः सख्य—मिमां कृत्वाथ सा-
क्षिणीं ॥ विश्वैश्वर्यसुखं तौ तु । प्राप्य स्यातां परे पदे ॥ ८८ ॥ अस्याः पश्चिमदिग्भागे ।
रसकूपी दुरासदा ॥ अस्ति यद्रसगंधेन । कोटिस्वर्णीभवेदयः ॥ ८९ ॥ कृताष्टमतपा देव—
पूजाप्रणतिभाववाक् ॥ अस्याः प्रसादाल्लभते । रसं तमपि कश्चन ॥ ९० ॥ किं कल्पवृक्षैः
किं दिव्यौ—षधिभिः किं च सिद्धिभिः ॥ एकैव सुप्रसन्नेयं । भूयाद्राजादनी जने ॥ ९१ ॥
अस्यास्तले युगादीश—पादुके त्रिजगज्जनैः ॥ उपासिते महासिद्धि—प्रदायिन्यौ सुखाय वः ॥
॥ ९२ ॥ वामदक्षिणभागस्थे । प्रभोश्चाद्यगणेशितुः ॥ मूर्त्ती श्रीपुंडरीकस्य । भवद्वयसुखाय
वः ॥ ९३ ॥ शृंगे श्रीमरुदेवायाः । शांतिनाथो जिनोत्तमः ॥ कोटिसंख्यैः सुरैः सेव्यो ।
भूयात्संघस्य शांतये ॥ ९४ ॥ एषां प्रभावो युगपत् । सर्वकालं शुभावहः ॥ कथ्यते प्रकटं
किंचित् । चंचदुच्चचमत्कृतिः ॥ ९५ ॥ श्रीप्रभौ पुंडरीके च । राजादन्यां च ये नराः ॥
पादुकायां शांतिनाथे । सूरिमंत्राभिमंत्रितैः ॥ ९६ ॥ अष्टोत्तरशतमितैः । कुंभैः शुद्धांबुसं-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नृतैः ॥ गंधपुष्पादिभिः स्नात्रं । कुर्वंति कृतमंगलाः ॥ ए७ ॥ युग्मं ॥ राज्यं बुद्धिं श्रियं कीर्त्तिं । सर्ववश्यं धनागमं ॥ वधूतनयसंपत्तिं । सौभाग्यारोगसंगतिं ॥ ए८ ॥ जयश्रियं सर्वकामा–नानंदं दोषनिग्रहं ॥ प्रेत्य च प्रवरान् भोगान् । प्राप्नुवंतीह ते सदा ॥ एए ॥ युग्मं ॥ शाकिनीभूतवेताल–व्यंतरग्रस्तदेहिनां ॥ अष्टोत्तरशतस्नात्रां–बुसेकाद्दोषनिग्रहः ॥५००॥ ज्येष्ठाश्लेशमघामूल–गन्नचित्रादिजन्मिनां ॥ विकारा दूरतो यांति । तथा स्नात्रांबुसेकतः ॥ ॥ १ ॥ पृथक् प्रभावा अप्येते । कथिता युगपद्यतः ॥ तत् सार्वकालिकप्रौढ–महिमोज्जृंभितं ननु ॥ २ ॥ तीर्थमेतदनघं शिवश्रियः । संगमे जयति चत्वरं वरं ॥ भूमिभालतिलकं वृषप्रभु–प्रौढरत्नपृथुशोभयान्वितं ॥ ३ ॥ सर्वत्राप्युपकारिकेवलमिव ज्ञानं ह्यनंतं यथा । मुक्तेर्धाम सदा स्थिरं च विमलं बाधास्पदं न क्वचित् ॥ तद्वत्तीर्थमिदं निरस्तदुरितव्रातं भवांतंकहत् । सेव्यं सन्मतिभिर्निधाय वृषभे चेतो जगन्नेतरि ॥ ४ ॥

इतश्च पूर्व दिग्भाग–भूषणं गतदूषणं ॥ श्रीसूर्योद्यानमुद्दामं । विद्यते द्युसदां प्रियं ॥ ॥ ५ ॥ यत्र कल्पद्रुमश्रेणि–र्वेणिवत्पर्वतश्रियः ॥ पूरयंती जगत्कामं । स्पर्द्धते जिनसेवनं ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ ६ ॥ किंनरा निजनारीभि–र्येत्रैत्य जिनवेश्मनि ॥ संगीतं रचयंतो शक् । रमयंति खगा-
नपि ॥ ७ ॥ तमालहिंतालपलाशताल–दलालिरालोलकलालिमालां ॥ उदत्यतो मत्कुसुमा-
नि चित्रा–एयसौ विधत्ते रुषितेव यत्र ॥ ८ ॥ यत्र पत्रसिचयैरनुविद्धा । राजते विपिनराजि-
रविद्धा ॥ भास्करस्य किरणैरपि लज्जा–सज्जितेव दमनेन मधौ या ॥ ए ॥ अगुणो गुणोऽपि
किल संगतो भवेत् । इति गीरकारि बहु येन निष्कला ॥ स तथान्यपुष्ट इहारौति तोषदो।
वरपंचमोच्चरव आम्रपादपे ॥ १० ॥ ता गिरो रचितरंगतरंगा । रागिणामिह गृणंति विहं-
गाः ॥ याः सुबंधुरसुधारसधारा । माधुरीमधरयंत्यपि ताराः ॥ ११ ॥ विदधे मम नाम ना-
म ते–विषमं तेन रुषेति यत्र च ॥ पवनो विपिनान्यधूनयन् । न च लक्ष्यो जनताभिरि-
ङ्गिनीः ॥ १२ ॥ आलवालनिलयेव यः प्रियं । प्रापितं वलयतामनाविलं ॥ मार्गशृंगिपरिभं-
गिभासुरं । सारिणीषु सलिलं सरत्यदः ॥ १३ ॥ मधुपानलीनमधुपालिरुचा । तरुणार्कभावा-
दरुणा कलिका ॥ धृतधूमभूमशिखिसाम्यमसौ । भजते किल केतकिनां विततिः ॥ १४ ॥
सहकारसारतरुमंजुमंजरी । सहकारिभावसुभगं रवं किरन् ॥ कलकोकिलः किल करोति



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कामिना—मनिशं मनस्तु विपदं वियोगिनां ॥ १५ ॥ कदलीदलालिचलनच्छलत—स्खलतो
जनांस्तपनतापततेः ॥ किलवीजयत्यपि शुभ्रप्रमदा—मिव वैजयंति किस नम व्यजनैः ॥

॥ १६ ॥ ऋतवः सममेव सर्वदा । निजपुष्पालिविलासशालिनः ॥ असपत्नसुखं सुखैषिणां।
वितरंतीह्लसद्द्रुमाकराः ॥ १७ ॥ जिनदृष्टिसुधाभ्रिरुच्छ्रिता । विकसन्नीरजराजिराजिता ॥
विविधद्रुमभंगिभासुरा । वनलक्ष्मीरियं वीक्ष्यते सुरा; ॥ १८ ॥ मरालमालापरिवल्गपद्धति—
विकाशपंकेरुहहारिसन्मुखं ॥ इतः सरः सारतरं वपुष्मतां । प्रिनष्टि चाष्टादशकुष्टसंचयं ॥
॥ १९ ॥ शत्रुंजयाद्रिं निकषा सुरेंद्र—संसेवितं भूर्भुवनाकिलोकैः ॥ त्वदीयदिग्मंगनमेतदारा-
न्नानंदकृत्कस्य वनं सरश्च ॥ २० ॥

॥ इत्याचार्यश्रीधनेश्वरसूरिविरचिते महातीर्थश्रीशत्रुंजयमाहात्म्ये
गिरिकंडुमुनि भगवत्समवसरण देशनावर्णनो नाम
प्रथमः सर्गः समाप्तः ॥ श्रीरस्तु. ॥



For Private And Personal Use Only

## ॥ अथ द्वितीयः सर्गः प्रारभ्यते ॥

सुरासुरशिरोरत्न—रोचिःकंचुकितक्रमः ॥ आदिनाथो जगन्नाथः । पातु वः कर्ममाथ-
कृत् ॥ १ ॥ सुरेंद्रो भगवद्वाणी—मित्थमाकर्ण्य हर्षभृत् ॥ व्यजिज्ञपत्प्रणम्याथ । स्वामिनं
रचितांजलिः ॥ २ ॥ महिमा तीर्थराजस्य । प्रोक्तो मत्प्रीतिकृज्जिनो ॥ सूर्योद्यानस्थितसरः
—कथां शुश्रुषुरस्म्यपि ॥ ३ ॥ भगवानपि विज्ञाय । भव्यान् सभ्यान् बिडौजसः ॥ जगा-
दाग्रहसंग्राही—तीर्थमाहात्म्यवृद्धिकृत् ॥ ४ ॥ भवगर्तार्त्तिहृत्सूर्या—वर्त्ताख्यं कुंडमुत्तमं ॥ से-
वनादपि कुष्टानि । हरत्यष्टादशाप्यदः ॥ ५ ॥ भगवत्पादुकास्पृष्ट—तदंभसोऽभिषेचनात् ॥
प्रयांत्यशेषा दोषा हि । मिथ्यात्वमिव तत्वतः ॥ ६ ॥ तद्यथा श्रीसुराष्ट्रायां । विशालं शा-
लशालितं ॥ लक्ष्मीविलासावसथा—स्तोकलोकविभूषितं ॥ ७ ॥ वापीकूपतडागादि—महो-
द्यानपरिस्कृतं ॥ अस्ति सत्रप्रपाकीर्णं । नाकिनाथपुरोपमं ॥ ८ ॥ श्रीमद्गिरिदुर्गपुरं । गि-
रिनारगिरेरधः ॥ जिनेंद्रभवनश्रेणि—शिवनिःश्रेणिमंडितं ॥ ९ ॥ त्रिभिर्विशेषकं ॥ न निर्ध-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ना न पिशुना । न मूर्खा नाविवेकिनः ॥ न दीना न पराधीना । यत्रास्तव्यजना मनाक् ॥
॥ १० ॥ पूजाभिः प्रीणिता देवा । भक्तिदानैस्तपस्विनः ॥ अर्थिनोऽर्थितदानैश्च । दयादानैश्च
दुःस्थिताः ॥ ११ ॥ वणिजो राजसन्मानैः । सदौचित्यैः कवीश्वराः ॥ प्रसाददानैर्भृत्याश्च ।
यत्र संति सुखं जनाः ॥ १२ ॥ युग्मं ॥ नृपोऽभूद्भूरिभाग्यश्री–स्तत्रार्हद्यतिभक्तिभाक् ॥
सूर्यमल्लाभिधः श्रीमत्–समुद्रविजयान्वये ॥ १३ ॥ सूर्यमल्लोऽहरद्वैरि–ध्वांतं यत्तन्न कौतुकं
॥ व्यकाशयत्कुवलयं । तच्चित्रं कमलादयः ॥ १४ ॥ येन यादववंशैक–भूषणेनेह हेलया ॥
पदं विपक्षलक्ष्म्य । शिरस्यारोपितं रणे ॥ १५ ॥ यत्प्रतापार्कतापेन । शत्रुकीर्त्तिरवागलत्
॥ नवनीतसमानेव । जाड्यमाप च तत्प्रभुः ॥ १६ ॥ अंभोजिनीव सूर्यस्यां–भोजास्या तस्य
वल्लभा ॥ महिषी शशिलेखेति । सन्मुखी शुभकर्मणि ॥ १७ ॥ सूर्यराजस्य जायापि । क-
थ्यते या जनैरिति ॥ असूर्यपश्या श्रीनेमेः । पादपंकजसेविनी ॥ १८ ॥ सुकृते सादरौ सौ-
म्यौ । दंपती तौ मिथः प्रियौ ॥ अत्यवाहयतां कालं । सुखसागरकल्पपौ ॥ १९ ॥ अन्यदा
तीर्थयात्रायां । गते नरपतौ गिरिं ॥ स्वबालान् लालयंत्येका । राज्ञ्या दृष्टा कलापिनी ॥२०॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्वं तदेव सुतैर्हीनं । शोचयंती नृपेण सा ॥ आश्वासितेति संबोध्य । तदर्थं जिनमर्चय ॥
॥ २१ ॥ अंबाया जगदंबायाः । प्रसादात्तनयौ तयोः ॥ अजूतां तौ देवपाल–महीपालाविति
श्रुतौ ॥ २२ ॥ कलाकलापकलितौ । सपक्षौ मृदुवाक्किरौ ॥ घनलोकोन्नतिप्रीता–वहिताप-
कृते प्रियौ ॥ २३ ॥ चक्रतुः स्वसदाचारा–त्तौ मुदा हृदयावनौ ॥ पितुः क्षोणीधरस्याथ । प-
दं सुखरसास्पदं ॥ २४ ॥ [illegible] ॥ साक्षीकृत्य गुरुं शास्त्रा–एयधीयानौ धियां निधी ॥ ना-
नाविधागमाभ्यासे । यतमानावनारतं ॥ २५ ॥ क्रीमाक्रीमांतरे स्वैरं । क्रीमंतौ सवयोवृतौ ॥
प्रीणयंतौ जनानेतौ । क्रमाद्यौवनमापतुः ॥ २६ ॥ [illegible] ॥ वह्वीर्नृपसुतास्तातेनैतौ नेत्रा-
प्यपायतः ॥ ततः सोत्सवमभ्यस्त–प्रमोदात्परिणायितौ ॥ २७ ॥ मानी यशस्वी तेजस्वी ।
विनीतो नीतिरीतिवित् ॥ सर्वैर्गुणैर्महीपालो । देवपालाह्वयशिष्यत ॥ २८ ॥

अन्यदा क्षणदाशेषे । विनिद्रः सहसैव सः ॥ महीपालो वनेऽशाक्षी– दात्मानं श्वापदा-
कुले ॥ २९ ॥ क्वचित् शूकरवृंदानि । करिणां च घटाः क्वचित् ॥ क्वचिन्मृगारिसंचारं ।
स तत्रापश्यदुन्मनाः ॥ ३० ॥ अहो किं विभ्रमः स्वप्नः । किं वा चित्तविपर्ययः ॥ किमिंद-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जातं किं देव—चरितं चित्रमप्यदः ॥ ३१ ॥ अहं गीतिरसास्वाद—कामिनीकेलिलालसः ॥
अस्वपं चंद्रशालाया—मत्र तत्कथमागमं ॥ ३२ ॥ स्याद्वा पश्यामि विपिनं । ध्यात्वेति चलि-
तः सखे ॥ मया हतोऽसि मा भैषीः। शुश्राव गिरमित्यथ ॥ ३३ ॥ अदृष्ट्वा तद्गिरो मार्गं ।
मार्गयन् द्रुमसंततिं ॥ अविखिन्नः स बभ्राम । सौधात्सौधमिवोच्चकैः ॥ ३४ ॥ क्वचिच्चंद्र-
द्रमकिरणै—र्दधच्छारदमेघतां ॥ इंद्रनीलमणिश्रेणि—सुवेणीभासितं क्वचित् ॥ ३५ ॥ पद्मराग-
पद्मराग—स्फुरद्भाभासितं क्वचित् ॥ कल्याणकलशाद्भुत—कल्याणकलितं क्वचित् ॥ ३६ ॥
गवाक्षैरक्षिभिरिव । सहस्रनयनायितं ॥ जयद्भूमीभृतः प्रौढ—तया वज्रकरोत्करान् ॥ ३७ ॥
वीज्यमानं पताकाभी—रत्नैरुष्मायितं किमु । स ददर्श महासौधं । भ्रमन् विपिनमध्यतः
॥ ३८ ॥ चतुर्भिः कलापकं ॥ अरण्ये श्वापदाकीर्णे—ऽन्यर्णे सौधमिदं कुतः ॥ इति विस्मय-
मापन्नो । महीपालो निरीक्ष्य तत् ॥ ३९ ॥ पश्यामि दृग्विनोदाय । प्रसंगादिदमग्रतः ॥ कु-
मारश्चिंतयित्वेति । प्रतिसौधमथाचलत् ॥ ४० ॥

इयं रम्येति रम्येय—मिति भावेन भावयन् ॥ भूमेर्भूमेर्नवनवां । चारुतां स व्यलोक-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यत् ॥ ४१ ॥ तद्वंद्दशालामभ्येति । स यावत् सात्विकोत्तमः ॥ तावत्पद्मासनासीन–मद्राक्षी-
त्तत्र योगिनं ॥ ४२ ॥ संसारसोदरेऽरण्ये । संसारीव भ्रमन्नहं ॥ प्रसंगाद्योगिनं जीवन् । मु-
क्तमेनं व्यलोकयं ॥ ४३ ॥ ध्यात्वेति क्षितिविन्यस्त–मस्तकः स्वस्तिकारिणं ॥ तं ननाम म-
हीपालो । दयापालं समाहितः ॥ ४४ ॥ अहिंसादीनि पंचापि । यमं विभ्रत्समाहितः ॥
आसनस्थो महाप्राणा–यामन्नृन्नियमादरी ॥ ४५ ॥ प्रत्याहृत्येंद्रियाण्याशु । प्रत्याहारान्नियो-
गतः ॥ चतुर्ध्यानधरः कुर्वन् । धारणाः पंच साम्यतः ॥ ४६ ॥ समाधिनात्रिकालावा–दाई-
त्यं च महः स्मरन् ॥ योगी दृष्ट्वा स तं ध्यानं । मुमोच करुणाकरः ॥ ४७ ॥ त्रिर्निर्वीशो-
[illegible] ॥ अन्यधाच्च सुखी वत्स । स्वागतं त्वयि वर्त्ततां ॥ निराबाधोऽस्ति ते देहो । निःप्रत्यू-
हात्र चागतिः ॥ ४८ ॥ विस्मयं मास्म कुर्वीथा । हृतोऽसि नियतं मया ॥ त्वयि विन्यस्य
सद्विद्यां । गुरोरानृण्यमिच्छता ॥ ४९ ॥ क्षुत्क्षामोऽसीति संज्ञाप्य । दिव्यशक्त्याहृतां क्षणा-
त् ॥ योगीरसवतीं प्रीत्या । चित्रकृत्तमभोजयत् ॥ ५० ॥ सोऽपि पूर्वं फलं भोज्यं । जानन्
भुक्त्वा च योगिनः ॥ खड्गसिद्धिं महाविद्यां । जग्राह विनयान्नतः ॥ ५१ ॥ योग्यप्यजासने

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थित्वा–कुंड्या धारान् महास्रसां ॥ जित्वा व्योम जहौ प्राणान् । सौधमुद्योतयन् रुचा ॥
॥ ५२ ॥ प्राप्ते तस्मिन् दिवं नृप–कुमारोऽसारसारवित् ॥ न सौधं न च योगींद्–मपश्य-
॥ ५७ ॥ त्केवलं वनं ॥ ५३ ॥ अहो योगस्य साम्राज्यं । जीवितामपि यत् श्रियः ॥ इहशाश्च ततो
मुक्तिः । प्रेत्यासावित्यचिंतयत् ॥ ५४ ॥ योगतोऽघौघविध्वंसो । योगतो मुक्तिसंगमः ॥ यो-
गतः सिद्धयः सर्वा । जायंतेसम्यगाश्रितात् ॥ ५५ ॥

इत्युत्थाय भ्रमन् दाव–मवाप्मनतरं पुनः ॥ स ददर्श महाकुंड–मंतर्वर्त्तिबकस्थलं ॥५६॥
यावत् सिस्नासुरस्त्येषो । ऽलक्षागतिमनुष्यणं ॥ तावन्मामेति शुश्राव । गिरं धीरधुरंधरः ॥
॥ ५७ ॥ तद्दत्कारं नृपसुतो–ऽपश्यन् कुंडतटं गतः ॥ अवज्ञा गदिते किं मे । शुश्रावेति मु-
हुर्वचः ॥ ५८ ॥ अमनुष्यं वनं पश्यन् । स यावत् कौतुके स्थितः ॥ तावत् शाखामृगः क-
श्चि–च्चतुरः प्रकटोऽभवत् ॥ ५९ ॥ मडुक्तं पशुरित्येष । वीर त्वं मावजीगणः ॥ यतो वा- ॥ ५७ ॥
नरवाक्येना–जैषीद्भमोऽपि राक्षसान् ॥ ६० ॥ पश्यामूनि करंकाणि । शिखराणीव भूभृतः
॥ निर्वापितानां जंतूनां । कुंडमध्यस्थरक्षसा ॥ ६१ ॥ त्वं तु भद्राकृतिर्दक्षः । सूनुः कस्या-

८

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पि नूनृतः ॥ याहि शीघ्रं न चेदङ्क–स्तरत्वां व्यापादयिष्यति ॥ ६२ ॥ स्मित्वोचेऽथ महीपा-
लः । सत्यं पशुरहो नवान् ॥ मयि रक्षोऽन्यं शंस–न्निवार्के तमसो नयं ॥ ६३ ॥ श्रुत्वे-
त्यथ गिरं शाखा–मृगस्तं प्रत्यनाषत ॥ शक्तिस्तवेति यद्यस्ति । तदा गच्छ निजेञ्जया ॥६४॥
अत्रास्ते राक्षसश्चंरुः । कोपनश्चातिकृष्णरुक् ॥ नक्त्वेति वानरः सोऽथ । तिरोऽनूद्विपिनांतरे
॥ ६५ ॥ इतः क्षितिपतेः सूनु–र्वरविद्याविनूषितः ॥ करवालं करे कृत्वो–पकुंरु प्रययौ रया-
त् ॥ ६६ ॥ तदंबुनि ललन् याव–द्यात्यसौ तद्धकस्थलं ॥ तावदेषतत्स सन्नद्धो । दधावे रा-
क्षसः क्षणात् ॥ ६७ ॥ तावुनौ युद्धपारीणौ । युयुधाते महाबलौ ॥ चिरं पतत्पातयंतौ ।
क्षितेः कंपं प्रचक्रतुः ॥ ६८ ॥ खड्गविद्याप्रनावेण । राक्षसो नृपसूनुना ॥ जितो वनार तत्
सेवां । किं नो सिद्ध्यति साहसात् ॥ ६९ ॥ स्मृतः प्रत्युत्तरं दाता । तव वैरिणि वैरवान् ॥
तव प्रेयसि संप्रीतः । प्रतिज्ञामिति चाकरोत् ॥ ७० ॥ वेषपरावृत्तिकरीं । व्रणसंरोहिणीमपि
॥ दत्वौषधीं कुमाराय । स धर्मं चाददे ततः ॥ ७१ ॥ विसृज्याथ कुमारस्तं । लीलयोत्तीर्य
तत्सरः ॥ व्यलोकयद्वनश्रीणा–मक्षीणां सुखमां ततः ॥ ७२ ॥ क्वचित्पुष्पाणि जग्राह ।



For Private And Personal Use Only

पल्लवांश्च क्वचित्क्वचित् ॥ फलानि सोऽग्र पक्वानि । कौतुकी तद्दिदृक्षया ॥ ७३ ॥ ततोऽपि श्रीनिवासाख्ये । वने यातः स नेमिनः ॥ आससाद च सानंदं । प्रासादं चारुतोरणं ॥ ॥ ७४ ॥ नत्वा तत्र मुदा नेमिं । स्तुत्वा च निषसाद सः ॥ तदंतरा जिनध्यानं । निधानमिव धारयन् ॥ ७५ ॥ चलत्कुंडलसंघृष्ट–कपोलफलकां ततः ॥ पलाशपादुकारूढां । हेमदंडं च बिभ्रतीं ॥ ७६ ॥ दधतीं पाणिना पात्रं । पूर्णं द्रुमफलैः कलैः ॥ योगिनीं जिननाथाग्रे । सहसा पश्यतिस्म सः ॥ ७७ ॥ युग्मं ॥ ससंभ्रमं समुत्थाय । पादौ तस्या ननाम सः ॥ आशिषं जय जीवेति । ददौ तस्मै च योगिनी ॥ ७८ ॥ साक्षान्निरीक्ष्य तां रूप–लावण्याभरणैरलं ॥ भूषितां योगिनीं प्रीतो । मन्यमानः सुरीमिव ॥ ७९ ॥ जगाद सादरं देवि । गोत्रदेव्यसि मे स्फुटं ॥ कांतारे श्वापदाकीर्णे । प्रादुर्भूता यतोऽधुना ॥ ८० ॥ युग्मं ॥

इति पीयूषपूषाल्लां [?] । वाचमाकर्ण्य योगिनी ॥ ऊचेऽहं मानुषी देवी । नास्मि वत्स तपःपरा ॥ ८१ ॥ अद्यातिथिः समायातः [?] । त्वं मे पुण्यनिबंधनं ॥ वत्स त्वं मद्गिरं व्यर्थां । तत्कर्तुं नार्हसीह भोः [?] ॥ ८२ ॥ यद्गृहादतिथिर्व्यर्थं । प्रयाति पुरुषोत्तमः ॥ तस्य पुण्यक्षयं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पापो–दयं कृत्वा स गच्छति ॥ ७३ ॥ तमित्युक्तवति क्ष्माप–नंदने साथ योगिनी ॥ सदंभं
पात्रमादाय । निस्ससार जिनौकसः ॥ ७४ ॥ तस्मिन् पश्यति साश्चर्यं । पात्रपाणिः प्रज्ञा-
विनी ॥ द्रुमेभ्योऽयाचत फला–न्यसौ योगफलाश्रिता ॥ ७५ ॥ तयाधस्तात्कृते पात्रे । फला-
नि ददतो द्रुमाः ॥ अनल्पकल्पनां दाना–द्दधुः कल्पद्रुकल्पतां ॥ ७६ ॥ साथ पूर्णं फलैः पा-
त्रं । महीपालपुरोऽमुचत् ॥ फलानि कानिचित्तस्मा–ज्जग्राह बुभुजे च सः ॥ ७७ ॥ ततः
स नत्वा नेमीश–मूचे जिगमिषुस्तथा ॥ वत्स गच्छसि कुत्र त्वं । कुत्रत्यो वाथ तद्वद ॥७८॥
सोऽप्याह साहसी मातः । सार्थाद्भ्रष्टोऽहमत्र हि ॥ नत्वा नेमिं च भवतीं । यास्यामि स्व-
पुरंप्रति ॥ ७९ ॥ उवाच सदया सापि । वत्स पश्य पुरो वनं ॥ अत्र यक्षो महाकालः ।
। प्राणिनो हंति कालवत् ॥ ८० ॥ अनेन संहृता लोका । बहवोऽत्र समागताः ॥ दूरतस्तु
त्वमेनं हि । मुक्त्वा याया यथासुखं ॥ ८१ ॥ इत्थं तयोर्मिथोवाद–प्रमोदपरयोरिह ॥ दिवो-
ऽकस्मान्मुनिः कश्चि–दुत्ततार महाप्रभः ॥ ८२ ॥ तपसा वपुषा चापि । दीप्रं तं प्रसमीक्ष्य
तौ ॥ सहसोत्थाय संभ्रांतौ । स्वपुण्यमिव नेमतुः ॥ ८३ ॥ धर्मलाभ इति प्रीतो । दत्तवान्



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुनिराशिषं ॥ तयोः प्रत्यूहकरटि–व्यूहकेसरिसन्निभां ॥ ९४ ॥ त्रिजगन्नाथनेमीश–पादप्र-
णतिजं फलं ॥ आवयोः परिपक्वं य–ज्जातस्त्वं लोचनातिथिः ॥ ९५ ॥ साक्षात् समरसां-
भोधिः । पुण्यराशिरसि प्रभो ॥ निर्भाग्यैर्दर्शनं नैव । प्राप्यते हि भवादृशां ॥ ९६ ॥ भ-
गवन् धर्ममाख्यातुं । तदर्हसि पुरो हि नौ ॥ परोपकारनिरताः । संभवंति भवादृशाः ॥
॥ ९७ ॥ इत्थं तयोः सुधास्यंदि । निशम्य वचनं मुनिः ॥ पंचभिर्दंडकैर्देवा–न्नमस्कृत्य ततो-
ऽवदत् ॥ ९८ ॥ चतुर्भिः कलापकं ॥ दानेनाध्ययनेनापि । शीलेन प्राणिरक्षया ॥ यत्पुण्यं
जायते वत्सौ । तत्सर्वं जिनसेवया ॥ ९९ ॥ साम्राज्यं सुमतिः पुण्यो–पचयः पातकक्ष-
यः ॥ ग्रहपीडाप्रशमनं । पुंसां स्याज्जिनपूजया ॥ १०० ॥ धन्यः स एव सुकृती । स एव
गुणवान् परः ॥ यस्त्रिकालं जिनं भक्त्या । पूजयेदुत्तमैः सुमैः ॥ १ ॥ दत्तसादं प्रमादं त–
दवधूय सदोद्यतैः ॥ पूजा जिनस्य कर्त्तव्या । त्रिकालं दुरितापहा ॥ २ ॥ इति तस्य मुने-
र्वाक्यं । तौ निशम्य प्रमोदितौ ॥ अपृच्छतां महाकाल–यक्षस्यैतद्विचेष्टितं ॥ ३ ॥ धर्मादासाद्य
देवत्वं । कथं तस्यैव वैरिणी । हिंसामसौ विधत्ते हा । यक्षः स्वार्थपराङ्मुखः ॥ ४ ॥ मनु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्येषु कथं द्वेषी । निःशेषोश्रितपुण्यधीः ॥ तदादिशावयोः पूज्य । प्रसादं कुरु पृच्छतोः ॥ ५ ॥

इति तद्वचनाद्वाचं—यमो वाचं सुधातिगां ॥ अवोचद्‌ज्ञानमाहात्म्याद्—ज्ञात्वा तच्चरितं तथा ॥ ६ ॥ पुरात्रासीद्वने कश्चि—त्तापसो जातमत्सरः ॥ जिनेंद्रशासने घूक । इव भास्वति भास्वति ॥ ७ ॥ सकलत्रो जटाधारी । कंदमूलफलाशनः ॥ दधानो वल्कले रम्ये । स बभ्राम वनाद्वनं ॥ ८ ॥ तस्मादजनि सद्रूप—पात्रं पुत्री पवित्रभाक् ॥ सल्लक्षणा रत्नमिवा—वस्करादतिदीप्तिमत् ॥ ९ ॥ प्राणेभ्योऽतिप्रिया तस्य । सुतासीत्सा गुणोज्ज्वला ॥ नाम्ना शकुंतला केकि—कलापसमकुंतला ॥ १० ॥ प्रकृत्यैव ससौभाग्या । यौवनं प्राप्य सा पुनः ॥ रुरुचे रुचिराकारा । वनश्रीरिव माधवं ॥ ११ ॥

इतश्च भूपतिर्भीम—नामा भीमाकृतिर्भ्रमन् ॥ लीलया विपिने तत्रा—द्राक्षीत्तां त्रिदशीमिव ॥ १२ ॥ सहसा सारसौरभ्य—सुंदरीं स विलोक्य तां ॥ वल्गाग्रहाचलहय—स्तस्थौ तत्रैव तद्विधः ॥ १३ ॥ तीक्ष्णैर्मदनबाणैः किं । स्खलितः किं धुनोतु मा ॥ सुकुमारामिमामश्वः । खुरैरित्यथ शंकया ॥ १४ ॥ युग्मं ॥ क्षणं संभ्रममासाद्य । लब्धबोधः स कन्यकां



For Private And Personal Use Only

॥ निर्णीय तां मुदमयात् । शक्तिं योगीव शाश्वतीं ॥ १५ ॥ महीमृगांकस्तां बालां । मृगा-
क्षीं निकटीभवन् ॥ उवाच परिणिता वा । नो वा वद नितंबिनि ॥ १६ ॥ कुमार्येवास्मि मं-
दाक्ष—इत्युक्तवतीं ततः ॥ तामाधाय हयस्कंधे । चचाल बलवित्सही ॥ १७ ॥ सुतावियो-
गसंक्लिष्ट—स्तत्प्रभृत्येष तापसः ॥ अस्थिचर्मावशेषांगो—ऽनैषीद्दुःखाद्दिनान्यहो ॥ १८ ॥ स
क्षीणधातुरीर्ष्यालु—र्मुमूर्षुर्गतचेतनः ॥ तपस्विभिरिहानिन्ये । पुण्याय जिनवेश्मनि ॥ १९ ॥
स्वभावमत्सरग्रस्तः । स ननाम जिनं न हि ॥ अर्त्या विपद्य यक्षत्वं । प्रापार्हद्दर्शनादथ ॥
॥ २० ॥ मिथ्यात्वमूढमनसां । गतिर्नरक एव हि ॥ विषदोषोपरुद्धानां । मरणं शरणं ननु
॥ २१ ॥ यद्दृष्टो नेमिनाथोऽत्र । प्रांतेऽनेन तपस्विना ॥ लब्धं तेनैव देवत्वं । पिधाय नर-
कास्पदं ॥ २२ ॥ जिनः स्मृतोऽपि दृष्टोऽपि । कीर्त्तितो महितोऽथवा ॥ सद्भावात्सेवितो द-
त्ते । स्वर्गादिगतिमुत्तमां ॥ २३ ॥ अहो जिनेंद्रमाहात्म्यं । सकृद्यद्दर्शनादपि ॥ तापसः पाप-
संभारं । भित्वा देवत्वमासदत् ॥ २४ ॥ तनयाहरणं याव—दसौ मानवमत्सरी ॥ अधुनापि
तदभ्यासात् । प्रोज्झासयति मानवान् ॥ २५ ॥ इत्युदीर्य प्रभाजालै—र्द्योतयन् रोदसीं मुनिः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ययौ गगनमार्गेण । नंतुं चैत्यान्यनेकशः ॥२६ । योगिन्यपि यथास्थानं । ययौ दिव्यप्रजा-
विनी ॥ कुमारोऽपि जिनार्चांते-ऽवलत्कालवनंप्रति ॥ २७ ॥ कर्कैरयः स्रवत्पूति-पिच्छिला-
च्छिपिनात्तदा ॥ स्फोटयन्नासिकां गंध-स्तत्र प्रादुरजूत्पुरः ॥ २८ ॥

तत्र गंधानुसारेण । कुमारः सारविक्रमः ॥ करेण करवालं तत् । करालं लालयन्नगात्
॥ २९ ॥ ततस्तु कालकंकालौ । सशस्त्रावतिभीषणौ ॥ पुरोऽद्राक्षीत्कुमारो द्राक् । प्रहरंतौ
च तं क्रुधा ॥ ३० ॥ नियुद्धकुशलः क्ष्माप-सुतस्तौ तु महाबलौ ॥ रागद्वेषौ संयमीवा-
जैषीद्दुर्गतिसंश्रयौ ॥ ३१ ॥ अथासौ जितकासी सन् । गच्छन् यक्षगृहंप्रति ॥ अस्थात्तेनैव सं-
रुद्धे । गदास्त्रेण महीयसा ॥ ३२ ॥ रे मानव नवीनस्त्वं । मत्तः कस्यासि पौरुषात् ॥ स्म-
रेष्टं दैवतं नोचा । मृतोऽसीत्यवदच्च सः ॥ ३३ ॥ स्मित्वा तद्वचनाद्राज-सूनुरप्याह साह-
सात् ॥ किं मां विक्षोभयसि भो । यक्षोऽलगिरं गिरन् ॥ ३४ ॥ प्रसन्नो भव मा कुप्य । ॥ ६४ ॥
विचारय हृदंतरा ॥ निरागसः कथं जंतून् । हन्यसे मन्युसेवनात् ॥ ३५ ॥ भुंक्ष्व देवत्वम-
तुलं । मुंचमानवमारणं ॥ कोपांधस्य सुखं नास्ति । भवेऽत्रापि परत्र च ॥ ३६ ॥ क्रोधः कु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पावह्निर्दवानलोऽयं । क्रोधो भवांभोनिधिवृद्धिकारी ॥ क्रोधो जनानां कुगतिप्रदाता । क्रोधो
हि धर्मस्य विघातविघ्नः ॥ ३७ ॥ क्रोधो दहेन्निजं स्थान-मग्निवत्तीव्रतापकृत् ॥ पश्चादन्यं
दहेन्नो वा । त्वमेनं तर्हि संत्यज ॥ ३८ ॥ इत्थं दुग्धनिभं वाक्यं । पीत्वा तेनोदितं हितं ॥
नवज्वरीव पर्कांडो । जज्वाल क्रोधदुर्धरः ॥ ३९ ॥ स्फुरदोष्ठपुटः स्फुर्ज-भृकुटीभंगभीषणः ॥
जगाद हृष्टतं क्रोध-मुद्गिरन्निव पन्नगराट् ॥ ४० ॥ अनन्यशरणो धर्मो । मायिंस्त्वय्येव वर्त्त-
ते ॥ पश्यामि धर्ममाहात्म्यं । समं युध्यस्व रे मया ॥ ४१ ॥ इत्युदीर्य महाकालः । कुमा-
रंप्रति कालवत् ॥ दधावे मुद्गरं प्राणि-मुद्गरं पाणिना स्पृशन् ॥ ४२ ॥ कुमारोऽपि महा-
बाहुः । खड्गविद्यापवित्रितं ॥ आदाय खड्गमुद्दामं । युद्धायाधावत क्रुधा ॥ ४३ ॥ महामल्लौ
महाबाहू । महावीर्यौ महोन्नतौ ॥ कौतुकं वनदेवीनां । युद्ध्यमानौ वितेनतुः ॥ ४४ ॥ क-
दाचिद्गगनोत्फालौ । कदाचिदवनिस्थितौ । कदाचिच्चित्रचारीकौ । तावभूतां महाबलौ ॥
॥ ४५ ॥ शक्तिमुद्गरनिस्त्रिंशैः । प्रहरंतौ परस्परं ॥ क्रीडामिव महामल्लौ । चक्रतुस्तौ मुहु-
र्मुहुः ॥ ४६ ॥ मुष्टामुष्टि विकुर्वाणौ । मल्लाविव महौजसौ ॥ पादन्यासेन वसुधां । कंपया-



For Private And Personal Use Only

मासतुर्भृशं ॥ ४७ ॥ पतन् परं पातयति । पतंतं पात्यसौ पुनः॥ पतंतौ पातयंतौ च । चि-
क्रीडतुरुभावपि ॥ ४८ ॥ कुमारो यक्षघातैस्तै-र्जर्जरो जातमत्सरः ॥ सस्मार खड्गविद्यायाः
। खड्गं च जग्रहे करे ॥ ४९ ॥ ज्वालामालासमाकीर्णं । स्फुलिंगावलिलालितं ॥ त्रटत्रटत्व-
दमिति-कुर्वाणं तज्जिघांसया ॥ ५० ॥ प्रत्यक्षमिव कोपाग्निं । प्रतिकोशविनिर्गमात् ॥ ख-
ड्गं निरीक्ष्य यक्षोऽसौ । भृशं चुक्षोभ भीतिभृत् ॥ ५१ ॥ [illegible] ॥ उवाच च महीपालो ।
दृढं तंप्रति दुर्धरः ॥ रे यक्ष निजदेवत्वं । कथं त्यजसि मत्क्रुधा ॥ ५२ ॥ सेवस्व मत्पदांभो-
जं । त्यज हिंसां दयां कुरु ॥ सर्वजीवेषु समतां । भज स्वस्यैव संपदे ॥ ५३ ॥ शौर्यं त-
स्येति संवीक्ष्य । श्रुत्वा वाक्यस्य धीरतां ॥ तं जगाद महाकाल-श्चेतसीति चमत्कृतः ॥
॥ ५४ ॥ वृणु वत्स वरं साधु । जितोऽस्मि भवताधुना ॥ न वीरो धरणीपीठे। त्वत्तोऽन्यो-
ऽस्ति सुलोचन ॥ ५५ ॥ साधु त्वयोक्तं यद्धर्मा-ज्जयो भवति निश्चितं ॥ अहं तु हिंसानिरत
-स्त्वं तु सर्वहितंकरः ॥ ५६ ॥ श्रुत्वेति विकसन्नेत्रः । खड्गं संहृत्य भूपभूः ॥ धर्मैकरुचिरां
वाच-मवोचत्तंप्रति स्फुटं ॥ ५७ ॥ धर्मे रतिः स्फुरत्येवं । तर्कयामीति गुह्यक ॥ गन्नावस्तव

॥ ६६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सौधाग्र—मावां कुर्वस्ततः कथां ॥ ५८ ॥ इत्थं प्रीतौ महीपाल—महाकालौ महाभुजौ ॥ प्रासादं समवाप्याग्र । जातांतस्तौ निषीदतुः ॥ ५९ ॥ धर्मसर्वस्वसुत्तगां । गंभीरगरिमाधिकां ॥ मनःप्रीतिकरीं वाचं । जगाद नृपनंदनः ॥ ६० ॥ धर्मादासाद्यते राज्यं । धर्माद्देवत्वमाप्यते ॥ धर्मादेव शिवप्राप्ति—र्धर्मः सेव्यस्ततो बुधैः ॥ ६१ ॥ धर्मो मंगलमुत्कृष्टं । धर्मः स्वर्गापवर्गदः ॥ धर्मः संसारकांतारो—ल्लंघने मार्गदर्शकः ॥ ६२ ॥ धर्मो मातेव पुष्णाति । धर्मः पाति पितेव सः ॥ धर्मः सखेव प्रीणाति । धर्मः स्निह्यति बंधुवत् ॥ ६३ ॥ धर्मस्य जननी जीव—दया मान्या सुरासुरैः ॥ तस्मात्तद्वैरिणीं हिंसां । नाद्रियेत सुधीर्नरः ॥ ६४ ॥ दानं तपो देवपूजा । शीलं सत्यमथो जपः ॥ सर्वमप्यफलं तस्य । यो हिंसां न परित्यजेत् ॥ ६५ ॥ कंटकेनापि संविद्धो । देहो दूयेत निश्चितं ॥ तत्कथं शस्त्रसंघातै—र्हन्यते ही परो जनः ॥ ६६ ॥ दयां विनापि मन्यंते । ये धर्मं मूर्खशेखराः ॥ वंध्यायां तनयं तेऽपि । जनयंति विसंस्थुलाः ॥ ६७ ॥ दयैव हि परो धर्मो । दयैव हि परं श्रुतं ॥ दयांविनाखिलो धर्मो । भवेन्निःफल एव यत् ॥ ६८ ॥ नाद्रियेत कृतघ्नत्व—माद्रियेत कृतज्ञतां ॥ स्वोपकारिणि धर्मे त—स्मादरं कुरु



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





यद्भुप ॥ ६९ ॥ जीवानुकंपासफलां । धर्मादाय पुरा बकः ॥ स्वर्गसौख्यं ततो मुक्ति-मपुनर्भवकारिणीं ॥ ७० ॥

तथाहि विपिने श्रीदे । सरोरुहमनोहरं ॥ अस्ति पल्वलमक्षोद-समस्वच्छोदकं किल ॥ ॥ ७१ ॥ मत्स्यग्रासो बकस्तत्र । वित्रासितपतत्ततिः ॥ रौद्रध्यानी महाक्रूरो । वसति स्वेच्छया चरन् ॥ ७२ ॥ काकादीन् जलपानाय । तत्रायातान् हिनस्त्यसौ ॥ विषयग्रामवत्तृष्णा-तुरान् स्वयमुपागतान् ॥ ७३ ॥ इतश्च केवलज्ञानी । साक्षाद्धर्म इवांगवान् ॥ आत्मवत्सकलं पश्यन् । कश्चित्तत्रागतो मुनिः ॥ ७४ ॥ तत्सरोवरतीरेऽथ । मुनींद्रः समवासरत् ॥ मृगसिंहादिकाः सत्वा-स्तत्राभ्येयुश्च सत्वराः ॥ ७५ ॥ महाकायो बकः सोऽपि । वृतो बककुलैर्घनैः ॥ तत्रागतः पिपासुश्च । वाचंयमवचःसुधां ॥ ७६ ॥ तद्बोधाय मुनींद्रोऽपि । तन्नाशान्निरसूत्रयत् ॥ देशनां कृपया तेषां । धर्मसाम्राज्यशोभिनीं ॥ ७७ ॥ पंचेंद्रियाणां पटुता । दुर्लभा तत्र चेतृता ॥ दुर्लभोऽप्यस्तिधर्मेश्च । तिरश्चामविवेकिनां ॥ ७८ ॥ पूर्वविराधिताद्धर्मा-त्तिर्यग्गतिरवाप्यते ॥ तस्यामपि हि यत्पापं । तन्नयेन्नरकावनौ ॥ ७९ ॥ तत्र तप्तायसाश्लेष-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रपुपानं च बंधनं ॥ छेदनं ल्नेदनं वज्र—कंटकोट्टंकनं ल्नवेत् ॥ ७० ॥ अतो ध्याने न रौद्रार्त्ते।
कार्ये वार्योऽसुमद्वधः ॥ आत्मवत्सकलं विश्वं । चिंतनीयं चराचरं ॥ ७१ ॥ इति तन्मुनिवा-
क्येन । तत्यजुः परपीमनं ॥ सिंहव्याघ्रादयः सर्वे । बकोऽप्यासीत्कृपापरः ॥ ७२ ॥ अति-
वाह्य निजं कालं । दयावांस्तद्दिनादपि ॥ अंते धर्मं स्मरंश्चित्ते । देवज्नूयं बको ययौ ॥ ७३ ॥
एकावतारी ज्नूत्वाथ । व्यवहारिकुलप्रसूः ॥ धर्मं विधाय स हितं । मुक्तिमासादयिष्यति ॥
॥ ७४ ॥ यक्षराज ततो धर्मा—द्देवत्वं त्वं हि लब्धवान् ॥ तद्वोद्विर्णी कथं हिंसां । कुरुषे
परुषेरितः ॥ ७५ ॥ त्यज हिंसां कुरु दयां । ज्नज धर्मं सनातनं ॥ स्वदेहेनापि सत्वानां ।
विधेह्युपकृतिं तथा ॥ ७६ ॥ धनेन जीवितव्येन । विद्यया च बलेन वा ॥ इहामुत्र हिता
कार्या । परोपकृतिरुत्तमैः ॥ ७७ ॥ दृष्टं प्राग्जन्मकोपस्य । फलमेतत्त्वया खलु ॥ तद्वैरिएयपि
मा वैरं । कुर्याः स्वस्य हिताय च ॥ ७८ ॥ प्रांतकाले जिनो दृष्ट—स्तेन देवत्वमाप्तवान् ॥
ज्नवानपि ततो नेमि—नाथं पूजय सर्वदा ॥ ७ए ॥ यक्षस्तद्वचसा प्रीत—श्चिंतारत्नमिवोज्ज्व-
लं ॥ प्राप्य धर्मं ननामाथ । तं गुरुं गुणशालिनं ॥ ए० ॥ ज्नवाच च जिनो देवो । गुरुमु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्तपरिग्रहः ॥ दयाप्रधानो धर्मश्च । त्रयमेतत्सदास्तु मे ॥ ए१ ॥ यथाख्यातं महाधर्मं । स
जग्राहानवग्रहं ॥ गुरुपूजाकृते विद्यां । ददौ च नृपसूनवे ॥ ए२ ॥ अनुज्ञाप्य मुदा यक्षं ।
व्यावृत्त्यानुगमोद्यतं ॥ प्रचचाल महीपालः । कृपालिंगितमानसः ॥ ए३ ॥ गच्छामि स्वपुरं
नो वा । प्रसंगादागतो बहिः ॥ पश्यामि विविधान् देशान् । नानाश्चर्यविभूषितान् ॥ ए४ ॥
विज्ञायते निजा शक्ति–र्देशाचारं परीक्ष्यते ॥ तथोत्तमाधमव्यक्ति–कलास्तास्ता भवंति हि
॥ ए५ ॥ नानानरप्रसंगः स्या–त्तीर्थानि विविधानि च ॥ दृश्यंते तेन विबुधा । भ्रमंति व-
सुधामिमां ॥ ए६ ॥ युग्मं ॥ यत्र वा तत्र वा यातः । परेभ्यः स्वेभ्य एव वा ॥ पुमान्
यन्मान्यतामेति । प्राक्पुण्यं तत्र कारणं ॥ ए७ ॥

एवं विचिंत्य नृपसूः । पूर्वां दिशमनुव्रजन् ॥ पुरारामनगादीनि । ललंघे स बहून्यपि
॥ ए८ ॥ दिनैः कतिपयैः प्राप । पुरं सुंदरमित्यथ ॥ तदुद्यानं द्रुमोद्दामं । शिश्राय च नृप-
प्रसूः ॥ एए ॥ तत्रांबिकायाश्चैत्येऽसौ । मत्तवारणमाश्रितः ॥ स्मृत्वा देवान् गुरूंश्चापि ।
निशि सुस्वाप निर्भयः ॥ १०० ॥ हा तात मातर्हा भ्रातः । सुरा हा सकृपापराः ॥ रक्षंतु



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मामत पापात् । कालवह्निःकृपादहो ॥ १ ॥ कस्या अपि नितंबिन्या । दीना इत्थं गिरो मुहुः
॥ शुश्राव स महीपालो । जजागार च तत्क्षणात् ॥ २ ॥ सुप्तं ॥ शब्दागतिं स निर्णीय ।
निश्चलेन च चेतसा ॥ पाणिना खड्गमादाय । द्रुतमन्वचलच्च तं ॥ ३ ॥ ततश्चैकं नरं ध्यान
–स्थितं नारीं च विह्वलां ॥ अग्निकुंडं च नृपसू–रपश्यन्नगसंधिषु ॥ ४ ॥ असाविमां जिघां-
सुर्हि । मुग्धः केनापि वंचितः ॥ तदिमां मोचयिष्यामि । विमृश्येत्यवदच्च तं ॥ ५ ॥ रे त्व-
यैतत्किमारब्धं । पापकारिन्नराधम ॥ मुंचेमां बालिकां नोचे–न्नेष्यामि त्वां यमालयं ॥ ६ ॥
अथोद्भ्रांतः समादाय । दोर्भ्यां विद्याधरः स्त्रियं ॥ कुमाराक्षेपवित्रस्तो । ययौ जवजितानिलः
॥ ७ ॥ तन्मोक्षणे कुमारोऽपि । समारोपितनिश्चयः ॥ खड्गपाणिर्महावेगा–त्तमन्वसरदातुरं
॥ ८ ॥ पृष्टानुधाविनि नृप–कुमारे दत्तलोचनः ॥ विद्याधरो महावेग–जितगंधर्वहो ययौ ॥
॥ ९ ॥ स गच्छन्नग्रतो व्यग्रो । नारीवधनिबद्धधीः ॥ श्वभ्रभीष्मे महाकूपे । झंपां झटिति
दत्तवान् ॥ १० ॥ कुमारोऽपि कृपाधारो–ऽनुचरः स्फारविक्रमः ॥ ददौ झंपां ततस्तस्य । वि-
त्रस्तस्योद्दिधीर्षया ॥ ११ ॥ विद्याधरोऽपि वेगेना–न्नवहकपथदूरग ॥ पूर्वपापैर्दत्ततापैः । कृ-

For Private And Personal Use Only

ष्यमाण इवाधिकं ॥ १२ ॥ अतिक्रम्य कुमारोऽपि । कियंतं कूपमग्रतः ॥ प्रकाशं दृश्यमा-
नाङ्घ्रि–द्रुमालिं लब्धवांस्ततः ॥ १३ ॥ भ्रमन्नितस्ततस्तत्र । विपिनानि विलोकयन् ॥ नृश-
माक्रंदमेतस्याः । पुनः शुश्राव नृपभूः ॥ १४ ॥ मंदं मंदं ततो गत्वा । द्रुमाच्छादितविग्रहः ॥
प्रत्याकाराकृष्टखड्ग–स्तस्थौ मौनमुपेयिवान् ॥१५॥ रक्तचंदनलिप्तांगीं । रक्तवस्त्रविभूषितां ॥
रक्तस्रजमग्निकुंड–समीपे च ददर्श तां ॥१६॥ आकारगोपनं कृत्वा । खड्गमाच्छाद्य वाससा ॥
लीलयागात्परिक्रामन् । कुमारस्तत्पुरस्ततः ॥ १७ ॥ उवाच च महासत्व । किमिदं क्रियते
त्वया ॥ गुर्वादेशात् स्वबुद्ध्या वा । किंचायं ते कुलक्रमः ॥ १८ ॥ विद्याधरोऽप्यथ प्रोचे ।
स्वेच्छया याहि पांथ भोः ॥ स्वकर्मनिरतः सर्वो । नान्यशिक्षामपेक्षते ॥ १९ ॥ परोपकार-
प्रवण । नृशंसान्मद्वधोद्यतात् ॥ अस्मान्मां पाहि पाहीति । तमूचे च कुमारिका ॥ २० ॥
दीनाक्षरमिति श्रुत्वा । तद्वचः करुणापरः ॥ उवाच वचनं चारु–रचनं क्षितिपांगजः ॥२१॥
अबलासावशरणा । त्वं तु क्षत्रकुलप्रसूः ॥ न लज्जसे स्वचित्तेऽपि । कुर्वन्नेवं कुकर्म किं ॥
॥ २२ ॥ स्त्रीवधात्साध्यते विद्या । भ्रांतिमेवं कुरुष्व मा ॥ पापारंभाच्छुभं कर्म । प्रयाति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 



विलयं स्वयं ॥ २३ ॥ द्वेषिणा केनचित्कामं । मुग्धस्त्वं विप्रतारितः ॥ तवोन्नतिविघाताय । कृतोपायेन निश्चितं ॥ २४ ॥ कुरु मत्कथितं मुग्ध । मुंचेमां मा वृथा पत ॥ दुर्गतौ वनिता- घात-पातकेनातिदारितः ॥ २५ ॥ इत्युक्तया कोपमापन्नो । विद्याभृत् हृदयापि सः ॥ त- प्ततैलं जलासेका-ज्ज्वलत्येव विशेषतः ॥ २६ ॥ विगर्हसि कथं स्त्रियां । मद्गुरुं चापि निं- दसि ॥ याहि स्वपथसंलग्नः । खंडयिष्ये न चेच्छिरः ॥ २७ ॥ इत्युच्चरन् खड्गपाणिः । स सं- रंभादधावत ॥ कुमारोऽप्यभवद्युद्ध-सज्जो विक्रमभूषणः ॥ २८ ॥ खड्गाखड्गि प्रकुर्वाणौ । मुष्टामुष्टि क्षणान्मिथः ॥ दंडादंडि च तौ वीरौ । दुःसहावित्यजायतां ॥ २९ ॥ कुमारेण सुसारेण । खड्गविद्याप्रभावतः ॥ जितो विद्याधरश्रेष्ठ । आचष्टातिपटिष्ठवाक् ॥ ३० ॥ न जितोऽहं पुरा देवै-रपि विद्यास्त्रपारगैः ॥ त्वया जितोऽस्मि विस्मेर-विक्रमेण वदासि कः ॥३१॥ अथास्मि पापनिरत-स्त्वं तु जंतुहितावहः॥ धर्माद्जयोऽथाधर्माच्च । भंगः स्यान्नात्र सं- शयः ॥ ३२ ॥ इत्युक्त्वा विरते तस्मिन् । जगाद नृपनंदनः ॥ विधेहि खेदमेवं मा । धर्मे धेहि धियं पुनः ॥ ३३ ॥ स्त्रीवधोद्भवपापेन । गम्यते नरकावनौ ॥ त्वं विद्याक्लिष्टस्तेन । प्रा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 



प्तुमिच्छसि सत्फलं ॥ ३४ ॥ अधुनापि परेहं । मा स्म कुर्या महामते ॥ जिनाराधननिष्णातो । भव सौख्यशतेच्छया ॥ ३५ ॥ निपीयेति गिरं विद्या–धरः कृतनमस्कृतिः ॥ प्रांजलिस्तत्पुरो भूत्वा । शिक्षां शिष्यवदाप्तवान् ॥ ३६ ॥ केयं कन्येति पृष्टः सन् । कुमारेण जगौ हि सः ॥ अस्ति कल्याणकटकं । कन्यकुब्जे महापुरं ॥ ३७ ॥ दत्तयाचककल्याणः । कल्याणावलिमालितः ॥ कल्याणसुंदरो राजा । शास्ता तस्यास्ति शस्तधीः ॥ ३८ ॥ कल्याणसुंदरी नाम । पतिभक्तिपवित्रिता ॥ शीलोन्मीलदलंकारा । राज्ञस्तस्यास्ति वल्लभा ॥ ॥ ३९ ॥ तत्कुक्षिरत्नं रूपश्री–श्रेयसी गुणसुंदरी ॥ नाम्नेयं दुर्विनीतेन । मयाहारि महेच्छया ॥ ४० ॥ इयं जीवितदानेन । नरकोद्धरणादहं ॥ द्वावौ त्वयानया शक्त्या । क्रीतौ भो किंकराविव ॥ ४१ ॥ अस्याः स्वयंवरमहो । मासेन भविता महान् ॥ त्याजितासौ जिताज्ञास्या । मया स्वं धाम कामिनी ॥ ४२ ॥ आलाप्येति महीपालं । भूपजः सन्मुखेक्षणः ॥ पातुं तद्वचनज्योत्स्नां । चकोर इव सोऽभवत् ॥ ४३ ॥ जजगार कुमारोऽपि । गिरं साररसाश्रयां ॥ तर्हीतां शीघ्रमेव त्वं । प्रापय स्वपितुर्गृहान् ॥ ४४ ॥ तद्गिरा व्योममार्गेण । वि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





द्याशक्त्या खगोऽभुतं ॥ तामनैषीन्निजं स्थानं । स्वजनानंदकंदलीं ॥ ४५ ॥ विद्याधरः कुमा-
राय । ददौ विद्याश्च षोमश ॥ कुमारश्च जिनाख्यातं । तस्मै धर्मं निसृष्टवान् ॥ ४६ ॥ प्रा-
सादं प्रेक्ष्य पूर्वाशा–तिलकोपममुन्नतं ॥ कुमारस्तं पुनः प्राह । वेश्म कस्येदमीक्ष्यते ॥
॥ ४७ ॥ जगाद सोऽथ पृष्ठांते । किंचिन्निध्याय चेतसा ॥ कुमार सत्कृपाधार । मत्कथां
श्रुणु सादरः ॥ ४८ ॥

अस्ति वैताढ्यशैलेऽस्मिन् । पुरं रत्नपुराभिधं ॥ मणिचूमो महीजानि–स्तत्रासीत् त्रा-
सिताहितः ॥ ४९ ॥ रत्नप्रभरत्नकांती । सुतौ तस्य बभूवतुः ॥ विद्याविलासरसिकौ । पितृ-
भक्तिपवित्रितौ ॥ ५० ॥ रत्नप्रभाय साम्राज्य–मंते दत्वागृहीद्व्रतं ॥ मणिचूमः सर्वसत्व–स-
मचित्तो वने ययौ ॥ ५१ ॥ रत्नप्रभो राज्यमदा–द्रत्नकांतिं बलोद्धतं ॥ मामथालोक्य मिषतः
। स्वपुरान्निरवासयत् ॥५२॥ तदूद्वेषात्त्वहमत्रैव । पाताले नूतनं पुरं ॥ अस्थापयं महासौध–
श्रेणिशोभावभासितं ॥ ५३ ॥ पुरस्यास्य प्रभुस्तिष्ठेत् । श्रीशांतिर्जिननायकः ॥ प्रासादेऽत्र
प्रभावाढ्यः । सिद्धायतनवेष्टिते ॥ ५४ ॥ तद्भयाय महीपाल । कृतोपायः कुविद्यया ॥ त्वया-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ह्मुद्धृतः साधु । पतन्नरककोटरे ॥ ५५ ॥ गद्भावो जिनपूजायै । चैत्येऽस्मिन्निति भाषिणो ॥
उत्थाय विधिवद्देव-सेवनं तौ तु चक्रतुः ॥ ५६ ॥ ततः स खेचरश्चारु-विनयो मार्गमुद्दिश-
न् ॥ पातालवनमध्यस्थां-स्तस्मै दर्शितवान् मुनीन् ॥ ५७ ॥ कांश्चिद्ध्यानसमासीनान् ।
पाषाणोट्टंकितानिव ॥ दृढयतश्च सर्वज्ञ-पुत्रतां विश्वकीर्त्तनात् ॥ ५८ ॥ दृष्ट्वा संयमिनः स-
र्वान् । पुण्यमूर्त्तीन् स तद्विधान् ॥ मुदं प्राप महानंद-पदसद्वर्णिकामिव ॥ ५९ ॥ [illegible] ॥
नत्वा तान् विधिवद्भूर-सूनुरन्यूनभक्तिमान् ॥ मुनीशमुखशीतांशु-स्तद्दग्न्यषदत् पुरः ॥
॥ ६० ॥ गुरुर्ज्ञात्वाथ तौ भव्यौ । सहजेनोपकारकः ॥ शशांकधवलं धर्मं । देशयामास
साधुगीः ॥ ६१ ॥ कंदः कल्याणवल्लीनां । विपदंभोजिनीगजः ॥ धर्म एव जयत्यत्र । क-
मलाकुलमंदिरं ॥ ६२ ॥ तदा च तत्र चारित्र-पवित्रौ मधुराकृती ॥ उभौ सुकृतशृंगारा-
वनगारावुपेयतुः ॥ ६३ ॥ गुरुं नत्वा निषण्णौ तौ । पप्रच्छ स्वच्छधीरिति ॥ महीपालो मही-
पालो । भगवंतौ कुतो युवां ॥ ६४ ॥ तावाहतुर्महाबाहो । पुंडरीकोज्जयंतयोः ॥ यात्रां मु-
दा विधायावा-मागमावोऽधुनैव हि ॥ ६५ ॥ तदाकर्ण्य महीपालः । सकर्णानां शिरोमणिः ॥ 

For Private And Personal Use Only

धन्यमूर्द्धन्यमात्मानं । मेने तीर्थेशवार्त्तया ॥ ६६ ॥ ततो गुरुर्महीपालं । धर्मे तीर्थे च सादरं
॥ मत्वा तत्कीर्त्तनात्सद्यो–ऽनुजग्राहेति हर्षतः ॥ ६७ ॥ यद्वज्जिनेष्वादिजिनो । यद्वच्चक्रिषु
तत्सुतः ॥ यथा भवेषु मानुष्यं । वर्णेषु प्रणवो यथा ॥ ६८ ॥ यथा सुराष्ट्रा राष्ट्रेषु । शीलं
यद्वद्व्रतेष्वपि ॥ तथा शत्रुंजयं तीर्थं । मुख्यं तीर्थेषु कथ्यते ॥ ६९ ॥ युग्मं ॥ दुरंतदुरितव्यू-
हा–तंकस्तत्र कथं भवेत् ॥ यत्र सिद्धाद्रिरुन्निद्र–दारिद्र्यद्रोहकृज्जयी ॥ ७० ॥ जिन एव हि
जानीते । माहात्म्यं सिद्धभूभृतः ॥ पारावारस्य गांभीर्यं । मंदरो वेत्ति नेतरः ॥ ७१ ॥ तीर्थं
त्रिभुवनेऽप्यग्र–मेष सिद्धधराधरः ॥ वीक्षितोऽप्यघसंघात–घातनप्रत्यलोंगिनां ॥ ७२ ॥ दुर्नि-
वारतमोवार–तिरस्कारविरोचनैः ॥ श्रीनाभिनंदनजिनः । शृंगे चास्य विराजते ॥ ७३ ॥
तदेतदुभयं विश्वो–त्तरातिशयसंवृतं ॥ वीक्ष्यांगी सर्वहत्यादि–पातकेभ्यः प्रमुच्यते ॥ ७४ ॥

तथाहि भरतक्षेत्रे । श्रावस्त्यां पुरि पार्थिवः ॥ त्रिशंकुतनयो जज्ञे । त्रिविक्रम इती-
रितः ॥ ७५ ॥ सोऽन्यदोद्यान–मुद्गच्छन् । स्थितो वटतरोस्तले ॥ क्रूरारावेणमैक्षिष्ट । शीर्ष-
स्योपरि पक्षिणं ॥ ७६ ॥ उड्डायितोऽपि नायैति । स यदा कटुकं रटन् ॥ तदा क्रुद्धोऽवधी-



Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राजा । पत्रिणा तं पतत्रिणं ॥ ७७ ॥ पतितं वीक्ष्य भूपीठे । तं लुठंतं विसंस्थुलं ॥ किंचि-
त्सानुशयो भूपो । निवृत्य नगरं ययौ ॥ ७८ ॥ अर्त्त्या विपद्य स खगो-ऽभवद्भिल्लकुलोद्भ-
वः ॥ कस्मिन्नपि वने बाल्या-दपि पापर्द्धिवृद्धिकृत् ॥ ७९ ॥ इतस्त्रिविक्रमोऽन्येद्यु-र्मुनेर्धर्म-
रुचेर्मुखात् ॥ अशृणोद्भावमसृणो । धर्ममेवं दयामयं ॥ ८० ॥ दयैव च परो धर्मो । दयैव
परमा क्रिया ॥ दयैव परमं तत्वं । तद्भद्र भज तां दयां ॥ ८१ ॥ व्यर्थं दानं मुधा ज्ञानं । वृ-
था निर्ग्रंथतापि हि ॥ अनार्या योगचर्यापि । न चेज्जीवदया भवेत् ॥ ८२ ॥ राजा तद्विध-
माकर्ण्य । धर्मं कर्णामृतं तदा ॥ उद्यद्दयामयो जीवा-नस्मरत् स्वहतानपि ॥ ८३ ॥ अहो
मयाऽज्ञानवशात् । पुरा दुश्चेष्टितं महत् ॥ नूनं सहिष्ये विविधान् । भवभावान् सुदुःस-
हान् ॥ ८४ ॥ किं जीवितेनाप्यमुना । किं च राज्यादिभिर्मम ॥ येनेह लोके संतापः । प-
रत्र नरके गतिः ॥ ८५ ॥ असारभूतादप्यस्माद्-देहात्सारं वरं व्रतं ॥ गृहीष्ये कर्दमात्पद्म-
मिव हेम मृदो यथा ॥ ८६ ॥

इति संचिंत्य नृपति-र्मुनिं नत्वा कृतादरः ॥ व्रतं ययाचे मुनिर-प्यदीक्षयदमुं मुदा ॥



For Private And Personal Use Only

॥ ८७ ॥ अधीतसर्वसिद्धांतो । नवतत्वधरो मुनिः ॥ त्रिविक्रमाख्यो विधिवत् । पालयामास
सद्व्रतं ॥ ८८ ॥ गुरुपादाननुज्ञाप्य । विहरन्नन्यदा मुनिः ॥ एकः संसारकांतारं । रविरभ्रांतरं
यथा ॥ ८९ ॥ तस्थिवांसं प्रतिमया । तमप्रतिमसंयमं ॥ प्रेक्ष्य प्राग्वैरतः पत्रि—शबरः सरुषं दधौ
॥९०॥ यष्टिमुष्ट्यादिभिर्वाचं—यमं यम इव क्रुधा ॥ ताडयामास निर्विघ्नं । स स्वन्नागयमिवा-
ल्पधीः ॥९१॥ शांतस्वांतोऽपि स वशी । घोरघातार्दितः ॥ बभार रोषज्वलनं । घृष्टं दार्विव दारुणा
॥९२॥ तेजोलेश्यां मुमोचायं । तं प्रति प्रतिघातुरः ॥ तयाथ पत्रिशबर—स्तरुदाहमदह्यत ॥९३॥
विपद्य भीमकांतारे । भिल्लजीवोऽथ केसरी ॥ अजनिष्ट मुनिः सोऽपि । विहरन्नाप तद्वनं ॥९४॥
मुनिं वीक्ष्य हरिः स प्राग्—वैराद्धंतुमधावत ॥ धर्मैकसाधनं देहं । त्रातुं मुनिरपासरत् ॥
॥ ९५ ॥ नश्यन् यतो यतो याति । यतिरग्रे ततस्ततः ॥ रुषा याति मृगाराति—र्जंतोः कर्म
यथा कृतं ॥ ९६ ॥ महात्मा दारुणरुषा । हरिणा खेदितस्तथा । यथामुंचन्महालेश्या—
मसौ कोपवशाशयः ॥ ९७ ॥ तया पंचत्वमापन्नः । स द्वीपी समजायत ॥ अतिक्रूरः क्रूर-
वने । दैवात्तत्र मुनिर्ययौ ॥ ॥ ९८ ॥ यावन्मुनिः प्रतिमया । तिष्ठति स्थिरमानसः ॥ द्वीपी

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





प्राग्वैरतस्ताव–त्तं जिघांसुरुपासरत् ॥ ९९ ॥ जानन्नपि कषायाणां । विपाकमतिदारुणं ॥
दुर्जयत्वात्कर्मशक्ते–र्वशी कोपवशं गतः ॥ ३०० ॥ अतिकोपो मुमुक्षूणा–मक्षीणज्ञानसं-
पदां ॥ चित्ते यदि पदं धत्ते । परेषां तर्हि का कथा ॥ १ ॥ तपःशस्त्रान्मुनेः प्राप्य । द्वीपी
मृतिमतिक्रुधः ॥ भैरवे क्वापि कांतारे । गवयत्वमवाप्तवान् ॥ २ ॥ नृशमारब्धयोगांगं ।
दैवात्तत्राप्युपागतं ॥ सुसंरब्धो मुनिपतिं । गवयस्तमुपाद्रवत् ॥ ३ ॥ अनगारो यदारोपि ।
तेन जीवितसंशये ॥ तदा तेन तु स प्राग्व–ज्जीवितेशातिथिः कृतः ॥ ४ ॥

अथो गवयजीवोऽभू–दुज्जयिन्यामवंतिषु ॥ आशीविषो विषोदग्रः । स सिद्धवटकोटरे
॥ ५ ॥ क्रमात्त्रिविक्रमः क्रामन् । वटावटतटे स्थितः ॥ कायोत्सर्गेण तेनाशु । ददृशे च फ-
णावता ॥ ६ ॥ अतुच्छमत्सरः पूर्वा–पकारिणममुं मुनिं ॥ दृष्ट्वा दुष्टाशयः स्फार–फणः फण-
भृदभ्यगात् ॥ ७ ॥ तथैव रोषपरुषः । साधुरप्युरगं रयात् ॥ आपतंतं तमालोक्या–नयत्की-
नाशमंदिरं ॥ ८ ॥ अकामनिर्जरायोगात् । क्लिष्टकर्मा किमप्यथ ॥ अहिजीवः सुतो जज्ञे ।
रोरद्विजगृहे क्वचित् ॥ ९ ॥ विहरन्नन्यदा वाचं–यमो ग्राममं तमागमत् ॥ यत्र पन्नगजीवो-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽस्ति । संप्राप्तो द्विजपुत्रतां ॥ १० ॥ ग्रामोपांते भ्रमन्योग–मन्यस्यंतमवेक्ष्य तं ॥ यातिं द्वि-
जाधमो हंतुं । प्राग्वैरादन्वधावत ॥ ११ ॥ तं घ्नंतं निःकृपं मुष्टि–यष्ट्यादिभिरनेकधा ॥ को-
पावेशोऽथ साधुश्च । प्रणिहंतिस्म पूर्ववत् ॥ १२ ॥ अकामादपि निर्जीर्ण–कर्मात् किंचिच्छु-
भोदयात् ॥ वाराणस्यां महाबाहु–र्द्विजजीवोऽभवन्नृपः ॥ १३ ॥ परमैश्वर्यलीलाभि–रप्रमी-
लाभिरन्वहं ॥ हृतचित्तो महाबाहु–र्बहुसमयमत्यगात् ॥ १४ ॥ महाबाहुर्महीनाथो–ऽन्यदा-
सौधगवाक्षगः ॥ निर्ग्रंथमेकमद्राक्षीत् । पथि यांतमनेनसं ॥ १५ ॥ अहो महात्मा कोऽप्येष।
महनीयो मनीषिणां ॥ किंचिदुन्मिषितद्वेष–मस्मिंस्तदपि मे मनः ॥ १६ ॥ पुराप्यहं महा-
त्मान–मेनमन्यमथेदृशं ॥ क्वाप्यपश्यमिति स्वांते । चिरं दध्यौ धराधवः ॥ १७ ॥ जाति-
स्मृत्याथ सस्मार । प्राच्यं स्वं जन्म सप्तकं ॥ साधुकोपानलज्वाला–कवलीकृतजीवितं ॥
॥ १८ ॥ बुध्वेति वसुधाधीशः । श्लोकार्धमिदमुज्जगौ ॥ विहंगः शबरः सिंहो । द्वीपी शंढः ॥ ८१ ॥
फणी द्विजः ॥ १९ ॥ समस्यां सम्यगेतां यः । सुचेताः पूरयिष्यति ॥ तस्य दास्यामि दी-
नार–लक्षं दक्षशिरोमणेः ॥ २० ॥ इति क्षितिपतेर्वाचं । श्रुत्वा सर्वोऽपठज्जनः ॥ गूढप्रौढर-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 



हस्यां तां । समस्यां धनलिप्सया ॥ २१ ॥ युग्मं ॥ संचरिष्णुर्दिशः सर्वाः । स मुनिस्तत्र चागतः ॥ पामरोक्तां समस्यां ता–मश्रुणोद्वहिरुन्मनाः ॥ २२ ॥ येनामी निहताः कोपात् । स कथं नविता हहा ॥ इत्युत्तरपदद्वंद्वं । समस्याया मुनिर्जगौ ॥ २३ ॥ मुनिनोक्तामिमां सत्या–मित्यामृश्य स पामरः ॥ पुरो नरेशितुस्तूर्ण–मपाठीत्तत्पदद्वयं ॥ २४ ॥ तदनुत्पत्तिमुच्चिंत्य । तं नृपः पुनरब्रवीत् ॥ समस्या येन पूर्णेयं । तं मे वद विदांवर ॥ २५ ॥ राज्ञोपरुद्धः स नृशं । मुनिं वनमुपागतं ॥ जगौ तद्वर्णरत्नानां । खनिमुत्खनमेनसां ॥ २६ ॥ तदुत्कंठारसाधारो । रसाधारो महाभुजः ॥ अनर्हपरिबर्हेण । वने मुनिमुपानमत् ॥ २७ ॥ जातिस्मृत्या नृपो वाचं–यमं तमुपलक्ष्य च ॥ जगौ मुने मेऽपराधान् । तांस्तान् मर्षय मर्षय ॥ २८ ॥ तत्ताहृग्ज्ञवबंधेन । मया त्वं पीमितोऽसि धिक् ॥ इहग्राज्यप्रदाता मे । ह्युपकर्त्ता स्वदर्शनात् ॥ २९ ॥ त्वत्तपोव्ययमप्येव–मकार्षमविदन् निजं ॥ क्रोधश्चांमाल एषोऽपि । मन्निमित्तो हि जह्यतां ॥ ३० ॥ मुनिस्तेनांकुशेनेव । वचसा जातजागरः ॥ ताहग्व्यापारकांतारा–न्मनःकुंजिनमाहरत् ॥ ३१ ॥ ऊचे च धिग्मया राजन् । यत्क्षमाश्रमणेन हि ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सता त्वं निहतस्तेषु । तेषु जन्मसु पापिना ॥ ३२ ॥ तन्मेऽपराधमज्ञाना–न्मर्षयातिसुदुःस-
हं ॥ अथवा स्वस्य बोधडुं । स्वयमेवोदमूलयं ॥ ३३ ॥ यावत्ताविति संलाप–पेशलौ स्तः प-
रस्परं ॥ तावदुंदुभिनिर्ह्राद–मश्रौष्टां मरुतां पथि ॥ ३४ ॥ किमेतदिति संचिंत्य । तौ याव-
द्व्योमदर्शिनौ ॥ तावत्सुरोत्तयाज्ञासिष्टां । मुनिं केवलिनं वने ॥ ३५ ॥ सादरं तद्दिदृक्षायै ।
मनःसंशयनाशनं ॥ सहसैवापसृत्योभौ । नेमतुस्तं सुरार्चितं ॥ ३६ ॥ तादृक् तयोर्मुनिर्ज्ञा-
त्वा । भावमुद्भावितांहसं ॥ शशंस धर्ममार्हत्य–मुख्यजीवदयामयं ॥ ३७ ॥ अमरत्वपदोदारं ।
सारं धर्मपयो भवेत् ॥ अमर्षविषसंजात–हिंसाकालुष्यदूषितं ॥ ३८ ॥ चारित्रचित्ररचनां ।
स्वात्मभित्तिनिवेशितां ॥ क्रोधकूर्चिकयोन्मिश्र–हिंसा दुष्यति कज्जलां ॥ ३९ ॥

मुनिमज्ञानसंजाता–ऽविवेकेन प्रदूषयेत् ॥ यस्तस्मादपरः कश्चि–न्न नरः पापपंकिलः
॥ ४० ॥ तपस्यन्नपि यस्तीव्रं । तपः क्रुध्यति वाविशः ॥ स चारित्रद्रुमं दग्ध्वा । तद्भस्मा-
त्मनि निक्षिपेत् ॥ ४१ ॥ त्वयोदकोपि यद्भावं–यमः पूर्वभवे नृप ॥ तेनास्य स्वस्य चाघा-
ति । पूर्वपुण्यमजानता ॥ ४२ ॥ आक्रोष्टावधकः प्रायो । हितकृत्कर्मनाशनात् ॥ अजानता



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





त्वया तद्धि । मुने हिंसा विनिर्ममे ॥ ४३ ॥ गच्छ शत्रुंजयं तीर्थं । सर्वपापविनाशकृत् ॥ तपस्यन्नर्हतो ध्यानाद् । ज्ञानं सिद्धिं च लप्स्यसे ॥ ४४ ॥ निविडं तच्च कर्मेदं । विना शत्रुंजयं मुने ॥ न निर्जरति शीलाद्यैः । सेवितैरपि दुःखदैः ॥ ४५ ॥ त्वमिमं पुरतः कृत्वा । गुरुं नृप समं जनैः ॥ शत्रुंजयादिशैलेषु । कुरु यात्रां समाहितः ॥ ४६ ॥ यात्रांते सर्वविरतो । निरतो ब्रह्मणि स्थितः ॥ सार्द्धमेतेन मुनिना । तत्रैव कुरु सत्तपः ॥ ४७ ॥ टंकणेन यथा हेम । जलेन लवणं यथा ॥ तथा शत्रुंजयस्मृत्या । कर्मपंको गलत्यहो ॥ ४८ ॥ तमो यथोष्णरुचिना । पुण्येनेव दरिद्रता ॥ तथा शत्रुंजयस्मृत्या । विनश्यति कुकर्म तत् ॥ ४९ ॥ कुलिशेन यथा शैलं । सिंहेनेव कुरंमकः ॥ तथा शत्रुंजयस्मृत्या । च्छिद्यते पूर्व कर्म तत् ॥ ॥ ५० ॥ यथाग्निना सर्ववस्तु । लोहेनेवान्यधातवः ॥ तथा शत्रुंजयस्मृत्या । ग्रस्यते सकलं तमः ॥ ५१ ॥ तावित्थं ज्ञानिनोक्तं स्वहृदि बहुतरं धारयंतौ सुज्ञत्या । नत्वा तं प्रीतियुक्तौ श्रमणनरपती संघलोकानुरक्तौ ॥ कृत्वा यात्रां च तत्रोत्सवननवरचनारंजिताशेषविश्वौ । तप्त्वा तीव्रं तपोऽपि प्रकटितसुकृतावापतुर्मुक्तिसौख्यं ॥ ५२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इति तत्र महीपाल । शैले शत्रुंजयान्तिके ॥ सर्वहत्यादिपापानि । विलीयंतेऽतिवेगतः ॥
॥ ५३ ॥ इत्यसौ धर्ममासाद्य । गुरोराद्यजिनोदितं ॥ मन्यमानो निजं धन्य-मुदतिष्ठत्स-
खेचरः ॥ ५४ ॥ शाश्वतार्हद्वंदनेन । स साधूनां च सेवया ॥ कियत्कालं सुखं तस्थौ ॥ तत्र
खेचरसेवितः ॥ ५५ ॥ सोऽथ खेचरमापृच्छ्य । कल्याणकटकं प्रति ॥ करवालसखोऽचालीत् ।
पथि कौतुकमाश्रयन् ॥ ५६ ॥ विद्ययांबरगामिन्या । व्रजन्नन्नसि नृपन्नूः ॥ कल्याणकटकं
प्राप । स्वयंवरदिदृक्षया ॥ ५७ ॥ नानादेशसमायातान् ॥ नानाभाषाविशारदान् ॥ नानावे-
षभृतो नृपां-स्तत्रैक्षत स कौतुकी ॥ ५८ ॥ उदंचदुच्चमंचालिः । पताकाकुलवीजिता ॥ त-
त्र तद्विधसंघट्ट-घर्मितेव व्यराजत ॥ ५९ ॥ क्रियमाणकार्यकोटि-भ्रमन्नाकुलमानवं ॥ उत्सु-
कोच्चारवाग्भारा-ऽभूत्सर्वमन्नवत्पुरं ॥ ६१ ॥ भ्राम्यन्नितस्ततो ज्येष्ठ-भ्रातरं समुपागतं ॥ दे-
वपालं महीपाल-स्तत्रापश्यच्चमूवृतं ॥ ६२ ॥ कृत्वा वेषपरावर्त्त-मजानन्निव तत्कथां ॥ स-
विधीभूय सोऽप्राक्षीत् । किंचिदंचितविक्रमः ॥६३॥ इतो भूपतिसैन्यानि । मंचा उच्चा इतस्त-
तः ॥ उत्सुको जनसंघात । इतो धावति सर्वतः ॥६४॥ वैदेशिको न जानामि । वृत्तमस्याः पुरः स-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



खे ॥ समग्रमव्यग्रमना । निवेदय मदग्रतः ॥ ६५ ॥ युग्मं ॥ स जगाद महासत्व । श्रुणु
वार्त्तामशेषतः ॥ कल्याणकटकं नाम । पुरमेतत्समृद्धिमत् ॥ ६६ ॥ कल्याणसुंदरोऽत्रेश--स्त-
त्पुत्री गुणसुंदरी ॥ तस्याः स्वयंवरमहः । श्वो भविष्यति चित्रकृत् ॥ ६७ ॥ अग्निकुंडमि-
दं पश्य । ज्वालामालासमाकुलं ॥ तदंतर्वह्निवृक्षोऽयं । वेष्टितो विटपैर्घनैः ॥ ६८ ॥ शिखा-
शाखाफलान्यस्य । यो गृहिष्यति साहसी ॥ पतिंवरा तमेवासौ । परिणेष्यति संधया ॥
॥ ६९ ॥ इति तद्वचनं चित्ते । निश्चित्योचितचंचुरः ॥ मंचैकदेशेकस्मिंश्चि--दासांचक्र कुमार-
राट् ॥ ७० ॥ इतो लग्नदिने भूरि--भूरिभूषणभूषिता ॥ विचित्ररत्नरुक्पूरैः । पूरयंती नभोंग-
णं ॥ ७१ ॥ चलनेत्रप्रभाप्रोत--कर्णपूरपयोरुहा ॥ लसत्कुंडलसंघृष्ट--कपोलमणिदर्पणा ॥७२॥
तारहारप्रभाज्योत्स्ना--सनाथेंदुकलाकला ॥ प्रस्फुरदंशुवलयं । वलयं कलयंत्यथ ॥ ७३ ॥
धम्मिल्लमल्लिकामोद--माद्यन्मधुपसेविता ॥ सखीशतसमानीत--सुरभिद्रव्यसादरा ॥ ७४ ॥
वसाना वाससी शुभ्रे । निरभ्रेंदुसमप्रभे ॥ अविशत्सा सभामध्ये । स्रग्विणी नरयानगा ॥७५॥
[illegible]ः कुलकं ॥ ततो भूपतयः सर्वे । चुक्षुभुर्वीक्ष्य सुंदरीं ॥ अग्रेसरस्मरशरैः । पतद्भिः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पीडिता इव ॥ ७६ ॥ अथो जयाय जगतः । स्मरशक्तिमिवांगिनीं ॥ निन्युः कुंडतटीं बालां
। विमानतलचारिणः ॥ ७७ इतो विद्याधरा नृप–कुमाराः स्फारविक्रमाः ॥ तत्राभ्येयुर्महा-
गर्व–दुर्धराः पर्वता इव ॥ ७८ ॥ न शेकुरग्निकुंडस्य । पार्श्वे गंतुमपीह ते ॥ तस्य द्रुमस्य
दूरेऽस्तु । फलग्रहणकौशलं ॥ ७९ ॥ फलानि तानि न प्रापुः । कृतोपायाः खगा अपि ॥
यथा मिथ्यात्विनः क्लेशा–दपि मुक्तिं दुरासदां ॥ ८० ॥ खिन्नेषु खगनृपेषु । किंकर्त्तव्यजडे
जने ॥ महीपालो भुजास्फोटं । कृत्वा तत्राभ्युपागमत् ॥ ८१ ॥ ऊर्ध्वबाहुरुवाचोच्चै—रिदं
च श्रृणुताखिलाः ॥ भो भो भुजाला राजन्या । विद्यासंपत्तिशालिनः ॥ ८२ ॥ यूयमत्रा-
क्लिलक्ष्येऽप्य–दक्षाः किं तत्फलग्रहे ॥ करप्राप्येऽपि योगेन । सांख्या इव शिवे ध्रुवे ॥ ८३ ॥
अविज्ञाय निजं सारं । सहसैव किमागताः ॥ अविमृश्य कृतं कर्म । न शर्मणे क्वचिद्भवेत्
॥ ८४ ॥ यद्यस्ति कापि वः शक्तिः । पौरुषव्यक्तिकारिणी ॥ तदा सा प्रकटीकार्या । विद्यतेऽ-
वसरोऽधुना ॥ ८५ ॥ नोचेदहं वः प्रत्यक्ष—मबाह्याडंबरोऽपि सन् ॥ सदैव गुणसुंदर्या ।
गृहीष्ये फललुंबिकां ॥ ८६ ॥ निशम्यैवं नरेंद्रेषु । त्रपावनतमौलिषु ॥ पश्यत्सु शेषलोकेषु । ॥ ८७ ॥

For Private And Personal Use Only

कौतुकोत्तानमूर्द्धसु ॥ ८७ ॥ कुमारो लीलया गत्वा । विद्यां संस्मृत्य खेचरीं ॥ फलालिं पा-
णिनादाय । ददौ तस्यै प्रमोदतः ॥ ८८ ॥ चक्रे जयजयारावो । जनताभिः सकौतुकं ॥ दद-
तीभिर्नृपतीनां । संकोचं वदनांबुजे ॥ ८९ ॥ दत्तहस्ततलाघातं । जहास सुदतीजनः ॥ न-
रवर्मानृपादीनां । चित्ते कोपस्तदास्फुरत् ॥ ९० ॥ भर्तृप्रवेशे चित्तांतः । सा सृजंतीव तो-
रणं ॥ आदाय पाणिना चंच—द्रोमांचकवचश्रिया ॥ ९१ ॥ गुंजन्मधुपझंकार—सारां वरणमा-
लिकां ॥ तस्य कंठे निचिक्षेप । प्रेमबंधनपूर्वकं ॥ ९२ ॥ युग्मं ॥ कल्याणसुंदरक्ष्मापः ।
समागत्य तदंतिकं ॥ तन्निरीक्ष्य विरूपाक्षं । वक्रांगं चेत्यचिंतयत् ॥ ९३ ॥ पश्यतां दृक्कटुः
सोऽयं । चरितेन जनातिगः ॥ जगदुद्योतकृत्तेजा । भस्मछन्नसुरत्नवत् ॥ ९४ ॥ जाने गुणै-
र्विश्ववंद्यो । वंशोऽस्य खलु वर्त्तते ॥ अभ्रांतरितसूर्यस्य । तेजः केन न तर्क्यते ॥ ९५ ॥
पूर्णप्रतिज्ञा कन्येय—मेनं वरमितोऽवृणोत् ॥ आचारः कुलकन्याना—मयं जागर्त्ति सर्वतः ॥
॥ ९६ ॥ पश्यतां कुलशीलादि—भूषितानां महीभृतां ॥ अज्ञातकुलशीलाय । कन्या दत्ता
हिये मम ॥ ९७ ॥ एनमेवोपसृत्याहं । तदस्यैव कुलादिकं ॥ पृच्छामि स्वमनःखेद—छेदाय

स्वयमादरात् ॥ ९८ ॥ ध्यायन्नेवं महीजानि–रुपसृत्य तदंतिकं ॥ स्निग्धगंभीरया वाण्या । पप्रछेत्यथ धीनिधिः ॥ ९९ ॥ अहो वरेण्य जानेऽहं । गुणेन विनयेन च ॥ शक्त्या च तव जात्यादि । सर्वं सर्वजनाधिकं ॥ ४०० ॥ लोकः प्रायेण वाह्यादि–रंगरक्तो भवेदयं ॥ लिप्यंते हि वहिर्भ्रांतिः । सत्याप्यंतरतादृशी ॥ ४०० ॥ विद्याधरः सुरः को वा । को वा लब्धवरो नरः ॥ पन्नगो वासि कस्त्वं तत् । पवित्रय मम श्रुती ॥ १ ॥

इत्युक्तिभाजि भूपाले । महीपालः क्षणादथ ॥ कुवेषं कंचुकमिव । प्रोज्झत्प्रौढप्रतापवान् ॥ २ ॥ अभ्रमुक्तो रविरिव । निर्धूम इव पावकः ॥ त्यक्तपंको मणिरिव । शशीव गतलांछनः ॥ ३ ॥ शुक्तिकामुक्तमुक्ताभो । जितनिःकिट्टहाटकः ॥ तदासीत्स महीपालो । रूपं वैकृतिकं त्यजन् ॥ ४ ॥ [illegible] ॥ जने जयजयारावः । सर्वतः समदीप्यत ॥ नभस्तः सुमनःश्रेणि–रपतच्च वशोपरि ॥ ५ ॥ देवपालो महीपालं । यथावस्थं निरीक्ष्य तं ॥ ससंभ्रमं समुत्थाय । निबिडं सस्वजे मुदा ॥ ६ ॥ तत्परीवारलोकोऽपि । कौतुकोत्फुल्ललोचनः ॥ दंभवछरिणीपीठे । लुठत्कायो ननाम तं ॥ ७ ॥ तूर्यघोषो ननादोच्चै–र्ननृतुश्च मुदा जनाः ॥ ध-

॥ ८९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वलध्वनिरप्युच्चै–रुद्ययौ सुंदरीमुखात् ॥ ७ ॥ अथ तादृग्महीपाल–पूर्वोक्तिप्रजवत्क्रुधः ॥ सं-
नूय नूभुजः सर्वे । नरवर्माणमुज्जगुः ॥ ए ॥ फलालिं पाणिनादत्ते । यदसौ तन्न चित्रकृत्
॥ ऐंड्जालिकविद्यायाः । किमसाध्यमहो नवेत् ॥ १० ॥ निष्कासितः पुरा पित्रा । गृहा-
न्निर्लक्षणस्त्वयं ॥ चमत्कारं कुतोऽप्याप्य । यच्चकारात्र किं बलं ॥ ११ ॥ असमंजसमेतद्धि ।
न सहिष्यामहे वयं ॥ अस्मादेनां गृहीष्यामो । रत्नं रोरगृहादिव ॥ १२ ॥ नरवर्मा निशम्यै-
वं । गदितं परनूभुजां ॥ नवाच किंचिदालोच्य । गिरा गंनीरया ततः ॥ १४ ॥ प्रतीक्षध्वं
कियत्कालं । यतः कल्याणसुंदरः ॥ ममाज्नीष्टोऽस्ति तद्दोषः । कार्यो नैवात्र नूनुजः ॥१५॥
आच्छाद्य कोपसंरंनं । सहशैरिव तन्यते ॥ करग्रहमहोऽस्माज्निः । परमप्रीतितोऽधुना ॥१६॥
ज्ञातः सौराष्ट्रिको राजा । स्वल्पसैन्यबलोऽस्त्ययं ॥ मार्गं निरुध्य स्थास्याम । एतस्याडिरि-
वांनसः ॥ १७ ॥ न चिंतनीयमेवात्र । कर्त्तव्यं किंचिदस्ति नः ॥ नदिते रविबिंबे किं । त-
मिस्रं स्थातुमीश्वरं ॥ १७ ॥ इत्थमालोच्य नूपाला । गूढमत्सरिणोऽनवन् ॥ बहिर्मृडुगिरः
सूर्य–मणिसोदरधर्मिणः ॥ १ए ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इतश्च देवपालोऽपि । महीपालं पुरःस्थितं ॥ प्रमोदमेडुरमनाः । सस्नेहं समन्नाषत ॥
॥ २० ॥ देहमात्रधरौ वत्स । वियुक्तौ पितरौ त्वया ॥ जीवितं त्वयि संपृक्तं । सर्वतः संचरे-
त्पुनः ॥ २१ ॥ स्वयंवरमहायाई । स्पृहयेऽयं मनाङ् नहि ॥ त्वदागमनशंकी तु । मिषेणा-
गामिह स्फुटं ॥ २२ ॥ यथानुन्नूतं चरितं । त्वरितं ख्यातुमर्हसि ॥ आसौधाग्रगतेरत्रा—ग-
मनावधि तादृशं ॥ २३ ॥ निशम्येति गिरं न्रातुः । प्रीतिपीयूषपूरितां ॥ आलापीत्स महीपा-
ल—स्तन्निजं क्षितिखेलनं ॥ २४ ॥ निजन्रातुर्महाश्चर्य— चतुरं चरितं स तत् ॥ निशम्योदल-
सत्प्रीति—वल्लीपल्लवतांबुदं ॥ २५ ॥ ततो वितततूर्यादि—निनादसुन्नगो महः ॥ वैवाहिकोऽव-
नीनाथे—नानयोर्निरवर्त्यत ॥ २६ ॥ गजाश्वग्रामरत्नानि । पाणिमोचनपर्वणि ॥ स लेन्ने व
सुधान्नर्त्तु—र्योग्यसंगमहर्षिणः ॥ २७ ॥ तत्र स्वयंवरमहे । रत्नप्रन्नमुपागतं ॥ स्तुतिन्निर्वंदि-
वृंदानां । जज्ञे श्रीसूर्यमल्लजः ॥२८॥ ततो गत्वा तदावासे । न्रृशं तेनैव पूजितः ॥ रत्नकांते-
रपि स्वस्य । तस्मै स चरितं जगौ ॥२ए॥ न्रातृस्नेहानुविद्धं तं । ज्ञात्वा बुद्धिबलादपि ॥ त-
योः प्रीतिविधानाय । कृतोपायः पुनर्जगौ ॥ ३० ॥ लन्यते पूर्वपुण्येन । स्वसहोदरदर्शनं ॥

॥ ए१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




द्वितीयबाहुवत्पाद्दयः । स सदा शर्मकांक्तिन्निः ॥ ३१ ॥ संपत्तयः कलत्राणि । यत्र तत्र न्नवं-त्यपि ॥ मातुः कुक्तिं विनान्यत्र । न पश्यामि सहोदरं ॥ ३२ ॥ राज्यलक्ष्मीकृते मूढा । ये द्विषंति सहोदरं ॥ ते सारमेयसमतां । न्नजंते न्नाग्यवर्जिताः ॥ ३३ ॥ ये घ्नंति राज्या-दिकृते । न्नाग्यहीनाः सहोदरान् ॥ ते स्वयं स्वस्य पक्तस्य । छेत्तारो मम संमताः ॥ ३४ ॥ वंचयंति निजभ्रातॄन् । ये ग्रासलवगर्विताः ॥ हस्यंते बलिभुग्न्निस्ते । भुंजन्निरपरैरपि ॥३४॥ इत्यापीय कुमारेंदो-र्गिरं पीयूषपूरितां ॥ मुमोचाक्तिमणिन्यों न्नो-बिंदून् रत्नप्रन्नो बहून् ॥ ॥ ३५ ॥ सनिःश्वासं गलद्वाष्पं । रुद्धकंठं स खेचरः ॥ महीपालपुरो गत्वा । जगौ गद्गदया गिरा ॥ ३७ ॥ नद्रतोऽसौ लघुत्वया । रोषितो न मया क्वचित् ॥ स्वयं विमृश्य चित्तेऽगा-द्विकल्पं किंचिदुच्चकैः ॥ ३८ ॥ मंत्रिन्निर्वार्यमाणोऽपि । नीतिवाक्यामृतैर्हितैः ॥ मयापि सा-ग्रहं रुद्धो । बुध्ध्वा किंचिदयथावयं ॥ ३९ ॥ विनानेन महीशत्व-मेकांगसुखदुःखदं ॥ विष-पीयूषसंकाशं । जाने परमबांधव ॥ ४० ॥ कुमारस्तच्छिरःप्रांते । जगौ मा खेदमुद्वह ॥ अहं वां संगमं कर्त्ता । कर्ममेदद्विदेहयोः ॥ ४१ ॥ श्रुत्वेति सोऽप्युरीकृत्य । तत्कुमारनिवेदितं ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नुत्सुको बांधवालोके । तस्थिवान् स्वच्छमानसः ॥ ४२ ॥ दिनानि कानिचिद् गीत–शास्त्रेष्टज-
नसंगमात् ॥ राजपुत्र्या समं तत्र । कुमारोऽप्यत्यवाहयत् ॥ ४३ ॥ पूर्वकर्मपरीपाका–त्तदा
तापार्त्तिरुद्ययौ ॥ तस्य प्रत्यंगनिस्तोद–स्फुटस्फोटकसंकुला ॥ ४४ ॥ त्रटत्त्रटत्तिलकण–स्फो-
टकृत्तापदुःसहः ॥ महाज्वरो महीपांगे–ऽत्यायतः समजायत ॥ ४५ ॥ तस्य तापापनोदा-
य । शिशिरं यद्विधीयते ॥ विशेषादज्वलद्देहं । तेन पंकजकोमलं ॥ ४६ ॥ औषधैरमृतप्रायै
–र्वार्यमाणोऽप्यसौ गदः ॥ विशेषात्कोपमाधत्त । दुर्जनः सामभिर्यथा ॥ ४७ ॥ न ते वैद्या
न ता विद्याः । स प्रपंचो न हि क्षितौ ॥ यैस्तस्य विकसद्व्याधेः । प्रतीकारः प्रतन्यते ॥
॥ ४८ ॥ मासमेकं महोपायै–र्विविधौषधराजिभिः ॥ वैद्यैश्चिकित्स्यमानोऽपि । स रोगान्न
परिच्युतः ॥ ४९ ॥ आपृछ्य नृपं तद्व्याधि–विधुरं मधुरोक्तिभिः ॥ शांतयित्वा च पितृवत् ।
सशोकां जनतामपि ॥ ५० ॥ ततः सैन्यशतैर्विद्या–धरैश्च परिवारितः ॥ चचाल पितृपादे-
भ्यः । सोत्कंठं स कुमारराट् ॥ ५१ ॥ युग्मं ॥ गुणसुंदर्यपि ततः । प्राप्य वृद्धानुशासनं ॥
पित्रोः पादौ नमस्कृत्य । जज्ञे पत्यनुगामिनी ॥ ५२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इतश्च ते महीपालाः । पूर्वमत्सरिणः पथि ॥ रुरुधुस्तं महीपालं । मालवांतःप्रवर्त्तिनं ॥ ॥ ५३ ॥ रे रंक रत्नमादाय । पश्यतामिह नूभुजां ॥ क्व यासि छलविद्याया । अधुना फलमाप्स्यसि ॥ ५४ ॥ निजमानाधिकं कर्म । कुरुते योऽतिलौल्यतः ॥ तस्य स स्फुटमश्नाति । फलं कुष्टिन् यथा भवान् ॥५५॥ तदोद्धतो जनान् वीक्ष्यो–चिवानुच्चावचं वचः ॥ यत्त्वं तत्फलमेतर्हि । भुंक्ष्वास्मद्भुजनिर्मितं ॥ ५६ ॥ इत्युदीर्य महाक्रोध–दुर्धरास्ते धराधवाः ॥ संभूय सर्वसारेण–वेष्टयन् सूर्यमल्लजं ॥ ५७ ॥ विस्मरन्निव रोगार्त्तिं । श्रुत्वा तद्वैरिणो मुखात् ॥ महीपालः शत्रुकालः । करवालं करेऽकरोत् ॥ ५८ ॥ दंतादंति गजैर्युद्धं । रथिकैश्च शराशरि ॥ खङ्गाखड्गि च पादातैः । कुंताकुंति च सादिभिः ॥ ५९ ॥ अयुध्येतां महासैन्ये । गतदैन्ये मिथोऽप्यथ ॥ पुरोगतस्वपरयो–र्विचाररहिते क्रमात् ॥ ६० ॥ आमिषैः सहितां वीक्ष्य । व्याप्तां तद्यशसा महीं ॥ तद्विस्तारयितुं स्वर्गे । यतंते यावदंबरगाः ॥ ६१ ॥ किन्नरैर्गीयमानं तत् । श्रुत्वा तत्रापि वैरिषु ॥ तदस्तोतृषु संपेतु–र्नर्तृनक्ता हि मार्गणाः ॥ ६२ ॥ कुखं ॥ रिपुव्रातैर्महीपाल–सैन्यं कोपाकुपङ्क्तं ॥ उच्छलल्लोलकल्लोलैः। समुद्रैरिव सैकतं ॥६३॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





रत्नप्रज्ञो देवपाल—महीपालौ महौजसः ॥ अन्येऽपि रथिनः सर्वे । द्विषतस्तानयोधयन् ॥
॥ ६४ ॥ वर्षंतो बाणधाराभिः । सिंचंतः शोणितै रसां ॥ चक्रुस्ते शत्रुदुर्भिक्षं । नरेंद्रा नव-
नीरदाः ॥ ६५ ॥ निर्मथ्य सेनां दधिव—द्यशोमुक्तामाहरत् ॥ जगत्तापापहं तत्र । ते मंथा-
नकसन्निभाः ॥ ६६ ॥ दिशो दिशं पलायंतो । रिपवः सैनिकैः समं ॥ जगत्सारं महीपाल-
सारं सोढुमनीश्वराः ॥ ६७ ॥ चक्रे जयजयाराव—स्तदा यादवसैनिकैः ॥ पेतुर्नभस्तः सुम-
नः-श्रेणयः सुमनःकरात् ॥ ६८ ॥ कदापि न तृणे कोपं । वितन्वंति भुजाभृतः ॥ नरव-
र्मादिभूपाला—स्तदतो बिभ्ररुर्मुखे ॥ ६९ ॥ महाधामसौ महीपालो । मोदवांस्तदमी नृपाः ॥
लुठंतोऽग्रे बलेनापि । लिलिपुस्तत्कणैर्वपुः ॥ ७० ॥ सुस्वामी स्वकरं तेषां । नम्राणां पाद-
योः पुरः ॥ पृष्टे ददौ स्फुरत्पद्मा—सद्मपद्मसमप्रभं ॥ ६८ ॥ स्वकन्या देवपालाय । देवकन्या-
वधीरिणी ॥ अदायि वनमालेति । भूभुजा नरवर्मणा ॥ ६९ ॥ विजित्य भूपतीनेवं । मूर्त्ता-
मिव जयश्रियं ॥ वनमालां समादाय । स चचाल पुरंप्रति ॥ ७० ॥

तदादेशमनुप्राप्य । नरवर्मादयो नृपाः ॥ जग्मुर्निजं निजं स्थानं । यदुशौर्यचमत्कृताः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ७१ ॥ यथा यथा वने वाति । वायुरायुरपायकृत् ॥ वृद्धिं तथा तथाप्यस्य । प्राप रोगम-
होरगः ॥७२॥ अष्टादशापि कुष्टानि । दुष्टानिलमहार्त्तिभिः ॥ तस्य देहं श्रियो गेहं । दूषया-
मासुरुच्चकैः ॥ ७३ ॥ वनावनिस्तस्य घना । नरकावनिसन्निभा ॥ नदीजलं भीतिमलं—क-
र्भुमासील्सवारिजं ॥ ७४ ॥ तूर्यनादः कालवाद—समतामभतामधात् ॥ तस्य स्रवद्वसागंध—
नश्यत्परिजनस्य च ॥ ७५ ॥ कालकूटोपमं भोज्यं । श्वभ्रपुनिर्भ पयः ॥ कर्पूरो दुःखपूरो-
ऽपि । तस्याभूत्तत्र रोगिणः ॥ ७६ ॥ गेयं दुर्वाक्यवद्वेयं । नृत्तं वृत्तमहेरिव ॥ सुमानि यम-
नाराचा—स्तस्याजायंत ही तदा ॥ ७७ ॥ न जने विजने वापि । तेनापि न रतिः क्वचित् ॥
नरकाधिकदुःखौघ—घूर्णितेन समं जनैः ॥ ७८ ॥ दिनैः कतिपयैः प्राप्य । स वनं कुसुमो-
त्करं ॥ अदापयत्तत्र वासान् । सैन्यं तद्दुःखदुःखितं ॥ ७९ ॥ शुभाशुभं पूर्वं कर्म । समुदे-
ति यथा नृणां ॥ परोपदेशवंध्यापि । तथा बुद्धिः प्रवर्त्तते ॥ ८० ॥ कर्मणा प्रेर्यमाणोऽयं ।
जीवो भ्रमति सर्वतः ॥ कुलालचक्रकुलज—स्वभावसमभावभृत् ॥ ८१ ॥

अथोद्यदिंदुभापूर—प्लावितायां स भूपजः ॥ सावकाशप्रदेशेऽसौ । निश्यशेत सुखे-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्नय। ॥ ८२ ॥ इतो विद्याधराश्चैत्र–राकायां विमलाचले ॥ आदिदेवपदांन्नोज–सेवार्थमन्नितो
ययुः ॥ ८३ ॥ त्रैलोक्ये यानि तीर्थानि। तेषां यथात्रया फलं ॥ पुंमरीकगिरेर्यात्रा। दत्ते त-
त्फलमेकिका ॥ ८४ ॥ चैत्रस्य पूर्णिमायां तु। पुंमरीकगिरेर्नुतिः ॥ स्वर्गापवर्गसौख्यानि।
कुरुते करगाण्यसौ ॥ ८५ ॥ शक्त्याहृतैर्नंदनतः। कुसुमैर्विमलाचले ॥ विचित्रैः पूजयामा-
सुः। स्वामिनं व्योमगामिनः ॥ ८६ ॥ चिरं चतुरचारीकं। नानान्निनयन्नूषितं ॥ संगीतक-
मतिप्रीति–चित्ताः प्रापंचयंश्च ते ॥ ८७ ॥ चित्रार्थन्नाषाचतुरैः। सूक्तैः संवेगगर्न्नितैः ॥ तत्रै-
त्याराधयंश्चैत्र–राकायां ते जिनेश्वरं ॥ ८८ ॥ न्नत्तीर्णाः पुंमरीकाद्रि–स्तेऽन्निधासाम्यतः प्रिये ॥
पुंमरीके दत्तदृशः। स्वस्थानाय प्रतस्थिरे ॥ ८९ ॥ चंद्रचूमस्तथ प्राह। तत्प्रिया प्रियया
गिरा ॥ नाथ गर्न्नेतु सर्वेऽमी। विनावाभ्यां परे खगाः ॥ ९० ॥ जगन्नाथस्तु मच्चित्ते।
तथा वासमसौ व्यधात् ॥ यथा स्वर्गापवर्गादि। तृणं मन्ये हि तत्पुरः ॥ ९१ ॥ अष्टाह्निकां
पुनः स्थातुं। पुंमरीके गिरौ विन्नो ॥ प्रसीद मयि विश्वेशं। यथा स्तौम्यर्चयामि च ॥९२॥
स स्वयं न्नक्तिमांस्तीर्थे–ऽप्यर्थं चाभ्यर्थितस्तथा ॥ अतिष्टन्मृष्टमिष्टेनो–पदिष्टं क न्नपेक्षते ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ९४ ॥ संपूज्य जगतामीश–मसीमोत्कंठया चिरं ॥ अतृप्तावपि तौ गंतुं । ततः किंचिद-
पीश्वतुः ॥ ९५ ॥ विमानमविमानं ता–वारुह्य पथि दंपती ॥ यांतावपश्यतां सूर्यो–द्यानं पू-
र्वककुप्स्थितं ॥ ९६ ॥ तद्वीक्ष्य सा कुरंगाक्षी । विलक्षीकृतनंदनं ॥ वनं पुष्पघनं चारु ।
व्याजहार हृदीश्वरं ॥ ९७ ॥ नाथ शत्रुंजयाद् दूरे । पश्येदं काननं घनं ॥ दिवापि कुसुमैः
सोडु–व्योमविभ्रमधार्यदः ॥ ९८ ॥ तदंतः कुंडमुद्दंड–कमलोत्करराजितं ॥ अक्षार्णोदन्नपी-
यूष–पूर्णमभ्यर्णमीश नः ॥ ९९ ॥ चलध्ध्वजपटप्रांत–वातवीजितनाकिनः ॥ प्रासादान्
विशदान् पश्य । सैकते तस्य चार्हतां ॥ ५०० ॥

शत्रुंजयगिरेः सीम्नि । वनलक्ष्मीरियं मम ॥ क्षणमक्ष्णोः सुखं दत्ते । नाथ त्वं चेत्प्रसी-
दसि ॥ १ ॥ वाक्सुधां वदनांभोजा–त्प्रियायाः श्रवणप्रियां ॥ निपीय विपिने तस्मिन् । वि-
मानं सोऽवतारयत् ॥ २ ॥ उवाच च कुरंगाक्षि । सूर्योद्यानमिदं महत् ॥ दिव्या औषधयो
यत्र । सर्वकर्मणि कर्मठाः ॥ ४ ॥ सूर्यावर्त्ताभिधं कुंड–मेतद्रोगार्त्तिखंडनं ॥ अष्टादशापि कु-
ष्ठानि । क्षीयंतेऽस्यांबुबिंदुना ॥ ५ ॥ वदन्निति प्रभावं स । कुंडजं वनजं तथा ॥ रेमे तत्र

माहा० ॥ ९८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तया सार्द्धं । मनोहरलतागृहे ॥ ६ ॥ अलसल्ललनालोल–लोचनांचललालितः ॥ तदंत्रसि च विद्यान्नृ–दंत्नोजकुलसंकुले ॥ ७ ॥ आदाय पद्मपुष्पाणि । धौतवस्त्रधरस्तया ॥ सभं स सिध्दायतने–ऽपूजयज्जिनमस्तुवत् ॥ ८ ॥ ततः सूर्यावर्त्ततोय–मर्हत्पादपवित्रितं ॥ आदाय गदभेदाय । चलतुस्तौ विमानगौ ॥ ९ ॥ इतश्चंश्मन्नाश्लेष–नृशशुश्रोपकारिकां ॥ अपश्यतां विमानस्थौ । तौ महीपालवाहिनीं ॥ १० ॥ सर्वतस्तुरगान् नागान् । रथान् पत्तींश्च नूरिशः ॥ वीक्ष्य वामा विमानस्था । जगाद प्राणवल्लन्नं ॥ ११ ॥ वने कथमियं नाथ । मानवाना-मवस्थितिः ॥ यत्र यत्र भ्रमत्येषा । दृग्गजाश्वास्ततस्ततः ॥ १२ ॥ अयं रोगार्त्तवत्कश्चि–द्वेष्टितो मानवैर्घनैः ॥ पूतिगंधस्तथाप्येति । यथैनं वेद्मि कुष्टिनं ॥ १३ ॥ कुष्टहारि वरं वारि । विद्यतेऽत्र हृदीश्वर ॥ तेनामुष्यान्निषिंचामि । देहमादेशतस्तव ॥ १४ ॥ पत्युरादेशमासाद्य । सुदती सा दयावती ॥ तद्वारिबिंदूनमुंचत् । तस्योपरि विमानगा ॥ १५ ॥ तस्य संपर्कमात्रेण । पयसः पुण्यकारिणः ॥ महीपालः परां प्रीतिं । प्रापाप्राप्तचरीं तदा ॥ १६ ॥ ग्रीष्मशुष्को यथा वृक्षो । वर्षासु स्यात्पुनर्नवः ॥ तदा तथा महीपालो–ऽन्नवत्तद्वारिसेकतः ॥ १७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्य दिव्यद्युतिं देहं । दृष्ट्वा विद्याधरः क्षणात् ॥ सुंदरीदेवपालौ च । जहर्षुः सहसैनिकैः ॥ ॥ १८ ॥ अथो तदंगात्कुष्ठानि । दूरीभूय नभोंगणे ॥ जगुस्तं जय राजेंद्र । मुक्तोऽस्मान्निर्यतोऽधुना ॥ १९ ॥ आसप्तभवमस्माभिः । सेवितोऽस्यधुना पुनः ॥ आगतं कुंभतोयं चेन्नावकाशस्ततोऽस्ति नः ॥ २० ॥ इत्युदीर्य महारोगाः । सर्वे कोलाहलाकुलाः ॥ कृष्णवर्णा घोररूपा । जग्मुस्ते क्वचिदप्यहो ॥ २१ ॥ अतिक्रम्य ततो दोषा—मदोषः सुखलक्ष्ययुक् ॥ प्रातर्महोत्सवं चक्रे । देवपालोऽतिहर्षतः ॥ २२ ॥ आजूहवद्रत्नकांतिं । महीपालः खगामिनं ॥ पूर्वमित्रं प्रमोदाय । स्वदेहारोग्यशंसनात् ॥ २३ ॥ ततो विमानवृंदेन । रत्नकांतिः प्रमोदवान् ॥ महीपालाभिधाश्रुत्या । सत्वरं स समाययौ ॥ २४ ॥ नीरुग्भिरंगैरालिंग्य । तस्यांगं प्रेमलालसः ॥ महीपालोऽपि देहैक्यं । कुर्वाण इव निर्भरं ॥ २५ ॥ रत्नप्रभरत्नकांती । द्वौ संयोज्य नृपांगभूः ॥ स्वमैत्र्यं सफलं चक्रे । तथ्या वाचोऽप्युदीरिताः ॥ २६ ॥ एकात्मानाविव पृथक्—देहावभवतामपि ॥ यथा तावेकवैताढ्य—राज्यस्याप्यधिपौ तथा ॥ २७ ॥

व्योमार्धगामिनि रवा—वथ तत्र मुनिद्वयं ॥ मासोपवासपर्यंते । पारणार्थमुपागमत्



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ २८ ॥ मूर्त्ताविव धर्मशर्मौ । महीपालो निरीक्ष्य तौ ॥ ससंभ्रमं समुत्थाय । ननाम बहु
भक्तिमान् ॥ २९ ॥ प्रतिलाभ्य महाभक्त्या । शुद्धान्नैर्वस्त्रवारिभिः ॥ अपृच्छन्निजरोगस्य ।
सर्वं वृत्तांतमादितः ॥ ३० ॥ तावूचतुर्मृदुगिरा । धर्मलाभपुरस्सरं ॥ राजन्नौ गुरुरास्तेऽत्र ।
ज्ञानवान् विपिनांतरे ॥ ३१ ॥ संदेहो यदि कोऽप्यस्ति । मतिश्चेद्धर्मकर्मणि ॥ तदा नौ गुरु-
मागत्य । पृच्छेः स्वच्छाशयाधुना ॥ ३२ ॥ इत्यालाप्य महीपालं । तौ मुनी तेन वंदितौ ॥
आगत्य गुरुपादांते । यथावृत्तमशंसतां ॥ ३३ ॥ देवपालमहीपालौ । रत्नप्रभखगोऽपि च ॥
अन्येऽपि बहवो लोका । जग्मुर्गुरुमुपासितुं ॥ ३४ ॥ ध्यायंतमात्मनात्मान-मानंदमयमु-
च्चकैः ॥ नादबिंदुकलाश्लेषि—ज्योतिर्ध्वस्ततमोभरं ॥ ३५ ॥ आधारपद्ममाकुंच्य । शक्त्या
स्थाप्य हृदंतरा ॥ चिंतयंतं परं ज्योति-र्ब्रह्मस्थाननिवासि तत् ॥ ३६ ॥ सर्वभावेषु समतां ।
भजंतं मुक्तिगामुकं ॥ दृष्ट्वा गुरुं महानंद-मवापुस्ते वचोऽतिगं ॥ ३७ ॥ त्रिभिर्विशेषकं ॥
ते त्रिःप्रदक्षिणीकृत्य । भिशुद्धया ते मुनीश्वरं ॥ कृतवैककसत्पक्षा । नेमुर्ज्ञाननिधिं मुदा ॥
॥ ३८ ॥ अथ ध्यानसमाधानं । विहाय स मुनीश्वरः ॥ धर्मव्यापारभृत्तेषां । बोधायेति गिरं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जगौ ॥ ३९ ॥ आर्यदेशो मनुष्यत्वं । दीर्घायुस्तत्त्वनाकुलं ॥ न्यायार्जितानि वित्तानि । हेतुः
पुण्यार्जने नृणां ॥ ४० ॥ देशनावाक्सुधां पीत्वा । गुरोर्वदनचंद्रतः ॥ इत्थं तेऽथ पुनर्व्याधी
–नपृछन् ज्ञानिणस्तदा ॥ ४१ ॥ यत्र तत्तीर्थकुंभांभ–स्तत्र नैव वयं स्थिराः ॥ आसन्नभव-
संपृक्ता । इति गीः कान्नवत्तदा ॥ ४२ ॥ ज्ञात्वाथ तद्भवं पूर्वं । गुरुराह समाधिना ॥ श्रुणु
त्वया महीपाल । यथा दुःकर्म चार्जितं ॥ ४३ ॥ तथाहि भरतेऽत्रास्ति । पुरं श्रीपुरसंज्ञ-
कं ॥ तत्रासीद्गुणिनां सीमा । श्रीनिवासो महीपतिः ॥ ४४ ॥ स प्रजाः पितृवत्पाति । हं-
त्यरीन् पितृनोऽथवत् ॥ अधः करोति दानेन । सुरधेनुमणिद्रुमान् ॥ ४५ ॥ शीलादिगुणसं-
पन्नः । पापर्द्धिविहितादरः ॥ मृगलक्ष्मसपक्षत्व–माससाद स भूपतिः ॥ ४६ ॥ अन्यदा मृ-
गयाकृष्ट–तुरंगममधिश्रितः ॥ कोदंडं पाणिना बिभ्रत् । स ययौ विपिनावनौ ॥ ४७ ॥ त्र-
स्यन्मृगकुलं धावन् । तुरंगेण रयस्पृशा ॥ अनवछिन्नबाणाभिः । स ववर्ष यथांबुदः ॥४८॥
यद् दूरे तच्च पार्श्वस्थं । पार्श्वस्थं तच्च दूरगं ॥ कुर्वन् व्यसनसंरूढः । स भ्रष्टो निजसैन्यतः ॥
॥ ४९ ॥ निविडद्रुमसंघाते । तर्कयन् जीवसंगतिं ॥ मुमोच निशितान् बाणान् । तज्जिघां-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुर्महीपतिः ॥ ५० ॥ नमोऽर्हद्भ्य इति श्रुत्वा । गिरं गह्वरकंठजां ॥ ज्ञातुं तदुत्पत्तिभुवं । स
यावच्चक्षुरक्षिपत् ॥ ५१ ॥ तावन्निजेषुणा विद्धं । कायोत्सर्गस्थितं मुनिं ॥ पतंतं पृथिवीपीठे ।
न्यभालयदिलाविभुः ॥ ५२ ॥ समूलं स्वस्य पुण्यद्रुं । स्वयं छिन्नं विदन्निव ॥ महर्षिं तं हतं
वीक्ष्य । शुशोच स धराधिपः ॥ ५३ ॥ आः कृतं किमिदं नाथ । मयाद्य निर्विमृश्यता ॥ दुः-
कर्मवह्निना बोधि–बीजमज्ज्वाल्यतार्जितं ॥५४॥ पुण्यावसानं व्यसनं । श्वसनं परमंहसः ॥
धिग् धिग् मे जीवितव्यं च । निर्मंतुप्राणिवैरिणं ॥ ५५ ॥ एकस्यापि हि जीवस्य । हनने
ही तदर्ज्यते ॥ घोरातिघोरं नरकं । लभ्यते येन मानवैः ॥ ५६ ॥ मयात्मव्यसनं प्रौढिं ।
तथा नीतं दुरात्मना ॥ यथा तेनातिवृद्धेन । ऋषिहत्या ममाभवत् ॥ ५७ ॥ प्रोत्साहयंति
धर्मज्ञा । अपि मां व्यसने रतिं ॥ धिक् तान् पापं च मामाप–द्विधायिनमनागसां ॥ ५८ ॥
विहत्ता तत्ववृत्तिश्च । यातु तेषां क्षयं कथं ॥ यैरित्युक्तं न पापाय । पापर्द्धिः पृथिवीभुजां ॥
॥ ५९ ॥ अमी तृणांबुसंतृप्ता । जंतवो गतमंतवः ॥ हन्यंते निशितैर्बाणै–र्ही ही पाप्मभि-
रुद्धतैः ॥ ६० ॥ असौ मुनिर्महायोगी । पुण्यराशिरिवांगवान् ॥ मया हतो हताशेन । क्व

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यामि करवाणि किं ॥ ६१ ॥ इत्युदीर्य विषसात्मा । धनुर्बाणान् बभंज सः ॥ विमृशंस्तेषु दुर्जन्म—कारिपापैकमूलतां ॥ ६२ ॥ उत्तीर्य तुरगात्तूर्णं—मुनेरभ्यर्णमेत्य च ॥ प्रायश्चित्तमिव स्वस्यां—हृदः कुर्वन्ननाम तं ॥ ६३ ॥ आदाय पाणिना पादौ । श्वसतस्तस्य सन्मुनेः ॥ नम्रे स्वमौलौ मुकुटे । मुकुटं नृपतिर्व्यधात् ॥ ६४ ॥ मुक्तकंठमविश्रामं । निजं निंदन् कु-कर्म सः ॥ रुरोद रोदयन् पार्श्व—स्थायिनो मृगपक्षिणः ॥ ६५ ॥ हा हा दुरात्मना देव । मृगयाव्यसनस्पृशा ॥ मयादोऽकारि दुःकर्म । ममादिश करोमि किं ॥६६॥ विमले स्वकुले नाथ । कलंकः कल्पितो मया ॥ पुण्यसौधे महादीप्रे । ददे कज्जलकूर्चकः ॥ ६७ ॥ दुराचारो हत-स्वांतः । कुले चेत्तनयो भवेत् ॥ तदा पूर्वजपुण्यद्रौ । संलग्नो दावपावकः ॥ ६८ ॥ कलं-किनो मे भगवन् । तैरश्वनरकातिथेः ॥ भवतां भवदीयौ त—च्चरणौ शरणाविमौ ॥ ६९ ॥ इत्युदीर्य मुनेः पादौ । क्रियासमभिहारतः ॥ ननाम बाष्पकलुष—लोचनः स स्वनिंदकः ॥ ॥ ७० ॥ क्षणादपि मुनिः सोऽथ । स्मरन्नर्हींस्तदार्हतां ॥ प्राणान् मुमोच तद्वाणे—नाकृष्टा-निव कर्मणा ॥ ७१ ॥ पुनः पूत्कारमकरो । दीर्णहृत्तद्व्यथासिना ॥ मुमूर्छ तद्गुणश्रेणिं । नि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ध्यायन् धरणीधरः ॥ ७२ ॥ इतस्तत्सैनिकाः प्राप्ता—स्तं तथा वीक्ष्य दुःस्थितं ॥ नयोक्तियु-
क्त्या संबोध्य । किंचिद्दुःखान्न्यवर्त्तयत् ॥ ७३ ॥ अग्निसंस्कारमासूत्र्य । मुनेर्देहस्य नूपतिः॥
दुःखितश्चेतसि भृशं । विवेश निजमंदिरं ॥७४॥ ऋषिहत्यादिपापस्य । शांतये तद्वने नृपः ॥
प्रासादं कारयामास । श्रीशांतेश्चतुराननं ॥ ७५ ॥ शुद्धान्नवस्त्रदानानि । सर्वपापहराणि सः
॥ मुनीनां नियमान्नित्यं । दत्ते तद्भक्तिभूषितः ॥ ७६ ॥ कुर्वन्नपि महाधर्मं । त्रिशुद्ध्या वसु-
धाधवः ॥ ऋषिहत्यादिपापेन । न तथासौ व्ययुज्यत ॥ ७७ ॥ तेनैव दुःखशल्येन । श्रीनि-
वासोऽतिपीडितः ॥ महारोगैर्मृतः प्राप । सप्तमीं नरकावनिं ॥ ७८ ॥ अनुभूय महादुःखं ।
बंधनछेदनादिकं ॥ नरके चिरमंते तु । तिर्यक्षु भवमाप सः ॥ ७९ ॥ शीतातपमहारोग—ता-
डनक्षुत्तृषादिकं ॥ अज्ञानदुःखमावेद्य । पुनर्नरकमासवान् ॥ ८० ॥ तिर्यक्षु नरकेष्वेवं । सो-
ऽवतारमधारयत् ॥ षड् भवान् मनुजो भूत्वा । कुष्टादासादयन्मृतिं ॥ ८१ ॥ अधुनापि म-
हीपाल । मुनिहत्याभवं फलं ॥ पूर्वार्जितं कुष्टपक्वं । लब्धवानिह तद्भवान् ॥ ८२ ॥ विरा-
धितो मुनिर्हास्या—दपि दुःखौघदायकः ॥ किं पुनर्मत्सरारंभा—न्नरकावेशकारिणः ॥ ८३ ॥





For Private And Personal Use Only

एकजन्मकृतं पुण्यं । प्रयाति यतिकोपनात् ॥ यतिघातात्तु वासः स्यात् । सप्तम्या नरकावनौ ॥ ७४ ॥ दुःखदौर्गत्यदुर्योनि–दौर्भाग्यादिफलैर्घनैः ॥ ऋषिहत्यामहावल्ली । परत्रेह फलत्यपि ॥ ७५ ॥ दत्तेऽसौ सर्वसौख्यानि । त्रिशुद्ध्याराधितो यतिः ॥ विराधितश्च तैरश्च–नरकानल्पयातनाः ॥ ७६ ॥

चारित्रिणो महासत्वा । व्रतिनः संतु दूरतः ॥ निःक्रियोऽप्यगुणज्ञोऽपि । न विराध्यो मुनिः क्वचित् ॥ ७७ ॥ यादृशं तादृशं वापि । दृष्ट्वा वेषधरं मुनिं ॥ गृही गौतमवद्भक्त्या । पूजयेत्पुण्यकाम्यया ॥ ७८ ॥ वंदनीयो मुनेर्वेषो । न शरीरं हि कस्यचित् ॥ व्रतिवेषं ततो दृष्ट्वा । पूजयेत्सुकृती जनः ॥ ७९ ॥ पूजितो निःक्रियोऽपि स्या–ल्लज्जया व्रतधारकः ॥ अवज्ञातः सत्क्रियोऽपि । व्रते स्यात् शिथिलादरः ॥ ९० ॥ दानं दया क्षमा शक्तिः । सर्वमेवाल्पसिद्धिकृत् ॥ तेषां ते व्रतिनं दृष्ट्वा । ये नमस्यंति मानवाः ॥ ९१ ॥ आराधनीयास्तदमी । त्रिशुद्ध्या जैनलिंगिनः ॥ न कार्या सर्वथा तेषां । निंदा स्वार्थविघातका ॥ ९२ ॥ कारणं तव कुष्टानां । महीपाल स्फुटं ह्यदः ॥ मा कदापि मुनीन् क्रुद्धो । नृपते त्वं विराधयेः ॥ ९३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





यत्सूर्यावर्त्तकुंमांजः। श्रुणु तस्य कथानकं॥ शत्रुंजयाधः शक्रीय–दिशि सूर्यवनं महत्॥
॥ ए४ ॥ षष्टिवर्षसहस्राणि। सूर्यो वैक्रियदेहभाक्॥ यत्रास्थाज्जिनसेवायै। सूर्योद्यानं ततो
हि तत्॥ ए५ ॥ तत्रांतर्विद्यते कुंभं। सूर्यावर्त्ताभिधानभृत्॥ नाभेयदृष्टिपीयूष–संपृक्तजल-
संप्लुतं॥ ए६ ॥ हत्यादिदोषविध्वंसि। सर्वकुष्टहरं परं॥ तत्पयो घनसारैण–मदजित्वर-
सौरभं॥ ए७ ॥ विद्याभृन्मणिचूडोऽथ। सप्रियो विमलाचले॥ चैत्रोत्सवे जिनं नत्वा। सू-
र्योद्यानमथागमत्॥ ए८ ॥ तत्रापि नत्वा नाभेय–प्रतिमां मतिमानयं॥ तत्कुंभतोयमादा-
या–वलन्निजपुरं प्रति॥ एए ॥ तत्प्रियाथ विमानस्था। भवंतं वीक्ष्य तद्विधं॥ दयार्द्रा प-
तिमापृछ्या–किरत्तोयं तवोपरि॥ ६०० ॥ तत्सेकाद्धत्याधयः सर्वे। त्वद्देहाद्दूरगामिनः॥ उदी-
रयामासुरिदं। स्प्रष्टुं नालं वयं त्वयि॥ १ ॥ हत्याः प्रायेण सर्वाः स्यु–र्नरकादिकदुःखदा
॥ यतिहत्या त्वविश्रांत–भवभ्रांतिनिबंधनं॥ २ ॥ कोपनीयो मुनिर्नैव। गिरापि गतदूषणैः
॥ प्रायेण परनिंदा स्या–न्महादुःखौघदायिनी॥ ३ ॥ मुनिर्लिंगी सदा वंद्यो। नालोक्यं त-
त्क्रियादिकं॥ यादृशस्तादृशोऽप्यस्मा–देवाकारो हि वंद्यते॥ ४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्युक्त्वा विरते तस्मिन् । महीपालो गिरोऽकीरत् ॥ मया त्वं जंगमं तीर्थं । प्राप्तोऽसि-
न्नगवन्निह ॥ ५ ॥ धर्मनेत्रप्रकाशत्वात् । सर्वतीर्थोपदेशतः ॥ त्वमेव तीर्थमतुलं । लेन्ने धन्ये-
न यन्मया ॥ ६ ॥ सेव्यस्त्वं पूजनीयस्त्वं । ध्येयस्त्वं हि न्नवस्पृशां ॥ गुरुंविना धर्मतत्त्वं ।
बुद्धिमानपि वेत्ति न ॥ ७ ॥ रससिद्धिः कला विद्या । धर्मस्तत्त्वं धनार्जनं ॥ गुरूपदेशेन वि-
ना । प्राज्ञस्यापि न सिद्ध्यति ॥ ८ ॥ सर्वेषां मातृसवितृ—न्नात्रादीनां नरो न्नवेत् ॥ अनृणो
धर्मदातुस्तु । नानोपायैर्गुरोर्न तु ॥ ९ ॥ पितृमातृमुखाः सर्वे । संन्नवंति न्नवे न्नवे ॥ सद्गु-
रुर्धर्मदाता च । प्राप्यते पुण्यतः क्वचित् ॥ १० ॥ भ्रमता न्नवपाथोधौ । प्रमादायतचेतसा ॥
चिंतामणिरिवानर्घ्यः । प्राप्तोऽसि न्नगवन्मया ॥ ११ ॥ धन्यानामपि धन्योऽहं । धुर्यः पुण्य-
वतामहं ॥ न्नवामि यदि तत्तीर्थं । न्नवान् दर्शयिता मम ॥ १२ ॥ क्रियाः सर्वाः प्रवर्त्तंते ।
गुरौ साक्षिणि नान्यथा ॥ चक्षुष्मानपि नो पश्ये—द्वस्तु चेन्नास्करो न हि ॥ १३ ॥ इत्यार्थि-
तो गुरुस्तेन । स्वयं तीर्थेऽधिवासनः ॥ न्नमित्युवाच सानंद—मुत्तस्थौ च कुमारराट् ॥ १४ ॥
न्नेरीन्नांकारसंभ्रांत—दिग्न्नारा न्नूरिविक्रमाः ॥ सर्वसारेण गुरुणा । सार्द्धं ते प्राचलन्नथ ॥ १५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अविच्छिन्नप्रयाणैस्ते । प्राप्य सूर्यवनं महत् ॥ नानाद्रुमाणां छायासु । सैन्यावासानदापयन्
॥ १६ ॥ गुरूपदिष्टविधिना । कुंडे चैत्ये च सोत्सवं ॥ ते चक्रुरार्हतीं पूजा–मर्जयंश्च महो-
दयं ॥ १७ ॥ तत्र विद्याधरैर्विद्या–बलाद्रत्नमयान्यथ ॥ विचक्रिरे विमानानि । शोभितानि
ध्वजव्रजैः ॥ १८ ॥ अथो विमानवृंदेना–च्छादयंतो नभस्तलं ॥ प्रापुः शत्रुंजयममी । सिद्धि-
सौधाग्रवेदिकां ॥ १९ ॥ सुवर्णकलशश्रेणिं । प्रासादेषु निरीक्ष्य ते ॥ प्रमोदपूर्णयात्राकृ–त्पु-
ण्यपूर्णघटोपमं ॥ २० ॥ प्राप्य शैलाग्रमथ ते । तीर्थं त्रिभुवनोत्तरं ॥ वीक्ष्य नाथं च पावि-
त्र्य–मासेदुः शिवशर्मदं ॥ २१ ॥ अवारुह्य विमानात्ते । कृत्वा राजादनीं मुदा ॥ प्रदक्षिणां
जगन्नर्तुः । पादौ नेमुस्ततो नृपाः ॥ २२ ॥ प्रासादं गतसादास्ते । जिनस्यासाद्य सादरं ॥
ननृतुः प्रीतिपूर्णांगा । ऊर्ध्वीकृतभुजांचलाः ॥ २३ ॥ स्वयं स्तुवंत आत्मान–मादिदेवस्य
दर्शनात् ॥ तत्पुण्यमासदन् नृपा । न यद्वचनगोचरं ॥ २४ ॥ जिनं विधापयामासुः । पूर्वं
रत्नैर्वरांशुभिः ॥ लुठंतः पृथिवीपीठे । नेमुर्भक्तिभरोच्छ्रिताः ॥ २५ ॥ शत्रुंजयीसरित्स्नाना–
च्छुद्धा अंतर्बहिश्च ते ॥ देहे शुभ्राणि वासांसि । सद्गुणाः पर्यधारयन् ॥ २६ ॥ आनीतैर्नंद- ॥११२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नोद्याना—द्विद्याधरबलेन ते ॥ कुसुमैरर्चयामासु—स्त्रैलोक्यतिलकं जिनं ॥ २७ ॥ इत्थं मनः-
प्रमोदाप्ते । गुरोरादेशतो गिरौ ॥ चक्रुस्ते सकलं कर्म । धर्मसर्वस्वशर्मदं ॥ २८ ॥ पवित्रप-
द्वैश्चित्रै—रथ्यमग्निः स्तवैरमी ॥ अस्तुवन्नस्तकलुषा । जिनं जातातिसंमदाः ॥ २९ ॥ प्रति-
लाभ्य गुरुं भक्त्या । शुद्धोपकरणैरथ ॥ दयादानादिभिर्दीनां—स्ते तत्रानंदयन्मुदा ॥ ३० ॥
जिनार्चनेऽस्ति यत्पुण्यं । प्रतिमासद्मनिर्मितौ ॥ अर्हतां शतसहस्र—गुणं तस्मादनुक्रमात् ॥
॥ ३१ ॥ अर्हतः प्रतिमावेश्म—कर्त्तात्र स्वर्गभाग्भवेत् ॥ पापेभ्यस्तीर्थरक्षाया—स्तदनंतगुणं
स्मृतं ॥ ३२ ॥ श्रुत्वेति सद्गुरोर्वाक्यं । महीपालोऽतिभक्तिमान् ॥ जिनप्रासादमुत्तुंग—म-
कार्षीत्प्रतिमायुतं ॥ ३३ ॥ त्रिभिर्विशेषकं ॥

एवमष्टाह्निकां कृत्वा । ते तत्र परमोत्सवैः ॥ रैवताद्रिं विमानौघै—र्जग्मुर्गुरुपथानुगाः ॥
॥ ३४ ॥ अष्टाह्निकां महोत्साहै—स्ते तत्रापि नराधिपाः ॥ असूत्रयन्नेमिनाथ—पादपूजनतत्प-
राः ॥ ३५ ॥ सूर्यमल्लो महीनाथः । पुत्रौ प्राप्तमहोदयौ ॥ ज्ञात्वैतौ सवधूकौ शक्र । सन्मु-
खं समुपागमत् ॥ ३६ ॥ तं जंगमतीर्थमिव । पितरं वीक्ष्य सादरौ ॥ तौ लुठंतौ धरापीठे । ॥ ११० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नेमतुर्भक्तिनिर्भरौ ॥ ३७ ॥ राजा कराभ्यामुद्दध्रे । तावुभौ क्षितिसंगिनौ ॥ तनयौ नयधर्माभ्यां । पक्षाविव निजौ गुणी ॥ ३८ ॥ आलिलिंगेऽनुरागेण । तैर्मिथः प्रीतिनिर्भरैः ॥ तदा यामुदभूत्तेषां । सा वाचमतिवर्त्तते ॥ ३९ ॥ आरुह्य करिणं राजा-प्यारोह्य तनयावथ ॥ अविशत्स्वपुरं प्रोच्चै-र्ददर्थिजने धनं ॥ ४० ॥ उच्चान् मंचान् ध्वजव्रातान् । हट्टा वंदनमालिकाः ॥ संगीतं च प्रेक्ष्यमाणाः । प्रापुस्ते राजमंदिरं ॥ ४१ ॥ सत्कृत्य खेचरौ राजा । हिरण्येभहयादिभिः ॥ सत्प्रीत्याथ निजं स्थानं । प्रापयत्सपरिच्छदौ ॥ ४२ ॥ तस्मिन्नेव दिने राजा । तस्मै राज्यमदान्मुदा ॥ ज्यायसानुमतायासौ । गुणज्यायानितीरिणा ॥ ४३ ॥ प्राप्य राज्यं गुणप्राज्यं । पालयन्नयतः प्रजां ॥ महीपालो यशःकोशा-नपूरयदखंम्डितान् ॥ ४४ ॥ तस्मिन् कुर्वति साम्राज्यं । नानयो न रिपोर्भयं ॥ न दुर्भिक्षं न रोगाणां । संभवोऽभून्महीतले ॥ ४५ ॥ जलदा वांछितां वृष्टिं । वायवस्तापनिग्रहं ॥ द्रुमाः फलानि पूर्णानि । तेनुस्तस्मिन् महीपतौ ॥ ४६ ॥ कृत्रिमेष्वथ नित्येषु । चैत्येषु युवतीसखः ॥ विद्यया स खगामिन्या-ऽपूजयत् जिननायकान् ॥ ४७ ॥ शत्रुंजयोज्जयंतादि-शैलेषु नगरेष्वपि ॥ ग्रामोद्या-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नादिषु जिन-प्रासादान् स विनिर्ममे ॥ ४८ ॥ दुर्गाणि चतुरशीति । तावंत्यपि तटानि च ॥ द्वात्रिंशत्सहस्त्रयुतं । लक्षं ग्रामान् भुनक्ति सः ॥ ४९ ॥ सप्तलक्षं तुरंगाणां । सप्तशत्यश्च कुंजिनां ॥ तावतां स्यंदनानां च । महीपालोऽजवत्प्रभुः ॥ ५० ॥ दत्वा राज्यं स्वपुत्राय । श्रीपालायाथ नृपतिः ॥ संसारविमुखो जज्ञे । चतुर्वर्षशतीमनु ॥ ५१ ॥ जलदुर्गयुतं सिंधु-देशं शस्यैकसेवधिं ॥ स ददौ वनपालाय । देवपालस्य सूनवे ॥ ५२ ॥

इत्थं पुण्यजरं धराधववरः कृत्वा विवेकान्वितं । श्रीशत्रुंजयपर्वतं दयितया युक्तः समासाद्य सः ॥ श्रीकीर्तिमुनिनायकाद्व्रतविधिं लब्धा निजायुःक्षये । मुक्तिं प्राप तदोदितेन विमलज्ञानेन सद्भासितः ॥ ५३ ॥ तस्यान्वये सुरपते रिपुमल्ल एष । राजा यशःसुकृतसंचयशुद्धचित्तः ॥ धन्योऽयमेव ननु रैवतपार्श्ववासी । मुक्तिं गमिष्यति जवैस्त्रिजिरद्भुतश्रीः ॥ ५४ ॥ सर्वकामफलदं स्मृतेरिदं । शाश्वतं जयति तीर्थमादिमं ॥ देवराज महिमा न पार्यते । वक्तुमस्य सुरहस्यवेदिजिः ॥ ५५ ॥ सूर्योद्यानमिदं सुरेंडककुजि प्रोन्निद्रनानाद्रुमं । सिद्धर्हत्प्रतिमानतिस्मृतिजृतां सर्वाशुजध्वंसकृत् ॥ सूर्यावर्त्तमपारसौरजजर भ्राजिष्णुनीरं महा—



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुंभं चैतदितः प्रभावसुभगं निःशेषकुष्टापहं ॥ ५६ ॥

॥ इतिश्रीधनेश्वरसूरिविरचिते महातीर्थश्रीशत्रुंजयमाहात्म्ये महीपालचरित्रवर्णनो नाम द्वितीयः सर्गः समाप्तः ॥ श्रीरस्तु ॥

## ॥ अथ तृतीयः सर्गः प्रारभ्यते ॥

ये राज्यावसरे निरीक्ष्य युगलैर्दृष्टारविंदैः पयो–जन्माभ्रे जलवर्जितानि जलजान्यासादयंति क्षितिं ॥ बुध्ध्वेत्थं किल नांगरागचकितैः सिक्ते पयोभिः पदे ॥ स्यातां ते प्रथमप्रभोर्भवमहातापच्छिदे सर्वदा ॥ १ ॥ संक्षिप्तो महिमा ह्येष । तीर्थस्यास्य सुराधिप ॥ पुनः प्रभाववैचित्र्यं । यथोत्पन्नं निशम्यतां ॥ २ ॥ अनंतकालजन्मेदं । तीर्थं न च विनश्वरं ॥ अधुना त्ववसर्पिण्यां । यथाभूत् श्रुणु तत्कथां ॥ ३ ॥ इतश्च जंबूद्वीपेऽस्मिन्न । भरतार्द्धे च दक्षिणे ॥ गंगासिंध्वोर्मध्यदेशे । वर्त्तमानेषु युग्मिषु ॥ ४ ॥ विमलेभाधिरोहत्वा–न्नाम्ना विमलवाह-





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नः ॥ अनूदाद्यः कुलनृतां । युग्मधर्मा सुवर्णरुक् ॥ ५ ॥ युग्मं ॥ चक्षुष्मांस्तनयो जज्ञे ।
यशस्व्यप्यनवत्ततः ॥ अनिचंद्रस्ततोऽप्यासीत्। प्रसेनजिदथेत्यनूत् ॥६॥ मरुदेवस्ततोऽप्यासी
–न्नानिनामा नयोज्ज्वलः ॥ मरुदेव्यपितन्नार्या । सदार्जवगुणोज्ज्वला ॥ ७ ॥ तृतीयारकप-
र्यंते–ऽवसर्पिण्यां जगद्गुरुः ॥ सर्वार्थसिद्धितः कुक्षौ । मरुदेव्या अवातरत् ॥ ८ ॥ मतिश्रु-
तावधिज्ञाना–न्याजग्मुर्विभुना समं ॥ नजिद्दानेन रविणा–ह्यालोकः सममेत्यपि ॥ ए ॥
कृष्णाषाढचतुर्थ्यंदून्यु–त्तराषाढास्थिते विधौ ॥ अपश्यत्सा निशाशेषे । स्वप्नानेवं चतुर्दश ॥
॥ १० ॥ वृषनेन्नसिंहलक्ष्मी–पुष्पदामघटध्वजान् ॥ वह्निरत्नोच्चयसरो–यानाब्धिशशिन्ना-
स्करान् ॥ ११ ॥ कुलकं ॥ अवतारक्षणे तस्मिन् । विन्नोरासीज्जगत्त्रये ॥ नद्योतस्तु नारका-
णा–मप्युच्चैः सुखसंततिः ॥ १२ ॥ प्रबुद्धा मरुदेवाथ । पश्यंति प्रकटानिव ॥ तानागत्यावद-
न्नान्नि–नरेंद्राय मृदूक्तिन्निः ॥ १३ ॥ सोऽप्यार्जवगुणोपेतो । विमृश्याख्यत् प्रिये श्रृणु ॥ ए-
तत्स्वप्नप्रन्नावेण । सूनुस्ते नविताद्भुतः ॥ १४ ॥ इतश्चासनकंपेन । वज्रिणान्येत्य सत्वरं ॥
नत्वा स्तुत्वा मरुदेवीं । पुत्राप्त्याः स्वप्नमुज्जगे ॥ १५ ॥ बन्नार मरुदेवापि । गर्न्नं रत्नमिवो-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्ज्वलं ॥ रत्नगर्भेव भृङ्गधि–सुभगं भावुकानना ॥ १६ ॥ वहंती जगदाधारं । जगत्सारं ज-
गद्गुरुं ॥ चचाल मंथरं माता ॥ कृपयेवांगधारिणां ॥ १७ ॥ शक्राज्ञया वैश्रमणो । जृंभि-
कामरकल्पितैः ॥ इष्टाप्तवस्तुभिस्तस्या । मुदो वृद्धिमुपानयत् ॥ १८ ॥ पूर्णेऽथ काले चैत्र-
स्य । श्यामाष्टम्यां शुभेंशुके । उत्तराषाढया युक्ते । विधावुच्चैर्बहुग्रहैः ॥ १९ ॥ अरोगा रोग-
रहितं । निशीथे निर्गतव्यथं ॥ देवी युगलधर्माणं । सुतरत्नमसूत सा ॥ २० ॥ [illegible] ॥
सुखैस्तदोदितं वातै–र्मुदितं नारकैरपि ॥ जगत्त्रयेऽपि तेजोऽभू–दनदद्दिवि दुंदुभिः ॥ २१ ॥
उत्तप्ततपनीयाभो । वृषांकः सर्वलक्षणः ॥ सहायातस्वर्गिकाय । इव तत्र स दिद्युते ॥ २२ ॥
षट्पंचाशद्दिक्कुमार्य । आजग्मुश्चलितासनाः ॥ विज्ञाय जिनजन्माथ । हर्षोत्कर्षवशंवदाः
॥ २३ ॥ ता जिनं च जिनांबां च । नत्वा स्तुत्वा च भक्तितः ॥ मन्यमाना निजं धन्यं ।
ननृतुस्तद्गुणस्पृशः ॥ २४ ॥ संवर्त्तजलदादर्श–भृंगार (झारी) व्यजनैः सह ॥ चामरोद्योतरक्षादि–
कर्त्तव्यं च निजं व्यधुः ॥ २५ ॥

अथासनप्रकंपेन । विज्ञायावधिना प्रभोः ॥ जन्माजग्मुः सुराः सर्वे । विमानै र्व्योम-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शालिनः ॥ २६ ॥ सौधर्मेंद्रस्ततो जक्त्या । कृतवैक्रियरूपजाक् ॥ गत्वा सूतिगृहे देवीं ।
जिनं चानमदादरात् ॥ २७ ॥ दत्वावस्वापिनीं मातु–रनुज्ञाप्य च देवराट् ॥ विमुच्य तत्प्र-
तिच्छंदं । जग्राहेशं स्वपाणिना ॥ २८ ॥ विभुं छत्रं पविं चापि । चामरे द्वे पृथक् तदा ॥
पंचमूर्त्तिरधाद्वज्री । जक्तिजावजृतांतरः ॥ २९ ॥ चित्रयंतो नजो यान–रत्नैरुल्लिखितेंऽजाः ॥
स्फोटयंतो जगन्नादै–रासेदुस्ते सुराचलं ॥ ३० ॥ तत्रोद्याने पांडुकाख्ये । स्वर्णकुंप्रतिमां शि-
लां ॥ अतिपांडुकंबलाख्यां । वासवो ऽगशिश्रयत् ॥ ३१ ॥ रूप्यरत्नरत्नहेम–हेमरूप्यमृदोम-
यान् ॥ विचक्रुः कलशानिंद्रा । आजियोग्यसुरैस्ततः ॥ ३२ ॥ तत्र सिंहासने दिव्ये । पूर्वा-
शाजिमुखो हरिः ॥ स्वोत्संगे विभुमादाय । निषसादाद्भुतद्युतिं ॥ ३३ ॥ समुद्रतटिनीकुंम–
सरसीह्रदराजितः ॥ जलान्याहृत्य देवेशो । विजोः स्नात्रमसूत्रयत् ॥ ३४ ॥ गंधानुलेपपुष्पा-
द्यैः । फलाक्षतमनोहरैः ॥ वस्त्राजरणपत्रैस्तु । सुरेशास्तमपूजयन् ॥ ३५ ॥ वैकक्षांकितस-
द्धक्ता । शुभुक्ता स्वामिने मुदा ॥ नीराजनां विधायाथ । स्तोतुमेवं प्रचक्रमे ॥ ३६ ॥ जय
स्वामिन् युगादीश । जयानीश जगद् गुरो ॥ जयार्हन् जय सिद्धेश । जयाव्यक्त निरंजन ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ३७ ॥ अष्टादशकोटिकोटि–सागरभ्रष्टधर्मिणां ॥ जयोद्धारकर स्वामिन् । तमोजरविरोचन ॥ ३८ ॥ जरतेऽत्र जवश्रेयो–व्यवहाराद्यकारक ॥ जय सर्वसुखागार । जयापार चिदात्मक ॥ ३९ ॥ आद्यानामेष शक्राणां । पुण्योऽहं पुण्यशालिनां ॥ पुराद्दष्टार्हतां स्वामिन्। यद्दृष्टोऽसि मयानघ ॥ ४० ॥ डुमोपलगिरिक्ष्माणां । स्यादुद्धर्त्ता क्वचित्पुनः ॥ निपतज्जनसंघातो–द्धर्त्ता नाथ त्वमेव हि ॥ ४१ ॥ रागादिरिपुसंक्लिष्ट–जनाजयकर प्रजो ॥ मुक्तिसीमंतिनीदूत–जय नूतनधर्मराट् ॥ ४२ ॥ बाह्यांतररिपुव्रातैः । पीड्यमाना जनव्रजाः ॥ जीवरक्षोपदेशेनो–द्धरिष्यंते त्वयैव हि ॥ ४२ ॥ पिंमस्थादिजिरीश त्वं । ध्यानैर्ध्यातो हि योगिजिः ॥ कृत्वाष्टकर्मविगमं । नेष्यस्येतान् निजालयं ॥ ४३ ॥ यावच्छिवसुखावाप्ति–स्त्वत्प्रसादाद्भवेन्मम ॥ तावत्त्वांह्री शरणं । ज्रूयास्तां जगवन् सदा ॥ ४४ ॥ इति स्तुत्वा जिनाधीशं । कृतकृत्यः सुरेश्वरः ॥ सोत्सवं विभुमानीया–मुंचन्मातुः पुरः पुनः ॥ ४५ ॥ कुंमले दिव्यवस्त्राणि । हारं च मुकुटं विज्ञोः ॥ उत्सीर्षके विमुच्यासौ । मातुर्निंशमपाहरत् ॥ ४६ ॥ सुपर्वेत्यद्य नः प्रीता । यज्जगुर्निर्जरास्तदा ॥ तेन त्रिभुवनेत्याख्या । सुपर्वाणो ह्यमी सदा ॥



For Private And Personal Use Only

॥ ४७ ॥ धात्रीर्विमुच्य देवेशो–ऽप्सरसस्तत्र सम्मदात् ॥ स्वयमष्टाह्निकां नंदी–श्वरे कृत्वागमद्दिवि ॥ ४८ ॥

ततः प्रातः सुतोदंतं । श्रुत्वा नाभिरसूत्रयत् ॥ उत्सवं स्वानुमानेन । तदोत्पन्नविचारदृक् ॥ ४९ ॥ ऋषभश्चिह्नमूरुस्थं । स्वप्नः प्राग्वृषभोऽप्यभूत् ॥ प्रभोर्वृषभ इत्याख्यां । चक्रतुः पितरौ ततः ॥ ५० ॥ शक्रन्यस्तामृतांगुष्ठ–मुक्तबिंदूपमा विभोः ॥ अभूवन् दशना वक्त्रे । कारणानुगुणाः सिताः ॥ ५१ ॥ इंद्रनीलमणिजाता । विभोर्धर्धरका बभुः ॥ चरणांभोजसंलीना । मधुपा इव राजिणः ॥ ५२ ॥ बाल्यत्वे पाल्यमानोऽथ । सुरस्त्रीभिः स पंचभिः ॥ प्राप वृद्धिं समितिभिः । साक्षात्संयमवत्प्रभुः ॥ ५३ ॥ वयसा सदृशीभूय । प्रभोरसदृशा गुणैः ॥ देवाश्चतुर्विधाः क्रीडां । चक्रुः शक्रनिदेशतः ॥ ५४ ॥ येन येन यदा स्वामी । रंतुमैहत कौतुकात् ॥ तद्रूपं तत्तदाधाय । पुरतः स्फुरितं सुरैः ॥ ५५ ॥ वत्सरे स्वामिनः पूर्णे । जनकोत्संगसंगिनः ॥ सौधर्मेंद्रोऽन्वयस्थित्यै । सेक्षुयष्टिः पुरोऽभवत् ॥ ५६ ॥ प्रभुर्ज्ञातेंद्रसंकल्पो । जग्राहेक्षुलतां च तां ॥ इक्ष्वाकुसंज्ञं कृत्वेति । वंशं भर्तुर्ययौ हरिः ॥ ५७ ॥ प्राप्य

प्रभुरथांगुष्ट–पानावस्थातिगं वयः ॥ अप्रीयत फलैर्दिव्यै–स्तैरुत्तरकुरुनवैः ॥ ५८ ॥ जन्मतो-
ऽतिगते पूर्वे । यद्विभोः शब्दशासनं ॥ अध्येषुर्देवास्तेनामी । विख्याता लेखशालिनः ॥५९॥
प्राप क्रमात् प्रवर्द्धिष्णुः । स्पर्द्धिष्णुः कल्पपादपं ॥ सौभाग्यरूपभूपाल–भवनं यौवनं विभुः
॥ ६० ॥ उत्तप्ततपनीयाभः । सहजातिशयोज्ज्वलः ॥ पंचशतधनुर्मानः । स तदासीत्सु-
लक्षणः ॥ ६१ ॥ प्रकाशनीयो विश्वस्य । व्यवहारस्त्वयैव हि ॥ निःसंगोऽपि भवोद्विग्नो । मु-
क्तिसौख्यरतोऽपि सन् ॥ ६२ ॥ पाणिग्रहमुदं मेऽद्य । कारुण्यालय दर्शय ॥ इतींद्रस्योपरो-
धेन । प्रभुर्मेने तदप्यहो ॥ ६३ ॥ [redacted] ॥ त्र्यशीतिपूर्वलक्षाणि । यावद्भोगफलोदयं ॥ प्रभुः
स्वस्यावधिज्ञाना–ज्ज्ञानन् शक्रकृतोत्सवं ॥ ६४ ॥ सुमंगला सुनंदेति । रतिप्रीतिनिभे स्त्रियौ
॥ वर्यतूर्यस्फुरद्वीर्य–स्मरं पर्यणयज्जिनः ॥ ६५ ॥ [redacted] ॥ तदादि व्यवहारोऽयं । पाणिग्रहण-
लक्षणः ॥ प्रकाशितो जगद्भर्त्रा । तथाद्यापि प्रवर्त्तते ॥ ६६ ॥ सुमंगलायां भरत–ब्राह्म्यौ
च तनयाविति ॥ जातौ च पूर्वषट्पूर्व–लक्षायां त्रिजगद् गुरोः ॥ ६७ ॥ तस्यामेकोन पंचा-
शत् । सुतयुग्मान्यपि प्रभोः ॥ क्रमादासन् मिथो रूप–स्पर्द्धीनि च पराण्यथ ॥ ६८ ॥ सु-

॥११९॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नंदायां बाहुबलि–सुंदर्यौ सुंदराकृती ॥ विभोरपत्ये संजाते । विश्वस्योद्धरणक्रमे ॥ ६९ ॥
अथेशदानातिशया–ल्लज्जिता इव निष्फलाः ॥ क्रमादासादयामासुः । कल्पवृक्षा अल-
क्ष्यतां ॥ ७० ॥ कलहायंत्यथ मिथो । युगलान्येत्य दुर्नयं ॥ न्यवेदयन् प्रभोरग्रे । विभुरप्ये-
वमादिशत् ॥ ७१ ॥ प्रशास्ति राजा लोकानां । सोऽभिषिक्तो जनैर्जलैः ॥ स्यादस्मदभिषे-
काय–तद्यतध्वं हि तत्कृते ॥ ७२ ॥ श्रुत्वा ते तद्विभोर्वाक्यं । जग्मुः सरसि वारिणे ॥ इत-
श्चासनकंपेना–वसरं वज्रिणोऽविदन् ॥ ७३ ॥ उपेत्य च त्वरात्तत्र । विचक्रुर्मंडपं हि ते ॥ त-
दंतर्मणिपीठोर्ध्वं–सिंहासनममंडयन् ॥ ७४ ॥ निवेश्य स्वामिनं तत्र । जन्मस्नात्रमिवो-
च्चकैः ॥ राज्याभिषेकं देवेशा । विधिवद्विदधुर्मुदा ॥ ७५ ॥ यथायोग्यं यथास्थानं । प्रत्यंगं
तमभूषयन् ॥ शशिप्रभं महाछत्रं । चामरे च दधुः सुराः ॥ ७६ ॥ अमात्यमंडलीकादि—
सर्वव्यापारधारिणः ॥ संभूय सकलाः शक्रा । न्यषीदन् स्वामिनः पुरः ॥ ७७ ॥ इतस्ते
युग्मिनो वारि । कृत्वा पद्मदले रयात् ॥ प्राप्ता ददृशुरीशं तं । तत्तथैश्वर्यसुंदरं ॥ ७८ ॥ देहो-
भद्युतिध्वस्त–दिविषच्छ्रियमीश्वरं ॥ दुरालोक्यं चर्मदृग्भिः । प्रतापमिव जंगमं ॥ ७९ ॥

For Private And Personal Use Only

आलोक्याभरणालेप–वस्त्रमाल्यविभूषितं ॥ ते विभुं तत्क्षणोत्पन्न–विवेकादित्यचिंतयन् ॥७०॥
अभिषेकं वयं मूर्ध्नि । करिष्यामो यदीशितुः ॥ तदंगरागविगमो । भविता चित्रवर्णवत् ॥
॥ ७१ ॥ इत्यामृश्य विभोः पादौ । पादपीठाधिदैवतौ ॥ सिषिचुः पयसा तेऽथ । साश्चर्या-
मरवीक्षिताः ॥ ७२ ॥ ततश्चकार सौधर्म–शक्रस्तानधिकारिणः ॥ प्रभुराज्यमहासौध–दृढ-
स्तंभनिभानलं ॥७३॥ अत्रासीद्यः स्वयं युग्म–धर्मिणां विनयस्ततः ॥ विनीतापुरसंस्थित्यै ।
श्रीदमादिश्य वज्र्यगात् ॥ ७४ ॥ श्रीविभो राज्यसमये । शक्रादेशान्नवां पुरीं ॥ धनदः स्था-
पयामास । रत्नचामीकरोत्करैः ॥ ७५ ॥ द्वादशयोजनायामा । नवयोजनविस्तृता ॥ अष्ट-
द्वारा महाशाला । सारवत्तोरणोज्ज्वला ॥ ७६ ॥ धनुषां द्वादश शता–न्युच्चैस्त्वष्टशतं तले
॥ व्यायामे शतमेकं स । व्यधाद्वप्रं सखातिकं ॥ ७७ ॥ सौवर्णस्य च तस्योर्ध्वं । कपिशी-
र्षावलिर्बभौ ॥ मणिजामरशैलस्था । नक्षत्रालिरिवोद्गता ॥ ७८ ॥ चतुरस्राश्च त्र्यस्राश्च । वृ-
त्ताश्च स्वस्तिकास्तथा ॥ मंदराः सर्वतोभद्रा । एकभूमा द्विभूमिकाः ॥ ७९ ॥ त्रिभूमादा-
सप्तभूमं । यावत्सामान्यभूभुजां ॥ प्रासादाः कोटिशस्तत्रा–भूवन् रत्नसुवर्णजाः ॥ ८० ॥



॥१२१॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[redacted] ॥ दिशीशान्यां सप्तभूमं चतुरस्रं हिरण्मयं ॥ सवप्रखातिकं चक्रे । प्रासादं नाभिभूपतेः ॥ ९१ ॥ दिश्यैंद्र्यां सर्वतोभद्रं । सप्तभूमं महोन्नतं ॥ वर्तुलं भरतेशस्य । प्रासादं धनदोऽकरोत् ॥ ९२ ॥ आग्नेय्यां भरतस्यैव । सौधं बाहुबलेरभूत् ॥ शेषाणां च कुमाराणा—मंतरा ह्यभवत्तयोः ॥ ९३ ॥ तस्यांतरादिदेवस्य । चैकविंशतिभूमिकं ॥ त्रैलोक्यविभ्रमं नाम । प्रासादं रत्नराजिभिः ॥ ८७ ॥ सवप्रखातिकं रम्यं । सुवर्णकलशावृतं ॥ चंचध्ध्वजपटव्याजा—न्नृत्यंतं निर्ममे हरिः ॥ ८८ ॥ [redacted] ॥ अष्टोत्तरसहस्रेण । मणिजालैरसौ बभौ ॥ तावत्संख्यमुखैर्भूरि—ब्रुवाणमिव तद्यशः ॥ ८९ ॥ कल्पद्रुमैर्वृताः सर्वे—ऽभूवन् सेभ्यदयौकसः ॥ सप्राकारा बृहद्द्वाराः । पताकामालधारिणः ॥ ९० ॥ सुधर्मासदृशी चारु—रत्नमय्यभवत्पुरः ॥ युगादिदेवप्रासादात् । सभा सर्वप्रभाभिधा ॥ ९१ ॥ चतुर्दिक्षु व्यराजंत । मणितोरणमालिकाः ॥ पंचवर्णप्रभांकूर—पूरर्कुबरितांबराः ॥ ९२ ॥ अष्टोत्तरसहस्रेण । मणिबिंबैर्विभूषितं ॥ गव्यूतिद्वयमुत्तुंगं । मणिरत्नहिरण्मयं ॥ ९३ ॥ नानाभूमिगवाक्षाढ्यं । विचित्रमणिवेदिकं ॥ प्रासादं जगदीशस्य । व्यधाच्छ्रीदः पुरांतरा ॥ ९४ ॥ [redacted] ॥ सामंतमंडलीका-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नां । नंद्यावर्त्तादयः शुभ्राः ॥ प्रासादा निर्मितास्तत्र । विचित्रा विश्वकर्मणा ॥ ९५ ॥ अ-
ष्टोत्तरसहस्रं तु । जिनानां भवनान्यभूः ॥ उच्चैर्ध्वजाग्रसंक्षुब्धा-स्तीक्ष्णांशुतुरगा यथा ॥
॥ ९६ ॥ चतुष्पथप्रतिबद्धा-श्चतुरशीतिरुच्चकैः ॥ प्रासादाश्चार्हतां रम्य-हिरण्यकलशा बभुः
॥ ९७ ॥ सौधानि हिरण्यरत्न-मयान्युच्चैः सुमेरुवत् ॥ कुबेर्यां सपताकानि । चक्रे स व्यव-
हारिणां ॥९८॥ दक्षिणस्यां क्षत्रियाणां । सौधानि विविधानि च ॥ अभूवन् शस्त्रागाराणि ।
तेजांसीव निवासिनां ॥ ९९ ॥ तत्प्रांतश्चतुर्दिक्षु । पौराणां सौधकोटयः ॥ व्यराजंत द्युस-
द्यान-समानविशदश्रियः ॥ १०० ॥ सामान्यकारुकाणां च । बहिः प्राकारतोऽभवन् ॥ को-
टिसंख्याश्चतुर्दिक्षु । गृहाः सर्वधनाश्रयाः ॥ १ ॥ अपाच्यां च प्रतीच्यां च । प्रतीकानां बभु-
र्गृहाः ॥ एकभूमिमुखास्त्वन्त्या-स्त्रिभूमियावदुच्छ्रिताः ॥ २ ॥ अहोरात्रेण निर्माय । तां
पुरीं धनदोऽकिरत् ॥ हिरण्यरत्नधान्यानि । वासांस्याभरणानि च ॥ ३ ॥ सरांसि वापीकू-
पादीन् । दीर्घिकादेवतालयान् ॥ अन्यच्च सर्वं तत्राहो-रात्रेण धनदोऽकरोत् ॥ ४ ॥ विपिना-
नि चतुर्दिक्षु । सिद्धार्थश्रीनिवासिके ॥ पुष्पाकारं नंदनं चा-भवन् भयांसि चान्यतः ॥ ५ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रत्येकं हेमचैत्यानि । जिनानां तत्र रेजिरे ॥ पवनाहृतपुष्पालि–पूजितानि द्रुमैरपि ॥ ६ ॥ प्राच्यामष्टापदोऽपाच्यां । महाशैलो महोन्नतः ॥ प्रतीच्यां सुरशैलस्तु । कौबेर्यामुदयाचलः ॥ ७ ॥ तत्रैवमभवन् शैलाः । कल्पवृक्षालिमालिताः ॥ मणिरत्नाकराः प्रोच्चै–र्जिनावासपवित्रिताः ॥ ८ ॥ शक्राज्ञया रत्नमयी–मयोध्यापरनामतः ॥ विनीतां सुरराजस्य । पुरीमिव स निर्ममे ॥ ९ ॥

यत्रास्तव्यजना देवे । गुरौ धर्मे च सादराः ॥ स्थैर्यादिभिर्गुणैर्युक्ताः । सत्यशौचदयान्विताः ॥ १० ॥ कलाकलापकुशलाः । सत्संगतिरताः सदा ॥ विशदाः शांतसद्भावा । ऋद्धिभिश्च महोदयाः ॥ ११ ॥ कुलकं ॥ तत्पुर्यामृषभः स्वामी । सुरासुरनमस्कृतः ॥ जगत्सृष्टिकरो राज्यं । पाति विश्वस्य रंजनात् ॥ १२ ॥ अन्वयोध्यमिह क्षेत्रे । पुराण्यासन् समंततः ॥ विभुसृष्टशिल्पिवृंदै–र्घटितानि तद्भक्तिभिः ॥ १३ ॥ विंशतिः पूर्वलक्षाणि । कुमारत्वमवासयत् ॥ ततस्त्रिजगद्भर्त्तुं । राज्यस्थितिमदाद्विभुः ॥ १४ ॥ सप्तांगानि व्यधाद्राज्य–षड्गुणान् वैरिनिग्रहे ॥ स्थित्यै तु पंच करणा–न्यंगानीशस्तथा बले ॥ १५ ॥ चत्वार्युच्चैः फलग्राहे ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





शक्तिस्तिस्रो द्वयं नये ॥ छत्रमेकं निजस्यैव । त्रैलोक्येऽपि जगन्नतः ॥ १६ ॥ युग्मं ॥ न मे-
घा वह्नयो नैव । न च विद्याः कला न हि ॥ व्यवहारोऽपि नो कश्चि-त्पूर्वमासीद्दिनोरयं ॥
॥ १७ ॥ तदाज्ञया घनो वृष्टिं । क्षितिर्बीजादिधारणं ॥ हुताशनस्तत्पचनं च । चकार धर-
णीतले ॥ १८ ॥ कर्षुकाः सेवकाः कुंभ-कारा वाणिज्यजीविनः ॥ नियोगिनः क्षत्रियाश्च ।
सूत्रधाराश्च शिल्पिनः ॥ १९ ॥ स्वर्णकाराश्चित्रकारा । मणिकारास्तथा परे ॥ निर्मिताः
स्वामिना तेन । लोकानां हितकाम्यया ॥ २० ॥ युग्मं ॥ अथयजीगपदीशोऽपि । जरतं
ज्येष्टनंदनं ॥ द्वासप्ततिकलाकांमं । सोऽपि बंधून्निजान् परान् ॥ २१ ॥ लक्षणानि गजाश्व-
स्त्री-पुंसामीशस्त्वपाठयत् ॥ सुतं च बाहुबलिनं । सुंदरीं गणितं तथा ॥ २२ ॥ अष्टादश
लीपीर्ब्राह्मी । दर्शयामास पाणिना ॥ अपसव्येन स ब्राह्म्या-ज्योतीरूपा जगद्धिताः ॥२३॥
निर्माय स च निर्माय-विश्वस्थितिमिति स्थिरां ॥ न्ययुंक्त सकलं लोकं । नानाकर्मसु कर्म-
वित् ॥ २४ ॥ कदाचिदद्भुतारामे । कदाचित्सिंधुरोधसि ॥ कदाचित्केलिशैलेषु । कदाचिच्चि-
त्रसद्मसु ॥ २५ ॥ कदाचिद्वनितोल्लास-हल्लीसकविलोकने ॥ कदाचित्किन्नरीतार-गीताक-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्णनकौतुके ॥ २६ ॥ कदाचिन्मघवादिष्ट–सुरीघटितनाटके ॥ स्वामी विनिर्ममे कर्म–निर्ज-
रा निर्जरैर्युतः ॥ २७ ॥ [redacted] ॥ पूर्वद्वीपे पूर्वक्षेत्रे । पूर्वस्यां दिशि पूर्वराट् ॥ पूर्व-
पुर्यां पूर्वलक्षां–स्त्रिषष्टिं राज्यमातनोत् ॥ २८ ॥

अन्यदारामिकीं क्रीडां । सवीक्ष इव कल्पयन् ॥ सुरैर्लोकांतिकैरेत्य । तद्भावानुगतै र-
यात् ॥ २९ ॥ भवान्निर्जयजये–त्युच्चैर्नतिपरायणैः ॥ मुक्तिमार्गं दर्शयेति । व्यज्ञपि स्वस्थि-
तिस्थितैः ॥ ३० ॥ [redacted] ॥ इत्युक्त्वा तेषु देवेषु । गतेषु जगतां विभुः ॥ क्रीडां विसृज्य सं-
प्राप्तः । स्मरन् पूर्वजिनस्थितिं ॥ ३१ ॥ विरक्तो ज्येष्ठतनयं । शांतयित्वा नयामृतैः ॥ चक्रि-
णं भरतं राज्य–धारिणं कृतवांस्ततः ॥ ३२ ॥ [redacted] ॥ अन्येभ्योऽपि बाहुबलि–प्रभृतिभ्यो
यथोचितं ॥ स्वस्वनामांकितं देशं । विभज्यादाज्जगत्प्रभुः ॥ ३३ ॥ निर्धूतराज्यभारः सन् ।
दानं संवत्सरावधि ॥ आरेभे वृषभो दातुं । जगदानृण्यकारणं ॥३४॥ शक्राज्ञया वैश्रमण–
श्चत्वरादिषु संस्थितं ॥ उच्छिन्नसेतुं निर्नाथं । प्रभोर्द्रव्यमपूरयत् ॥ ३५ ॥ प्रत्यहं जगतामी-
शः । समागत्य सभांतरा ॥ यथेच्छं मार्गणेभ्योऽदा–द्धेमरत्नधनादिकं ॥ ३६ ॥ दिनोदयाभो-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्यवेलां । यावल्लक्षाष्टकं विभुः ॥ कोटिमेकां हिरण्यस्य । दत्ते वांछितदानतः ॥ ३७ ॥ त्रि-
शती कोटयो हेम्ना-मष्टाशीतिश्च कोटयः ॥ अशीतिलक्षा दाने स्युः । प्रभोः संवत्सरेऽखिले ॥
॥३८॥ तदादिदानधर्मोऽयं । सर्वसत्वहितोऽभवत् ॥ प्रवर्त्तते यथार्हंत-स्तथा लोकोऽपि तन्मु-
खः ॥ ३९ ॥ अथ स्वयं जगत्स्वामी । चैत्रकृष्णाष्टमीदिने ॥ शशांके सोत्तराषाढे । त्वपराह्ने
सुरार्चितः ॥ ४० ॥ चतुःसहस्रेण कच्छ-महाकच्छमुखैर्नृपैः ॥ समं स शकटोद्याने । व्रतसा-
म्राज्यमाददे ॥ ४१ ॥ युग्मं ॥ मनःपर्यवसंज्ञं तु । तुर्यं ज्ञानं जगद्विभोः ॥ तदोत्पेदे संज्ञि-
जंतु-मनःपर्यायसूचकं ॥ ४२ ॥ रागद्वेषमदाभिमानरिपुभिः श्लिष्टश्चिरं संसृतौ । पूर्वं यैरुषि-
तः स तद्वधकृतोपायोऽभ्रमद्भूतलं ॥ नासावंशनिवेशिताक्षियुगलः संरुद्धसर्वेंद्रियः । किंचिच्चे-
तसि चिंतयन्नविरतं मौनी युगादिप्रभुः ॥ ४३ ॥ कृपया सर्वजंतूना-मीर्यया जगतां विभुः ॥
निरीहो निजदेहेऽपि । विजहार धरातलं ॥ ४४ ॥

इतोऽरिणाप्ययोध्याया-मयोध्यायां रिपुप्रभुः ॥ श्रीभरतः शुभरतो । राज्यं पैतृकमन्व-
शात् ॥ ४५ ॥ सूर्यवत्तेजसां राशि-र्नित्योदयधरः स्थिरः ॥ वैरिध्वांतहरश्चित्रं । कलाकरव-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुप्रदः ॥ ४६ ॥ समुद्र इव गंभीरः । शूरः सिंह इवावनौ ॥ शशांकवत्कलाशाली । मेघव-
द्विश्वजीवनः ॥ ४७ ॥ सुरभूरुहवत्त्यागी । विवेकी कलहंसवत् ॥ चैत्यवत्ससमुच्छ्रायः । पि-
कवन्मधुरस्वरः ॥ ४८ ॥ अचाल्यः शत्रुभिर्मेरु–रिवानिक्षमहोर्मिभिः ॥ प्रत्यूषकालवन्मित्रो–
दयवान् वसुवर्द्धनः ॥ ४९ ॥ शेषाहिरिव सद्भोग–लालितः क्षितिभारभृत् ॥ सुमनःश्रेणि-
भिर्युक्तो–नंदनोद्यानवत्सदा ॥ ५० ॥ हारवत्सगुणो मुक्ता–फलवच्छुभवृत्तिभाक् ॥ बभूव भ-
रतो राजा । क्षितिमंमलमंमनं ॥ ५१ ॥ [illegible] ॥

यत्प्रतापरविः कुर्व–न्नप्यदोषाकरं जगत् ॥ चित्रं सत्कमलाकेलि–कलाधरमसूत्रयत् ॥
॥ ५२ ॥ वित्रस्तो यत्प्रतापार्कात् । खगोऽभूत्खग एवसः ॥ तदभ्यासात्क्वचित्स्थानं । ना-
द्यापि भजते यतः ॥ ५३ ॥ सूर्यादीनां भवेत्तापः । प्रतापो भरतस्य तु ॥ दग्धा येनारित-
रवो । न प्रापुः पुनरुद्गमं ॥ ५४ ॥ नयवान् विनयासक्त–श्चारुदृक् सविचारदृक् ॥ कलाध-
रोऽप्यदोषात्तो । भरतोऽभून्नृपोत्तमः ॥ ५५ ॥ देशाद्देशांतरं नाग्रो । विजहाराष्टकर्मनुत् ॥
सर्वसत्वहितः पश्यन् । युगमात्रां महीं पुरः ॥ ५६ ॥ मुग्धत्वान्मानवा देयं । निरवद्यं न

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जानते ॥ तेन संवत्सरं याव–न्निराहारोऽन्नवद्विभुः ॥ ५७ ॥ ढोकयांचक्रिरे केऽपि । रथवाजि-
मतंगजान् ॥ कन्याहिरण्यवासांसि । प्रभोः केऽपि च मौल्यतः ॥ ५८ ॥ त्यक्तवान् स स्वयं
राज्यं । सैन्यं कोशं च निर्वृतः ॥ निष्टीवनमिवादत्ते । न तत्सर्वत्र साम्यभाक् ॥ ५९ ॥ व्रता-
त्संवत्सरे जाते । निराहारो जिनेश्वरः ॥ पुरं गजपुरं प्राप । मौनवान्नृसुरैर्वृतः ॥ ६० ॥
तत्र बाहुबलेः पौत्रः । श्रेयांसः श्रेयसां निधिः ॥ समीक्ष्य जगतामीशं । सस्मार स्वादि-
जन्मनः ॥ ६१ ॥ जातिस्मृत्या प्राग्भवे । विभोः स्वं सोऽनुगं विदन् ॥ प्रागक्षततानवद्या-
न्न–दाने पात्रविवेचने ॥ ६२ ॥ तदैवागतमालोक्य । रसमिक्षोः सुनिर्मलं ॥ पात्रं च जगता-
मीशं । श्रेयांसो दातुमैहत ॥ ६३ ॥ निरवद्यो रसः स्वामिन् । प्रसीदैनं गृहाण तत् ॥ इ-
त्युदीर्य प्रभोः पाणौ । स चिक्षेप रसं रसी ॥ ६४ ॥ अनल्पोऽपि प्रभोः पाणौ । दधाविक्षु-
रसः शिखां ॥ नाधोऽपतज्जिनजुषां । भवेन्नाधोगतिर्यतः ॥ ६५ ॥ तदा सुधारसमिव । रस-
माहृत्य विश्ववित् ॥ सप्तधातूंस्तपस्ताप–तप्तान्निरवापयत् ॥ ६६ ॥ सुगंधांबुपुष्पहेम्नां । वृष्टि-
र्दुदुभिनिःस्वनः ॥ चेलोत्क्षेपश्च पंचेति–बभूवुः पारणे प्रभोः ॥ ७० ॥ श्रेयांसः श्रेयसीभ-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्तिः । प्रभुपारणकावनौ ॥ नान्यः स्पृशत्विति धिया । रत्नपीठमकारयत् ॥ ७१ ॥ राधशुक्ले तृतीयायां । दानमासीत्तदक्षयं ॥ पर्वाक्षयतृतीयेति । तदद्यापि प्रवर्त्तते ॥ ७२ ॥ यथा विभोर्जगत्कर्म । प्रावर्त्तत हितं जने ॥ तथा सत्पात्रदानं हि । श्रेयांसाद्भुवि पप्रथे ॥ ७३ ॥ इत्थं श्रेयांसमुद्धृत्य । जगदुद्धारकारकः ॥ छद्मस्थो विजहाराथ । पुनः कर्मच्छिदे महीं ॥७४॥

भरतस्तु निजं राज्यं । पाति धर्मानुशासनात् ॥ दिने दिनेऽप्यद्भुतश्रीः । कुलमुद्योतयन्निजं ॥ ७५ ॥ स नित्यं तातपादाब्ज–सेवारसिकमानसः पितृप्रसूं भगवतीं । मरुदेवीं नमस्यति ॥ ७६ ॥ राज्याकृते सहस्राब्दे । भक्त्या नित्यमुपासितां ॥ जगाम भरतो नंतुं । मरुदेवां दिवामुखे ॥ ७७ ॥ नित्यं स्वपुत्रस्मरण–श्रवदश्रुसमाकुलां ॥ स्वनामग्राहपूर्वं तां । प्रणनाम स भक्तिमान् ॥ ७८ ॥ तस्याः पदाब्जे सोऽब्जाक्षो । भ्रमरभ्रांतिधारिभिः ॥ प्रमार्जयन् मूर्द्धजैः स्वै–मूर्द्धन्यो वसुधाभुजां ॥ ७९ ॥ इषत्प्रमार्ज्य नेत्राश्रू–एयुद्गिरंती मनःशुचं ॥ आशीःपूर्वमुवाचेदं । भरतं मरुदेव्यथ ॥ ८० ॥ वत्स मत्तनयः पश्य । सर्वमेकपदे ह्यदः ॥ त्यक्त्वा मां त्वामन्यसुतान् । बभूव मृगसार्थभृत् ॥ ८१ ॥ क्षुत्तृड्शीतातपग्लानि–क्लांतदेहो



For Private And Personal Use Only

दिवानिशं ॥ वनाद्वनं वायुरिव । बंभ्रमीति ममांगजः ॥ ८२ ॥ चंद्रचारु क्व तच्छत्रं । मुक्ता-
रत्नविभूषितं ॥ क्व च दावानलोदग्रं । तपनातपमंमुर्धं ॥ ८३ ॥ किन्नरीगीतझंकार–सारसं-
गीतकं कुतः ॥ कुतो वनांतसंचारा–न्मशकानां भणत्कृतिः ॥८४॥ क्व तद्वारणराजेन । च-
लनं नगरांतरा ॥ क्व कर्कराश्मदुःखेषु । नगेषु भ्रमणं प्रभोः ॥ ८५ ॥ अहं तु दुर्मरा पुत्र
–दुःखौघश्रवणादपि ॥ नो म्रिये जीवितं तन्मे । धिगस्तु जननिंदितं ॥ ८६ ॥ आकृष्टो रा-
ज्यसौख्येन । त्वं तु भोगैकलालसः ॥ मत्सूनोर्भ्रमतोऽरण्ये । वार्त्तामपि न पृच्छसि ॥ ८७ ॥
पितामहीमिदं दीना–क्षरं साश्रुमुखीं वचः ॥ गृणंतीं भरतः प्राह । स्मितविच्छुरिताधरः ॥
८८ ॥ त्रैलोक्याधिपतेर्धीर–गंभीरस्य प्रसूरसि ॥ मावोचः कातरेव त्व–मेव मातः पुनः पु-
नः ॥ ८९ ॥ संसारसागरे घोरे । शिलासंकाशशालिनः ॥ तदुत्तितीर्षुरस्मान्न किं । तात आ-
द्रियते मुधा ॥ ९० ॥ स्पृहयालुः परानंदं । तातः संसारसौख्यकं ॥ भंगुरं परिहर्त्तुं यः ।
स्वयं तपति सत्तपः ॥ ९१ ॥ संक्रंदनादयो देवाः । किंकरा इव यत्पुरः ॥ प्लवते स कथं
स्वामी । मादृशैरपि रक्ष्यतां ॥ ९२ ॥ त्रैलोक्याधिपतेर्लक्ष्मीं । तस्यालोकयसे यदा ॥ तदा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तपःफलं सत्यं । मन्यसे मातरुच्चकैः ॥ ९३ ॥

एवं निगदतस्तस्य । पाणी संयोज्य नक्तिमान् ॥ महीतलमिलन्मौलि–रवदद् द्वारपालकः ॥ ९४ ॥ तिष्ठतः पुरुषौ द्वारि । किंचिद्वक्तुमिहागतौ ॥ नाम्ना यमकशमका–वादिश प्रणतौ विभोः ॥ ९५ ॥ भूपन्नवाग्रचलना–नुमत्या नृपतेः स तौ ॥ प्रावेशयज्जयजये–त्युच्चरंतौ मुदोन्मदौ ॥ ९६ ॥ शमकस्त्वेतयोराद्यः । प्राह प्रणतिपूर्वकं ॥ दिष्ट्या यद्वर्द्धसे देव । तातकेवलवार्त्तया ॥ ९७ ॥ पुरे पुरिमतालाख्ये । कानने शकटानने ॥ इंद्रैः समवसरणं । व्यधायि त्रिजगत्प्रनोः ॥ ९८ ॥ सर्वदिग्न्यो नरा नार्यो । देवा देव्यश्च सर्वतः ॥ निजर्द्ध्या स्पर्द्धमानास्ते । मिथस्तत्राच्युपाययुः ॥ ९९ ॥ ततश्च यमकोऽप्युच्चैः । प्रणम्योवाच हर्षवान् ॥ देव स्फुरत्प्रनादीप्तं । रविबिंबमिवोज्ज्वलं ॥ १०० ॥ सहस्रारं स्फुलिंगालि–मालितं तूदपद्यत ॥ चक्ररत्नं वर्द्धसेऽतः । शस्त्रशालाधिदैवतं ॥ १ ॥ युग्मं ॥ राजा यथोचितं दानं । प्रदायेमौ विसृष्टवान् ॥ स्वयं तच्छ्रवणादेव । मुदमाप वचोऽतिगां ॥ २ ॥ किं पूर्वं केवलज्ञान–महश्चक्रमहोऽथ किं ॥ कार्यो दोलायितं चेत–स्तस्येति द्वयकाम्यया ॥ ३ ॥ क्व विश्वाज्ञ-

यदस्तातः । क्व चक्रं विश्वभीतिकृत् ॥ पूजाक्रमविचारोऽयं । मुधाधायि मयैतयोः ॥ ४ ॥
तत्कुर्वे केवलोत्पत्ति-महं पूर्वमहं विभोः ॥ इति निश्चित्य भरतो । मरुदेवीं व्यजिज्ञपत् ॥
॥ ५ ॥ त्वमादिशसि मातर्यत् । तनयो मेऽतिदुःखभाक् ॥ नित्यं वनांतसंचारी । क्षुत्तृट्ता-
पार्त्तिपीडितः ॥ ६ ॥ सुरासुरैः सेवितस्य । त्रैलोक्याश्चर्यकारिणीं ॥ स्वपुत्रस्य श्रियं पश्य ।
तदद्य तपसः फलं ॥ ७ ॥ इत्युक्त्वा प्राप्य तस्याः सो-ऽनुज्ञां विज्ञशिरोमणिः ॥ आरोहया-
मास गजे । तां तद्वाक्यप्रहर्षितां ॥ ८ ॥ तुंगैस्तुरंगैः सद्भोज्ञा-सज्जैः सोऽथ गजैरथैः ॥ प-
त्तिसार्थैः कृतेष्टार्थै-रचालीत्पृथिवीपतिः ॥ ९ ॥ स्वर्णवैडूर्यमाणिक्य-दसदंशुविचित्रितं ॥
सैन्यं भास्वच्छत्रकोटि । चपलाश्वमकार्यभूत् ॥ १० ॥ विविधोत्सवसोत्साह-पौरवृंदैर्वृतो नृ-
पः ॥ मरुदेवायुतोऽचाली-द्विभुं वंदितुमुद्यतः ॥ ११ ॥ अहं पूर्वमहं पूर्वं-वंदे तातं कृतत्वरैः
॥ इति कैश्चित्पुरोगाणां । प्रणुन्ना वारणादयः ॥ १२ ॥ अपथोऽपि तदा जातः । पंथा नाथा-
भियायिनां ॥ विभुभक्तिभृतां भावी । मुक्तिपंथाप्यवारितः ॥ १३ ॥ प्रतीक्षते न तातोऽपि ।
पुत्रं बंधुर्नबांधवं ॥ न स्वामी सेवकं सोऽपि । न स्वामिनमहो तदा ॥ १४ ॥ अदैन्यैः संवृ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तः सैन्यै–र्गजन् जवनवाजिभिः ॥ अद्राक्षीत्पुरतो रत्न–ध्वजमर्हत्त्वसूचकं ॥ १५ ॥ स शाल-
त्रयरत्नानां । चलाचलमहांशुभिः ॥ धर्मादित्योदयकृत–प्रत्यूषभ्रांतिमासवान् ॥ १६ ॥ अ-
वादीत् सम्मदी सोऽथ । मरुदेवीं महीपतिः ॥ प्रभोः समवसरणं । पुरतोंब निरूपय ॥१७॥
त्रैलोक्यवासिभिर्देवै–र्निर्मितं रत्नराजिभिः ॥ उद्यदंशुचयैर्दीव्यद्–द्युमणिश्रेणिसुंदरं ॥ १८ ॥
[illegible] ॥ इतो जयजयेत्युच्चै–स्तुमुलस्त्रिदिवौकसां ॥ श्रूयते श्रोतृश्रवण–प्रियः सेवामुपेयुषां
॥ १९ ॥ अयं रत्नध्वजः पंच–रूपरत्नप्रभांगुलिः ॥ एकं तातमिमं ख्यातुं । धर्मेणेवोच्छ्रितः
करः ॥ २० ॥ दिवि दुंदुभिरुद्भूत–नूतनारवरंगकृत् ॥ श्रूयते पुरतस्तात–गुणानिव गृणन्नयं॥
॥२१॥ रक्तः प्रभोर्गुणैरेव। मंजरीपिंजरीकृतः ॥ कंकेलिः पल्लवचयै–रयं नृत्यन्निवेक्ष्यते ॥२२॥
श्रुत्वेति मरुदेवापि । दुःखाश्रुस्त्रवणोद्भवां ॥ नेत्रयोर्नीलिकां हर्षा–श्रुभिर्मार्जयतिस्म
सा ॥ २३ ॥ यथा यथा सुरैः स्तूय–मानमानंदमेदुरैः ॥ साश्रुणोत्स्वसुतं तत्रै–वोल्लास
तथा तथा ॥ २४ ॥ सर्वातिशयसंपूर्णं । जिनं चित्ते जिनप्रसूः ॥ सुतप्रेम्णापि ध्यायंती ।
तन्मयत्वमवाप सा ॥ २५ ॥ व्यापारमखिलं देवी । विस्मृत्य भवसंभवं ॥ चिंतयंती जिनं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्राप । तन्मयत्वमिव क्षणात् ॥ २६ ॥ हृदये दृक्पुरः पार्श्वे । पश्चाद्वचसि सर्वतः ॥ अपश्य-
ज्जिनमेवासौ । शिवसौख्यनिबंधनं ॥ २७ ॥ आरूढा क्षपकश्रेणिं । कर्मक्षपणकारिणीं ॥ सा
नानाश्रुतविचारं । चैकश्रुतविचारकं ॥ २८ ॥ सूक्ष्मक्रियाऽनिवृत्तिं चैव । समुच्छिन्नक्रियं ततः ॥
यथाक्रमं शुक्लध्यान—मवाप मरुदेव्यथ ॥ २९ ॥ [redacted] ॥ अंतकृत्केवलित्वेन । कृत्वा कर्म-
क्षयं ततः ॥ स्वामिनी केवलोत्पत्तेः । समकालं शिवं ययौ ॥ ३० ॥ अकृत्वापि हि पुण्यानि ।
प्रांतकालेऽपि योऽर्हतः ॥ स्मरति स्नेहतोऽपि स्या—च्छिवगामी यथैव सा ॥ ३१ ॥ इतः सम-
वसरणा—दभ्येत्य सुरनायकाः ॥ सत्कृत्य स्वामिनीदेहं । न्यधुः क्षीरपयोनिधौ ॥ ३२ ॥ अ-
स्यामेवावसर्पिण्यां । प्रथमः केवलीत्वियं ॥ प्रथमः सिद्ध एवेति । गिरं ते प्राहुरुच्चकैः ॥३३॥
एवमाघोषणां कृत्वा । पुरस्कृत्य दिवौकसः ॥ भरतं स्वामिनः पार्श्वे । निन्युरश्रुजलाविलं॥
॥ ३४ ॥ संवीक्ष्य भरतो लक्ष्मीं । विभोर्देवोदितैरपि ॥ मुक्त्वा शुचं जिनं नंतु—मुत्सुकोऽ-
भून्महामनाः ॥ ३५ ॥ छत्रचामरमुख्यं च । विमुच्य नृपलक्षणं ॥ भक्त्या वैकक्ष्याक् प्रा-
प । पार्श्वे पूर्वविभोर्नृपः ॥ ३६ ॥ स्नात्वा वाप्यां धौतवस्त्रे । परिधाय महीपतिः ॥ पूर्वद्वारेण

॥१३५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समव–सरणं प्राविशत्ततः ॥ ३७ ॥ प्रदक्षिणां विश्वगुरो–र्विधाय विधिवन्नृपः ॥ ननाम क्षि-
तिविन्यस्त–मस्तकः स्वस्तिकारिणीं ॥ ३८ ॥ भक्त्योल्लसद्रोमराजि–कंचुकः फुल्ललोचनः ॥
उज्जगार हृदागारे । मुदोऽमांतीर्गिरच्छलात् ॥ ४१ ॥ स्वामिंस्त्रैलोक्यतिलक । युगादीश जि-
नेश्वर ॥ अनंताव्यक्तचिद्रूप । योगीश्वर नमोऽस्तु ते ॥४२॥ नाथावतीर्य संसारे । त्वयैकांतहि-
तेन च ॥ विश्वव्यवस्थामार्गोऽय–मारोपि बहुरूपभृत् ॥ ४३ ॥ अस्मानेव भवांभोधे–रुद्दिधी-
र्षुर्जगत्प्रभो ॥ मुक्तिमार्गं ज्ञापयितुं । संयमं प्राप्तवानसि ॥ ४४ ॥ विश्वेशस्त्वं दयालुस्त्वं ।
शरण्यस्त्वं शरीरिणां ॥ नाथामि भवतः किं यत् । प्रवृत्तस्तारणे स्वयं ॥ ४५ ॥

स्तुत्वेति जगतामीशं । भरतेशोऽपसृत्य च ॥ इंद्रमग्रेसरं कृत्वा । निषसाद विभोः पु-
रः ॥ ४६ ॥ ततो योजनगामिन्या । सर्वभाषासरूपया ॥ गिरारभत तत्वज्ञो । देशनां क्लेश-
नाशिनीं ॥ ४७ ॥ कार्या धर्मे रतिः पापे । विरक्तिश्च प्रयत्नतः ॥ इत्थं दिशति या पुंसां ।
देशना साभिधीयते ॥ ४८ ॥ पूजा जिनानां स्वगुरोः सपर्या । स्वाध्यायवृत्तिर्विशदं तपश्च ।
दानं दयासस्पृहिणां भवंति । कर्माण्यमूनि प्रतिवासरं षट् ॥ ४९ ॥ मातुः पितुर्निर्मलधर्मशा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्तु–र्भीतिदातुर्जलभोज्यदातुः ॥ कलोपकर्तुश्च पदारविंद–सेवाभिरिभ्यः शुभमाददीत ॥
॥ ५० ॥ सत्वानुकंपा शुभपात्रदानं । दीनात्मनामुद्धरणाय शुद्धिः ॥ यथोचितं सर्वजनो-
पकारः । संसारनिस्तारकरो हि धर्मः ॥ ५१ ॥ ज्ञानाभयौषधनिकेतनवस्त्रदानं । पूजार्हतां
शमवतां विनतिर्निजासु ॥ नारीषु तुष्टिरपरासु पराङ्मुखत्व–मेतन्नृणां भवति मंगलमक्षयं
हि ॥ ५२ ॥ पैशुन्यमात्सर्यपरस्वहार–विघातनिंदाकलहाशनानि ॥ कन्याद्यलीकानि च व-
र्जनीया–न्यतः परं पापकरं न किंचित् ॥ ५३ ॥ रत्नत्रयं कष्टमयद्गारिवारि । विचार्य गृह्णंत
इदं हृदंतः ॥ भवैस्त्रिभिः सिद्धिसुखं सुखेन । लभंते परिशुद्धभावाः ॥ ५४ ॥ इत्थं व-
चोऽमृतमुदारफलोपकार–कारि प्रभुर्भविकभूमिषु सोऽभिवृष्य ॥ पुण्यांबुदो विशदरत्नचयं च
पश्चा–द्वीजोपमं द्रुतमुवाप महाविभूत्यै ॥ ५५ ॥ श्रुत्वेति देशनां सम्यक् । पुण्यां भरतनं-
दनः ॥ उत्थाय ऋषभसेनः । स्वामिनं तं व्यजिज्ञपत् ॥ ५६ ॥ स्वामिन् मया भवारण्ये ।
भ्रमता भ्रांतचेतसा ॥ अकस्मात्सार्थपतिवत् । पुण्यैर्लब्धोऽसि तारय ॥ ५७ ॥ विषयेभ्यो
विरक्तस्य । कार्यं राज्येन मे न हि ॥ रागाद्याः शत्रवो यत्र । पुण्यकोशं हरंत्यमी ॥ ५८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संसारसागरे घोरे । भ्रमंतो ग्रासलोलुपाः ॥ धीवरा अपि बद्ध्यंते । भ्रातृपुत्रादिजालके ॥
॥ ५९ ॥ तत्त्वं शरण्य भगवन् । रक्ष मां व्रतदानतः ॥ नोचेदमीहि विषया-श्छलयिष्यंति
मां पुनः ॥ ६० ॥

इत्युदीर्य महाभक्त्या । जिनपादसरोरुहं ॥ भवतापोपशांत्यर्थं । मस्तके न्यस्तवानसौ
॥ ६१ ॥ तं भव्योऽयमिति ज्ञात्वा । स्वामी व्रतविधानतः ॥ अनुजग्राह संतो हि । परोपकार-
कराः सदा ॥ ६२ ॥ भरतस्यान्यपुत्राणा-मेकोनैः पंचभिः शतैः ॥ सप्तशत्या च पौत्राणां ।
तदा व्रतमुपाददे ॥ ६३ ॥ स्वामिनं सुरकोटीभिः । सेव्यमानं तदा तथा ॥ दृष्ट्वा मरीचिर्भ-
रत-तनयो व्रतमगृह्णात् ॥ ६४ ॥ आपृच्छ्य भरतं ब्राह्मी-व्रतमादित तत्क्षणं ॥ बह्वीभिर्नृपक-
न्याभिः । सममुज्ज्वलशीलभृत् ॥ ६५ ॥ जिघृक्षुः सुंदरी दीक्षां । भरतेन निवारिता ॥ प्र-
भोश्चतुर्विधे संघे । श्राविका प्रथमाभवत् ॥ ६६ ॥ सम्यक्त्वं भरतेशोऽपि । जग्राह स्वामि-
सन्निधौ ॥ निवर्त्तते भोगकर्म । नाभुक्त्वा शमिनामपि ॥ ६७ ॥ विद्याधरनरेष्वेके । तदानीं
जगृहुर्व्रतं ॥ श्रावकव्रतमन्ये तु । परे भद्रकभावतां ॥ ६८ ॥ ते तु कच्छमहाकच्छ-वर्जं राज-

॥१३८॥

For Private And Personal Use Only

न्यतापसाः॥ आगत्य स्वामिपादांते । मुदिता जगृहुर्व्रतं ॥ ६९ ॥ मुनयः पुंडरीकाद्याः । सा-
ध्व्यो ब्राह्मीपुरस्सराः ॥ श्रेयांसप्रमुखाः श्राद्धाः । श्राविकाः सुंदरीमुखाः ॥ ७० ॥ चतुर्वि-
धस्य संघस्य । स्थापनामित्यसूत्रयत् ॥ जगन्नाथोऽस्ति साद्यापि । नाज्ञा लंघ्या हि तादृशां
॥ ७१ ॥ युग्मं ॥ अर्हतामपि मान्योऽयं । पूज्यः पुण्यवतामपि ॥ सेव्यः सुरासुरेशानां ।
संघो जयति सर्वदा ॥ ७२ ॥ तदानीं चतुरशीते-र्गणभृन्नामकर्मणां ॥ व्रतीनां ऋषभसेन-
प्रभृतीनां सुमेधसां ॥ ७३ ॥ शक्रचक्रिमुखैः सर्वै-र्निर्ममे स्थापनामहः ॥ यथार्हं गणसंघ-
स्य । जिनाज्ञानुगतैरथ ॥ ७४ ॥ युग्मं ॥ पदत्रयीं प्रभोः प्राप्य । द्वादशांगीं गणेश्वराः ॥
प्रज्ञातिशयशालित्वा-द्रचयामासुराशु ते ॥ ७५ ॥ व्यवस्थाद्यापि सैवेयं । श्रीयुगादिजिनो-
दिता ॥ वर्त्ततेऽत्रार्हतामाज्ञा । दुर्लंघ्या हि विवेकिनां ॥ ७६ ॥ प्रणम्य सुरगंधर्व-विद्याधर-
नरेश्वराः ॥ ययुर्निजं निजं स्थानं । स्मरंतो जिनदेशनां ॥ ७७ ॥ भगवानप्यतिशयै-श्चतु-
स्त्रिंशन्मितैर्युतः ॥ विजहार धरापीठं । बोधयन् भविकान् जनान् ॥ ७८ ॥ एकत्रैव स्थिति-
भृतां । न परोपकृतिर्भवेत् ॥ इतीव त्रिजगत्स्वामी । नैकत्र स्थितिमाप्तवान् ॥ ७९ ॥

इतश्च भरतः पुण्य-निभृतः प्रणतो जनैः ॥ अयोध्यां विलसत्सौधा-मध्यास्त सपरिच्छदः ॥ ૮૦ ॥ उल्लसद्वैभवस्फाति-संभृतः शस्त्रसद्मनि ॥ जगाम चक्ररत्नस्य । दिदृक्षाप्रेरितस्ततः ॥ ૮૧ ॥ भास्वत्किरणमालाभि-र्मालितं रविबिंबवत् ॥ भद्योतयच्च तद्वेश्म । चक्ररत्नं ददर्श सः ॥ ૮૨ ॥ दर्शनादेव चक्रस्य । पंचांगप्रणतिं व्यधात् ॥ चक्रवर्त्ती क्षत्रियाणां । शस्त्रं यद्दैवतं परं ॥ ૮૨ ॥ विधाय शुचिभिस्तोयैः । स्नानमानंदमेदुरः ॥ सुगंधशुभ्रे धौते च । वाससी पर्यधत्त सः ॥ ૮૩ ॥ समागत्यायुधागारं । चक्री चक्रं करेऽकरोत् ॥ प्रमार्जयच्च पाणिभ्या-मुच्चैरुत्तेजयन्निव ॥ ૮૪ ॥ पीठे हिरण्मये चक्रं । निवेश्यारसहस्रभृत् ॥ सोऽस्मरद्रविबिंबस्यो-दयाद्रिशिखरस्थितेः ॥ ૮૫ ॥ अस्नप्यतामलजलै-स्तन्नृपेण स्वपाणिना ॥ समुद्भिन्नदूर्वाग्नि-निभमासीच्च तद्विधौ ॥ ૮૬ ॥ चंदनागुरुकर्पूर-कस्तूरीकुंकुमैरथ ॥ जयश्रियः प्रतिभुवो । ददौ चक्रे स हस्तकान् ॥ ૮૭ ॥ अखंडैस्तंदुलैः शुभ्रै-स्तस्याग्रे सोऽष्टमंगलीं । अमंडयद्धि सैवास्य । दात्री मंगलमालिकां ॥ ૮૮ ॥ वज्रवैडूर्यमाणिक्य-मुक्ताकर्केतनादिभिः ॥ स्वस्तिकं स्वस्तिकृत्स्वस्य । वितेनेऽस्य पुरो नृपः ॥ ૮૯ ॥ नीराजतां तस्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कर्त्तु–स्तमेव नृपतिं विना ॥ नोराजनामकार्षीच्च । सहमंगलदीपिकां ॥ ९० ॥ नमः प्रत्य-
हृयदेवाय । क्षत्राणां गुरवे च ते ॥ इत्युक्त्वा भरतो नूप–स्तन्ननामायुधाधिपं ॥ ९१ ॥ इत्य-
मष्टाह्निकां याव–दुपहारैर्मनोहरैः ॥ नित्यं नवनवैश्चक्रे । चक्री चक्रस्य चर्चनं ॥ ९२ ॥
ततो यक्षसहस्रेशा—धिष्ठितं दिव्यशक्तिभृत् ॥ सहस्रारं महाज्वाला–मालाभिरभिला-
लितं ॥ ९३ ॥ वर्तुलं व्योमसंचारि–दुष्टदैत्यारिसूदनं ॥ चक्रं भरतभूभर्तुः । प्रतापमिव दि-
द्युते ॥ ९४ ॥ [redacted] ॥ ततो मणिमये पीठे । मर्त्यामर्त्यप्रकल्पिते ॥ जयस्नानकृते चक्री ।
प्राङ्मुखो निषसाद सः ॥ ९५ ॥ ततः कापि कटाक्षांभः–संपृक्तमणिकुंभजैः ॥ तोयैः सि-
षेच द्विगुणै–रिव तं रूपरंजिता ॥ ९६ ॥ काप्युरोजन्मकुंभांत–र्विधृत्य कलशं शुभं ॥ द-
धुर्न हृदये योग्य–इत्यनामयदंशुला ॥ ९७ ॥ कलशं कर्णिकाकारं । स्वपाणिजलजन्मना ॥
आदाय कापि वामाक्षी । सिषेच भरतेश्वरं ॥ ९८ ॥ शिरो नोऽस्य पदासंगि–त्वस्यांभो भा-
रतं शिरः ॥ स्पृशतीति कृतः कुंभः । कया शिरसि सः स्वयं ॥ ९९ ॥ आतोद्यनादसन्मि-
श्रो । धवलध्वनिरुच्छलन् ॥ तदा मंडपमापूर्य । मुमूर्छ ककुभां मुखे ॥ १०० ॥ इत्थं जयज-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





याराव–पूर्वं पूर्वैः स चक्रनृत् ॥ सुस्नातो नास्वतो बिंब–मनुचक्रेऽधिकद्युतिः ॥ १ ॥ दधदुच्छु-
भ्राणि वासांसि । हेमद्युतिरन्नाद्विभुः ॥ आमेखलं शरन्मेघैः । सुमेरुरिव वेष्टितः ॥ २ ॥ म-
र्त्यंगं नूषितो नूरि–नूषणैर्नरतो विभुः ॥ वन्नासे जंगमः कल्प–विटपीव चरन् भुवि ॥ ३ ॥
पुष्पाक्षतस्तुतिमुखैः । पूजनैः प्रथमं जिनं ॥ आराधयद्धरानाथः । स्वन्नक्तिप्रेरितस्ततः ॥४॥
दत्वा दानं ततो मानं । भुक्त्वा च नरताधिपः ॥ दधत्तांबूलमास्थांत–रास्थानीमधिजग्मिवान्
॥ ५ ॥ चामराच्यां वीज्यमानः । छत्राछादितन्नास्करः ॥ स रराज निर्झराज्या–मिव वर्षा-
सु पर्वतः ॥ ६ ॥ सदैव संनिधानस्थै–र्नक्तैः षोमशन्निर्वृतः ॥ व्यराजत नृपो यक्ष–सहस्रैः
प्रौढविक्रमैः ॥ ७ ॥ अथायुधगृहाद्यक्ष–सहस्राश्रितमायुधं ॥ दिद्युते दिवि पूर्वाशा–न्निमुखं
यानसूचक्रं ॥ ८ ॥ प्रातर्नृपोऽथ सर्वांग–नक्षणाक्लृप्तसंपदं ॥ कुंन्निरत्नं यशोगौर–मारुरोह
शुन्नांशके ॥ ९ ॥ स गर्जन्नूर्जितं जात्य–कुंजरस्तत्क्षणादन्नूत् ॥ नद्दाममदधाराह्नि–र्धारा-
धर इवापरः ॥ १० ॥ नत्क्षिप्य पाणीन् कुर्वाणै–र्दिवं पल्लविताभिव ॥ युगपद्दंतिनां वृंदै—
श्चक्रे जयजयारवः ॥ ११ ॥ दुंदुन्निर्नादयामास । प्रयाणसमयोन्नवः ॥ दिशो दशापि संभू-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ठेन् । रोदसीकुहरांतरा ॥ १२ ॥ मांगल्यतूर्यनिर्घोषः । संक्षुब्धजनवनोदरः ॥ आहास्त सर्व-
सैन्यानि । द्रुतवत्सर्वदिग्गतिः ॥ १३ ॥ गजैर्क्षरन्मदचयैः । सप्रवाहैरिवाद्रिन्निः ॥ तुंगैस्तुरं-
गैस्तरलैः । कल्लोलैरिव वारिधेः ॥ १४ ॥ नदद्भिः स्यंदनैः प्रौढै–र्जंगमैरिव वेश्मन्निः ॥ पत्ति-
न्निर्वैरिनिर्घात–स्फुरद्भक्तिन्निरन्वितः ॥ १५ ॥

चचाल प्रथमं प्राचीं । प्राचीशसमविक्रमः ॥ रजोन्निश्छादयन् सैन्य–समुत्थैश्चंमरोचि-
षं ॥ १६ ॥ [redacted] ॥ वाजिरत्ने समारुह्य । दंमरत्नधरः पुरः ॥ नाम्ना सुषेणसेनानी
–रत्नं चक्रमिवाचलत् ॥ १७ ॥ प्रत्यूहव्यूहनाशाय । शांतिमंत्र इवांगवान् ॥ पुरोधारत्नम-
चल–ज्जिनं संपूज्य न्नक्तितः ॥ १८ ॥ जंगमा सत्रशालेव । कणाद्दिव्यान्नकारणं ॥ गृहिरत्न-
मचालीच्च । सैन्ये प्रत्याश्रयं किल ॥ १९ ॥ स्कंधावारादि निर्मातु–मलंकर्मीणविक्रमं ॥ च-
चाल विश्वकर्मेव । रत्नं वर्द्धकिसंज्ञकं ॥ २० ॥ चर्मछत्रखड्गरत्ना–न्याश्रितानि सुरासुरैः ॥ र-
त्ने च मणिकाकिण्यौ । चक्रिणा प्राचलत्समं ॥ २१ ॥ कोन्नयन् सैन्यनिर्घातैः । कोणीं को-
णीधवोऽपि सन् ॥ क्वचिदन्येषु सोत्कंठा । स्यादियं मन्युनेति किं ॥ २२ ॥ अस्थिरायां स्थि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रत्वं वा–चलेषु चलतां तथा ॥ कुर्वन् जरतजूपाल–श्चचाल बलवद्बलैः ॥ २१ ॥ [illegible] ॥ अ-
करोद्भरतश्चक्री । प्रयाणं योजनावधि ॥ प्रत्यहं शात्रवप्राण–प्रयाणं चक्रपृष्ठगः ॥ २४ ॥ न्य-
वेशयद्यत्र सैन्यं । वर्धकिर्दिव्यशक्तिज्ञिः ॥ निर्ममे तत्र वासादीन् । पुरवत्तत्क्षणादपि ॥२५॥
चक्रिणः शिबिरे तस्मिं–श्चत्वराणि त्रिकाणि च ॥ अयोध्यावच्चिद्व्यिशाला । वजूवापणवी-
थिका ॥ २२ ॥ मार्गे देशाधिपाः सर्वे । गजाश्वाद्युपदाजृतः ॥ नेमुर्विनयनम्रांगा । जरतं सु-
रसेवितं ॥ २१ ॥ रोदसीं क्षोजयन्नेवं । सैन्यसंघातमर्द्दनात् ॥ दिनैः कतिपयैः प्राप । स तीर्थं
मागधाज्ञिधं ॥ २४ ॥ पूर्वाब्धे रोधसि नव–योजनायामविस्तृतं ॥ द्वादशयोजनं दैर्घ्यं । स्कं-
धावारं न्यवेशयत् ॥ २५ ॥ वर्द्धकिः सैन्यनिलया–नयोध्यावच्चिनिर्ममे ॥ एकां पौषधशालां
च । विशालां रत्नराजिज्ञिः ॥ २६ ॥ अवातरत्ततस्तत्र । कुंजराद्राजकुंजरः ॥ केसरीव न-
गोत्तंगा–दुदयाद्रेरिवार्यमा ॥ २७ ॥ राजा पौषधशालायां । दर्ज्नसंस्तारकं नवं ॥ संस्तारया-
मास निज–कार्यारंजकृते कृती ॥ २७ ॥ न्यस्ताजरणस्रक्पट्ट–दुकूलः श्वेतवाससी ॥ बिज्रा-
णो मागधं देव–मनु पौषधमगृह्णीत ॥ २७ ॥ शुद्धसंस्तारके तस्मिन् । निषण्णः सोऽष्टमं त-



For Private And Personal Use Only

पः ॥ चक्रे मुनिरिव त्यक्त—सर्वसावद्यकारणः ॥ ३० ॥ अष्टमांते नृपः पूर्ण—पौषधो पौषधौ-
कसः ॥ शरदभ्रादिवादित्यो । निर्ययावधिकद्युतिः ॥ ३१ ॥

यथाविधिकृतस्नानो । जिनमानर्च्य चक्रिराट् ॥ निःशेषक्षुद्रदेवानां । प्रीतये च बलिं व्य-
धात् ॥ ३२ ॥ उद्यत्पताकं दिव्यास्त्र—श्रेणिभिः शस्त्रधामवत् ॥ आह्वयंतं दशदिशां । लक्ष्मीं
घंटारणत्कृतैः ॥३३॥ युक्तं तु तुरगैर्वल्गा—कृष्टास्यैर्गरुत्मैरिव ॥ प्रसन्नैर्वैरिदर्पाढ्हिं । रथमध्या-
स्त भूपतिः ॥ ३४ ॥ [illegible] ॥ मातलिर्वासवस्येव । तीक्ष्णरश्मेरिवारुणः ॥ भावविन्नृपतेरा-
सीत् । सारथिस्तस्य संगरः ॥ ३५ ॥ रश्मिचालनमात्रेणो—त्पतंतः पूर्वसागरं ॥ निन्युर्हया
रयाद्भूप—मुदयायेव भास्करं ॥३६॥ तीरद्रुमपतत्पत्रं । निर्घोषत्रस्तनक्रकं ॥ नाभिदघ्नं रथेनां-
भः—सोऽभ्यगाहत वारिधेः ॥ ३७ ॥ वरूवांगजवातेन । वरूवानलशंकिना ॥ निर्घोषेणापि सं-
क्षुब्धं । तदा जलधिनामुना ॥ ३८ ॥ धनदेनाश्रितं मध्ये । वासवेनाटवीतटे ॥ पंचमींदुसमं
चक्रे । सोऽधिज्यं च शरासनं ॥ ३९ ॥ रिपुप्राणप्रयाणार्थं । पटहध्वनिसोदरं ॥ धनुर्वेदोंका-
रमिवा—कृष्य किंचिच्छरासनं ॥ ४० ॥ संक्षुब्धलवणांभोधिं । स्फुटत्सैकतपर्वतं ॥ त्रस्यन्नक्रं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स टंकार—मकारयदिलाविभुः ॥४१॥ [illegible]॥ अमंदमंदरभ्राम्य—दंभोधिरवनिष्टुरं ॥ टंकारं ध-
नुषः श्रुत्वा। चुक्षुभे त्रिजगन्मनः ॥ ४२ ॥ प्रत्यासत्त्या रवेस्तस्य—ऽष्याष्टंकारतस्ततः ॥ उ-
न्मार्गगमनोदेक—मतश्वक्रमभंक्त तत् ॥ ४३ ॥ बाधिर्यं टंकृतेः प्राप्य। कर्णेषु किल तद्विधं ॥
तदादि चक्षुःश्रवसो। विख्यातास्तेन पन्नगाः ॥ ४४ ॥ बिलादिवेषुधेर्बाणं। भुजंगमिव भी-
षणं ॥ सुरासुरक्षोभकर—माचकर्ष महीश्वरः ॥ ४५ ॥ सिंहकर्णिकया मुष्ट्या। निजनामां-
कितं शरं ॥ सिंजिन्यां निदधे वज्र—ईंद्रवद्रिपुराजिषु ॥ ४६ ॥ रथे वीरावतंसोऽयं। मेरौ
चंद्रमरीचिवत् ॥ शुशुभे बाणकिरणैः। शोषयन् वैरिपल्वलं ॥ ४७ ॥ शिलीमुखं शत्रुमखं।
नखांशुकवचोज्ज्वलं ॥ कर्णाभ्यर्णं महीजानि—रानिनाय सपक्षकं ॥ ४८ ॥ आकुंचितैकपा-
देन। तूणाभ्यां पक्षमानिव ॥ तीक्ष्णबाणाग्रचंचूवान्। गुरुत्मानिव तर्कितः ॥ ४९ ॥ शो-
षयिष्यति मामेष। उद्दिधीर्षति मामितः ॥ किमित्याशंकयत तदा। वीक्ष्य पाथोनिधिर्नृपं
॥ ५० ॥ दिक् पूर्वा पूर्ववद्वीक्ष्य। बिभ्यती पूर्वपर्वतं ॥ अंतरा निदधे मुग्धा। तद्बाणौजो
न जानती ॥ ५१ ॥ वह्निः—पुंखाग्रमध्येषु। नागासुरगरुत्मभिः ॥ श्रितमप्यविकुंठं य—द्धि-



For Private And Personal Use Only

ससर्ज नृपः शरं ॥ ५२ ॥ तमिषुं वीक्ष्य यत् क्षुब्ध–स्तदा स लवणांबुधिः ॥ अद्यापि हि
तदन्यस्तं । स्मरत्येष चलोर्मिभिः ॥ ५३ ॥ वज्रपाणेः कराद्वज्रं । किमन्येति क्रुधा पुनः ॥
इत्याशंकितमालोक्य । पर्वतैरपि तोयगैः ॥ ५४ ॥ उत्सालयन् जलनिधे–र्जलमाकाशगामि-
नः । विद्याधरानभिन्नया–त्रासयन्नतिवेगवान् ॥ ५५ ॥ नीले विहायसि कर–न्निव सौवर्ण-
मात्मनः ॥ विद्युद्दंड इवोद्दंडो । धराखंडलमोचितः ॥ ५६ ॥ योजनानि द्वादशापि । व्यति-
क्रम्य स मार्गणः ॥ सभायां मागधेशस्य । हृदि शल्यमिवापतत् ॥ ५७ ॥ [redacted] ॥

सहसा शरसंपात–संघट्टनसमुद्भवः ॥ रत्नसिंहासनाद्वह्निः । स्फुलिंगान् सर्वतोऽमुचत्
॥ ५८ ॥ स एव तस्य क्रोधाग्ने–रुपादानपदं दधौ ॥ तद्राज्यद्रुममूलाग्नि–रशंकि तु सुरैरयं ॥
॥ ५९ ॥ तन्निरीक्ष्य क्षणं संस–दभूदालेख्यगेव सा ॥ बाणपक्षानिलातेन । चित्तदीपोऽच-
लत्परं ॥ ६० ॥ नर्त्तयन् नासिकां कुर्वन् । गुंजापुंजारुणेक्षणे ॥ भ्रमितभ्रूः स्वकोपड्डुं । वि-
पल्लवमिव सृजन् ॥ ६१ ॥ वलित्रयं त्रिधा कोप–सूचकं सोऽलके दधत् ॥ स्फुरदोष्टपुटः को-
पा–च्चकर्षायुधमुच्चकैः ॥ ६२ ॥ [redacted] ॥ उवाच च स्वकोपाग्नि–ज्वालामालानुकारिणीं ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वाचं विपैकसध्रीची–मुच्चैर्गर्वादखर्वितः ॥ ६३ ॥ ज्वलनं पाणिना धर्तुं । हर्त्तुं को दिग्गजाद्-
दान् ॥ शेषाहिमस्तकस्थाष्णु–मणिमाहर्त्तुमुद्यतः ॥ ६४ ॥ कुंतेन निशिताग्रेण । कः कंडू-
यितुमिछति ॥ स्वचक्षुषी मृगरिपोः । केसरान् को हि वांछति ॥ ६५ ॥ कः क्षेप्तुमुत्सुको
भ्राम्य–द्दरघट्टांतरं क्रमौ ॥ मत्संसदि कुधीः कोऽयं । चिक्षेप निजसायकं ॥६६॥ [illegible]-
षकं॥ इत्युदीर्य महावीर्य । ऊर्जितं चार्जुयन् रुषं ॥ आहत्य वामहस्तेना–सनं वैरिकपोल-
वत् ॥ ६७ ॥ फूत्कारं सर्पवत् कुर्वन् । मोटयन्नंगमात्मनः ॥ सिंहासनात्सहसैवो–दतिष्टत्स
षटिष्टगीः ॥ ६८ ॥ [illegible] ॥ परिवारोऽपि हि कोपेन । ज्वलंस्तद्दवारितः ॥ उत्तस्थौ न्नास्क-
रमनु–किरणौघश्चलत्यपि ॥ ६९ ॥ अनर्त्तयन् केऽपि खड्गान् । कोपद्रोः पल्लवानिव ॥ केतू-
दलासयन् कुंतान् । शल्यानिव रिपूरसः ॥७०॥ मुद्गरान् भ्रामयामासु–रुल्लिखंत इवांबरं ॥
अधिज्यांश्चक्रिरे केऽपि । कोदंडांश्च यमभ्रुवः ॥ ७१ ॥ जगृहुः केऽपि वज्राणि । स्तबकानीव
संक्रुधः ॥ शूलान्याददिरे केऽपि । कुर्वंतो दंतुरं नन्नः ॥ ७२ ॥ भुजास्फोटं परे चक्रुः ।
स्फोटयंतोऽपि रोदसीं ॥ क्ष्वेडानादं व्यधुः केऽपि । मेघनादानुकारिणः ॥ ७३ ॥ हन्यतां ह-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्यतामेष । ध्रियतां ध्रियतामसौ ॥ प्रभुं नो दुर्विनीतो यो । द्वेष्टि घूक इवारुणं ॥ ७४ ॥ इ-
त्यासीत्परिवाराणां । समं कोलाहलो महान् ॥ प्रलयोद्भ्रांतपाथोधि—ध्वानशोभानुकारवान्
॥ ७५ ॥ इतस्तत्सचिवः सम्यग् । बाणमासाद्य भारतं ॥ अवाचयच्च तद्वर्णान् । क्रोधाहि-
शममंत्रवत् ॥ ७६ ॥ राज्येन यदि वा कार्यं । जीवितव्येन वा सुराः ॥ तदा सेवां कुरुध्वं
नः । स्वसर्वस्वौपढौकनात् ॥ ७७ ॥ इत्यादिशति वः साक्षात् । सुरासुरनरेशितुः ॥ ऋषभ-
स्वामिनः सूनु—र्भरतश्चक्रवर्त्ययं ॥ ७८ ॥ युग्मं ॥ इत्यक्षराणि दृष्ट्वासौ । विज्ञायावधिना च
तत् ॥ दर्शयन् स्वामिने बाण—मुच्चैरित्यवदत्ततः ॥ ७९ ॥ अहो शृणुत राजन्या । धिग्वो
रभसकारिणः ॥ स्वामिनो हितचिंताभि—रहितं कर्त्तुमुद्यताः ॥ ८० ॥ भरतो भरतक्षेत्रे । प्र-
थमश्चक्रवर्त्यभूत् ॥ प्रथमार्हत्सूनुरसौ । रिपुसोमविधुंतुदः ॥ ८१ ॥ तोलितुं शक्यते मेरु—
रुध्रियेत वसुंधरा ॥ शोष्यते लवणांभोधि—श्चक्री नो जीयते पुनः ॥ ८२ ॥ एष वो याचते
दंडं । शक्रवच्चंडशासनः ॥ दिधारयिषते वस्तु । स्वाज्ञां मान्यां सुरासुरैः ॥ ८३ ॥ यथा देवे-
षु सर्वज्ञो । जिन एव परो न हि ॥ चक्री नरेष्वपि तथा । शक्रीभूतः स्वशक्तिभिः ॥ ८४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



घटते सर्वथैवात्र । विनयो नयशालिनां ॥ न कार्या युद्धवार्त्तापि । कालरात्रिरिवात्मनः ॥
॥ ८५ ॥ निवार्यतामयं लोकः । स्वामिन् स्तोकमतिश्चलः ॥ खद्योतवद्दिवानाथे । हेष्टि य-
श्चक्रिणि क्रुधा ॥ ८६ ॥ प्रगुणीकुरुत तद्दंर्ड । चक्रिणे प्रणतो जव ॥ गर्वः सर्वस्वनाशाय ।
स्यादयं हृदयं दहन् ॥ ८७ ॥ निशम्य सचिवाद्वाणीं । दृष्ट्वा तान्यक्षराण्यपि ॥ परमेष्ठिस्मृ-
तेः पाप–मिव कोपोऽस्य निर्ययौ ॥ ८८ ॥ उपायनमुपादाय । मंत्रिणा सह तं शरं ॥ नत्वा
च मागधाधीश–श्चक्रिणं तं व्यजिज्ञपत् ॥ ८९ ॥ दिष्ट्याद्य दृक्पथं प्राप्तः । स्वामिंस्त्वं मे-
ऽतिवत्सलः ॥ घनांजश्चातकस्येव । चिरमुत्कस्य तृष्णया ॥ ९० ॥ उदिते त्वयि नाथेऽद्य ।
सनाथा वयमुच्चकैः ॥ पद्माकरास्तीक्ष्णकरे । पुष्णंति हि सुसंपदः ॥ ९१ ॥ सुस्वामिना कु-
र्विनीते । प्राक् प्रैषि मयि सायकः ॥ कर्त्तव्यज्ञापनायेव । प्रमत्ते वेत्रिवत्त्वया ॥ ९२ ॥ रवेः
प्रत्यपरं तेजो । वायोः प्रत्यपरो जवी ॥ मेरोः प्रत्यपरः शैलः । प्रतिमल्लस्तथा तव ॥ ९३ ॥
प्रमादतो मया यत्त्वं । शीघ्रं नाराधितः प्रभुः ॥ तत्प्रसीद मयि स्वामिन् । संतो हि नतव-
त्सलाः ॥ ९४ ॥ अतः परमहं नाथ । त्वत्पादांबुजषट्पदः ॥ जिनाशिषमिवाज्ञां ते । धार-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यिष्यामि मूर्द्धनि ॥ ९५ ॥ स्वामिन् मागधतीर्थेऽस्मिन् । स्थास्याम्यारोपितस्त्वया ॥ जयस्तंभ इव प्राच्यां । पूर्वैः परमभक्तिभाक् ॥ ९६ ॥ एते वयमिदं राज्यं । भृत्या एते श्रियो ह्यमूः ॥ तवैव स्वाधिनाः स्वामिन् । कर्त्तव्ये पूर्वपत्तिवत् ॥ ९७ ॥ इत्युदीर्य सुरो हारं । किरीटं कुंमले शरं ॥ तं च मागधतीर्थोन्नः । सोऽर्पयामास चक्रिणं ॥ ९८ ॥ पूर्वोपार्जितरत्नानि । मौक्तिकानि मणीनपि ॥ अन्यानि दिव्यवस्तूनि । सोऽदाच्छ्रीभरतेशितुः ॥ ९९ ॥ सत्रं प्रसाददानैस्तं । भूरतो भरताधिपः ॥ अनुजग्राह भृत्येषु । विससर्ज च मागधं ॥ ४०० ॥

अथो रथं वालयित्वा । पथा तेनैव पार्थिवः ॥ सैन्यं निजमगाच्छक्र । इव त्रिदिवमागतः ॥ १ ॥ अवरुह्य रथाच्चक्री । कृतस्नानो यथाविधि ॥ चकाराष्टमभक्तांते । पारणं सपरिच्छदः ॥ २ ॥ अष्टाह्निकामहं चक्रे । चक्ररत्नस्य चक्रिराट् ॥ मागधस्य महर्द्धि तां । तस्यैवोपनयन्निव ॥ ३ ॥ तेजोभिर्दीप्यमानं तत् । समंताद्रविबिंबवत् ॥ चचाल चक्ररत्नं खे--ऽष्टाह्निकापर्वणस्ततः ॥ ४ ॥ उन्नतान्नामयन्नम्रान् । स्थापयन् गर्वपर्वतान् ॥ दलयन्नुद्धरन् दीनान् । गृह्णंस्तेभ्यश्च ढौकनं ॥ ५ ॥ कुर्वन् प्रयाणं चक्रानु--गतो योजनमात्रकं ॥ दिव्यशक्त्या-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्वितश्चक्री । प्रापद्दक्षिणसागरं ॥ ६ ॥ एलालवंगलवली—कंकोलक्रमुकीवने ॥ दक्षिणोदधितीरेऽसौ, । स्कंधावारं न्यवेशयत् ॥ ७ ॥ तत्रापि वार्द्धकिः पूर्व—वदसूत्रयदाशु च ॥ स्कंधावारनिवेशादि । पौषधागारमुत्तमं ॥ ८ ॥ कृत्वा तं वरदामाख्यं । मुख्यश्चक्री स्वमानसे ॥ सपौषधोऽष्टमं भक्तं । तपश्चक्रेऽर्थसाधकं ॥ ९ ॥ कृत्वा बलिविधिं तत्र । रथमारुह्य हेमजं ॥ बिभ्रत्कोदंडमुद्दंडं । पाथोधेस्तटमाप सः ॥ १० ॥ रथांगनाभिदघ्नं सं—विगाह्यांभोबुधेर्नृपः ॥ आकर्णाकृष्टकोदंडः । सोऽमुंचद्दिव्यसायकं ॥ ११ ॥ द्योतयन् ककुभां भागं । सुवर्णाकरभृद्वरः ॥ पपात तस्य सदसि । गत्वा द्वादशयोजनीं ॥ १२ ॥ अकांडकांडपातेन । चंडघातेन नागवत् ॥ चुकोप वरदामाख्यो । जगर्जाथ स वार्द्धिवत् ॥ १३ ॥ अवारः परिवारोऽपि । समारोपितमत्सरः ॥ आयुधान् प्रगुणीचक्रे । स्वाम्यंश इव तद्विधः ॥ १४ ॥ दृष्ट्वा सायकवर्णानि । मत्वा चक्रिणमागतं ॥ उपायनानि बाणं च । समादायाथ सोऽचलत् ॥१५॥ विनयाद्वरदामस्य । तुतोष भरतेश्वरः ॥ प्रणिपातावधिः कोपः । प्रायः स्यान्महतां यतः ॥१६॥ तत्रारोप्य स्थिरं शैल—मिवैनं चक्रनायकः ॥ पश्चा तेनैव ववले । पूर्णमानो मृगारिवत् ॥ १७ ॥



For Private And Personal Use Only

चक्री चक्रमथ प्राप्य । तपसः पारणं व्यधात् ॥ अष्टाह्निकामहं चापि । चक्ररत्नस्य पू-
र्ववत् ॥ १८ ॥ उज्ज्वालयन् रिपुचयां–स्तुषानिव महाबलः ॥ सुरासुरैर्नम्यमानः । सर्वज्ञ इव
सर्वतः ॥ १९ ॥ भरतः पाशुपतिव–ज्जगतो जीवनप्रदः ॥ चक्रानुगः क्रमात्प्राप । प्रतीची-
सिंधुसैकतं ॥ २० ॥ [illegible] ॥ विधाय पूर्ववच्चक्री । तपः स्यंदनमास्थितः ॥ मुमोच बाणं स
प्राप । प्रभासेशस्य संसदं ॥ २१ ॥ बाणाक्षराक्रांतक्रोध–स्तमिषुमुपदासमं ॥ आदाय भरतं
प्राप्य । नत्वा चैवं व्यजिज्ञपत् ॥ २२ ॥ निःस्वामिकेन दृष्टोऽसि । मया स्वामी स्वपुण्यतः ॥
सामंतमात्रोऽहमिह । स्थास्यामि तव शासनात् ॥ २३ ॥ इत्युदीर्य शरं तं च । चूडामणि-
मुरोमणिं ॥ कटकानि कटीसूत्रं । सोऽदाद्भरतचक्रिणे ॥ २४ ॥ तत्पाणौ हेमकुंभस्थं । वारि
वीक्ष्य नृपोऽवदत् ॥ प्रभासेशात्र किं तिष्ठे–ज्ज्ञापितं जीववत्त्वया ॥ २५ ॥ ततो जगाद स
सुरः । स्वामिन् श्रुणु कथानकं ॥ सुराष्ट्रमंडले तीर्थ–मस्ति शत्रुंजयाभिधं ॥ २६ ॥ अनंत-
महिमापूर्ण–मनंतसुकृतास्पदं ॥ नानारत्नौषधीकुंड–रसकूपीमहर्द्धिमत् ॥ २७ ॥ दर्शनाच्छ्र-
वणात्स्पर्शात् । कीर्त्तनादपि पापहृत् ॥ स्वर्गापवर्गसौख्यानि । दत्ते यत्प्राणिनां क्षणात् ॥

॥१५३॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ २८ ॥ त्रिभिर्विशेषकं ॥

तीर्थभूतपुराराम–नगदेशादिभूमिषु ॥ शत्रुंजयसमं तीर्थं । नास्ति त्रैलोक्यपावनं ॥
॥ २९ ॥ अन्यतीर्थेषु यद्यात्रा–शतैः पुण्यं भवेन्नृणां ॥ तदेकयात्रया पुण्यं । शत्रुंजयमहागि-
रौ ॥ ३० ॥ तस्यांतर्दक्षिणे देशे । नदी शत्रुंजयाभिधा ॥ सत्प्रभावा जलापूर्णा–स्त्यर्हच्चैत्या-
तिमंडिता ॥ ३१ ॥ शत्रुंजया पवित्रेयं । विशेषात्तीर्थसंगता ॥ गंगासिंधुनदीदिव्य–जलाधिक-
फलप्रदा ॥ ३२ ॥ या स्नानिनां जलस्पर्शा–त्सर्वपापं व्यपोहति ॥ वेणीवत्पुण्यतीर्थस्य । क-
मलोत्कर राजिता ॥ ३३ ॥ या पूर्ववाहिनी गंगे–वापूर्वसुकृतैकभूः ॥ नानाह्रदप्रभावाढ्या ।
बहुचित्रकरा नदी ॥ ३४ ॥ शत्रुंजया जाह्नवी च । पुंडरीकिण्यथ प्रभो ॥ पापंकषा तीर्थभू-
मि–हंसीति कथितास्ति या ॥ ३५ ॥ कादंबकपुंडरीक–शीर्षयोरंतरा ह्रदः ॥ तस्यामुच्चप्रभा-
वाढ्यो । विद्यते कमलाभिधः ॥ ३६ ॥ ह्रदस्यास्य मृदो लात्वा । पिंडीकृत्य च तज्जलैः ॥
बद्धाश्चक्षुषि तद्योगात् । घ्नंति दोषांध्यनीलिकाः ॥ ३७ ॥ स्वामिन् पयस्तु तस्येदं । कांतिकी-
र्त्तिमतिप्रदं ॥ शाकिनीभूतवेताल–वातपित्तादिदोषहृत् ॥ ३८ ॥ तद्भवानुपसर्गान् । हंति स्प-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शार्दिमात्रतः ॥ हृदोऽत्रेऽस्मिन् पयसि । न भवेज्जीवसंभवः ॥ ३९ ॥ प्रत्यक्षं पुंमरीकं तत्
। तीर्थं नंतुं व्रजाम्यहं ॥ वेश्मार्हतां स्नानकृते—ऽप्यानयामि हृदाज्जलं ॥ ४० ॥ निःशेषरिपु-
नाशाय । रक्षितं तु मया ह्रदः ॥ स्वस्वामिने प्रीतिकरं । वस्तु देयमिति प्रभो ॥ ४१ ॥ ढौ
कितं तदिदं वारि । स्वामी रक्षतु यत्नतः ॥ तत्तद्दिग्जययात्रायै । भावि यत्सर्वदोषहृत् ॥ ४२॥
[redacted] ॥ तदुक्तिमित्यसौ श्रुत्वा । स्पृहयालुर्नराधिपः ॥ तत्कल्पितविमानेन । ययौ शत्रुंजयं
गिरिं ॥ ४३ ॥ स्नात्वा शत्रुंजयायां च । स्पृष्ट्वा तत्तीर्थमुत्तमं ॥ पुनर्वेगिविमानेन । चक्री
शिबिरमासवान् ॥ ४४ ॥ ततः प्रीत्या प्रभासेशं । पुनराश्वास्य भूपतिः ॥ तत्रैवारोपयामास ।
पादपं स्थानके यथा ॥ ४५ ॥ तत्कालोपनतैर्दिव्यै—र्भोज्यैः कल्पद्रुमोपमैः ॥ गृहीरत्नं महो-
भर्तुः । पारणं निरमापयत् ॥ ४६ ॥ अष्टाह्निकामहं कृत्वा । प्रभासंप्रति भूपतिः ॥ अनुसू-
र्यमिवालोको । ययौ चक्रानुगस्ततः ॥ ४७ ॥ चक्री सिंधोर्महासिं-
धो—र्दक्षिणं प्राप्य सैकतं ॥ पूर्वाभिमुखमागत्य । स्कंधावारं न्यवीविशत् ॥ ४८ ॥ तपोऽष्ट-
मं व्यधात्तत्र । चित्ते सिंधुं विधाय सः ॥ चकंपे चासनं तस्या—श्चलद्वाताद्दतोर्मिवत् ॥ ४९॥



For Private And Personal Use Only

जज्ञे सावधिना तत्र । समायातं च चक्रिणं ॥ उपायनमुपादाय । तदायासीत्तमर्चितुं ॥५०॥
दत्वाशिषं जयजये—त्युच्चैः सोवाच खेगता ॥ किंकरीव तव स्वामिन् । करवाणि किमा
दिश ॥ ५१ ॥

इत्युदीर्य महातेज—स्तिरस्कृततमोभरं ॥ अष्टोत्तरं रत्नकुंभ—सहस्रं चक्रिणे ददौ ॥५२॥
रत्नसिंहासनेदिव्ये । किरीटं बाहुरक्षकान् ॥ कटकांश्च महाहारान् । मृदूनि वसनानि च ॥
॥ ५३ ॥ [illegible] ॥ तत्सर्वं प्रतिजग्राह । सिंधोस्तां विससर्ज च ॥ चकाराष्टमभक्तांते । पा-
रणं भूभुजां विभुः ॥ ५४ ॥ तत्राप्यसौ सिंधुदेव्या । विदधेऽष्टाह्निकोत्सवः ॥ चचाल चक्रर-
त्नेन । दर्श्यमानपथो नृपः ॥ ५५ ॥ दिशोदकपूर्वया गच्छन् । क्रमेण भरतेश्वरः ॥ भरतार्ध-
द्वयाघाटं । प्राप वैताढ्यपर्वतं ॥ ५६ ॥ उच्चैर्गिरियोंजनानां । वैताढ्यः पंचविंशतिः ॥ राजतो
ददृशे तेन । विस्तारे द्विगुणस्ततः ॥ ५७ ॥ जिनचैत्यैर्महोद्यानै—र्विद्याधरसुरालयैः ॥ सरो-
भिर्ग्रामनगरैश्च । पर्वतः स विभासते ॥ ५८ ॥ नितंबे दक्षिणे तस्य । स्कंधावारं निवेश्य सः
॥ चकाराष्टमभक्तं च । कृत्वा मनसि तद्विभुं ॥ ५९ ॥ वैताढ्याद्रिकुमारस्या—कंपिष्ट किल

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 

विष्टरं ॥ अज्ञासीच्चक्रिणमित—मवधिज्ञानतः सुरः ॥ ६० ॥ अथाज्यगात्स जरत—मब्रवीच्चां-
वरस्थितः ॥ जय स्वामिन् किंकरस्ते । साधि मां पूर्वभक्तवत् ॥ ६१ ॥ इत्युदीर्य मणीनेव ।
रत्नालंकरणानि च ॥ भद्रासनानि भद्राणि । देवदूष्याणि भक्तितः ॥ ६२ ॥ राज्ञे विश्राण-
यामास । सोऽगृहीच्च तदर्पितं ॥ आश्वास्यैनं च तदानै—स्तत्रैवास्थापयद्विभुः ॥ ६३ ॥ [redacted] ॥
चकाराष्टमभक्तांते । पारणं पृथिवीपतिः ॥ अथाच्च वैताढ्यगिरि—देवस्याष्टाह्निकोत्सवं ॥६४॥
गुहां तमिस्रां चक्रानु—पदं प्राप्य महीपतिः ॥ न्यवेशयच्च कटकं । तदुपांते मनोरमे ॥६५॥
कृत्वा मनसि भूपालः । कृतमालं तपोऽकरोत् ॥ चकंपे चासनं तस्या—ज्ञासीच्चैनमुपागतं ॥
॥ ६६ ॥ तमर्चितुं रत्नचयै—राजगाम ननाम च ॥ स्वामिंस्तमिस्राद्वारेऽस्मिन् । द्वारपाल
इवास्मि ते ॥ ६७ ॥ इति ब्रुवन् महीभर्तु—र्दिव्याभरणसंचयं ॥ स्त्रीरत्नयोग्यं तिलक—चतु-
र्दशमनुत्तरं ॥ ६८ ॥ तद्योग्यानि च माल्यानि । दिव्यानि वसनानि च ॥ सोऽदाद्राज्ञे धारि-
तानि । प्राक् तदर्थमिवाददत् ॥ ६९ ॥ [redacted] ॥ सप्रसादं महीशेन । नियुक्तः स
ययौ सुरः ॥ चक्री नरेंद्रैः सहितः । पारणं च विनिर्ममे ॥ ७० ॥ सिंधुसागरवैताढ्य—सीमानं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिंधुनिष्कुटं ॥ साधयेति महीभर्त्रा । प्रेष्यमो सैन्यनायकः ॥ ७१ ॥ सुषेणोऽप्यर्द्धसैन्येन ।
चर्मरत्नेन तां नदीं ॥ उत्तीर्य बर्बरान् भिल्लान् । सिंहलान् टंकणानपि ॥ ७२ ॥ जवनांश्च
कालमुखान् । म्लेछानपि च जोनकान् ॥ अपरानपि तत्रस्थान् । लीलयैव जिगाय सः ॥७३॥
[illegible] ॥ रत्नोत्करांस्तुरंगांश्च । रथान् करटिनस्तथा ॥ आगत्य चक्रिणे सैन्य–पतिर्य्यश्राणयत्पुरः
॥ ७४ ॥ कान्यहानि ततः स्थित्वा–वदत्सेनापतिं नृपः ॥ उद्घाटय तमिस्रायाः । कपाटद्वि-
तयीमिति ॥ ७५ ॥ तदाज्ञयावृतः सैन्यैः । प्रययौ तत्र सीमनि ॥ कृत्वा तपः सुखस्नातो ।
दधानः शुभ्रवाससी ॥ ७६ ॥ सौवर्णं धूपदहनं । करे बिभ्रद्गुहां गतः ॥ तस्या दर्शनमात्रेण ।
सुषेणः प्रणनाम च ॥ ७७ ॥ अष्टाह्निकामहस्तत्र । तंडुलैश्चाष्टमंगलीं ॥ कृत्वा सेनापतिर्दंड–
रत्नमादित पाणिना ॥ ७८ ॥ आजिघांसुरपसृत्य । सप्ताष्टानि पदानि सः ॥ जवेन दंडरत्नेन ।
त्रिःकपाटावताडयत् ॥ ७९ ॥ ततो विघटमानौ तौ । कपाटौ दंडताडनात् ॥ त्रटत्रटिति ॥१५८॥
कुर्वाणौ । चक्रंदतुरिवोच्चकैः ॥ ८० ॥ आगत्य सैन्यपतिना । विज्ञप्तो भरतेश्वरः ॥ गजरत्नं
समारूढ–स्तमिस्रामभ्युपागमत् ॥ ८१ ॥ घातार्त्तिध्वांतभूताद्या । उपसर्गा भवंति न ॥ येन

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तन्मणिरत्नं स । चतुरंगुलमाददे ॥ ८२ ॥ कुंभिकुंभे समारोप्य । तद्रत्नं चक्रपृष्टगः ॥ चतुरंगचमूयुक्तो । गुहाद्वारं विवेश सः ॥ ८३ ॥ अष्टसुवर्णप्रमाणं । स जग्राहाष्टकार्णिकं ॥ द्वादशापि योजनानि । तमोऽरिं काकिणीमणिं ॥ ८४ ॥ यद्व्यूहश्रितेनासौ । तेनास्याः पार्श्वयोर्द्वयोः ॥ योजनांते योजनांते । मंडलान्यालिखन् ययौ ॥ ८५ ॥ तदुद्योतेन निर्गछन् । निम्नगोन्निम्नगे नृपः ॥ निम्नगे प्राप गंभीरे । आज्ञालेखे कृते इव ॥ ८६ ॥

तुंबीफलमिवैकस्या–मुन्मज्जति शिलापि हि ॥ शिलेव तुंबीफलम–प्यन्यस्यां तु निमज्जति ॥ ८७ ॥ कृतायां ते वर्द्धकिना । पद्यायामुदलंघयन् ॥ गुहायाश्चोत्तरं द्वारं । प्रापदुत्तरयानकृन् ॥ ८८ ॥ प्राग्द्वारोद्घाटनत्रया–दिवोत्तरकपाटकौ ॥ स्वयमुद्घटाते तौ । निर्ययौ चक्रमादितः ॥ ८९ ॥ पंचाशद्योजनायामां । तामतिक्रम्य कंदरां ॥ उदग्भरतवर्षार्द्धं । विजेतुं प्रययौ नृपः ॥ ९० ॥ उत्पाताः समजायंत । म्लेछानां तत्र वासिनां ॥ प्रसर्पति महीनाथे । कृतांत इव तेऽप्यलं ॥ ९१ ॥ कालचक्रः कालदंष्ट्रः । करालः कालदारुणः ॥ वक्रवामुखश्च सिंहो । म्लेछानामधिपा अमी ॥ ९२ ॥ हयानां कोटयः पंच । रथानां दश कोटयः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ कोटिरेका च नागानां । पंचाशत्कोटिपत्तयः ॥ ९३ ॥ तेषां च सैन्ये प्रत्येक-मेवमासन्
बलोर्जिताः॥ समरे ये प्रसर्पतः । सह्यंते नासुरैरपि ॥९४॥ महासैन्यानि संमील्य । मदो-
ग्रा यवनास्ततः ॥ अदृष्टपरसैन्यास्ते । चक्रिणे चुकुपुस्तरां ॥ ९५ ॥ संभूय क्रोधदुर्मत्ता ।
मन्यमानास्तृणं जगत् ॥ संवर्मिणः शस्त्रभृतो । धावंतिस्म महाबलाः ॥ ९६ ॥ भरतस्या-
ग्रसैन्येन । युयुधुस्ते महौजसः ॥ वर्षंतः शरधाराभिः । प्रलयस्य घना इव ॥९७॥ भल्लुतं-
तोऽतिगर्जंतः । कुर्वंतो भुजपीडनं ॥ रणांगणे विभ्रांतिस्म । नटा इव भटाः स्फुटाः ॥९८॥
कोपात्केऽपि करालाक्षाः । साक्षात्कृतजवर्षिणः ॥ आकर्षंतो रिपुक्षेत्रात् । क्षात्रं तेज
इवाबभुः ॥ ९९ ॥ हयानां हेषितैः कुंभि-गर्जितै रथचीत्कृतैः ॥ भटानां सिंहनादैश्च । चु-
क्षुभे भुवनं त्रयात् ॥५००॥ क्षितिभृच्छिखरैर्वृक्षै-रस्त्रैरप्यायसै रुषा ॥ मिश्रो युयुधिरे वीराः।
स्वेषु स्वेषु जयोन्मुखाः ॥ १ ॥ दंदंदंदपातेन । मुद्गरैः केऽपि केऽपि च ॥ शरैः परशुभिः
खड्गैः । शत्रून् केचिदयोधयन् ॥ २ ॥ म्लेच्छैः क्रूराशयैश्चक्रि-सैन्यं किंचिदुपद्रुतं ॥ महावा-
तैरिव वनं । दुर्जनैरिव सज्जनः ॥ ३ ॥ त्रस्यन् त्रस्यन् पतन् मूर्छन् । पश्यन् सर्वत्र वर्त्तय-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न ॥ दिग्मूढ इव दैत्यास्ते–श्चक्रे चक्रिपरिच्छदः ॥ ४ ॥ रसतः करिणः क्रूरं । भज्यतोऽपि म-
हारथान् ॥ त्रसतस्तुरगान् वीक्ष्य । सेनानी कोपमाप्तवान् ॥ ५ ॥ सुषेणे समरारंभ–प्रवी-
णे म्लेच्छसैनिकाः ॥ त्रेसुर्दिशो दिशि नाल–मालोकयितुमप्यमी ॥ ६ ॥ ते वायसा इवैकत्र ।
संभूयालोच्य च क्षणं ॥ आतुरा मातरमिव । ययुः सिंधुं महानदीं ॥ ७ ॥ उत्ताना मुक्तव-
सना । वालुकासनवर्त्तिनः ॥ स्वदेवान् वारिदमुखां–स्तपसा पर्यतोषयन् ॥ ८ ॥

ततो मेघकुमाराणा–मासनानि चकंपिरे ॥ जगदुश्चक्रिसंरुद्धान् । स्वभक्तान् यवनांस्त-
था ॥ ९ ॥ ब्रूत केनात्र कार्येण । वयमाराधिता इति ॥ अंतरिक्षस्थिता मेघ–कुमारास्तान-
वीवदन् ॥ १० ॥ ऊचुस्ते विषयोऽस्माकं । पराभूतः पुरा न कैः ॥ नूतनः कोऽपि चायासी–
त्तेन भग्ना वयं दृढा ॥ ११ ॥ निशम्येति गिरं प्राहु–र्मेघा म्लेच्छान् कृताग्रहान् ॥ युगादावा-
दिदेवस्य । सूनुरन्यूनविक्रमः ॥ १२ ॥ यंत्रमंत्रविषास्त्राग्नि–विद्यादीनामगोचरः ॥ जातोऽयं
प्रथमश्चक्री । भरते भरतेश्वरः ॥ १३ ॥ [illegible] ॥ युष्माकमुपरोधेन । तथास्य च वयं खलु ॥
उपसर्गं करिष्याम । इत्युदीर्य तिरोऽभवन् ॥ १४ ॥ अंभोधरा मषीश्यामा । प्राप्नुवंतो नभ-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्तलं ॥ जगर्जुर्निष्ठुरं प्रोच्चै–स्तडिज्झात्कारकारिणः ॥१५॥ मुशलोपमधाराणां । घोरणीभिः
पयोधराः ॥ व्याप्नुवन् पृथिवीपीठं । तमिस्रपरमाणुवत् ॥ १६ ॥ खनंतो वृक्षमूलानि । पा-
तयंतो गिरेः शिरः ॥ जलप्रवाहैर्जलदा । गर्त्तादीनप्यपूरयन् ॥ १७ ॥ रात्राविव तमिस्राणि ।
बलाविव मलीमसाः ॥ जलौघा वसुधां व्यापु–रन्याया इव दुर्नृपं ॥ १८ ॥ ततश्चक्रिकरस्प-
र्शा–च्चर्मरत्नं तथास्तृतं ॥ यथा तेनोद्धृतं सैन्यं । जिनेन भुवनं यथा ॥ १९ ॥ छत्ररत्नेन त-
च्च । विस्तृतं मिलितं तथा ॥ अंतरा चर्मरत्नेन । पारदस्य लवाविव ॥ २० ॥

यानपात्रमिवांभोधौ । चर्मरत्नं जलेऽतरत् ॥ भूत्वांतरातपत्रं तु । वारयामास तज्जलं
॥ २१ ॥ पितेव नूतनां सृष्टिं । सिसृक्षुरिव चक्रिराट् ॥ पूरितं सैन्यलोकेन ॥ ब्रह्मांडं तद्वि-
निर्ममे ॥ २२ ॥ काकिणीमणिचक्रैश्च । तिरस्कृततमोभरः ॥ तत्कालोत्पन्नधान्यैश्च । सुखं
तस्थौ चमूचयः ॥ २३ ॥ सप्ताभूवन्नहोरात्रा–एवंभांसि परिवर्षतां ॥ तेषां मेघकुमाराणां ।
तदा कल्पांतकालवत् ॥ २४ ॥ पापाः केऽमी ममेदृक्–मुद्वेगं कर्त्तुमुद्यताः ॥ इति भावं न-
रेंद्रस्य । विविदुर्यक्षनायकाः ॥ २५ ॥ ते षोडशसहस्राणि । यक्षास्तस्यांगरक्षकाः ॥ कोपि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नो वक्तूणीरा । एत्योचुर्जलदानिति ॥ २६ ॥ अरे वराकाः के यूय-ममुं कोपितुमुद्यताः ॥
निश्चेतना न जानीथ । चक्रिणं जरतेश्वरं ॥ २७ ॥ शीघ्रं समेत्य चक्रेश-पादौ श्रयत संप्रति
॥ असौ दुर्नयमत्युग्रैः । सोढा वः शरणार्थिनां ॥ २८ ॥ नोचेद्दयं तस्य जृत्या । दृग्द्द्ये हं-
तुमुद्यताः ॥ श्रुत्वेति ते क्षणादभ्र-वृंदं संजहुरंबरात् ॥ २९ ॥ यक्षैर्मेघकुमारास्ते । समाग-
त्याथ चक्रिणं ॥ नेमुः स्वस्यापराधस्य । प्रायश्चित्तं चिकीर्षवः ॥ ३० ॥ सन्मान्य चक्रिणा
मुक्ता । म्लेछानज्येत्य तेऽवदन् ॥ अस्मान्निरप्यजय्योऽयं । तद् द्रुतं नमतेति तं ॥ ३१ ॥ श-
रण्यैरपि तैर्मेघै-रित्युक्ता म्लेछजूभुजः ॥ लुठंतश्चक्रिणं प्राप्य । नेमुर्न्यस्ततृणा मुखे ॥ ३२ ॥
रत्नोत्करांस्तुरंगांश्च । नागान् हाटकसंचयान् ॥ मेरुवच्चक्रिणः पाद-पीठाग्रे ते न्यवेशयन् ॥
॥ ३३ ॥ चाटूक्तिबहुशोजक्ति-गर्जास्ते दैत्यनायकाः ॥ ब्रुवाणा जरतेशेन । विसृष्टा जग्मु-
रालयान् ॥ ३४ ॥ अपि सन्मानिता म्लेछाः । परमंतः समत्सराः ॥ कूटमंत्रैश्चक्रिसैन्ये । रो-
गांश्चक्रुरनेकशः ॥ ३५ ॥

इतः सुबुद्धिः सचिवः । प्रणिपत्य नरेश्वरं ॥ किरीटकोटिसंघृष्ट-पाणिपद्मो व्यजिज्ञपत्



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ३६ ॥ गजवाजिनृणां स्वामि–न्नभूद्रोगार्त्तिरद्भुता ॥ तत्तद्वैद्यैर्दिव्यशक्त्या–प्यगम्या भेषजै-
रपि ॥ ३७ ॥ नायं त्रिदोषजो व्याधि–स्तज्ज्ञाने चक्रिनायक ॥ आगंतुकोऽनिचारादि–दोषाद्भु-
त्पादितः परैः ॥ ३८ ॥ इत्यालापिनि मंत्रींद्रौ । द्योतयंतौ नभस्तलं ॥ विद्याधरावुभौ व्योम्नो
–ऽवतेरतुरतिद्युती ॥ ३९ ॥ ऊर्ध्वग्रीवैः सैन्यलोकै–र्वीक्ष्यमाणौ कृतादरौ ॥ तौ प्रणम्य धरा-
धीशं । तत्पुरोऽभ्यषीदतां ॥ ४० ॥ चक्रवर्त्ती तु तौ वीक्ष्य । भद्राकारौ महाद्युती ॥ अपृ-
च्छद्बहुमानेन । कौ युवामिति सादरं ॥ ४१ ॥ रंजितौ चक्रिणो मूर्त्या । गिरा चैतौ खचारिणौ
॥ नत्वा पुरः प्रसन्नास्या–वित्यूचतुरिलापतिं ॥ ४२ ॥ स्वामिन् विद्याधरावावां । वायु-
वेगगती इति ॥ त्वदीयतातपादाना–मगच्छावाद्य वंदितुं ॥ ४३ ॥ श्रीयुगादिजिनाधीश–मु-
खाच्छत्रुंजयप्रथां ॥ श्रुत्वा गतावनूवाव । तत् स्पृष्टुं तीर्थमुत्तमं ॥ ४४ ॥ अष्टाह्निकामहस्तत्र
। विधायानंदसुंदरं ॥ वृषभेशसुतं त्वां तु । द्रष्टुमत्र समागतौ ॥ ४५ ॥ स्वामिवत्स्वामिपुत्रेऽ
पि । वर्त्तितव्यमिति क्रमात् ॥ आवयोस्त्वं युगादीश । इव सेव्यतमस्ततः ॥ ४६ ॥ तत्कथं मं-
दतेजस्कं । तव सैन्यमिदं विभो ॥ सूर्यपाणिपयोजानां । संकोचोऽस्ति कथं क्वचित् ॥ ४७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चभयथाख्यदिहोत्पन्नो-ऽसाध्यो मंत्रौषधैरपि ॥ अकस्माद्विविधो व्याधि-स्तेनाभून्म्लानिरंगि-
नां ॥ ४८ ॥ ततो जगदतुर्विद्या-धरौ भूपालशेखरं ॥ चक्रिन् शत्रुंजये राजा-दनीवृक्षोऽस्ति
 शाश्वतः ॥ ४९ ॥ शाकिनीभूतवेताल-दुष्टदेवादिदोषहृत् ॥ तत्प्रभावो युगादीशा-दावाभ्यां
बहुशः श्रुतः ॥ ५० ॥ तत्स्तंबमृत्तिकाशाखा-पत्राद्यं विद्यतेऽत्र नः ॥ तद्वारिसेचनात् सर्वे ।
भवंतु किल नीरुजः ॥ ५१ ॥ चक्रिणानुमतौ तौ तु । तथा कृत्वाथ खेचरौ ॥ सन्मानितौ
तु तेनैव । स्वपदं प्रापतुः क्षणात् ॥ ५२ ॥ नीरुक् निरीक्ष्य तत्सैन्यं । हृष्टो भरतभूपतिः ॥
अधूनयच्छिरःपद्मं । हर्षोद्वेलमानसः ॥ ५३ ॥ भक्तिरन्नीव तां प्रीतिं । ततो वाचमुवाच सः ॥
अहो अस्य सुतीर्थस्य । महिमा वचनातिगः ॥ ५४ ॥ मन्ये नातः परं तीर्थं । विद्यते त्रिज-
गत्यपि ॥ लोकद्वयसुखं यस्य । प्राप्यते चिंतनादपि ॥ ५५ ॥ पुरा प्रभासदेवेन । कश्चितेऽ-
स्यातिशायिनि ॥ भवाब्धेऽप्यथ तेनैव । तत्तीर्थं लंभितोऽस्मि यत् ॥ ५६ ॥ तथापि दिग्जय- 
प्रांते । संघेन सहितः यदि ॥ करिष्ये तद्गिरेर्यात्रां । तदा मे जनुषः फलं ॥ ५७ ॥ इत्याला-
पसुधापुरं । किरन् सभ्यसभासु सः ॥ सर्वेषां परमप्रीति-हेतुरासीन्महीपतिः ॥ ५८ ॥ पु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नः क्रुद्धोऽथ चक्रेश—श्चक्रं दैत्यनृपान् प्रति ॥ प्राहिणोत्तत्सुरैर्बध्ध्वा । तेऽथानिन्यिरे रयात् ॥
॥ ५९ ॥ दीनाननान् दीनवाक्यान् । नृपस्तान् वीक्ष्य सत्वरं ॥ दत्वा गजाश्वरत्नादीन् ।
 शिक्षायै ह्यमुचत्पुनः ॥६०॥ गिरिसागरमर्यादं । सिंधोरुत्तरनिष्कुटं ॥ नृपाज्ञया सुषेणोऽथ ।
साधयित्वा समाययौ ॥ ६१ ॥ भोगांस्तत्रोपभुंजान—श्चिरं तस्थौ महीपतिः ॥ अन्यदायुध-
शालाया—श्चक्ररत्नं बहिर्ययौ ॥ ६२ ॥ स तेनैव पथा गच्छं—श्चक्रीचक्रानुगः क्रमात् ॥ नितंबं
दक्षिणं क्षुद्र—हिमाद्रेराससाद च ॥ ६३ ॥ निवेश्य शिबिरं तस्य । तटेऽष्टमतपास्ततः॥ रथम-
ध्यास्य स क्षुद्र—हिमाद्रिं प्राप्तवान् रयात् ॥ ६४ ॥ साटोपं रथशीर्षेण । त्रिरताडयदुच्चकैः ॥
निजनामांकितं बाणं । विससर्ज च तं प्रति ॥ ६५ ॥ द्वासप्ततिं योजनानि । गत्वा वेगाद्वि-
हायसा ॥ हिमवत्सुरकोपाय । पतन्सोऽभूच्छिलीमुखः ॥ ६६ ॥ तस्याक्षराणि चालोक्य। त्य-
क्तकोपः सुराधिपः ॥ समागत्योपदापाणिः । प्रणनाम नरेश्वरं ॥ ६७ ॥ एवमाराध्य भूपालं। 
तेनायमतिमानितः ॥ अगच्छत्क्षुद्रहिमवान् । राजापि स्वबलं ययौ ॥ ६८ ॥ गत्वा वृषभकू-
टाद्रिं । रथेन त्रिरताड्यत ॥ आदाय काकिणीरत्नं । वर्णानीति लिलेख च ॥ ६९ ॥ अवस-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्पिण्यां तृतीया–रे प्रांते जरतोऽस्म्यहं ॥ श्रीयुगादीशतनुज–श्चक्री शक्रीजवन् श्रिया ॥७०॥ युग्मं ॥ ततः शिबिरसंघातैः । पथा तेनैव पार्थिवः ॥ प्राप क्षणान्महाशैल–वैताढ्यं जरताधेगं ॥ ७१ ॥ पुरा कच्छमहाकच्छ–सुतौ राज्यं प्रकुर्वता ॥ नियुक्तावादिदेवेन । कार्येऽजूतां हि कुत्रचित् ॥ ७२ ॥ तौ यावन्नमिविनमी । कार्यं कृत्वा समीयतुः ॥ तावत्संयमसाम्राज्य–जाजं ददृशतुः प्रभुं ॥ ७३ ॥ निर्ममं तावजानानौ । ताततातेति जाषिणौ ॥ अयाचतां राज्यजागं । पुत्रवज्जिननायकं ॥ ७४ ॥ सेवावहे न जरतं । प्रतिज्ञायेति तौ ततः ॥ असेवतां विभुं पार्श्व–द्वये कृष्टासिधारिणौ ॥ ७५ ॥ पातालविभुरन्येद्यु–र्धरणेंद्रः परीक्षणात् ॥ अत्यंततातपादेषु । तावज्ञासील्सुजक्तिकौ ॥ ७६ ॥ विद्याः षोमश सहस्रा–एयदाद्वैताढ्यपर्वते ॥ दक्षिणोत्तरश्रेण्योश्च । राज्यं ताज्यां मुदा स हि ॥ ७७ ॥ युग्मं ॥

तौ तत्र नमिविनमी । पुष्पदंताविवोद्यतौ ॥ राज्यं कुरुत आनंद–संदोहसहितौ सदा ॥ ॥ ७८ ॥ जरतो रथमारुह्य । तं नितंबमवाप्तवान् ॥ निजनामांकितं बाणं । चिक्षेप च तयोः प्रति ॥ ७९ ॥ आलोक्य मार्गणं तं च । तावमंत्रयतां मिथः ॥ जंबूद्वीपस्य जरते । जरत-



For Private And Personal Use Only

श्चक्रवर्त्त्ययं ॥८०॥ उत्पन्नः प्रथमस्तेन । गर्वितः स्वभुजौजसा ॥ स्वयं लिखित्वा स्वं नामा-
यासीदृषभकूटके ॥ ८१ ॥ ॥ युग्मं ॥ मर्त्योऽस्मत्तोऽप्यसौ दंडं । याचते मंत्रवर्जितः ॥ इ-
॥१६७॥ त्युक्त्वासज्जतां तौ तु । समराय रुषारुणौ ॥ ८२ ॥ तदाज्ञया महासैन्यै-र्वृता विद्याधराधि-
पाः ॥ अन्येऽपि स्थगयंतः खं । वैताढ्यं चाभ्युपागमन् ॥ ८३ ॥ केचिच्छत्राकं कुर्वंतो । विमा-
नैर्व्योम्नि केचन ॥ रवेरथादिवानीतै-स्तार्क्ष्यैस्तार्क्ष्यमयं क्वचित् ॥ ८४ ॥ ऊरन्मदैर्गजैः
केचि-ज्जंगमाद्रिमयं क्वचित् ॥ क्वचिच्च पुंमयं केऽपि । कुर्वंतो बहुपत्तिभिः ॥ ८५ ॥ गर्जं-
तो दुंदुभिध्वानै-र्गर्जयंतश्च पर्वतान् ॥ तत्राभ्येयुर्नभोमार्गैः । खेचराः शस्त्रपाणयः ॥ ८६ ॥
त्रिभिर्विशेषकं ॥ ज्योतिश्चक्रमिवाकाशे । विमानैः परितोऽक्षयपि ॥ दर्शयंतः क्रुधाक्रांता ।
आरभंत खगा रणं ॥ ८७ ॥ चक्रिसैन्यं यक्षसृष्टै-र्विमानैश्च कदापि हि ॥ कदाचिद्रथनागा-
श्वै-र्युयुधे खेचरैः सह ॥ ८८ ॥ विमानानि विमानौघै-र्वाजिनो वाजिभिस्तथा ॥ नागैर्ना- ॥१६७॥
गाः पत्तिभिश्च । पत्तयोऽपि रथैरथाः ॥ ८९ ॥ धानुष्का धन्विभिः खड्ग-पाणयः खड्गिभिः
समं ॥ समयुद्धमिदं पूर्वं । सैन्ययोरुभयोरभूत् ॥ ९० ॥ युग्मं ॥ विद्याधराः स्वविद्याभि—

श्चकुर्यच्च बलैर्निजैः ॥ तत्सर्वमंगरक्षैश्च । यक्षैस्तत्र निवारितं ॥ ९१ ॥

इति द्वादशवार्षिक्या । युध्ध्वा तौ चक्रिणा जितौ ॥ प्रांजली प्रणिपत्यैवं । तमधीश्वरमूचतुः ॥ ९२ ॥ मेरोरुपरि कः शैलो । वायोरुपरि को जवी ॥ वज्रस्योपरि किं तीक्ष्णं । कश्च शूरस्तवोपरि ॥ ९३ ॥ अद्य साक्षाद्विभुर्दृष्टो । दृष्टे स्वामिंस्त्वयि स्फुटं ॥ युगादिदेववत्त्वां हि । श्रयावस्तव शासनात् ॥ ९४ ॥ इत्युक्त्वा विनयाधारो । विनम्य विनमिर्नृपः ॥ सर्वांगसंगितारुण्य—सुभगं भावुकांगकं ॥ ९५ ॥ नेत्रास्यपाणिहृत्पाद—पंकजैः सरसीमिव ॥ अनंगभूपतेः पूर्णां । ज्वलत्कांतिसुधाभरैः ॥ ९६ ॥ सर्वामयोपशमिनीं । नित्यं नवनवामिव ॥ यथाकामितशीतोष्ण—संस्पर्शां दिव्यवारिवत् ॥ ९७ ॥ सर्वलक्षणसंपूर्णां । सर्वावयवभासुरां ॥ नाम्ना सुभद्रां स्त्रीरत्नं । स्वसुतां चक्रिणे ददौ ॥ ९८ ॥ चतुर्भिः कन्यकां ॥ विद्याधरनृपास्त्वन्ये । स्वपुत्रीर्गुणगर्विताः ॥ सहस्रशः स्वविद्याभिः । सममस्मायढौकयन् ॥९९॥ चक्रिणाथ विसृष्टौ तौ । राज्यमारोप्य सूनुषु ॥ विरक्तौ वृषभेशांहि—मूले जगृहतुर्व्रतं ॥१००॥ इतश्चक्रानुगश्चक्री । प्राप मंदाकिनीतटं ॥ न्यवेशयच्च शिबिरं । नात्यासन्नं न दूरगं ॥ १ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गंगां सिंधुवदुत्तीर्य । नृपादेशाच्चमूपतिः ॥ अन्यागमत्साधयित्वा । गांगमुत्तरनिष्कुटं ॥ २ ॥
तपसाष्टमभक्तेन । सिद्धा मंदाकिनी सुरी ॥ राज्ञे विश्राणयामास । हेमसिंहासनद्वयं ॥ ३ ॥
अष्टोत्तररत्नकुंभ–सहस्रं हारमंगदे ॥ किरीटं वरशय्यां च । दिव्यांबरं सुमानि च ॥ ४ ॥
[illegible] ॥ लावण्यपुण्यसौंदर्य–किंकरीकृतमन्मथं ॥ तं निरीक्ष्य रिरंसुः सा । चिंतयामास
चेतसि ॥ ५ ॥ किमिंद्रः किमु वा चंद्रः । किं कुबेरो रविः किमु ॥ अथवा निर्निमेषाणां ।
क्वैषामीदृशरूपता ॥ ६ ॥ श्रीयुगादिप्रभोः सूनु–र्भरतोऽयं जगद्विभुः ॥ न हि रत्नाकराद्रत्न–
मन्यत्रेदृग् भवत्यहो ॥ ७ ॥ एवं कामरसव्यग्रा । विसृजंती कटाक्षकान् ॥ प्रार्थयंती नृपे-
णाथ । नियुक्ता रतवेश्मनि ॥ ८ ॥ भुंजानो विविधान् भोगां–स्तत्र चक्री तया सह ॥ ए-
काहमिव वर्षाणां । सहस्रं सोऽत्यवाहयत् ॥ १० ॥ अन्यदा भरताधीशः । सुधर्मामिव देव-
राट् ॥ अलंचकार सहितः । सुरैरिव नृपैः सभां ॥ ११ ॥ अवतेरतुराकाशा–च्चारणश्रमणौ
ततः ॥ मूर्तिमंतौ पुष्पदंता—विव सौम्यद्युती यती ॥ १२ ॥ ससंभ्रमं समुत्थाय । भरतो
भक्तिसंभृतः ॥ साक्षाद्विवेकविनया—विवैतौ प्रणनाम च ॥ १३ ॥ सिंहासने निवेश्यैकं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चक्रपाणिर्मुनिं तथा ॥ स्वयं संयोजितकरौ । निषसाद तदग्रतः ॥ १४ ॥ श्रीयुगादिजिनेश-
स्य । सूनुं तद्भवसिद्धिगं ॥ ज्ञात्वा तं धर्मगंभीर–गिरा प्रोचे मुनीश्वरः ॥ १५ ॥ मैत्रीचतुष्क-
मष्टांग–योगाभ्यासरतिर्धृतिः ॥ परीषहोपसर्गाणां । सहिष्णुत्वमथार्जवं ॥ १६ ॥ कषायवि-
षयारंभ–परीहारोऽप्रमत्तता ॥ प्रसत्तिर्मृदुता साम्यं । मुक्तिमार्गा भवंत्यमी ॥ १७ ॥ देश-
नांते नृपोऽपृछत् । प्रणिपत्य ततो मुनी ॥ परोपकारनिरतौ । भगवंतौ कुतोऽधुना ॥ १८ ॥
रागद्वेषविनिर्मुक्तौ । युवां देहेपि निर्ममौ ॥ शंके मत्पावनायैव । केवलं समुपागतौ ॥१९॥
इत्युक्त्वा विरते तस्मिन् । जगादेको मुनिर्नृपं ॥ श्रीयुगादिजिनं नंतुं । गतावावां धराधव ॥
॥ २० ॥ तन्मुखात्पुंडरीकस्य । गिरेर्माहात्म्यमुज्ज्वलं ॥ श्रुत्वा तत्स्पर्शनायाया–गभाव व्यो-
मगामिनौ ॥ २१ ॥ इशानदेवलोकेश–स्तत्र देवैरनुश्रितः ॥ दृष्ट्वा नौ हृष्टचित्तः सन् । लो-
लमौलिरिदं जगौ ॥ २२ ॥ भगवन् पश्य माहात्म्यं । गिरेरस्यातिचित्र कृत् ॥ नरकातिथि-
रप्येष । स्वर्गीशो ह्यभवं यतः ॥ २३ ॥ [विदेहेषु पशुग्रामे । सुशर्मा नाम वाडवः ॥ समभू-
दुःखदारिद्य–सदनं मूर्खमंडनं ॥ २४ ॥ सोऽन्यदा सकलं इंगं । भ्रमित्वाऽलब्धकिंचनः ॥ के-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 



वसं प्रांत्रपाणिः सन् । जगाम सदनं निजं ॥ २५ ॥ दृष्ट्वा तथाविधं पत्नी–तं द्विजं रिक्त-
पात्रकं ॥ आक्रोशयंती मुशल–मुद्यम्याधावत क्रुधा ॥ २६ ॥ सुशर्मा पूर्वमेवापि । खिन्नो
दारिद्यपीमितः ॥ आक्रोशैश्च कलत्रस्य । भृशं क्रोधातुरोऽजवत् ॥ २७ ॥ वार्यमाणापि सा
क्रूरा । यदा नास्थात्क्रुधेरिता ॥ सुशर्मापि तदा लोष्टुं । तांप्रति प्राहिणोद्बलात् ॥ २८ ॥ तेन
पाषाणघातेन । नितांतं मर्मपीमनात् ॥ पपात मूर्गविधुरा । प्राणानपि मुमोच सा ॥ २९ ॥
ततस्तत्तनयस्तं च । प्राह रोषातुरस्तरां ॥ किमारब्धं त्वया हंत । रेरे द्विजकुलाधम ॥३०॥
इति तद्वचसा क्रुद्धः । पूर्वपापेन तापितः ॥ जघान पापी तमपि । क्रंदंतीं तनयामपि
॥ ३१ ॥ ततो जयातुरो गच्छन् । संक्षुब्धसकलेंद्रियः ॥ उद्भ्रांतया गत्वा किंचित् । स्खलित-
स्तां जघान च ॥ ३२ ॥ धावद्भिः स तलारक्षै–र्नीतो भ्रांतविलोचनः ॥ नरकप्रतिमे कूपे ।
न्यपप्तन्निजपापतः ॥ ३३ ॥ धिक् क्रोधं नैव पश्यंति । जना येनाश्रिता मनाक् ॥ कृत्याकृत्येषु
मूढा ये । पतंति नरकावटे ॥३४॥ स पतन् खंमशो जात–स्तत्रातिव्यथयातुरः ॥ सप्तमं न-
रकं प्राप । मृत्वा दारुणदुःखदं ॥ ३५ ॥ बंधनच्छेदनाताप–तामनासिच्छिदादिकं ॥ भुक्त्वा तत्र



For Private And Personal Use Only

महादुःखं । मृत्वा सिंहो बभूव सः ॥ ३६ ॥ निरागसो बहून् जंतून् । सोऽपि संहृत्य के-
सरी ॥ चतुर्थे नरके जातः । पुनरेव महार्त्तितः ॥ ३७ ॥ ततश्चंडालकुलजः । सोऽभवत्क्रूर-
कर्मकृत् ॥ पूर्वागतमिवाभुंक्त-सप्तमं नरकं पुनः ॥ ३८ ॥ महादुःखानि संभुज्य । दृग्विषो
भुजगोऽभवत् ॥ सोऽन्यदा स्वबिलासन्नान् । मुनीन् जज्ञौ महाव्रतीन् ॥ ३९ ॥ वधाय फूत्कृ-
तिं कुर्वन् । क्रुधा तद्दशनेच्छया ॥ बिभ्रत्फणी स त्रिफणीं । वीक्ष्य तानित्यचिंतयत् ॥ ४० ॥ मू-
र्त्या शांता अमी मर्त्या । आनार्त्ता न त्रसंत्यपि ॥ एते के इति चिंतावान् । मंदं मंदं फणी
ययौ ॥ ४१ ॥ सुश्राव च मुनींस्तांश्च । दिशतो धर्ममुज्ज्वलं ॥ शत्रुंजयस्य माहात्म्य-मपि
विद्याभृतां पुरः ॥ ४२ ॥ लाघवात्कर्मणां तीर्थ-माहात्म्यश्रवणोद्भवात् ॥ संजातजातिस्म-
रणः । स सस्मार भवान् स्वकान् ॥ ४३ ॥ ततो बिलाल्स निर्गत्य । कुंडली कुंडलीभवन् ॥
ननाम तन्मुनेः पादान् । निदानं स्वस्य संपदः ॥ ४४ ॥ प्रणामांते ततो दत्वा-नशनं भाव-
विन्मुनिः ॥ विद्याभृतोऽप्यगमयत् । पुंडरीके महोरगं ॥ ४५ ॥ पश्यंतं श्रमणो सर्पं । तम-
मुं तीर्थमूर्द्धनि ॥ एतज्जीवं च मामीदृक्-स्वरूपं सुरनायकं ॥ ४६ ॥ मन्ये तीर्थानि सर्वा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 



णि । संति भूमीतलेऽखिले ॥ मुनी नास्मात्परं तीर्थ–मुत्तमं ह्यस्ति पापहृत् ॥ ४७ ॥ स शक्रो भरताधीश । निवेद्येति महर्द्धिमान् ॥ चक्रे चंदनकर्पूर–काष्ठैः सर्पस्य सत्क्रियां ।४८। दाद्भूमौ रत्नपीठं । विधाय प्रणिपत्य च ॥ तन्महातीर्थभिंद्रः स्व–राज्यं पालयतिस्म तत् ॥ ४९ ॥ इत्थं विलोक्य चरितं । तत्रावां चक्रिशेखर ॥ पुनः पुनस्तीर्थमिद–मस्पृशाव स-माधिना ॥ ५० ॥ चलिताभ्यामिहावाभ्यां। दृष्टं तव महाबलं ॥ त्वं चास्माकं गुरोः सूनु–रित्यदर्शि च सादरं ॥ ५१ ॥ ततो वामनुजानीहि । विशेषात्तीर्थयायिनौ ॥ विवेको विनयो दृष्ट–स्तावकीनो जनातिगः ॥ ५२ ॥ वंदितौ भरतेनाथ । तौ मुनी जग्मतुः क्वचित् ॥ च-क्रवर्त्ती च तत् श्रुत्वा । चकारेति मनोरथान् ॥५३॥ स कदा वासरो भावी । स क्षणः क्षण-दापि सा ॥ यत्र शत्रुंजये यात्रां । विधास्ये संघसंयुतः ॥ ५४ ॥

अथ संबोध्य चक्रेशो–ऽनुज्ञाप्य च सुरापगां ॥ खंडप्रपाताभिमुखं । चचाल प्रबलैर्बलैः ॥ ५५ ॥ प्राप्तेऽस्मिंस्तद् गुहाद्वारं । नाट्यमालसुरस्तदा ॥ चलितासनोऽष्टमेना–यासीढौकन-युक्करः ॥ ५६ ॥ भूषणान्यर्पयामास । स तत्सेवाचणः सुरः ॥ राज्ञा च बहुमानेन । विसृ-



For Private And Personal Use Only

ष्टः स्वाश्रयं ययौ ॥ ५७ ॥ नृपाज्ञया सुषेणोऽथ । कपाटावुदघाटयत् ॥ ततः खंडप्रपाता-
या–स्तमिस्राया इव क्षणात् ॥ ५८ ॥ आरूढः करिणः स्कंधे । कुंभदेशे च दक्षिणे ॥ मणि-
 रत्नं निवेश्योच्चै–स्तां गुहामविशन्नृपः ॥ ५९ ॥ अन्वीयमानः सैन्येन । पूर्ववन्मंडलानि च
॥ चक्री लिलेख काकिण्या । गोमूत्रानुकृतीन्यपि ॥ ६० ॥ निम्नगोन्निम्नगे नद्या–वुत्ततार च
पूर्ववत् ॥ तद् गुहादक्षिणद्वारं । स्वयं चोद्घटे क्षणात् ॥ ६१ ॥ निर्गत्य तद् गुहाद्वाराद् ।
गंगारोधसि पश्चिमे ॥ सैन्यं निवेशयामास । सोऽष्टमं च तपो व्यधात् ॥ ६२ ॥ अष्टमांते त-
मन्येयु–र्निधयो नव विश्रुताः ॥ साक्षाद्यक्षसहस्रेण । ते प्रत्येकमधिष्ठिताः ॥ ६३ ॥ नैसर्पः
पांडुकश्चाथ । पिंगलः सर्वरत्नकः ॥ महापद्म कालमहा–कालौ माणवशंखकौ ॥ ६४ ॥ तै-
र्नामभिरिमे ख्याता । उत्सेध चाष्टयोजनाः ॥ नवयोजनविस्तीर्णा । दैर्घ्ये द्वादशयोजनाः ॥
॥ ६५ ॥ तेषामेवाभिधानैस्तु । तदधिष्टायकाः सुराः ॥ पल्योपमायुषो नाग–कुमाराश्चक्रि- 
णोऽनमन् ॥ ६६ ॥ अवोचंश्च वयं गंगा–मुखमागधवासिनः ॥ आगतास्त्वां महाभाग । भ-
वद्भाग्यैर्वशीकृताः ॥ ६७ ॥ त्वद्भाग्यमिव नो चक्रिन् । वयं क्षीयामहे क्वचित् ॥ तत् प्रय-

 

भोगानुपभुंक्ष्व त्वं । यथाकाममनारतं ॥ ६८ ॥ वशं यातेषु निधिषु । व्यधादष्टाहिकोत्सवं ॥ च-
क्री कल्पितकल्पद्रु–र्ददौ दानं निजेच्छया ॥ ६९॥ नृपाज्ञया सुषेणोऽथ । गंगादक्षिणनिष्कुटं॥
 लीलयैव साधयित्वा । पुनस्तत्पदमाप्तवान् ॥ ७० ॥ कियत्कालं स्थितस्यात्र । चक्रिणस्तत्र
सम्मदात् ॥ चक्ररत्नमयोध्यापूः–प्रति प्रचलति स्म खे ॥ ७१ ॥ षट्खंडमेदिनीनाथः । सु-
रासुरनरैर्वृतः ॥ अखंडाज्ञः कियद्दिनै–रयोध्यासविधं ययौ ॥ ७२ ॥ चतुरशीत्येभलक्षै–स्ता-
वद्भिश्च हयैरथैः ॥ भटानां षण्णवत्याः । कोटिभिः परिवारितः ॥ ७३ ॥ आद्यप्रयाणदिवसा–
दतिक्रांतेषु सत्स्वथ ॥ षष्टिवर्षसहस्रेषु । चक्री स्वपुरमाप्तवान् ॥ ७४ ॥ [redacted] ॥ अविदूरे-
विनीताया–श्चक्री सैन्यं न्यवेशयत् ॥ तदधिष्ठायिनीं देवीं । प्रति चक्रेऽष्टमं तपः ॥ ७५ ॥
निर्गत्य पौषधागारा–दभ्रादिव दिवाकरः ॥ चकार पारणं चक्री । कारणं सर्वसंपदां ॥७६॥
अयोध्यायां व्यबंध्यंत । तोरणानि पदे पदे ॥ काश्मीरकुंकुमांभोभि–रासेचुश्च मही जनाः 
॥ ७७ ॥ अचित्रीयंत वेश्मानि । नागरैश्चरितैरिव ॥ सन्मंगलध्वनिचयः । सर्वत्र प्रससार
च ॥ ७८ ॥ पर्यधीयंत वासांसि । लोकैर्हर्षानुमानतः ॥ विचक्रिरे महामंचाः । स्वर्णस्तंभैश्च

सर्वतः ॥ ७९ ॥ मंचे मंचेऽप्यबध्यंत । रत्नभाजनतोरणाः ॥ पश्यंतश्चक्रिणमिता । भानुबिं-
बा इव क्षितौ ॥ ८० ॥ सहसा दर्शनात्पत्यु-रयोध्या स्वेदिनीव सा ॥ जलयंत्रोपचारैस्तै-र-
भवत्संचरिष्णुभिः ॥ ८१ ॥ पताकाभिर्विचित्राभिः । संप्राप्तं स्वपतिं चिरात् ॥ आशिश्लिषु-
रिवाभूत्सा । भुजैर्बहुभिरुत्सुका ॥ ८२ ॥ तदा धूपघटीधूम-भूमव्याजात्पुरी जनैः ॥ चिरं
स्वभर्तृविरहं । विसृजंती व्यतर्कि सा ॥ ८३ ॥ प्रविष्टुकामोऽथ पुरी-मारुरोह शुभे क्षणे ॥
गजरत्नं महीशक्रो-ऽभ्रमूवल्लभसोदरं ॥ ८४ ॥ एकेनैवातपत्रेण । तद्यशोराशिपांडुना ॥ शो-
भमानो जगत्येक-पतित्वपिशुनेन सः ॥ ८५ ॥ वीज्यमानश्चामराभ्यां । हंसाभ्यामिव पा-
र्श्वयोः ॥ अत्यजं तन्मुखांभोजं । प्राप्ताभ्यामिव मानसात् ॥ ८६ ॥ मिथोंशुभिर्युध्यमानै-
रिव रत्नैरलंकृतः ॥ यथाकांक्षितदातृत्वात् । कल्पद्रुरिव जंगमः ॥ ८७ ॥ तद्दिग्विजयसंजात-
विचित्रचरितोक्तिभिः ॥ स्तूयमानः प्रतिपदं । भट्टैरिव सुरासुरैः ॥ ८८ ॥ इत्थं विवेश चक्री-
शो । नम्यमानः पदे पदे ॥ गुणैर्देहेन लोकानां । चित्तांतर्नगरीमपि ॥ ८९ ॥ [illegible] कुल-
कं ॥ नेत्रैरिव जालकै-र्वीक्ष्यमाणमिवोत्सुकं ॥ उत्कंठया पताकाभि-र्नृत्यंतमिव संमदात्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ ९० ॥ क्वचिदिंद्रमणिश्यामं । क्वचित्स्फटिकनिर्मलं ॥ पद्मरागैः क्वचिद्रक्तं । क्वचित्पीतं
च हाटकैः ॥ ९१ ॥ चित्रवर्णं प्रधानाभ्र—मेकविंशतिभूमिकं ॥ प्रासादं वसुधाधीशः । पै-
त्र्यं प्राप क्रमादथ ॥ ९२ ॥ त्रिस्त्रिर्विंशेषकं ॥ वेदिकायां पदं न्यस्य । गजादवततार सः ॥
केसरीव नगोत्संगा—दवतेरुः परेऽपि च ॥ ९३ ॥ प्रतीछन् प्राभृतान्येष । प्रणामादनु तान्न-
रान् ॥ संभाषमाणः प्रीत्युक्त्या । क्षणं तत्रैव तस्थिवान् ॥ ९४ ॥ षोडशापि सहस्राणि ।
स्वाधिष्ठायकदेवताः ॥ विसृज्य भरतस्वामी । संपूज्य च यथोचितं ॥ ९५ ॥ तद्वद्द्वात्रिं-
शतिराज—सहस्राणि च भूपतिः पुरोधसं गृहपतिं । वर्द्धकिं विससर्ज च ॥ ९६ ॥ [illegible] ॥
सूदानां स त्रिषष्टीनि । शतानि त्रीणि भूपतिः ॥ स्वस्थानायादिशद् दृष्ट्या—लानायेव गजा
दिकान् ॥ ९७ ॥ श्रेष्ठिनोऽष्टादश श्रेणि—प्रश्रेणीर्दुर्गपालकान् ॥ व्युत्सृजत्सार्थवाहान—प्यु-
त्सवांतेऽतिथीनिव ॥ ९८ ॥ शक्रः शच्येव सहितः । स्त्रीरत्नेन सुभद्रया ॥ द्वात्रिंशतासह-
स्रैश्च । राज्ञीनां राजजन्मिनां ॥ ७०० ॥ तावतीभिर्जनपदा—ग्रणीकन्याभिरावृतः ॥ पात्रैर्द्वा-
त्रिंशतोपास्त—स्तावद्भिर्नाटकैरपि ॥ १ ॥ मणिरत्नशिलाश्रेणि—विश्राणितदृगुत्सवं ॥ प्रासा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दं प्राविशन्नृपः । कैलासमिव यक्षराट् ॥ २॥ पैत्र्यां मूर्त्तिं प्रणम्याथ । स्नानपीठमगान्नृपः ॥
तामेवापूजयद्भक्त्या । पुष्पधूपाक्षतादिभिः ॥ ३ ॥ राजचक्रैः समं चक्री । चंद्रशालामुपेत्य
च ॥ संकल्पितान्नभोज्यौघै–र्बुभुजे जनचित्रदैः ॥ ४ ॥ तांबूलैश्चंदनैः स्रग्भि–र्वासोभिर्विश-
दैर्वरैः ॥ अलंकारैरभाच्चक्री । भूषितः सुरराजवत् ॥ ५ ॥ संगीतैर्नाटकैर्दिव्यै–र्विलासैरपि यो-
षितां ॥ स निनाय कियत्कालं । लालितः सुखसंचयैः ॥ ६ ॥ व्यजिज्ञपन्नथो भूपं । भंग्या
सुरनरा इति ॥ षट्खंडभरतक्ष्माप–स्त्वमसि क्षत्रशाश्वतः ॥ ७ ॥ महाराज्याभिषेकार्थं ।
तदस्माना(दि)दिश प्रभो ॥ शक्राणामिव नः कृत्यं । जिनस्येवेति चक्रिणः ॥ ८ ॥

अथ विद्याधरा यक्षाः । प्राप्ततच्छासनाः क्षणात् ॥ रत्नौघैर्मंडपं चक्रुः । पूर्वोदक्दिशि मं-
डनं ॥ ९ ॥ ह्रदेभ्यो ह्रदिनीभ्यश्च । ह्रदिनीनाथतोऽपि हि ॥ तीर्थेभ्यश्चाहरन्नीर–मृत्तिका-
वालुका अपि ॥ १० ॥ ततः पौषधशालायां । चक्रयष्टमतपो व्यधात् ॥ अथाप्तं तपसां रा-
ज्यं । तपसैव हि नंदति ॥ ११ ॥ विधत्सोऽथ वरं वासः । स्वावरोधयुतो ययौ ॥ तं दिव्यमंडपं
नाट्य–रसनिर्भरमानसः ॥ १२ ॥ स मृगेंद्रासनं तत्र । स्नानपीठं मणीमयं ॥ चक्री प्रदक्षि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णी चक्रे । मेरुशृंगमिवार्यमा ॥ १३ ॥ पूर्वसोपानपंक्त्या । रत्नसिंहासने वरे ॥ प्राग्दिशोऽ
भिमुखस्तत्रो–पाविशत्स सन्नार्यकः ॥ १४ ॥ ते द्वात्रिंशत्सहस्राणि । न्यषदन्नासनेष्वथ ॥
समारुह्योदकसोपानैः । पीठं भक्तिभृतो नृपाः ॥ १५ ॥ सेनापतिर्गृहपति–र्वर्द्धकिश्च पुरोहि-
तः ॥ श्रेष्ठ्यादयोऽप्यारुरुहु–र्याम्या सोपानमालया ॥ १६ ॥ आसनेषु यथायोग्यं । निषसा
राज्ञ ईक्षणात् ॥ मुकुलीकृतहस्ताब्जा । अन्येऽपि मुदिताः परं ॥ १७ ॥ चारणश्रमणाः पू-
र्व–मार्षभं चक्रवर्तिनं ॥ जैनागमोक्तविधिना । मंत्रस्नानमकारयन् ॥ १८ ॥ तस्याभियोगि-
कसुरा । जिनस्येव हि वासवाः ॥ तीर्थाहृतैः शुद्धतोयै–रभिषेकविधिं व्यधुः ॥ १९ ॥ तं द्वा-
त्रिंशत्सहस्राणि । शुभेऽभिषिषिचुः क्षणे ॥ नृपा अन्ये गोत्रवृद्धाः । सेनापतिमुखा अपि ॥२०॥
ततश्चंदनलिप्तांगो । ज्योत्स्नाभवसनोज्ज्वलः ॥ स बभौ शरदभ्रौघै–र्वृतोऽमरगिरिर्यथा ॥२१॥
शक्रप्रदत्तमृषभ–स्वामिनो मुकुटं सुराः ॥ मूर्ध्नि तस्याथ निदधु–श्चैत्यस्य कलशं यथा ॥२२॥
तत्कंठे निदधुर्हारं । ग्रथितं शुचिमौक्तिकैः ॥ तदलंकरणश्रेणि–रेवमन्याप्यजायत ॥ २३ ॥
पारिजातपुष्पजात–मालामम्लानसौरभां ॥ निदधुश्चक्रिणः कंठे । हारकाभिन्यभेदिनीं ॥२४॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रत्नसिंहासनात्तस्मा–दुत्तस्थावथ पार्थिवः ॥ प्रतिबिंबानि तस्यैवा–न्येऽप्युत्तस्थुः सदैव हि ॥
॥ २५ ॥ निजागमनमार्गेणो–त्तीर्य श्रीजरतेश्वरः ॥ कुंजरस्कंधमारूढः । प्रासादमिव जंगमं
॥ २६ ॥ पुनः स्नानगृहं गत्वा । स्नात्वार्चित्वा तथा जिनं ॥ चकाराष्टमजक्तस्य । पारणं पृ-
थिवीपतिः ॥ २७ ॥ [redacted] ॥ नानादेशागतैर्नृपै–र्देवैर्विद्याधरैरपि ॥ राज्याजिषेको व्यरचि ।
तस्य द्वादशवार्षिकः ॥ २८ ॥ एकांतसुखमाकाल–सोदरः समयोऽजवत् ॥ तस्याजिषेकसु-
जगो । लोकानां तत्र वासिनां ॥ २९ ॥ सौम्यः शशांकवत्तीव्र–स्तीक्ष्णरश्मिरिवारिषु ॥
कुबेर इव सर्वत्र । धनेशस्त्वीश्वरः स्वयं ॥ ३० भुवनेशो वरुणवत् । तेजसा ज्वलनोपमः ॥
प्रासादर्दमकर्त्ता च । धर्माधर्म इव स्वयं ॥३०॥ रूपवान् स्मरवत्स्मेर–वदनोऽदिनपद्मवत् ॥
देवैरप्यलब्धमध्यो । गंजीरः क्षीरवार्धिवत् ॥ ३१ ॥ आज्ञयैवाधिकार्येषु । समर्थः सुरराज-
वत् ॥ जीमूत इव सत्वेषु । सर्वदा जीवनप्रदः ॥ ३२ ॥ विद्याधरेषु सर्वेषु । जारतत्रिदशे-
ष्वपि ॥ नृपेष्वथ स एकोऽजू–त्तारेष्विव दिवाकरः ॥ ३३ ॥ [redacted] ॥ अशोजत
महारत्नैः । स चतुर्दशजिः सदा ॥ नवापि निधयस्तस्या–ऽजूवन् पादाब्जसंगताः ॥ ३४ ॥



For Private And Personal Use Only

सदा षोडशभिर्यक्ष–सहस्रैः सोऽप्युपास्यत ॥ द्वात्रिंशतासहस्रैश्च । राजभिः सपरिच्छदैः ॥
॥ ३५ ॥ तावद्भिर्जानपदक–कन्यानां भूपजन्मनां ॥ सहस्रैश्चापि सूदानां । स षष्ट्यग्रशतत्र-
यैः ॥ ३६ ॥ युग्मं ॥ लक्षैश्चतुरशीत्याभा–स्वरथद्विपवाजिनां ॥ प्रत्येकं ग्रामपत्तीनां । षण्ण-
वत्या च कोटिभिः ॥ ३७ ॥ द्वात्रिंशतो जनपद–सहस्राणामधीश्वरः ॥ द्वासप्ततेः पुरवर–
सहस्राणां च स प्रभुः ॥ ३८ ॥ सहस्रोनद्रोणमुख–लक्षस्याधिपतिश्च सः ॥ पत्तनाष्टचत्वा-
रिंशत्–सहस्राणां त्वसौ विभुः ॥ ३९ ॥ कर्बटानां मडंबाना–मिव साडंबरश्रियां ॥ चतुर्विं-
शति सहस्र–संख्यातानां स ईशिता ॥ ४० ॥ स विंशति सहस्राणा–माकराणां करेश्वरः ॥
तथा च षट् सहस्राणां । षोडशानां प्रशासिता ॥ ४१ ॥ चतुर्दशानां संबाध–सहस्राणामधि-
प्रभुः ॥ अधिपोंतरोदकानां । स षट् पंचाशतोऽपि च ॥ ४२ ॥ स षट्त्रिंशत्सहस्राणां । त-
टानामप्यधीश्वरः ॥ पंचाशतः कुराज्याना–मेकोनायाश्च नायकः ॥ ४३ ॥ स मध्ये भरत-
क्षेत्र–मन्येषामपि शासिता ॥ स्वःसंपदामिवाखंड–भूलाखंडलवद्विभुः ॥ ४४ ॥ विश्वंभरः
श्रीधरश्च । सुबुद्धिर्बुद्धिसागरः ॥ आदिदेवोपदिष्टोच्च–नीतिज्ञा मंत्रिणोऽभवन् ॥ ४५ ॥ अंशा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इवैषामन्येऽपि । मुख्याश्चाष्टोत्तरं शतं ॥ ततः कोटित्रयं तस्या–भूवन् सचिवपुंगवाः ॥४६॥
श्रीसुषेणश्च श्रीषेणो । दुर्जयोऽथ जगज्जयः ॥ विश्वैकवीरास्तस्यासं–श्चत्वारः सैन्यनायकाः ॥ ४७ ॥ जीवानंदो महानंद–संजीवनसुजीविताः ॥ चत्वारो नरवैद्याश्चा–प्युष्टलक्षाश्च चक्रिणः ॥ ४८ ॥ जांगलः कृतमालश्च । विशालो विमलस्तथा ॥ चत्वारो गजवैद्याश्चा–भूवन् लक्षं च तत्समाः ॥ ४९ ॥ मयूरो गरुडश्चैव । शकुनिः सारसस्तथा ॥ चत्वारो वाजिवैद्याश्चा–भवन् लक्षत्रयं तथा ॥ ५० ॥ विश्वरूपः परब्रह्मा । हंसः परमहंसकः ॥ चत्वारः पंडितास्तस्य । सप्तलक्षास्तथाभवन् ॥ ५१ ॥ श्रीकंठश्चापि वैकुंठो । भ्रुकुटिर्धूर्जटिस्तथा ॥ धनुर्विद्याविदोऽस्यासं–श्चत्वारोऽन्येऽपि भूरिशः ॥ ५२ ॥ ज्योतिःशास्त्रविदः केऽपि । केऽपि धर्मांगवेदिनः ॥ दंडनीतिविदः केऽपि । तस्याभूवन्महीपतेः ॥ ५३ ॥ पूर्वमेते हि विभुना । स्वयमध्यापिताः समं ॥ तच्चक्रिणोपदिशता । शब्दब्रह्ममयं महः ॥ ५४ ॥

अन्यदा स मुदा खेलन् । भरतो ववृते स्वकान् ॥ स्मर्तुं वर्षसहस्राणि । षष्टिं विरहकातरान् ॥ ५५ ॥ राजपुंभिर्दर्श्यमानान् । नामग्राहं नरेश्वरः ॥ पश्यतिस्म निजान् कामं ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रीत्युल्लापनपूर्वकं ॥ ५६ ॥ दिवातनस्य शशिनो । लेखामिव गलत्प्रभां ॥ हिमानीभिः परि-
क्लिष्टां । पद्मिनीमिव सुंदरीं ॥ ५७ ॥ सोदरीं बाहुबलिनः । कृतरूपविपर्ययां ॥ पश्यतिस्म
महीनाथो । दर्श्यमानां स्वसेवकैः ॥ ५८ ॥ कुलकं ॥ ततोऽरुणाक्षिभिश्चित्त–स्थितकोपस्य व-
र्णिकां ॥ दर्शयन् पार्श्वगान् प्राह । भरतः कठिनोक्तिभिः ॥ ५९ ॥ अस्मद् गृहेऽपि भोज्या-
दि । न किं रे विद्यते मनाक् ॥ अस्यां निरादराः किं वा । यूयं रे वृत्तितस्कराः ॥ ६० ॥ अ-
सौ न भुंक्ते किंचापि । रोगार्तिग्रथितांगका ॥ तच्चिकित्साविदः किं वा । वैद्या अपि गताः क्ष-
यं ॥ ६१ ॥ परिम्लाना कथं ह्येषा । निर्मदा करिणी वरे ॥ युष्माभिरन्यदपि मे । विनाशित-
मिति ध्रुवं ॥ ६२ ॥ इत्यालपंतमत्यंतं । ते प्रणम्य धराधिपं ॥ इति विज्ञापयामासु–र्योजि-
तांजलयस्ततः ॥ ६३ ॥ नाथ श्रीभरतागारे । विद्यंते सकलाः श्रियः ॥ किं कदापि सुरेंद्रस्य ।
प्रोस्फुरीति दरिद्रता ॥ ६४ ॥ कुलदैवतवत्पूज्या । सदास्माकं हि सुंदरी ॥ संति वैद्याश्च भू-
यांसो । मृत्योः प्रतिचिकीर्षवः ॥ ६५ ॥ किं तु दिग्जययात्रादि–वासरप्रभृति प्रभो ॥ आचा-
म्लानि तनोत्येषा । केवलं प्राणधारिणी ॥ ६६ ॥ तदा त्वया निषिद्धासौ । व्रतमिच्छुरिति प्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्नो ॥ ततश्च ज्ञावव्रतिनी । गृहिवेषेऽप्यजायत ॥ ६७ ॥ व्रतेच्छुरसि जूपेन । पृष्टा सावद-
दोमिति ॥ उच्छूसंती तया कामं । वार्त्तया शक्नुवत्यपि ॥ ६८ ॥ धन्यासि सुंदरि त्वं हि ।
या संसारपराङ्मुखी ॥ युक्तं च तातापत्याना-मिदमेव सुखास्पदं ॥६ए॥ मुष्टा विषयचौ-
रेण । तातापत्यानि सुंदरि ॥ वयं तु तुष्ठसौख्येऽस्मिन् । राज्येऽपि स्पृहयालवः ॥ ७० ॥ य-
थोचितं महासत्वे । तत् कुरुष्वेति चक्रिणा ॥ सानुज्ञाता परां प्रीति-मापद्विकसितांतरा ।७१।
इतश्च त्रिजगन्नाथो । जीवानामनुकंपया ॥ विहरन् वसुधापीठं । प्रापाष्टापदपर्वतं ॥
॥ ७२ ॥ अथ स्वर्नाथसंघाता-स्तत्रागत्यातिहर्षतः ॥ प्रन्नोः समवसरणं । विदधूरत्नराजिन्निः
॥ ७३ ॥ प्लवंगवत्प्लवयन् काम-मुद्यानपति रापतत् ॥ समीपं न्नरतेशस्य । ब्रुवन् जयजये-
ति च ॥ ७४ ॥ नून्यस्तमस्तकः प्रोचे । नूपालं वनपालकः ॥ दिष्ट्या वर्द्धयसे देवा-नया
कढ्याणवार्त्तया ॥ ७५ ॥ अष्टापदं तातपादाः । पावयंत्यधुना ननु ॥ सुरैः समवसरणं । च-
क्रे तत्रैव सांप्रतं ॥ ७६ ॥ श्रुत्वेति मुदितश्चक्री । तस्मै विस्मेरमानसः ॥ सार्द्धं द्वादशकोटी
-र्हिरण्यानां ददौ मुदा ॥ ७७ ॥ सादरं सुंदरीं प्रोचे । ततो न्नरतनूपतिः ॥ मनोरथोऽयं सं-





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पूर्णो–ऽजवत्ते स्वसरुच्छ्रस ॥ ७० ॥ इत्युदीर्य विशामीश–स्तामस्नापयदुत्सवैः ॥ अवरोधपुरंध्रीभिः । शुद्धैस्तीर्थाहृतैर्जलैः ॥ ७ए ॥ तच्चित्तसंनिभे ताभि– र्निर्मले पर्यधायत ॥ सा शुभ्रे वाससी पूते । कृतदेहविलेपना ॥ ०० ॥ शिबिकां साधिरुह्याथ । छत्रचामरचिह्निता ॥ भरतानुगता प्राप । गिरिमष्टापदं ततः ॥ ०१ ॥ तत्र समवसरणं । शरणं ददृशे तया ॥ भवतापपरि क्लिष्ट–स्वचित्तकदलीतरोः ॥ ०२ ॥ अथो भरतसुंदर्यौ । वाहनादवतीर्य च ॥ प्रदक्षिणां विभोः कृत्वा । नेमतुर्भक्तिनिर्भरौ ॥ ०३ ॥ षष्टिवर्षसहस्रात्त–जिनपादपयोरुहात् ॥ मुक्तिसुखस्पर्द्धमान–मानंदं भरतो दधौ ॥ ०४ ॥ जक्तिरन्निव जावस्थं । तमेवानंदमार्षभिः ॥ स्तोतुं त्रिजगतः स्तुत्यं । एवमारब्धवान् गिरा ॥ ०५ ॥ ध्येयस्त्वं सर्वसत्वाना–मन्यं ध्यायसि न प्रभो ॥ पूज्यस्त्वं विबुधेशाना–मपि पूज्यो न ते क्वचित् ॥ ०६ ॥ आद्यस्त्वं जगतां नाथ । नैवाद्यः कोऽपि ते प्रभो ॥ स्तुत्यस्त्वं स्तूयसे नान्यं । जगदीश्वरभावतः ॥ ०७ ॥ शरण्यस्त्वं हि सर्वेषां । न कोऽपि शरणं तव ॥ त्वं प्रभुर्विश्वविश्वस्य । प्रभुरन्यो न ते जिन ॥ ॥ ०० ॥ मुक्तिसौख्यं त्वदायत्तं । तद्दाता यत्परो न हि ॥ परात्परतरस्त्वं हि । तवास्ति न



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परः क्वचित् ॥ ७९ ॥ त्वमनादिरनंतस्त्वं । त्वां सज्ज्योतिमयं बुधाः ॥ ध्यायंति च त्वया धन्यं । मन्वते जगतां त्रयं ॥ ८० ॥ नमस्तुभ्यं भवांभोधि—पानपात्राय तायिने ॥ त्वत्तः शिवसुखानंदं । प्रार्थये नतवत्सल ॥ ८१ ॥ तव प्रेष्योऽस्मि नाथाहं । त्वत्तो नाथामि नाथतां ॥ जगच्छरण्य मां रक्ष । प्रसीद परमेश्वर ॥ ८२ ॥ इति स्तुत्वा जगन्नाथं । महीनाथशिरोमणिः ॥ पपौ जिनेंदोः पीयूष—देशनां वृषभागिति ॥ ८२ ॥ शीलव्रतेन सौभाग्यं । भोगाः सत्पात्रदानतः ॥ देवार्चनेन साम्राज्यं । तपसा कर्मणां क्षयः ॥ ८३ ॥ सर्वमेतत्क्षणाद्दत्ते । भावनैकांतसेविता ॥ क्रमाच्चिन्मयतां प्राप्ता । सैव मुक्तिनिबंधनं ॥ ८४ ॥ देशनांते प्रणम्याथ । सुंदरी विभुमालपत् ॥ प्रसीद दीक्षादानेन । नाथ मामुद्धर द्रुतं ॥ ८५ ॥ इत्याग्रहाज्जिनस्तस्यै । दीक्षादानमदान्मुदा ॥ सा चात्मानमतोऽत्यर्थं । धन्यां मेने बहुष्वपि ॥ ॥ ८६ ॥ भरतोऽपि विधायैवं । सुंदरीदीक्षणोत्सवं ॥ नत्वा नाथं पुरीं स्वीया—मलंचक्रे महोज्ज्वलः ॥ ८७ ॥ अन्यदा सोदरान् स्वीयान् । दिग्जयेऽप्यसमागतान् ॥ सस्मार भरतस्तेषां । दर्शनोत्कंठया हृतः ॥ ८८ ॥ प्रीत्याह्वानकृते दूतान् । प्राहिणोत्सोऽथ तान् प्रति ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





प्रायेण चरचरा हि । भवंति वसुधाभुजः ॥ ९९ ॥ प्राप्य तेऽथ रयाद्भूपान् ॥ साम्यवाक्यैर्-
बोधयन् ॥ पूर्वं तथाप्यमन्वानान् । निष्ठुरोक्तिभिरुद्भगुः ॥ ८०० ॥ जीवितेनापि राज्येन ।
कार्यं वो विद्यते यदि ॥ तदा भरतभूभर्तुः । सेवां कुरुत सर्वदा ॥ १ ॥ इति श्रुतिकटून् वा-
क्यान् । श्रुत्वा दूतमुखान्नृपाः ॥ मानेन जगतामीशं । जग्मुरष्टापदे स्थितं ॥ २ ॥ युग्मं ॥
नत्वा स्तुत्वाथ ते नाथं । किंचिदश्रुजलाविलाः ॥ पराभवं चिंतयंत–आदिदेवमदोऽवदन्
॥ ३ ॥ तात राज्यानि दत्तानि । त्वया प्रव्रजता तदा ॥ अस्मभ्यं भरतायापि । यथायोग्यं
निजेच्छया ॥ ४ ॥ अखंडमपि षट्खंडं । भरतं भरतोऽग्रसत् ॥ दवानल इवात्यंतं । विषोढा
न परोन्नतिं ॥ ५ ॥ तेनैव हि वयं तात । राज्येन सहिताः सुखं ॥ त्वद्भक्तिरक्तचित्तस्था ।
गमयामो दिनानि तु ॥ ६ ॥ ज्येष्ठोऽधुना स चास्माक–मपि राज्यानि वांछति ॥ तथादिश
यथायोग्यं । पूर्ववद्धितकाम्यया ॥ ७ ॥ निशम्येति जगन्नाथो । जगाद जगतः प्रियः ॥ हंत-
व्या एव रिपवः । क्षत्रियैः क्षात्रशालिभिः ॥ ८ ॥ रागद्वेषौ महाराती । सदा छलपरायणौ ॥
हिंस्तः पुण्यैकसर्वस्वं । सदा संनिधिवर्त्तिनौ ॥ ९ ॥ संसारसागरे रागः । शिलासंचयसो-

दरः ॥ द्वेषस्तु वोधिकल्पद्रु—मूलंकषहुताशनः ॥ १० ॥ संप्राप्य व्रतसाम्राज्यं । तपोऽस्त्रैर-
तिदारुणैः ॥ रागद्वेषौ महाशत्रू । घ्नंतु वत्सा अखंडिताः ॥ ११ ॥ तेऽधिगम्य प्रज्ञोबोधि—मि-
ति वैराग्यवासिताः ॥ व्रतमाददिरे शीघ्र—मक्षयानंदलिप्सवः ॥ १२ ॥ दूतास्तथाविधं तेषां ।
वृत्तमभ्येत्य चक्रिणे ॥ तदृष्टसाहसालापो—द्भुषितांगा न्यवेदयन् ॥ १३ ॥ सूर्यवत्सर्वतेजां-
सि । जलौघानिव वारिधिः ॥ आददे भरतस्तेषां । राज्यानि निखिलान्यपि ॥ १४ ॥ तत्पु-
त्रानात्मसात्कृत्वा । पित्र्ये राज्येऽध्यरोपयत् ॥ चक्री पुनर्नरेंशाणा—माज्ञैव सकलागमः ॥
॥ १५ ॥ आलोकस्तिग्मरश्मेरिव सलिलभरोंभोधरस्येव चारः । चित्तस्येवानिलस्यागमन-
मिव भृशं सर्वतः संचरिष्णुः ॥ भूभृद्भिर्भारतीयो गुरुभिरपि सदा न्यक्कृतान्युच्चवीर्यै—र्नि-
त्योल्लासी स तीक्ष्णो रिपुजननिवहैर्नैव सेहे प्रतापः ॥ १६ ॥ दारिद्र्यं निजकरजैर्वनीपका-
नां । दानैर्यो वृषरविणा तमोभरं च ॥ चक्रेणाहितकुलमुच्चकैश्च निघ्नन् । स श्रीमान् भरत-
महीपतिर्जयी स्तात् ॥ ११ ॥ धर्मस्तथा श्रुतिपथं समवापि तेन । श्रीचक्रिणा सकलविश्व-
तलेऽतिगर्जन् ॥ तस्य ध्वनेरपि यथा वितथीभवंति । पापानि यांति विलयं रिपवश्च सर्वे ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ १८ ॥ नमदवनिपतीनां सत्किरीटांशुजालैः । कलितचरणपीठस्तापहर्त्ता जनानां ॥ भरतनृपतिचंद्रः शात्रवीं कीर्त्तितारां । निजगुणकिरणौघैश्चित्रमत्रासयत्सः ॥ १९ ॥

इत्याचार्यश्रीधनेश्वरसूरिविरचिते श्रीशत्रुंजयमहातीर्थमाहात्म्ये

श्रीऋषभस्वामिजन्मराज्याभिषेकदीक्षाकेवलोत्पत्तिभरतदिग्विजयवर्णननामा

तृतीयः सर्गः समाप्तः ॥

॥ श्रीरस्तु ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





## ॥ अथ चतुर्थः सर्गः प्रारभ्यते ॥

देवासुरोरगनरा यदनुग्रहेण। तत्संपदोऽब्दजनुर्धीडुखगाश्च यस्य॥ व्यापारिणः सुरगवी-द्रुमशेखरत्ना—न्यादेशवंति च किलाद्य जिनः स पातु ॥ १ ॥ शृणु शक्र महीशक्र—विक्रमं क्रमिताहितं ॥ प्रभावमपि तीर्थस्य। प्रशस्याश्चर्यभूषितं ॥ २ ॥ अन्यदा भरताधीशो। द-सत्कांचनकुंमलः ॥ सुरेंद्र इव शैलेंद्रं। सिंहासनमशिश्रयत् ॥ ३ ॥ द्वात्रिंशत्सहस्राणां। भू-पानां मुकुटांशुभिः ॥ चक्रिणः सा घना संस—द्भाभा विद्युच्चयैरिव ॥ ४ ॥ मंमलीकैश्च सा-मंतै—स्तुल्यालंकरणांशुकैः ॥ शक्रसामानिकैः शक्र। इवाभाद्भरतेश्वरः ॥ ५ ॥ इतः सुषेण-सेनानी—र्भूतलन्यस्तमस्तकः ॥ स्वकरौ शेखरीकुर्वन्। व्यजिज्ञपदिदं विभुं ॥ ६ ॥ स्वामिं-स्त्वदाज्ञा सुखिनी। संचरिष्णुरितस्ततः ॥ जिनाशिषेव भूमीशैः। शिरसि न्यस्यतेतरां ॥ ७ ॥ त्वच्चक्ररत्नेऽभ्युदिते। क्षुद्राः क्षयमुपागताः ॥ दीप्यमाने रवेर्बिंबे। किं भवेत्तारकोत्करः ॥ ८ ॥ दारिद्र्यं रिपुसंघातो। द्वयं क्षयमुपागमत् ॥ त्वया द्विधा स्वकरजं। दानं प्रददता क्षितौ ॥ ॥१९१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ए॥ चक्ररत्नं पुनः शस्त्रा–गारं न विशति प्रन्नो ॥ जिनबोध इवानव्य–मानसं मानसंगि
तत् ॥ १० ॥ श्रुत्वेति नरतश्चक्री । मुखमैक्तत मंत्रिणः ॥ प्रायेण नूमिपतयः । सचिवास्या
नवंति हि ॥ ११ ॥ विश्वंनरो मुख्यमंत्री । प्रणम्य नरतेश्वरं ॥ जगाद सादरं बद्ध–पाणि-
र्विनयवामनः ॥ १२ ॥ संचरिष्णोः प्रतापस्य । न तव स्खलितुं क्रमः ॥ दृश्यते हि त्रिलो-
केऽपि । कश्चित्सुरनरेष्वपि ॥ १३ ॥ केचिद् घरट्टनिष्टयुत–सोदरा वा नवंत्यपि ॥ पर्वतांतर्दृष-
त्खंम–तुल्यान्को गणयेच्च तान् ॥ १४ ॥ वीरमानी पुनः कश्चि–दस्ति नूमितले परः॥ गेहे-
नर्दी त्वदाज्ञां न । मन्यते योऽतिदुर्नयः ॥ १५ ॥ ज्ञातं बावरजो देव । तव बाहुबलिर्बली ॥
एकोऽवशिष्यते गर्व–पर्वतो जितराजसु ॥ १६ ॥ बाह्वोर्बलं बाहुबलेः । समरे सोढुमप्यसौ ॥
नालं बिमौजाः सोऽप्यासी–दबलो हि महाबलः ॥ १७ ॥ तद्दोर्दंमस्य निर्घातं । वज्रस्येव बि-
मौजसः ॥ मेर्वादयोऽपि शैलास्ते । प्राप्य यांति विचूर्णतां ॥ १८ ॥ त्वया दिग्जयदंनेन । ॥१एश॥
केवलं दिग्गिरीकृतं ॥ अथाप्यनिर्जिते तस्मि–श्चक्रिन् बाहुबलौ नृपे ॥ १ए ॥ उपेक्षणीयो
नैवासौ । मत्सोदर इति त्वया ॥ अहितो देहजो व्याधिः । किं न मूलान्निकृंत्यते ॥ २० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आज्ञामूलं नरेंद्राणां । राज्यं हि विबुधा जगुः ॥ स्वोदरंजरयोऽन्येऽपि । संति तत्रास्तु किं यशः ॥ २१ ॥ श्रुत्वेति जरताधीशः । स्नेहकोपवशं गतः ॥ जवाच किंचिदामृश्य । सचिवं-प्रति सादरः ॥ २२ ॥ एकतोऽवरजः सोऽयं । शंकते तेन मन्मनः ॥ अन्यतो मन्यते नैव । ममाज्ञामिति कोपधीः ॥ २३ ॥ लज्जा स्वबंधुना युद्ध-मिति चेतसीवाधुना ॥ विश्राम्यति तु नो चक्र-मित्यनिर्जितशात्रवं ॥२४॥ स्वगृहेऽपि न यस्याज्ञा । तस्याज्ञा किं जवेद्वहिः ॥ प्रवादश्च कनिष्ठेन । सह युद्धमिति ध्रुवं ॥ २५ ॥

अथोचे लब्धसमयो । मंत्री नृपतिजाववित् ॥ कनीयानेव राजंस्ते । संकटं ह्यपनेष्यति ॥ २६ ॥ ज्यायानाज्ञां ददात्युच्चैः । कनीयान् कुरुते तथा ॥ सामान्यगृहिणामप्य-सावाचारः प्रवर्तते ॥ २७ ॥ आज्ञां ददस्व महतीं । पूर्वं दूतोपदेशतः ॥ सहिष्यते स तां नैवा-ञ्जिजनीबंधमिवेजराट् ॥ २८ ॥ तस्याविनयतश्चक्रिन् । प्रतिकुर्वंस्त्वमेव हि ॥ लोकापवादरहितो । जितकासी जविष्यसि ॥ २९ ॥ सचिवोक्तिमिति श्रुत्वा । नयज्ञं वाग्मिनं नृपः ॥ अनुशिष्य सुवेगाख्यं । प्रैषीद् बाहुबलिं प्रति ॥ ३० ॥ स्वामिशिक्षामथादाय । सुवेगो वेगवद्रथं ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आरुह्य नृपतेमूर्ति–मानुत्साह इवाचलत् ॥ ३१ ॥ सारसैन्यपरीवारः । सुवेगः पथि संचर-
न् ॥ शत्रूनिवाप्य शकुना–न्राजीगणदसौ मनाक् ॥ ३२ ॥ वामस्तु कार्यसंसिद्ध्यै । नृत्वा
वामोऽपि रासजः ॥ ररास रूक्षं नस्मादि–स्थानस्थो दग्धदिङ्मुखः ॥ ३३ ॥ ववौ वायुः
क्षिपन् धूलीं । तदा तु तन्मुखे नृशं ॥ कालदंडइवोद्दंडः । कृष्णाहिस्तत्पुरो ययौ ॥ ३४ ॥ इ-
त्याद्यशकुनान् जान–न्नपि दूतो ययौ रयात् ॥ तादृशाः प्रभुकार्याय । विलंबंते क्वचिन्न हि
॥ ३५ ॥ चस्खले तदश्वो मार्गे । समेऽपि जडचित्तवत् ॥ वामं च लोचनं तस्य । पस्पंदे वा-
मतां वदत् ॥ ३६ ॥

इत्याद्यसौ वार्यमाणो । स्थैरपि पदे पदे ॥ प्राप क्रमेण कांतारं । दुस्तरं क्षुद्रजंतुभिः
॥ ३७ ॥ क्वचित्किरातान् दुर्दातान् । कृतांतानिव दंभिनः ॥ क्वचिद्विध्वस्तमातंगान् । सिं-
हान् गुंजारुणेक्षणान् ॥ ३८ ॥ उन्मूल्यमानान् करिभि–र्भूरुहान् गिरिवाहुवत् ॥ चित्रका-
यांश्चित्रकांश्च । क्वचित्सूकरसंचयान् ॥ ३९ ॥ बूत्कारिणः संचरंतो । युध्यमानांश्च कांश्चन ॥
आलोकयन् दुष्टसत्वान् । सात्विकेभ्योऽपि भीतिदान् ॥ ४० ॥ लीलावेश्मेव तन्मृत्योः । का-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लरात्रिरतिप्रदं ॥ नूरुहांतरितादित्यं । सोऽतिचक्राम काननं ॥ ४१ ॥ षट्खंडमादपरं खंड—
मिवाखंडश्रियः प्रदं ॥ आखंडलनिवासाजं । बहलिदेशमासदत् ॥ ४२ ॥ स्थाने स्थाने गी-
यमानान् । शालिगोपीभिरुच्चकैः ॥ श्रीयुगादिगुणग्रामान् । ग्रामे ग्रामेऽपि सोऽश्रुणोत् ॥
॥ ४३ ॥ नगरग्रामसीमायां । वर्ण्यमानं मिथो मुहुः ॥ शुश्राव बाहुबलिनो । बलं त्रिभुव-
नोत्तरं ॥ ४४ ॥ मुक्त्वैकं बाहुबलिनं । राजांतरमजानतः ॥ लोकान् श्रिया कुबेराभान् । मू-
र्त्यापश्यत्स वैरिणः ॥ ४५ ॥ धान्योत्करान् शिखरिणः । शिखराणीव सर्वतः ॥ सत्फलान्
स द्रुमान् पश्यन् । ययावंतश्चमत्कृतः ॥४६॥ क्रमात्रिलक्षं ग्रामाणा—मतिक्रम्य सुवेगवान् ॥
सुवेगो बाहुबलिनः । पुरीं तक्षशिलामगात् ॥४७॥ उच्चार्हद्धनिकागार—ध्वजालिबहुवीजितां ॥
तादृग्धनोष्मस्वेदांबु—निभमुक्तोत्करां पुरीं ॥ ४८ ॥ स श्रीदसमसामंत—लोकलीलामनोहरां
॥ ददर्श तामिंद्रपुरी—मिवाक्षीणसुसंपदं ॥ ४९ ॥ [illegible] ॥ खुरलीखेलनाखिन्न—क्षत्रियक्षणवी-
क्षणं ॥ ददद्दृग्णोर्मुदं तस्य । चित्ते नीतिमसूत्रयत् ॥ ५० ॥ अर्हमिंद्रानिन्द्यपुत्रान् । वि-
पणिश्रेणिमाश्रितान् ॥ पश्यन् स नृपतेः सिंह—द्वारमासादयत् क्रमात् ॥ ५१ ॥ रत्नांशुपट-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दैर्व्योम । चित्रयंतमयत्ततः ॥ कृत्रिमाकृत्रिमैणारि—द्विपद्वीपि भयंकरं ॥ ५२ ॥ आकृ-
ष्टायुधसंघात—पूर्णपाणिभिराश्रितं ॥ अन्यच्छायावलोकेऽपि । सादरैर्द्वारपालकैः ॥ ५३ ॥
करकजमदैश्चित्रं । क्वचिन्मृगमदैरिव ॥ क्षुसं खुरैस्तुरंगाणां । रिपूरःस्थलवत्क्वचित् ॥
॥ ५४ ॥ स्वर्गमंरूपसंकाश—मंरूपैर्मंफितं पुरः ॥ सुवेगः प्राप्तवान् राज—प्रासादमति-
सुंदरं ॥ ५५ ॥ [redacted] ॥ दौवारिकैः क्षणं रुद्धे । नृपानुज्ञातवेत्रिणा ॥ सहासौ
संसदं तस्या—ससाद बहुसादभृत् ॥ ५६ ॥ सहस्रसंख्यैस्तद्रूपै—र्नूपैरावद्धशेखरैः ॥ स्वसानु-
भिर्मेरुरिव । तेजोवद्भिरुपासितं ॥ ५५ ॥ कुमारैः स्फारशृंगारैः । किरणैरिव भास्करं ॥ वी-
रव्रतमिवोत्साहै–र्मूर्त्तिमद्भिरधिष्ठितं ॥ ५६ ॥ रत्नभीत्तिमणिस्तंभ–प्रतिबिंबनिभेन च ॥ अ-
माभिः स्वबलैः कृता–नेकमूर्त्तिमिवाद्भुतं ॥ ५७ ॥ चामराभ्यां मरालाभ्या–मास्यहेमाब्जशं-
कया ॥ वारस्त्रीभिर्वीज्यमानं । स्वःस्त्रीभिरिव वासवं ॥ ५८ ॥ वेत्रिणा शुचिवेषेण । स्वर्ण-
दंडधरेण च ॥ वर्ण्यमाननमन्नूप–नामग्राहकृताग्राहं ॥ ५९ ॥ चिंतयंतं स्वतेजोभि–स्तृण-
वत्सकलं जगत् ॥ सोऽपश्यद् बाहुबलिनं । तत्र सिंहासनस्थितं ॥ ६० ॥ [redacted] ॥



For Private And Personal Use Only

क्षुब्धस्तद्दर्शनात्पूर्व-मपूर्वक्षात्रतेजसं ॥ संवृत्याकारमनमत् । सुवेगस्तं महीपतिं ॥ ६१ ॥
स्वशेखरीकृतकर-स्तन्मुखे दत्तलोचनः ॥ भ्रूसंज्ञयाथ तद्दिष्टे । विष्टरे निषसाद सः ॥ ६२ ॥
अथैनं वसुधानाथो । गिरा गांभीर्यगर्भया ॥ प्रतिध्वानैः सभाभित्ती-र्मुखरा रचयन्
जगौ ॥६३॥ क्वचिदार्यस्य कुशलं । पूज्यस्य मम तातवत् ॥ अयोध्याकुलपुः क्वचि-दस्ति
स्वस्तिपरांतरा ॥ ६४ ॥ क्वचित् प्रजा कुशलिनी । तातेन चिरलालिता ॥ षट्खंडविजये
जातो-ऽप्यार्यः क्वचिदखंडितः ॥ ६५ ॥ चतुरशीतिलक्षाणां । रथवारणवाजिनां ॥ तत्तद्दि-
ग्विजयो जातः । क्वचिद्बाधाविवर्जितः ॥ ६६ ॥ भूपतीनामशेषाणा-मप्यस्ति निरपायता ॥
प्रत्यूहः कश्चिदन्यस्या-प्यस्य तिष्ठति न क्षितौ ॥ ६७ ॥ इत्युक्त्वा विरते भूपे । सुवेगः प्र-
णिपत्य तं ॥ जगाद तद्गिरा क्षुब्ध । इव किंचिद्विमृश्य सः ॥ ६८ ॥ अन्येषामपि यस्य स्या-
त् । प्रसादात्कुशलं गृहे ॥ त्वज्ज्येष्ठस्य च तस्यापि । पृष्टैव कुशलेऽथ का ॥६९॥ त्वज्ज्ये-
ष्ठोऽधिपतिर्यस्या । विनीतायाः कथं भवेत् ॥ तस्याः प्रत्यूहलेशोऽपि । जिनोक्ताविव संशयः॥
॥ ७० ॥ यदरातींश्चक्ररत्नं । भिनत्ति स्वयमेव हि ॥ तस्य प्रजासु कुशलं । सर्वदैव विभाव्य-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ते ॥ ७१ ॥ षट्खंडविजये तस्य । पुरः स्थातुं क ईश्वरः ॥ सुरासुरनराः सर्वे । सेवां कुर्वंति यस्य हि ॥ ७२ ॥ तस्याश्वरथनागानां । कः प्रत्यूहं करोतु जोः ॥ शास्ता येषां हि जरत–त्रैलोक्यविजयक्रमः ॥ ७३ ॥ अधिपो जरतो येषा–मन्येषामपि जूतले ॥ सूर्योऽब्जानामिव म्लानि–स्तेषां हानिः कुतोऽस्ति किं ॥ ७४ ॥ यः सेव्यते यक्षलक्षै–र्नृपैर्विद्याधरैः सुरैः ॥ न मायति तथाप्येवं । स स्वबांधववर्जितः ॥ ७५ ॥ भ्रमता सर्वराष्ट्रेषु । क्वचिद्बंधुरदर्शि न ॥ तेन तानेव सोत्कंठं । स्पृहयत्येष बांधवान् ॥ ७६ ॥ अनागतान् दिग्जयेऽपि । तथा द्वादशवार्षिके ॥ राज्याजिषेके संवृत्ते । स स्वबंधून् समीहते ॥ ७७ ॥ विकल्पं ते तु संचिंत्य । स्वयं किमपि चेतसि ॥ जगृहुस्तातपादांते । व्रतं निःसंगताकृते ॥ ७८ ॥ निरीहा निःस्पृहास्ते तु । स्वदेहेऽपि यथासुखं ॥ वर्त्ततां त्वयि सोत्कंठः । प्राहिणोज्जरतस्तु मां ॥ ७९ ॥ तदेहि देहि तस्य त्वं । स्वसंगमजवं सुखं ॥ सुखदुःखप्रतीकारं । तद्राज्यं बंधुना विना ॥८०॥ ॥९८॥
स्वबांधवः कुलीनानां । ज्यायान् पूज्यो हि तातवत् ॥ नमतस्तव तं नाम । मानसिद्धिर्विशेषतः ॥ ८१ ॥ कुर्वतस्तस्य सेवां ते । लज्जा नैव जविष्यति ॥ सुरा अपि नमस्यंति । यस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पादांश्च चक्रिणः ॥ ८२ ॥ इयद्दिनानि नायात । इति शंकां च मा कृथाः ॥ अपराधं स हि ज्येष्टः । कनिष्ठस्य सहिष्यति ॥ ८३ ॥ त्वत्संगमसुखाज्ज्येष्ठो । वात्सल्यादपि ते विभो ॥ राज्याद्यमधिकं दाता । त्राता सर्वत्र कष्टतः ॥ ८४ ॥ इंद्रोपेंद्राविव युवा-मश्विनीतनयाविव ॥ संयुज्य राज्यं कुरुतं । वैरिहृच्छल्यसंनिभौ ॥ ८५ ॥ मद्बंधुरिति चित्ते मा । निर्भयो भव भूपते ॥ दृप्तानां शातनं राज-धर्मोऽयमतिदारुणः ॥८६॥ कर्णेजपानां वितथं । स्तादुक्तं हि तवागतेः ॥ कुदेवज्ञवृष्टिवचो । यथा वारिदवर्षणात् ॥ ८७ ॥ मुक्त्वान्यत्सकलं सैन्यं । तस्यैकोऽपि चमूपतिः ॥ सुषेणः सह्यते केन । दंडपाणी रणांगणे ॥ ८८ ॥ चतुरशीतिसहस्रा—ण्यापतंतो गजा रणे ॥ पर्वता इव रुध्यंते । तस्य केन सपक्षकाः ॥ ८९॥ तावंतस्तुरगास्तस्य । कल्लोला इव वारिधेः ॥ स्खल्यंते केन तूद्वेलाः । प्रसरंतो रणाजिरे ॥ ९० ॥ अन्येषां तस्य सैन्यानां । गणना का विधीयते ॥ भरतं समरं सोढा । न सोऽप्याखंडलो बली ॥ ॥ ९१ ॥ आसनार्द्धं सुरेंद्रोऽपि । दत्ते यस्य महीपतेः ॥ नमतस्तं भवेल्लज्जा । ज्येष्ठं का तव भो द्विधा ॥ ९२ ॥ राज्येन जीवितव्येन । यदीच्छा वर्त्तते तव ॥ तदा भरतभूभर्त्तु-स्त्वं से-

॥१९९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वस्व पदांबुजं ॥ ए३ ॥

इत्याकर्ण्य सुवेगोक्तं । ततो बाहुबलिर्बली ॥ निजांशयोर्ददद् दृष्टिं । जगादारुणलोचनः ॥ ए४ ॥ दूत त्वमसि वाग्मीति । सत्यं स्वपतिकार्यकृत् ॥ यदवोचः परस्थाने । हितं तस्येदृगुच्चकैः ॥ ए५ ॥ स सेव्यो जरतश्चक्री । मया बंधुर्न संशयः ॥ ज्येष्ठो हि तातवत्पूज्यः । कुलीनानामयं क्रमः ॥ ए६ ॥ गुरुः सेव्यो गुरुत्वेन । वर्त्तमानः कनीयसा ॥ गुरुश्चेदगुरुत्वेन । वर्त्तते सेव्यते स किं ॥ ए७ ॥ आददे निजबंधुभ्यः । स राज्यानि छलप्रियः ॥ अहो तस्यास्ति सौभ्रात्र—महो स्नेहरसो महान् ॥ ए८ ॥ सूनवस्तस्य तातस्य । तेऽपि नो रणजीरवः ॥ ज्येष्ठेन सह लज्ज्यंते । कुर्वंतः कलहं पुनः ॥ एए ॥ लज्ज्यते यदि नो ज्येष्ठो । तदा लज्जामहे वयं ॥ विमृश्य तातपादांते । दीक्षां ते जगृहुस्तदा ॥१००॥ सेवंते यदि तं जूपा—स्तदा तेऽधिकलिप्सवः ॥ तातदत्तेन राज्येन । तुष्टः सेवे च तं कथं ॥ १ ॥ सूचयिष्यंति पिशुनाः । किं दोषं तद्विधं मम ॥ किं गृह्णन् बंधुराज्यानि । मयायं यदुपेक्षितः ॥ ॥ २ ॥ ग्रासादीनां मयाकारि । जंगः किं तस्य कस्यचित् ॥ अपराधं मदीयं यत् । सोऽपि



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मृष्यति निश्चितं ॥ ३ ॥ तातसूनुरयं ज्येष्टो । मान्यः शक्र इतीव तं ॥ निवेशयत्यासनार्धे । स प्रभावो न भारतः ॥ ४ ॥ किं सैन्यं कः सुषेणस्तु । किं चक्रं भरतस्तु किं ॥ रणांगणप्रणयिनि । वृथा तत्सकलं मयि ॥ ५ ॥ खुरलीखेलनाभ्यासे । यत्पूर्वं गांगसैकते ॥ तमुदच्छालयं व्योम्नि । कृपयाबिभरं पुनः ॥ ६ ॥ तद्विस्मृतं किमेतस्या–धुना राज्यमदेन भोः ॥ प्राहिणोस्त्वादृशं दूतं । यन्मां प्रति दुराशयः ॥ ७ ॥ युग्मं ॥ क्रयक्रीता रणे सर्वे । ते यास्यंत्येव सैनिकाः ॥ केवलं भरतः सोढा । मद्दोर्दंडबलव्यथां ॥ ८ ॥ याहि दूतो ह्यवध्योऽसि । राज्ञा न्यायैककांक्षिणा ॥ स एवाभ्येत्य लभतां । फलं दुर्नयसंभवं ॥ ९ ॥ इति गंभीरया वाण्या । स दूतोंतश्चमत्कृतः ॥ आत्मजीवितमादायो–त्तस्थावासनतः शनैः ॥ १० ॥ कांदिशीको दिशः पश्यन् । दृशा चपलयातरां ॥ प्रस्खलन् सोंतरीयेन । पादलग्नेन साध्वसात् ॥ ॥ ११ ॥ भदस्रेभ्यः कुमारेभ्यो । नृपेभ्योऽपि हतं स्वकं ॥ मन्यमानः सुवेगोऽथ । सभाया निरगाच्छनैः ॥ १२ ॥ युग्मं ॥ स रथे जीवितव्यस्य । मनोरथमिवांगिनं ॥ आरुरोह भयोद्भ्रांतः । शाखिनं वानरो यथा ॥ १३ ॥ नवीन इव कोऽप्येष । सभाया निर्ययौ क्षणात् ॥ दू-





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तोऽयं जरतेशस्य । नृपतेस्तर्कयाम्यहं ॥ १४ ॥ मुक्त्वैकं बाहुबलिनं । कोऽप्यस्ति नृपतिः क्षितौ ॥ अस्यैव नृपतेर्ज्येष्ठो । भ्राता श्रीऋषजात्मजः ॥ १५ ॥ इयत्कालं गतः सोऽजू—त्कथं कुत्रापि मंम्रले ॥ षटूखंमं जरतं जेतुं । गतोऽजूच्चक्रवर्त्यसौ ॥ १६ ॥ स प्रैषीद् बाहुबलिनं । प्रति दूतं कथं खलु ॥ आकारणाय सेवायै । स्वस्यादेशेन सांप्रतं ॥ १७ ॥ किमाखुरपि नास्यास्ति । मंत्री यस्तं निवारयेत् ॥ मंत्रिणः शतशः संति । प्रेरितस्तैर्विशेषतः ॥ १८ ॥ स सुप्तं जागरयति । सिंहं दंमान्निघाततः ॥ दैवानुसारिणी बुद्धिः । प्रायेण खलु वर्त्तते ॥ ॥ १९ ॥ इत्थं लोककथाः श्रुण्वन् । मिथः पौरमुखोदिताः ॥ रथेन वेगिना दूतो । नगर्या निर्ययौ रयात् ॥ २० ॥

सुजटानां भुजास्फोटै—र्विविधायुधनर्त्तनैः ॥ सिंहनादैश्च वीराणां । त्रस्यद्रथहयो ययौ ॥ २१ ॥ स तदा जीवितव्याशा—मीषन्मेने पुराद् बहिः ॥ सिंहयूथव्यथोन्मुक्तः ॥ कांदिशीकः कुरंगवत् ॥ २२ ॥ पुरे पुरे वैरवार्त्ता—श्रवणेष्वतिसादरान् ॥ वीरानुदस्त्रान् सकलान् । स्वभुजामददर्पितान् ॥ २३ ॥ बालानपि रणोत्कंठा—जाजिनः शस्त्रसत्करान् ॥ निरीक्ष्येति ॥२०२॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स चिंतांत–श्चिंतयामास दूतराट् ॥ २४ ॥ युग्मं ॥ बाला मातृमुखा एते । ये युद्धे स्पृहया-
लवः ॥ तत् किं भूमिगुणः सोऽय–मुत बाहुबलेर्गुणः ॥ २५ ॥ भवंति यादृशा भूपा–स्ता-
दृश्यो हि प्रजा अपि ॥ स्वस्वामिबलमाहात्म्यात् । प्रोत्सहंते यदप्यमी ॥ २६ ॥ विग्रहं भ-
रतेशेनो–पहासमिव सोऽश्रुणोत् ॥ बलातिरेकात्स्वविभोः । परावज्ञाकृतो जनात् ॥ २७ ॥
अस्त्राण्युत्तेजयामासु–स्तेजांसीव स्वभूपतेः ॥ वाहांश्च वाहयामासुः । केचिच्चक्रुर्दृढान् रथा-
न् ॥ २८ ॥ सज्जीचक्रुः पटकुटीं । केचिज्जंगमसौधवत् ॥ कवचांश्च शिरस्त्राणान् । दृढीचक्रुः
परेऽपि हि ॥ २९ ॥ स दूतः संचरन् मार्गे । विकटाक्षिकटाक्षितः ॥ लोकैः पितृवधोद्भूत–वैरे-
णेवाटवीमितः ॥ ३० ॥ पार्वतीयानपि भूपान् । भक्तान् बाहुबलौ बहु ॥ रणसज्जानुदस्त्रांश्च
। पश्यतिस्म स सर्वतः ॥ ३१ ॥ वैरहेतुं मिथो भ्रात्रो–र्भीरुं लोकापवादतः ॥ निनिंद स हृ-
दात्मानं । तदा तद्विधदर्शनात् ॥ ३२ ॥ चक्रिणोऽस्याप्यपूर्णं किं । यत्सेवामस्य कांक्षति ॥ वृ-
था खलीकृतः सोऽय–मस्माभिरिव केसरी ॥ ३४ ॥ आलोचयन्निति मुहु–र्दिनैः कतिपयैर-
थ ॥ रथवेगेन स प्राप । स्वस्वामिविषयं सुखी ॥ ३५ ॥ [redacted] ॥ भो भो स्वस्वप्रियापत्य-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुख्यं जारमनातुरं ॥ शीघ्रं नयत दुर्गेषु । चरानागतसूत्रता ॥ ३६ ॥ अपक्वान्यपि धान्या-
नि । लुनीताशु लुनीत रे ॥ क्षिपंतु च क्षितेरंतः । सर्वनाशोऽस्तु माधुना ॥ ३७ ॥ किमप-
त्यादिचिंताभिः । धुर्वहं स्वांगमप्यहो ॥ क्रुद्धे बाहुबलौ दुर्ग–बलमप्यन्यथा यतः ॥ ३८ ॥
इति लोकगिरं श्रुत्वा । किमसौ किं वदत्यसौ ॥ मत्तो वेगवतो लोको । यदेवं वक्ति तद्भयं ॥
॥ ३९ ॥ ध्यायन्निति सुवेगोऽथ । स्मरन् बाहुबलेर्वचः ॥ वेमादयोध्यामासाद्य । ननाम भ-
रतेश्वरं ॥ ४० ॥ [redacted] ॥ तत्पुरो योजितकरो । भक्त्या संदेशहारकः ॥ नैगमेषी
सुर इव । कृतांजलिरुपाविशत् ॥ ४१ ॥ स्मयमानोऽथ चक्र्यूचे । सुवेगं स्नेहपूर्वकं ॥ मद्बं-
धोः कुशलं सर्वं । यत्सुवेगास्त्वमागतः ॥ ४२ ॥ अन्याज्ञां सहते नासौ । गंधद्वीप इवाथवा ॥
परीक्षितोऽयं बहुधा । बालक्रीडासु यन्मया ॥ ४३ ॥ इत्युक्ते स प्रणम्याथ । जगाद भरता-
धिपं ॥ कः क्षमोऽकुशलं कर्तुं । स्वामिंस्तस्मिन्नपि क्षितौ ॥ ४४ ॥ स पूर्वं सामवाक्येन । ॥२०४॥
मया संबोधितो हितं ॥ पश्चादुपायैर्विविधै–र्मन्येत न हि किंचन ॥ ४५ ॥ सुषेणसैन्यचक्रा-
दि–वर्णनेऽवज्ञया समं ॥ षट्खंडविजयेऽप्येषो–ऽनाकर्णितमसूत्रयत् ॥ ४६ ॥ ददद् दृशौ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निजांसेऽसौ । याहि दूत निजं विभुं ॥ राज्यजीवितलाभाय । प्रेषयेत्यवदत्पुनः ॥ ४७ ॥ तत्सीमवासिनो लोकाः । सर्वेऽस्मिन्ननुरागिणः ॥ स्वजीवितप्रदानेना–पीह्नंति किल तद्विषः ॥ ४८ ॥ त्वद्वैरेण विशेषेण । प्रोत्सहंते रणाय ते ॥ स्वस्वामिशक्तिसंभूत—गुणा एव हि तादृशाः ॥ ४४ ॥

इत्युक्तिभाजि भूमींडु–दूते प्राह सहेलया ॥ कनीयान् मम तादृक्षो । रिपुकक्षाग्निरस्ति हि ॥ ५० ॥ विरोधं बंधुना नाहं । करिष्ये रणकर्कशं ॥ स्वबंधुः प्राप्यते कुत्र । सर्वदेशावगाहने ॥ ५१ ॥ संपदो राज्यमखिलं । प्राप्यते सर्वतो नरैः ॥ स्वसोदरो विना भाग्यं । लभ्यते न हि कुत्रचित् ॥ ५२ ॥ वृथा वित्तं विना दानं । विना चक्षुरिवाननं ॥ वृथा राज्यं विनामात्यं । विश्वं बंधुं विना वृथा ॥५३॥ तद्दिनं निधनं जाने । तज्जीवितमजीवितं ॥ यत्र बंधूपकाराय । यत्नार्त्तत्राणहेतवे ॥ ५४ ॥ स पतिः पतितस्तत्र । राजतेजोऽपि राजते ॥ यत्र गोत्रविघातोत्थ्या । लक्ष्मीर्वसति मंदिरे ॥५५॥ निःसत्वोऽयमभूद्भैका । हसंतु यदि मामिति ॥ न योत्स्ये बंधुना सार्धं । तथाप्येष कनीयसा ॥५६॥ श्रुत्वेत्यवोचत्सेनानी । सुषेणो निजगर्हणा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





त् ॥ अंतःकुद्धो महोत्साहो । धीरगंजीरवाग्जरैः ॥ ५७ ॥ युक्ता क्षमा युगादीश—सूनो तव नरेश्वर ॥ अपूर्वो बांधवस्नेहः । क्षमां कारयति त्वयि ॥ ५८ ॥ एकहस्ततलाघात । इव स्नेहोऽस्ति वां प्रजो ॥ स त्वां तु शत्रुवद् द्वेष्टि । स्निह्यत्यस्मिन् जवान् पुनः ॥ ५९ ॥ नोपेक्षणीयो भ्रातापि । स्वाज्ञाजंगकरो नृपैः ॥ राज्ञामाज्ञैव ज्योत्स्नेव । सर्वतेजस्करा हि सा ॥ ६० ॥ क्रियते दिग्जयो जूपैः । कृतार्थैर्निजराज्यतः ॥ अपि तेजोऽजिवृद्ध्यर्थं । केवलं न तु लोजतः ॥ ६१ ॥ नोपेक्ष्यो बंधुरूपोऽपि । रिपुरायतिमिच्छता ॥ रोगराजोंगजूतोऽपि । हंति हंत विवर्द्धितः ॥ ६२ ॥ यावत्सैन्यरजोराजि—विहायं नार्कमंमलं ॥ तावत्त्यजति विह्रायः । किमेष निजमंमलं ॥ ६३ ॥ न यावत्त्वक्क्जानीक—जरादवनता धरा ॥ तावन्मानोद्धुरस्यास्य । कथं स्यात्कंधरा नता ॥ ६४ ॥ विलंबः सर्वथा कार्यो । न त्वयात्र मनागपि ॥ नो चेदमून् मंत्रिमुखान् । वद राजन्नयोक्तिजिः ॥ ६५ ॥ मंत्रिणोऽपि सुषेणोक्तं । प्रतिशब्दा इवैव तत् ॥ प्रोत्साहयंतो जूपालं । तथेत्यूचुर्विशेषतः ॥ ६६ ॥ अवादयन्नृपो जंजा—मदंजां रणकर्मणि ॥ अमिलन्नादतस्तस्याः । सर्वतोऽपि महीधवाः ॥ ६७ ॥ चक्री शुजेऽह्नि सुस्नातो । दधानो ॥२०६॥

For Private And Personal Use Only

वासेसी शुची ॥ श्रीयुगादिजिनाधीश–मर्चयत् कुसुमैर्वरैः ॥ ६८ ॥ ननाम पौषधौकःस्था-
न् । मुनीन् वांछितसिद्धये ॥ तद्धर्मलाभाशीरासी–त्तस्यातोऽधिकसिद्धिदा ॥ ६९ ॥ ततः सु-
वेषः सानंदः । पौरुषैकविभूषणः ॥ चक्री स्वपुरपर्यंते । स्कंधावारं न्यवीविशत् ॥ ७० ॥
अयस्कांतसमाकृष्टा । अयोभावा इव स्फुटं ॥ देशग्रामाधिपाः सर्वे । भंभानादादुपाययुः ॥
॥ ७१ ॥ पर्वता इव तत्रैयु–र्जंगमाः करिणो हयाः ॥ तत्र मानवपाथोधौ । कल्लोला इव
तेऽभवन् ॥ ७२ ॥ तस्मिन् भुवननाथेऽथ । प्रवाहा इव भूभृतां ॥ आजग्मुः सैन्यनिचयाः ।
सर्वे तस्याधिकारिणः ॥ ७३ ॥ पतिपुत्रवतीभिः स–त्कुलकन्याभिरादरात् ॥ अखंडैरक्षतै
राजा । कृतमंगलवर्द्धनः ॥ ७४ ॥ स्तूयमानो वंदिवृंदैः । सेव्यमानः सुरैर्नृपैः ॥ गीयमानः पु-
रंध्रीभि–र्वीक्ष्यमाणो महाजनैः ॥ ७५ ॥ गजरत्नं महातुंगं । धवलं तद्यशःसमं ॥ पक्षद्वय-
ऊरहानं । कस्तूरीपत्रवल्लिकं ॥ ७६ ॥ पर्वतांभोधिनिम्नानां । लीलयोल्लंघनक्षमं ॥ स य-
क्षाणां सहस्रेण । सर्वतोऽधिष्ठितं सदा ॥ ७७ ॥ नाम्ना सुरगिरिं पूर्व–गिरिं भास्करवत्तदा ॥
आरुरोह दिनारंभे । यात्रारंभकृते कृती ॥ ७८ ॥ [illegible] कुलकं ॥

तदंशा इव चान्येऽपि । गजाश्वरथवेसरान् ॥ ससन्नाहाः शस्त्रभृत–स्तदैवारुरुहुः क्षणात्
॥ ७९ ॥ संपूर्णसोमप्रतिमं । कल्याणकलशावृतं ॥ अधिष्ठितं नागसुरैः । सहस्रेण जया-
भिधं ॥ ८० ॥ छत्ररत्नं परछत्र–त्रासकृत्तस्य चक्रिणः ॥ विकासं शिरसि प्राप । शेषाहेरिव
सन्मणिः ॥ ८१ ॥ युग्मं ॥ सहेलाभिर्महेलाभि–र्वीज्यमानोऽथ चामरैः ॥ नुनोद गजरत्नं
स । पादांगुष्ठैकचालनात् ॥ ८२ ॥ स निःस्वानप्रतिध्वानै––र्बधिरा रचयन् दिशः ॥ ब्रह्मांडं
मुखरीकुर्वन् । भंभाभांकारवर्द्धिनैः ॥ ८३ ॥ मांगल्यतूर्यनिर्घोषैः । पुष्णन् वारणबृंहितान् ॥
किरणैरिव मार्त्तंडो–ऽचालीत्सैन्यैर्महीपतिः ॥ ८४ ॥ युग्मं ॥ मार्त्तंडमंडलमिव । दीप्यमानं
समंततः ॥ चक्ररत्नं सैन्यपुरो । वभूवारसहस्रभृत् ॥ ८५ ॥ दिग्नागा दृढदंताग्रा । भवंत्व-
पि कुलाचलाः ॥ भो भो भजाहीनपरा–नपि शेष सुयष्टिवत् ॥ ८६ ॥ दूराद्दूरं दिशो यांतु ।
विपुले विपुला भव ॥ त्वमाकाशावकाशं हि । देहि संप्रति सत्वरं ॥ ८७ ॥ अथ श्रीभरता-
धीशः । सैन्यसंभारभारतः ॥ निःस्वानदुंदुभिध्वानै–रेव वो दलयिष्यति ॥ ८८ ॥ इत्यादि-
बंदिबिरुदान् । शृण्वन् भरतभूपतिः ॥ चचाल रथचित्कार–वाचालीकृतदिङ्मुखः ॥ ८९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[illegible]ः कलापकं ॥ रजोंधकारैर्द्युमणिं । खद्योतमिव सैनिकैः ॥ स्थिरामप्यस्थिरां कुर्वन् ।
शोषयन् मार्गनिम्नगाः ॥ ७९ ॥ सरांसि च स्थलीकुर्वन् । गजदानैर्नवान्यपि ॥ समंततः स्थ-
॥ १०७ ॥ लीर्निम्ना । अमार्गं मार्गमेव च ॥ ८० ॥ नित्यं नित्यं प्रयाणेन । योजनावधिना नृपः ॥ दि-
नैः कतिपयैः प्राप । वहलीदेशसंनिधिं ॥ ८१ ॥ त्रिभिर्विशेषकं ॥

इतः श्रीचक्रिणा पूर्वं । सैन्यावासकृते नराः ॥ प्रहिता एत्य नृपाल–मिति हर्षाद्व्य-
जिज्ञपन् ॥ ८२ ॥ जय स्वामिन्नुत्तरस्यां । विद्यते विपिनं दिशि ॥ गंगातटे विटपिनां । वि-
टपैः पिदधद्रविं ॥ ८३ ॥ तत्र चारुहिरण्योच्च–मणिरत्नमयो महान् ॥ प्रासादस्तातपादानां
। विद्यते ह्यसंश्रयः ॥ ८४ ॥ तस्यांतः संयमी कश्चि–द्विपश्चित्कुलमंडनं ॥ सद्ध्याननिरत-
स्वांतः । सुखं तिष्ठति शिष्टधीः ॥ ८५ ॥ इत्याकर्ण्य वचोऽमीषां । भरतः सुकृतादरः ॥ ज-
गाम तत्र विपिने। नंतुं श्रीप्रथमार्हतं ॥८६॥ यथाविधि जिनं नत्वा । पूजयित्वा स्वभक्तिभिः ॥ ॥ १०७ ॥
निषसाद वेदिकायां । रत्नमय्यां महीपतिः ॥८७॥ पश्यन्नितस्ततो दृष्ट्वा । तं मुनिं प्रणनाम
च ॥ उवाच च सनमौक्ति–युक्तं सद्व्यक्तवर्णभृत् ॥८८॥ मुने त्वमसि विद्याभृत् । मयि युद्धा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



य सोत्सुकः ॥ सार्द्धं नमिविनमिभ्या-मापतः स्मरसीह तत् ॥ ९९ ॥ अधुना सर्वसत्वेषु ।
तव वृत्तिरमूदृशी ॥ तद् ब्रूहि निजवैराग्य-कारणं करुणाकरं ॥ २०० ॥ इत्युक्त्वा हेतुजिज्ञा-
सुं । जगाद नृपतिं मुनिः ॥ जितौ तौ नमिविनमी । अहं च जवता तदा ॥ १ ॥ स्वामि-
नः संनिधिं गत्वा । कृत्वा राज्यं स्वसूनवे ॥ वैराग्याद्धृतसाम्राज्य-मस्मान्निजेगृहे नृप ॥
॥ २ ॥ नित्यं श्रीमद्युगादीश-सेवां तावत्करोम्यहं ॥ जवह्यस्य साम्राज्य-दायकं सेवते न
कः ॥ ३ ॥ क्वाधुना विद्यते तात । इति पृष्टोऽथ चक्रिणा ॥ पुनर्मुनिर्जगादैवं । चक्रिन् श्रुणु
कुतूहलं ॥ ४ ॥ स्वाम्यस्ति श्रीप्रज्ञोद्याने । सांप्रतं सुरसेवितः ॥ धरणेंद्रस्तु तत्रागा-दनंता-
दिसमन्वितः ॥ ५ ॥ धरणेंद्रस्तदा नत्वा । पप्रच्छ त्रिजगद्गुरुं ॥ सर्वदेवेष्वनंतस्या-धिका देह-
द्युतिः कथं ॥ ६ ॥ प्रभुरप्याह जातोऽय-मितस्तुर्ये जवे गते ॥ आजीरो मुनिदोषाय । पो-
षाय परमांहसां ॥ ७ ॥ मृत्वाथ नरके भुक्त्वा । विविधा वेदनाः स हि ॥ ततो बभूव सुग्रा-
मे । द्विजः कुष्टार्त्तिपीडितः ॥ ८ ॥ तेनान्यदा सुव्रताख्यः । शिष्यो नः पृष्ट उज्जगौ ॥ प्राग्भ-
वे जवता दूनो । मुनिस्तेनासि कुष्टवान् ॥ ९ ॥ आराध्यो न विराध्यो हि । कथंचिद्यतिरुत्त-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मैः ॥ स चेत्क्रमावांस्तदपि । पापं पृष्टानुगं नवेत् ॥ १० ॥ सन्मानितो मुनिर्दत्त । स्वर्गा-
दिगतिमुत्तमां ॥ असन्मानात्तु मूलाग्नि-रिवानंतकुलं दहेत् ॥ १० ॥ पुनश्चामयविध्वंसो-
पायं पृष्टो मुनिर्जगौ ॥ शत्रुंजयं गिरिपतिं । त्वं नजस्व महामनाः ॥११॥ रागद्वेषविनिर्मुक्त
-स्तत्र साम्यरसाश्रयः ॥ नवान् कर्मक्षयं कृत्वा । रोगोन्मुक्तिमवाप्स्यसि ॥ १२ ॥ वज्रीनू-
तेन्यः कर्मन्यो । गाढेन तपसा यथा ॥ मुच्यते देहवांस्तद्वत् । पुंमरीकस्य सेवया ॥१३। प्रायः
पापपरित्यक्ता-स्तिर्यंचोऽप्यत्र वासिनः ॥ प्रयांति सुगतिं तीर्थ-माहात्म्याद्विशदाशयाः ॥१३।
सिंहाग्निजलधिव्याल-नूपालविषयुद्धजं ॥ चौरारिमारिजं चास्य । स्मृतेर्नश्यति भयं नृणां । १४।
उग्रेण तपसा ब्रह्म-चर्येण च यदाप्नुयात् ॥ शत्रुंजये तन्निवसन् । प्रयतः पुण्यमश्नुते ॥१५॥
नूर्भुवःस्वस्त्रये तीर्थं । यत्किंचिन्नाम विद्यते ॥ तत्सर्वमेव दृष्टं स्याद् । दृष्टे श्रीविमलाचले ॥
॥ १६ ॥ श्रुत्वेत्यसौ मुनिमुखात् । पुंमरीकं गिरिं ययौ ॥ कुर्वन् यथोक्तं समनूत् । क्रमा-
द्दोषविवर्जितः ॥ १७ ॥ विशेषादथ वैराग्यं । संपन्नोऽनशनेन सः ॥ मृत्वानंतो बनूवाय—
मनंतद्युतिधारकः ॥ १८ ॥ तीर्थसेवाप्रनावेण । नवेऽसौ तृतीये ह्यतः ॥ मुक्तिमेष्यति निः-

For Private And Personal Use Only

क्षीण–कर्मानंतचतुष्टयः ॥ १९ ॥ तच्छ्रुत्वानंतनागोऽपि । ययौ शत्रुंजयं गिरिं ॥ अहं च ती-
र्थमुद्दिश्य । समं तेनैव साग्रहं ॥ २० ॥ अष्टाह्निकां ततः कृत्वा । स महोत्सवपूर्वकं ॥ ययौ
पुनर्निजं स्थानं । भक्त्या तीर्थस्य संस्मरन् ॥ २१ ॥ शत्रुंजयसमं तीर्थं । नास्ति त्रिभुवनेऽ-
प्यहो ॥ यस्य स्मरणमात्रेण । विपदो यांति दूरतः ॥ २२ ॥ तीर्थात्तीर्थं भ्रमन्नेष । सर्वत्राहं
महीपते ॥ अत्रागां श्रीजिनं नंतुं । दृष्टस्त्वं च प्रसंगतः ॥ २३ ॥ श्रीबाहुबलिनः पुत्रो ।
नाम्ना सोमयशा इति ॥ तेनायं श्रीयुगादीश–प्रासादस्तु विनिर्ममे ॥ २४ ॥ श्रीयुगादिजि-
नाधीश–त्रैलोक्यजननायकः ॥ त्वं तु तस्य तनूजोऽसि । दृष्टो रम्यमिदं मम ॥ २५ ॥

श्रुत्वेति भारतीं चक्री । स्मरन् शत्रुंजयस्य सः ॥ ऋषभस्वामिनश्चापि । निर्वेदान्मुनि-
मानमत् ॥२६॥ दत्वाशीर्वं मुनिश्चागा–च्चक्री चावाससंचयं ॥ तत्रैवादापयच्चारु–द्रुमसंभारभा-
सुरे ॥२७॥ इतो बाहुबलिरपि । श्रुत्वा भरतमागतं ॥ स्वसिंहनादेन समं । ततो भंभामवादयत्
॥२८॥ ससैन्यं भरतं जेष्या–म्यहं जेष्याम्यहं मिथः ॥ स्पर्द्धमाना महावीरा । रयात्सर्वेऽभ्यु-
पागमन् ॥ २९ ॥ अंतर्गतं निजं तेजो । दर्शयंत इवोच्चकैः ॥ शस्त्रैर्दंतुरिताकाशा । वीरास्त-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्र चकासिरे ॥ ३० ॥ तत्र बाहुबलेर्गृह्या । भटास्तं कर्कशं रणं ॥ मेनिरे महदुत्साहाः । स-
दुत्सवमिवागतं ॥ ३१ ॥ चतुरंगचमूचक्रै-स्तिलकैस्तनयैर्वृतः ॥ उदारैः स्फारशृंगारै-र्मूर्त्तैर्वी-
ररसैरिव ॥ ३२ ॥ भंभानिःस्वाननिःस्वानै-र्दिशो मुखरयंस्तरां ॥ ध्रियमाणातपत्रेण । चा-
मराभ्यां विभूषितः ॥ ३३ ॥ स स्वस्य भद्रंकरणं । भद्रं करिणमुत्तमं ॥ आरुरोह बाहुबलिः
। शुभेऽह्नि कृतमंगलः ॥ ३४ ॥ [redacted] ॥ सारस्फारपरीवारः । श्रीबाहुबलिभूपतिः ॥
सोऽपि स्वदेशपर्यंते । स्कंधावारं न्यवीविशत् ३५॥ प्रातर्बाहुबलिर्वीरं । सर्वराजकसम्मतं ॥
सेनापतिं सिंहरथं । चक्रे तनयमात्मनः ॥३६॥ रणपट्टं स्वयं मूर्ध्नि । न्यधात्तस्य महीपतिः ॥
रराज तेन सोऽप्युच्चै-स्तेजसेवोर्ध्वगामिना ॥ ३७ ॥

भरतेशोऽपि भूपाला-नुमतं स्वदले व्यधात् ॥ सेनापतिं सुषेणाख्यं । वैरिसेनाविमर्द्दनं
॥ ३८ ॥ आहूय नृपतीन् सर्वान् । दूतेन भरतेश्वरः ॥ सपादकोटिपुत्रांश्च । तान् श्रीसूर्यय-
शोमुखान् ॥ ३९ ॥ नामग्राहं यथैकैकं । संभाष्य बहुमानतः ॥ अन्वशादिति तांश्चक्री ।
शक्रो वैमानिकानिव ॥ ४० ॥ युष्माभिर्दिग्जयोऽकारि । जिता भूपतयोऽखिलाः ॥ विद्याध-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राश्च दैत्याश्च । किराता अपि दुर्दमाः ॥ ४१ ॥ न कोऽप्यस्य वाहुबलेः । सामंतस्य समोऽ-
प्यभूत् ॥ संत्यस्य वहवो वीरा । रणकर्मणि कर्कशाः ॥ ४२ ॥ यथैकः परसेनासु । भवे-
त्पौरुषमंडितः ॥ तथास्य सकला वीराः । परमंडलभेदिनः ॥ ४२ ॥ अस्य ज्येष्ठः सोमय-
शाः । सूनुरन्यूनविक्रमः ॥ स लक्षं दंतिनां योद्धा । त्रिलक्षीं रथवाजिनीं ॥ ४३ ॥ कनीयान्
वांधवस्तस्य । नाम्ना सिंहरथो बली ॥ महारथी दिव्यशस्त्र–पवित्रितभुजव्रतः ॥ ४४ ॥ सिं-
हकर्णः परः पुत्रः । क्षुब्धार्णवसमध्वनिः ॥ बलादुद्धरति प्राज्यान् । पर्वतानपि पाणिना ॥
॥ ४५ ॥ अजेयो विश्ववीराणां । कुमारः सिंहविक्रमः ॥ सिंहसेनोऽपरः पुत्रो । रिपुसैन्यक्ष-
यक्षमः ॥ ४६ ॥ कुमारेषु त्रिलक्षेषु । कनीयानपि दुर्दमः ॥ एकोऽप्यक्षोहिणीं जेतु–मलंभू-
ष्णुरिति श्रुतिः ॥ ४७ ॥ अभूद्दिग्जयदंभेन । केवलं दिग्निरीक्षणं ॥ युद्धं हि वाहुबलिना–
धुना भावि धराधवाः ॥ ४८ ॥ ततो भवद्भिः सेनानी । सुषेणः सर्ववाहनैः ॥ प्रवाहैरिव पा-
थोधि–रनुगंतव्यमुच्चकैः ॥ ४९ ॥ इत्यादेशं समासाद्य । चक्रिणस्ते तु हर्षिताः ॥ जग्मुर्निजं
निजं स्थान–मीशानृण्याप्तिकांक्षिणः ॥ ५० ॥ खड्गमुद्गरचक्रासि–कुंतवाणासनादिकान् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आनर्चुर्विविधैः पुष्पै–रेते क्षात्रं हि दैवतं ॥ ५१ ॥ आस्याग्रैर्नादयामासु–र्नृपा नृत्तपुरस्सरं ॥
तेऽथ मंगलतूर्याण्या–रंज्ञानिव जयश्रियां ॥ ५२ ॥ तेषां पुरोऽक्षतै रत्नै–रलिखन्नष्टमंगलीं ॥
श्रियः कुसुमष्टदिग्भ्य–स्तेषां च प्रतिभूः खलु ॥ ५३ ॥ सैन्ययोरपि वीराणां । प्रातर्युद्धाभि-
कांक्षिणां ॥ त्रियामा शतयामेव । दुर्लंघ्या साभवत्तदा ॥ ५४ ॥ कदा प्रत्यूषकालः स्या–
दित्युत्थाय पुनः पुनः ॥ अपश्यन् शीतमहसं । तेऽस्ताचलपदानुगं ॥ ५५ ॥ ज्ञात्वा मनांसि
वीराणां । रणकांक्षीणि सत्वरं ॥ दृष्ट्योस्तदनुयायिन्यो–र्निशा भीतेव नाययौ ॥ ५६ ॥

अथारुरोह चंद्रांशु–रुदयाचलभूमिकां ॥ आर्षभ्योर्युद्धसंरंभं । दिदृक्षुरिव सत्वरं ॥ ५७ ॥
दशानामथ लक्षाणां । निःस्वनानां स्वनैर्दृढैः ॥ निःस्वना इव निश्चेष्टा । इवाभूवन् दिशां ग-
जाः ॥ ५८ ॥ अष्टादशापि लक्षाश्च । नदद्दुंदुभयो भयं ॥ विदधुर्विधुमातंग–रविवाजिषु
भारताः ॥ ५९ ॥ सैन्ये श्रीभरतेशस्य । लक्षाः षोडश सर्वतः ॥ नदंति रणतूर्याणि । वैरि-
प्राणहराण्यमुः ॥ ६१ ॥ कोलाहलैः काहलानां । कोलरूपि सोऽक्वणत् ॥ भेरीणामपि
भांकारै–र्व्यदीर्यत भुवस्तलं ॥ ६२ ॥ निःस्वानप्रतिनिर्घोषै–स्तारामंडलमत्रसत् ॥ वीराणां



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सिंहनादैश्चा–भवन्नादमयं जगत् ॥ ६३ ॥ सन्नह्यतां वीरधूर्याः । सन्नह्यतां तुरंगमान् ॥ प्रगु-
णीक्रियतां शस्त्र–संचयश्च रथादिकं ॥ ६४ ॥ अधुना समरारंभो । भवितेति मुहुर्मुहुः ॥ व-
दंतो राजपुरुषाः । सैन्ययोर्भ्रेमुरुच्चकैः ॥ ६५ ॥ युग्मं ॥ वीराः संग्रामशूरास्ते । दधुर्नृपनियो-
गतः ॥ रसोल्लसद्रोमितांगे–ष्वमातानपि कंकटान् ॥६६॥ हेषमाणान् हयान् कामं । केचि-
च्च समनाह्यन् ॥ जयाय हेवा तेषां स्या–दित्यप्यर्चां व्यधुर्मुदा ॥ ६७ ॥ रणतूर्यमहाराव–
चंचलान् वाजिनः परे ॥ आश्वास्य मधुरैर्वाक्यैः । सन्नाहं पर्यधारयन् ॥ ६८ ॥ अबध्नन् पा-
र्श्वयोर्भल्ली–र्निशिताश्च हयाग्रयोः ॥ सन्नाहेन सपक्षाणां । तार्क्ष्याणां चंचुसंनिभाः ॥ ६९ ॥
सिंहास्या वैनतेयास्या । गजास्या अपि केचन ॥ वह्लास्या अभवन्नश्वा । ग्रस्तुं शात्रीवसंच-
यं ॥ ७० ॥ ससन्नाहा विभांतिस्म । नदंतः करिणो घनं ॥ अधित्यकारूढवृक्षाः । पर्वता इ-
व जंगमाः ॥ ७१ ॥ मुद्गरान् परशून् कुंता–नर्पयन् करिणां करे ॥ लोहानां वलयैर्दंतान् ।
वीरास्तेषामवेष्टयन् ॥ ७२ ॥ अयोजयन् हयान् कामं । त्रसंतो दुंदुभिस्वनैः ॥ आकृष्य व-
ल्गासंचारै–रथेषु दुःप्रयत्नतः ॥ ७३ ॥ योद्धारोऽथ रथान् क्रोधा–धारा धन्वधरा रयात् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सतूणीरास्तदोत्प्लुत्य । चलानारुरुहुर्मुदा ॥ ७४ ॥
इतश्च श्रीबाहुबलिः । स्नातः कृतविलेपनः ॥ बिभ्राणो वाससी शुभ्रे । जगाम जिनम-
चिंतुं ॥ ७५ ॥ श्रीआदिनाथप्रतिमां । तोयैरस्नपयत्ततः ॥ आनर्च त्रिविधैः पुष्पै-रकृतैः स्तु-
तिभिस्तथा ॥ ७६ ॥ निःसृत्य देवतागारात् । सन्नाहं वज्रनिर्मितं ॥ शिरस्त्राणं दधौ नृप ।
उत्साहाद् द्विगुणीभवत् ॥ ७७ ॥ तूणीरौ लोहनाराच-पूर्णौ बाहुबलिर्नृपः ॥ दधानः पृष्ठ-
संस्पृष्टौ । चतुर्भुज इवाभवत् ॥ ७८ ॥ कालपृष्ठं च कोदंडं । करे वामेऽकरोन्नृपः ॥ टंकारा-
कर्णनाद्यस्य । खेऽपि भ्रस्यंति तारकाः ॥ ७९ ॥ महाभद्रं गंधगजं । झरन्मदनदीगिरिं ॥
आरुरोह विशामीश । उत्साह इव जंगमं ॥ ८० ॥ नृत्यन्निव बाहुबलिः । स्वबलेन रणांगणे
॥ सिंहध्वजछलाद्भिश्वं । तृणयन्नुत्सुको ययौ ॥ ८१ ॥ हरिदश्वसोमयशा-श्चंद्रकेतू रिपुव्रजान्
॥ रोद्धुमिंदुरथारूढो-ऽभवद्बाहुबलेः पुरः ॥ ८२ ॥ कृतांत इव दुःप्रेक्ष्यः । कूर्मकेतुश्च कुंतयु-
क् ॥ महायशा महावीरः । सिंहाश्वोऽगाद्रणे भटः ॥ ८३ ॥ तत्पुरोऽथ सिंहरथः । सिंहके-
तुर्महारथी ॥ जगज्जयरथेनाशु । चचालाग्रे च शस्त्रभृत् ॥ ८४ ॥ बर्हिकेतुः सिंहकर्णः ।



For Private And Personal Use Only

सदार्णवसमध्वनिः ॥ कालदंष्ट्ररथारूढो । ययौ समरसंनिधिं ॥८५॥ रक्तवज्रो हंसकेतुः । से-
नायां सिंहविक्रमः ॥ दुर्जयः सर्वशत्रूणां । रथेनागान्महाबलः ॥ ८६ ॥ सिंहसेनो बभ्रुकेतु-
र्जेता सर्वरिपून् रणे ॥ कालाग्निरथेनागा-द्वीरः सर्वपुरस्सरः ॥ ८७ ॥ इत्यादिबाहुबलिनः ।
पुत्रा भूपतयोऽपि च ॥ नानावाहनशस्त्रास्त्रा-श्चेलुरुत्साहशालिनः ॥ ८८ ॥ इतः श्रीभरता-
धीशः । स्नातो धौतांशुकावृतः ॥ जगाम देवतागारं । संतो मुह्यंति न क्वचित् ॥ ८९ ॥ सं-
स्नाप्य वृषभस्वामि-प्रतिमां यक्षकर्दमैः ॥ विलिलेप महीनाथः । स्वैर्यशोभिरिवावनिं ॥९०॥
सुगंधिभिरथानर्चे । पुष्पैः संपूर्णभक्तिभाक् ॥ ददाह धूपं चिद्रूप-स्तुतिकृद्भावतोऽर्हतः ॥९१॥
जगज्जयं स सन्नाह-मभेद्यं पविनाप्यथ ॥ सुरशृंगारमाधत्त । शिरस्त्राणं च भूपतिः ॥ ९२ ॥
जयपराजयौ नाम्ना । तूणीरौ भरतेश्वरः ॥ अक्षय्यौ लोहनाराच-पूर्णावबिभरत्ततः ॥ ९३ ॥
त्रैलोक्यदंडं कोदंड-माश्रितं सुरसंचयैः ॥ सटंकारं महाघोरं । दधौ सव्येन पाणिना ॥९४॥
दैत्यदावानलं खड्गं । जग्राहारिनिषूदनं ॥ दिव्यास्त्राणि पराण्येवं । चक्री पस्पर्श पाणिना ॥
॥ ९५ ॥ गजं सुरगिरिं नाम्ना । झरन्मदभरं नृपः ॥ आरुरोह शक्रकेतु-रैरावणसमप्रभं ॥



Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ९६ ॥ सिंहध्वजं सुषेणोऽथ । स्यंदनं पवनंजयं ॥ आरुरोहानुजश्चास्य । गरुडाख्यं जयी रथं ॥ ९७ ॥ खड्गं कालानलं पाणौ । जग्राह पृतनापतिः ॥ स एवाग्निमुखं कुंतं । विद्युद्द्योतसोदरं ॥ ९८ ॥ ते सपादकोटिरपि । कुमाराः स्फारविक्रमाः॥ सज्जीभूयाजये जग्मुः । प्रत्यक्क्षात्रधर्मिणः ॥ ९९ ॥ तज्ज्येष्टः श्रीसूर्ययशा—स्त्रैलोक्यविजयक्रमः ॥ दिव्यायुधैर्दुर्धरोऽयं । वैरिणामभवद्रणे ॥ ३०० ॥

सूर्यहासं स सोरेयं। खड्गमैंद्रं धनुर्दधत् ॥ सन्नाहं सुरसम्मोहं । व्रजन् सूर्ययशा बभौ ॥ १ ॥ सूर्यध्वजः सूर्ययशा । हरिदश्वो महाभुजः॥ वैनतेयरथारूढः । समराजिरमासरत् ॥ २ ॥ निर्जरैरप्यजेयोऽभू—दाजौ देवयशा बली ॥ श्वेताश्वरथमारूढः । सिंहकेतुर्नृपांगजः॥ ॥ ३ ॥ तत्कनीयान् वीरयशा । वैनतेयपताकिना ॥ धारयन् विकटं वर्म । धनुष्मान् रणमापतत् ॥ ४ ॥ सुयशाश्चक्रितनयः । कपिकेतुर्महाबलः ॥ रथं दुर्जयमारूढः । कंपयन् वसुधामयात् ॥ ४ ॥ मेघनादः स्वनादेन । नादयन्नपि रोदसी ॥ मत्स्यकेतुर्महाबाहु—र्धनुष्मान् रणमाययौ ॥ ५ ॥ कालमेघो मेघ इव । बाणधाराः किरन् बहु ॥ गजकेतू रथारूढः । सर्वा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्वैरणमापतत् ॥ ६ ॥ कपिलाश्वो महाकालो । वीरो वैरिविमर्दनः ॥ भजन् रथं धूमकेतु-
मायया समरोत्सुकः ॥ ७ ॥ वीरसिंहो वाजिकेतुः । कृष्णाश्वो रथवान् रणे ॥ पंचाप्यक्षोहि-
णीर्जेता । समरे समुपागमत् ॥ ८ ॥ वीरमानी वीरसेनो । हरिदश्वो महाबलः ॥ हंसकेतु-
र्गदापाणिः । समरायोत्सुकोऽजनि ॥ ८ ॥ इत्यादिचक्रिणः पुत्रा । नृपाश्च बलशालिनः ॥
विचित्रवाहनासीनाः । सर्वेऽप्याजग्मुराजये ॥ ९ ॥ सुषेणः पृतनानाथो । गर्जन् रथजनिः-
स्वनैः ॥ भटकोटीवृतः सैन्य-पुरोऽस्थात्प्रौढविक्रमः ॥ १० ॥ अन्ये नृपाः कुमाराश्च । पूर्णा-
र्द्धरथिनस्तथा ॥ गजाश्वरथमुख्यानि । वाहनान्यभजन् भृशं ॥ १२ ॥ केचिद्भटा रसनटा ।
अटंतः प्रथमं रणे ॥ निपत्य वेत्रिभिः स्वाम्या-दिष्टे रुरुधिरे रयात् ॥ १३ ॥ चलतोः सैन्य-
योः पाद-पाताघातात् स्थिराप्यसौ ॥ चकंपे नागनाथस्य । नमयंती फणावलीं ॥ १४ ॥
सैन्ययोर्वीरधुर्याणां । बलातिशयरंजिताः ॥ धूनयंतः शिरांसीव । महाशैलाश्चकंपिरे ॥ १५ ॥
प्रलयारंभसंभ्रांत-पयोधी इव नादिनौ ॥ उद्वेलौ बलसंभारौ । तौ मिथोऽमिलतामथ ॥१६॥
द्वयोर्निःस्वाननिर्घोषै-र्दुंदुभिध्वानपोषितैः ॥ त्रैलोक्यं चुक्षुभे कामं । चलाचलतया मिलत्



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ १७ ॥ अश्ववारा अश्ववारै । रथिनो रथिभिस्तथा ॥ गजिनो गजिभिः सार्द्धं । पत्तिभिः
पत्तयोऽपि च ॥ १८ ॥ खेचरैः खेचरास्तद्वद् । नृपैर्नृपा भटैर्भटाः ॥ सामंतैः सह सामंता ।
 भिल्लैर्भिल्लास्तदामिलन् ॥ १९ ॥ समरे दंतिनां दंता । दंतैः संघट्टभाजिनः ॥ पल्यंकतां ज-
यश्रीणा--मभजन् वीरयोर्द्वयोः ॥ २० ॥ आच्छादयंतः ककुभो । बाणधाराभिवर्षणैः ॥ चि-
त्रधन्वधराः कामं । श्वेभानादातिगर्जिनः ॥ २१ ॥ खद्योतयंतः कुंताग्रान् । खड्गसंपातसं-
गिनः ॥ पताकाभिर्बलाकाभि--रिव पांश्वभ्रकारिणः ॥ २२ ॥ क्ष्मामस्रकृतोयैः सिंचंतः । की-
र्त्तिवल्लीविवृद्धये ॥ चातकानिव पुष्णंतो--ऽनुगान् जीवनदानतः ॥ २३ ॥

इतस्ततः संचरंतः । प्रलयस्य घना इव ॥ वीरा बभूवुः समरे । वाहनस्पृष्टभूतलाः ॥
॥ २४ ॥ [redacted] ॥ उद्भ्रांते वीरसेनाब्धौ । कल्लोला इव कोपिनः ॥ नाश्वं रथं न ना-
गं चा--जीगणन्कंचनापि ते ॥ २५ ॥ करे करिणमादाय । भ्रामयित्वा विहायसि ॥ रथः स- 
योधः साश्वोऽपि । नीरुवच्चिक्षिपे क्वचित् ॥ २६ ॥ उत्ताले युद्धसंरंभे--ऽप्यदंभः कोऽपि सा-
हसी ॥ स्वप्रियाकुचवैरेण । कुंभिकुंभानताडयत् ॥ २७ ॥ सुषेणसैन्यनाथोऽथ । क्रुद्धः स्व-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सैन्यमांयतः ॥ उदस्थो वाजिरत्नेना–गमत् प्रलयवह्निवत् ॥ २८ ॥ सुषेणेऽस्मिन् सुखेनैव । तृणवद्भटसंचयं ॥ उन्मूलयति कोऽप्यस्थात् । तत्पुरः सुभटो न हि ॥ २९ ॥ इतो बाहुबलेः पादौ । नत्वा विद्याधराग्रणीः ॥ दधावेऽनिलवेगेना–निलवेगो महाभटः ॥ ३० ॥ सुषेण त्वं तु सेनानी । पत्तिर्बाहुबलेरहं ॥ पश्य मद्भुजशौंडीर्य–मित्युवाच स चोच्चकैः ॥ ३१ ॥ मथ्यमानार्णवध्वानः । सुषेणस्तस्य दर्शनात् ॥ ध्वानयन् रोदसीं कामं । जगर्ज बहुविक्रमः ॥३२॥ अन्योऽन्यसमवीर्यत्वा–तावुभौ हर्षशालिनौ ॥ रोमांचकंचुकैर्वर्म–पाटयामासतुस्तदा ॥३३॥ शराशरि विकुर्वाणौ । सर्पासर्पिं नरेंद्रवत् ॥ तौ जातौ जगदुन्माथ–शंकायै स्वर्गिणामपि ॥ ॥ ३४ ॥ खगानिव विमानानि । पश्यतां त्रिदिवौकसां ॥ बाणश्येनपरिष्वंगा–त्त्रासयामासतुस्त्विमौ ॥ ३५ ॥ गजाविवोन्नदंतौ ता–वन्योऽन्यवधकांक्षिणौ ॥ दुःप्रेक्ष्यौ सैन्ययोर्जातौ । कोपारुणविलोचनौ ॥ ३६ ॥ पर्वतः पर्वतेनैव । प्रलये चलताचलः ॥ आस्फाल्यास्फाल्य सेनानी । पुनस्तेन न्यवर्त्तत ॥ ३७ ॥ निष्ठुरं घनवद्वीर्या–दुल्लसद्विपुलध्वनिः ॥ सिंहनादं चकारोच्चै–र्विद्याधरशिरोमणिः ॥ ३८ ॥ तेनाथ सिंहनादेन । प्रतिशब्दा इवाञ्चितः ॥ सैनिका वा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हुवलिनो । जगर्जुरतिहर्षिताः ॥ ३९ ॥ कोपताम्रकरालाक्षः । साक्षात्कालानलोपमः ॥ खड्ग-
रत्नमथादाय । सुषेणोऽधावत क्षणात् ॥ ४० ॥ संहर्त्ता किमसौ विश्व–मुत छेत्ता च पर्वतान्
॥ दारयिष्यत्यथ क्ष्मां वा । तर्कितः स नरैरिति ॥ ४१ ॥ अथ सिंहरथो वायु–वेगिभिस्तुर-
गै रथं ॥ अंतरा विदधे दृष्ट्वा । तं सुषेणं तथास्थितं ॥ ४२ ॥ कल्लोल इव पाथोधे–स्तटशै-
लेन संचरन् ॥ सुषेणः स्खलितस्तेन । तथैवास्थान्महाभुजः ॥ ४३ ॥ युद्धसाक्षी तदा भास्वा-
न् । ययावस्ताचलं प्रति ॥ कंकपत्रैस्त्रस्त इव । वीराणां बहुपातिभिः ॥ ४४ ॥ राजाज्ञया
ततः सैन्ये । व्यावृत्ते ते उभे अपि ॥ पूर्वापरपयोराशि–वेले इव चलाचले ॥ ४५ ॥ शर्वरीं
तामतिक्रम्य । कथंचिद्रणसाक्षिणः ॥ वीराः प्रत्यूषमासाद्य । ननृतुर्व्यक्तविक्रमाः ॥ ४६ ॥ पु-
नः स्वसन्नाहधराः । स्वस्वशस्त्रपवित्रिताः ॥ सन्नद्धस्वस्वनागाश्व–रथानारुरुहुर्भटाः ॥ ४७ ॥
चलंतस्तूर्यनिःस्वान–प्रतिध्वानपदानुगाः ॥ वीराः संग्रामशूरास्ते । सैन्ययो रणमापतन् ॥२२३॥
॥ ४८ ॥ प्रसिद्धैः केतुभिर्ज्ञात्वा । व्यावर्ण्य च कुलादिकं ॥ आह्वयंतो मिथो वीरा । ववृषु-
र्बाणधोरणीः ॥ ४९ ॥ नाजीगणंस्तीक्ष्णमुखा–नपि बाणान् महाभटाः ॥ स्वस्वामिनां प्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सादाब्धि–परं पारं यियासवः ॥ ५० ॥ शराशरैश्च संघट्ट–मासाद्यानलवर्षिणः ॥ नयाय
सम्भजायंत । पश्यतां स्वर्गिणामपि ॥ ५१ ॥ तृणैरिव रोरवेश्म । नाराचैर्व्योम पार्थिवाः ॥
निर्विघ्नं स्थगयामासुः । स्वर्गिदृग्विघ्नकारिणः ॥ ५२ ॥ दृष्ट्वा रणं महाघोरं । कातरास्त्रसु-
र्भ्रतः ॥ वीराः पुनर्महाघाते–र्वेवृधुर्द्विगुणा इव ॥ ५३ ॥ सिक्तासु रक्तैः क्षितिषु । क्षुसासु
तुरगैर्भटाः ॥ यद्विदार्येभकुंभान्न ये । मुक्ताबीजान्यवापयन् ॥ ५४ ॥ यशोद्रुमस्ततो रोह–
मवाप्य विटपोत्करैः ॥ तेषामेवाक्रयो भावी । त्रिजगद्व्यापनक्रमः ॥ ५५ ॥ अथ सिंहरथः
क्रुद्धः । सर्वास्त्रैरन्वितः स्फुरन् ॥ चक्रिसेनांप्रति रथं । प्रेरयामास वेगतः ॥ ५६ ॥ सिंहकर्ण-
स्तदभ्यर्ण–मुपेत्यानुचरोऽभवत् ॥ वह्नेरिव महावायुः । सर्वसंहारणक्रमः ॥ ५७ ॥ तौ वीरौ
चक्रिसेनां तां । क्षोभयामासतुः क्षणं ॥ दुःप्रेक्षौ द्युसदां जातौ । स्थिराया अपि कंपनात् ॥
॥ ५८ ॥ शक्रदृग्मीलनक्रीडा–मक्रीडा इव सैन्यगाः ॥ अन्वभूवंस्तयोर्बाण–पातालोकास- ॥२२४॥
हिष्णवः ॥ ५९ ॥ न गजान्न रथान्नाश्वान् । न पत्तीन्नैव भूपतीन् ॥ संग्रामरसिकौ किंचि-
त् । तावचिंतयतां नहि ॥ ६० ॥ निबिडास्त्रपरित्रस्त–प्राणप्राणिकलेवरैः ॥ रथांतराया अभ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वन् । स्वछंदं चरतोस्तयोः ॥ ६१ ॥ ततः सुषेणो मात्सर्या–द्दधावे प्रलयाब्धिवत् ॥ रथादनि-
लवेगस्य । वधाय विविधायुधः ॥ ६२ ॥ हन्यतां हन्यतामेष । इत्यस्मानप्युपेक्षितः ॥ तात
तातेति राजान–स्तं प्रतीत्यूचुरुच्चकैः ॥ ६३ ॥ सुषेणो बाहुबलिनः । सुताराममपि वाहिनीं ॥
तथा विलोडयामास । नास्थात् क्वचित्पुरो यथा ॥ ६४ ॥ अथो दृष्ट्वा सुषेणस्तं । विद्याधर-
वरं नदन् ॥ टंकारं धनुषश्चक्रे । त्रिजगत्क्षोभकृद् बलात् ॥ ६५ ॥ तदा त्वं रक्षितः सिंह–र-
थेन स्वरथांतरा ॥ रक्षकः कोऽधुना ते स्या–दित्युवाच च खेचरं ॥ ६६ ॥ श्रुत्वेत्यनिलवेगो-
ऽपि । महावेगात् समापतत् ॥ सुषेणास्त्रैर्निरुद्धोऽथ । परावर्त्तत तत्क्षणात् ॥ ६७ ॥ तस्मा-
दुत्पत्य वेगेना–निलवेगो महाभटः ॥ गजसेनामदीनां तां । गाहयामास चक्रिणः ॥ ६७ ॥
कंदुकानिव मातंगा–नुल्लाल्य गगनांगणे ॥ पततस्तानथादाय । जघान दृढमुष्टिभिः ॥ ६८ ॥
भूमौ कदाचिदाकाशे । भ्रमंस्तिर्यक्कदाचन ॥ कदाचिच्चतुरंगासु । सेनासु ददृशे च तैः ॥ ६९ ॥
चक्री सिंधुरपृष्ठस्थ–स्तं दृष्ट्वाथ तथास्थितं ॥ मुमोच चक्रं कोपेन । शक्रवत्पविमुच्चकैः ॥ ७० ॥
सहस्रारं समुत्पन्न–ज्वालामालासमाकुलं ॥ रविबिंबमिवोलूक–स्तद्विलोक्य बिभ्राय सः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ ७१ ॥ श्रेयः पलायनमितो । विमृश्येति स खेचरः ॥ अनश्यद्वलितग्रीवं । पश्यंश्चक्रं मुहु-
र्मुहुः ॥ ७२ ॥ सुमेरौ कंदरायां च । सागरे रुचकेष्वपि ॥ द्वीपांतरेऽपि पाताले । यत्र यत्र
प्रयात्यसौ ॥ ७३ ॥ तत्र तत्रापि चक्रं तत् । पूर्वोपार्जितकर्मवत् ॥ वीक्ष्य विद्याधरो वज्र-
पंजरं निर्ममे दृढं ॥ ७४ ॥ ॥ चक्राधिष्ठातृयक्षास्तं । निरीक्ष्याथ तथास्थितं ॥ हसि-
त्वोचुः कथं रंक । त्वयारब्धं हि चक्रिणि ॥ ७५ ॥ तस्मिन् रुष्टे हि कस्त्राता । रे नवंतं सु-
रेष्वपि ॥ तत्कथं पंजरमिदं । पक्षीव धृतवानसि ॥ ७६ ॥ इत्युक्तोऽनिलवेगोऽथ । षण्मासांते
स्वपंजरात् ॥ वज्रूव प्रकटश्चक्र-मलुनात्तस्य मस्तकं ॥ ७७ ॥ व्यावर्त्य चक्रं चक्रेश-पाणौ
पुनरुपागमत् ॥ सैनिकैश्च जयजया-रावश्चक्रे मुहुर्मुहुः ॥ ७८ ॥ सिंहरथसिंहकर्णौ । निरी-
क्ष्याथ तथास्थितौ ॥ मेघनादसिंहनादौ । चक्रिपुत्रावधावतां ॥ ७९ ॥ चत्वारोऽपि महावी-
रा । युध्यमानाः परस्परं ॥ चतुर्दिक्प्रलयारंन-भ्रांतिं चक्रुर्दिवौकसां ॥ ८० ॥ ते वीरास्त्रि-
जगत्क्षोन-कराः सर्वे महौजसः ॥ वज्राणीव महावज्रै-र्मिथः संघट्टमासदन् ॥ ८१ ॥ तेषां
च समरोत्कर्षा-त्त्रस्ताश्च इव नास्करः ॥ अस्ताचलं क्षणात्प्राप । सैन्ये चापि निजालयं ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ९२ ॥ पुरोधाः काकिणीरत्न—पयसा चक्रिवाहिनीं ॥ वैरिशस्त्रार्त्तिविगमा—द्विदधे नूतनामिव ॥ ९३ ॥ इंदोरास्तदिव्यविद्या—योगाच्चंडयशा अपि ॥ श्रीबाहुबलिनः सेनां । हतशल्यां पुनर्व्यधात् ॥ ९४ ॥ इतश्च प्रातरापेतुः । स्वकेतूल्लिखितांबराः ॥ अंतर्मत्सरिणो वीराः । सर्वास्त्रैश्च डुढौकिरे ॥ ९५ ॥

ततो बाहुबलेः पादौ । नत्वा विद्याधराग्रणीः ॥ तदादेशमपि प्राप्य । शैलसंकाशसच्छिराः ॥ ९६ ॥ रत्नारिर्नीरलक्षायो—गदां पाणौ च चालयन् ॥ वात्यावर्त्त इवोद्भ्रांतो । नदन् वेगादधावत ॥ ९७ ॥ युग्मं ॥ गदापाणिं यममिव । तालद्रुममिवोन्नतं ॥ ज्वलज्ज्वलनपिंगाक्ष—मुद्यद्विनिद्राननं ॥ ९८ ॥ शाखिशाखासमौ बाहू । बिभ्राणं कपिलांगकं ॥ शिलातलसमोरस्कं । वृतं विद्याधरैः परैः ॥ ९९ ॥ दारुणं दारुणेभ्योऽपि । भीषणेभ्योऽपि भीषणं ॥ बलिभ्यो बलिनं तं च । वीक्ष्याकंपंत सैनिकाः ॥ ४०० ॥ [redacted] ॥ कर्करानिव मातंगान् । शलभानिव वाजिनः ॥ नीडानिव रथान् पत्तीन् । क्षुद्रकीटानिवाग्नितः ॥१॥ स जघान गदाघातैः । प्रलयोद्भ्रांतवह्निवत् ॥ चक्रिसैन्यस्य दुःप्रेक्ष्यो—ऽनवद्यार्दाब्दमुन्नदन् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ २ ॥ युग्मं ॥ मार्तंडचूडो विद्यास्त्र–स्त्वा ज्येष्ठार्थमिति ततः ॥ दधावे दारुणं पाणौ । मुद्गरं
भ्रामयन् क्रुधा ॥ ३ ॥ तेन सारैकसारेण । वज्रेणेव महामतिः ॥ सरत्नैरिगिरिरिव । हतो
भूमौ लुलोठ हा ॥ ४ ॥ पतता तेन दीर्घेण । कुर्वन्निव तदाकृतिं ॥ पश्चिमांभोनिधौ वेगात् ।
पपात सघनोऽपि च ॥ ५ ॥ रात्रौ मुकुलितं बाहु–बलेः सैन्यं सरोजवत् ॥ पुनः प्रज्ञातमा-
साद्यो–न्मुखं समभवत् क्षणात् ॥ ६ ॥ हतं रत्नारिमाकर्ण्या–मितकेतुः क्रुधा ज्वलन् ॥ द-
धानो धनुःपरशू । नृपसैन्यादथाचलत् ॥ ७ ॥ दुर्दिनं बाणधाराभि–र्द्विधाकुर्वन् रिपुव्रजे ॥
मेघवत्तन्मुखाब्जानि । न्यग्मुखान्येष निर्ममे ॥ ८ ॥ ततः सूर्ययशा वीरः । क्षीरसागरवन्नद-
न् ॥ प्रलयादित्यवत्तीव्रं । तपस्तेजोभिरद्भुतैः ॥ ९ ॥ दोषाकरान् रिपुव्रातान् । सकलंकानिव
सृजन् ॥ कुमुदं तेषु कुर्वाणो । रथेनागाद्रणांगणं ॥ १० ॥ युग्मं ॥ नादेन सूर्ययशसः । सै-
निकाश्चक्रिणः पुनः ॥ द्विगुणा इव सोत्साहाः । समराजिरमापतन् ॥ ११ ॥ आगच्छतोऽति-
वेगेन । श्रीसूर्ययशसस्तदा ॥ चिच्छेदामितकेतुस्तं । केतुं चंद्रेषुणा क्षणात् ॥ १२ ॥ केतुपाता-
त् सूर्ययशा । धूमकेतुरिवोदितः ॥ अर्द्धचंद्रेषुणा तस्य । लुलाव गलनालकं ॥ १३ ॥ ततो ज-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यजयाराव—श्चक्रिसेनास्वजायत ॥ सूर्योपरिष्टात्सुमनो—वृष्टिरप्यपतद्दिवः ॥ १४ ॥ विलोक्यैवं बाहुबलेः । सेनां मंथानकोपमः ॥ पुनः स्वसैन्यमापेदे । सूर्यः स्वानुगबोधकृत् ॥ १५ ॥ इतश्च बाहुबलिना । ज्ञापितेष्वथ राजसु ॥ कोटीनां विंशतेः स्वामी । पत्यश्वरथकुंजिनां ॥ ॥ १६ ॥ वैताढ्यदक्षिणश्रेणि—नायको बलवद्बली ॥ नत्वा बाहुबलिं प्राप्तः । सुगतिः संगरं स्यात् ॥ १७ ॥ कुलकं ॥

अथ चक्रिसुतः साक्षात् । क्षात्र धर्म इवोद्यतः ॥ शार्दूलनामा शार्दूल । इवोजस्वी महाबलः ॥ १८ ॥ तमापतंतं सुगतिं । वीक्ष्य वीररसाकुलः ॥ सिंहनादं विधायोच्चै । रणमाप गजं श्रितः ॥ १९ ॥ कुलकं ॥ आकृष्टा विबुधेनेव । न संधाने न मोक्षणे ॥ मार्गणाः पथि नाप्यस्य । दृष्टाः किंतु रिपुव्रजे ॥ २० ॥ अमोघास्यैव किं मुष्टिः । सूर्यवत् किरणोत्करान् ॥ धनुरेवास्य किं मेघ । इव क्षिपति वा शरान् ॥ २१ ॥ इत्वेवास्य कथं सूते । कामानिव सुधर्मिणः ॥ यस्मिन् मुंचति बाणौघा—नित्यतर्कि जनव्रजैः ॥ २२ ॥ कुलकं ॥ सुगतिस्तं तथालोक्य । दुर्जयं लोहहेतिभिः ॥ मुमोच दिव्यशस्त्राणि । दुर्भेद्यानि सुरैरपि ॥ २३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नागपाशैस्ततो बद्धः । शार्दूलस्तेन सत्वरं ॥ प्रेमपाशैर्जंतुरिव । नाशकच्चलितुं मनाक् ॥२४॥
किंचिदावेद्य तत्पीडा–मीषद्दुःखस्य वीर्यतः ॥ ध्यात्वा विद्यां रवेः प्राप्तां । प्रत्यक्षामिव संग-
तां ॥ २५ ॥ मृणालिनीरिव गजः । कुकर्माणीव योगिराट् ॥ अत्रोटयत्त्रटत्त्रट–दित्यद्देर्बंध-
नान्यसौ ॥ २६ ॥ [illegible] ॥ तदैवाभ्राच्च्युतादित्य–इवासावधिकद्युतिः ॥ दधावे खड्गमुद्यम्य
। सुगतिंप्रति रोषणः ॥ २७ ॥ कुंजरं वेगतस्त्यक्त्वा । शार्दूल इव पर्वतं ॥ शार्दूलः सुगतिं
मूर्ध्नि । न्यहन् खड्गेन कोपतः ॥ २८ ॥ तदाघातात्स विद्याभृत् । द्विधाभूदामभांडवत् ॥
द्विगुणोऽरिषु शार्दूल–प्रतापश्च रणांगणे ॥ २९ ॥ अब्जिनीपतिरज्ञाना–मसोढेव निमीलनं ॥
कर्कशाङ्गतस्त्रस्तो । ययावपरवारिधिं ॥३०॥ प्रातः पुनः सोमयशा । वैरिवारिजनाशकृत् ॥
प्रज्ज्वलत्तेजसा कामं । ढुढौके चक्रिसेनया ॥ ३१ ॥ महावीरास्ततो क्रूराः । सर्वजित्कालदारु-
णाः ॥ सन्नालीवाहुसत्कार्या । भारतीयबलात् क्षणात् ॥ ३२ ॥ संभूय सर्वशस्त्राणि । वर्षंतो
बहुरोषणाः ॥ अयोधयंस्तमिस्त्राणि । रविर्गोवंडुकीर्त्तिना ॥ ३३ ॥ युग्मं ॥ उन्मील्य नयने
योय–स्तं पश्यति स सोऽग्रतः ॥ आलोकतानेकरूप–मिवाद्भुतसुशक्तिभिः ॥ ३४ ॥ एकोऽ-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





प्यनेकीनृपैर्वं । स च सोमयशा रणे ॥ सर्वास्त्रैस्तैः समं बाढं । युयुधे सिंहवन्मृगैः ॥ ३० ॥ वात्यावर्त्त इवोद्वेल–श्चक्रिणो वाहिनीं स तां ॥ उन्मार्गवाहिनीं चक्रे । नरैर्जलकणै रिव ॥३१॥ ततः सूर्ययशःपुत्रः । सुरराजो महाभटः ॥ दृष्ट्वा तं सोमयशसं । दधावेऽतिवजोऽङ्कतः ॥ ॥ ३२ ॥ तयोर्मिलितयोश्चात्र । वीरयोर्जयकांक्षिणोः ॥ लोकानां प्रलयोद्भेद–शंकाभून्मनसि क्षणात् ॥ ३३ ॥ तन्नीत्येवाप सूरोऽस्तं । वधदूरिकरानपि ॥ पुनस्तदालोककृते । कौतुकीवोदियाय सः ॥ ३४ ॥ शब्दबंधुवीरबंधू । महाबाहुसबाहुकौ ॥ धूपघटधूमकेतू । जयवीरमहाजयौ ॥ ३५ ॥ वालुकोऽपि त्रिलोकश्च । कामभाजोऽत्र चंडकः ॥ चक्रिबाहुबलेर्वीरा । मिथो युयुधिरे रणे ॥ ३६ ॥ पराजयं जयं चापि । सैन्ययोः सुभटा रणे ॥ अन्येऽप्येत्यमथ प्रापुः । स्वस्वस्वामिनिरीक्षिताः ॥ ३७ ॥ तयोर्मिलितयो रौद्र–सैन्ययोरुभयोरपि ॥ एवमासीद्रणस्तत्र । बाढं द्वादशवार्षिकः ॥ ३८ ॥

प्रातः पुनरुपागत्य । सैनिका रणतूर्यतः ॥ ढुढौकिरे महाक्रोधात् । सर्वशस्त्राग्निवर्षिणः ॥ ३९ ॥ कालसेनवैरिसेन–सुतौ श्रीभरतस्य च ॥ महायशःसिंहसेनौ । पुत्रौ बाहुबलेरपि

For Private And Personal Use Only

॥ ४० ॥ कालमेघमहाकालौ । सिंहविक्रमसुंदरौ ॥ तनयाश्चक्रिनृपते-र्मिथोऽधावंत संगरे ॥
॥ ४१ ॥ तेषां च रथचीत्कारै-श्चकंपे वसुधातलं ॥ बाणप्रहारैर्वित्रेसुः । सुरा अपि दिवि
स्थिताः ॥ ४२ ॥ तत्सिंहनादैः सिंहाद्या । मृगवद्दूरमत्रसन् ॥ तद्भुजास्फोटसंघट्टै-रस्फुटच्च
शिलोच्चयः ॥ ४२ ॥ तदा सूर्ययशा ज्येष्ठः । पुत्रः श्रीभरतेशितुः ॥ प्रलयोद्भ्रांतपाथोधि-रिव
कामं जगर्ज सः ॥ ४३ ॥ उन्नदंश्च हसन्नुच्चैः । स्वपाणौ धारयन् धनुः ॥ विशिखौघान्
प्रविकिरन् । मूर्छयन् सैन्यसंचयं ॥ ४४ ॥ क्षोभयन् वारणान् वेग-वायुभिः पर्वतानिव ॥
संहरन् भटसंघातं । धर्मराडिव मूर्त्तिमान् ॥ ४५ ॥ रथान् विघट्टयन् कामं । घूर्णयंस्तुरगो-
त्करान् ॥ रथचक्रोत्थनिर्घोषैः । क्षोभयन् क्षोणिमंडलं ॥ ४६ ॥ कलेवरैश्च वीराणां । लोभ-
यन् गृध्रफेरवान् ॥ स्वस्वामिनं प्रमदयन् । विक्रमात्सर्वदुःसहात् ॥ ४७ ॥ उन्मूलयन् महा-
भूपान् । भस्मयन् पुरतः स्थितं ॥ दधावे श्रीसूर्ययशाः । प्रति बाहुबलेर्बलं ॥ ४८ ॥ बहु-
लिः कलाचक्रे ॥ तद्विधं सूर्ययशसं । संहरंतं चमूचयं ॥ दृष्ट्वा बाहुबलिः क्रुद्धो-ऽभ्यधावत
महारणे ॥ ४९ ॥ रुंडमुंडमयं भूमि-पीठमस्त्रमयं नभः ॥ दिक्चक्रं शोणितमयं । व्यधादेष

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदार्षभिः ॥ ५० ॥ क्षीरकंठोऽपि वत्स त्वं । यदेवं मम वाहिनीं ॥ गाहसे तेन हृष्टोऽस्मि ।
त्वया वंशोऽयमुच्चकैः ॥ ५१ ॥ त्रैलोक्ये कोऽपि नास्तीह । यः सहेत मम क्रुधं ॥ मदृष्टिं
त्यज तच्छीघ्रं । त्वं मे सोमयशःसमः ॥ ५२ ॥ इति तं प्राह सोत्साहं । प्रत्युत तर्जयन्निव ॥
बली बाहुबलिर्वीरं । गिरा गंभीरया ततः ॥ ५३ ॥ त्रिभिर्विशेषकं ॥

ततः सोऽपि नृपं प्रोचे । पितृव्याद्य सुमंगलं ॥ ममासि ताततुल्यस्त्वं । नम्यसे तेन
भक्तितः ॥ ५४ ॥ मुक्तोऽहं तु विनीतायां । गच्छता दिग्जयंप्रति ॥ तातेन समरो दृष्टो । म-
या तेन मनाग् न हि ॥ ५५ ॥ तत्प्रसीद स्वपुत्रस्य । पश्य दोष्णः पराक्रमं ॥ इत्युदीर्य ध-
नुर्दंड—टंकारमकरोदसौ ॥ ५६ ॥ अथो नभसि संभ्रांता—स्त्रैलोक्योन्माथशंकया ॥ उपर्युपरि
गीर्वाणं । गीर्वाणाः समुपागमन् ॥ ५७ ॥ संफेटः कथमार्षभ्यो—र्निजयोरिव हस्तयोः ॥
ध्यायंत इति गीर्वाणा । भटानूचुश्च सैन्ययोः ॥ ५८ ॥ श्रीयुगादिप्रभोराज्ञा । योद्धव्यं केन-
चिन्न हि ॥ बोधयामो वयं याव—द्युष्माकं स्वामिनोर्भटाः ॥ ५९ ॥ आज्ञायास्त्रिजगद्भर्तु—श्चि-
त्रेषु लिखिता इव ॥ तथैव तस्थुर्वीरास्ते । देवाश्च भरतं ययुः ॥ ६० ॥ जय षट्खंडभरता—



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धीश चक्रिशिरोमणे ॥ दत्वेत्याशीषमानंदा–दाख्यन् लेखास्तमित्यथ ॥ ६१ ॥ अकारि साधु
भवता । षट्खंमवसुधाजयः ॥ तत्राभून्न समः कश्चि–न्नव चक्रिन् सुरेष्वपि ॥ ६२ ॥ सांप्रतं
तु स्वहस्तेन । स्वहस्तस्य वधः कृतः ॥ आरभ्यते युवाभ्यां तु । पुत्राभ्यामृषभप्रभोः ॥
॥ ६३ ॥ निर्ममे जगतः सृष्टिः । पित्रा तु युवयोरियं ॥ तयोरेवाथ संहर्त्रो–स्तां युक्ता तस्य
पुत्रता ॥ ६४ ॥ त्वय्यायाते समायातो । गते त्वयि गमिष्यति ॥ कनीयांस्ते बाहुबलिः ।
कार्यं हि खलु कारणात् ॥ ६५ ॥ विरम क्षोणिरमण । जगत्संहारकारणात् ॥ रणाद्भवादृशां
यस्मा–दुदयस्त्रिजगन्मुदे ॥ ६६ ॥ इत्युदीर्य स्थितेषूच्चै–र्देवेषु भरतोऽब्रवीत् ॥ ज्ञात्वेत्यज्ञात्वा
वा देवा । ब्रूतेदं रणकारणं ॥ ६७ ॥ तातभक्ताः सदा यूय–मावां तातस्य नंदनौ ॥ युक्तायु-
क्ततया ज्ञात्वा । यथार्थमनुशासत ॥ ६८ ॥ दोष्मानस्मीति नो लोभा–न्न न मात्सर्यतोऽ-
प्यहं ॥ रणकांक्षी करोम्येष । किं तु चक्राप्रवेशनात् ॥ ६९ ॥ षष्टिवर्षसहस्राणि। कृत्वा दि-
ग्जयमागतः ॥ अनागतान् बंधुवर्गा–नहमाकारयं नरैः ॥ ७० ॥ ते तु किंचिदिवालोच्य ।
स्वयं तातानुयायिनः ॥ बभूवुस्तु बाहुबलि–र्दुर्विनीतो ह्ययं मयि ॥ ७१ ॥ आराधयत्पुरा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




सैष । तातवद्विनयेन मां ॥ अधुना दैवमाहात्म्या–दाज्ञामपि न मन्यते ॥ ७२ ॥ एकतोऽयं लघुभ्राता । मदंश इव वर्तते ॥ अन्यतश्चक्ररत्नं तु । न विशेदास्पदं निजं ॥ ७३ ॥ एकवेलं समभ्येतु । मञ्ज्ञातायं मनागपि ॥ गजाश्वरथराष्ट्राणि । मम गृह्णातु सत्वरं ॥ ७४॥ मामित्थं संकटग्रस्तं । विचार्य नयचक्षुषा ॥ अनुशासयत स्वर्गि–जनवर्गपदाग्रगाः ॥ ७५ ॥ ते निशम्येति तद्वाच–मूचुः श्रीभरतेश्वरं ॥ चक्राप्रवेशान्नो किंचि–न्निवार्यस्त्वं महीपते ॥ ७६ ॥ यद्यसौ चक्रिभूपालः । किंचिद्रणनिबंधनं ॥ तद् द्वंद्वेनैव योद्धव्यं । न यथा जगतः क्षयः ॥ ॥ ७७ ॥ दृष्टिवाग्मुष्टिदंडाद्यै–र्योद्धव्यमपरैर्न तु ॥ युवयोर्मानसिद्धिः स्या–त्तेन नांगिनिषूदनं ॥ ७८ ॥ भरतेन तथेत्युक्ते । नृपसैन्यं सुरा ययुः ॥ मूर्त्याप्यदृश्यं ददृशुः । पुरो बाहुबलिं च ते ॥ ७९ ॥ जय नंद युगादीश–सूनो बाहुबले नृप ॥ इत्युदीर्य पुरस्तस्य । न्यगदंस्त्रिदिवौकसः ॥ ८० ॥ आरब्धं किमिदं बाहु–बले बलवता त्वया ॥ दोर्दंडकंडूव्याजेन । जगत्संहारकारणं ॥ ८१ ॥ यशोऽर्थिन् गुरुभक्तोऽसि । तत् कथं गुरुणा सह ॥ भ्रात्रा समरसंरंभः । प्रारब्धो नृपते त्वया ॥ ८२ ॥ तदेहि भरतेशस्य । प्रणतो भव भूपते ॥ विशेषान्मान सिद्धिः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्या–त्त्वैव गुरुसेवया ॥ ८३ ॥ षट्खंडं भरतं भुंक्ष्व । निजोपार्जितवित्तवत् ॥ श्लाघ्यसे
सर्वथैव त्वं । मानं त्वङ्गजनाश्रयं ॥ ८४ ॥

इत्युक्त्वा विरते देव–वर्गे बाहुबलिर्जगौ ॥ अत्यंतं तातभक्ताः स्थ । यूयं तु सरलाश-
याः ॥ ८५ ॥ पुरा श्रीतातपादाब्जै–रर्थिभ्य इव संपदः ॥ अस्मभ्यं च प्रदत्तानि । राज्यानि
भरताय च ॥ ८६ ॥ राज्येन वयमेतेन । संतुष्टाः पितृशासनात् ॥ असंतुष्टस्तु भरतो । भ-
रतं सर्वमग्रसत् ॥ ८७ ॥ तथाप्ययमपूर्णाशो । भ्रातृराज्याण्युपाददे ॥ यत्तत्स्वयं स्वगुरुतां ।
दर्शयामास तादृशीं ॥ ८८ ॥ वृथायं गुरुबुद्ध्या तु । तातवत्परिशीलितः ॥ मिथ्यात्वमूढम-
नसा–ऽतत्वं तत्वधियेव हि ॥ ८९ ॥ चक्रयप्यसावन्यधिया । राज्यं मे हर्तुमिच्छति ॥ न वे-
त्ति यद्बाहुबलिः । सर्वमेतद्धरिष्यति ॥९०॥ तस्मादगुरवे नौमि । गुरुबुद्ध्या कथं वृथा ॥ क्षा-
त्रतो यदि गृह्णाति । तद् गृह्णातु महीमिमां ॥ ९१ ॥ युद्धं नायुध्यमानेन । कुर्वे तेन दिवौक-
सः ॥ यथायातमसौ यातु । क्षेमेणोपेक्षितो मया ॥ ९२ ॥ अस्य प्रदत्तं भरत–महं भोक्ष्ये
श्रुतं कुतः ॥ न तृप्तिः पितृदत्तेन । यदि केन भवेत्ततः ॥ ९३ ॥ हितं चेदिच्छत सुरा–स्तदा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बोधयत द्रुतं ॥ तमेव गत्वा लोभांधं । तद्भक्तोऽभी न चास्म्यहं ॥ ९४ ॥ निशम्येति गिरं दे-
वाः । प्रोचुरंतश्चमत्कृताः ॥ चक्राप्रवेशाद्भरतो । रोद्धुं नैवापि शक्यते ॥ ९५ ॥ न युद्ध्यमा-
ने युद्ध्यं त्वं । भणन्निति निषिध्यसे ॥ तदुत्तमैरेव युद्धै–र्योधव्यमधमैर्न तु ॥ ९६ ॥ तथेति
प्रतिपेदाने । तस्मिन् सर्वे दिवौकसः ॥ नातिदूरे युद्धभूमे–स्तस्थुर्व्योम्न्यवलोकिनः ॥ ९७ ॥

अथ वेत्री गजारूढः । श्रीबाहुबलिभूपतेः ॥ उदस्तपाणिः प्रोवाच । भटानिति महाध्व-
निः ॥ ९८ ॥ भो भो निवर्त्ततां सर्वे । राजन्या वांछिताद्रणात् ॥ निवर्त्यतां गजाश्वादि–वाह-
नानि च सर्वतः ॥ ९९ ॥ देवैरभ्यर्थितो देवो । द्वंद्वयुद्धाय सांप्रतं ॥ तत्तत्पश्यंतु दूरस्थाः ।
कांक्षितं स्वामिना चिरं ॥ ५०० ॥ मन्यमाना निजान् बाहून् । वृथा वृद्धिमवापितान् ॥ नृ-
पाज्ञया भटाः सर्वे–ऽपासरन्नीप्सिताद्रणात् ॥ १ ॥ व्यावर्त्यमाना भरत–सैनिका इत्यचिंतय-
न् ॥ सद्भिरस्माभिरीशोऽपि । द्वंद्वयुद्धं कथं श्रयेत् ॥ २ ॥ मृते वाप्यथवा भग्ने । सैन्ये रा-
ज्ञो रणं भवेत् ॥ सर्वथा रक्षणीयस्य । पत्तिभिश्च विभूतिभिः ॥ ३ ॥ षट्खंडभरतस्वामि–
समः कोऽपि न विद्यते ॥ विनैकं बाहुबलिनं । शोचयामो वयं ततः ॥ ४ ॥ गृणंत इति सं-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वीक्ष्य । पिंमीनूतान् स्वसैनिकान् ॥ नरतः स्वबलं ख्यातुं । तानाहूयान्वशादिति ॥५॥ म-
दाज्ञया महीगर्त्तं । सर्वेऽपि खनत द्रुतं ॥ इत्यसौ खानयामास । तत्रैरेव सुविस्तृतं ॥ ६ ॥
चक्रनृत्तस्य निकटं । निषसाद महाभुजः ॥ शृंखलान्निरबध्नाच्च । स्वपाणिं दक्षिणेतरं ॥ ७ ॥
स रेजे शृंखलाशाखा–शतैर्वेष्टितविग्रहः ॥ विटपीव वटः पादै–रिव सूर्यश्च रश्मिन्निः ॥ ८ ॥
सर्वौजसा सर्वयानैः । सर्वेऽप्याकृष्य मां समं ॥ गर्त्तायां क्षिपत क्षिप्रं । येन मे बलनिर्णयः
॥ ९ ॥ स्वप्नोऽपि सत्यीकरणा–द्धितश्रीन्नवतु स्फुटं ॥ इत्यादिदेश नूपालान् । सर्वन्नूपाल-
शेखरः ॥ १० ॥ [illegible] ॥ आकृष्याकृष्य तं नूपाः । नाशकन् चालितुं मनाक् ॥ आचकर्ष
पुनश्चक्री । पाणिं हस्तेपदंन्नतः ॥ ११ ॥ ततो ललंबिरे नूपाः । सवाहनपरिच्छदाः ॥ गर्त्तायां
शृंखलालग्ना । लतायामिव पक्षिणः ॥ १२ ॥ स्वामिनो बलमाहात्म्या–दित्यमी प्रीतिपेश-
लाः ॥ अदूरे साक्षिण इव । तस्थू रणपराङ्मुखाः ॥ १३ ॥ इतो रणभुवं देवाः । सिषिचुर्गं-
धवारिन्निः ॥ तत्रैव सुमनःश्रेणीं । पंचवर्णामवाकिरन् ॥ १४ ॥ अथोत्तीर्य चक्रिनूपौ । ग-
जात्समरसीमनि ॥ दृष्टियुद्धं प्रतिज्ञाय । सन्मुखौ तस्थतुर्मिथः ॥ १५ ॥ बन्नूवतुस्तावनिमे-

For Private And Personal Use Only

षा–वालोकनपरौ मिथः ॥ चिरमनालोकदोषं । मार्जयंताविवाभितः ॥१६॥ प्रसृताक्षौ ताम्र-
मुखौ । वीरौ शैलसमुन्नतौ ॥ परस्परं ग्रस्तुकामा–विवाभूतां भयंकरौ ॥ १७ ॥ उच्चदुष्णक-
राकारं । रौद्रं बाहुबलेर्मुखं ॥ पश्यतश्चक्रिणः साभ्रे । चक्षुषी झग् न्यमीलतां ॥१८॥ सैन्यं
च भरतेशस्य । न्यग्मुखं समजायत ॥ तत्स्पर्द्धयेव नृपते–रूर्ध्वग्रीवमभूद्बलं ॥ १९ ॥ न्य-
ग्मुखं भरतं प्राह । बली बाहुबली नृपः ॥ उद्विग्नोऽसि कथं स्वामिन् । मया वाग्युद्धमा-
चर ॥ २० ॥

तेनेत्युक्तः स सामर्षः । पादघातादिवोरगः ॥ जितकासिन् भवत्वेव–मित्यभाषत भूप-
तिं ॥ २१ ॥ मंदराहतपाथोधि–ध्वानप्रतिहतं स्फुटं ॥ सुरेभवृंहितमिव । कल्पांतांबुदनादव-
त् ॥ २२ ॥ स्रंसयन्नभसस्तारा–ग्रहनक्षत्रसंचयं ॥ सिंहनादं महाघोरं । भरतेशस्ततोऽकरो-
त् ॥ २३ ॥ [illegible] ॥ कुलाचलानां शृंगाणि । तत्स्वेमाभिश्चकंपिरे ॥ उच्छलंतिस्म पाथोधि–
जलानि गगनांगणे ॥ २४ ॥ पातालादपि पातालं । विविशुश्च महोरगाः ॥ सिंहाद्या दुष्टस-
त्वाश्च । कंदरात् कंदरं ययुः ॥ २५ ॥ नाजीगणान् हया वल्गां । सुबुद्धिमिव दुर्धियः ॥ शृणी-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाज्ञासिषुर्नागा । वातिला इव तीव्रतां ॥ २६ ॥ रथ्या नामानयन् रश्मिं । पिशुना इव
सद्गिरं ॥ वेसरा न कशाघातं । भूताविष्टा इवाविदन् ॥ २७ ॥ अभवन् सैनिकाः सर्वे । घू-
र्णिता इव मूर्छिताः ॥ विचैतन्या इव भ्रष्ट-सर्वस्वा इव सर्वतः ॥ २८ ॥ ततो बाहुबलिः
क्रुद्धः । सगर्वः सर्वतेजसा ॥ स्फुटद् ब्रह्मांडनादाढ्यं । क्ष्वेडानादं विनिर्ममे ॥ २९ ॥ अंतः-
प्रविष्टमंथाद्रि-मंथनध्वानशंकया ॥ त्रस्तं समस्तैर्जलधि-यादोभिर्भ्रांतिमागतैः ॥ ३० ॥ पु-
नर्जंभारिनिर्मुक्त-दंभोलिध्वनितभ्रमात् ॥ स्वक्षयं शंकमानैर्शंकं । कंपितं च कुलाचलैः ॥३१॥
त्रैलोक्यं तेन नादेन । रोगार्त्तमिव सर्वतः ॥ अंतःप्रविष्टदुःशल्य-मिवाभूत्क्षतचेतनं ॥ ३२ ॥
कांदिशीका अपि सुरीः । प्रियोरःशरणाः सृजन् ॥ श्रीचक्रेशः पुनश्चक्रे । क्ष्वेडानादं मुहुः-
मुहुः ॥ ३३ ॥ चिरं श्रुतिषु बाधिर्यं । स्थिरेषु चलतां पुनः ॥ कुर्वाणोऽथ महीजानिः । सिंह-
नादं विनिर्ममे ॥ ३४ ॥ सौहृदं दुर्जनस्येव । वार्द्धेः काय इव क्रमात् ॥ अहीयत ततो नाद-
श्चक्रिणश्चाधरोत्तरं ॥ ३५ ॥ नद्या इव परीवाहः । सज्जनस्येव संगतं ॥ ववृधे बाहुबलिनः । ॥२४०॥
सिंहनादोऽधरोत्तरं ॥ ३६ ॥ शास्त्रीयेनेव वादेन । परस्परं च निघ्नतोः ॥ जितः श्रीबाहुबलि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ना । भरतः सर्वसाक्षिकं ॥ ३७ ॥ स प्रत्यैच्छत्पुष्पवृष्टिं । प्रशंसालापपूर्वकं ॥ देवैः पुनरुक्त-
मुक्तां । तद्बलांतश्चमत्कृतैः ॥ ३८ ॥ काकतालीयन्यायेन । जगन्नाथ जितं मया ॥ मा वि-
षीद मुष्टियुद्ध-मंगीकुरु महाभुज ॥ ३९ ॥ इत्युक्तितो बाहुबलेः । सोत्साहो भरताधिपः ॥
भुजास्फोटं मुष्टियुद्ध-कृते प्रोच्चैर्व्यधत्त सः ॥ ४० ॥ [redacted] ॥ कटीबद्धपटीकौ तौ । पटीरौ
वीरकुंजरौ ॥ उदंचन्न्यंचदुर्वीकौ । पादन्यासैर्विलेसतुः ॥ ४१ ॥ उन्नमंतौ नमंतौ च । वायु-
वेगैर्द्रुमाविव ॥ क्ष्वेडानादं नादयंतौ । रोदसीमपि चक्रतुः ॥ ४२ ॥ पातयंतौ कूर्मराजं ।
प्राणसंदेहसंकटे ॥ उत्प्लुत्योत्प्लुत्य चरणै-स्ताडयंतौ भुवं मुहुः ॥ ४३ ॥ वीरौ परिषस्वजा-
ते । पीडयंतौ मिथो भुजैः ॥ तत्क्षणं वियुजाते च । समीपस्थद्रुमाविव ॥ ४४ ॥ [redacted] ॥
तयोः पादप्रहारेण । शंकमाना निजक्षयं ॥ असहिष्णुर्भृशं धारा-रराटेव प्रसर्पतोः ॥ ४५ ॥

अथ बाहुबलिः क्रुद्धः । पाणिनादाय चक्रिणं ॥ उच्चैश्चिक्षेप रभसा । व्योम्नि कंदुकली-
लया ॥ ४६ ॥ षट्खंडां मेदिनीं जित्वा । जिगीषुः किमसौ दिवं ॥ इत्याकुलैः प्रेक्ष्यमाणः ।
स्वर्गिभिः क्षणकौतुकात् ॥ ४७ ॥ तारापथमतिक्रम्य । भरतः पृथिवीपतिः ॥ अदृश्यो मनु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





जामासी—योगीवोद्योतयन्नन्नः ॥ ४८ ॥ [redacted] ॥ हाहारवो महान् जज्ञे । सैन्ययोरुन्नयोरपि
॥ दिवौकसोऽपि व्योमस्था । म्लानिमासादयंस्तदा ॥ ४९॥ धिग्मे वलं राज्ञसिकं । धिग्मा-
मप्यविवेकिनं ॥ धिग्मे राज्यकृते लोजं । राज्ययोर्मंत्रिणोऽपि धिक् ॥ ५० ॥ किं शोचना-
न्निरथवा । यावन्नार्यौ विशीर्यते ॥ पतित्वा मेदिनीपीठे । प्रतीक्षामीह तावता ॥ ५१ ॥ चिं-
तयित्वेति नूपाल—स्तदपाकारौ निजौ भुजौ ॥ पादाग्रस्पृष्टनूरुर्ध्व—हगधात्तदधो भुवि ॥
॥ ५२ ॥ [redacted] ॥ विद्युदंरू इवोदंरो । द्योतयन् गगनार्णवं ॥ पाणिज्यां वाहुबलि-
ना । पतन् दध्रेऽथ चक्रनृत् ॥ ५३ ॥ अथ चक्रधरो मुष्टि—मुद्यम्यातीव निष्ठुरं ॥ त्रासयन्
खेचरान् वाहु—बलिनं प्रत्यधावत ॥ ५४ ॥ मुष्टिना तेन निविमं । ताम्रितो मूर्ध्नि नूपतिः ॥
इषन्निमीलन्नयनो—ऽनवत् किंचित्स्मरन्निव ॥ ५५ ॥ स्वस्थः पुनर्बाहुबलि—र्मुष्टिना नरताधि-
पं ॥ पविमेव गिरेः शृंग—मताम्यदुरस्थथ ॥ ५६ ॥ घातेन तेन नरतः । पपात पृथिवीतले
॥ जिह्वासुरिव नूराग—मात्मन्यखिलसंगतं ॥ ५७ ॥ दुःखिताः स्वामिदुःखेन । मुमूर्छुः स-
र्वसैनिकाः ॥ आपदो महतां केषां । न दुःखाय नवंत्यपि ॥ ५८ ॥ दुर्मदेन मयारब्धं । कि-



For Private And Personal Use Only

मिदं हि कुलांतकृत् ॥ न जीवेद्ययं ज्येष्ठो । न जीवाम्यहमेव तत् ॥ ५९ ॥ इति संचिं-
त्य बहली–पतिर्वेठ इवोच्चकैः ॥ स्वोत्तरीयेन जरतं । वीजयामास साश्रुदृक् ॥ ६० ॥
॥ लब्धसंज्ञः क्षणाच्चक्री । नृत्यवत्पुरतः स्थितं ॥ पश्यतिस्म कनीयांसं । स्वं तथावस्थम-
प्यसौ ॥ ६१ ॥

अथोत्थाय क्रुधाक्रांतो । जरतो दंरुमायसं ॥ दधावे ज्रामयन् बाहु–बलिनं प्रति ज्रीषणः
॥ ६१ ॥ कपाटं गोपुरस्येव । दंती दंतेन निष्ठुरं ॥ दंरुेनाताऌयच्चक्री । नृपतिं सहसा रुषा ॥
॥ ६२ ॥ तन्मूर्ध्नि चक्रिणो दंरु–घातेनाजून्महाध्वनिः ॥ चूर्णीबजूव बहुशः । किरीटो जीर्ण-
जांरुवत् ॥ ६३ ॥ न्यमीलयत्क्षणं नेत्रे । नृपतिर्जाततद्व्यथः ॥ तन्निर्घोषाज्जनः श्रोत्रे । पा-
णिज्निश्च मुकुःसहात् ॥ ६४ ॥ अवधूय व्यथां सोऽपि । दंरुमायसमाददे ॥ ज्रामयामास च
स्वैरं । वैरं कुर्वन्निवामरैः ॥ ६५ ॥ किमसौ शैलशीर्षाणि । पाटयिष्यति वा धरां ॥ किमु-
त्पाटयितेत्युच्चैः । सोऽशंक्युद्धतदंरुजृत् ॥ ६७ ॥ तताऌ तेन हृदये । चक्रिणं बहलीपतिः ॥
गोपुरं कुंजर इव । रदनेन दृढीयसा ॥ ६९ ॥ दृढीयानपि सन्नाहो । जरतस्य व्यशीर्यत ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सोऽभ्राच्च्युतः सहस्रांशु–रिवाभ्राच्च स्फुटद्युतिः ॥ ७० ॥ अथामर्षात्तमिदंभे–नेव कल्पांतवा-
रिदः ॥ दंभेन पर्वतमिव । नृपतिं भरतो न्यहत् ॥ ७१ ॥ आयसोऽपि तदाघाता–द्दंभो भं-
गमवाप्तवान् ॥ निजागसा बाहुबले–र्भयादिव तदैव सः ॥ ७२ ॥ ममज्जाजानु मेदिन्यां ।
दंभघातान्महीपतिः ॥ न विवेद क्षणं किंचि–द्योगीव लयमागतः ॥ ७३ ॥ निजांगमवधूया-
थ । पंकमग्नकरीव सः ॥ निरगादायसं दंभं । करे जग्राह च द्रुतं ॥ ७४ ॥ ध्वंसयिष्यति किं
तारा–श्चूर्णयिष्यति किं नगान् ॥ नीडवच्च विमानानि । व्योम्नः किं पातयिष्यति ॥ ७५ ॥
इत्याशंकाकुलैर्लोकैः । प्रेक्ष्यमाणो नराधिपः ॥ दंभेनाताडयत् कील–मिव चक्रधरं ब-
लात् ॥ ७६ ॥ [redacted] ॥ चक्रपाणिर्दंभघाता–दाकंठं भुवमाविशत् ॥ व्यडंबयन्मुखेनेष–राहुग्र-
स्तसुधाकरं ॥ ७७ ॥ त्वमस्मत्स्वामिनमिव । विवरं देहि मेदिनि ॥ अस्माकमप्यतः पेतु–
र्मूर्छिताश्चक्रिसैनिकाः ॥ ७८ ॥ अहो भ्रातृवधाज्जातं । पातकं मेऽतिदुःसहं ॥ कलंकितस्तात-
वंशः। कुपुत्रेण मयाद्य हा ॥ ७९ ॥ इति शोचति नृनाथे । क्षणात् संत्यज्य तद्व्यथां ॥ च-
क्रवर्ती भुवोमध्यात् । प्रादुरासीद्रविद्युतिः ॥ ८० ॥ [redacted] ॥ दैवैरिव दुश्च्यवनो । मृगैरिव मृ-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गाधिपः ॥ तारकैरिव तारेश–श्चक्री नृपैर्न जीयते ॥ ७१ ॥ षष्टिवर्षसहस्राणि । मयाकारि महीजयः ॥ कथमेतत्कृते हंत । यदसौ मद्वधोद्यतः ॥ ७२ ॥ एककालमुभौ चक्र–धरौ नारायणाविव ॥ किं भवेतां कथमिति । वृथा गीः स्याज्जिनागमे ॥ ७२ ॥ न चक्री तदहं चक्र–धरः सत्यमयं भुवि ॥ अस्य सेनापतिरिवा–कार्षं दिग्विजयं खलु ॥ ७३ ॥ चिंताचक्रार्पितस्वांते । चक्रिणीति रविप्रभे ॥ चक्ररत्नमगात्तस्य । पाणौ वह्निकणान् मुचन् ॥ ७४ ॥ [redacted] ॥ तत्प्रत्ययाच्चक्रिमानी । चक्रं चक्रधरस्ततः ॥ भ्रामयन् बाहुबलिन–मित्यवोचदमर्षणः ॥ ७५ ॥ अद्यापि ते विनष्टं न । विद्यते किंचनापि हि ॥ मन्यस्व मान्याममरै–र्ममाज्ञां मानमोक्षणात् ॥ ७६ ॥ पूर्वापराधमखिलं । सहिष्ये तेऽनुजन्मनः ॥ भ्रातृहत्याभवं पापं । मा भूयात्त्वद्वधान्मम ॥ ७७ ॥ तिर्यक्षु नागो नागाश्च । हर्यक्षः सरभस्ततः ॥ क्रमादेते हि बलिनः । किं न भूपतिवश्यगाः ॥ ७८ ॥ बाह्वोर्बलात्त्वमेवापि। न गर्वं कर्त्तुमर्हसि ॥ सर्वेऽपि बलिनो भूपा–श्चक्रेशाज्ञाविधायिनः ॥ ७९ ॥ इत्युन्नदंतं भरतं । निजांसे प्रेरयन् दृशौ ॥ जगाद धीरगंभीर–गिरा बाहुबलिर्बली ॥ ८० ॥ तवार्य तातपुत्रत्वं । युक्तं न

For Private And Personal Use Only

तु विराजते ॥ यच्चक्रं दंभयुद्धेऽपि । त्रासि ही क्षत्रधर्मधीः ॥ ९१ ॥ बाह्वोर्बलं बाहुबले–र्दोर्दंडखंभबलेन किं ॥ विगर्हसि गुणज्येष्ठ । खद्योतेनेव भास्करं ॥ ९२ ॥ दृष्टं तावद् बाहुबलं । पश्य चक्रस्य संप्रति ॥ भ्रातेति मास्म लंकिष्टाः । क्षत्रियाणामयं क्रमः ॥ ९३ ॥ क्रुद्धस्तद्वचसा चक्री । चक्ररत्नं विहायसि ॥ भ्रामयन् पश्यतां भीतिं । जनयन् सहसामुचत् ॥ ९४ ॥ किमेतद्भस्मसात्कुर्वे । दंभेनाहत्य भांभवत् ॥ किं वा कंदुकवद्व्योम्नि । लीलयोल्लालयाम्यतः ॥ ९५ ॥ यशस्तरुकृते हमांतः । क्षिपामि किमु बीजवत् ॥ पाणिना वाथ गृह्णामि । ललच्चटकपोतवत् ॥ ९६ ॥ आहत्य मुष्टिना प्रोच्चैः । किं नयामि दिशोंतरं ॥ पश्याम्यप्यस्य वा वीर्यं । ततो कर्त्तास्मि धैर्यवत् ॥ ९७ ॥ एवं चिंतयतस्तस्य । प्रज्ज्वलच्चक्रमेत्य च ॥ नृपं प्रदक्षिणीकृत्य । पुनश्चक्रिकरं ययौ ॥ ९८ ॥ [illegible] ॥ सामान्ये चक्रिणो गोत्रे । चक्रं न प्रभवत्यपि ॥ किं पुनस्तद्भवे सिद्धि–भाजि पुंसि च तादृशे ॥ ९९ ॥ चक्रं यक्षसहस्रं च । चक्रस्याधिपतिं तथा ॥ तत्तदन्यायकर्त्तारं । चूर्णयाम्यद्य मुष्टिना ॥ ६०० ॥ इति संचिंत्य कल्पांत–मुक्तशक्रपविप्रभं ॥ निष्ठुरं मुष्टिमुद्यम्य । नृपोऽधावत तंप्रति ॥ १ ॥ [illegible]॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पाथोधिरिव मर्यादा—मूर्मिं बाहुबलिर्नृपः ॥ समेत्य चक्रिणः पार्श्वे । तस्थिवांश्चेत्यचिंतयत् ॥
॥ २ ॥ चलाचलस्य राज्यस्य । कृते भ्रातृवधो हहा ॥ मया प्रारभ्यते हंत । निहंतुं स्वभ्र-
वह्नयं ॥ ३ ॥ हत्वा गुरूनपि लघून् । वंचयित्वा छलेन च ॥ यदुपादीयते राज्यं । तत्प्राज्य-
मपि मास्तु मे ॥ ४ ॥ आपातसुखसंप्राप्ति—भ्रमितैर्हि नराधमैः ॥ यत्र तत्र प्रवर्त्येत । नर-
कागारकारणे ॥ ५ ॥ अन्यथा तद्विधं राज्यं । कथमौज्झज्जिनेश्वरः ॥ अहमेव पुनस्तात—प-
थिकोऽथ भवामि तत् ॥ ६ ॥ चिंतयित्वेति मनसि । मनस्वी स नृपो जगौ ॥ कवोष्णैर्नेत्र-
सलिलैः । सिंचन् क्ष्मां चक्रवर्तिनं ॥ ७ ॥ क्षमस्व मे दुश्चरितं । ज्येष्ठबांधव संप्रति ॥ म-
यापि त्वं राज्यकृते । खेदितोऽसि जगत्प्रभो ॥ ८ ॥ तातपांथो भविष्यामि । स्पृहयालुर्न सं-
पदि ॥ तेनैव मुष्टिनेत्युक्त्वा । मूर्द्धजानुच्चखान सः ॥ ९ ॥ [illegible] ॥ साधु साध्विति सानंदं ।
जल्पंतस्त्रिदिवौकसः ॥ तस्योपरिष्टात् सुमनो—वृष्टिं स्पष्टं वितेनिरे ॥ १० ॥ दध्यौ बाहुबलि-
श्चित्ते । प्रतिपन्नमहाव्रतः ॥ गच्छामि तातपादांत—मनंतसुखसंपदं ॥ ११ ॥ स्थास्याम्यत्रैव वा
पूर्वं । व्रतिनां ज्ञानशालिनां ॥ मध्येऽनुजानामपि मे । लघुत्वं यद्भविष्यति ॥ १२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इहैव दग्ध्वा घातीनि । कर्माणि ध्यानवह्निना ॥ अवाप्तकेवलज्ञानो । यास्यामि स्वामिसंसदि ॥ १४ ॥ मनस्वी चिंतयन्नेवं । प्रलंबितभुजद्वयः ॥ कायोत्सर्गेण तत्रैव । तस्थौ बाहुबलिर्व्रती ॥ १५ ॥ तथाविधं बाहुबलिं । स्वस्य कर्म च तादृशं ॥ दृष्ट्वा नून्यग्मुखश्चक्री । विविक्षुरिव मेदिनीं ॥ १६ ॥ साश्रुनेत्रः कनीयांसं । प्रणनाम च तत्क्षणात् ॥ स्वनिंदातत्प्रशंसाढ्यं । वचनं च जगाविति ॥ १७ ॥ ये लोभमत्सरग्रस्ता–स्तेषां मुख्योऽस्मि बांधव ॥ बलिनां च कृपालूनां । धर्मिणां च त्वमेव हि ॥ १८ ॥ आदौ जितोऽस्मि युद्धेन । ततो रागादयोऽप्यमी ॥ व्रतास्त्रेण त्वया भ्रात–स्त्वत्तो नास्ति परो बली ॥१९॥ ममापराधमेनं त्वं । मृषित्वा ब्रूहि बांधव ॥ दयालुः पूर्ववन्नासि । किं यन्मयि न पश्यसि ॥ २० ॥ त्वमेव तातपुत्रोऽसि । यस्तातपथि वर्त्तसे ॥ अहं विदन्नपि पुना–रागद्वेषैः कदर्थितः ॥ २१ ॥ प्रसीदाखिलमेदिन्या । मम राज्यं गृहाण भोः ॥ अहं संयमसाम्राज्यं । गृहीष्ये भगवंस्तव ॥२२॥ इत्यालपंतं भूपालं । बालवत्तं मुनिं प्रति ॥ प्राबोधयन् शुद्धवाग्भिः । सचिवाः शुचिबुद्धयः ॥ २३ ॥ तत्पुत्रं सोमयशसं । पुरस्कृत्य रथांगभृत् ॥ ययौ तक्षशिलाद्रंगं । सरंगं जिनमंदिरैः



For Private And Personal Use Only

॥ २३ ॥ तत्रोद्याने सहस्त्रारं । विचित्रमणिकल्पितं ॥ सप्रासादं धर्मचक्रं । नत्वा सोमयशा
जगौ ॥ २४ ॥ पुरा श्रीवृषन्नः स्वामी । उद्मस्थो विहरन् महीं ॥ रजन्यां समवासार्षी—द-
त्र वित्रस्तकल्मषः ॥ २५ ॥ अहं प्रातः सर्वनृपैः । सर्वलोकैः समन्वितः ॥ महन्निरुत्सवैस्ता-
तं । नमस्याम्यधुना न तु ॥ २६ ॥ इति प्रतिज्ञाकलितो । यावद्बाहुबलिर्नृपः ॥ मंचानट्टाल-
कान् हट्टां—स्तथा त्रिकचतुष्पथान् ॥ २७ ॥ कर्पूरचंदनासेक—कस्तूरीमंगलांकितान् ॥ पु-
ष्पमालावस्त्रमाला—रत्नमालान्निरावृतान् ॥ २८ ॥ विधाय सपरीवारः । सर्वलोकसमृद्धिन्निः
॥ अत्रागात्स पवित्रांगः ॥ प्रातस्तातनुतिस्मृतिः ॥ २ए ॥ [illegible] ॥ तावद्विसूर्यं
व्योमेव । निःपुत्रमिव सत्कुलं ॥ निर्जीवमिव देहं च । विना तातेन काननं ॥ ३० ॥ दृष्ट्वा
मनसि संक्रांत—दुःखकीलकपीडितः ॥ रुरोदोच्चै रोदयंश्च । नूरुहानपि पार्श्वगान् ॥ ३१ ॥
[illegible] ॥ विलंबकारिणं धिग्मां । धिग्मां धर्मविघातिनं ॥ नावंदिषि निशायां यत् । तातपा-
दपयोरुहं ॥ ३२ ॥ सत्यं त्वं वीतरागोऽसि । नगवन् भुवि नापरः ॥ यतः पुत्रेष्वपि मना-
क् । रागवान्नासि निर्ममः ॥ ३३ ॥ इत्यारटन् मंत्रिमुख्यै—र्बोधितो बहलीपतिः ॥ नूमिस्थ-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वामिपादानां । प्रतिमां नमतिस्म सः ॥ ३४ ॥ मान्यः स्पृशतु तातांह्री । इत्यत्राकारयन्नृ-
पः ॥ धर्मचक्रमिदं चक्रिन् । सप्रासादं महोन्नतं ॥ ३५ ॥ महद्वाप्यमहद्वापि । धर्मकृत्यं सु-
धीर्नरः ॥ प्रारब्धमविलंबेन । कुर्यात्सर्वं प्रयत्नतः ॥ ३६ ॥ विस्ताराय विलंबो न । कार्यो ध-
र्मस्य कर्मणि ॥ जिनं बाहुबली रात्रिं । व्यतिक्रम्य तु नानमत् ॥ ३७ ॥

श्रुत्वेति चक्री तन्नत्वा । पुरे तक्षशिलाभिधे ॥ तं सोमयशसं नृपै–रभ्यषेचयदुत्सवैः
॥ ३८ ॥ तदादिसोमवंशोऽभू–च्छाखाशतसमन्वितः ॥ तत्तत्पुरुषरत्नाना–मेकमुत्पत्तिकारणं ॥
॥ ३९ ॥ चतुर्विंशति सहस्रा । रूपवत्यः कुलोद्भवाः ॥ श्रीसोमयशसोऽभूवन् । सुव्रताद्याः
सुयोषितः ॥४०॥ द्वासप्तति सहस्राणि । जगद्विख्यातविक्रमाः ॥ श्रेयांसप्रमुखाः पुत्राः । प-
वित्रास्तस्य जज्ञिरे ॥ ४१ ॥ द्वात्रिंशद्ग्रामलक्षाणि । पत्तनानां शतं तथा ॥ पुराणि त्रिश-
तीं सोम–यशाः पाति नरेश्वरः ॥४२॥ चतुश्चत्वारिंशल्लक्षा । रथा लक्षं च दंतिनां ॥ हया-
नां च पंचत्रिंश–ल्लक्षाः सूर्यहयोपमाः ॥ ४३ ॥ सपादकोटिसंख्याताः । पत्तयोऽपि च वि-
श्रुताः ॥ शतानि सप्त भूपाला–स्तस्याज्ञाधारिणोऽभवन् ॥ ४४ ॥ युग्मं ॥ तत्र श्रीसोमय-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शसा । सैर्वेर्नृपैर्जनैर्मुदा ॥ पूजितो भरतश्चक्री । ववले स्वपुरं प्रति ॥ ४५ ॥ भरतोऽथ पुनर्बाहु—बलेः पादौ प्रणम्य च ॥ पुरीमयोध्यामगमत् । सदुत्सवविराजितां ॥ ४६ ॥ तत्र श्रीभरताधीशः । सुरासुरनरव्रजैः ॥ संसेवितः सुखागारं । पितेवापालयत्प्रजाः ॥ ४७ ॥

इतः श्रीबहलीनाथः । सर्वसावद्यवर्जकः ॥ सर्वसत्वहितः क्षेमं । धर्मध्यानं समासदत् ॥ ४८ ॥ ध्यानाधिरूढः किमु रत्नमूर्त्तिः । किं वा धरोत्कीर्ण उतावतीर्णः ॥ विहायसो बाहुबलिर्मुनींदु—रतर्कि देवैरिति निश्चलांगः ॥ ४९ ॥ नाशावंशनिषक्तदृष्टिरमलज्योतिर्जिनं चिंतयन् । निष्कंपः सुरशैलवत् परिहृतैस्ताराप्रचारैरलात् ॥ आजानु प्रतिलंबिबाहुयुगलः संरुद्धसर्वास्रवः । श्रीमान् बाहुबलिः स्थितो मुनिपतिः संगुप्तचित्तानिलः ॥ ५० ॥ सर्वर्तुजैर्दोषचयैरदुष्टो । गिरींद्रवद्बाहुबलिर्बभासे ॥ शीतातपोंभोभिरलिप्तमूर्त्ति—र्द्वेषानुरागैरिव योगिनाथः ॥ ५१ ॥ परस्परं मत्सरिणोऽपि जीवाः । सहोदराभास्तमनुश्रयंति ॥ तस्योत्तमांगेऽपि च कूर्चदेशे । चक्रुर्भुजादौ च खगाः कुलायान् ॥ ५२ ॥ उद्वेष्टितः कर्मलताभिरुच्चै—रावेष्टितोऽरण्यलताभिरालात् ॥ मुनीश्वरः स्वर्णगिरिर्घनौघै—रिवाधिकज्योतिरलब्धमध्यः ॥ ५३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दर्भांकुरास्तीक्ष्णमुखा जलेन । प्राप्ताः परां वृद्धिमिदं शरीरं ॥ भ्नेदयन् सज्जनमानसानि । यथा खलाः पादतलं प्रविश्य ॥ ५४ ॥ अस्थात्तथा मुनिपतिर्जितरागदोषो । ध्यायन् परं जिनपतिं हृदयाब्जदेशे ॥ संवत्सरं विगतमत्सरधीर्ददाह । घातीनि कर्मपटलानि समानभावः ॥ ॥ ५५ ॥ तस्य ज्ञानसमागतेश्च समयं विज्ञाय तस्या पुन—र्मानं दूषकमाकलय्य भगवान् श्रीमान् युगादिप्रभुः ॥ ब्राह्मीसुंदरीकासतीयुगमिदं बोधाय शिष्यानुगं । प्रैषीत्तत्र वने विमत्सरजने ते प्रापतुश्च क्रमात् ॥ ५६ ॥ वल्लीवितानैः परिवेष्टितं तं । बुध्ध्वार्कमभ्रांतरितं यथाथ ॥ साध्व्यौ कथंचित् प्रणिपत्य वाढं । विभोर्वचांस्यूचतुरादरेण ॥ ५७ ॥ भ्रातर्जगद्विभुरिदं त्वयि संदिदेश । आगावयोर्हि वदनात् प्रतिशब्दतुल्यात् ॥ नागाधिरूढपुरुषैः किमु लभ्यते तद् । ज्ञानं ततस्त्यजतरां निजवैरिणं तं ॥ ५८ ॥ अवतर तरुणगजेंद्रा—द्वाहुबले श्रीयुगादिजिनसूनो ॥ त्वमपि कथं संमुह्यसि । बांधव बोधिं समधिगछ ॥ ५९ ॥ इत्युक्त्वा च भगिन्यौ । ते जग्मतुरादिदेवपादांते ॥ श्रुत्वा च वाहुबलिर—प्यचिंतयद्वचस्तत्वं ॥ ६० ॥ एते मम सोदर्यौ । शिष्ये सर्वज्ञतातपादानां ॥ न कदाचिदलिकवचो । वदत इदं तत् कथं कवे-

न्नः ॥ ६१ ॥ संन्यस्तं नियतमिदं । मया तु सप्तांगमप्यथो राज्यं ॥ कायोत्सर्गपरस्य । कु-
तोऽस्ति मे वारणप्राप्तिः ॥ ६२ ॥ ज्ञातं वा मानगजः । को नंता यदिह बंधुवर्गाणां ॥ इति
तन्मे दुश्चरितं । वृथास्तु तांस्तान्नमस्यामि ॥ ६३ ॥ पुण्यं कीर्त्तिर्यशो लक्ष्मीः । स्वर्गः सा-
म्राज्यमद्भुतं ॥ प्रयांति मानतो हंत । भवेद् दुर्गतिसंगतिः ॥ ६४ ॥ मानं म्लानिकरं महागु-
णहरं धर्मश्रियस्तस्करं । नीचैर्गोत्रमहीरुहांबुदभरं सौभाग्यशोभाकरं ॥ कीर्त्तिद्रोहणमुद्गरं
शिवसुखोद्यानाय भंभास्वरं । प्रायः सत्पुरुषास्त्यजंति सुकृतश्रेणीनिशाभास्करं ॥ ६५ ॥ पू-
र्वात्तचारित्रभरान् स्वबंधून् । नित्यं नमस्यामि यथैव तांश्च ॥ यावद्विचार्येति मुनिः स्वचि-
त्ते । तातांतिके गंतुमियेष शीघ्रं ॥ ६६ ॥ तावदेत्र किल केवललक्ष्मीः । पूर्वतोऽपि बहुराग-
धरास्मिन् ॥ मानमुक्तति चकार पदं सा । दर्शिताखिलजगत् समकालं ॥ ६६ ॥ [illegible] ॥
संप्राप्य वेषं व्रतीनां मुनीशो। देव्या वरज्ञानविशुद्धतत्वः॥ प्रदक्षिणीकृत्य जिनं स दक्षः। स-
द्ज्ञानिनां पर्षदमाससाद ॥ ६७ ॥ बलिनां बली स मुनिरेव रणे। समकालमेव किल यो ह्य-
जयत् ॥ भरतं च कर्मभरमाशु परं । निजमानमप्यमुचदेव न यः ॥ ६८ ॥

इत्याचार्यश्रीधनेश्वरसूरिविरचिते महातीर्थश्रीशत्रुंजयमाहात्म्ये भरतबाहुबलिसंग्रामवर्णनो नाम ~~चतुर्थः सर्गः समाप्तः~~ ॥ श्रीरस्तु. ॥

---

## ॥ अथ पंचमः सर्गः प्रारभ्यते ॥

किं तद्वर्णचतुष्टयेन वनजं वर्णैस्त्रिभिर्भूषणं । आद्येकेन मही द्वयेन विहगो मध्ये द्वये प्राणदः ॥ व्यस्ते गोत्रतुरंगचारिमखिलं प्रांते च संप्रेषणं । ये जानंति विचक्षणाः क्षितितले तेषामहं किंकरः ॥ १ ॥ श्रीशत्रुंजयशक्रवारणभवो मुक्तामणिः सच्छ्रियः । श्रेणिः पुण्यनभोमणिः शुभ्रयशोवेणिस्त्रिलोकीगुरुः ॥ श्रीमन्नाभिनरेंद्रवंशजमणिः श्रीमान् युगादिप्रभु—र्देयात्सौख्यमखंडितं कुवलयोद्बोधैकदोषामणिः ॥ २ ॥ बाह्यारिजयवत्तस्य । श्रुत्वांतररिपोर्जयं ॥ चक्रिणस्तीर्थसंसिद्धि—मपि वासव सांप्रतं ॥ ३ ॥ इतश्च वृषभः स्वामी । युतोऽतिशयभानुभिः ॥ सेव्यमानस्त्रिजगतां । लोकैः कोकैरिवांशुमान् ॥ ४ ॥ पावयन् वसुधां भव्य—कमलोल्लासकृत्प्रभुः ॥ शत्रुंजयं गिरिपतिं । पूर्वाचलमिवागमत् ॥ ५ ॥ [redacted] ॥ कल्पद्रुमपारि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जात—संतानहरिचंदनैः ॥ लवंगलवलीचूत—चंपकाशोकशोभितं ॥ ६ ॥ नालिकेरीनागवल्ली—
क्रमुकीकदलीघनैः ॥ सल्लकीशाल्मलीशाल—मुखैर्वृक्षैर्विराजितं ॥ ७ ॥ सर्वपर्वतनाथत्वा—च
मरीपुञ्जचामरैः ॥ वीज्यमानं जिनागार—छत्रौघकलशावृतं ॥ ८ ॥ सहस्रशिखरैस्तुंगै—राबद्धमु-
कुटं स्फुटं ॥ विचित्रमणिरत्नांशु—जातकर्बुरितांबरं ॥ ९ ॥ ह्रदिनीह्रदकुंडौघ—दीर्घिकादीर्घिका-
रिणीं ॥ समुद्वहंतं सच्छोभां । द्यां हसंतं पयोरुहैः ॥ १० ॥ कल्पवृक्षघनच्छाया—निषण्णाभिः
सह प्रियैः ॥ किन्नरीभिर्गीयमान—जगदीशगुणावलीं ॥ ११ ॥ दर्शनेनापि विश्वस्य । पुनानं
स्पर्शनादपि ॥ हरंतं पापसंघातं । नेत्रस्यैकं रसांजनं ॥ १२ ॥ अनेकसिद्धगंधर्व—विद्याधरन-
रव्रजैः ॥ सुरासुराहिसिंहाद्यैः । सेव्यमानं मुमुक्षुभिः ॥ १३ ॥ अनंतसिद्धसंस्थान—मनंतसु-
खदायकं ॥ अनंतभवपाथोधि—मध्यद्वीपमिवांगिनां ॥ १४ ॥ द्वात्रिंशतासहस्रैश्च । ग्रामलक्षै-
र्विभूषितं ॥ निरंतरपयोराशि—रत्नैराबद्धमेखलं ॥ १५ ॥ छायाद्रुमैश्छत्रनिभै—र्मध्याह्नेऽपि ग-
तातपं ॥ सौराष्ट्रैर्गीतझंकारैः । प्रीतामरनरोरगं ॥ १६ ॥ पंचाशद्योजनं मूले । शिखरे दश-
योजनं ॥ तमष्टयोजनोत्सेध—मारुरोह गिरिं प्रभुः ॥ १७ ॥ [redacted] ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मुनयः पुंमरीकाद्या । व्रतिन्यः सुंदरीमुखाः ॥ तमारुरुहुरुत्तुंगं । सोपानमिव सद्गतेः ॥
॥ १८ ॥ श्रीप्रभुः समवासार्षी–द्रात्रौ राजादनीतले ॥ विशेषात्पावयन्नुच्चै–स्तं तीर्थमिव तो-
र्थकृत् ॥ १९ ॥ अथासनप्रकंपेन । सुराः प्रातरुपेत्य च ॥ चक्रुः समवसरणं । शरणं जव-
न्नीनृतां ॥ २० ॥ आपौरुषीं च न्नगवान् । विदधे धर्मदेशनां ॥ ततः श्रीपुंमरीकोऽपि । वि-
भुपादासनस्थितः ॥ २१ ॥ तीर्थे जिने गुरौ न्नक्ति–धर्मशास्त्ररुचिः कृपा ॥ पात्रदानं प्रियं
वाक्यं । विवेकोऽस्तित्वलक्षणं ॥२२॥ आर्यदेशो मनुष्यत्वं । दीर्घायुरुत्तमं कुलं ॥ न्यायार्जि-
तानि वित्तानि । हेतुः पुण्यार्जने नृणां ॥ २३ ॥ लज्जा दुःकृतसंप्रवृत्तहृदये धर्मागमार्थश्रुतिः
। कृत्याकृत्यविचारणा प्रणयिनी बुद्धिर्गुरोः सेवना ॥ न्नीतिर्दुर्यशसः कृताघविगमे वांछा सु-
धर्मे रति–र्मानुष्ये किल सत्यपि स्फुरति हि श्रीआर्यदेशे न्नृशं ॥ २४ ॥ धर्मार्थकाममोक्षा-
ख्य–पुरुषार्थचतुष्टयी ॥ साध्यते येन तं मर्त्य–न्नवं कः स्तोतुमीश्वरः ॥ २५ ॥ सन्न्यायमा-
र्गोपचितापि संप–द्दानेश्वरस्यैव गृहे कृतार्था ॥ अप्यार्यदेशाधिगता विवेको–ज्ज्वले कुले मा-
नुषता प्रशस्या ॥ २६ ॥ स्वायुषः क्षणमपि प्रमादतो । ये वृथा न गमयंति सोद्यमाः ॥ ध-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मेकर्मणि चिरंतनायुष–स्ते भवंतु भुवि सद्विवेकिनः ॥ २७ ॥ कासश्वासग्रहण्यर्शो–रक्तपि-
त्तज्वरादिभिः ॥ नित्यं रोगैर्य आक्रांत–स्तस्य पुण्यार्जनं कुतः ॥ २८ ॥ प्रायः सत्त्वं न दै-
न्याय । शौर्यं नाभिभवाय च ॥ उद्यमत्वं न दौःस्थ्याय । कुलं पापाय नोज्ज्वलं ॥ २९ ॥
देशनांते प्रभुः प्राह । पुंडरीकं गणेश्वरं ॥ शत्रुंजयः पर्वतोऽयं । तीर्थराट् निवृत्तेर्गृहं ॥ ३० ॥
प्राणिभिर्यं समारूढै–र्लोकाग्रमपि दुर्लभं ॥ अप्याप्यते स तीर्थेशः । शाश्वतोऽयं गिरिर्वरः ॥३१॥
अनादितीर्थमेतद्धि–सिद्धास्तीर्थकृतोऽत्र च ॥ अनंता मुनयश्चापि । क्षिप्त्वा स्वकर्मसंचयं ॥
॥ ३२ ॥ ये चात्र पक्षिणः संति । क्षुद्राश्चान्येऽपि जंतवः ॥ हिंसका अपि सेत्स्यंति । ते भ-
वैस्त्रिभिरुत्तमाः ॥ ३३ ॥ अभव्याः पापिनो जीवा । नामुं पश्यंति पर्वतं ॥ लभ्यते चापि रा-
ज्यादि । नेदं तीर्थं हि लभ्यते ॥ ३४ ॥ मुक्तेषु तीर्थनाथेषु । गते ज्ञाने महीतले ॥ लोका-
नां तारकः सोऽयं । श्रवणात्कीर्त्तनादपि ॥ ३५ ॥ दुःखमाख्येऽपि समये । गते ज्ञानेऽपि के-
वले ॥ धर्मे विसंस्थुले जाते । तीर्थमेतज्जगद्धितं ॥ ३६ ॥ जिनेष्वहं यथा मुख्यः । सुमेरुः प-
र्वतेष्वपि ॥ द्वीपेष्विवायं जंब्वाख्य–स्तीर्थं तीर्थेष्वदस्तथा ॥ ३७ ॥ आजन्मांतरिमं तीर्थं ।

३३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पश्यंति ये नहि जनाः ॥ तेऽमी मानवरूपेण । निश्चितं पशवो मताः ॥ ३८ ॥ अत्रैयरुस्ती-र्थकृतः । केवलज्ञानिनो गिरौ ॥ अनंता निर्वृताश्चाग्रे । निर्वृत्स्यंति तथा पुनः ॥ ३९ ॥ अतीता जाविनश्चापि । ये केऽपि किल तीर्थपाः ॥ समवसरंत्यत्रैव । राजादन्यास्तरोस्तले ॥ ॥ ४० ॥ तीर्थं सुराष्ट्रा प्रथमं । ततः शत्रुंजयो गिरिः ॥ राजादनी तथत्येश। वर्त्तमानो जिनस्ततः ॥ ४१ ॥ प्रजावो दुःषमाकाले । वर्द्धतेऽस्याधिकाधिकं ॥ वमवाग्निरिवांजोधौ । ततस्तीर्थमिदं महत् ॥ ४२ ॥ अत्रार्हतां कृता पूजा । स्तुतिपुष्पाकृतादिजिः ॥ आसंसारकृतं पापं । प्राणिनां हि व्यपोहति ॥ ४३ ॥ अन्यतीर्थाज्जिनस्यार्चा। कृतानंतगुणात्र यत् ॥ एकपुष्पार्चनात्स्वर्गा–पवर्गौ न सुदुर्लजौ ॥ ४४ ॥ पूजामष्टविधां धत्ते । श्रीजिनेशस्य योऽत्र ना ॥ स प्राप्येह निधानानि । सर्वेवार्हत्समो जवेत् ॥ ४५ ॥ पूजार्हतां गुरौ जक्तिः । श्रीशत्रुंजयसेवनं ॥ चतुर्विधस्य संघस्य । संगमः सुकृतैर्जवेत् ॥ ४६ ॥ आराधितो गुरुश्चात्र । त्रिधा तीर्थकृतः पदं ॥ दत्ते सामान्यमुनय–स्तथा चक्रधरश्रियं ॥ ४७ ॥ पूजिता येन गुरवो । न चात्र इविणोच्चयैः ॥ तस्य जन्म श्रियश्चापि । निष्फलाः सकलाः खलु ॥ ४८ ॥ प्राग्जवे



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





बोधिबीजस्य । हेतुस्तीर्थकृतां गुरुः ॥ तस्मादत्र विशेषेण । गुरुः पूज्यो हि धीमता ॥ ४९ ॥ क्रिया सर्वत्र धर्म्यात्र । कार्यैव गुरुणा सह ॥ गुरुं विना कृताः सर्वाः । क्रियास्ता निष्फला यतः ॥ ५० ॥

अतो विशेषात्सेव्योऽत्र । गुरुर्धर्मप्रदायकः ॥ वस्त्रान्नापानप्रभृति–दानैः स्वानृण्यमिच्छता ॥ ५१ ॥ वस्त्रान्नजलदानेन । गुरोः शत्रुंजये गिरौ ॥ तद्भक्त्या च परत्रेह । जायंते सर्वसंपदः ॥ ५२ ॥ शत्रुंजयः श्रीजिनश्च । स्थावरं तीर्थमुच्यते ॥ गुरुस्तु जंगमं तीर्थं । स पूज्योऽत्र ततो भृशं ॥ ५३ ॥ अभयानुकंपापात्रो–चितकीर्त्तिमुखानि च ॥ अन्नज्ञानौषधपयो–दानान्यत्र विदुर्बुधाः ॥ ५४ ॥ दीनानाथादिकानां यो । दत्तेऽवारितभोजनं ॥ निरंतरं तद्गृहे श्री–र्नृत्यति ह्यनिवारिता ॥ ५५ ॥ दानं सिद्धिनिदानं हि । देयमत्र महाधिया ॥ न तरंति विना दानं । प्राणिनो भवसागरं ॥ ५६ ॥ शीलमत्र सदोन्मील–द्गुणं मोक्षसुखास्पदं ॥ पालनीयं त्रिशुद्ध्या हि । सर्वदुःखहरं परं ॥ ५७ ॥ येनात्र विदधे शील–भंगः स्वस्यैव घातिना ॥ नास्ति शुद्धिः कुतोऽप्यस्य । चांडालादपि सोऽधमः ॥ ५८ ॥ तपो निकाचितं कर्म । निकृंतति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यतोऽत्र तत् ॥ आद्याहस्कृतमप्युच्चै–र्हंति जन्मार्जितं तमः ॥ ५९ ॥ षष्ठाष्टमादितपसा ।
प्राप्यते फलमुत्तमं ॥ ततोऽत्र कार्यं तच्चैव । विशेषात्सर्वकामदं ॥६०॥ अष्टाह्निकायास्तपसो ।
बलादपि विकर्मभिः ॥ स्वर्गापवर्गयोः सौख्यं । लभ्यतेऽत्रांगिभिः क्षणात् ॥ ६१ ॥ हिरण्य-
हरकोऽप्यत्र । चैत्रराकोपवासतः ॥ शुद्ध्यंशुकहृत्तद्वत् । सप्त चाम्लैः सुवासनः ॥ ६२ ॥ र-
त्नस्तेयी ददहान–ममानोद्यत्सुवासनः ॥ अत्र कार्त्तिकसप्ताह–तपसा शुद्ध्यति स्फुटं ॥ ६३ ॥
रूप्यकांस्यकताम्रायः–पित्तलादानपाप्मनः ॥ सप्ताहःपरमार्थाख्य–तपसा मुच्यते पृथक् ॥
॥ ६४ ॥ मुक्ताविद्रुमहर्त्ता य–स्त्रिसंध्यं जिनपूजकः ॥ आचाम्लांतरनिःस्नेह–भोज्यान्मुच्येत
पक्षतः ॥ ६५ ॥ धान्यहर्त्ता जलस्तेयी । पात्रदानेन शुद्ध्यति ॥ यथार्थितमहादाना–न्मुच्यते
रसहारकः ॥ ६६ ॥ वस्त्राभरणहर्त्ता यः । कर्त्तात्र जिनपूजनं ॥ भवास्त स्वकमुर्त्ता । गर्त्ता-
दिव सुवासनः ॥ ६७ ॥ गुरुदेवार्थचौरोऽत्र । व्यर्थयत्यर्चयन् जिनं ॥ वृजिनं स्वस्य सद्ध्या-
न–पात्रदानपरायणः ॥ ६८ ॥ कुमारिकां प्रव्रजितां । पतितां सधवाधवे ॥ गुरूणामपि यो
दारा–नगम्यां चापि गच्छति ॥ ६९ ॥ स तत्पापं जिनध्याना–दत्र संरुद्धमानसः ॥ षण्मास-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तपसा तीर्थे । तद्भव्नार्यपि मुंचति ॥ ६९ ॥ युग्मं ॥ गोमहिष्यश्वमातंग—महीमंदिरहारकः ॥ तं तमत्र ददन्नत्तया । जिनध्यानाच्च शुद्ध्यति ॥ ७० ॥ अन्यचैत्यगृहाराम—पुस्तकप्रतिमादिषु ॥ क्षिप्त्वा स्वं नाम यो वक्ति । ममेदमिति दुष्टधीः ॥ ७१ ॥ सामायिकपवित्रोऽत्र । पुण्यसत्वः शुन्नाशयः ॥ षण्मासतपसा शुद्ध्य—त्यघौघविगमादसौ ॥ ७२ ॥ [illegible] ॥

परमेष्टिपदध्यान—देवार्चनदयादिन्निः ॥ सम्यत्तवकलितः श्राद्धः । सर्वपापाद्विमुच्यते ॥ ७३ ॥ न तत्पापं यदत्रार्हद्—ध्यानात् संक्षीयते न हि ॥ न तत्पुण्यं यदत्रार्हद्—ध्यानादासाद्यते न हि ॥ ७४ ॥ अकृतान्यपि पुण्यानि । चिंतितानि स्वचेतसा ॥ नावनान्निर्नवंत्यत्र । सद्ध्यानं तेन चिंतयेत् ॥ ७५ ॥ व्यापाराणां गुरुः सोऽयं । मनोव्यापार इष्यते ॥ स एव नयति स्वर्गे । नरके चापि मानवं ॥ ७६ ॥ अतोऽत्र लेश्या नो कार्या । कृष्णा नीला कपोतिका ॥ तेजःपद्मसिताद्याश्च । कार्याः कर्मक्षयायताः ॥ ७७ ॥ मनसा वचसा देहे । ह्रस्वेष्वपि हि जंतुषु ॥ न कार्यो जीवहत्यासौ । धर्मद्रुमदवानलः ॥ ॥ ७८ ॥ कुंथुकप्रतिमं जीवं । ये घ्नंति पुरुषाधमाः ॥ सप्तमं नरकं मुक्त्वा । नास्ति तेषाम-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वस्थितिः ॥ ७९ ॥ न कार्या सर्वथा हिंसा । नरकस्येव दूतिका ॥ परपीडाकृतः पुंसः । प्रत्यासन्नो न धर्मराट् ॥ ८० ॥ अनंतभववासेन । बंधवो जंतवोऽखिलाः ॥ आत्मवद्रक्षणीयास्ते । केचिदत्र न शत्रवः ॥ ८१ ॥ असत्यं प्राणनाशेऽपि । न वक्तव्यं सुमेधसा ॥ सोऽशुचेरशुचिः सत्यं । योऽसत्यं वक्ति मानवः ॥ ८२ ॥ पिटिकापूतिकृमयो–ऽर्दिताद्या व्याधयो मुखे ॥ असत्यवक्तुरन्येऽपि । संभवंतीह दारुणाः ॥ ८३ ॥ अदत्तं वारिचुलुक–मप्यत्र न हि गृह्यते ॥ अदत्तादानतो जीवा । निःस्वाः स्युः स्वल्पजीविनः ॥ ८४ ॥ अदत्तं नाददीत ज्ञो । धनं प्राणा हि देहिनां ॥ प्राणापहाराद्द्रविणा–पहारश्चातिदारुणः ॥ ८५ ॥

स्वदारा अपि तीर्थेऽत्र । सेवनीयाः सता नहि ॥ किं पुनः परदारास्तु । लोकद्वयविघातकाः ॥ ८६ ॥ परद्रव्यापहारत्वं । परदाराभिसेवनं ॥ पैशुन्यं परविद्वेषः । प्राज्यपापाय जायते ॥ ८७ ॥ संसारसागरे घोरे । यत्परिग्रहभारतः ॥ पोतवन्मज्जति जन–स्ततः सोऽल्पो विधीयतां ॥ ८८ ॥ परिग्रहः क्रमात्कार्यः । स्तोकात्स्तोकतरः सदा ॥ लोभः पिशाचो न यथा । छलयत्यतिदारुणः ॥ ८९ ॥ समत्वं सर्वसत्वेषु । चिंतनीयं निजात्मवत् ॥ विना सा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मायिकेनैव । निष्फलाः सकलाः क्रियाः ॥ ८० ॥ सामायिकपरस्यास्ति । त्रैलोक्यं सकलं व-
शे ॥ प्रन्नवंत्यपि नो देवा–स्तं पराज्ञवितुं मनाक् ॥ ८१ ॥ पौषधप्रतिमां प्राप्तः । कर्माणि
क्षिपति क्षणात् ॥ चारित्रधरवत्सोऽथ । वंद्यते सुरमानवैः ॥ ८२ ॥ पौषधस्वीकृतेरत्र । मा-
सक्रमणसंन्नवं ॥ प्राप्यते पुण्यमतुलं । केवलज्ञानमप्यहो ॥ ८३ ॥ अतिथिन्यः संविन्नागं
। संविन्नागं हि निर्वृतेः ॥ दत्ते नारकतैरश्च–गती संक्षिप्य शक्तितः ॥ ८४ ॥ न्नोजनावसरे
प्राप्त–मुनीनां दानयोगतः ॥ न दूरे शिवसाम्राज्यं । राज्यसौख्यकथैव का ॥ ८५ ॥ तन्नोज्यं
गुरुदेवेन्यो । यच्च दत्वोपभुज्यते ॥ अन्यतः पशुग्रासमिव । केवलं देहपोषकं ॥ ८६ ॥ देव-
इव्यं गुरुइव्यं । दहेदासप्तमं कुलं ॥ अंगारमिव तत्स्पष्टं । युज्यते नहि धीमतां ॥ ८७ ॥ दे-
वइव्याच्च या वृद्धि–र्गुरुइव्याच्च यद्धनं ॥ विषवत्तद्धनं स्वाडु । पश्चात्तीव्रातिडुःखदं ॥ ८८ ॥ दे-
वइव्यं गुरुइव्यं । ये चाश्नंति दिने दिने ॥ तेषां शुद्धिर्न विद्येत । सर्वतीर्थाश्रयैरपि ॥ ८९ ॥
देवइव्याद्गुरुइव्यं । स्पष्टं लोन्नांधचेतसां ॥ ददाति डुःखदौर्गत्ये । तैरश्चनरकस्थितिं ॥ १०० ॥
निरर्थकं ताम्रनं य–देकाक्षप्रमुखेष्वपि ॥ सोऽनर्थदंमो विरति–स्तस्य कार्या प्रयत्नतः ॥ १ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनर्थदंमकरणा—निःशरण्यो नवार्णवे ॥ जनः पीड्येत सुचिरं । यादोनिरिव कर्मनिः ॥ २ ॥
विशेषादत्र तीर्थेशे । शाखापत्रफलांकुरान् ॥ शाड्वलद्रुनवान्नैव । बिंद्यात्कल्याणकामनः ॥
॥३॥ सर्वत्र सुरसंवासः। सदा शत्रुंजयेऽस्त्यतः ॥ तदूदृशैत्तृणवृक्षादि। नो वेद्यं हि कदाचन॥
॥ ४ ॥ परोपकारः सर्वेषां । प्राणैरपि निजैर्धनैः ॥ कार्यः शिवसुखानंद—कारणं सर्वधर्ममा-
न ॥ ५ ॥ परोपकारजं पुण्यं । वृद्धिमेति नवे नवे ॥ यत्तत्कर्त्ता सुर इव । सर्वत्रास्खलित-
श्चरेत् ॥ ६ ॥ ज्ञानिनां पुस्तकानां च । पूजा वस्त्रान्नचंदनैः ॥ सूर्यप्रनेव जन्तूनां । इरत्यंगि-
नि निर्मिता ॥ ७ ॥ ज्ञानावरणकर्माणि । निद्यंते ज्ञानपूजया ॥ प्राप्यते केवलं ज्ञानं । मु-
क्तिलक्ष्मीनिबंधनं ॥ ८ ॥ शत्रुंजये जिनस्येव । पूजा ज्ञानस्य देहिनां ॥ कृताधिकाधिकं दत्ते
। फलं लोकाग्रसंनवं ॥ ९ ॥

अत्र रात्रिनोजनतो । गृध्रोलूकमुखान् नवान् ॥ प्राप्य प्रयाति नरकं । जनो दुःखौ-
घपूरितः ॥ १० ॥ रात्रिनोजननिष्णात—स्यांगिनोऽप्यशुचेः सदा ॥ स्पर्शोऽपि नास्य तीर्थस्य
। युज्यते जातुचिन्मुने ॥ ११ ॥ अत्र सम्यक्त्वमूलानि । पालयंति व्रतानि ये ॥ धन्यो न ते-

न्यः कोऽप्यन्यो । मुक्तिभाजो भवंति ते ॥ १२ ॥ जपैस्तपोभिर्दानैश्चा–न्यतीर्थे यत् फलं
भवेत् ॥ ततः कोटिगुणं पुण्यं । तीर्थस्यास्य स्मृतेरपि ॥ १३ ॥ रथाश्ववसुधाकुंभि–स्वर्ण-
रत्नमणीनिह ॥ यो दत्ते चक्रिशक्रत्व–पदं भुंक्ते स हर्षतः ॥ १४ ॥ इंद्रोत्सवादिकृत्यानि ।
यः करोति गिराविह ॥ स भोगान् सकलान् भुक्त्वा । मुक्तिमाप्नोति निश्चितं ॥ १५ ॥ ती-
र्थेष्वयं तीर्थराजो । नगेष्वेव नगोत्तमः ॥ एनं मामिव शैलेंद्रं । भज मुक्तिनिबंधनं ॥ १६ ॥
प्रसिद्धमवसर्पिण्या–मस्यां तीर्थमिदं मुने ॥ त्वत्तो भविष्यतितरां । मत्तो विश्वस्थितिर्यथा ॥
॥ १७ ॥ न बलान्नाप्यनभ्यासा–दिंद्रियाणि नियम्य च ॥ मनो मरुद्युतं धृत्वा । पदेऽथ प्रव-
णं कुरु ॥ १८ ॥ ध्यानैस्त्रिभिरिहात्मानं । ध्यायन् स्फटिकनिर्मलं ॥ रुध्वाश्रवपरीणामं ।
न किंचिदपि चिंतय ॥ १९ ॥ निर्विकल्पो लयं प्राप्तः । स्वसंवेद्यं भजन् सुखं ॥ पंचह्रस्वा-
क्षरोच्चार–कालाच्छित्वा शुभाशुभे ॥ २० ॥ दग्ध्वा घातीनि कर्माणि । लब्ध्वा ज्ञानं च केव-
लं ॥ क्षेत्रस्यास्यैव माहात्म्याद् । भावी त्वं मुक्तिवल्लभः ॥ २१ ॥ युग्मं ॥ अनुशास्येति भ-
गवान् । पुंडरीकं महामुनिं ॥ ययौ विहर्त्तुमन्यत्र । त्रैलोक्यहितकाम्यया ॥ २१ ॥ त्रैलोक्य-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वासिनस्तेऽपि । श्रुत्वा सर्वज्ञज्ञाषितं ॥ सानंदाः स्वस्वसंस्थानं । ययुस्तीर्थानुरागिणः ॥२२॥
पुंमरीकस्तु तत्रास्थात् । पंचकोटीज्ञिरावृतः ॥ मुनिज्ञिः शीतकिरण । इव सौम्यरसाश्रयः
॥ २३ ॥ ततः परमसंवेग—पीयूषनिज्नृतां गिरं ॥ पुंमरीको जगौ तत्र । व्रतिनः कृतिनः कृते ॥
॥ २४ ॥ क्षेत्रानुज्ञावतः सोऽयं । गिरिः सिद्धिसुखास्पदं ॥ जिगीषूणां डुर्गमिव । कषायरि-
पुसाधकं ॥ २५ ॥ मुक्तेर्निबंधनं पूर्वं । कार्या संलेखनाधुना ॥ ज्ञवति द्विविधा सा तु । इ-
व्यज्ञावविज्ञेदतः ॥ २६ ॥ सर्वोन्मादमहारोग—निदानानां समंततः ॥ शोषणं सर्वधातूनां ।
इव्यसंलेखना मता ॥ २७ ॥ रागद्वेषकषायाणां । मोहमात्सर्यशालिनां ॥ तच्छेदो यत्समाधा-
नात् । ज्ञावसंलेखना तु सा ॥ २८ ॥ इत्युदीर्य पुंमरीकः । समं श्रमणकोटिज्ञिः ॥ सर्वा-
नालोचयामासा—तीचारान् सूक्ष्मबादरान् ॥ २९ ॥ महाव्रतानि चक्रेऽसौ । दृढानि पुनरेव
हि ॥ वारंवारं वह्नितापो । हेम्नः शुद्धिकृते यतः ॥ ३० ॥ चतुस्त्रिंशदतिशयै—र्युक्ता मुक्तोच्चय-
प्रज्ञाः ॥ त्रैलोक्यस्वामिनः सर्वे । ज्ञवंतु शरणं जिनाः ॥ ३१ ॥ अनंतमक्षयं स्थानं । प्राप्ता
विड्रुमकांतयः ॥ पंचदशज्ञावज्ञिन्नाः । सिद्धास्ते शरणं मम ॥ ३२ ॥ महाव्रतधराधीरा—स्त्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





त्तसावद्यसंश्रयाः ॥ इंद्रनीलमणिरुचो । मुनयः शरणं मम ॥ ३३ ॥ केवलिभिर्यथादिष्टः ।
सर्वजीवदयामयः ॥ स्फटिकोपलनिस्तंद्रः । स धर्मः शरणं मम ॥ ३४ ॥ लक्षेषु चतुरशी-
तौ । जीवयोनिषु दुःकृतं ॥ मिथ्या मे सकलं नूया-दपुनःक्रिययान्वितं ॥ ३५ ॥ व्युत्सृ-
जामि त्रिधा शुद्ध्या । पापस्थानानि तान्यहं ॥ यानि चाष्टादशाऽज्ञान-जावतो विहितानि
मे ॥ ३६ ॥ एकेंद्रियाद्यान् सकलान् । जंतूंस्तु क्षमयाम्यहं ॥ क्षाम्यंतु ते पुनः सर्वे । मयि
वैरविवर्जिते ॥ ३७ ॥ मैत्री मे सर्वसत्वेषु । भ्रममाणेषु कर्मभिः ॥ एकोऽहं नास्ति मे क-
श्चि-च्छरणस्त्वस्य चार्हतां ॥ ३८ ॥ इत्युदित्वा निराकारं । दुष्करं चरमे नवे ॥ प्रतिपेदे सो-
ऽनशनं । समस्तश्रमणैः समं ॥ ३९ ॥ क्षपकश्रेणिमारूढ-स्याऽत्रुटनन्नितोऽपि हि ॥ तस्य
घातीनि कर्माणि । जीर्णरज्जुवत्तुच्चकैः ॥ ४० ॥ पंचकोटिमितानां च । साधूनामपि तुत्रुटुः
॥ तदा घातीनि कर्माणि । सर्वसाधारणं तपः ॥ ४१ ॥ तपसा प्राप्यते राज्यं । तपसा स्व-
र्गसंपदः ॥ तपसा शिवसौख्यं च । त्रैलोक्यवशकृत्तपः ॥ ४२ ॥ मासांते चैत्रराकायां । पुं-
मरीकस्य केवलं ॥ उत्पेदे प्रथमं ज्ञानं । पश्चात्तेषां महात्मनां ॥ ४३ ॥ शुक्लध्याने योगि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नस्ते । स्थितास्तुर्ये क्षणादपि ॥ प्रक्षीणशेषकर्माणो । निर्वाणपदवीं ययुः ॥ ४४ ॥
आगत्य त्रिदशाः सर्वे । मरुदेव्या इव ध्रुवं ॥ व्यधुस्तेषां महोत्साहा । निर्वाणगमनो-
त्सवं ॥ ४५ ॥ यथा श्रीवृषभः स्वामी । प्रथमस्तीर्थनायकः ॥ तथास्यामवसर्पिण्या-मिदं
तीर्थं तदाद्यभूत् ॥ ४६ ॥ सिद्ध्यत्येको मुनिर्यत्र । तत्तीर्थमिह कथ्यते ॥ सिषिधुर्यत्र तावंत-
स्तीर्थात्तीर्थमिदं ततः ॥ ४७ ॥ सिताष्टम्यां फाल्गुने यद् । भगवान् वृषभः प्रभुः ॥ शत्रुंज-
यमाजगामा-ष्टमीपर्व ततोऽभवत् ॥ ४८ ॥ शुभाशुभं भावि भव-स्यायुर्बंधं शरीरिणः ॥
कुर्वंतोऽस्यां पाक्षिके च । पर्वणी ते ततः स्मृते ॥ ४९ ॥ पर्वणोरेतयोस्तीर्थे-ऽमुष्मिन् भ-
क्त्याल्पमप्यहो ॥ दत्तं बहुफलं बीज-मिव सत्क्षेत्ररोपितं ॥ ५० ॥ अष्टमी साष्टकर्माणि ।
पिनष्टि प्राणिनां स्फुटा ॥ तपोभिर्दानशीलाद्यैः । सेविता जिनभक्तिवत् ॥ ५१ ॥ चैत्र्यां सि-
द्धः पूर्णिमास्यां । पुंडरीको महामुनिः ॥ तदा चैत्रीपर्वमासीत् । पुंडरीकश्च पर्वतः ॥ ५२ ॥
यश्चैत्र्यां पुंडरीकस्थं । पुंडरीकं सदार्चयेत् ॥ यात्रायां संघसहितः । स स्याल्लोकोत्तरस्थितिः
॥ ५३ ॥ नंदीश्वरादिद्वीपस्थ-शाश्वतानां यदार्हतां ॥ पूजनात् सुकृतं तस्मा-च्चैत्र्यां शत्रुंजये



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽधिकं ॥ ५४ ॥ दानशीलतपःपूजा–मुख्यं पुण्यं यदन्यदा ॥ तस्मात्कोटिगुणं चैत्र्यां । पुंम-
रीके जिनार्चनात् ॥ ५५ ॥ चारित्रं चंऽप्रन्नोऽर्ह–श्चैत्री शत्रुंजयोऽचलः ॥ विना पुण्यैर्न ल-
न्यंते । नदी शत्रुंजयापि च ॥ ५६ ॥ शांतिकं च ध्वजारोपं । चैत्र्यां कुर्वन् जिनालये॥ नी-
राजनाच्च लन्नते । नीरजस्कान् न्नवान्नरः ॥ ५७ ॥ अन्यत्रापि नरः कुर्वन् । चैत्र्यां संघस्य
पूजनं ॥ प्राप्नोत्यमर्त्यसौख्यानि । किं पुनर्विमलाचले ॥ ५० ॥ मुनिर्वस्त्रान्नपानाद्यै–श्चैत्र्यां
तु प्रतिलान्नितः ॥ चक्रिशक्रपदं दत्वा । पश्चान्मोक्षं प्रयच्छति ॥ ५ए ॥ चैत्री पर्वोत्तमा श्रेष्टा।
सर्वपुण्यप्रवार्द्धिनी ॥ आराधिता पुंमरीके । गिरौ प्रौढफलप्रदा ॥ ६० ॥ अष्टाह्निकापि पूर्णा
स्यात् । पूर्णिमास्यां मधोर्यतः ॥ अष्टसिद्धिप्रदा पर्व । कथ्यते सा ततोऽधिकं ॥ ६१ ॥ गीर्वा-
णा अप्यदः पर्व । सर्वे नंदीश्वरे गिरौ ॥ जिनपूजादिन्निर्न्नक्त्या । नित्यं सत्यापयंत्यपि ॥६२॥
विकथाकलहक्रीमा–नर्थदंमादिकांस्ततः ॥ त्यक्त्वा प्रमाददेतूंश्च । चैत्रीं धर्मरतिर्न्नजेत् ॥६३॥
प्रन्नावना जैनचैत्ये । सिद्धांते च गुरौ मुनौ ॥ न्नक्तिः कार्या पूर्णिमास्यां । चैत्र्यामक्षयसि-
द्ध्ये ॥ ६४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इतश्च विहरन् स्वामी । पावयन् पृथिवीतलं ॥ सिद्धार्थोद्यानमापेदे । विनीतापुरसीम-
नि ॥ ६५ ॥ इंद्राद्या विबुधास्तत्र । निपेतुर्नन्नसो ध्रुवं ॥ आदिदेवमहाभक्त्या । ते ततोऽप्यु-
त्पतिष्णवः ॥ ६६ ॥ त्रिविष्टपपतेस्तेऽथ । त्रिप्राकारयुतं द्रुतं ॥ चक्रुः समवसरणं । योजनप्र-
मितावनौ ॥ ६७ ॥ गत्वोद्यानपतिस्तच्च । भरताय न्यवेदयत् ॥ स द्वादशस्वर्णकोटी-र्ददौ
तस्मै च संमदात् ॥ ६८ ॥ पदातिभिर्हयैर्नागै-रथैः सूनुभिरावृतः ॥ सामंतैः सैन्यपतिभि-
र्नूपैरंतःपुरीजनैः ॥ ६९ ॥ श्रेष्ठिभिश्च सार्थवाहै-श्चारणैर्वंदिभिस्तथा ॥ गंधर्वैः सर्वसारैश्च ।
समंतादपि सेवितः ॥ ७० ॥ कुर्वन् छत्रमयं व्योम । दिशः सच्चामरध्वजाः ॥ पृथिवीं पूरयन्
सैन्यै-श्चचाल भरतेश्वरः ॥ ७१ ॥ [redacted] ॥ पूर्वद्वारेण समव-सरणं प्राप चक्रभृत्
॥ विभुं प्रदक्षिणीकृत्य । स्तोतुमेवं प्रचक्रमे ॥ ७२ ॥ जय स्वामिन् जिनाधीश । करुणांबु-
निधे जय ॥ जय संसारकांतार-निस्तारक सुवत्सल ॥ ७३ ॥ चिरोत्कंठापरस्याद्य । त्वं मे
दृग्गोचरोऽभवः पुरा कृतं शुभं कर्म । तज्ञाने फलितं ह्यदः ॥ ७४ ॥ वीतरागस्य ते चित्ते ।
वसाम्येष कथेति का ॥ यत्त्वं वससि मे चित्ते । ततोऽलमपरैर्मम ॥ ७५ ॥ सुखे दुःखे पु-

For Private And Personal Use Only

रेऽरण्ये । जलेऽपि ज्वलने रणे ॥ दिवा रात्रौ च मच्चित्ते । नवंतु चरणास्तव ॥ ७६ ॥ स्तु-
त्वेति जगतामीशं । पंचांगप्रणतिं गतः ॥ चक्री शक्रानुज इव । तत्पृष्टे निषसाद सः ॥७७॥
सर्वज्ञाषानुगामिन्या । योजनावधियानया ॥ गिरा त्रिजगतामीशो । देशनामित्यसूत्रयत् ॥
॥ ७८ ॥ सुपात्रदानं श्रीसंघ–पूजा प्राज्यप्रज्ञावना ॥ महोत्सवैः कृता तीर्थ–यात्रा सिद्धांत-
लेखनं ॥ ७९ ॥ साधर्मिकाणां वात्सल्यं । गुर्वागममहोत्सवः ॥ समत्वं च शुन्नध्यान–म-
नंतसुखतास्पदं ॥ ८० ॥ [illegible] ॥ देशनांते नृपोऽपृच्छत् । प्रणम्य शिरसा प्रभुं ॥ न-
र्जितैः स्वरनिर्घोषै–र्हेपयन् पाथसां पतिं ॥ ८१ ॥ संघाधिपपदं स्वामिन् । नवद्भिर्वर्णितं ब-
हु ॥ तत्कथं प्राप्यते सम्यक् । फलं तेन नवेत् किमु ॥ ८२ ॥

श्रुत्वेति श्रीयुगादीशो–ऽवोचत् श्रुणु महीधव ॥ यथा तीर्थंकरपदं । संघाधिपपदं तथा
॥ ८३ ॥ न प्राप्यते विना नाग्यं । संघाधिपपदं नृप ॥ सत्यामपि हि संपत्तौ । पुंमरीक इ-
वाचलः ॥ ८४ ॥ ऐंद्रं पदं चक्रिपदं । श्लाघ्यं श्लाघ्यतरं पुनः ॥ संघाधिपपदं तान्यां । न वि-
ना सुकृतार्जनात् ॥ ८५ ॥ तीर्थंकरनामगोत्र—मर्जयत्यतिदुर्लनं ॥ लब्ध्वा दर्शनसंशुद्धिं ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संघाधिपतिरुत्तमं ॥ ८६ ॥ अर्हतामपि मान्योऽयं । संघः पूज्यो हि सर्वदा ॥ तस्याधिपो ज-
वंद्यस्तु । स हि लोकोत्तरस्थितिः ॥ ८७ ॥ चतुर्विधेन संघेन । सहितः शुद्धवासनः ॥ रथ-
स्थदेवतागार—जिनबिंबमहोत्सवैः ॥ ८८ ॥ यच्छन् पंचविधं दानं । प्रार्थनाकल्पपादपः ॥ पुरे
पुरे जिनागारे । कुर्वाणो ध्वजरोपणं ॥ ८९ ॥ शत्रुंजये रैवते च । वैभारेष्टापदाचले ॥ स-
म्मेतशिखरे देवा—नर्चयन् शुद्धदर्शनः ॥ ९० ॥ सर्वेष्वेष्वथ चैकस्मिन् । गुर्वादेशपरायणः
॥ ईशोत्सवादिकं कुर्वन् । कृत्यं संघपतिर्भवेत् ॥ ९१ ॥ [redacted] ॥ सदाराध्योऽपि
यत्पुण्य—कर्मणाराध्यते गुरुः ॥ सौरभ्यं तत्सुवर्णस्य । सा चेंदोर्निष्कलंकता ॥ ९२ ॥ मि-
थ्यात्विषु न संसर्ग——स्तद्वाक्येष्वपि नादरः ॥ विधेयः संघपतिना । सद्यात्राफलमिच्छता ॥
॥ ९३ ॥ न निंदा न स्तुतिः कार्या । परतीर्थस्य तेन हि ॥ पालनीयं त्रिशुद्ध्या तु । सम्य-
क्त्वं जीविताववधि ॥ ९४ ॥ साधून् सधर्मिसहितान् । वस्त्रान्नमनादिभिः ॥ प्रत्यब्दं पूजय-
त्येष । संघयात्रां करोति यः ॥ ९५ ॥ पाक्षिकादीनि पर्वाणि । धर्मान् दानादिकांश्च सः ॥
श्रीसंघपूजामत्युच्चैः । कुर्यादार्जवसंयुतः ॥ ९६ ॥ स हि संघपतिः पूज्यः । सुराणामपि जा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यते ॥ सिद्धः स्यात्तद्भवे कश्चि–द्भवेषु त्रिषु कश्चन ॥ ९७ ॥

श्रुत्वेति श्रीजिनाधीशात् । शक्रादपि महीपतिः ॥ प्रणनाम पितुः पादान् । वाचं भ-क्त्येत्युवाच च ॥ ९८ ॥ स्वामिंस्त्रिजगदाराध्य । प्रसीद मयि तारक ॥ संघाधिपपदं येन । कलयाम्यमलाशयं ॥ ९९ ॥ इंद्रादिभिस्ततो देवैः । संघेन सहितो विभुः ॥ भत्थायाक्षतवासांश्च । चिक्षेप भरतोपरि ॥ १०० ॥ शक्रस्तदानीमानीय । मालां दिव्यां महीपतेः ॥ तत्पत्न्याश्च सुभद्रायाः । कंठे निक्षिप्तवान् मुदा ॥ १ ॥ समं सकलसामंतै–र्भरतेशस्ततः पुनः ॥ अयोध्यां नगरीं प्राप । पूजितः पथि पार्थिवैः ॥ २ ॥ आजूहवत् संघनरान् । बहुमानपुरस्सरं ॥ उच्चैश्चावादयद्भंभां । पापारिं सोऽभिषेणयन् ॥ ३ ॥ पुरांतर्जिनचैत्येषु । व्यधादष्टाह्निकोत्सवं ॥ सन्मानयन् समायातान् । श्रीसंघपुरुषान्नृपः ॥ ४ ॥ आहूय भरतो भक्त्या । गणभृद्भिः स्ववेश्मनि ॥ सर्वप्रत्यूहनाशाय । शांतिकर्माप्यचीकरत् ॥ ५ ॥ तदा च गणभृन्मंत्रैः । प्रत्यक्षाः सकलाः सुराः ॥ निर्विघ्नयात्राकरणा–यांगीचक्रुर्निजागतिं ॥ ६ ॥ अत्रांतरे देवराजः । स्वर्णदेवालयार्चितां ॥ प्रतिमामर्पयामास । युगादीशस्य चक्रिणे ॥ ७ ॥ तदा







For Private And Personal Use Only

भरतभूपालो–ऽपृच्छत्क्रमुपागतं ॥ सावद्यरहितः स्वामी । सर्वज्ञः सर्वकर्ममुक् ॥ ८ ॥ सा-
वद्यमत् किमादिकृत् । संघाधिपपदं मम ॥ आरंभोदयतः पुण्य–सिद्धिः स्यात्तत्कथं वद ॥
॥ ९ ॥ [illegible] ॥

तन्निशम्य जगाविंद्रः । शृणु चक्रेश तत्प्रथां ॥ बहुपुण्याल्पसावद्य–माद्रियेत न कर्मकैः
॥ १० ॥ प्रायशोऽगारिणां पुण्य–कर्म सावद्यसंश्रितं ॥ पूजाद्यमनगाराणा–मेवास्ति निरव-
द्यकं ॥ ११ ॥ सशातकुंभा मृदपि । यद्वद्वच्च भेषजं ॥ कटूवापाते ततो मिष्टं । तद्वत्साव-
द्ययुक् वृषः ॥ १२ ॥ सावद्यलवतोऽमुष्मिन् । दानशीलाभयादिभिः ॥ प्रभावनाभावनाभि–
र्महत्पुण्यं प्रजायते ॥ १३ ॥ प्रभावनां शासनेऽस्मिन् । सर्वारंभादपि सृजन् ॥ स्वर्गापवर्ग-
योः सौख्य–मर्जयत्यार्जवान्वितः ॥ १४ ॥ तीर्थयात्राप्रतिष्टादि–कर्म सावद्यतो भवेत् ॥ अ-
तः सावद्यलेशोऽपि । बहुपुण्याय जायते ॥ १५ ॥ शिक्षां संघपतेरित्थं । शक्रो भरतचक्रिणे
॥ दत्वा पुनः स्वःसदनं । तेनैवानुमतो ययौ ॥ १६ ॥ भवास बहिरावासे । मणिरत्नहिरण्मये
॥ शुभेह्नि संघयुक् चक्री । कृते वर्द्धकिनाथ सः ॥ १७ ॥ संघावासेष्वदीपिष्ट । सौवर्णो देव-

तालयः ॥ जंबूद्वीपांतरा मेरु–रिव नक्षत्रमंडितः ॥ १८ ॥ तस्यैव दक्षिणे देशे । क्लृप्ते वर्द्ध-
किना क्षणात् ॥ गणाधिपा गणयुता । अतिष्ठन् पौषधौकसि ॥ १९ ॥ ततोऽपि वामदेशेऽ-
जू–दावासश्चक्रिणोऽद्भुतः ॥ अजूवन्नपरे संघा–वासा मंडलिनोऽन्वितः ॥ २० ॥ एवं निवेशदे-
शोऽजूत् । संघस्य पथि सर्वतः ॥ कृतो वर्द्धकिना हेम–रत्नैः सद्भक्तिशालिना ॥ २१ ॥ सौ-
वर्णे देवतागारे । रेजे रत्नमयः प्रभुः ॥ सौवर्णे जरतस्यांत–र्जजन्निव सुनिर्मलः ॥ २२ ॥
सूनुर्बाहुबलेः सोम–यशा गगनवल्लजः ॥ विद्याजृन्नमिनमेः पुत्रः । प्राचीशो वज्रनाजराट् ॥
॥ २३ ॥ कल्याणकेतुश्चेत्यस्य । चत्वारोऽपि महाधराः ॥ प्रतिष्ठिताः सूरिमंत्रै–र्गणजृन्निर्जिं-
नालये ॥ २४ ॥ युग्मं ॥ महाधरास्तथान्येऽपि । धर्मजारधुरंधराः ॥ संघे सहस्रशोऽजूवन् ।
श्रीमतो जरतेशितुः ॥ २५ ॥ चक्री सुजद्या रेजे । विकसत्पुष्पमालया ॥ जंगमः सुरन्नि-
रिव । जूषितो वनमालया ॥ २६ ॥

साधर्मिकाणां वात्सल्यं । कृत्वा संघस्य पूजनं ॥ जिनार्चामर्चयित्वा च । कृतप्रस्थानमं-
गलः ॥ २७ ॥ स शुजेऽह्नि गजारूढ–श्छत्रचामरमंडितः ॥ चारणश्रमणैः पूर्वं । कृतमांग-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ढ्यभूषणः ॥ २८ ॥ महाधरैश्चतुर्दिक्षु । वृतः सामानिकैरिव ॥ सुरेंद्र इव संगीतं । पश्यन्न-
प्सरसां पुरः ॥ २९ ॥ जय जीव चिरं नंद । भरत क्षितिपेति च ॥ संस्तूयमानः सानंदं ।
मागधैरिव नाकिभिः ॥ ३० ॥ सामंतैर्मंडलीकैश्च । कुमारैर्वसुधाधिपैः ॥ सचिवैः संघपुरुषै-
श्चतुरंगचमूचयैः ॥ ३१ ॥ पर्वतैरिव मातंगैः । कल्लोलैरिव वाजिभिः ॥ स्यंदनैर्वेश्मभिरिव ।
स्वोत्साहैरिव पत्तिभिः ॥ ३२ ॥ अणुव्रतधरैः श्राद्धैः । श्राविकाभिः समंततः ॥ बाहुबलिप्र-
भृतिभिः । समं श्रमणकोटिभिः ॥ ३३ ॥ सार्द्धं नमिविनमिभ्यां । ज्ञानिभिर्गणधारिभिः ॥
व्रतिनीभिः शीललीला—लंकृताभिरनुश्रितः ॥ ३४ ॥ गंधर्वैर्गायनैर्बंदि—वृंदैः कौतुकिभिर्नटैः ॥
नृत्यद्भिर्नर्त्तकीवर्गै—श्चचार भरताधिपः ॥ ३५ ॥ सभक्तिः कुतुकं ॥ सौवर्णं रथमारूढो । म-
णीनां देवतालयः ॥ भामंडलमिव व्योम्नि । शुशुभे जिनदेहतः ॥ ३६ ॥ छत्रत्रयं तदुपरि ।
पूर्णिमेंदुविडंबकं ॥ रेजे चामरचारेण । त्रैलोक्यैश्वर्यसूचकं ॥ ३७ ॥ आच्छादयन् सैन्यजातै-
रजोभी रविमंडलं ॥ श्रीसंघचरणन्यासैः । पुनानः पृथिवीतलं ॥ ३८ ॥ अंतःपुरपुरंध्रीभि-
रुद्गीतधवलध्वनिः ॥ उत्तार्यमाणलवणो । महद्भिरबलाजनैः ॥३९॥ स्थाने स्थानेऽपि नगरे । कु-



For Private And Personal Use Only

वेन गुरुसुरार्चनं ॥ उद्धरन् जिनचैत्यानि । प्रयाणमकरोन्नृपः ॥ ४० ॥ त्रिभिर्विशेषकं ॥ प्रतीछन् विविधाः पूजा । महर्घ्या रत्नहेमभिः ॥ देशे देशे भूपतीनां । स्त्रोतानामिव भूरुहां ॥ ॥ ४१ ॥ अतिक्रम्य बहून् देशान् । यानेन भरतेश्वरः ॥ योजनावधिना देशं । सौराष्ट्रं प्राप च क्रमात् ॥ ४२ ॥

भ्रातृव्यो भरतेशस्य । सुराष्ट्रतनयस्ततः ॥ सौराष्ट्राधिपतिः शक्ति-सिंहः सन्मुखमाययौ ॥ ४३ ॥ तं लुठंतं महीपीठे । पाणिनोत्थाप्य चक्रभृत् ॥ सर्वांगसंगसुभग-मालिलिंगेत्युवाच च ॥ ४४ ॥ सुराष्ट्रेत्यस्य राष्ट्रस्य । सफलं नाम निर्ममे ॥ यत्र शत्रुंजयं तीर्थं । दुःप्रापं परदेशजैः ॥ ४५ ॥ धन्यस्त्वं यः सदा तीर्थ-स्यास्य सेवां करोषि च ॥ अस्मादृशास्तु दूरस्थाः । पश्यंत्येनं न वा सकृत् ॥ ४६ ॥ उल्लाप्येति गिरा प्रीति-पूर्वकं तं महीपतिः ॥ सन्मानयद् दृष्टिहस्त-दानैराभरणादिभिः ॥ ४७ ॥ दृष्ट्वाथ पुंडरीकाद्रिं । कूटोट्टंकितपुष्करं ॥ यात्रिकाणां यशः कोश-मिव श्रेयःसमुच्चयं ॥ ५० ॥ संसारभयभीतानां । सुदुर्गमिव देहिनां ॥ शिरोरत्नमिवानर्घ्यं । भूभामिन्या विभूषणं ॥ ५१ ॥ सुंदर्या निर्वृतेः क्रीडा-कंदुकोप-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ममुत्तमं ॥ रत्नरोचिर्भिराकाशं । चित्रयंतमयत्नतः ॥ ५२ ॥ रोमांचकंचुकं बिभ्रद् । धुन्वन्
मूर्धानमाहतः ॥ जगाद भरताधीशः । श्रीसोमयशसं नृपं ॥ ५३॥ [redacted] ॥ ध-
न्याः सौराष्ट्रिका एते । लोकाः सुकृतिनः खलु ॥ ये नित्यं पुंडरीकाद्रिं । निकषा निवसंत्य-
मी ॥ ५४ ॥ अस्य छायापि संस्पृष्टा । मारुतोऽस्मात्प्रवर्त्तितः ॥ चंद्रांशुरिव निस्तापं । गत-
तापं जगत्सृजेत् ॥ ५५ ॥ ये पुंडरीकं पश्यंति । पुंडरीकमिवोज्ज्वलं ॥ ते त्यजंत्येनसां पं-
कं । पुण्यामृतपवित्रिताः ॥ ५६ ॥ तथा मन्मानसं माद्य–त्येनं दृष्ट्वैव तर्कये ॥ यथा तन्मल-
निर्मुक्त–मासीद्धुल्लाघवल्लघु ॥ ५७ ॥ निजात्मनः प्रसत्तेर्हि । शंके पंकेन वर्जितं ॥ तीर्थमे-
तद्यतः कार्यं । कारणानुमितं भवेत् ॥ ५७ ॥ मोदं मेदुरयंत्येते । नेत्रप्रिया द्रुमोत्कराः ॥
मरुत्प्रकंपितैः शीर्षै–र्नृत्यंतस्तीर्थवासतः ॥ ५९ ॥ पक्षिणोऽपि हि पुण्यास्ते । ये वसंत्यत्र प-
र्वते ॥ चक्रिश्रियमपि प्राप्ता । न वयं दूरवासतः ॥ ६० ॥ इत्युदित्वा चक्रवर्त्ती । सिंधुरस्कं-
धतस्ततः ॥ अवतीर्य गणाधीशान् । मुनीनपि मुदानमत् ॥ ६१ ॥ पर्वतोऽयं कथं पूज्यः ।
क्रिया कात्र विधीयते ॥ अपृच्छन् गुरून् भक्त्या । धर्ममार्गप्रदर्शकान् ॥ ६२ ॥ श्रीनाम्नो ग-

For Private And Personal Use Only

एतन्मुख्यो । विज्ञायावधिना जगौ ॥ चक्रिन्नालोकमात्रेण । नमस्योऽयं महीधरः ॥ ६३ ॥
यः पूर्वदर्शनस्यास्य । वार्त्तामपि निवेदयत् ॥ यद्यत्तस्मै प्रदीयेत । तत्तत्पुण्यान्निवृद्धये ॥६४॥
सुवर्णमणिरत्नाद्यै–रयं वर्द्धाप्यते नगः ॥ प्रथमं पुण्यलाभाय । नवैंडुरिव तंतुभिः ॥ ६५ ॥
वाहनानि ततस्त्यक्त्वा । लुठित्वा वसुधातले ॥ गिरिः पंचांगनत्यासौ । सेवनीयो जिनांघ्रिव-
त् ॥ ६६ ॥ दत्वा तत्रैव तद्घस्त्रे । संघावासानुपोषितः ॥ समं महाधरैः संघ–पतिः सद्भक्ति-
शोभितः ॥ ६७ ॥ सुस्नातः शुभ्रवासांसि । दधानो युवतीसखः ॥ देवालये जिनस्नात्र–पूजां
कुर्यान्मनोहरां ॥ ६८ ॥ [redacted] ॥ संघाद्बहिः शुद्धदेशे । श्रीशत्रुंजयसन्मुखं ॥ कुर्यादुत्तुंगमा-
वासं । स्वचित्तावाससोदरं ॥ ६९ ॥ दधानो धूपदहनं । सौवर्णं संघसंयुतः ॥ सन्मंगलध्व-
निमिल–द्धवलोच्चारपूर्वकं ॥ ७० ॥ याचकेभ्यो ददद्वित्तं । स्वचित्तोल्लासभासुरं ॥ आलिप्य
भूमिं सौरभ्य–भासुरैर्यक्षकर्दमैः ॥ ७१ ॥ संघस्य बहुधा स्वस्ति–कारिणं स्वस्तिकं ततः ॥
मुक्तादिभिस्तंडुलैर्वा । कुर्यात्कुंकुममंडले ॥ ७२ ॥ [redacted] ॥ निषिद्ध्य तुमुलं सर्वं ।
पुरस्कुर्याद्गणाधिपं ॥ तत्पृष्ठगः संघपति–र्विदध्यात्पूजनोत्सवं ॥ ७३ ॥ भ्रष्टे राद्धैश्च सिद्धैश्च ।

॥२७९॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नैवेद्यै रूप्यहेमभिः ॥ वासोभिः पुष्पमालाभि–रर्चयेत्प्रथमं स हि ॥ ७४ ॥ कुर्यात्सधर्मि-
वात्सल्यं । संघपूजां च भक्तितः ॥ संगीतं देवतागारे । ह्यनंतफलदायकं ॥ ७५ ॥ महार्धैः
संघपति–रन्यैरपि शुभाशयैः ॥ विभूषणांशुकैर्माल्यैः । पूज्यः पत्न्या समं बहु ॥ ७६ ॥ मि-
ष्टान्नं च दिने तस्मिन् । भुंजानाः संघवासिनः ॥ धर्म्याभिस्तत्र तिष्ठंति । कथाभिर्गुरुसेविनः
॥ ७७ ॥श्रुत्वेति चक्री गुरुतो । गुरुतोषपरस्तदा ॥ अदापयत्तत्र वासान् । निकषा विमलाचलं
॥ ७८ ॥ स्नातः शुचिः कृतत्रलिः । शुभवस्त्रधरस्ततः ॥ समं महार्धैः पत्न्या । देवतागार-
मासदत् ॥ ७९ ॥ पुष्पाक्षतस्तुतिप्रायां । पूजां कृत्वा जिनांघ्रये ॥ गणभृत्साक्षिकं चक्री ।
संगीतं चाप्यसूत्रयत् ॥ ८० ॥ गुरूक्तविधिना कृत्वा । मण्डलं यक्षकर्दमैः ॥ शुचिप्रदेशे भरतो
। मौक्तिकस्वस्तिकं व्यधात् ॥ ८१ ॥ तत्राष्टापदपात्रस्थ–पक्वान्ननिचया बभुः ॥ अभ्यागता-
नि भरतं । शिखराणीव तद्गिरेः ॥ ८२ ॥ रत्नोत्करा रोहणाद्रि–सर्वस्वस्येव तस्कराः ॥ सु-
वर्णराशयोऽप्यासं–स्तत्र मेरूपला इव ॥ ८३ ॥ एवं गुरूद्दिष्टपथा । वर्त्तमानो नराधिपः ॥
चकारपुंडरीकाद्रेः । पूजां संघसमन्वितः ॥ ८४ ॥ नमन्निव भक्तिभरा–द्भरतो भूविभुस्ततः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पंचांगस्पृष्टभूपीठ—स्तीर्थं स्तोतुं प्रचक्रमे ॥ ८५ ॥ धरणेंद्रमुखा नागाः । पातालस्थानवासिनः ॥ सेवंते यं सदा तीर्थ—राजं तस्मै नमोनमः ॥ ८६ ॥ चमरेंद्रवलींद्राद्याः । सर्वे भुवनवासिनः ॥ सेवंते यं सदा तीर्थ—राजं तस्मै नमोनमः ॥ ८७ ॥ किन्नरकिंपुरुषाद्याः। किन्नराणां च वासवाः ॥ सेवंते यं सदा तीर्थ—राजं तस्मै नमोनमः ॥ ८८ ॥ राक्षसानामधीशाश्च । यक्षेशाः सपरिच्छदाः ॥ सेवंते यं सदा तीर्थ—राजं तस्मै नमोनमः ॥ ८९ ॥ अणपन्नीपणपन्नी—मुखा व्यंतरनायकाः ॥ सेवंते यं सदा तीर्थ—राजं तस्मै नमोनमः ॥ ९० ॥ ज्योतिशां वासवौ चंद्र—सूर्यावन्येऽपि खेचराः ॥ सेवंते यं सदा तीर्थ—राजं तस्मै नमोनमः ॥ ९१ ॥ मनुष्यलोकसंस्थाना । वासुदेवाश्च चक्रिणः ॥ सेवंते यं सदा तीर्थ—राजं तस्मै नमोनमः ॥ ९२ ॥ इंद्रोपेंद्रादयोऽप्येते । सर्वे विद्याधराधिपाः ॥ सेवंते यं सदा तीर्थ—राजं तस्मै नमोनमः ॥ ९२ ॥ ग्रैवेयकानुत्तरस्था । मनसा त्रिदिवौकसः ॥ सेवंते यं सदा तीर्थ—राजं तस्मै नमोनमः ॥ ९३ ॥ एवं त्रैलोक्यसंस्थाना—स्त्रिधोरगनरामराः ॥ सेवंते यं सदा तीर्थ—राजं तस्मै नमोनमः ॥ ९४ ॥ अनंतमक्षयं नित्य—मनंतफलदायकं ॥ अनादिकालजं य-



For Private And Personal Use Only

त्र । तीर्थं तस्मै नमोनमः ॥ ९५ ॥ सिद्धास्तीर्थकृतोऽनंता । यत्र सेत्स्यंति चापरे ॥ मुक्तेर्ली-
लागृहं यच्च । तीर्थं तस्मै नमोनमः ॥ ९६ ॥

इमां स्तुतिं पुंमरीक—गिरेर्यः पठति सदा ॥ स्थानस्थोऽपि स यात्राया। लाप्स्यते फ-
लमुत्तमं ॥ ९७ ॥ चक्रपाणिरिति स्तुत्वा । श्रीशत्रुंजयपर्वतं ॥ ननाम च गुरुं भक्त्या । श्री-
नाभं गणसंयुतं ॥ ९८ ॥ नमतश्चक्रिणः पृष्टे । रेजे गणभृतः करः ॥ पंचास्य इव कर्मेभं ।
भेत्तुं मेरुनगोपरि ॥ ९९ ॥ संतुष्टमानसस्तत्र । धर्मध्यानपरायणः ॥ गुरुवाक्यसुधासिक्त—
स्तद्दिनं सोऽत्यवाहयत् ॥ ३०० ॥ प्रातः संघयुतश्चैत्ये । नत्वा तीर्थंकरं गुरुं ॥ चकार पारणं
पुण्य—कारणं भरतेश्वरः ॥ १ ॥ अकारयच्चक्रीकिना । पुरं तत्र नरेश्वरः ॥ निकषा पुंमरीका-
द्रिं । विनीतापुरसन्निभं ॥ २ ॥ शालोत्सेध महासौध—गवाक्षा यत्र कोटिशः ॥ दृष्टुं गिरिं ।
निर्निमेषा । इव नेत्रसमुच्चयाः ॥ ३ ॥ सौधाट्टकुट्टिमानेक—मणिभिर्यत्र मानवाः ॥ दर्शेऽपि
सहस्रचंद्र—भ्रांतिं बिभ्रति संक्रमात् ॥ ४ ॥ सौवर्णसौधशिखरा—ण्यालोक्यालोक्य यत्र च ॥
सुमेरुं तद्देवकर—कूटवन्मन्यते जनः ॥ ५ ॥ समस्तं जगतीवस्तु । यत्र देशागतैर्जनैः ॥ दृ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दृश्यते पण्यवीथीषु । सागरेषु यथा पयः ॥ ६ ॥ विशालशालमालोच्चै । रत्नंकपिशिखाभवत् ॥
क्षणं विघ्नकरी यत्र । यायिनां रविवाजिनां ॥ ७ ॥ उद्भवच्छत्रभाजाल—हारास्यैर्हासनिर्मलैः
॥ सा शोभाभिर्हसंतीव । पुरी स्वःसद्मनां पुरीं ॥ ८ ॥ तदंतः श्रीयुगादीश—प्रासादो विम-
लद्युतिः ॥ अक्षयो भरतस्येव । यशःकंदः किमुद्गमी ॥ ९ ॥ सशाखः शिखरैः केतु—पत्रलः
ससुधासुमः ॥ फलितः कलशैरासी—न्निर्वाणसुखभूरुहः ॥ १० ॥ [illegible] ॥ वापीकूपतडागा-
नि । दीर्घिकापल्वलानि च ॥ जलस्थानानि भांतिस्म । यत्रोद्यानानि चोच्चकैः ॥ ११ ॥ आ-
नंदोदयतः कृत्वा । पुरमानंदमित्यसौ ॥ सौराष्ट्रदेशसीमासु । शक्तिसिंहाय चार्पयत् ॥ १२ ॥
तीर्थयात्रोत्सुकश्चक्री । श्रीनाभं गणभृद्वरं ॥ आजगाम गणैः सार्द्धं । ततः सोऽप्यचलत्पुरः ॥
॥ १३ ॥ चचाल पुण्यसेनेव । श्रीसंघो भरतानुगः ॥ पश्यन्नूर्ध्वमुखः शैल—मुन्मीलन्नयनो
मुदा ॥ १४ ॥ कौसुंभवसना रागं । दर्शयंत इवांगिनां ॥ धवलान्युज्झिरंतिस्म । तत्रोच्चैर्युवति-
जनाः ॥ १५ ॥ भंभानिःस्वानकंसाल—तालवीणामृदंगजैः ॥ ध्वनिस्त्रिभुवनेष्वासी—देक एव
नभोगुणः ॥ १६ ॥ आरुहन् पर्वतं रेजे । संघलोकः स उन्मुखः ॥ पश्यन्निव मुक्तिवेश्म—

॥२०३॥

For Private And Personal Use Only

चारुतां प्रकटां ततः ॥ १७ ॥ उदक्पथा महीनेता । तमारोहत्परे पुनः ॥ स्वशक्त्या सर्वमा-
र्गेणा–धिरोहतिस्म कौतुकात् ॥ १८ ॥ सुधर्मगणभृच्छिष्य–श्चिल्लणो नाम सत्तपाः ॥ आरो-
हत्पश्चिमपथा । विमलाद्रिं जनैर्वृतः ॥ १९ ॥ हर्षालुभिः श्राद्धवर्गै–रारूढैर्दशयोजनीं ॥ मु-
निरूचेऽस्मानुदन्या । बाधते प्राणहारिणी ॥ २० ॥

अत्रास्माकं विना वारि । प्राणा यास्यंति ही वृथा ॥ भगवच्चरणांभोज–मदृष्ट्वैव दुरा-
सदं ॥ २१ ॥ ततश्च तेन मुनिना । ग्लानत्वाद्वारिहारिणा ॥ तत्तेषां दर्शयामास । तैरप्यूचे
पुनः सहि ॥ २२ ॥ एतावतांबुनास्माकं । नोदन्या हीयते मुने ॥ तथा कुरु तपोलब्ध्या ।
यथैते सुखिनः सदा ॥ २३ ॥ सांनिध्यं संघलोकाना–मिच्छता तेन वारिणा ॥ तेन तत्र तपोल-
ब्ध्या । निर्ममे प्रवरं सरः ॥ २४ ॥ स्वल्पपवननिर्धूत–लहरीहारिवारिणि ॥ तस्मिन् सरसि
लोकानां विश्राममगमन्मनः ॥२५॥ स्वादं स्वादं पयस्तत्र । संघलोकः क्षणे क्षणे॥ सुधास्वा-
देऽपि नानंदं । प्रापितद्रसवर्जिते ॥ २६ ॥ यत्तदा चिल्लणेनैत–त्संघलोकोपरोधतः ॥ चक्रेऽद-
स्तपस्ताख्यातं । चिल्लणाख्यं ततः सरः ॥ २७ ॥ तीर्थेऽस्मिन् प्रौढतपसा । मुनिना संघवा- ॥ २८४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





क्यतः ॥ सर्वोपकारि यच्चक्रे । तस्मादेतद्धि पावनं ॥ २८ ॥ दर्शनात्स्नानतः पाना–ज्जिनस्नात्राभिषेकतः ॥ एतस्य वारिणा शुद्धि–र्जायेत कल्मषापहा ॥ २९ ॥ स्नात्वैतस्यैव पयसा । प्रक्षाल्य च जिनक्रमान् ॥ एकावतारी संभूय । नरो भवति मुक्तिभाक् ॥ ३० ॥ तदंबुपानात्सुस्थितो । विश्रमस्तज्जवायुना ॥ सुखेन प्रथमं शृंग–मारुरोह जनव्रजः ॥ ३१ ॥ इतो व्रजंश्चक्रपाणिः । पश्यतिस्म वनं पुरः ॥ पथिकप्रौढदवथु–प्रतिपंथि महीरुहैः ॥ ३२ ॥ आयोजनं यदायामे । दीर्घिकाकुंभमंभितं ॥ लक्ष्मीलीलाविलासाख्यं । विपिनं नंदनोपमं ॥ ३३ ॥ उत्तराशामुखश्रीदं । कस्तूरीतिलकोपमं ॥ दृष्ट्वोद्यानं तदुद्दामं ॥ शक्तिसिंहो जगौ नृपं ॥ ३४ ॥ तमोऽलिनीला वृक्षालिः । स्वामिन्नालोक्यते पुरः ॥ इंद्रनीलमणिकांची । पर्वतोपत्तिकास्विव ॥ ३५ ॥

ज्ञात्वेव गुणयोग्यानि । निर्मलानि द्रुमावलिः ॥ अमूनि कुसुमान्येषा । दधातीति स्वमूर्द्धनि ॥ ३६ ॥ वार्षुकाब्द इव श्यामं । बलाकाभिरिवाश्रितः ॥ कुसुमश्रेणिभिरिदं । तापहारि न कस्य हि ॥ ३७ ॥ कुसुमस्तवकैः शुभ्रैः । शतचंद्रं नभः सृजत् ॥ पश्येदमलिसं-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दोह—कृतांकमिव काननं ॥ ३८ ॥ मुक्ताजालैः केशपाश—मिव पृथ्वीधरश्रियः ॥ आनील-
मुद्यानमिदं । भाति पुष्पोत्करैर्वरैः ॥ ३९ ॥ कल्पवृक्षा इतः कल्प—दानैः पांथव्रजेष्वमी ॥
कुर्वंति सार्थकं नाम. । छायावृक्षा इतोऽपि च ॥ ४० ॥ इतो मार्त्तण्डकिरणै—स्तप्तान् पांथ-
व्रजानिमाः ॥ कदल्यो वीजयंतिस्म । दलैर्निर्झरवारिलैः ॥ ४१ ॥ आमूलशाखापर्यंतं । फलि-
ताः पनसा अमी ॥ कथयंतीव लोकेषु । तीर्थसेवाभवं फलं ॥ ४२ ॥ अभितो नागवल्लीभि—
र्वेष्टिताः क्रमुकीद्रुमाः ॥ किंनराणां शिक्षयंति । लतावेष्टितकं किमु ॥ ४३ ॥ अन्येऽप्यशोक-
माकंद—जातिचंपकपाटलाः ॥ लवंगवंगनारंग—मुखा भांति द्रुमा अमी ॥ ४४ ॥ सुरकिन्नर-
गंधर्व—विद्याधरकुलस्त्रियः ॥ गायंत्यः श्रीयुगादीश—गुणान् पापं हरंत्यमूः ॥ ४५ ॥ ततस्त-
मालहिंताल—तालमालासमाकुले ॥ वनेऽत्र संघलोकस्य । क्षणं विश्राम्यते मनः ॥ ४६ ॥
अत्र कल्लोलिनीलोल—कल्लोलकुलसंकुले ॥ सैकते सादरं संघ—स्त्वध्वघर्मं हरत्वसौ ॥ ४७ ॥
मधुपानोल्लसद्भृंगी—संगीतसुभगे नगे ॥ अत्र रंगं कुरंगाक्ष्यो । रचयंतु क्षणं विभो ॥ ४८ ॥
नभोमणिर्नभोमध्य—मध्यास्ते भूपतेऽधुना ॥ तापार्त्तिहारको वायु—स्तन्नवभिश्च सेव्यतां ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ४९ ॥ विश्राम्यतां महीनेत-श्वेतः संस्थाप्य सुस्थिरं ॥ परिश्रमोऽपि पांथानां। व्यथां वि-
श्राणयत्यसौ ॥ ५० ॥ इत्यमुष्य वचश्चारु । चक्री संचिंत्य चेतसा ॥ अदापयन्मुदा तत्र ।
वासान् वर्द्धकिना विभुः ॥ ५१ ॥ आजहुः केऽपि सुमनः-श्रेणीर्मेणीदृशा सह ॥ जगृहुः के-
ऽपि माकंद-फलानि कपिधर्मिणः ॥ ५२ ॥ सस्नुः सारंगनयना-नयनांचलचंचले ॥ केऽपि
कल्लोलिनीवारि-णि वारितपथश्रमे ॥ ५३ ॥ स्रस्तरं सूत्रयामासुः-सुमनोभिः परे नराः ॥
केचिद्वनस्य चारुत्वं । वर्णयामासुराशु च ॥ ५४ ॥ काश्चिच्चंपकगौरांग्यः । सरंगा हि मृगे-
क्षणाः ॥ क्षणं हल्लीसकसुखं । मंडलीभूय चक्रिरे ॥ ५५ ॥ आंदोलनकलाभ्यासं । धवेऽभ्या-
समुपेयुषि ॥ दर्शयामास घस्रेऽपि । मुखेन च शशिभ्रमं ॥ ५६ ॥

एवं खेलत्सु हर्षेण । जनेषु निखिलेष्वपि ॥ भरतोऽपि समं शक्ति-सिंहेन विपिनं य-
यौ ॥ ५७ ॥ चारुतां विपिनस्यैष । पश्यन् प्रतिपदं मुहुः ॥ नामग्राहं दर्श्यमानां । शक्तिसिं-
हेन तद्विदा ॥ ५८ ॥ मुक्ताचूर्णसवर्णार्णः-संपूर्णं कुंडमग्रतः ॥ व्यालोकयल्लोचनैक-सुभगं भ-
रताधिपः ॥ ५९ ॥ शतपत्रादिसौवर्ण-कमलैः कमलालयैः ॥ कलितं कलहंसादि-पक्षिध्व-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निमनोहरं ॥ ६० ॥ [redacted] ॥ मंडगजी स पर्यन्य–विपर्ययपरां सृजन् ॥ उवाच च-
क्रवर्त्तीशः । शक्तिसिंहं हसन्मुदा ॥ ६१ ॥ अभिज्ञोऽसि वसन्नत्र । तत्पवित्रय मत्श्रुती ॥
एतत्प्रनावाविर्न्नावि–वार्त्तापीयूषसेकतः ॥ ६२ ॥ चक्रिणोक्तमिति श्रुत्वा । शक्तिसिंहो गिरं
जगौ ॥ तातपादा इहाजग्मु–श्चक्रिन्नागां च वंदितुं ॥ ६३ ॥ पृष्टतो मे जिनाधीश–मिंडोऽत्रो-
चक्रिरेः प्रथां ॥ तत्तत्तापरिपुध्वंसि–शर्म्मों पावित्र्यकारिणीं ॥ ६४ ॥ यथादिष्टं च कुंमस्य ।
माहात्म्यं तत्तथा श्रुणु ॥ सर्वतीर्थावताराख्यं । नाम्ना कुंममिदं महत् ॥ ६५ ॥ केवलज्ञानि-
नस्तीर्थ–कृतश्चैत्ये पुरा गिरौ ॥ नुत्सर्पिण्यामिह प्राप्तः । सौधर्मत्रिदिवाधिपः ॥ ६६ ॥ तेन
तीर्थकृतः स्नात्र–कृते कुंमेऽत्र निर्मिताः ॥ गंगासिंधुपद्महद–मुखास्तीर्थजलाशयाः ॥ ६७ ॥
अत्र स्नात्रविधानेन । सर्वतीर्थफलं न्नवेत् ॥ स्नापितः पयसास्यैव । जिनो मुक्तिं च यह्नति ॥
॥ ६८ ॥ अस्योदकैर्जिनस्यांहि–प्रक्षालनपवित्रितैः ॥ विषार्त्तिर्याति विलयं । त्रिविधाप्यतिदा-
रुणा ॥ ६९ ॥ कुष्टादिः सकलो व्याधि–राधिस्तु व्रजति क्षयं ॥ यज्जलस्नानतः कांतिः । की-
र्त्तिर्बुद्धिर्धृतिर्न्नवेत् ॥ ७० ॥ बहुकालादिदं जीर्ण—मनूकस्यत्रिलाचयं ॥ पुनर्विशेषाद्रवृन्वे । प्र-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नावोऽस्य तथाधुना ॥ ७१ ॥

इति प्रनावं विज्ञाय । तस्य कुंमस्य चक्रिराट् ॥ शक्तिसिंहात् परां प्रीति-माससाद सुवासनः ॥ ७२ ॥ चक्री पुनर्वर्द्धकिना । तच्च सज्जमचीकरत् ॥ तज्जैरथ पुण्यजरै-र्जर्जरं न-वपंजरं ॥ ७३ ॥ वैडुर्यवज्रमाणिक्य-पद्मरागादिकांतिजिः ॥ विचित्रवारिलहरी-मंमितं तद-नाद् नृशं ॥ ७४ ॥ तदादि नारतं कुंम-मिति तत्ख्यातिमागमत् ॥ महाह्रदनदीकुंम-श्रव-च्छ्रोतःप्रनाववत् ॥ ७५ ॥ अतिक्रम्य स तां चक्री । श्रियामामेकयामवत् ॥ नंनामवादय-त्प्रातः । प्रस्थायिजनदूतिकां ॥ ७६ ॥ स तत्र कुंमे सुस्नातः । समं पत्न्या सुनश्या ॥ बि-न्राणो वाससी रम्ये । प्रापच्छिखरमादिमं ॥ ७७ ॥ ततः सौधर्मपतिर-प्यायया तद्दिदृक्षया ॥ प्रणुन्नो नक्तिरंगेण । स्नेहेन च विमानगः ॥ ७८ ॥ आलिलिंगतुरानंदा-न्मिथो नरतवासवौ ॥ आत्मनोरिव देहैक्यं । कुर्वंताविव सर्वतः ॥ ७९ ॥ श्रीनान्नेनाथ गुरुणा । समं वासवच-क्रिणौ ॥ मुख्यं शृंगं पुष्पदंता-विव पस्पृशतुर्मुदा ॥ ८० ॥ चक्री प्रदक्षिणीचक्रे । शक्रेण सह संमदात् ॥ राजादनीं क्षरंतीं द्राक् । क्षीरं पुष्करवार्दवत् ॥ ८१ ॥ मणिमंमलसंस्थानां ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदधः पादुकां विभोः ॥ ननाम चक्री शक्रेण । कारितां दर्शितामपि ॥ ८२ ॥ विलिलेप म-
हाभक्त्या । पादुकां यक्षकर्दमैः ॥ अर्चयच्च पारिजात–पाटलाप्रमुखैः सुमैः ॥ ८३ ॥ विभुं
मनसि संचिंत्य । साक्षाद् ज्ञानसमुज्ज्वलं ॥ स ननाम भगवतः । पादयोः प्रतिरूपकं ॥
॥ ८४ ॥ ततो जगाद सानंदः । सुत्रामा चक्रवर्त्तिनं ॥ सुधामधरयन् वाणी–मधुना विधुना
समं ॥ ८५ ॥ प्रायः कालवशान्मूर्त्या । हीयमानगुणस्पृशः ॥ विना मूर्त्तिं गिराविव । श्रद्द-
धास्यंति न क्वचित् ॥ ८६ ॥ तीर्थं पर्वत एवायं । पवित्रस्तीर्थकृत्क्रमैः ॥ विशेषाद्वासनावृ-
द्ध्यै । प्रसादोऽस्तु जिनेशितुः ॥ ८७ ॥ यदा यदा तीर्थकृतां । येषां येषां भवेत् स्थितिः ॥
तदा तदा भवंत्यत्र । तेषां तेषां च मूर्त्तयः ॥ ८८ ॥ अधुना वृषभः स्वामी । जयत्यादिमती-
र्थकृत् ॥ विधेह्यतोऽत्र तन्मूर्त्ति–चैत्यं स्वपुरचैत्यवत् ॥ ८९ ॥ यथा वा बाहुबलिना–कारि
तक्षशिलापुरि ॥ प्रासादो मंडपैश्चतु–रशीत्या मंडितस्तथा ॥ ९० ॥ इतींद्रवचनाच्चक्री । वि-
शेषोद्यत्सुवासनः ॥ आदिशत्सोमयशसो–द्दिष्टचैत्याय वर्द्धकिं ॥ ९१ ॥ त्रैलोक्यविभ्रमं नाम ।
प्रासादं भरताज्ञया ॥ असूत्रयन्मणिरत्नै–र्वर्द्धकिर्दिव्यशक्तिमान् ॥ ९२ ॥ सिंहनादमुखास्त-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्र । मंमपाः पूर्वदिङ्मुखाः ॥ ज्रांतिस्म भुवनाज्नोग–छत्राज्ञाः सैकविंशतिः ॥ ए३ ॥ दक्षि-
णस्यां ज्रद्रशाल–प्रमुखाश्चैकविंशतिः ॥ प्रतीच्यामपि तावंतो । मेघनादमुखा बभुः ॥ ए४ ॥
कौबेर्यां च श्रीविशाल–मुखास्तावंत एव हि ॥ मंमपा रत्नमाणिक्य–मयूखोल्लेखितांवराः ॥
॥ एए ॥ उच्चः क्रोशावधिर्दैर्घ्ये । सार्द्धगव्यूतिसम्मतः ॥ विस्तारे धनुषामेक–सहस्रं स व्यरा-
जत ॥ ए७ ॥ चतुर्दिक्षु विज्रांतिस्म । मणितोरणमालिकाः ॥ दासा इव चक्रियशः–पूर्णानां
ककुज्ञामन्नि ॥ ए८ ॥ गवाक्षा लक्षशस्तत्र । रत्नमय्योऽपि वेदिकाः ॥ वलानकाट्टालकाश्च ।
वज्रूवुरपरे ज्रृशं ॥ एए ॥ चतुर्मुखा रत्नमय्यो । मूर्त्तयो जगदीशितुः ॥ तत्रासन् शतमार्त्तंम
–प्रज्ञापुंजसमप्रज्ञाः ॥ ४०० ॥

तत्पार्श्वयोः पुंमरीक–मूर्त्ती प्रत्येकमद्भुते ॥ शुशुज्ञाते गुरुशुक्रा–विवाधिकतरद्युती ॥ १ ॥
कायोत्सर्गस्थितस्यापि । विज्ञोर्मूर्त्तिमकारयत् ॥ परितो नमिविनमी–कृष्टासी चापि ज्रूपतिः
॥ २ ॥ प्राकारत्रयमध्यस्थं । केवलज्ञानिनं जिनं ॥ चतुर्मुखं धर्मतत्वं । ज्राषमाणमकारयत्
॥ ३ ॥ स्वमूर्त्तिं तत्पुरश्चक्री । विहितांजलिसंपुटां ॥ न्यस्तदृष्टिं युगादीशे । शिल्पिना सोऽ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्यचीकरत् ॥ ४ ॥ श्रीनाभेर्मरुदेवायाः । पूर्वजानामपीह सः ॥ सप्रासादा रत्नमूर्त्ती–रकार-
यदश्मो मुदा ॥ ५ ॥ तच्चैत्ये रत्नजे मूर्त्ती–रेजतुर्मणिनिर्मिते ॥ सुनंदासुमंगलयोः । सूर्यांतरि-
तदीपिके ॥ ६ ॥ सर्वज्ञानमया मूर्त्ति–र्ब्राह्म्यास्तत्राभवच्छुभा ॥ सुंदर्याश्च निधानस्था । स-
र्वसंपत्प्रदायिनी ॥ ७ ॥ भाविनामर्हतां बिंबाः । स्वस्ववर्णांकमानतः ॥ अभूवन् नवगेहस्थाः
। समं शासनदैवतैः ॥ ८ ॥ अन्येषां निजबंधूनां । मूर्त्तयो मणिरत्नजाः ॥ कारिता भरतेशे-
न । सप्रासादा बभुर्भृशं ॥ ९ ॥ इत्थं निर्माय तीर्थेऽत्र । विचित्राश्चैत्यमालिकाः ॥ आदिशा-
त् शिल्पिनश्चित्र–करान् रक्षकपूजकान् ॥ १० ॥ भृंगारस्थालकलश–छत्रचामरदीपकान् ॥
विभूषणारात्रिकाणि । जिनार्चायै मुमोच सः ॥ ११ ॥ तत्र तीर्थे गजरथो । गोमुखो नाम
गुह्यकः ॥ वरदानाक्षमालाभ्यां–दोर्भ्यां दक्षिणपार्श्वतः ॥ १२ ॥ मातुलिंगपाशभृद्भ्यां । वाम-
दोर्भ्यां च शोभितः ॥ तप्तकांचनसद्वर्ण–स्तत्राभूद्रक्षकः स्वयं ॥ १३ ॥ [redacted] ॥ नामतोऽप्र-
तिचक्रेति । हेमाभा गरुडासना ॥ वरदाभाक्षभृच्चक्रि–पाशिभिर्दक्षिणैर्भुजैः ॥ १४ ॥ वामह-
स्तैर्धनुर्वज्र–चक्रांकुशधरैर्युता ॥ तत्र तीर्थेऽभवद्दक्षा–दक्षा शासनदेवता ॥ १५ ॥ [redacted] ॥ अ-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



थ स्वह्नि बाहुबलिः । श्रीनाम्नो विनमिर्नेमिः ॥ अन्येऽपि सूरयस्तद्--द्मिलन् वासवादयः ॥
॥ १५ ॥ गुरुद्दिष्टोपहारौघं । समंतात् शक्रशासनात् ॥ आन्नियोगिसुराः शीघ्र--माहरन् न-
क्तिहारिणः ॥ १६ ॥ द्वादशांगोक्तविधिना । चैत्यानि प्रतिमाश्च ताः ॥ प्रत्यष्ठिपन् शांतिकर्म--
पुरस्सरमृषिव्रजाः ॥ १७ ॥ वासाक्षतान् सूरिमंत्रे--णान्निमंत्र्य पवित्रितान् ॥ चिक्षिपुर्ध्वज-
दंरुषु । समं संघेन मूर्त्तिषु ॥ १८ ॥ सर्ववादित्रवृंदोत्थ--ध्वनिमङ्गलध्वनिः ॥ पावित्र्यं सर्व-
कर्णेषु । तदासूत्रयदुल्लसन् ॥ १९ ॥ प्रतिष्ठाया महश्चैवं । तत्रासीच्चक्रिनिर्मितः ॥ अधिष्ठातृ-
सुरैश्चापि । प्रत्यक्षीन्नूय संस्थितं ॥ २० ॥ जन्मस्नात्रमिव स्नात्रं । तत्र चक्री ततोऽकरोत् ॥
सुवर्णरत्नकलशैः । सन्मंत्रोच्चारपूर्वकं ॥ २१ ॥ कर्पूरागुरुकक्कोल--कस्तूरीचंदनादिन्निः ॥ वि-
लिलेप जिनस्यार्चां । कीर्त्या विश्वं च चक्रन्नृत् ॥ २२ ॥ गुरून् ज्ञानगुरून् चक्री । दक्षि-
णांगे न्यवेशयत् ॥ वामांगे व्रतिनीः सर्वाः । सममंतः पुरीजनैः ॥ २३ ॥ अथो चंपकमंदार--
संतानहरिचंदनैः ॥ पारिजातकल्पद्रुम--मल्लीबकुलवारिजैः ॥ २४ ॥ केतकीमालतीदाम---
यूथिकाकरवीरकैः ॥ शतपत्रजपाजाति--कल्हारप्रमुखैः सुमैः ॥ २५ ॥ विचित्रसौरन्नोल्लास--

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृष्टालिस्पष्टलास्यकैः ॥ शक्रचक्रिमुखाः सर्वे । चक्रुः पूजां जगत्पतेः ॥ २६ ॥ [redacted] ॥

ततोऽक्षतैः फलैर्धूपै–र्दीपैर्नैवेद्यवारिभिः ॥ विचित्रैर्विदधुः सर्वे । जिनाग्रे प्रकरं वरं ॥ ॥ २७ ॥ आरात्रिकं दधत्पाणौ । कांतिविच्छुरिताननः ॥ शुशुभे स शुभारंभो । दिनारंभ इवांशुमान् ॥ २८ ॥ चांदनीं तिलकश्रेणिं । चक्रुः शक्रमुखा नृपाः ॥ चक्रयंगे साभवत्तस्य । भवतापप्रभेदिनी ॥ २९ ॥ प्रतीच्छन् सुमनोवृष्टिं । प्रदक्षिणपथा नृपः ॥ रराज भ्रामयन्नी-रा–जनां सर्वतमोऽपहां ॥ ३० ॥ एक एव जगद्दीपो–विभुरित्युच्चरन्निव ॥ मांगल्यदीपकश्चे-क–शिखोऽभात् तत्करस्थितः ॥ ३१ ॥ यद्यद्ददौ तदा चक्री । प्रमोदपरिपेशलः ॥ भाविनीं तत्फलावाप्तिं । ज्ञानिनो यदि जानते ॥ ३२ ॥ ननाम वामिनीकुर्वन् । कर्माणि वपुषा सह ॥ भक्ति भारादपारात्स । भरतो जिनमादिमं ॥ ३३ ॥ प्रदीपो मंगलानां स । मंगलैकनिके-तनं ॥ नास्पर्शि पाणिभिः कैः कै–र्भवजाड्यविघातकः ॥ ३४ ॥ रोमांचकंचुकं बिभ्र–च्छूवह-र्षाश्रुविप्लुतः ॥ पाणी स शेखरीकुर्वन् । स्तुति पूजां विभोर्व्यधात् ॥ ३५ ॥ त्वादं बुद्धि-



For Private And Personal Use Only

नैर्हीनः । क्व च त्वं गुणसागरः ॥ तथापि त्वां स्तवीम्येष । त्वद्भक्तिमुखरीकृतः ॥ ३६ ॥ त्वया हतास्तपोऽस्त्रेण । सर्वथान्येन दुर्जयाः ॥ रागाद्या रिपवः स्वामि–न्नात्मनः स्वार्थघातकाः ॥ ३७ ॥ रागाद्यै रिपुभिर्देवा–भासा अन्ये विडंबिताः ॥ पश्यंति ते बहिःशत्रून् । विद्यांतर्निकर्त्तिनः ॥ ३८ ॥ अनंतज्ञानमाहात्म्य–वारिधे चतुरप्रभो ॥ जगत्प्रदीप भगवन् । नाभेय भवते नमः ॥ ३९ ॥ अष्टांगानि तथा नाथ । भवान् योगस्य निर्ममे ॥ यथा तानि प्रवर्त्तंते । कर्माष्टकनिपिष्टये ॥ ४० ॥ शत्रुंजयशिरोरत्नं । श्रीनाभिकुलभास्करं ॥ स्वर्गापवर्गव्यापार–निदानं त्वां विभो स्तुमः ॥ ४१ ॥ रत्नेन कांचनमिव । तेजसैव नभोमणिः ॥ अलंकृतं त्वया नाथ । तीर्थं शत्रुंजयं ह्यदः ॥ ४२ ॥ नाभ्यर्थये स्वर्गसुखं । न मोक्षं न नरश्रियं ॥ सदा त्वत्पादपद्मानि । वसंतु मम मानसे ॥ ४३ ॥

इत्यभिष्टुत्य भरतो । भक्त्या श्रीनाभिनंदनं ॥ मुकुटस्पृष्टभूपीठः । पंचांगप्रणतिं व्यधात् ॥ ४४ ॥ ततः श्रीमरुदेवाया । मातुः श्रीप्रथमप्रभोः ॥ प्रथमस्याथ सिद्धस्या–र्चयित्वा स्तुतिमातनोत् ॥ ४५ ॥ आदौ यया जनकृपापरयावतीर्य । विश्वं समीक्ष्य रिपुभिः परिभू-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





यमानं ॥ दध्र जगद्विभुरभीतिकरः स्वकुक्षौ । तामेव नौमि बहुशो मरुदेवीनाम्नीं ॥ ४६ ॥ या क्षीणसौख्यमयमोक्षकृताधिवासा । चिद्रूपतावगतसर्वजगत्स्वभावा ॥ विश्वातिशायिजिनमौक्तिकशुक्तिकाभा । तां योगिनीं भगवतीं त्रिविधं नमामि ॥ ४७ ॥ यस्याः परा परमयोगपरा न नारी । स्वारीन् जघान किल या करिकुंभसंस्था ॥ अग्रेसरीव निजसूनुमुखावलोक–हेतोर्गता शिवपदं बहुवत्सलत्वात् ॥ ४८ ॥ मातर्न चेद्भवसि भूमिविभूषणे त्वं । योगीश्वरी विदितवस्तुसमस्तभावा ॥ नाथः क्व तत् क्व च जगत् क्व च बोधिलाभो । ज्ञानं कुतः क्व च शिवं क्व च वैरिनाशः ॥ ५० ॥ देवि त्वदंहिनखदीधितिसंगतो मे । गाढं तमोध्यमखिलं विलयं प्रयातु ॥ आद्यस्य विश्वसुगुरोरपि कारणं त्वं । तत् त्वां स्तवीमि च नमामि च चिंतयामि ॥ ५१ ॥ जननी जगदीशस्य । योगिनी जगदीश्वरी ॥ मंगलं मरुदेवा मे । कुरुतात् सुरसेविता ॥ ५२ ॥ इत्यभिष्टुत्य तामेव । ययावथ महामनाः ॥ चैत्ये ब्राह्म्या अर्चयच्च । तां स्तोतुं चाभिचक्रमे ॥ ५३ ॥ या सर्वा सर्वविश्वस्थितिरिति विदिता योगिनी योगिभिर्या । ध्येया स्थेयस्वभावा भवभयहरिणी तारिणी या नतानां ॥ या दिव्या



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिव्यशक्तिः सुरनरमहिता मंत्ररूपस्वरूपा। सा ब्राह्मी विश्वमाता दिशतु मम सुखं श्रीयुगादीशपुत्री ॥ ५४ ॥ या मानवद्विपखगादिकुलोद्भवेषु । जीवेषु जीवकलया श्वसनच्छलेन॥ संलक्ष्यते जगति जाग्रदशेषभावा । ब्राह्मीं नमामि जगदीशसुतामहं तां ॥ ५५ ॥ यां योगिनः परसमाधिपरा हृदाब्जे–ऽध्यारोप्य कुंदविशदां सहसा स्मरंतः ॥ उन्मुच्य पापपटलं कलयंति तत्वं । तां भारतीं विशदशीलधरां नमामि ॥ ५६ ॥ सुरासुरनरैर्वंद्या । श्रीयुगादिजिनांगजा ॥ शब्दब्रह्मसवित्री स्तात् । ब्राह्मी विघ्नौघशांतये ॥ ५७ ॥ इत्युदीर्य प्रणम्याथ । सुंदर्याश्चैत्यमाप्य च ॥ तामभ्यर्च्य च चक्रीशः । स्तोतुमेवमुपाक्रमत् ॥ ५८ ॥ सुंदरि त्वसरंसि क्षितिभूषा । लक्ष्मिलक्षणवतामसि नित्या ॥ त्वत्कृते जगदिदं बहुधैवं । सत्तपांसि तनुते मनुते त्वां ॥ ५९ ॥ कर्करास्थितृणमुख्यपदार्था । रत्नशंखमिति चित्रकरूपा ॥ यद्भवंति ननु तत्र च लक्ष्मि । स्फुर्जतीति तव दृष्टिनिवेशः ॥ ६० ॥ आश्रितो भगवतीह भवत्या । नीचवंशजनितोऽपि नरः स्यात् ॥ स कुलीनबुधवृद्धजनानां । सेव्य एव तव लेशकृते शक् ॥ ॥ ६१ ॥ त्रिभुवनमपि देवि त्वत्प्रसादादिदं स्या–दखिलजननिषेव्यं कर्तृ सर्वेप्सितानां ॥ भ-





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वति मनसि धर्मस्यादरो यच्च लक्ष्मि । त्वदनुगतजनानां । वीक्षणं कारणं तत् ॥ ६२ ॥ बु-
द्धिस्त्वं च धृतिस्त्वं च । मतिस्त्वं च जगद्धिते ॥ आदिदेवकुलांनोधि–लक्ष्मि त्वां सुंदरीं स्तु-
मः ॥ ६३ ॥ सुंदर्या इति निर्माय । स्तुतिं नक्तिन्नरोन्नतः ॥ प्रणिपत्य च नूपालो । जिना-
र्चा अर्चयत्पराः ॥ ६४ ॥ सुवर्णरूप्यवासोन्नि–र्महाध्वजमथो ददौ ॥ प्रतिष्ठितं गणधरैः। प्रा-
सादेष्वखिलेष्वपि ॥ ६५ ॥ ततः कृतोत्तरासंगो । गुरोरन्यर्णमेत्य च ॥ चक्री प्रदक्षिणां द-
त्वा । तत्पादावप्यपूजयत् ॥ ६६ ॥

चंदनेनार्चयच्चक्र–वर्ती च चरणौ गुरोः ॥ चंदनं गुरुरादाये–त्युवाच च वचो मुदा ॥
॥ ६७ ॥ श्रीसूरिसूरिमंत्र–प्रतिष्ठितं दृष्टिदोषसंयमनं ॥ गुरुकरसरोजजातं । तिलकं ते मंग-
लं दद्यात् ॥ ६८ ॥ उदीर्येति चकारासौ । श्रीनान्नस्तिलकं मुदा ॥ नाले श्रीन्नरतेशस्य ।
मुक्तिवश्यौषधोपमं ॥ ६ए ॥ इच्छामि क्षमाश्रमण । वंदितुं चेत्युदीर्य सः ॥ तदनुज्ञामपि प्रा-
प्य । चक्री श्रीनान्नमानमत् ॥ ७० ॥ वश्यौषधं सर्वलक्ष्म्या । विपत्पन्नगगारुमं ॥ धर्मला-
नं ददौ तस्मै । गुरुः संसारतारकं ॥ ७१ ॥ पातुं तन्मुखशीतांशो–र्वाक्सुधां न्नरताधिपः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चकोर इव तस्याग्रे । निषसाद प्रसादभृत् ॥ ७३ ॥ तन्मुखेंदूदयात्कामं । श्रीगुरोः श्रुतसागरः ॥ श्रमान्निर्वातः स्वादेश–मिषाद् बहिरुपाययौ ॥ ७४ ॥ त एव धन्या मनुजाः । कृतकृत्यास्तएव हि ॥ भूषितास्तैरियं भूमिः । पूजयंतीह ये जिनं ॥ ७५ ॥ जवना वाजिनो मत्तमातंगाः सर्वसंपदः ॥ अनुरक्ताः सेवकाश्च । श्वेतं छत्रं सचामरं ॥ ७६ ॥ सिंहासनं महाशय्याः । साध्व्यः शुद्धांतयोषितः ॥ संगीतं गंधवस्तूनि । विभ्रमा वारयोषितां ॥ ७७ ॥ षट्त्रिंशद्राजपात्राणि । विनोदास्तद्विनिर्मिताः ॥ स्युर्यत्रैतानि रम्याणि । तद्राज्यं जिनपूजया ॥ ॥ ७८ ॥ दध्ना घृतेन पयसा । सितया चंदनेन च ॥ पंचामृतेन योऽर्हंतं । स्नापयेत्सोऽमृताशनः ॥ ७ए ॥ पाणिभिर्यैर्जिनाधीशः । पूज्यते सेव्यते सदा ॥ भवंति विभवोदारा–स्ते जगज्जनतोपरि ॥ ८० ॥ यद्येकवेलं क्रियते । दिवसे जिनपूजनं ॥ तदनेकभवाभ्यस्तं । पापं नाशयति क्षणात् ॥ ८१ ॥ जिनस्य दर्शनं प्रात–र्नैशं पापं व्यपोहति ॥ मध्याह्ने दिनजं रात्रावेकजन्मार्जितं पुनः ॥ ८२ ॥ चतुरो जिनपादांते । यो मुक्त्वा कुसुमांजलीन् ॥ तीर्थोदकैः स्नपयति । जिनं न स चतुर्गतिः ॥ ८३ ॥ जलपुष्पाक्षतैर्धूपैः । फलनैवेद्यदीपकैः ॥ स्तुति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भिश्च जिनं भक्तया । पत्राद्यैरपि पूजयेत् ॥ ७४ ॥ अष्टांगैरिति पूजायाः । साधितैः श्रीजि-
नाज्ञया ॥ संभवंति सदाभ्यासे । सिद्धयोऽष्टावपि स्फुटं ॥ ७५ ॥ भुक्त्वा सद्द्रव्यबीजानि । स-
प्तक्षेत्र्यां शुभाशयाः ॥ समये भावनांभोभि-र्यें सिंचंति कृतादराः ॥ ७६ ॥ द्विसप्तरज्जुप्र-
मितं । भित्वा लोकं समाधिभिः ॥ लोकाग्रमतुलज्ञान-सुखमासादयंति ते ॥ ७७ ॥ युग्मं ॥

तत्रादौ मणिरत्नाद्यै-र्हैमरूप्यदृशच्चयैः ॥ काष्टैर्वा जिननाथस्य । प्रासादं प्रवितन्यते ॥
॥ ७८ ॥ कारयंति जिनानां ये । तृणावासनपि स्फुटं ॥ अखंमितविमानानि । ते लभंते त्रि-
विष्टपे ॥ ७८ ॥ सुश्लिष्टरत्नहेमाद्यै-र्भवानिव हि ये पुनः ॥ तेषां पुण्यप्रधानानां । को वेद
फलमुत्तमं ॥ ७९ ॥ युग्मं ॥ काष्टादीनां जिनावासे । यावंतः प्ररमाणवः ॥ तावंति पल्य-
लक्षाणि । तत्कर्त्ता स्वर्गभाग्भवेत् ॥ ९० ॥ नूतनार्हद्गृहावास-विधाने यत्फलं भवेत् तस्मा-
दष्टगुणं पुण्यं । जीर्णोद्धारे विवेकिनां ॥ ९१ ॥ शत्रुंजयादितीर्थेषु । प्रासादान् प्रतिमाश्च ये ॥
कारयंति हि तत्पुण्यं । ज्ञानिनो यदि जानते॥ ९२ ॥ ततो जिनानां बिंबानि । मणिरत्नैश्च
हेमभिः ॥ रूप्यैः काष्टैर्दृषभिर्वा । मृदा वा भावशुद्धितः ॥ ९३ ॥ एकांगुष्टादिसप्त-शतांगु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्टावधिः प्रभोः ॥ ये कारयंति बिंबानि । मुक्तिश्रीस्तस्य वश्यगा ॥ ९४ ॥ युग्मं ॥ एकां-
गुलमिदं बिंबं । निर्मापयति योऽर्हतां ॥ एकातपत्रसाम्राज्यं । लभते स भवांतरे ॥ ९५ ॥
मेरोर्गुरुर्गिरिर्नान्यः । कल्पद्रोर्न परो द्रुमः ॥ न धर्मो जिनबिंबानां । निर्माणादपरोऽद्भुतः ॥
॥ ९६ ॥ विधाय जिनबिंबानि । दुर्गतिभ्यो बिभेति कः ॥ मृगेंद्रपृष्टसंस्थानां । गोमायुः प्र-
भवेत्कथं ॥ ९७ ॥ त्रैलोक्यसंपदस्तेषां । किंकर्यः स्युर्गृहांगणे ॥ निर्मापितानि बिंबानि । ये-
र्जिनानां गुरूक्तिभिः ॥ ९८ ॥ प्रतिष्ठामर्हतां यो हि । कारयेत्सूरिमंत्रतः ॥ सोऽर्हत्प्रतिष्ठां
लभते । यथावापस्तथा फलं ॥ ९९ ॥ यावद्वर्षसहस्राणि । पूजयंति जिनं जनाः ॥ तावत्
कालं बिंबकर्त्ता । लभते तत्फलांशकं ॥ ५०० ॥ प्रतिष्ठितानां बिंबानां । यत्पूर्वं दर्शने फलं ॥
लोकद्वयहितं जंतो–स्तत्फलं वेत्ति केवली ॥ १ ॥ कर्त्तुः स्वयं कारयितु–रनुमंतुश्च साहाय्य-
कर्त्तुरपि ॥ शुभाशुभं तुल्यफलं । निर्दिष्टं श्रीजिनैर्भविनां ॥ २ ॥ यत्र यत्र प्रतिष्ठा स्या––
द्देशेऽथ नगरेऽर्हतां ॥ तत्र तत्र न रोगाः स्यु–र्न दुर्भिक्षं न वैरता ॥ ३ ॥ या गर्गरीं जलभृ-
तां जिननायकस्य । स्नात्रार्थमत्र शिरसा समुपाहरंति ॥ ताश्चक्रवर्त्तिगृहिणीपदमाप्य मुक्ति–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मासादयंति शुभचित्तवशा वशा हि ॥ ४ ॥ शरीरमिव निर्जीवं । निर्विंध्य इव सत्सुतः ॥
निर्नेत्रमिव सद्वक्त्रं । निःपुत्रमिव सत्कुलं ॥ ५ ॥ विना जलं सर इव । व्योमेव गतभास्क-
रं ॥ अप्रतिष्ठं तथा बिंबं । नैवमर्हति चारुतां ॥ ६ ॥ [illegible] ॥ ज्ञानं विना हि संसारो । ज्ञा-
नेन शिवसंगमः ॥ सिद्धांताराधनाद् ज्ञानं । तद् द्विधा द्रव्यभावतः ॥ ७ ॥ भत्तरी वर्त्तिका
दिव्य—दोरकाः पत्ररक्षणे ॥ वेष्टनं दीपकद्योतो । धूपश्चंदनजाश्छटाः ॥ ८ ॥ संगीतमष्टमांग-
ल्यं । फलपुष्पाक्षतैरपि ॥ पूजनं पुस्तकानां यत् । तद्द्रव्याराधनं विदुः ॥ ९ ॥ [illegible] ॥ श्र-
वणं श्रद्दधानं च । पठनं पाठनं तथा ॥ तद्विदामपि भक्तिश्च । भावपूजनमिष्यते ॥ १० ॥

इत्थमागमपूजेयं । भवजाड्यविघातिनी ॥ केवलज्ञानजननी । कृता भवति भूपते ॥
॥ ११ ॥ ज्ञानाराधनतो मर्त्य—श्चक्रिशक्रमुखान् भवान् ॥ लब्ध्वा तीर्थे च सद्ज्ञानं । लो-
काग्रमधिगच्छति ॥ १२ ॥ चतुर्विधस्य संघस्य । पूजनं पर्युपासनं ॥ चतुःक्षेत्रमिदं प्राहु—र्लो-
कोत्तरसुखप्रदं ॥ १३ ॥ चिंतामणिः करे तस्य । कल्पवृक्षस्तदंगणे ॥ कामधेनुः पुरस्तस्य ।
संघोऽभ्येति यदालयं ॥ १४ ॥ निष्कलंकं कुलं तस्य । जननी तस्य भाग्यभृः ॥ करगा त-

॥ ३०२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्य लक्ष्मीः स्यात् । संघोऽन्येति यदंगणं ॥ १५ ॥ संघपादरजो यस्य । शिरः स्पृशति से-
वितं ॥ ॥ तीर्थसेवाफलं तस्य । पवित्रस्य भवत्यहो ॥ १६ ॥ अघौघघर्ममेघालि-दौरिद्र्यर-
जनीरविः ॥ कर्मवारणपंचास्यो । जीयात्संघः सनातनः ॥ १७ ॥ फलतांबूलवासोभि-र्भो-
जनैश्चंदनैः सुमैः॥ श्रीसंघः पूजितो येन । तेन प्राप्तं जने। फलं ॥ १८ ॥ सप्तक्षेत्रमिदं भूप ।
जैनराज्ये सदाफलं ॥ अत्रोप्तं धनबीजं हि । निर्विघ्नोदयभृद्भवेत् ॥ १९ ॥ श्रुत्वा श्रुत्वापि च-
क्रेश-स्तन्मुनेर्वचनामृतं ॥ अतृप्त इव मूर्धानं । दुधुवेतश्चमत्कृतः ॥ २० ॥ नमस्कृत्य गुरोः
पादा-वन्यानपि मुनीश्वरान् ॥ चक्री निजालयमगात् । संस्मरन् मुनिभारतीं ॥ २१ ॥ बु-
भुजे षड्रसवतीं । चक्री रसवतीं ततः ॥ मोदमानः क्षणं प्राप । निद्रां भद्रासने वरे ॥ २२ ॥
अथोत्थाय महीपालो । वासवावासमाययौ ॥ सोमयशःशक्तिसिंह-सुषेणाद्यैर्नपैर्वृतः ॥ २३ ॥
स शक्रोऽपि महीशक्र-माक्रमंतं निजालयं ॥ दृष्ट्वा प्रहृष्टचित्तः स-न्नुदतिष्ठन्निजासनात् ॥
॥ २४ ॥ भद्रावेकासनासीनौ । वासवक्षितिवासवौ ॥ तयोः सुबिंबावन्योऽन्यं । शुशुभाते म-
होदयौ ॥ २५ ॥ कथानुकथनोद्भूते । भृशमालापकौतुके ॥ सक्रंदनो भृशं प्रीत-स्तं जगाद

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जगद्विभुं ॥ २६ ॥ पूज्योऽस्माकं युगादीशः । किंकरास्तस्य यद्वयं ॥ त्वं तु तस्यांगजश्चक्री ।
चरमं देहमाश्रितः ॥ २७ ॥ तीर्थोद्धारकरः संघा—धिपतिश्च ततो मम ॥ लघुः समो वा पू-
ज्यो वा । सर्वथासि महीधव ॥ २८ ॥ [redacted] ॥ त्वयादृतां जिने पूजां । लोकोऽप्यनुकरिष्यति
॥ विशेषान्मत्कृतां तां तु । त्वमप्यनुकुरूच्चकैः ॥ २९ ॥ चक्रिण्यंगीकृतवति । तदिंद्रेऽथ समं
सुरैः ॥ विधिवज्जिनमानर्च्य । विविधैः कुसुमादिभिः ॥ ३० ॥ ततोऽर्हदाशिषा माढ्यं । वि-
विधैर्द्रव्यसंचयैः ॥ वृद्ध्यादाय सुराधीशः । स्वकंठे क्षिप्तवान् मुदा ॥ ३१ ॥ क्षीरोदे सहसा
गत्वा । संपूर्य कलशान् जलैः ॥ देववृंदैर्युतो याने । निविष्टो विविधोत्सवैः ॥ ३२ ॥ अभ्येत्य
तीर्थेशपादा—वस्नपयदसौ मुदा ॥ ददौ दानं च पात्रेभ्यो । जनचित्तहरो हरिः ॥ ३३ ॥ [redacted] ॥

तदादि लोके विख्यातः । सोऽयमिंद्रोत्सवो महान् ॥ यथा महांतो वर्त्तते । तथा तत्कु-
रुते जनः ॥ ३४ ॥ भरतेशेन विहिता । भक्त्या शक्रेण चादृता ॥ पूजा बभूव विविधा । त-
दादि विविधोदया ॥ ३५ ॥ शक्रादेशादप्सरसो । हाहाहूहूमुखा गणाः ॥ संगीतं सूत्रयामा-
सु—र्जिनाग्रे जनहर्षदं ॥ ३६ ॥ त्रैलोक्यवशकृद्गीतं । गीतं स्वर्गादिसौख्यकृत् ॥ गीतं सर्वज-



For Private And Personal Use Only

नानंदि । गीतं सर्वार्थसाधकं ॥ ३७ ॥ सुखे दुःखे समं गीतं । इक्षेक्षुरसतोऽधिकं ॥ तद्गी-
तं जिनपूजायै । संगीतं पापहार्यतः ॥ ३८ ॥ शुभान्नवस्त्रपानाद्यैः । स मुनीन् प्रत्यलाभयत्
॥ तीर्थे तस्मिन् सुवर्णस्य । स्पृशन्निव स सौरभं ॥ ३९ ॥ सुवर्णरूप्यरत्नैश्च । जलान्नवसना-
दिभिः ॥ दारिद्र्यं दलयामास । न पुनः क्रियमर्थिनां ॥ ४० ॥ ददौ सुराष्ट्रां तीर्थस्य । पूजा-
यै भरताधिपः ॥ तदादिदेवदेशोऽयं । विख्यातः क्षितिमंमले ॥ ४१ ॥ एकासने समासीनौ ।
चक्रीशक्रौ बलानके ॥ मिथः कथारसप्रीतौ । तत्र तस्थतुरेकदा ॥ ४२ ॥ महाह्रदावर्त्तनाभिं ।
विकसत्कमलाननां ॥ जघनेनेव पुलिने—नाभिरामां रसोज्ज्वलां ॥ ४३ ॥ अंतर्द्वीपकुचां र-
म्यां । हंसाभवसनान्वितां ॥ तालवेणीं च बिभ्राणां । पश्यंतीं न दुभे रविं ॥ ४४ ॥ शुभा-
वहां पुण्यसंगां । पूर्वाब्धिपतिसंगतां ॥ शत्रुंजयां शैवलिनीं । वलिनीं स्वतरंगकैः ॥ ४५ ॥
चकोरनयनां स्वच्छां । शुभभूभृत्समुद्भवां ॥ कुलस्त्रीमिव सोऽपश्यद् । भरतः पुरतःस्थितां ॥
॥ ४६ ॥ [redacted] ॥

चकोरचापचक्राह्व—हंससारसशोभितां ॥ कल्लोललोलकमलां । भृंगीसंगीतसंमतां ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ४७ ॥ नन्नयोः शृंगयोर्मध्ये । मर्यादामिव संगतां ॥ दृष्ट्वा तां न्नरतोऽपृछत् । शक्रं केयमि-
तो नदी ॥ ४८ ॥ इंद्रोऽप्युवाच चक्रेश । नदी शत्रुंजयेत्यसौ ॥ गंगाधिकफला लोके । शत्रुं-
जयनगाश्रयात् ॥ ४९ ॥ अस्या ह्रदानां माहात्म्यं । कीर्त्यंते चेत्पृथक् पृथक् ॥ तदा वर्ष-
शतं याति । सत्यं वाचस्पतेरपि ॥ ५० ॥ केवलज्ञानिनोऽतीत–तीर्थनाथस्य यत्पुरा ॥ इशा-
नपतिना स्नात्र–कृते गंगावतारिता ॥ ५१ ॥ आवैताढ्यगिरेरंत–र्वहत्येषा धरातले ॥ शत्रुंज-
यनगान्यासे । हृद्या शत्रुंजया ततः ॥ ५२ ॥ कांतिः कीर्त्तिः श्रियो बुद्धि–र्धृतिपुष्टिसमाधयः
॥ संन्नवंति जलस्पर्शा–दस्या वश्या हि सिद्धयः ॥ ५३ ॥ हंससारसचक्राद्याः । पक्षिणोऽपी-
ह ये पयः ॥ स्पृशंति कद्धमषमला । न स्पृशंति च तानपि ॥ ५४ ॥ अस्माकमूर्ध्वं गमनं ।
पतनं न्नवतामधः ॥ यदब्जिन्योऽजमुखैस्ता । हसंति स्वर्धुनीन्नवाः ॥ ५५ ॥ एतन्मृदो विलि-
प्ता झक् । घ्नंत्यंगजमहारुजः ॥ कादंबौषधिन्निर्ध्माताः । प्राप्नुवंति च हेमतां ॥ ५६ ॥ अ-
स्यास्तीरद्रुमफला–न्यास्वादंति नराश्च ये ॥ एतत्पयोऽपि नियमात् । षण्मासावधि तत्पराः
॥ ५७ ॥ ते वातपित्तकुष्टादि–रोगान् जित्वेव हेलया ॥ स्वं वपुस्तत्तदेमान्नं । प्राप्नुवंति सु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कांतिमत् ॥ ५८ ॥ युग्मं ॥ यज्जलस्नानतो यांति । पापान्यपि शरीरतः ॥ का कथा वात-पित्तादे-र्यत्साध्यस्यागदैरपि ॥ ५९ ॥ सर्वतीर्थफलावाप्ति-प्रतिभूरियमंगिनां ॥ सर्वपापहरा स्पर्शा-दपि शत्रुंजया नदी ॥ ६० ॥ श्रूयतां चरितं चक्रि-न्नस्या नद्या ह्रदोद्भवं ॥ यत्पयः-स्पर्शतः प्रापुः । सुखं शांतनुसूनवः ॥ ६१ ॥

तथाहि श्रीपुरमिति । पुरमस्तीह भारते ॥ तत्र वित्रस्तशत्रुस्तु । शांतनोऽजनि पार्थिवः ॥ ६२ ॥ सुशीलेति प्रिया तस्या-न्येद्युः स्वप्नेऽतिधूसरं ॥ धूमकेतुं समालोक्य । प्रियायाकथयदद्भुतं ॥ ६३ ॥ तस्याः स्वप्नानुरूपोऽभूत् । क्रमात् सूनुर्मखीसखः ॥ राज्यलक्ष्म्याश्च मुख्यांगं । गजसैन्यं क्षयं ययौ ॥ ६४ ॥ पुनः पुत्रो बभूवाथ । तस्या दुःस्वप्नसूचितः ॥ आगमोत्पत्तितो हीनं । हयांगं चागमत्क्षयं ॥ ६५ ॥ तृतीयेऽपि सुते जाते । संपदो विपदं गताः ॥ धर्मा इव जीववधे । लोभे सर्वगुणा इव ॥ ६६ ॥ चतुर्थतनयोत्पत्ति-वार्तया सह शत्रवः ॥ अवेष्टयन् सैन्यभरै-रपारैः श्रीपुरं मदात् ॥ ६७ ॥ प्रक्षीणकोशदंभः सन् । निशायां शांतनो नृपः ॥ जायां सुशीलां तनयान् । क्वचिदादाय निर्ययौ ॥ ६८ ॥ नीलमहानी-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लकाल–महाकालक इत्यमी ॥ नामभिस्तनयाः सप्त–व्यसनव्यग्रमानसाः ॥ ६९ ॥ द्यूतं मांसं सुरा वेश्या । चौर्यं पापर्द्धिसेवनं ॥ परस्त्रीषु रतिः सप्त । व्यसनान्याहुरुत्तमाः ॥ ७० ॥ द्यूतात् सर्वाणि जायंते । व्यसनानि पराण्यपि ॥ लोकद्वयाहितकरं । तस्माद् द्यूतं विवर्जयेत् ॥ ७१ ॥ द्यूतेनार्थयशोधर्म–बंधुवर्गकुलक्षयः ॥ भवेत्तैरश्वनरक–गतिर्दुःखौघदायिनी ॥ ७२ ॥ शीघ्रं नरकगामी यः । स मां भजतु मानवः ॥ इत्याह यत् स्वनाम्नैव । तन्मांसं दूरतस्त्य-जेत् ॥ ७३ ॥ गोमायुश्वपिशाचास्ते । ध्रुवा नरकगामिनः ॥ जिह्वास्वादरसान्मांसं । ये स-दाश्नंति दुर्धियः ॥ ७४ ॥ अनर्थमूलं यन्मद्यं । मतिकांतियशोहरं ॥ मातृभार्यानभिज्ञं च । कस्तद्दक्षो निषेवते ॥ ७५ ॥ परदारादरो हेयो । लोकद्वयविघातकः ॥ वेश्यायां पापवश्यायां । रतिः कार्या मनाग् न हि ॥ ७६ ॥ प्रत्यक्षवधबंधादि–कारका नरकप्रदा ॥ इहान्यलोके सा त्याज्या । चौर्यवृत्तिः सुमेधसा ॥ ७७ ॥ चौर्येण कर्णनासाक्षि–पाणिपादप्रपीडनं ॥ भवेदिह पवित्रोऽपि । चांडालकुलसंभवः ॥ ७८ ॥ धर्मद्रुमाणां मूलाग्निः । कीर्त्तिसौधमषीच्छटा ॥ पापर्द्धिः सर्वविद्विष्टा । श्रृणुयान्नापि वार्त्तया ॥ ७९ ॥ पापर्द्धिपंडिता घ्नंति । ये जंतून् संभ-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वंति ते ॥ दुःखदारिद्र्यदुष्टार्त्ति–दुर्गतीनां कुलाश्रयाः ॥ ८० ॥

इत्यादिसप्तव्यसन–दोषाणामेकमास्पदं ॥ चत्वारस्तनयास्तस्या–न्नूवन्नपि च कुष्टिनः ॥८१॥ कुरूपाः क्रूरधिषणाः । कुसंसर्गपराश्च ते ॥ राजानं वेष्टयामासुः । कुग्रहा इव वक्रगाः ॥८२॥ देशाद् देशं भ्रमन् राजा । वनाद्वनमिवानिशं ॥ तैः कुपुत्रैर्न कुत्रापि । कुग्रहै रतिमाप्तवान् ॥ ८३ ॥ नित्यमत्यंतज्ञोकारो । रोगग्रस्तास्तथापि ते ॥ चिंतामुत्पादयामासु–र्नृपतेरिति चेतसि ॥ ८४ ॥ दारिद्र्योपद्रुतैर्वैरि–विद्रुतैः परजीविभिः ॥ जीविताशा विधीयेत या सा क्लेशाय केवलं ॥८५॥ विप्रतार्य कुतोऽप्येनां । कांतां पुत्रान् स्वकानपि॥ अद्याहं स्वायुषः शेषं । करिष्याम्यचिरादपि ॥ ८६ ॥ विमृश्येति महाशैल–मारुरोह स कंचन ॥ जिनायतनमुत्तुंगं । ददर्शोपत्तिकासु च ॥ ८७ ॥ प्राणप्रयाणप्रस्थाने । स वांछन्निव शंबलं ॥ जिनस्य संप्रतेश्चैत्यं । तज्जगाम कुटुंबयुक् ॥ ८८ ॥ तत्रैकमद्भुताकारं । सारवत् सर्वतेजसां ॥ नमस्यंतं जिनस्यांह्रीन् । ददर्श पुरुषोत्तमं ॥ ८९ ॥ तद्दर्शनान्महीनाथो । विशेषोद्यत्सुवासनः ॥ प्रणनाम जिनं तत्वा–दैक्यं कुर्वन् जिनात्मनोः ॥ ९० ॥ अल्पापि हि मनःशुद्ध्या । जिनज-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्तिर्विनिर्मिता ॥ इह लोकेऽपि सत्सौख्य–दायिनी परलोकवत् ॥ ९१ ॥ धरणोऽहमहिस्वा-
मी । तुष्टस्ते जिनभक्तितः ॥ भद्राकृते वरं ब्रूहि । जगादेति स तं नृपं ॥ ९२ ॥ प्रीतस्तद्व-
चसा भूपो । ननामाहिपतिं द्रुतं ॥ उवाच च दर्शनं ते । दर्शकं मम संपदां ॥ ९३ ॥ प्रा-
र्थयिष्ये वरं पश्चात् । पूर्वं ब्रूहि कथां मम ॥ क्रमाज्जातेषु पुत्रेषु । तत्तन्नाशोऽभवत् कथं ॥
॥ ९४ ॥ विज्ञाय तद्भवान् ज्ञाना–दुरगेंद्रो जगाविति ॥ महाटव्यामयं भिल्लः । कृपाख्यः प्रा-
ग्भवेऽभवत् ॥ ९५ ॥ क्रूराशयोऽशुभध्यान–धरो ध्वस्तांगिसंचयः ॥ सोऽन्यदा तीर्थसंघातं ।
लुंटित्वा वलितः पथि ॥ ९६ ॥ आकर्णाकृष्टकोदंडो । मृगमन्वेषयन् वने ॥ श्रीसंयमं मुनिं
स्वाग्रे–ऽपश्यद्ध्यानस्थिरांगकं ॥ ९७ ॥ [illegible] ॥ पृष्टोऽप्येणगतिं नाह । यदा वाचंयमः कृपी
॥ स त्वमेव तदेत्याख्यन् । भिल्लस्तं मार्गणैर्न्यहत् ॥ ९८ ॥ अस्त्वर्हद्भ्यो नम इति । वद-
न् व्यसुरभून्मुनिः ॥ सोऽपि कृपो भ्रमन्नीतः । कृयं सिंहेन तद्दिने ॥ ९९ ॥ हा मयाघाति
पापेन । निरागा यन्मुनिर्ध्रुवं ॥ इदमेतत्फलमभूत् । स पतन्नित्यचिंतयत् ॥ ६०० ॥ स प्राप
सप्तमीं पृथ्वीं । मुनिघातजपातकात् ॥ त्रयस्त्रिंशत्सागराणि । लेहे दुःखानि चाधिकं ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्यानपि भवान् लब्ध्वा । सिंहव्याघ्रादिकान् बहून् ॥ पुनर्नरककांतारा–तिथिः सोऽभूत्कुकर्मतः ॥ २ ॥ प्रांतस्मृतमुनिवध–कृतदुःकृतगर्हणः ॥ उद्धृत्य नरकात्तस्मात् । त्वत्सूनुर्नील इत्यभूत् ॥ ३ ॥

राजन् मुनिवधो घोरो । मुनिनिंदापि दुस्तरा ॥ उपेक्षापि मुनींद्राणां । महद्दुःकृतहेतवे ॥ ४ ॥ तेन क्षयेन स्मरता । मुनेः स्वमरणोदये ॥ अद्यापि त्वत्कुले जन्मा–दशिष्टं विधते तमः ॥ ५ ॥ महानीलः शूर इति । क्षत्रियोऽभूत्पुरा पुरि ॥ कंकायां भीमनृपतेः । सेवकः स्वल्पवित्तभृत् ॥ ६ ॥ अप्राप्नुवन्निजं ग्रास–ममात्यानां विपर्यये ॥ दारिद्र्योपद्रुतोऽत्यर्थं । सोऽन्यदा स्वगृहान्ययौ ॥ ७ ॥ सारासारं रसवत्याः । कुर्वन्नुक्तः स भार्यया ॥ प्राणेश सारवस्तूनि । न प्राप्नोमि करोमि किं ॥ ८ ॥ भर्त्राहृतं नितंबिन्यः । पचंत्यन्नघृतादिकं ॥ अद्येदमेव गेहेऽभू–त्तत्कथं करवाण्यहं ॥ ९ ॥ स शूरस्तेन वचसा । ज्वलत्कोपदवानलः ॥ जघान लोष्टुना कांतां । मूर्छिता मृतिमाप सा ॥ १० ॥ कोलाहलस्ततस्तस्य । सुतया विदधे महान् ॥ तलारक्षो भ्रमंस्तत्र । शुश्राव च समाययौ ॥ ११ ॥ तं बध्ध्वा निन्युरभ्यर्णे । तला-

॥ ३११ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रक्षो महीनृतः ॥ नृपोऽपि शूलिकायै तं । समादिक्षत् कृतागसं ॥ १२ ॥ स शूलिकावेदनया । मुनेः पंचनमस्कृतिं ॥ शृण्वन् दत्तादरस्तस्यां । मृत्वा षष्ठीं ययौ महीं ॥ १३ ॥ भुक्त्वा तत्र निजं कर्म । नारीवधसमुद्भवं ॥ स नमस्कारश्रवणाद् । राजन् त्वत्सूनुतां ययौ ॥ १४ ॥ निःशरण्या सदा नीरु–स्ताम्मनीयापि नाबला ॥ यतः सा कुपिता लोक–द्वयघाताय जायते ॥ १५ ॥ तृतीयस्त्वत्सुतः काल । इत्यसाविन्द्यनंदनः ॥ पुरा जन्मनि कामांधो । बभूवागम्यगामुकः ॥ १६ ॥

स नित्यं गुरुदेवानां । निंदको धर्मघातकः ॥ रूपयौवनगर्वेण । पित्रोराज्ञां न मन्यते ॥ ॥ १७ ॥ कारणं देवधर्माणां । तत्वे भवति सद्गुरुः ॥ सुगुरुर्निंदितो येन । त्रयस्तेनावधूनिताः ॥१८॥ देवदर्शनिधर्माणां । यः कुर्यान्निंदनं नृप ॥ स चांमालभवान् लब्ध्वा । ध्रुवं स्यान्नरकातिथिः ॥ १९ ॥ न बोधिबीजं नो मुक्ति–र्न स्वर्गाः सत्कुलं न हि ॥ शुक्लइव्यस्य नो लब्धि–र्देवनिंदापरस्य तु ॥ २० ॥ मूकत्वं काहलत्वं च । लूताकुष्टादिदोषजाः ॥ मुखरोगाः सप्तषष्टि–र्जायंते जिननिंदया ॥ २१ ॥ अयशोऽकालमरण–दुःखं वक्त्रविगंधता ॥ लूता-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तंतुमुखा दोषा । न्नवंति गुरुनिंदया ॥ २२ ॥ संसारी नरके तिर्यग्–न्नवे स्यात् स पुनः पु-
नः ॥ धर्माणां निंदको नैव । लन्नते मानुषं न्नवं ॥ २३ ॥ त्रयाणामपि यस्तेषां। निंदको घो-
रपातकी ॥ तस्य संसर्गमात्रेण । मलिनीस्युः परेऽपि हि ॥ २४ ॥ अस्मत्कुलकलंकाय । क-
दाचारप्रवर्त्तनात् ॥ तदयं सर्वथा त्याज्यो । दूरेऽवस्करवद् गृहात् ॥ २५ ॥ विमृश्येत्यन्यदा
कोपा–दिन्न्येन स पुराद्बहिः ॥ निर्वासितोऽटद्विपिनं । यूथभ्रष्टकुरंगवत् ॥ २६ ॥ कुष्ठी ॥ स
लूतामुखपाकेन । प्रांते वेदनया मृतः ॥ षष्ठिं नरकमासाद्य। कालोऽयं त्वत्सुतोऽन्नवत् ॥२७॥
तुर्योऽयं च महाकालः । प्राग्न्नवे द्विजनंदनः ॥ अन्नूद्भिक्षोपजीवी सन्। नित्यं दुःखस्य न्ना-
जनं ॥ २८ ॥ दुःपूरोदरपूराय । देशाद्देशं ययावसौ ॥ जिनार्चकस्य कस्यापि । वेश्मन्यस्था-
च्च किंकरः ॥ २९ ॥ जिनान्नरणमादाय । सोऽन्यदा प्रययौ क्वचित् ॥ तद्भाग्नलुब्धचित्तः
स–न्निर्माति तु तदेव हि ॥ ३० ॥ मुनेरप्युपकरणा–न्यादत्ते ब्राह्मणब्रुवः ॥ दत्ते च व्यसना-
सक्तो । वेश्यायै व्यग्रमानसः ॥ ३१ ॥ देवद्रव्यं गुरुद्रव्यं । दहेदासप्तमं कुलं ॥ विषं वा तैल-
संमिश्रं । न्नोज्यं देवधनं न तु ॥ ३२ ॥ देवद्रव्यसमादाना–न्नरकं सप्तवासरैः ॥ वासरैस्त्रिन्नि-





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राप्नोति । गुरुद्रव्यापहारकः ॥ ३३ ॥ यथान्ने विषसंसर्गो । दुग्धे कांजिकसंगमः ॥ तथात्मनो धनेनोच्चैः । संसर्गो गुरुसंपदः ॥ ३४ ॥ जीविताशास्ति या देव–गुरुद्रव्येण देहिनः ॥ धत्तूर-करसोन्मिश्र–विषास्वादोद्भवा हि सा ॥ ३५ ॥ स इब्भं कुष्टसंक्लिष्टो । दिनैः कतिपयैर्मृतः ॥ भूत्वा नरकचांडाल–भवे चासीत्सुतस्तव ॥ ३६ ॥

एते यतिप्रियाघात–गुरुदेवविगर्हिणः ॥ तद्द्रव्यजीविनः प्रापु–स्त्वत्कुलं तन्निशम्यतां ॥ ॥ ३७ ॥ भिल्लः प्रांते मुनिस्मृत्या । क्षत्रियः परमेष्ठिनां ॥ निंदकः सत्कुलोत्पत्ते–स्तस्करो जिनदर्शनात् ॥ ३८ ॥ एतेषामवशिष्टेन । पापेन नृपते भवान् ॥ राज्याद् भ्रष्टोऽसि तत्त्वं मा । कुर्या मरणचिंतनं ॥ ३९ ॥ गत्वा देशे सुराष्ट्रायां । शत्रुंजयगिरेस्तटे ॥ शत्रुंजयां भज न-दीं । सर्वदोषौघघातिनीं ॥ ४० ॥ एते तत्तीरवृक्षाणा–मास्वादंतां फलानि च ॥ स्नांतु तत्रांभ-सि गिरिं । स्पृशंतु च तमेव हि ॥ ४१ ॥ तस्या एव तटे नद्या । विद्यते जिनमंदिरं ॥ सर्व-पापहरं पुंसां । पुरा सूर्येण निर्मितं ॥ ४२ ॥ तत्पापशांतये तत्र । विधिना जिनपूजनं ॥ वि-धेयं हि त्रिधा शुद्ध्या । रक्षणीयाश्च जंतवः ॥ ४३ ॥ शत्रुंजयायामाद्यस्तु । नद्यामैंद्र्यां पर-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्तथा ॥ नागेंद्रामप्ययं काल—स्ताळध्वज्यां परस्ततः ॥ ४४ ॥ एवंविधं प्रकुर्वंत । एकत्रितु-
र्यषएमतैः ॥ मासैर्निरामया नूत्वा । प्राप्स्यंते ते सुखागमं ॥ ४५ ॥ ततः कुकर्मनिर्मुक्ताः।
सुरोपमशरीरिणः ॥ स्वस्वराज्यस्य नोक्तारः । स्वाराज्यस्यापि नाविनः ॥ ४६ ॥ स नृपो
धरणेनोक्तं । निशम्य सुमना इति॥ ननाम तत्पदौ नक्त्या । समं युवतिनंदनैः ॥ ४७ ॥ ष-
तवा
एमासातिक्रमान्नूप । मां स्मरेस्तटिनीतटे ॥ यथा जित्वा त्वदारातीन् । राज्यं यछामि चा-
क्षयं ॥ ४८ ॥ इत्युक्त्वा धरणो यातो । नत्वा नृपोऽपि दैवतं ॥ पथा तेनैव ववले । धृत्वा त-
द्वचनं हृदि ॥ ४९ ॥ [illegible] ॥ अतिक्रम्य बहून् देशान् । सुराष्ट्रविषयं ययौ ॥ शत्रुंजयं तत्र
गिरिं । पश्यतिस्म सविस्मयः ॥ ५० ॥ शत्रुंजयानदीतीरे । कृत्वा तृणकुटीरकान् ॥ नवास
वासवः पृथ्व्याः । सकुटुंबः समाहितः ॥ ५१ ॥ स्नाति तत्र त्रिसंध्यं ते । लिंपंत्यंगं च तन्मृ-
दा ॥ नमंति तीर्थे तीर्थेशं । तत्तीरडुफलादनाः ॥ ५२ ॥ मासांतेऽपि निजान् पुत्रान् । सो-
ऽपश्यत्कनकद्युतीन् ॥ तथापि धरणादेशात् । षएमासीं तस्थिवान् नृपः ॥ ५३ ॥ ततः ष-
एमासपर्यंते । स्मृतो धरण एत्य तं ॥ विमानमधिरोह्य शक् । पूर्वे राज्येऽध्यरोपयत् ॥५४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स शांतनोऽपि तैः पुत्रैः । सार्द्धं यात्रां जिनार्चनं ॥ चक्रे महीं जिनावास–मंमितां च स्वचि-
त्तवत् ॥ ५५ ॥ चतुःषष्टिवर्षलक्षा–एयासाद्य विभुतासुखं ॥ ततः पुत्रकलत्रेण । समं जग्राह
संयमं ॥ ५६ ॥ शत्रुंजये पालयित्वा–नशनं प्राप्य केवलं ॥ ते ययुर्मुक्तिनिलयं । प्रक्षीणा-
शेषबंधनाः ॥ ५७ ॥ इत्यनेकप्रजावाढ्या । सेयं शत्रुंजया नदी ॥ राज्यभ्रष्टस्य राज्यानि ।
सुखभ्रष्टस्य सत्सुखं ॥ ५८ ॥ विद्याभ्रष्टस्य विद्यां च । कांतिकीर्त्तिमतिश्रियं ॥ स्वर्गसौख्यं
च या दत्ते । सेविनां हेलयैव हि ॥ ५९ ॥ युग्मं ॥ मुख्यो यथा युगादीशः । सद्देवेष्वखिले-
ष्वपि ॥ तीर्थेष्वयं यथा मुख्यः । श्रीशत्रुंजयपर्वतः ॥ ६० ॥ तथैव तीर्थभूतासु । नदीष्वेषो-
त्तमा स्मृता ॥ एनां जरतभूपाल । त्वमप्याराधयाधिकं ॥ ६१ ॥ युग्मं ॥

इतः कुबेरकाष्टायां । पूर्णा पुण्यजलैः कलैः ॥ ऐंद्रीयं दृश्यते श्रोत–स्विनी संपूर्णवैभ-
वा ॥ ६२ ॥ स्पर्धयेशानशक्रस्य । सौधर्मपतिना नदी ॥ इयं पद्महृदाद् हृद्या–दानिन्ये जि-
नभक्तितः ॥ ६३ ॥ स्पर्द्धया जिनभक्त्या च । यदानीता नदी ह्यसौ ॥ तेन शत्रुंजयाऽन्यून–
प्रभावा दुष्टदोषनुत् ॥ ६४ ॥ अस्या मृदैव निष्पन्नः । कलशोऽस्या जलैर्भृतः ॥ जिनांगे ना-

For Private And Personal Use Only

मितो भक्त्या । तेन मुक्तिर्वशीकृता ॥६५॥ ततः पातालपतिना । धरणेंद्रेण भक्तितः ॥ पातालमूलादानिन्ये । नदीयं पूर्वभूषणा ॥ ६६ ॥ यांती दक्षिणदिग्भागं । कुबेरककुभोद्भवा ॥ सूर्योद्यानस्थिता सेयं । भाति ख्यातप्रभावयुक् ॥ ६७ ॥ नागेंद्रेण जिनस्नात्र–कृते नीता यदत्र सा ॥ नागेंद्रीति च विख्याता । ततः सर्वतमोऽपहा ॥ ६८॥ सर्वैः सुरासुरैः स्नात्र–कृते श्रीप्रथमप्रभोः ॥ कृतेयं यमलह्रदा । ह्रदिनी ह्रदराजिता ॥ ६९ ॥ येनास्याः पयसि स्नातं । स्नापितो वा जिनप्रभुः ॥ लब्धं तेन फलं पूर्णं । मानुष्यजनुषस्तरोः ॥ ७०॥ एवं भरत पूर्वोक्ता । महानद्यश्चतुर्दश ॥ शत्रुंजये विभांत्येता । जिनस्नात्रपवित्रिताः ॥ ७१ ॥ एताभ्योऽपि महाकुंभ–समुद्रेभ्यो ह्रदादपि ॥ जलान्याहृत्य तीर्थेऽत्र । संस्नाप्यो जिननायकः ॥७२॥ संघाधिपानां श्राद्धानां । क्रमोऽयं सर्वदा स्थिरः ॥ चक्रिशक्रपदं दत्वा । तीर्थकृत्त्वं प्रयच्छति ॥ ॥ ७३ ॥ अप्येतास्तटिनीः सर्वाः । शुभवारः शुभंकराः ॥ नानाप्रभावसंपूर्णाः । सर्वतीर्थांशभूषिताः ॥७४॥ यः स्पृशेत्तस्य सत्कीर्त्ति–र्विपच्छान्तिः शुभोदयः॥ स्वर्गादिसौख्यसंपत्तिः। करेगव प्रजायते ॥ ७५ ॥[redacted] ॥ निधयः संनिधौ तस्य । कामधेनुस्तदंगणे॥ त्रैलोक्यं व-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शर्मं तस्य । स सदैव शुचिर्नरः ॥ ७६ ॥ भूतप्रेतपिशाचाद्याः । प्रभवंति न तस्य हि ॥ कु-
ष्टाः कुष्टादयो दोषा । न भवंति कदाचन ॥ ७७ ॥ अमराः किंकरास्तस्य । सर्वाः संपत्तयो
गृहे ॥ एता आराधयेद्यस्तु । स्नानस्नात्रादिसेवनात् ॥ ७७ ॥ [redacted] ॥ अन्यान्यपि
जलस्थाना-न्यत्र संति बहून्यपि ॥ चंद्रसूर्यव्यंतरेंद्र-कुंडानि भरतेश्वर ॥ ७८ ॥

निशम्येति वचो हृष्ट-चित्तश्चक्री कृतोद्यमः ॥ शक्रेण सहितस्तासु । सस्नौ निर्झरिणी-
ष्वथ ॥ ७९ ॥ तत्तीरद्रुमपुष्पाणि । पद्मान्यादाय सत्वरं ॥ कलशांश्च जलैर्भृत्वा । जिनमान-
र्च च द्रुतं ॥ ८० ॥ तीर्थमानपुरं पूर्व-दिग्भूषणमथो व्यधात् ॥ स्वपुरं दक्षिणस्यां स । स्वः-
पुरोपममद्भुतं ॥ ८१ ॥ तत्रानेकतमालादि-वनश्रेणिविभूषितः ॥ प्रासादो जगदीशस्य । चक्रे
वर्द्धकिना महान् ॥ ८२ ॥ ब्रह्मर्षिश्चक्रितनयः । सिद्धो मुनिगणैः सह ॥ यत्र तेनैव विख्यातं ।
तीर्थं ब्रह्मगिरिर्महत् ॥ ८३ ॥ चक्रिणाकारि तत्रोच्चैः । श्रीयुगादिजिनेशितुः ॥ प्रासादः सुर-
विश्रामो । नाम्ना कल्मषभेदकृत् ॥ ८४ ॥ अथो दुंदुभिनिःस्वान-मंगलध्वनिपूर्वकं ॥ पुर-
स्कृत्य गुरून् चक्री । समं वासवभूमिपैः ॥ ८५ ॥ सर्वाभिः सह पत्नीभिः । संघलोकैः परै-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रपि ॥ अचालीत् चैत्यचर्चायै । नानाशिखरजूमिषु ॥ ८६ ॥ जावी कपर्दीयक्षोऽत्रा–धिष्टा-
तेति तदाख्यया ॥ शृंगे सयक्षप्रासादो–ऽर्हतः शक्रेण निर्मितः ॥ ८७ ॥ माघमासे पूर्णिमा-
स्यां । जननी त्रिजगद् गुरोः ॥ तत् शृंगे चक्रिणास्थापि । मरुदेवा गुरोर्गिरा ॥ ८८ ॥ ततो-
ऽस्मिन् मरुदेवाख्ये । तामेवादरतो जनः ॥ अपूजयत्तद्दिने च । नाम्नापि कलुषापहां ॥८९॥
[illegible] ॥ तद्दिने ये नरा नार्यः । पूजयंत्यादियोगिनीं ॥ ते सर्वे सर्वसाम्राज्य–सुजगाः स्युर्मु-
मुक्षवः ॥ ९० ॥ नार्योऽप्यविधवा पुत्र–वत्यः सौजाग्यजाजनं ॥ चक्रिशक्रगृहे जूत्वा । क्र-
मान्मुक्तिं व्रजंत्यपि ॥ ९१ ॥ ततो द्वियोजनीं मुक्त्वा । योजनैकमितं गिरिं ॥ तिरश्चामपि
स्वःसौख्य–प्रदं स्वर्गाख्यमानमत् ॥ ९२ ॥ प्रासादमपि तत्रोच्चं । श्रीयुगादिजिनेशितुः ॥
चक्री चकार सद्भक्त्या–धिष्ठातृसुरसेवितं ॥ ९३ ॥ शृंगेऽपरस्मिन् स्वसुतान् । यतीन् बाहु-
बलिस्ततः ॥ अष्टोत्तरसहस्रं तान् । जगाद ज्ञानसागरः ॥ ९४ ॥ माहात्म्यादस्य तीर्थस्य ।
जवतां पुंडरीकवत् ॥ ज्ञानोत्पत्तेः सिद्धिसुखं । जावि कर्माष्टकक्षयात् ॥ ९५ ॥ ततोऽत्र सं-
स्थिता निर्या–मणां कुरुत सुव्रताः ॥ श्रुत्वेति ते समं तेन । तत्र तस्थुः समाहिताः ॥ ९६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उत्पन्नकेवलास्तेऽथ । क्रमादासादयन् शिवं ॥ तत्र बाहुबलौ शृंगे । तपो बाहुबलिर्व्यधात् ॥ ॥ ए७ ॥ इतश्च जरतोऽपृछत् । वासवं प्रीतिवासितः ॥ सर्वतीर्थमये शैले । दाहोऽमीषां क्व-चोचितः ॥ ए८ ॥ विज्ञाय ज्ञानतः सोऽपि । जगाद वृषजांगजं ॥ निःशेषजनताचार-प्रवृत्त्यै ज्ञापयन्निव ॥ ७०० ॥ मरुदेवादिसिद्धानां । पुंमरीकांतयावतां ॥ प्रक्षिप्तानि मया क्षीर-वा-र्धौ देहानि जूपते ॥ १ ॥ नातः परमयं जावी । ह्याचारः सारवत्तया ॥ सिद्धानामपि देहा-ना-मग्निसंस्कृतिरस्तु तत् ॥ २ ॥ मुख्यं शत्रुंजयं शृंगं । सर्वतीर्थमयं पुनः ॥ आदिदेवांह्रि-संसक्त-सर्वदेवौघसुंदरं ॥ ३ ॥

अतो दाहादिदुःकर्म । तत्र कर्त्तुं न युज्यते ॥ यतस्तत्तीर्थलोपः स्या-ज्जिनाज्ञायाश्च लं-घनं ॥ ४ ॥ मुख्यशृंगादधो मुक्त्वा । सर्वतोऽपि द्वियोजनीं ॥ गिरौ स्वर्गान्निधे कार्या । दे-हिनामग्निसंस्कृतिः ॥ ५ ॥ तत्र तेषां च कर्त्तव्या । मूर्त्तिः शैलमयी यतः ॥ अन्येषामपि स-त्कृत्य-निर्देशाय महीधव ॥ ६ ॥ तत् श्रुत्वा वासवेनोक्तं । युक्तियुक्तं महीपतिः ॥ व्यधात्त-थैव तद्देह-संस्कृतिं सुकृतादरः ॥ ७ ॥ शृंगे तत्रैव च प्रोच्चैः । प्रासादं विदधे विजोः ॥ पूर्व-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिक्कामिनीवक्त्र—रत्नपुंड्रकसंनिभं ॥ ८ ॥ अपि सोमयशाः स्वस्य । बंधूनां जनकस्य च ॥
प्रासादान् कारयामास । तत्र वर्द्धकिना मुदा ॥ ए ॥ ततस्तालध्वजे शृंगे । नाम्ना तालध्वजं
सुरं ॥ खड्गखेटकशूलादि—पाणिमस्थापयन्नृपः ॥ १० ॥ अथो कादंबकगिरौ । श्रीनाभं भर-
तोऽवदत् ॥ भगवन् किं प्रभावोऽयं । पर्वतः ख्यातिमान् बहु ॥ ११ ॥ गणाधीशोऽप्यथोवाच ।
चक्रिन् श्रृणु कथानकं ॥ उत्सर्पिण्यामतीतायां । चतुर्विंशो जिनोऽभवत् ॥ १२ ॥ संप्रतेर-
र्हतस्तस्य । कदंबाख्यो गणाधिपः ॥ मुनिकोटिभिरत्रागात् । सिद्धिं कादंबकस्ततः ॥ १३ ॥
संत्यत्र दिव्यौषधयः । प्रभावपरिपेशलाः ॥ रसकूप्यो रत्नभुवः । कल्पवृक्षास्तथापरे ॥ १४ ॥
दीपोत्सवे शुभे वारे । संक्रांतावुत्तरायने ॥ न्यसेन्मंमलमत्रैत्य । स्युः प्रत्यक्षा हि देवताः ॥
॥ १५ ॥ न ता औषधयः काश्चि—द्रसकुंभानि तानि न ॥ सिद्धयोऽपि न ताः पृथ्व्यां । या न
संति गिराविह ॥१६॥ सुराष्ट्रामंमलभुवो । दारिद्र्येण कथं जनाः ॥ पीड्यंते यत्र कादंब—गिरि
सिद्धिनिकेतनं ॥ १७ ॥ कदंबेनापि नो यस्य । दारिद्र्यद्रुरघाति हा ॥ निर्भाग्य इति तं नैव ।
रोहणाद्रिः प्रतीच्छति ॥ १८ ॥ तुष्टो यस्यास्त्ययं शैलः । कामधेनुसुरद्रुमाः ॥ चिंतामण्या-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दयस्तस्य । सर्वे तुष्टाः समंततः ॥ १९ ॥ नक्तमौषधयो यत्र । निजभादीपसंचयैः ॥ तमो
हरंति दारिद्र्य–मिव निर्भाग्यमंदिरात् ॥ २० ॥ गयावृक्षाः कल्पवृक्षा । अत्र संति सनातनाः
॥ रुचकाद्राविव स्वैरं । यच्छंति बहुवांछितं ॥ २१ ॥ कालहानेः क्रमेणैते । न भविष्यंति गो-
चराः ॥ मर्त्यानामिव वर्षासु । मेघच्छन्नरवेः कराः ॥ २२ ॥ परं शृंगवदेतच्च । शृंगं कालुष्य-
नाशनं ॥ भवद्वयोपकारित्वात् । ख्यातिमेति पुनर्भृशं ॥ २३ ॥ महिमानमिति श्रुत्वा । च-
क्री कादंबभूभृतः ॥ तत्रानेकद्रुमाकीर्णे । धर्मोद्याने महामनाः ॥२४॥ प्रासादं वर्द्धमानस्य ।
चतुर्विंशस्य भाविनः ॥ अचीकरद्वर्द्धकिना । नाकिनायकसंमतं ॥ २५ ॥ युग्मं ॥ कादंबात्प-
श्चिमे शृंगे । शत्रुंजयनदीतटे ॥ गजवाजिमयी सेना । चक्रिणोऽस्थाच्च काचन ॥ २६ ॥ त-
त्र रोगार्त्तिनिर्मुक्ता । हस्त्यश्ववृषपत्तयः ॥ केचित्स्वर्गमगुस्तीर्थ–योगादप्यविवेकिनः ॥ २७ ॥
तेऽथ स्वर्गात्समागत्य । प्रणिपत्य नराधिपं ॥ स्वस्वर्गसौख्यलाभं तं । कथयामासुराशु च
॥ २८ ॥ तत्र स्वमूर्त्तिसंयुक्तान् । प्रासादानप्यकारयन् ॥ स तदादि गिरिर्जातो । हस्तिसेना-
भिधो महान् ॥ २९ ॥ शत्रुंजयगिरेः सर्व–शृंगेष्वपि जिनालयाः ॥ चक्रिरे चक्रिणेच्छं च ।

॥३२२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुरोरादेशतस्तथा ॥ ३० ॥ इत्थं प्रदक्षिणां दत्वा । मुख्यशृंगस्य जूपतिः ॥ पुनः स्वस्थान-
मासाद्य । ननामाद्यजिनेशितुः ॥ ३१ ॥ मुख्यशृंगादधो हेम–गुहायां जूतजाविनां ॥ मूर्त्ती-
श्च वर्त्तमानाना–मर्हतामेष रत्नजाः ॥ ३२ ॥ प्रतीच्यामथ चक्रेशः । पूजयित्वातिजावतः ॥
शक्रोक्तं सफलीचक्रे । तत्तन्मार्गप्रदर्शकं ॥ ३३ ॥ [illegible] ॥ अथोज्जयंतयात्रायै। प्रस्थितं जरतं
नृपं ॥ मुनींशै नमिविनमी । ऊचतुर्मधुरोक्तिजिः ॥ ३४ ॥ स्थास्यावोऽत्र नृपेशावां । मुनि-
कोटिद्वयान्वितौ ॥ तेषामप्यावयोर्मुक्ति–र्जवितात्रैव पर्वते ॥ ३५ ॥

श्रुत्वेति जरतो जक्तया । तौ ननाम परानपि ॥ ताज्यां तेज्यो धर्मलाज । इत्याशिष-
मवाप च ॥ ३६ ॥ तैः समं मुनिजिर्ज्ञानं । तत्र तौ पुंमरीकवत् ॥ सिद्धिं च प्रापतुः शुक्ल–
दशम्यां मासि फाल्गुने ॥ ३७ ॥ तद्दिनेऽल्पमपि दत्तं । सत्तपस्तप्तमत्र च ॥ कालोप्तमिव स-
द्बीजं । जवेन्नूरिफलप्रदं ॥ ३८ ॥ फाल्गुनस्य दशम्यां ये । स्पृशंति विमलाचलं ॥ ते क्षिप्त्वा ॥३२३॥
निजपापानि । जवंति शिवजाजिनः ॥ ३९ ॥ जरतोऽपि सुरास्तेषां । कृत्वा निर्वाणमंगलं ॥
रत्नमूर्त्तीश्च संस्थाप्य । चेलुर्मासद्वयादनु ॥ ४० ॥ नृपः पश्चिमदिग्जागे । तुर्ये शृंगे महाबलं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ नंदिनं तीर्थरक्षायै । सुरमस्थापयद् दृढं ॥ ४१ ॥ नामापि तस्य नांदीति । गिरेरासीत् प्रसिद्धिमत् ॥ यो यः स्वामी भवेद्यत्र । तत्र तन्नाम जायते ॥ ४२ ॥ व्रतिन्यो नमिपुत्र्योऽथ। चतुःषष्ट्यंकसंमिताः ॥ शृंगेऽपरस्मिन् कनका–चर्चाद्यास्तस्थुरुद्यताः ॥ ४३ ॥ कृष्णचैत्रचतुर्दश्या । निशीथे तत्र ताः समं ॥ ययुः स्वर्गं ततः ख्यातः । चर्चाख्यः स गिरिर्महान् ॥ ॥ ४४ ॥ आदिदेवपदांभोज–भक्तानां तत्र संस्थिताः ॥ समीहितं प्रयच्छंति । विघ्नौघं ता हरंत्यपि ॥ ४५ ॥ ततो विततशाखाग्र–रुद्धार्ककिरणव्रजं ॥ चंडेद्यानं समासेदु–र्वारुण्यां दिशि यात्रिकाः ॥ ४६ ॥ द्रुमच्छायासु विश्रांत–किन्नरीगीतझंकृतीः ॥ लोकंपृणा वने तत्र । शुश्रुवेऽर्हद् गुणाश्रयाः ॥ ४७ ॥ फलैरविरलैः स्वादु–कलैस्तत्र जलैर्जनाः ॥ तस्थुः सुखं द्रुमच्छाया–विश्रांतिविगतश्रमाः ॥ ४८ ॥ तत्र ब्राह्मीनदीहृद्य–हृदकल्लोललालिते ॥ सैकते संघलोकानां। चित्तमाप मुदं तदा ॥ ४९ ॥

ततस्तद्वनचारुत्व–वीक्षणाकृष्टमानसः ॥ सवयोभिः कुमारैस्तैः । समं सोमयशा ययौ ॥ ५० ॥ इदं रम्यमिदं रम्य–मित्याकुलमनाः स च ॥ व्रजन् ब्राह्मीनदीरोध–स्युटजोत्करमै-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृत ॥ ५१ ॥ स यावत्कौतुकाद्याति । तत्र तावत्तपस्विनः ॥ जटिनो नूतिलिप्तांगा—नालोकत जितेंद्रियान् ॥ ५२ ॥ मूर्त्या शांतहृदो देह—तेजसाद्भुतवैन्नवान् ॥ विलोक्य तानिंनुय-शा—स्तदाचारं च पृष्टवान् ॥ ५३ ॥ जगुस्तेऽथ वयं विद्या—धरा वैताढ्यवासिनः ॥ केचिद्व-त्यादिन्निर्ग्रस्ता । रोगैः केचित् सुडुस्तरैः ॥ ५४ ॥ तत्प्रतीकारमस्मान्नि—र्ज्ञात्वा धरणपन्न-गात् ॥ शत्रुंजयांतिके चंद्रो—द्यानमेतद्विशिश्रये ॥५५॥ इमां नदीं दोषरोग—हरां क्षेत्रमिदं ॥ पुनः ॥ न्नजमाना वयं रोग—निर्मुक्ता स्मो महीपते ॥ ५६ ॥ वयं व्रतं कन्न महा—कष्टयोः प्राप्य चेदृशं । फलकंदाशिनो न्नक्त्या । स्मरामो जिनमादिमं ॥ ५७ ॥ अत्र समवसरण—मष्टमस्य जिनेशितुः ॥ न्नाविनो न्नविता राजन् । विशेषात्तद्वयं स्थिराः ॥ ५८ ॥ स हृष्ट-चित्तस्तत् श्रुत्वा । व्यावृत्य ननु चक्रिणे ॥ तत्सर्वं कथयामास । प्रमनाः सोऽप्यजायत ॥ ॥ ५९ ॥ ज्ञात्वा तत्र च समव—सरणं चंद्रप्रन्नस्य सः ॥ अचीकरद्वर्द्धकिना । सप्रासादं पुरं महत् ॥ ६० ॥ तत्र तीर्थं प्रतिष्ठाप्य । चक्री संघजनैः समं ॥ लिप्सुर्विशेषपुण्याया—चलदै-वतकं प्रति ॥ ६१ ॥ ददृशुस्ते महाशैल—मथ रैवतमुत्तमं ॥ सुवर्णरत्नमाणिक्य—रोचिःकर्बु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रितांबरं ॥ ६२ ॥ इंद्रनीलमणिप्रोत–स्फटिकोपलरोचिषं ॥ धम्मिल्लमिव मल्लीज–कुसुमैर्न्नू-
मियोषितः ॥ ६३ ॥ मध्ये मध्ये हेमरेखं । सर्वनीलशिलामयं ॥ स्फुरद्विद्युल्लिखं कृष्ण–मि-
व जीमूतमुन्नतं ॥ ६४ ॥ त्रिभिर्विशेषकं ॥

यत्र किन्नरबालेभ्यः । क्रीडन्त्यो रत्नकंडुकाः ॥ दिवाप्युत्पतिताः केचि–द्दधुः खे तारक-
भ्रमं ॥ ६५ ॥ नक्तमिंदुदृषच्छृंग–श्रवत्पीयूषकुल्यया ॥ अयत्नं यत्र विपिने । शाड्वलंति द्रुमो-
त्कराः ॥ ६६ ॥ पंचवर्णमणीरोचि–श्चित्रडुः पवनेरितः ॥ यत्र निर्माति मायूर–नृत्यभ्रममुपे-
युषां ॥ ६७ ॥ यः सर्वतो नीलमणि–शीलो मध्ये सितोपलः ॥ विस्फुरत्तारको भाति । ता-
रापथ इव क्वचित् ॥ ६८ ॥ उच्चकांचनचूलाग्रः । परितो द्रुमवेष्टितः ॥ रक्तामणिर्महीनार्या ।
इवोत्तुंगो रराज यः ॥ ६९ ॥ प्रतिभूः कस्य धर्मोऽस्ति । लक्ष्या हेम्नोऽथ कस्य च ॥ दारि-
द्र्यं रसकुंभानि । रटंति स्मेति यस्य च ॥ ७० ॥ सफलैः कदलीवृक्षै–र्माकंदैर्बद्धतोरणः ॥ वि-
द्याधरप्रियागानै–रुत्सवीवास्ति यो नगः ॥ ७१ ॥ दिवा ज्वलत्सूर्यमणि–र्नक्तमौषधिदीपकैः ॥
अनंतलक्ष्म्यधिपति–रिव यः कदलीध्वजैः ॥ ७२ ॥ निजशृंगाग्रसंजाग्र–दुदग्रमणिजालकैः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिवापि यः प्रकुरुते । शतचंद्रनन्नस्तलं ॥ ७३ ॥ शेशांगे चंदनमिव । चंद्रे चंद्रस्य चर्चना ॥
यत्र स्फटिककुड्यासु । न्नाति निर्झरिणीपयः ॥ ७४ ॥ सदा निर्झरझंकार–मुखरः सर्वतो-
ऽस्ति यः ॥ नुपत्यकासु खेलन्नि–र्गजैर्जंगमशृंगवान् ॥ ७५ ॥ चरदेणमदालिप्तो। वीज्यमान-
श्च चामरैः ॥ चमरीन्निः पर्वतेश । इव योऽस्ति सदोन्नतः ॥ ७६ ॥ कीचकैः पवनापूर्णै–र्न-
दीनिर्झरझात्कृतैः ॥ केकिनो यत्र नृत्यंति । गीतासक्ताः सुरस्त्रियां ॥ ७७ ॥ निरुद्ध्य नवरं-
ध्रेन्यो । मारुतं स्थिरवृत्तयः ॥ ध्यायंति यत्र मुनयः । कंदरासु महन्महः ॥ ७८ ॥ सेव्यमा-
नः सदा देवै–र्गुह्यकैरप्सरोगणैः ॥ विद्याधरैश्च गंधर्वै–रस्ति स्वस्वार्थसिद्ध्ये ॥ ७९ ॥ सूर्य-
चंद्रमसौ यत्र । क्षणं विश्रांतवाहनौ ॥ किंचिदानंदमासाद्य । यातस्तत्स्तुतितत्परौ ॥ ८० ॥
लवंगलवलीनाग–वल्लीमल्लीतमालकाः॥ कदंबजंबूमाकंद–निंबांबकसाबिंबकाः ॥ ८१ ॥ताली-
तालीसतिलक–रोध्रन्यग्रोधचंपकाः ॥ वकुलाशोकसाश्वत्थ–पलाशप्लक्षमाधवाः ॥ ८२ ॥ क-
दलीचंदनछाया–कल्पद्रुकणवीरकाः ॥ मातुलिंगदेवदारु–पारिजातिलकांकुशाः ॥ ८३ ॥ जं-
बूकुरवकांकुल्ल–मुखा यत्र महीरुहः ॥ छायाफलैः पत्रपुष्पैः । प्रीणयंति जनव्रजान् ॥८४॥



For Private And Personal Use Only

[redacted] ॥

दृष्ट्वा रोहणवैताढ्य–मेरुसंपत्तितस्करं ॥ रैवताद्रिं ददौ चक्री । तत्रावासानुपोषितः ॥
॥ ८५ ॥ गुर्वादेशात्तीर्थपूजां । चक्रे शत्रुंजयाद्रिवत् ॥ चक्री समस्तसंघेन । समं संमदवां-
स्ततः ॥ ८६ ॥ अन्नोजयत् शक्तिसिंहः । संघलोकं सचक्रिणं ॥ मनोहराहाररसा–वधीरित-
सुधं ततः ॥ ८७ ॥ दुर्गमं रैवतं ज्ञात्वा । महोदयमिवाथ तं ॥ चक्री यक्षसहस्रेण । सिद्धांते-
नेव केवली ॥ ८८ ॥ अचीकरत् सुखारोह–कृते पद्याचतुष्टयं ॥ शिलोत्करैर्दानशील–तपोन्भा-
वैरिवोज्ज्वलं ॥८९॥ [redacted] ॥ वापीवननदीचैत्य–विश्रांतपथिकव्रजं ॥ अकार्षीद्भरतः प्रोच्चैः ।
पद्याः पद्या मुखे पुरं ॥९०॥ ताभिः सुखं संघलोकाः । पद्याभी रैवताचलं ॥ अथारुरुहुरुच्चुं-
गं । मनोरथमिव स्वकं ॥ ॥ ९१ ॥ जानन् भविष्यतो नेमे–र्भाविकल्याणकत्रयं ॥ तत्राका-
रयदुत्तुंगं । प्रासादं शिल्पनाधिपः ॥ ९२ ॥ रैवताद्रिमणीरत्न–किरणैर्धनवर्णकैः ॥ अयत्नं
चित्रनिर्माण–मासीत्तत्र जिनालये ॥ ९३ ॥ स प्रासादो ध्वजव्याजा–द्यशः कोशस्य चक्रि-
णः ॥ वणिजे सुरवृंदाय । वर्णिकां दर्शयन्निव ॥ ९४ ॥ शुशुभे स प्रतिदिश–मेकादशसुमं-

॥३२८॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रूपैः ॥ चतुर्द्वारो महोत्तुंगो । यो नाम्ना सुरसुंदरः ॥ ९५ ॥ बलानकैर्गवाक्षैश्च । तोरणैस्त्रि-
जगत्पतेः ॥ प्रासादोऽशोभत प्रोच्चैः । सर्वर्त्तूद्यानमंडितः ॥ ९६ ॥ स्फटिकोपलजे चैत्ये । शु-
द्धनीलमणीमयी ॥ मूर्त्तिर्नेमेस्तारकेव । नेत्रपांडुरवर्त्तिनी ॥ ९७ ॥ मुख्यशृंगादधो भुक्त्वा ।
प्रतीच्यां योजनं पुनः ॥ स प्रासादो जगत्खेद-भेदकृत्समभूद्विभोः ॥ ९८ ॥ आदिदेवस्य
तत्रैव । स्वस्तिकावर्त्तकाभिधः ॥ प्रासादश्चक्रिणाकारि । निवारिततमोभरः ॥ ९९ ॥ रेजिरे
मूर्त्तयस्तत्र । बह्वयोऽपि विमलाद्रिवत् ॥ सुवर्णरूप्यमाणिक्य-रत्नधातुविनिर्मिताः ॥ ८०० ॥
ततोऽर्हद्भक्तिभरतो । भरतो गणधारिभिः ॥ तत्रोपहारैर्विविधैः । प्रतिष्ठामप्यचीकरत् ॥ १ ॥
नाकिनाथो नेमिनाथ-मथो वंदितुमाययौ ॥ वियत्पथेभनाथं त-मारुह्य प्रेरितो मुदा ॥ २ ॥
ऐरावणैकपादेना-क्रम्य भूमिं बलीयसा ॥ कुंडं गजेंद्रपदमि-त्यकरोत्सोऽर्हदर्चने ॥ ३ ॥ वि-
श्वत्रयभुवां तत्र । नदीनां पेतुरद्भुताः ॥ प्रवाहाः प्रसरद्दिव्य-गंधलुभ्यत् षडंह्रयः ॥ ४ ॥ सु-
धा मुधा शर्करापि । कर्करा यत्पयःपुरः ॥ अगुरुः सोऽगुरुरभूत् । कस्तूरी न स्तुतिं श्रयेत्
॥ ५ ॥ तद्गंधखंडं श्रीखंडं । यदंबुपुरतोऽभवत् ॥ सरस्वत्यपि न रस-वती सिंधुर्न बंधुरा ॥

४२

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ६ ॥ रंगाय नाभवङ्गा । क्षीरोदः क्षोदभृन्नहि ॥ यदंबुनः पुरोऽक्षोदं । नाक्षोदकधरं यतः ॥ ६ ॥ दर्शनाकर्णनस्पर्शात् । सेवनाद्यत्फलं भवेत् ॥ तीर्थेष्वन्येषु तत्स्याच्च । तत्कुंभांबुजिनार्चनात् ॥ ७ ॥ बुधाः सुधाकुंभमिति । वर्णयंति मुधैव तत् ॥ दत्तेऽजरामरपद-मिदमेव पराणि न ॥ ८ ॥ दिव्यतीर्थजलैर्युक्तं । मुक्तं दोषैर्बभूव तत् ॥ यत्पयःस्पर्शतो व्याधि-राधिश्च व्रजति क्षयं ॥ ९ ॥ नागेंद्रेणाथ धरण-नाम्ना नेमौ सुभक्तितः ॥ चक्रे यानादिना कुंभं । भात्कृतिं निर्झरां दधत् ॥ १० ॥ ह्रदिनीह्रदलक्षेभ्यो । यत्र पुण्यं पयो व्रजत् ॥ तच्च नाम्ना नागझर-मिति ख्यातिं ययौ भुवि ॥ ११ ॥ ततोऽपि चमरेंद्रेण । विभौ भक्तिं वितन्वता ॥ वाहनेन मयूरेण । स्वकुंभमकरोन्महत् ॥ १२ ॥ मयूरपादाक्रमणा-न्निर्ययुर्निर्झराणि यत् ॥ मायूरनिर्झरमिति । तन्नाम्ना भुवि पप्रथे ॥ १३ ॥ चंद्रसूर्यादिकुंभानां। प्रभावो वचनातिगः॥ यत्पयःस्पर्शनात्पापा-नीव कुष्टानि यांत्यहो ॥ १४ ॥ यदंबाकुंभमुद्दंभं । तत्रासीत्सप्रभावमत् ॥ तदंभःसेवनाद्धात्या-दोषो याति सुदुस्तरः ॥ १५ ॥ अन्यैरपि स्वकुंभानि । देवैर्विदधिरे तदा ॥ येषां प्रभावसंसिद्धिं । देवा एव हि जानते ॥ १६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथाहमहमिकया । स्पर्धमानाः परस्परं ॥ अपूजयन्नेमिनाथं । देवाः शक्रयाहृतैः सुमैः ॥
॥ १७ ॥ सुस्नातो जरतः कुंडे । गजेंडपदनामनि ॥ विजृधौते वाससी च । नेमिनाथमपूज-
यत् ॥ १८ ॥ पूर्वोक्तेनैव विधिना । चक्री नीराजनां विजोः ॥ सभं मंगलदीपेनो–त्तारयामा-
स दक्षिणं ॥ १९ ॥ अमांतां हर्षसंपत्ति–मुद्गिरन्निव चक्रनृत् ॥ जिनांह्रौ दत्तदृष्टिः सन् ।
स्तोतुमेवमुपाक्रमत् ॥ २० ॥ श्रीशैवेय जयामेय–गुणरत्नमहोदधे ॥ जयापारकृपाधार । स्फा-
रसंसारतारक ॥ २१ ॥ श्रीमन्नेमिजिन स्वामिन् । सहजेनात्मतेजसा ॥ तमोमग्नं जवोद्वि-
ग्नं । मामुद्धर कृपापर ॥ २२ ॥ रागादयोऽरयो देव । ये पुरा निर्जितास्त्वया ॥ त एव त्वद्वि-
रोधेन । बाधंते मां त्वदाश्रयं ॥ २३ ॥ सर्वजावैकसामान्य–मौदासिन्यमिहाश्रयन् ॥ त्वं चे-
डुपेक्षसे तत्ते । कुतः सुस्वामिता मता ॥ २४ ॥ जदेति न मुदे याव–त्त्वन्मयं चिन्मयं महः
॥ स्वामिन्मोहतमस्ताव–च्चित्तांतर्जायतेंगिनां ॥ २५ ॥ संसारसागरस्यांत–र्मोहावर्त्ते गतः प्र-
जो ॥ कदा मात्त्वजवद्ध्यान–यानपात्रमहं श्रये ॥ २६ ॥ अहो मदोद्धतं चित्तं । सदाकृतक-
दाग्रहं ॥ तथा प्रसीद विश्वेश । यथा सीदति न क्वचित् ॥ २७ ॥ तृष्णया तरलं स्वामिन्



For Private And Personal Use Only

। विह्वलं स्मरतापतः ॥ शांतिमेति यदि स्वांतं । त्वद्ध्यानामृतमज्जनात् ॥ २८ ॥ जातु किं
जंतवो यांति । क्रोधक्रूराध्वना विज्ञो ॥ शमैकसारं त्वन्मार्गं । मार्गयेत यदि क्षणं ॥ २९ ॥
मधुना स्पर्द्धिनानेना–ध्वना ध्यानं धुनाति ते ॥ अनाहतेन नादेन । जिन कर्माणि योगिनां ॥
॥ ३० ॥ पार्थिव्यादिस्फुरत्पंच–पिंडस्थध्यानधारणाः ॥ अभ्यस्यंति तवाधीश । परज्ञानाय
योगिनः ॥ ३१ ॥ यथोपदेशं चक्रांत–रर्हद्बिंबादियोजनात् ॥ ध्यायंति त्वां महात्मानः । पद-
स्थध्यानसिद्धये ॥ ३२ ॥

रागद्वेषविनिर्मुक्तं । योगयुक्तं निराश्रयं ॥ निर्घातितस्फुरद्घाति–कर्माणं करुणापरं ॥३३॥
आत्मानं केवलालोक–लोकालोकावलोकिनं ॥ ध्यायेद्यस्त्वन्मयत्वेन । स स्याद्रूपस्थविन्मुनिः
॥ ३४ ॥ [illegible] ॥ नानाश्रुतिविचारं स्या–दैक्यश्रुतिविचारकं ॥ सूक्ष्मक्रियान्वितं चैव । समु-
च्छिन्नक्रियं तथा ॥ ३५ ॥ इति मत्वात्मसंवेदात् । शुक्लं ध्यानं चतुर्विधं ॥ योगिनो गतरूपं
त्वा–मंतः पश्यंति चिन्मयं ॥ ३६ ॥ [illegible] ॥ नानाध्यानैः पुरा देव । येन ध्यातोऽसि चेतसा
॥ क्रमेणात्मानमाविश्य । तन्मारयसि चारु तत् ॥ ३७ ॥ निराकारं निराधारं । निराहारं

निरंजनं ॥ विदंति परमार्थेन । देव त्वां तत्ववेदिनः ॥ ३८ ॥ अजिह्मपरमब्रह्म-मयस्तेजश्च-
यस्तव ॥ किं सर्वगोऽपि मे मोह-तमो हरति न प्रभो ॥३९॥ भवग्रीष्मभवस्ताप-व्यापः
स्यादेव देहिनां ॥ तदा यदा चिदानंद-चंद्रस्त्वमसि दूरग- ॥४०॥ शून्यता स्वपने देव । जा-
गरेऽनल्पकल्पनाः ॥ एतद्द्वयातिगं किंचि-द्वदंति त्वत्पदं बुधाः ॥ ४१ ॥ त्वयि ध्येये व्रजे-
द्ध्याता । ध्यानं च विलयं विभो ॥ अतो बहिर्मुखा लोका । विमुखास्तव चिंतने ॥ ४२ ॥
ये तु तत्वविदो देव । कल्पनातीतचेतसः ॥ ध्येयादित्रिकभेदांस्ते । न विदंपि मनागपि ॥४३॥
इदं ध्येयमिदं ध्यान-महं ध्यातेति धीर्भवेत् ॥ तेषां येषामुदासीन-पदासीनं मनो न हि ॥
॥ ४४ ॥ यस्त्यक्तकर्मा निःसंगो । नित्यतृप्तो निरंजनः ॥ सदानंदमयः स त्वं । त्वं स एवे-
ति मन्मतिः ॥४५॥ विपक्षे च स्वपक्षे च । मूर्खे चैव विचक्षणे ॥ दुःखे सुखे समस्वांता ।
नाथ त्वद्वेदिनो जनाः ॥ ४६ ॥ किं तेन तपसा तेन । श्रुतेन विनयेन वा ॥ जपेन तेन किं
येन । नाथ त्वं नोपलक्ष्यसे ॥ ४७ ॥ पापकर्मकृतोन्माथ । नाथ तत्कुरु येन मे ॥ स्वल्पी-
भवंति संकल्पा । विषयग्रहगोचराः ॥ ४८ ॥ परानंदहृदि मेऽस्तु । निमग्नस्य जगत्प्रभो ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वेद्यवेदकभेदैक—शून्यता त्वत्प्रसादतः ॥ ४९ ॥ नार्थयेऽन्यद्विभो किंचि—द्याचे त्वामेतदेव हि ॥ समुल्लसतु मच्चित्ते । त्वत्प्रसादात्परं महः ॥ ५० ॥ श्रोत्रपेयामृतं स्तोत्र—मेतद्यः सुकृती पठेत् ॥ त्रिकालं यादवाधीश । स भवेत्त्वत्स्वरूपवित् ॥ ५१ ॥ करोत्करो नभोरत्न—चंद्रसू-रिह दीप्यते ॥ यावत्तावत् क्षितौ देव । संस्तवस्तव नंदतात् ॥ [illegible] ॥

इति स्तुत्वा महीनाथो । नेमिनाथं मुदानमत् ॥ नामयन् कर्मसंभार—मपि सार्द्धं स्ववर्ष्मणा ॥ ५३ ॥ गुरुभक्तिपवित्रांग—स्ततो भरतभूपतिः ॥ ददावर्थिजने दानं । निदानं स्वर्गसंपदः ॥ ५४ ॥ बुभुजे सारमाहारं । परिवारयुतस्ततः ॥ षट्खंडभरताधीशो । निदद्रौ क्षणमेव च ॥ ५५ ॥ तमोरूपेयमिति तां । निद्रामिंद्रियमुद्रणां ॥ विवेकदीपस्तच्चित्ते । निरवासयदुल्लसन् ॥ ५६ ॥ किंचिन्मुकुलिते वीक्ष्य । नेत्रे कुवलये नृपः ॥ शुद्धांबुभिरसिंचच्च । ते वभूवतुरुद्यते ॥ ५७ ॥ अंतरंगस्फुरद्रंग—वर्णिकां दर्शयन्निव ॥ मुखरंगाय तांबूल—माददे वसुधाविभुः ॥ ५८ ॥ स ययौ दानशालायां । यन्नन् दारिद्र्यदंतिषु ॥ दानमर्थिष्वथो वादं । पाणिपंचास्यसंभवं ॥ ५९ ॥ वर्णैर्घनैश्चित्रयंतीं । रत्नजै रोदसीमपि ॥ शोभामद्रेरथापश्यत् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





चक्री चित्रकरीमिव ॥ ६० ॥ रसज्ञयैकया किंचित् । पार्यते वक्तुमस्य न ॥ इतीव शक्ति-
सिंहं स । तुष्ट्यं तद्वर्णने जगौ ॥ ६१ ॥ मेरुर्मे न मनोह्लादी । वंध्यो विंध्याचलः खलु ॥ मु-
धा हिमाद्रिः सध्रीची–त्नावं नास्य यतः श्रयेत् ॥ ६२ ॥ क्रीडाशैलो ह्ययं लक्ष्म्या । महा-
सिद्धिनिकेतनं ॥ रत्नानि रसकूप्यश्च । कल्पवृक्षा इहैव यत् ॥ ६३ ॥

अयंसमवसरण–श्रियं व्रजति सर्वतः ॥ मध्ये चैत्यद्रुसंकाशं । मुख्यं शृंगमिदं यतः ॥
॥ ६५ ॥ परितः पर्वता एते । व्रजंते शालमालतां ॥ चतुर्दिक्षु चतुर्द्वारा । ऊरन्निर्झरिणीध-
राः ॥ ६६ ॥ नित्यारीण्यपि सत्वानि । यद्वसंतीह मित्रवत् ॥ लिहंत्यन्योऽन्यमेतानि । मुक्त-
वैराणि चानिशं ॥ ६७ ॥ [redacted]कं ॥ पश्यतः पर्वतममुं । यन्मे चित्तं प्रमोदते ॥ जा-
ने ततस्तमोमुक्त–मेतदासीद्विशेषतः ॥ ६८ ॥ इत्युक्त्वा विरते चक्रि–ण्यवोचन्नामयन् शि-
रः ॥ शक्तिसिंहः प्रतिध्वानै–र्ध्वानयन् कंदरा अपि ॥ ६९ ॥ स्वामिन् शत्रुंजयगिरे–रैवता-
द्रिरयं जिनैः । कथितः पंचमं शृंगं । पंचमज्ञानदायकं ॥ ७० ॥ आद्ये धनुःशतं दुःख–माख्ये
तद्वद् द्वियोजनी ॥ दश तृतीये तुर्ये च । योजनान्यथ षोडश ॥ ७१ ॥ विंशतिः सुखमाख्ये



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तु । षष्ठे षट्त्रिंशतिस्तथा ॥ उत्सर्पिण्यामिदं मान—मुच्चत्वेऽरेषु च क्रमात् ॥ ७२ ॥ एतस्यै-
वावसर्पिण्यां । हीयते च तथैव हि ॥ तदयं शाश्वतः शैलः । सर्वपापहरः स्मृतः ॥ ७३ ॥
[illegible] ॥ कैलास उज्जयंतश्च । रैवतः स्वर्णपर्वतः ॥ गिरिनारनंदभद्रा—वस्यारेष्विति
चाभिधाः ॥ ७४ ॥ महातीर्थमिदं देव । दिव्यौषधिसमन्वितं ॥ कस्य न प्रीतिमाधत्ते । पुण्यै-
रपि फलैरपि ॥ ७५ ॥ जिना अनंता अत्रैयु—रेष्यंति च तथा परे ॥ सिषिधुः केऽपि मुनयो—
ऽपीदं तीर्थमतो महत् ॥ ७६ ॥ यदत्र रसकुंभानि । देवरत्नद्रुचित्रकाः ॥ भवत्रयसुखादान-मयं
रैवतकस्ततः ॥ ७७ ॥

अत्र निर्झरिणीनीर—सिक्ता उद्यानपादपाः ॥ शिक्षयेवास्य तीर्थस्य । सर्वर्त्तुषु फलंत्यमी
॥ ७८ ॥ श्रीदसिद्धिगिरी विद्या—धरो देवगिरिस्तथा ॥ एतेऽत्र पर्वता भांति । चत्वारः परितः
स्थिताः ॥ ७९ ॥ संवेष्ट्य रैवतममुं । महासिद्धिसुखप्रदं ॥ सुस्वामिनमिवाप्येते । सेवंते गि-
रयोऽन्वितः ॥ ८० ॥ ततो नद्यः प्रवर्त्तंत । बह्वयः पुण्या महाह्रदाः ॥ जिनस्नात्रार्थजलभृ-
त्—प्रभावोद्भावितोदयाः ॥ ८१ ॥ ऐंद्र्यां दिशि श्रीदसिद्धि—गिर्योरस्त्यंतरा नदी ॥ उदयंतीति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विख्याता । प्रक्रीमत्सुरसंचया ॥ ७२ ॥ नदयंती दक्षिणस्यां । हदिनी ह्रदराजिता ॥ घनप्रज्ञा-
वजननी । दुष्टदोषप्रमार्जनी ॥ ७३ ॥ वारुण्यां सुवर्णरेखा । सत्यार्थ्या विशदा नदी ॥ नद्य-
द्दह्यहदव्रात—संजातघनशुद्धिदा ॥ ७४ ॥ लुलत्कल्लोलकमलों—र्मीच्यां लोलेतिनिम्नगा ॥ इ-
यं दीनजनाऽदैन्य—करणी तीर्थसंगतः ॥ ७५ ॥ एताः पर्वतसंजाता । नद्यो हृद्यहदोज्ज्वलाः
॥ बह्वयोऽन्या अपि संत्यत्र । निर्झराणि तथा ह्रदाः ॥ ७६ ॥ अत्र विद्याधरा देवाः । किन्नरा
अप्सरोगणाः ॥ गुह्यकाश्च वसंत्युच्चैः । स्वस्वसिद्धिविधीच्छया ॥ ७७ ॥ कोऽयं गिरिर्विज्ञात्यग्रे ।
वायवीदिशमाश्रितः ॥ इत्युक्तो भरतेनाह । शक्तिसिंहः पुनर्गिरं ॥ ७८ ॥ स्वामिन् विद्या-
भृता पूर्वं । बरटेन कुमेधसा ॥ संसाध्य राक्षसीं विद्यां । चक्रेऽत्रैव निजा स्थितिः ॥ ७९ ॥
क्रूरेणाधिष्ठितः सोऽयं । स्वामिन् बरटरक्षसा ॥ महाद्रिरेष विख्यातो । नाम्ना तेनैव तत्स्वयं
॥८०॥ न मन्यतेऽसौ दुर्दांतो । रुद्रो रुद्रासुरैर्वृतः ॥ मदाज्ञां विद्यया व्योम—गामिन्या गगनंगमी
॥ ८१ ॥ देशोद्वेगकरः सोऽय—मित्याकर्ण्य क्रुधातुरः ॥ चक्री सुषेणमादिक्षत् । तज्जयाय वि-
मानगं ॥ ८२ ॥ चक्रिणः शासनं शीर्षे । धृत्वा सेनापतिस्ततः ॥ स चचाल विमानेन । वि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मानं प्रापयन् रविं ॥ ए३ ॥

समागतं सैन्यनाथं । बुध्ध्वा बरटकोऽसुरः ॥ युद्धाय समभूत्सद्यः । समं स बहुराक्षसैः ॥ ए४ ॥ क्षणं तैरसुरैः सार्द्धं । युध्ध्वा बध्ध्वाथ राक्षसं ॥ स्वविमानेऽक्षिपत्सेना–नाथोऽन्ये नेशुरुत्सुकाः ॥ एए ॥ सुषेणो जितकासीति । रैवते द्रुतमेत्य च ॥ चक्रिणः पादपीठाग्रे–ऽलोठयत्कुणपं रयात् ॥ए६ ॥ दीनं म्लानमुखं तीव्र–स्फुटद्बंधगलद्रसं ॥ दृष्ट्वाथ तं दयापूर्णः । शक्तिसिंहो जगाविति ॥ ए७ ॥ यज्जीववधकंदोऽय–मारोपि भवतासुर ॥ तत्पापद्रोः समारंभो–ऽयमासीन्नरके फलं ॥ ए८ ॥ त्यजस्यद्यापि चेज्जीव–हिंसामाज्ञां च मेऽधुना ॥ मन्यसेऽभयदानं त–न्मोचयामि न संशयः ॥एए॥ स्वशिरोऽलंकृतिं स्वामिन् । कर्त्तास्मि तव शासनं ॥ इत्युक्तियुक् स तद्रक्षो–ऽमोचयच्चक्रिणो नृपः ॥ ए०० ॥ रक्षोऽपि स्वगिरावादि–नाथस्य कारिष्टनेमिनोः ॥ प्रासादौ मेरुवत्तुंगा–वकार्षीद्दर्षवर्षणः ॥ १ ॥ तत्तटे तटिनीं चक्रे । पूर्वदिग्गामिनीं शुभ्रां ॥ शत्रुंजयनदीबद्ध–स्पर्द्धां तादृक्प्रभावतः ॥ २ ॥ यः स्वामिनमादिनाथं । नेमिनाथं नमोऽकरोत् ॥ तस्य कामं प्रदत्तेऽसौ । राक्षसः शुभ्रमानसः ॥ ३ ॥ तदादि तीर्थं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तज्जातं । नाम्ना कामदमित्यपि ॥ निःकामानां च यद्दत्ते । शिवश्रियमनुत्तरां ॥ ४ ॥ चक्री तमिति संस्थाप्य । राक्षसं तत्र पर्वते ॥ स्वयं नेमिजिनस्यार्चा–कृते प्रासादमाययौ ॥ ५ ॥ ततः पंचमकल्पेशो । ब्रह्मेंद्रोऽमरकोटिभिः ॥ श्रीनेमिचैत्ये भरत–कारिते समुपागमत् ॥६॥ नेमिपूजापरं भक्ति–भासुरं भरतेश्वरं ॥ जगौ स्नेहपरां वाणीं । ब्रह्मेंद्रोऽजिह्ममानसः ॥ ७ ॥ श्रीयुगादिजिनाधीश । सूनो भरतभूषण ॥ चक्रिन् चरमदेह त्वं । जयवान् भव शाश्वतः ॥ ॥ ८ ॥ यथा श्रीवृषभस्वामी । प्रथमस्तीर्थनायकः ॥ तथा त्वं प्रथमः संघ–पतिस्तीर्थप्रकाशकः ॥ ९ ॥ पूरयन् भुवनाभोगं । त्वद्यशःक्षीरसागरः ॥ अस्मानपि स्वकल्लोलै–र्वीणितुं त्वरयत्यहो ॥ १० ॥ गिरिशत्रुंजये तीर्थं । त्वया तु प्रकटीकृतं ॥ घनाघनं पुरो वात । इव विश्वोपकारिणं ॥ ११ ॥ उज्जयंते नगे नेमि–नाथस्य नवमंदिरं ॥ यदकारि विशेषेण । तन्मान्योऽसि मम ध्रुवं ॥ १२ ॥

शृणु पूर्वमतीताया–मुत्सर्पिण्यां तदोद्भवः ॥ सागरार्हन्मुखांभोजा–द्ब्रह्मशक्रोऽश्रुणोदिति ॥ १३ ॥ द्वाविंशस्यावसर्पिण्यां । भाविनो नेमिनोऽर्हतः ॥ गणभृत्पदमासाद्य । भवान्



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निर्वृत्तिमेष्यसि ॥ १४ ॥ स तदा प्रमुदाधारः । स्वकल्पे नेमिनोऽद्भुतां ॥ व्यधान्मूर्त्तिं तदाद्य-
न्यै-रस्माभिरपि सार्च्यते ॥ १५ ॥ कल्याणत्रयमत्रैव । जानंतो भाविनेमिनः ॥ पूर्वापरानु-
क्रमतो-ऽप्यागच्छामः सदा वयं ॥ १६ ॥ सर्वेऽपि वयमार्हत्या । विशेषान्नेमिसेवकाः ॥ अर्ह-
त्सूनुर्भवान् चक्री । दृष्टोऽस्त्यत्र सुमंगलं ॥ १७ ॥ इत्यालाप्य चक्रपाणिं । नत्वा नेमिं च
भक्तितः ॥ ब्रह्मेंद्रः संघमाराध्य । पुनः स्वं कल्पमासदत् ॥ १८ ॥ आपृच्छ्य भरतं प्रीत्या ।
सौधर्मपतिरप्यगात् ॥ संस्मरंस्तद्गुणांस्तीर्थ-मपि सोऽत्यर्थवासनः ॥ १९ ॥ तीर्थमुद्धृत्य
भरतो-ऽपीत्थमानर्च्य चोच्चकैः ॥ इंद्रोत्सवादिकं कृत्वा । मुदाभूद्दानदित्सुकः ॥ २० ॥ तदा
यत्प्रददौ दानं । याचकेभ्यो जगद्विभुः ॥ विना नवनिधीन् नान्य-स्तत्पूरयितुमीश्वरः ॥ २१ ॥
अथोत्ततार मासांते । चक्री सुरनरैर्वृतः ॥ रंगात् स्वर्णगिरेः शृंगा-त्तत्र मुक्त्वा च मानसं ॥
॥ २२ ॥ प्रणमन् पुरतो भूत्वा । योजितांजलिसंपुटः ॥ व्यजिज्ञपत् शक्तिसिंह-श्चक्रिणं वि-
नयादिति ॥ २३ ॥ स्वामिन् स्वकिंकरस्याद्य । विज्ञप्तिमवधारय ॥ श्रीमद्गिरिदुर्गमिति । पु-
रमेतत्पवित्रय ॥ २४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्याग्रहवशात्तस्य । चक्री तत्पुरमाविशत् ॥ नानालोककुलाकीर्ण-मृद्ध्या स्वर्गपुरोपमं ॥ २५ ॥ प्रासादे तत्पुरस्यांत-रर्चयद् वृषभं जिनं ॥ अष्टाह्निकां च चक्रीश-श्चक्रे भ्रातृव्यभक्तितः ॥ २६ ॥ वहिरंतररिव्रातं । युगपज्जेतुमुद्यतः ॥ चतुरंगचमूसंघ-वृतः प्रस्थितवान् नृपः ॥ २७ ॥ गजानां बृंहितैर्वाजि-हेषितैरथचीत्कृतैः ॥ सिंहनादैश्च वीराणां । शब्दाद्वैतमभूत्तदा ॥ २८ ॥ अपारैः सैन्यसंभारै-श्चलिते चक्रिणि स्फुटं ॥ क्षुभ्यंत्या धारणा मह्या-स्तदाभूवन् महीधराः ॥ २९ ॥ व्यावृत्य कंधराबंधं । पथि चक्री व्रजन्नपि ॥ पश्यतिस्म रैवताद्रिं । लोलमौलिः स्तुवन्निति ॥ ३० ॥ मेरुरोहणवैताढ्य-सारैरेष विनिर्मितः ॥ पर्वतः सर्वतो हेम—रत्नरूप्यमयोऽस्ति यत् ॥ ३१ ॥ अस्य शृंगाग्रसंजाग्रत्-कल्पवृक्षा यदर्थिषु ॥ कल्पितं ददते दान-मस्यैव महिमा स हि ॥ ३२ ॥ सुराष्ट्रेत्यस्य राष्ट्रस्य । युक्तं नाम परस्य न॥ शत्रुंजयोज्जयंतादि-तीर्थान्यत्रैव यत्परं ॥ ३३ ॥ अत्र पर्वतनद्योऽपि । वृक्षाः कुंभानि भूमयः ॥ अन्यत्रैकतीर्थमिव । सर्वं तीर्थत्वमिच्छति ॥ ३४ ॥ देशानामुत्तमो देश-स्तीर्थं तीर्थेषु चोत्तमं ॥ सुराष्ट्रा शरणायात-परित्राणप्रभूरिव ॥ ३५ ॥ षट्खंडमेदिनीमध्ये । सदा सर्वर्तुशोभितः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ सुराष्ट्रायाः समो देशः । सर्वतीर्थमयो न हि ॥ ३६ ॥ निर्धना ये सुराष्ट्रायां । निःपुण्या-
श्च स्वकर्मतः ॥ तेषां भवत्रयं मन्ये । निःफलं दुःखभाजिनां ॥ ३७ ॥ ये सुराष्ट्रावासिनोऽ-
पि । परराष्ट्रकृतस्पृहाः ॥ ते तु संत्यज्य कल्पद्रुं । धत्तूरककृताग्रहाः ॥ ३८ ॥ हत्यादिदोषै-
र्निर्मुक्ता । न ये देशेऽत्र मानवाः ॥ शुद्ध्यंति ते कथं त्वन्य–तीर्थेषु तपसापि हि ॥ ३९ ॥
न दुर्भिक्षभयं ह्यत्र । न देशे पापसंचयः ॥ न कूटबुद्धिर्न द्रोहः । सार्जवः सकलो जनः ॥
॥ ४० ॥ उच्चरन्निति भूनाथो । विधायाथ प्रदक्षिणां ॥ शत्रुंजयं दिनैः कैश्चि–दानंदपुरमाप्तवा-
न् ॥ ४१ ॥ अथाहूय शक्तिसिंहं । पार्श्वे समुपावेशयत् ॥ चक्री तस्य च नम्रस्य । पृष्ठे पा-
णिमदान्मुदा ॥ ४२ ॥ उवाच च त्वया वत्स । स्थेयमत्र मदाज्ञया ॥ कुर्याः साम्राज्यमाप-
न्नो । रक्षां तीर्थद्वयस्य च ॥ ४३ ॥ पावित्र्यात्तीर्थभूतायाः । सुराष्ट्रायास्त्वमीश्वरः ॥ यदन्ये-
भ्योऽपि धन्यस्तत् । पूज्यः शेषैर्नृपैरसि ॥ ४४ ॥ शत्रुंजयं सेवसे यत् । तत् तातं हि निषे-
वसे ॥ तातेनाधिष्ठितं यच्च । तत्तीर्थं तातसन्निभं ॥ ४५ ॥ इत्युदीर्य ददौ तस्मै । छत्रद्वयमि-
लापतिः ॥ तीर्थद्वयस्य शास्ताय–मित्यभिज्ञानकारणं ॥ ४६ ॥ हारादिभिरलंकारै–र्गजवा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जिरथैर्घनैः ॥ रत्नैर्द्रव्यैः स सन्मान्य । शक्तिसिंहं व्यसर्जयत् ॥ ४७ ॥ शक्तिसिंहोऽपि पुण्या-
नु–बंधिपुण्यं प्रकाशयन् ॥ सुराष्ट्रावासिनो लोकान् । पातिस्माराधयन् जिनं ॥ ४८ ॥

ततोऽर्बुदगिरौ गत्वा । भवभूतभविष्यतां ॥ प्रासादानर्हतां चक्री । गुर्वाज्ञाभिरचीकर-
त् ॥ ४९ ॥ सर्वत्र भरतश्चक्री । भ्रातृव्यान् प्राप्य हर्षितः ॥ समागतान् स्वस्वदेशा–द्दानैर-
प्रीणयद् घनं ॥ ५० ॥ प्रयाणैरनवच्छिन्नै–स्ततः स पथि संचरन् ॥ नमस्यन् सर्वतीर्थानि ।
स्थाने स्थाने कृतोत्सवं ॥ ५१ ॥ उद्धरन् दीनसंघातं । पूजयंश्च मुनीनपि ॥ आशिषः सर्वतो
गृह्णन् । मगधं देशमासदत् ॥ ५२ ॥ [redacted] ॥ तत्रापि मागधो नाम्ना । भ्रातृव्यो मगधांगजः
॥ चक्रिणः सन्मुखमगा–दुत्सवैः सर्वऋद्धिभिः ॥ ५३ ॥ भरतोऽपि निजस्याग्रे । तमध्यारो-
हयन्नतं ॥ वारणे भास्कर इवा–रुणं स्वरथमंदिरे ॥ ५४ ॥ नद्धसन्मंगलाराव–मुखरं प्रोच्च-
लध्वजं ॥ स विवेश विशामीशः । पुरं राजगृहं ततः ॥ ५५ ॥ प्रतिगृह्याथ तस्यैवं । सत्क्रि-
यां भोजनादिकां ॥ चक्री वैभारकगिरौ । तीर्थयात्रार्थमुद्ययौ ॥ ५६ ॥ तत्राप्यसौ वर्द्धकिना
। महावीरस्य मंदिरं ॥ भाविनः कारयामास । शत्रुंजयगिराविव ॥ ५७ ॥ शत्रुंजयोज्जयंता-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ख्ये । सम्मेताख्ये च सानुनि ॥ वैभारस्याभवंस्तत्र । प्रासादाः श्रीमदर्हतां ॥५८॥ तीर्थं तत्रापि संस्थाप्य । चक्रीत्थं सर्वपापहृत् ॥ पूजनोत्सवदानाद्यं । पूर्ववन्निरमापयत् ॥ ५९ ॥ चक्रिशक्रश्रियो नित्यं । किंकर्यः स्युर्गृहांगणे ॥ मुक्तिसौख्यं न दूरेऽपि । वैभारगिरियायिनां ॥ ६० ॥ ऋणाद्यनर्थहरणं । तरणं भववारिधेः ॥ वैभारगिरितीर्थं तद् । बहुतीर्थफलप्रदं ॥ ॥ ६१ ॥ विधाय कृत्यमखिलं । योग्यं संघपतिरिति ॥ व्यसर्जयन्मागधेशं । चक्री मार्गानुयायिनं ॥ ६२ ॥ कुर्वन् प्रयाणं भरतः । समं संघसुरासुरैः ॥ दिनैः कैश्चिदथ प्राप । सम्मेतशिखरं महत् ॥ ६३ ॥ तत्रापि विंशतेस्तीर्थ–कृतां प्रासादपंक्तयः ॥ आदेशाच्चक्रिणोऽभूवन् । कृता वर्द्धकिना क्षणात् ॥ ६४ ॥ पूर्ववत्पूजयित्वा च । जिनान् गणधरान् मुनीन् ॥ वांछानुगतमर्थिभ्यो । ददौ दानं धराधिपः ॥ ६५ ॥ सम्मेतशिखरं तीर्थं । सर्वकल्मषभेदकं ॥ एकदा पूजितं यच्च । पदं दत्ते परात्परं ॥ ६६ ॥ तत्राष्टौ दिवसान् स्थित्वा । पवित्रेऽहनि चक्रभृत् ॥ पुरीं निजामभिस्मृत्य । चचालाचलसद्बलः ॥ ६७ ॥ दिनैः कतिपयैरेवं । संसरन् भरताधिपः ॥ अयोध्यासविधोद्यानं । प्राप नंदनसन्निभं ॥ ६८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततः सूर्ययशाः श्रुत्वा । प्राप्तं श्रीभरताधिपं ॥ धावन् हर्षेण जंघाला-नप्यलंघयदुच्चकैः
॥ ६९ ॥ लुलोठ चक्रिणः पाद-तलेऽसौ दर्शनादपि ॥ उत्थाप्य सोऽपि तमथा-श्लिष्यत्सानं-
दनंदनं ॥ ७० ॥ कांश्चित्स्मृत्या च वाचा च । कांश्चिदालोकनेन च ॥ श्रीसूर्ययशसमनु-सो-
ऽभ्यनंदत् पुरीजनान् ॥ ७१ ॥ पुरांतश्चंदनघन-काश्मिरजघनच्छटाः ॥ ववृषुश्चत्वरस्यांत—
स्ततोऽपि कुसुमोत्कराः ॥ ७२ ॥ उच्छूयंति प्रतिगृहं । रंभास्तंभाः फलोज्ज्वलाः ॥ तोरणा-
न्यप्यबध्यंत । कल्पद्रुमदलैः कलैः ॥ ७३ ॥ शातकुंभभवाः कुंभा । अशुभन् सौधमूर्द्धसु ॥
निधयोऽधिकरूपाढ्याः । प्राप्ता इव निजं विभुं ॥ ७४ ॥ चंद्रमंडलसंकाशै-रादर्शैः कुट्टिमाश्र-
यैः ॥ विनीता स्वपतिं चक्षुः-सहस्रैः पश्यतिस्म किं ॥ ७५ ॥ उल्लोचैर्मंचवृंदांबु-यंत्रैश्चि-
त्रकरैर्घनं ॥ स्वःपुरीव विनीताऽभूत् । तदा श्रीभरतागमे ॥ ७६ ॥ कुंभिरत्नमथो चक्री । पू-
र्वाचलमिवार्यमा ॥ आरुरोह बहूत्साह-श्चंद्रतप्रभाभरं ॥ ७७ ॥ पूर्णेंदुमंडलनिभं । छत्रं
मूर्ध्नि व्यराजत ॥ चक्रिणो मूर्त्तिमान् पुण्य-प्ररोह इव विस्फुरन् ॥ ७८ ॥ गंगातरंगविशदे ।
चामरे रेजतुश्चले ॥ तस्यास्यचंद्रसेवायै । चकोराविव संगतौ ॥ ७९ ॥ भट्टैर्जयजयाराव—



For Private And Personal Use Only

मुच्चरद्भिः पुरो गतैः ॥ गायद्भिर्गायनैर्ग्राम–रागरंगपवित्रितं ॥ ८० ॥ नृत्यकारिणीभिर्धवलान् । कुलस्त्रीभिश्च पृष्ठतः ॥ गणन्नृद्भिः पुरस्ताच्च । संगतः सुकृतैरिव ॥ ८१ ॥ अनुव्रजन् सर्वशोभा–संगतं देवतालयं ॥ प्रविवेश पुरीं चक्री । समं संघसुरासुरैः ॥ ८२ ॥ [redacted] ॥ पुरांतर्मुख्यचैत्येषु । नत्वा श्रीप्रथमं प्रभुं ॥ नृपेशोऽगान्निजावासं । प्रणिधाय गुरूनपि ॥८३॥ आत्मादेहमिवेंदुरभ्रमिव वार्मेघं यथा स्वःपतिः । स्वर्गं यद्वदहर्नभोमणिरिव स्वर्णं कवित्वं यथा ॥ चैत्यं देव इवोज्ज्वलं परिमलः पुष्पं यथा सद्गुणः । कुद्यं वा भरतः कृतोत्सवमसौ प्रासादमाशिश्रियत् ॥ ८४ ॥ यक्षास्ते क्षितिनायकाश्च खचराः श्रेष्ट्यादयश्चापरे ॥ सौधोत्संगगचंद्ररत्नकिरणस्फुर्जन्मुखेंदूज्ज्वलं ॥ हाराधारसुमौक्तिकोडुकलितं तं चक्रपाणिं मुदा । नेमुः क्षेमकृते निजस्य नितरां शक्रं सुरौघा इव ॥ ८५ ॥

॥ इत्याचार्यश्रीधनेश्वरसूरिविरचिते महातीर्थश्रीशत्रुंजयमाहात्म्ये
श्रीभरततीर्थयात्रातीर्थोद्धारवर्णनो नाम पंचमः सर्गः
समाप्तः ॥ श्रीरस्तु ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## षष्ठः सर्गः प्रारभ्यते

योऽनंतोऽव्यक्तमूर्तिर्जगदखिलभवभावविद्भूतार्थमुक्तः । सर्वज्ञः सर्वदर्शी सकलजननतः संस्तुतः साधुसंघैः ॥ अक्षीणः क्षीणकर्मा वचनपथमतिक्रम्य यो दूरवर्त्ती । स श्रीमानादिनाथस्तव दिशतु सदा मंगलं पुण्यलभ्यः ॥ १ ॥ कर्णामृतमथो शक्रा–कर्णयास्यैव चक्रिणः ॥ चरितं चारु निर्वाण–समारोहणसंगतं ॥ २ ॥ अथ सोमयशोमुख्यान् । सत्कृतान् देशदानतः ॥ कथंचिद्भरतश्चक्री । विससर्ज सुवत्सलः ॥ ३ ॥ सन्मान्य सकलं संघं । भोजनाच्छादनादिभिः ॥ स्वीचकार महीभारं । भुजाभ्यां भरताधिपः ॥ ४ ॥ विहरन् भगवानष्टा–पदाद्रौ समवासरत् ॥ ज्ञात्वोद्यानपतेश्चक्री । विवंदिषुरथागमत् ॥ ५ ॥ श्रीसर्वज्ञमुखांभोजात् । श्रुत्वा दानफलं महत् ॥ जगाद चक्री मद्दानं । गृह्णंतु श्रमणा अमी ॥ ६ ॥ मुनीनां राजपिंडो न । निरवद्योऽपि कल्पते ॥ कृतं तदर्थापनया–प्युवाचेति जगद्गुरुः ॥ ७ ॥ जगौ पुनर्महीनेता । स्वामिन् पात्रं महान् मुनिः ॥ यदेतस्यापि नो दानं । कल्पते तत् क-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रोमि किं ॥ ८ ॥ व्याजहार ततः शक्रो । गुणोत्तरवतां ननु ॥ साधर्मिकाणां श्राद्धानां । दे-
हि दानं महीश्वर ॥ ९ ॥ संक्रंदनोक्तं नाथेना—ऽप्रतिषिद्धं निशम्य तत् ॥ प्रासायेोध्यः स ता-
न् भक्त्या । भोजयामास नित्यशः ॥ १० ॥ मुग्धत्वाद्बहुशः प्राप्तान् । वीक्ष्य सूदा जगुर्नृपं
॥ श्राद्धश्राद्धविचारो हि । स्वामिन्नास्माभिराप्यते ॥ ११ ॥ श्रुत्वेति चक्री श्राद्धानां । कंठे
रेखात्रयं व्यधात् ॥ रत्नत्रयस्य काकिण्या—ऽभिज्ञानं दक्षिणोत्तरं ॥ १२ ॥ जितो भवान् वर्त्तते
भी—स्ततो मा हन मा हन ॥ इति प्रतिप्रातरेव । चक्री तान् स्वमवीवदत् ॥ १३ ॥ तदाक-
र्ण्य विचारेणा—मुंचच्चक्री प्रमादतां ॥ रेखात्रयांकास्ते जग्मु—र्माहनाख्यां च भूतले ॥ १४ ॥
अर्हद्यतिश्राद्धधर्म—गुणराशिकरंबितां ॥ चक्रवर्त्ती श्रावकांस्तां—श्चतुर्वेदीमपाठयत् ॥ १५ ॥
धर्म इव भगवतो । भरतादप्ययं क्रमः ॥ सधर्मवत्सलत्वाख्यो । ववृते तत्प्रभृत्यपि ॥ १६ ॥

इतश्च वृषभस्वामी । विहरन् वसुधातलं ॥ चतुर्विधस्य संघस्य । स्थापनामित्यपूरयत्
॥ १७ ॥ पंचाशीतिसहस्राणि । लक्षं सार्द्धशतानि षट् ॥ परिवारेऽभवन् सर्वे । मुनयस्त्रिज-
गद्गुरोः ॥ १८ ॥ लक्षत्रयं तु साध्वीनां । श्राद्धा लक्षत्रयं तथा ॥ सपंचाशत्सहस्रं च । शु-

For Private And Personal Use Only

त्सम्यक्त्वशालिनः ॥ १९ ॥ श्राद्धीलक्षाः पंच सार्धा-श्चतुःसहस्रसंयुताः ॥ प्रभोराकेवलो-
त्पत्ते-रजायंत स्वबोधिताः ॥ २० ॥ युग्मं ॥ पालयित्वा व्रतात्पूर्व-लक्षं त्रिजगतां गुरुः ॥
जानन् स्वमोक्षकालं स । प्रापाष्टापदपर्वतं ॥ २१ ॥ तत्र शुद्धप्रदेशेऽसौ । सहस्रैर्दशभिः स-
मं ॥ मुनिभिर्जगतामीशो-ऽनशनं प्रत्यपद्यत ॥ २२ ॥ अथोद्यानपतिः शीघ्रं । गत्वा भरत-
भूभुजे ॥ तत्सर्वं कथयामास । रुद्धकंठोऽस्फुटाक्षरं ॥ २३ ॥ भरतोऽपि तथावस्थं । विभुमा-
कर्ण्य दुःखितः ॥ विना यानपरीवारौ । पादाभ्यामचलद् द्रुतं ॥ २४ ॥ पृष्टानुधाविनां दूर-
मपि मुंचन्महीधवः ॥ वर्षन्नश्रूणि निर्भृतं । कंटकाद्यैरपीडितः ॥ २५ ॥ तथावस्थांगनावर्ग-
सहितः शोकसंगतः ॥ सहसाष्टापदं शैल-मारुरोहोच्चवेश्मवत् ॥ २६ ॥ युग्मं ॥ पर्यंकास-
नसंस्थानं । रुद्धसर्वेंद्रियाश्रवं ॥ प्रभुमालोक्य भरतो-ऽनमदश्रुजलप्लुतः ॥ २७ ॥ स्वर्नाथा
अप्यथाभ्येयुः । सर्वेऽपि चलितासनाः ॥ प्रदक्षिणीकृत्य विभुं । नेमुश्चोच्चशुचाकुलाः ॥२८॥
एकोनाया नवत्यां च । शेषपक्षेषु सत्वथ ॥ सुखमदुःखमारस्या-वसर्पिण्यां जगद्गुरुः ॥
॥ २९ ॥ माघकृष्णत्रयोदश्यां । पूर्वाह्णेऽभीचिगे विधौ ॥ पर्यंकासनगः स्थूल-कायवाक्चि-

॥३४९॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तयोगमुक् ॥ ३०॥ सूक्ष्मेण काययोगेन । रुध्ध्वा योगं च बादरं ॥ सूक्ष्मक्रियं नाम शुक्ल-
ध्यानमाप तृतीयकं ॥ ३१ ॥ [redacted] ॥ अथ सूक्ष्मतनूयोग-मप्योच्छिन्नक्रियं तथा ॥
तुर्यमासाद्य सद्ध्यानं । विभुर्लोकाग्रमासदत् ॥ ३२ ॥ बाहुबल्याद्यस्तेऽपि । ध्यानांतरमनु-
श्रिताः ॥ मुनयो विधिवत्प्रापुः । क्षणेन पदमव्ययं ॥ ३३ ॥ नारकाणामपि सुखं । तदोद्यो-
तो जगत्त्रये ॥ बभूव स्वामिनिर्वाण-कल्याणादचिरेण च ॥ ३४ ॥ पंचत्वात् पंचमीं प्राप्तं ।
गतिं वीक्ष्य विभुं नृपः ॥ अपारदुःखसंभारा-न्मूर्छितो न्यपतत् क्षितौ ॥ ३५ ॥ तातो जग-
त्त्रयत्राता । बाहुबल्यादयोऽनुजाः ॥ स्वसारौ ब्राह्मीसुंदर्यौ । पुंडरीकादयः सुताः ॥ ३६ ॥
श्रेयांसाद्याश्च नप्तारो । हत्वा कर्मद्विषोऽखिलान् ॥ ययुर्लोकाग्रमद्यापि । जीवामि प्रियजी-
वितः ॥ ३७ ॥

इत्याक्रंदपरं भूपं । दृष्ट्वा संक्रंदनः शुचा ॥ चकार रुदितं तत्र । संक्रंदनमभूत्ततः ॥३८॥
[redacted] ॥ अनुसंक्रंदनं चान्ये । चक्रंदुस्त्रिदिवौकसः ॥ तद्वीक्ष्य भरतोऽप्यासी-दुच्चै
रोदनकर्मणि ॥ ३९ ॥ शोकग्रंथिविभेदाय । पूर्वादृष्टस्तदाप्ययं ॥ रोदनव्यवहारोऽभू-ल्लोकेह-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





न्नेत्रशोधनः ॥ ३९ ॥ तस्योच्चैरोदनैरासी—द्वेदस्यपि शुचाकुला ॥ स्फुटच्चेलगलत्कञ्ज—शैला त-
न्निर्ऊराश्रुमत् ॥ ४० ॥ इत्याक्रांतं शुचा सम्यक्। मुमुर्षुमिव न्नृपतिं ॥ वीक्ष्येंद्रस्तद्विबोधाय
। जगाविति पवित्रगीः ॥ ४१ ॥ चक्रीश त्रिजगत्स्वामि—सूनो सहजधीरतां ॥ परित्यज्याङ्ग
इव किं । रोदिष्येवं शुचेरितः ॥ ४२॥ यः स्वामी जगदाधारो । जगतः स्थितिकारकः ॥ ज-
गन्नमस्यो यः शश्व—च्छोचनीयः कथं स हि ॥ ४३ ॥ निष्ठितानन्यकार्याणां । त्यक्तबंधनक-
र्मणां ॥ मुमुक्षूणां विशेषेणा—क्षीणोऽयं हि महोत्सवः ॥ ४४ ॥ हर्षशोकाविमौ स्वार्थ—घा-
तकौ पातकोचितौ ॥ परित्यज्य निजं धैर्यं । पुनरर्जय धीधन ॥ ४५ ॥ इत्याश्वास्य चक्र-
पाणिं । शक्रः स्वाम्यंगहेतवे । गोशीर्षचंदनैधांसि । तैरासानाययां सुरैः ॥ ४६ ॥ चितामैं-
द्यां जिनस्यार्थे । वृत्तामिक्ष्वाकुजन्मिनां ॥ त्र्यस्रां याम्यां परेषां च । चतुरस्रां व्यधुः सुराः
॥ ४७ ॥ क्षीरांत्नोधिजलैः स्वामि—देहं संस्नाप्य वासवः ॥ संन्नूष्य वस्त्राज्ञरणै—श्चिक्षेप शि- ॥३५१॥
बिकांतरा ॥ ४८ ॥ ईक्ष्वाकूणां शरीराणि । तथा कृत्वा सुराः परे ॥ परेषां च शिबिकायां ।
न्यधुर्न्नत्त्यानगारिणां ॥ ४९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वाद्यमानेषु वाद्येषु । क्षिप्तपुष्पेषु केषुचित् ॥ गायत्सूच्चैश्च नृत्यत्सु । चितास्वंगानि चिक्षिपुः ॥ ५० ॥ अग्निवायुकुमारा द्राक् । ततस्तानि वपूंष्यथ ॥ ज्वालयामासुरंभोदा–श्चास्थिशेषाण्यधारयन् ॥ ५१ ॥ दंतास्थीनि सुराः सर्वे–ऽप्यर्चितुं स्वस्वसंसदि ॥ जगृहुस्ते यथायोग्यं । परेषां च विभोरपि ॥ ५२ ॥ मार्गितः श्रावका देवै–र्दत्तकुंडत्रयाग्नयः ॥ ततः प्रभृत्यभूवंस्ते । ब्राह्मणा अग्निहोत्रिणः ॥ ५३ ॥ कैश्चित्तद्भस्म संप्राप्य । वंदितं भक्तितो नरैः ॥ क्रमात्ते तापसा जाता । भस्मभूषितविग्रहाः ॥ ५४ ॥ अथ तत्र चितास्थाने । कृत्वा स्तूपत्रयं महत् ॥ द्वीपे नंदीश्वरे चक्रु–रष्टाह्नीं वासवा मुदा ॥ ५५ ॥ ततः स्वस्वपदं प्राप्य । स्मरंतो हृदये जिनं ॥ विभोरस्थीनि चानर्चुः । सुराः प्रत्यूहशांतये ॥ ५६ ॥ इतश्च भरतस्तत्र । चितासन्नमहीतले ॥ अकारयद्वर्द्धकिना । प्रासादं जगदीशितुः ॥ ५७ ॥ गव्यूतित्रयमुच्चस्य । योजनायामशालिनः ॥ चत्वारि तस्य चैत्यस्य । द्वाराण्यासन् सुतोरणैः ॥ ५८ ॥ स्वर्गमंडपसंकाशा । मंडपास्तत्पुरोऽभवन् ॥ तदंतः पीठिका देव–च्छंदिका वेदिकास्तथा ॥ ॥ ५९ ॥ नित्यार्हत्प्रतिमा रत्न–मय्योऽप्यासन् सुपीठिकाः ॥ प्रातिहार्याष्टकश्लिष्टा–श्चतस्रो-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽज्ञासनस्थिताः ॥ ६० ॥ स्वस्वमानांकवर्णाढ्या—श्चतुर्विंशतिरर्हतां ॥ देवछंदेऽत्रवंस्तत्र । मू-
र्त्तयो मणिरत्नजाः ॥ ६१ ॥ छत्रत्रयं तदुपरि । प्रत्येकमपि चामरे ॥ यक्षा आराधकाश्चान्ये ।
जज्ञिरे किंनरा ध्वजाः ॥ ६२ ॥ बंधूनां पूर्वजानां च । भगिन्योरपि भावतः ॥ मूर्त्तीरकारय-
च्चक्री । भक्तिप्रह्वां निजामपि ॥ ६३ ॥ चैत्यात्परितश्चैत्य—द्रुमाः कल्पद्रुमा अपि ॥ सरांसि
दीर्घिका वाप्यो । मठाश्चासन्महोन्नताः ॥ ६४ ॥ चैत्याद्बहिः स्तूपमेकं । विभोरुच्चमकारयत्
॥ बंधूनामपि चान्येषां । तत्पुरो मणिसंचयैः ॥ ६५ ॥ परितो लोहपुरुषा । दुर्भेद्या भूचरो-
च्चयैः ॥ अधिष्ठातृसुराश्चासन् । तत्र श्रीभरताज्ञया ॥ ६६ ॥ एवं सिंहनिषद्याख्यं । प्रासादं
विधिवन्नृपः ॥ काराप्याथ यतिव्रातैः । प्रत्यतिष्ठिपदुत्सवात् ॥६७॥ ततः शुचिः श्वेतवासाः ।
प्रासादांतर्विवेश सः ॥ कृत्वा नैषेधिकीं चक्री । त्रिःप्रादक्षिणयच्च तं ॥६८॥ प्रतिमास्ता ज-
लैः पुण्यैः । संस्नाप्य भरतेश्वरः ॥ ममार्ज मृदुवासोभी—रविमुत्तेजयन्निव ॥ ६९॥ सुगंधी-
भूतसज्ज्योत्स्ना—निचयैरिव चंदनैः ॥ लिलेप ताश्चक्रवर्त्ती । यशोभिरिव मेदिनीं ॥ ७० ॥ त-
तः सुगंधिभिश्चित्रै—र्भक्त्यानर्च स ताः सुमैः ॥ ददाह धूपं कस्तूरी—वल्लरी रचयन्निव ॥७१॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथापसृत्य पुरतो । मणिपीठेऽष्टमंगलीं ॥ लिलेख तंडुलैः शुद्धैः। फलालिं चामुचत्ततः ॥७१॥
ततो मंगलदीपेन । सममारात्रिकं व्यधात् ॥ सर्वतोऽपि तमःसंघं । दीपज्ञानिर्हरन्निव ॥७३॥
अथ जक्तिजरेणोच्चै-रुल्लसल्लोमजांचितं ॥ हर्षाश्रुमुक्तावाक्सूत्रं । हारमेवमकल्पयत् ॥७४॥
स्वामिंस्त्रिजगदाधार । धर्मोद्धारधरामिमां ॥ मुक्त्वा स्वःश्वभ्रयोः सीमां । लोकाग्रं दुर्गमं ग-
तः ॥ ७५ ॥ त्रिलोकीं यद्यपि स्वामिं-स्त्यक्त्वाशु गतवानसि ॥ सा तथापि बलाच्चित्ते । ज-
वंतं ध्यास्यति स्फुटं ॥ ७६ ॥ चेद्ध्यानरज्जुमालंब्य । मादृशा दूरगा अपि ॥ त्वदीयसंनिधा-
वेव । तत् कथं प्रथमं गतः ॥ ७७ ॥ सहसैव यथा मुक्त्वा । निःशरण्यानिहैव नः ॥ या-
तोऽसि तद्धन्मायासी-श्चित्ताद्यावत्त्वदंतिके ॥ ७८ ॥ इत्यसावादिनाथं तं। स्तुत्वा नत्वा परा-
नपि ॥ अर्हतो जरतो जक्त्या-ऽस्तवीन्नयोक्तियुक्तिजिः ॥ ७९ ॥

अथ कालोत्थसत्वेज्यो । मनुष्येज्योऽत्र रक्षजे ॥ जूयान्माशातनेत्येषो-ऽछिनद्गिरिजृ-
गूनज्जि ॥ ८० ॥ योजनांते योजनांते । दंडरत्नेन चक्रिराट् ॥ चकाराष्टौ पदान्यस्मात् । ख्या-
तः सोऽष्टापदो गिरिः ॥ ८१ ॥ विधाय कृत्यमित्येषो । देहशेषः स दुःखजृत् ॥ मुक्त्वा तत्र



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मनः शैला–दुत्ततार धराधवः ॥ ७२ ॥ सशोकजनमुक्ताश्रु–विरजस्कां सृजन् महीं ॥ विर-
जाः स महीनाथो । विनीतामासदत्क्रमात् ॥ ७३ ॥ न रेमे तन्मतिर्गीते । नोदात्ते कविता-
रसे ॥ नाभिरामासु रामासु । दीर्घिकास्वप्यदीर्घिका ॥ ७४ ॥ नानंदो नंदनेष्वस्य । नंदने-
ऽपि न चंदने ॥ मनोहारिणि नोहारे । नाहारे न च वारिणि ॥ ७५ ॥ आसने शयने याने ।
वित्ते कृत्येऽखिलेऽखिलाः ॥ ध्यायंतं विभुमेवापि । स्वविभुं सचिवा जगुः ॥ ७६ ॥ यः स्ना-
पितः सुरैर्मेरौ । यमीक्ष्वाकुः श्रितोऽन्वयः ॥ येनादर्शि नृपाचारो । यस्मै तुष्यंति स त्प्रजाः
॥ ७७ ॥ यस्मादाविरभूद्धर्मो । यस्य चारित्रमुज्ज्वलं ॥ स्थितिं यस्मिन् व्यधाद् ज्ञानं । शो-
चनीयः कथं स हि ॥ ७८ ॥ स स्तुत्यः परमः स्वामी । तं सदार्चयन्न क्तितः ॥ नाथवान् न-
व तेन त्वं । तस्मै चित्तं नियोजय ॥ ७९ ॥ चिंतयाप्तं ततो बोधं । तस्याश्रय गुणावलीं ॥
तस्मिन् मोहं च मा धेहि । यो लीनः परमे पदे ॥ ८० ॥

इत्याकर्ण्य कथंचित्सो–ऽमुचच्छोकं सुदारुणं ॥ प्रावर्त्तत च चक्रीशो । राज्यव्यापारकर्म-
णि ॥ ८१ ॥ शनैः शनैरस्तशोकः । समं विश्वस्तमानुषैः ॥ सौधोत्संगे क्षणं रंगे–रितस्तुंग

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तरंगितः ॥ ९२ ॥ क्षणमास्थानशालासु । क्षणं बालासु सालसः ॥ विलासलालसः किंचित् । प्रीतिमाप शनैर्नृपः ॥ ९३ ॥ वन्यवारणवत्स्वैरं । स्ववनेऽथ वशावृतः ॥ स वनेन सुखं प्राप । स वने सरसि स्थितः ॥ ९४ ॥ सहेलाभिर्महेलाभि–र्मुदे लालितमानसः ॥ स कदाचित् श्रियो गेहे । स्वदेहे भूषणान्यधात् ॥ ९५ ॥ स हंसवत् सहंसासु । हंसयानाबलायुतः ॥ तरंगिणीषु रंगेण । तरंगेण विधुते ॥ ९६ ॥ कदाचिच्चित्तजन्मात्मः । सुरभौ स सुभूरुहे ॥ सर्वांगपुष्पाभरणः । शुशुभे शुभकानने ॥ ९७ ॥ कदाचिद्वाजिकेलीषु । वाऽजिकेलीषु विश्वराट् ॥ कदैक्षि रथयानाद्यै–रथयानादिगैर्जनैः ॥ ९८ ॥ संगीतके क्वचिद्गीतः । क्वचित्काव्ये सुवर्णितः ॥ आकर्णितः क्वचिन्नाट्ये–ऽशुभत्सर्वरसाश्रयः ॥ ९९ ॥ स क्षणं क्षणदाकांत–क्रांतवक्त्रांतजातया ॥ कांत्योदजीवयत्कामं । कामं कांताकृतालयं ॥ १०० ॥ सुखसौहित्यभृत्स्वांत । इत्यनंतरसाश्रयः ॥ रसांतराः प्रजाः पुण्यैः । सोऽस्तकालमपालयत् ॥ १ ॥ अथान्यदा मुदा स्नाना–नदातो भरतेश्वरः ॥ सर्वांगभूषणधरो । दर्पणागारमाविशत् ॥ २ ॥ स्वप्रमाणेऽत्र सद्गाणो–ल्लिखिते रत्नदर्पणे ॥ स तत्रालोकयद्रूपं । लीलालसतया तया

॥३५६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ३ ॥ पश्यन् प्रत्यंगमुद्रंगो । विमुद्रां स निजांगुलीं ॥ हिमदग्धद्रुशाखाज्रां । मनस्येवम-
चिंतयत् ॥ ४ ॥ यथैषा कृत्रिमा शोज्रा । ममांगुल्यां हि मुद्र्या ॥ तथा मन्ये शिरोमुख्य-
प्रदेशेष्वपि जूषणैः ॥ ५ ॥ मौलेर्मौलिमपाकरोत् श्रुतियुगात्स कुंमले कंठतो । निष्कं हार-
मुरुस्थलाच्च सहसैवांसद्वयादंगदे ॥ चक्री पाणियुगाच्च वीरवलये मुद्रावलीमंगुली-वर्गाज्ञा-
रमिव प्रशांतहृदयो वैराग्यज्ञागित्यथ ॥ ६ ॥ फाल्गुने मासि निःपत्र-फलपुष्पमिव द्रुमं ॥
व्यलंकारं वपुर्वीक्ष्य । स मनस्येवमस्मरत् ॥ ७ ॥ कायज्ञित्तिरियं जूषा-वर्णविच्छित्तिचित्रिता
॥ अनित्यताजलक्लिन्ना । पतत्यंतरसारतः ॥ ८ ॥ अहो शरीरिणां मोहः । शरीरस्यास्य दु-
स्त्यजः ॥ रुक् समीरचलत्पक्व-पत्रस्येव पतिष्यतः ॥ ए ॥ त्वगियं देहिनां सारं । शरीरे
साप्यहार्निशं ॥ लिप्तापि चंदनरसैः । पिच्छलत्वं न मुंचति ॥ १० ॥ यत्कृते कुरुते लोकः ।
पापं दुःकर्मणेरितः ॥ तदेहं नलिनीपत्र-स्थितबिंदुचलाचलं ॥ ११ ॥ संसारखाले दुर्गंधे ।
शृंगाररसपिच्छिले ॥ जानंतोऽपि निमज्जंति । गर्त्ताशूकरवज्जनाः ॥ १२ ॥ षष्टिवर्षसहस्राणि ।
ज्रामं ज्रामं धरातले ॥ कलेवरस्यास्य कृते । धिक्धिक् कृतं मयाऽकृतं ॥ १३ ॥ धन्यो बाहु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बलिवीरौ । धन्या अन्येऽपि बांधवाः ॥ यदसारममी त्यक्त्वा । संसारं मुक्तिमासदन् ॥ १४ ॥
राज्यं चलाचलं प्राज्यं । यौवनं च पतापतं ॥ लक्ष्मीश्चलाचला यत्र । नवेत्तत्र स्थिरं कथं
॥ १५ ॥ माता पिता कलत्राणि । बांधवाः पुत्रसंपदः ॥ जंतूनां नवकूपांतः। पततां कोऽपि
न क्रमः ॥ १६ ॥ तात त्राहि जगन्नाथ । यथा त्राताः परे सुताः ॥ अथोपलंन्ननैरास्तां । डुः-
पुत्रत्वात् स्मृतोऽस्मि न ॥ १७ ॥ नाहं न मे श्रियो देहं । गेहं नांतःपुराणि च ॥ एकोऽस्मि
समतानंद–सुधांन्नसि कृतप्लुतिः ॥ १८ ॥ नपाधिरहिते शांते–ऽक्रिये निधनवर्जिते ॥ परे
तत्वे चिदानंदे । तदेति स लयं ययौ ॥ १९ ॥ रौद्रध्यानादसत्याच्च। परद्रोहात्कुकर्मणः ॥ य-
दर्जितं महत्पापं । न्नावना तद्भमं नयेत् ॥ २० ॥ देहमूषास्थितं ध्यान–वह्निना सुस्थिरीकृतं
बबंध पारदं योगी । मनःकल्याणसिद्धये ॥ २१ ॥ क्षपकश्रेणिमारुह्यो–पशमक्रमयोगतः ॥
स योगी केवलज्ञान–माससाद पराशयः ॥ २२ ॥ वासवादेशतो देवै–र्व्रतमुद्रां समर्पितां ॥
जग्राह सर्वविरति–दंम्भकं च पपाठ सः ॥ २३ ॥ नृपा दश सहस्राणि । प्राव्रजन्नार्षन्नेरनु ॥
तादृशस्वामिसेवा हि । परत्रापि सुखाकरी ॥ २४ ॥ सुरोरगनरैर्न्नक्त्या। ववंदे सोऽथ केवली



For Private And Personal Use Only

॥ अवंदमानस्त्वपरान् । परापरपदस्थितिः ॥ २५ ॥

अथ विश्वंभराभारं । सोढुर्भरतजन्मनः ॥ राज्याभिषेकमकरो–दादित्ययशसो हरिः ॥ ॥ २६ ॥ प्रारभ्य केवलोत्पत्तेः । ऋषभस्वामिवत्ततः ॥ ग्रामाकरपुरारण्य–गिरिद्रोणमुखादिषु ॥ २७ ॥ धर्मदेशनया भव्यान् । देहभाजः प्रबोधयन् ॥ पूर्वलक्षं विजहार । भरतः सपरिच्छदः ॥ २८ ॥ ॥ अष्टापदगिरौ गत्वा । ततश्च भरतो मुनिः ॥ चक्रे चतुर्विधाहार–प्रत्याख्यानं यथाविधि ॥ २९ ॥ मासांते श्रवणे ऋक्षे । सिद्धानंतचतुष्टयः ॥ सोऽपि मोक्षमगाच्छांतः । क्रमादन्येऽपि साधवः ॥ ३० ॥ स्वामिवत्स्वामिपुत्रस्य । ततस्तस्य सुरेश्वराः ॥ निर्वाणमहिमां चक्रु–स्तत्र चैत्यानि चोच्चकैः ॥ ३१ ॥ भरतः पूर्वलक्षाणां । कौमार्ये सप्तसप्ततिं । सहस्रं शरदामेकं । मंडलीकत्वमाश्रयत् ॥ ३२ ॥ एकवर्षसहस्रोन–पूर्वलक्षाणि षट् तथा ॥ स चक्रवर्त्तित्वमपात् । पूर्वलक्षं च केवलं ॥ ३३ ॥ एवं च पूर्वलक्षान् स । चतुरोऽशीतिमप्यलं ॥ सर्वमायुः प्रपूर्याथ । निर्वाणपदवीमगात् ॥ ३४ ॥ अष्टापदेऽष्टकर्माणि । भित्वाष्टशुभसिद्धिमान् ॥ प्रयाति परमं स्थानं । जनः सद्भावभावितः ॥ ३५ ॥ अष्टधा पूजितो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ह्यष्ट–प्रातिहार्यसमन्वितः ॥ अष्टापदे जिनो दत्ते–ऽष्टापदोत्करमुच्चकैः ॥ ३६ ॥ प्रहृष्टवदनः
शिष्ट–मानसः स्पष्टवासनः ॥ तपःप्रकृष्टः संसार–कष्टादत्र स मुच्यते ॥ ३७ ॥ यात्रामष्टाप-
दे शैले । यः कुर्याच्छुभवासनः ॥ भवैस्त्रिभिरवाप्नोति । स ततः सिद्धिमंदिरं ॥ ३८ ॥ अ-
ष्टापदो महातीर्थं । नित्यार्हद्भवनोपमं ॥ पुनाति भुवनान्युच्चैः। पुण्यराशिरिवोज्ज्वलः ॥३९॥

अथ सूर्ययशाः शोक–संकुलः शैलमेत्य तं ॥ चकार निर्विकारांतः । प्रासादश्रेणिमुच्च-
कैः ॥ ४० ॥ क्रमात्संबोधितो मंत्रि–मुख्यैः स विनयोक्तिभिः ॥ राज्यव्यापारमाधत्त । भुजा-
भ्यां मुक्ततातशुक् ॥ ४१ ॥ ततः श्रीमान् सूर्ययशाः । प्रतापाक्रांतशात्रवः ॥ चंडोज्ज्वलेन
यशसा । व्यधात्कुवलयोदयं ॥ ४२ ॥ स त्रिखंडमहीभर्त्ता । षट्खंडाधिपनंदनः ॥ अखंड-
शासनो दुष्टान् । खंडयामास नीतिवत् ॥ ४३ ॥ यथा द्वयोरर्वींद्वोश्च । प्रतापो व्योम्नि दी-
प्यते ॥ एकस्यैव तथा सूर्य–यशसो जगतीतले ॥ ४४ ॥ बभार मुकुटं शक्रे–णोपढौकित-
मीशितुः ॥ राज्यस्य समये सूर्य–यशास्तद्द्विगुणोदयः ॥ ४५ ॥ किरीटस्यैव माहात्म्या–
त्तस्यादित्ययशा नृपः ॥ स्वामिवत्सुरसेव्योऽभूत् । सदैव जितशात्रवः ॥ ४६ ॥ यत्प्रतापोऽ-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रिसौधेषु । तद्यशोवारि शोषयन् ॥ ज्वलन् विशेषतश्चित्रं । तृणोऽत्रेदमसूत्रयत् ॥ ४७ ॥ रा-
धावेधपणप्राप्ता । विद्यान्नृत्कनकांगजा ॥ सर्वरामाशिरोरत्नं । जयश्रीस्तत्प्रियाजनि ॥ ४८ ॥
द्वात्रिंशति सहस्राणि । विद्यान्नृन्नूपजान्यपि ॥ आसंस्तस्य कलत्राणि । पवित्राणि पराण्यथ
॥ ४९ ॥ चतुःपर्व्यां विशेषेण । सोऽष्टमीं च चतुर्दशीं ॥ प्रत्याख्यानपौषधादि–तपसाराधय-
त्यलं ॥ ५० ॥ जीवितादरवत्पर्वा–दरश्चास्त्यस्य वल्लनः ॥ चिंत्यते तन्नु पर्वेदं । जीवितादं-
पि रक्ष्यते ॥ ५१ ॥ बालावलाखगारण्य–प्राणिनोऽपीह तद्दिने ॥ नियमान्नान्नमश्नंति । श्रुता-
र्हद्धर्मधारकाः ॥ ५२ ॥ अथैकदा सुनासीरः । सौधर्मामास्थितः सन्नां ॥ दृष्ट्वा तन्निश्चयं ज्ञा-
ना–च्चमत्कृतिमनाटयत् ॥ ५३ ॥ अथोर्वशी विश्ववशी–करणौषधमादिभं ॥ सहसा तच्छिरः-
कंपं । वीक्ष्य प्रोवाच वासवं ॥ ५४ ॥ स्वामिन् कविर्न काव्यानि । वक्ति युक्तितयाधुना ॥
हृद्यानि न च पद्यानि । गुरुर्गृणाति सांप्रतं ॥ ५५ ॥ रंन्नारं न्नरतोक्तानि । नृत्यानि न च
नृत्यति ॥ परेऽपि हूहूहाहाद्या । गीतबंधपरा न हि ॥ ५६ ॥ अन्यद्धर्षोपकर्षस्य । सद्दक्षं ना-
धुना क्वचित् ॥ तत्किं निमित्तमीशिना–धूनि प्रीतेन मस्तकं ॥ ५७ ॥ ततः प्रोवाच देवेश–



For Private And Personal Use Only

 

स्तत्सत्त्वं हृदि चिंतयन् ॥ शृणूर्वशि ज्ञानचक्षु–रधुना मेऽस्ति यद्भुवि ॥ ५८ ॥ नाभेयस्वा-
मिनः पौत्रः । पुत्रो भरतचक्रिणः ॥ पात्ययोध्यां सूर्ययशाः। सात्त्विकानां शिरोमणिः ॥५९॥
स चाष्टमीचतुर्दश्योः । पर्वणोस्तपसः क्वचित् ॥ चाल्यते निश्चयान्नैव । कृतयत्नैः सुरैरपि ॥
॥ ६० ॥ पूर्वकाष्टामतिक्रम्य । भानुश्चेदभ्युदेत्यहो ॥ मेरुर्वा कंपते वातै–र्मर्यादां वांबुधिस्त्य-
जेत् ॥ ६१ ॥ सुरद्रुर्वावकेशी स्यात् । तथाप्येष स्वनिश्चयं ॥ अपि प्राणैः कंठगतै–र्जिनाज्ञा-
वन्न मुंचति ॥ ६२ ॥ [redacted] ॥ उर्वशी सा तथा श्रुत्वा । स्मित्वा मनसि किंचन ॥ प्रत्युत्तरं
विभोर्दातु–मसहाथेत्यचिंतयत् ॥ ६३ ॥ अहो प्रभुत्वं किमिव । न श्लाघ्यं यद्बुधाधिपः ॥ अ-
ज्ञवद्वक्ति युक्तिज्ञो । मनुष्येऽपि सुनिश्चयं ॥ ६४ ॥ यः सप्तधातुसंपन्न–शरीरोऽप्यन्नजीवकः
सोऽपि देवैरचाल्यो य–च्छ्रद्दधाति हि कोऽपि तत् ॥ ६५ ॥ मत्स्येयरसपूरेण । दूरे रेणुकणा इ-
व ॥ केषां विवेकप्रमुखाः । शाम्यंति न गुणा अहो ॥ ६६ ॥ वचो राजसिकं भर्तु–र्विधाय
वितथं हि तं ॥ भ्रंसयिष्ये व्रताच्छैला–त्कूलशैलमिवापगा ॥ ६७ ॥ इति प्रतिज्ञामामंत्र्य । रं-
भया सहितोर्वशी ॥ दधती पाणिना वीणां। स्वर्गाद्भुवमवातरत् ॥ ६८ ॥ अयोध्यानिकटोद्या-

॥ ३६२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ने । चैत्ये श्रीप्रथमप्रभोः ॥ मोहकरूपमाधाय । प्रबंधानुजगार सा ॥ ६९ ॥ शाखिशाखा-
समासीनाः । पक्षिणोऽपि क्षणं तदा ॥ नात्मानं विविदुर्नाद–मूर्छनास्वतिमूर्छिताः ॥ ७० ॥
गोधाहिनकुनप्रख्या–स्त्यक्त्वा त्यक्त्वा निजाश्रयान् ॥ आलेख्यलिखिता यद्व–त्तस्थुर्निश्चलवृ-
त्तयः ॥ ७१ ॥ अर्धचर्वितशस्यास्या । निष्पंदनयना मृगाः ॥ घटिता इव पाषाणै–स्तस्थुस्त-
ज्ञानमोहिताः ॥ ७२ ॥

इतश्च श्रीसूर्ययशा । वाहकेलिरसात्पथि ॥ व्यावर्तितस्तदाश्रौषी–त्तयोर्गीतरवान्नवान् ॥
॥ ७३ ॥ वाजिनो वाजविमुखा । गजाः सज्जा गतौ नहि ॥ न पत्तयः पदमपि । यानेऽनूव-
न्नलं तदा ॥ ७४ ॥ इत्थं बलं स्वकर्त्तव्ये–ऽप्यबलं वीक्ष्य पार्थिवः ॥ जगाद सादरं श्रीमान् ।
सचिवं शुद्धभारतीं ॥ ७५ ॥ अहो मोहरसांभोधि–वेलयेव निवारिताः ॥ नाशकंश्चलितुं ह्येते ।
सैनिका इव पक्षिणः ॥ ७६ ॥ बालाबलाबिलावासाः । पक्षिणो मृगवारणाः ॥ मुह्यंत्यमी नाद-
रसैः । शाखिनोऽपि सुनिश्चलाः ॥ ७७ ॥ नादेनापि न मुह्यंति । येऽनंतसुखहेतुना ॥ किं ते-
षामुपमीयंते । पशवो नादवेदिनः ॥ ७८ ॥ नादोऽनंतसुखाधारो । नादो दुःखौघघातकः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नादो यस्य समीपस्थः । स शुचिर्विश्वपूजितः ॥ ७ए ॥ प्राणानपि पणीकृत्य । नादं गृह्णा-
ति यो मृगः ॥ सुधाकराकेरणापि । सोंके स्वस्य निवेशितः ॥   ०० ॥ नादेन देवास्तुष्यंति ।
धर्मो नादात्प्रजायते ॥ नादान् महीपतेरर्थो । नादान्नार्योऽपि वश्यगाः ॥ ०१ ॥ नादोऽयमे-
व ह्यानंत्यं । गामितो गुरुयोगतः ॥ परमानंदसौख्यानि । प्रयछत्यपि हेलया ॥ ०२ ॥ तन्न-
मस्कुर्महे चैत्ये । श्रीयुगादिजिनेश्वरं ॥ तत्र गेयरवादान–मपि लप्स्यामहे वयं ॥ ०३ ॥ इ-
त्थमामंत्र्य नृपालः । समं सचिवसैनिकैः ॥ जगाम जिनचैत्यांत–रंतस्तज्ज्ञानमोहितः ॥ ०४ ॥
तावत् स्फुरद्दीप्रकांती । नादपीयूषनिम्नगे ॥ पश्यतिस्म महीन्नर्त्ता । वीणापाणी कुमारिके ॥
॥ ०५ ॥ कामन्नार्ये इवालोक्य । ते नृपः स्नेहचक्षुषा ॥ विद्धः कामाशुगैश्चित्ते । चिंतयामा-
सिवानिति ॥ ०६ ॥ किमेतयोः कंठकुंमात् । सुधानादः प्रवर्त्तते ॥ किं वा नादामृतैरेते । नि-
र्मिते विश्वकर्मणा ॥ ०७ ॥ रूपं निरुपमं गानं । संदानममृतस्य च ॥ एतयोः कस्य पुण्य-
स्य । न्नोगाय न्नविता ननु ॥ ०० ॥ इत्यालोच्य महीपाल–स्तयोः चक्षुः क्षिपन् वहु ॥ न-
नाम कामदान् पादान् । श्रीयुगादिजिनेशितुः ॥ ०ए ॥ प्रत्यावृत्तः सूर्ययशा । निषण्णोऽत्र ॥ ३६४॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बलानके ॥ सचिवाय समादिक्षत् । तयोर्ज्ञातुं कुलादिकं ॥ ए० ॥ सचिवोऽपि नृपादेशा—
दुपसृत्य तयोः पुरः ॥ सुधामधुरया वाचा । संज्ञाष्येत्थमथालपत् ॥ ए१ ॥ के युवां त्रिषु लो-
केषु । कः पतिर्युवयोर्ननु ॥ किमर्थमागतिरिह । वदतं सकलं स्त्रियौ ॥ ए२ ॥ एका तयो-
रथोवाच । निशम्य सचिवाद्वचः ॥ आवां विद्याधरपते—र्मणिचूडस्य नंदने ॥ ए३ ॥ आबा-
ल्यात्कलयास्माकं । कलया सादरं मनः ॥ नित्यं क्रीडापि वीणासु । रंरमीति च पुस्तकैः ॥
॥ ए४ ॥ स्पर्धया यौवनोद्भिद—व्रवयाप्यावयोः पितुः ॥ कस्य देये इमे कन्ये । इति चिंताप्य-
वर्द्धत ॥ ए५ ॥ न सदृक्षं पतिं त्वावां । लज्जमाने जगत्यपि ॥ व्यावर्त्तयावः पितरं । तच्चिं-
तासागरादथ ॥ ए६ ॥ स्थाने स्थानेऽर्हच्चैत्यानां । नमस्यान्निर्निजं जनुः ॥ सफलं कुर्महे मं-
त्रिन् । क्व पुनर्मानुजो जवः ॥ ए७ ॥ अयोध्येयं तीर्थभूता । जिनपादपवित्रिता ॥ अतोऽ-
त्र जारते चैत्ये । नमावो जिनमादिमं ॥ ए८ ॥ तयोरेवं निगदंत्यो—र्मंत्री वाचमुपाददे ॥ स-
मं श्रीसूर्ययशसा । युवयोः संगमो वरः ॥ एए ॥ असौ तु पौत्रो वृषज—स्वामिनो जरतां-
गजः ॥ कलाकलापकलितः । सौम्यः सद्गुणवान् बली ॥१००॥ तद्ध्रुवं वृषजस्वामी । युवयो-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्तुष्ट एव हि ॥ सहसा यत्सूर्ययशा । वरः प्राप्तश्चिरादपि ॥ १ ॥ यथा चंद्रमसा ज्ञातः । कौमुदीक्षणदे मुदे ॥ युवां श्रीसूर्ययशसा । तथा ज्ञातः सदक्षतः ॥ २ ॥ इत्यालापिनि मंत्रींदौ । ते तं जगदतुः स्त्रियौ ॥ स्वाधीनं हि पतिं मुक्त्वा । परं नैवाश्रयावहे ॥ ३ ॥ त्वद्वाचमन्यथा कुर्वन् । निषिद्ध्यो हि नृपो मया ॥ इत्यवोचदिलानाथा–नुमतः सचिवस्ततः ॥ ॥ ४ ॥ तदैव श्रीयुगादीश–समक्षं समजायत ॥ तेषां पाणिग्रहोत्साहः । सर्वदृक्प्रीतिबंधनं ॥ ५ ॥ तयोः प्रीतिरसाकृष्टः । पार्थिवः स्पष्टचेष्टितः ॥ संसारसारं विमृशन् । मृगाक्षीं मन्मर्थ रतिं ॥ ६ ॥ धर्मार्थबाधया कामं । सेवमानो नृपोऽधिकं ॥ पुमर्थरथमेकेन । चक्रेणाचालयद्बलात् ॥ ७ ॥ अन्यदा क्षणदारंभे । संध्याभ्यामिव वासरः ॥ पत्नीभ्यां श्रीसूर्ययशा । वृतो वातायनं ययौ ॥ ८ ॥ ज्ञो लोका अष्टमीपर्व । ज्ञावि श्वः सादरास्ततः ॥ पटहोद्घोषणामित्य–श्रौष्टां ते कपटस्त्रियौ ॥ ९ ॥ विज्ञायावसरं रंभा । ज्ञंज्ञावादनकारणं ॥ अजानतीव नृपति–मपृछदिति सादरा ॥ १० ॥ जगौ नृपतिरप्येवं । शृणु रंभे महाव्रतं ॥ चतुर्दश्यष्टमीपर्व । तातेनोक्तं समस्ति नः ॥ ११ ॥ अष्टाह्निकाद्वयं पर्व । चतुर्मासीत्रयं तथा ॥ वा-



For Private And Personal Use Only

र्षिकं पर्युषणाख्यं । वर्षपापं व्यपोहति ॥ १२ ॥ ज्ञानं हि प्रथमं रत्नं । रत्नत्रयपुरस्सरं ॥ त-
स्याराधनमेणाक्षि । पंचम्या दिवसे भवेत् ॥ १३ ॥ पर्वाण्यमूनि सत्पुण्य–कारणानि जिना-
ज्ञया ॥ महाप्रभाववैचित्र्य–पवित्राणि शुभानने ॥१४॥ सर्वदा विहितं पुण्यं । स्वर्गसिद्धि-
सुखप्रदं ॥ सत्यं स्यादष्टमीपक्ष–खंडना यदि नो भवेत् ॥ १५ ॥ शुभाशुभानि कर्माणि ।
जीवः संचिनुते प्रिये ॥ चतुःपर्व्यां द्योनरक–हेतून्यध्यवसायतः ॥ १६ ॥

तस्मादस्यां परित्यज्य । भवभूरुहबीजवत् ॥ गृहव्यापारमखिलं । शुभं कर्म विधीयते
॥ १७ ॥ चतुःपर्व्यां न च स्नानं । न स्त्रीसेवाकलिर्न च ॥ न द्यूतपरहास्यादि । न मात्स-
र्यं न च क्रुधः ॥ १८ ॥ कषायसंगो न मनाक् । ममता न प्रियेष्वपि ॥ यथारुचि न च क्री-
डा । प्रमादाद्यं न किंचन ॥ १९ ॥ विधेयं धर्मरुचिना । पुंसा यत्नपरेण च ॥ भाव्यं शुभ-
ध्यानवता । परमेष्टिस्मृतीरिणा ॥ २० ॥ [redacted] ॥ सामायिकं पौषधं च । षष्टाष्टम-
विधं तपः ॥ कृत्वा जनो जिनस्यार्चां । चास्या नियमवान् भवेत् ॥ २१ ॥ गुरुपादसमीप-
स्थः । परमेष्टिस्तुतिं स्मरन् ॥ जनोऽर्जयति पुण्यानि । क्षिप्त्वा कर्माष्टकिल्बिषं ॥ २२ ॥ भ-

॥३६७॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





योदश्यां च सप्तम्यां । लोकबोधाय भामिनि ॥ अयं हि पटहोद्घोषो । ममादेशात्प्रजायते ॥ २३ ॥ चतुर्दश्यष्टमीपर्व । त्रैलोक्ये देवि दुर्लभं ॥ करोति यो जनो भक्त्या । स याति परमं पदं ॥ २४ ॥ श्रुत्वोर्वशी नृपेणोक्तं । तन्निश्चयचमत्कृता ॥ जगाद मायावचन–प्रपंचचतुरा गिरं ॥ २५ ॥ कथं नाथ मनुष्यत्वं । रूपं राज्यमखंडितं ॥ त्वया विडंब्यते सर्वं । तपःक्लेशादिभिश्चिरं ॥ २६ ॥ यथेष्टं भुंक्ष्व सौख्यानि । क्व पुनर्मानवो भवः ॥ क्व राज्यं क्व च सद्भोगः । पश्चात्तापोऽस्तु मेति ते ॥ २७ ॥ तन्निशम्य नृपस्तस्या––स्तत्तत्रपुनिभं वचः ॥ अंतर्दोषैकपिशुनां । पुनर्गिरमुपाददे ॥ २८ ॥ रेरेऽधमे धर्मनिंदा–मलिने तव गीरियं ॥ विद्याधरकुलाचारो–चिता न हि मनागपि ॥ २९ ॥ धिक् ते वैदग्ध्यमखिलं । धिग् धिग् रूपं कुलं वचः ॥ न येन जिनपूजादि–तपःस्वीकृतिरस्ति रे ॥ ३० ॥ मानुष्यं रूपमारोग्यं । राज्यं च तपसाप्यते ॥ आराधयेन्न तत्को हि । कृतघ्नकुलमंडनं ॥ ३१ ॥ धर्माराधनतो न स्या–द्देहस्य हि विडंबनं ॥ विना धर्मं तु विषयैः । केवलं सुविडंबनं ॥ ३२ ॥ यथेच्छं क्रियते धर्मः । क्व पुनर्मानवो भवः ॥ क्व राज्यं क्व च सद्भोगः । पश्चात्तापोऽस्तु मेति मे ॥ ३३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अष्टम्यां पाक्षिके पक्षि–मृगसिंहाहिशावकाः ॥ अप्याहारं न गृह्णंति । कथं गृह्णाम्यहं प्रिये ॥
॥ ३४ ॥ धिगस्तु तेषां ज्ञातृत्वं । मनुष्यत्वं च तद्वृथा ॥ न पर्वाराधनं यत्र । सर्वधर्मनिबंध-
नं ॥ ३५ ॥ श्रीयुगादिजिनाधीशा–दिष्टं पर्वेदमुत्तमं ॥ विना तपो वृथा कुर्वे । नापि कंठग-
तासुभिः ॥ ३६ ॥ वरं प्रयातु मे राज्यं । वरं प्राणक्षयोऽस्तु मे ॥ न पुनः पर्वतपसो । भ्रष्टो
बाले भवाम्यहं ॥ ३७ ॥ इति क्रोधाकुलं भूप–वचः श्रुत्वोर्वशी ततः ॥ मोहमायां प्रकुर्वती ।
पुनर्वाचमुपाददे ॥ ३८ ॥ स्वामिन् मया प्रेमरसो–त्रिश्येदं वचो जगे ॥ माभूद्वपुःक्लेश इ-
ति । तत्क्रोधावसरोऽत्र न ॥ ३९ ॥ आवाभ्यां तु पितुर्वाक्य–विमुखीभ्यां पुरेत्यपि ॥ स्वच्छंद-
चारी न पति–र्वृतो भवविडंबनात् ॥ ४० ॥ पूर्वकर्मपरिपाका–दधुना त्वं वरो वृतः ॥ सं-
सारसौख्यं शीलं च । सर्वमेकपदे गतं ॥ ४१ ॥ स्वाधीनः पुंस्त्रियोर्योगो । यदि तन्मान्मथं
सुखं ॥ अन्यथा रजनीघस्त्र–योगवच्च विडंबनं ॥ ४२ ॥ स्वामिंस्त्वया तु नाभेय–जिननाथ- ॥३६७॥
पुरः पुरा ॥ मद्वाक्यकरणं सम्य–गुररीकृतमेव हि ॥ ४३ ॥ एकदा तत्परीक्षार्थ–महमेतद-
याचिषं ॥ स्वामी त्वद्रूपेन कार्येण । गतः क्रोधवशं हहा ॥ ४४ ॥ भ्रष्टाहमुभयाभ्नाथ । शी-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्सादपि सुखादपि ॥ तन्मेऽस्तु मरणं श्रेय–श्चितापावकसेवनात् ॥ ४५ ॥

इति तद्वाक्यमाकर्ण्य । नृपस्तन्मग्नमानसः ॥ स्मरन् स्वकीयवाक्यस्य । जगाद विशदं वचः ॥ ४६ ॥ यदुक्तं ताततातेन । तातेन विहितं च यत् ॥ तस्य पुत्रोऽप्यहं कुर्वे । कथं तत्पर्वनाशनं ॥ ४७ ॥ हरिणाक्षि हिरण्यानि । मही मानिनि चाखिलां ॥ मत्तेभगामिनि गजान् । वाजिनो वा वरानने ॥ ४८ ॥ कृशांगि कोशमखिलं । गृहाण गृहिणि स्वयं ॥ न सौख्यं येन नो धर्म–स्तन्मां कारय मा प्रिये ॥ ४९ ॥ [illegible] ॥ इषत् स्मित्वा ततः सापि । जगौ कोमलया गिरा ॥ नवाहशां भूमिनाथ । सत्योक्तिः खलु सद्व्रतं ॥ ५० ॥ स्वांगीकारविघातो हि । विहितो येन पाप्मना ॥ सोऽशुचिर्वसुधा तस्य । भारादतिविषीदति ॥ ५१ ॥ नाथ त्वयेदमपि नो । सिद्ध्यतीति यदा तदा ॥ कथं राज्यादिदातृत्वं । सेत्स्यति क्षितिभर्तृर्न ॥ ५२ ॥ पितुर्विद्याधरैश्वर्यं । त्वत्कृते न वदूकृतं ॥ राज्यादिनाद्य किं कुर्वे । येन मे न मनस्विता ॥ ५३ ॥ तथापि यदि नो पर्व–भंगं कर्त्तासि भूपते ॥ तत्पातय युगादीश–प्रासादं पुरतो मम ॥ ५४ ॥ इत्याकर्णनमात्रेण । नृपः संमूर्छितो भुवि ॥ पपात गतचैतन्यो । वज्रेणेव ह-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तो हृदि ॥ ५५ ॥ तदैव सचिवादेशा-दाकुलैस्तत्परिच्छदैः ॥ विदधे लब्धचैतन्यो । नृपश्चंदन-
चर्चया ॥ ५६ ॥ अथोन्निद्रः सूर्ययशा-स्ताम्रास्यः पुरतः स्थितां ॥ दोषामिव पश्यतिस्म ।
तां जगौ च गिरांतरां ॥ ५७ ॥ रेऽधमेऽयं तवाचारो । गिरा किरति मत्पुरः ॥ त्वत्कुलाध-
मतां येनो-द्गारवद्भोजनं भवेत् ॥ ५८ ॥ न त्वं विद्याधरसुता । किंतु चांडालसंभवा ॥ म-
या मणिभ्रमेणैव । चक्रे काचदलादरः ॥ ५९ ॥ त्रैलोक्यनाथो यो देव-स्त्रैलोक्यजनवंदितः ॥
भवेत्कोऽपि कथं तस्य । पर्वप्रासादभंगकृत् ॥ ६० ॥ स्वयं स्ववचसा बद्ध-मनृणं कर्त्तुमेव
मां ॥ धर्मलोपादतिक्रांत-मन्यद्याचस्व भामिनि ॥ ६१ ॥ राज्याश्वगजरत्नादि । सर्वं यातु
मम प्रिये ॥ तथापि प्राणनाशेऽपि । पर्वलोपं करोमि न ॥ ६२ ॥ जगाद सापि तत्श्रुत्वा ।
सस्मितं पुनरेव तं ॥ नाथान्यदन्यदिति च । त्वद्वचो याति दूरतः ॥ ६३ ॥ इदं न चेत्कुरीक-
र्त्ता । दूरीकर्त्तासि चादृतं ॥ तत्प्रदेहि स्वसूनोर्मे । शिरश्छित्वा स्वयं रयात् ॥ ६४ ॥ अथो वि-
मृश्य भूपाल । आललाप सुलोचने ॥ मत्तोऽभवत्सुतस्तन्मे । शिरोऽस्तु तव पाणिगं ॥ ६५ ॥
इत्युदीर्य नृपो यावत् । पाणिनादाय निःकृपं ॥ कृपाणं स्वशिरश्छेद-कृते संरभते कृती ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ ६६ ॥ तावदेव कृपाणस्यै–वासौ धारां बबंध हा ॥ न पुनस्तस्य सत्वस्य । सर्वथोदयकारिणः ॥ ६७ ॥ कुलकं ॥

विलक्षो वसुधाधीशः । करवालस्य बंधनात् ॥ नवं नवं तमादत्त । कंठनालविमंबकं ॥ ॥ ६८ ॥ यदा मनागसौ सत्वा–न्नापक्रामति नृपतिः ॥ ते तदासाद्य रूपं स्वं । जयेत्यूचतुरादरात् ॥ ६९ ॥ जय त्वं वृषनस्वामि–कुलसागरचंद्रमाः ॥ जय सत्ववतां धूर्य । जय चक्रीशनंदन ॥ ७० ॥ अहो सत्वमहो धैर्य–महो मानसनिश्चयः ॥ तथा यत्स्वस्य घातेऽपि । नात्यजः स्वं व्रतं मनाक् ॥ ७१ ॥ स्वःसंसदि स्वर्गपतिः । स्वर्गिणां पुरतस्तव ॥ सत्वमाहात्म्यमतुलं । प्रशशंस विशेषतः ॥ ७२ ॥ आवाभ्यां तु महीनाथ । नदीन्यामिव मेरुवत् ॥ आरब्धस्त्वं क्षोन्नयितुं । हीनाभ्यां सत्वनिश्चयात् ॥ ७३ ॥ रुद्ध्यतेऽब्धिर्यदोद्वेलो । मारुतश्चेन्निबद्ध्यते ॥ चाल्यते यदि मेरुर्वा । तदा त्वत्सत्वनिर्णयः ॥ ७४ ॥ जगत्प्रभुकुलोत्तंस । हीर धीर त्वयावनी ॥ रत्नसूरिति सन्नाम । सुधाधाम बिभर्त्यसौ ॥ ७५ ॥ तयोरित्थं स्तुवत्योस्तं । वास्तोष्पतिरुपागमत् ॥ पुष्पवर्षैः समं हर्षै–रुत्कर्षाज्जयशब्दवान् ॥ ७६ ॥ संधाभ्रष्टो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वेशी तेन । सोपहासं निरीक्षिता ॥ तद्गुणान् शक्रपुरतो । जगौ पुलकितांगका ॥ ७७ ॥ श-
क्रोऽपि तस्मै मुकुटं । कुंडले अंगदे वरे ॥ हारं दत्वा च स्तुत्वा च । ययौ स्वर्गं सहामरैः॥
॥ ७८ ॥ कुनीतिध्वांतविध्वंसी । रिपुतारकवारकः ॥ सत्यप्रतिज्ञो वसुधा—मपात्सूर्ययशा नृ-
पः ॥ ७९ ॥ भरतेशवदादित्यो । वसुधां जिनमंडितां ॥ व्यधाच्छ्रीसंघयात्रां च । निजं जन्म
पवित्रयन् ॥ ८० ॥ चतुर्दश्यष्टमीपर्व । दृष्टशर्म सधर्मवान् ॥ नित्यमाराधयामास । श्रीयु-
गादिजिनांह्रिवत् ॥ ८१ ॥ ज्ञानदर्शनचारित्र—धारिणः श्रावकानसौ ॥ उपलक्ष्योपलक्ष्याथ ।
भोजयामास वेश्मनि ॥ ८२ ॥ काकिणीरत्नरेखाभि—रंकितान् भरतेन तान् ॥ सौवर्णेनोप-
वीतेनां—कितान् सूर्यश्चकार सः ॥ ८३ ॥ महायशःप्रभृतयः । केचिद्रौप्येन चक्रिरे ॥ पट्टसू-
त्रमयेनान्ये । परे सूत्रमयेन तु ॥ ८४ ॥ [illegible] ॥ उदारचरितास्तस्य । कुमाराः स्फारवि-
क्रमाः ॥ सपादलक्षमप्यासन् । ते महायशआदयः ॥ ८५ ॥ इक्ष्वाकुवंशो वृषभ—स्वामिनो
ववृते यथा ॥ तथा श्रीसूर्ययशसा । सूर्यवंशोऽभवद्भुवि ॥ ८६ ॥ सोऽप्यन्यदा भरतवत् । प-
श्यन् स्वं रत्नदर्पणे ॥ संसारासारतां ध्यायन् । केवलज्ञानमासदत् ॥ ८७ ॥ विहरन् बोध-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यामास । सोऽपि जरव्यान् मुनीश्वरः ॥ कृपाच्च मुक्तिनिलयं । जगाम जितकर्मरुक् ॥ ८८ ॥
जरतादादित्ययशा—स्ततश्चासीन्महायशाः ॥ अतिवलो बलजद्रो । बलवीर्यस्ततोऽपि च ॥
॥ ८९ ॥ कीर्त्तिवीर्यो जलवीर्यो । दंमवीर्यस्ततोऽष्टमः ॥ इत्यष्टौ पुरुषान् याव—छवृते श्राद्ध-
पूजनं ॥ ९० ॥ एतेऽष्टावपि रूपं स्वं । पश्यंतो रत्नदर्पणे ॥ केवलज्ञानमासेदुः । क्रमान्निःश्रे-
यसं ततः ॥ ९१ ॥ एजिर्नृपैश्च बुभुजे । जरतार्द्धं समंततः ॥ जगवन्मुकुटः शक्रो—पनीतो
मूर्ध्न्यधारि च ॥ ९२ ॥ शेषैर्महाप्रमाणत्वा—न्न स वोढुमपार्यत ॥ हस्तिजिर्हस्तिजारो हि ।
वोढुं शक्येत नापरैः ॥ ९३ ॥ जरतादनु संताने । सर्वे जरतवंशजाः ॥ अजितस्वामिनं या-
व—दनुत्तरशिवालयाः ॥ ९४ ॥ सर्वेऽपि संघपतयः । सर्वेऽर्हच्चैत्यकारकाः ॥ तीर्थोद्धारकराः
सर्वे । सर्वेऽखंमप्रतापिनः ॥ ९५ ॥ श्रीमत्सर्वज्ञधर्माद्यो । न चलत्यंशमात्रकं ॥ स प्राप्नोति
परामृद्धिं । नृपः सूर्ययशा इव ॥ ९६ ॥ इक्ष्वं वंशस्त्रिभुवनगुरोः कोटिशाखोदितश्रीः । की-
र्त्याधारोऽमलसुचरितापत्यमुक्तानिवासः ॥ त्रैलोक्या यः समजनि सदालंबयष्टिर्गरिष्ठो । जू-
याल्लक्ष्मीसुखविलसितानंदहेतुः स कामं ॥ ९७ ॥



For Private And Personal Use Only

इत्याचार्यश्रीधनेश्वरसूरिविरचिते श्रीशत्रुंजयमाहात्म्ये श्रीऋषभस्वामि-
श्रीभरतेशनिर्वाणाष्टापदोद्धारश्रीसूर्ययशश्चरितवर्णनो
नाम षष्ठः सर्गः समाप्तः ॥ श्रीरस्तु ॥

---

## ॥ सप्तमः सर्गः प्रारभ्यते ॥

---

इतश्च वृषभस्वामि-सूनुर्द्रविड इत्यभूत् ॥ यन्नाम्ना द्रविडो देशः । पप्रथे बहुशस्यभूः ॥ ॥ १ ॥ जातौ तदंगजन्मानौ । विनीतौ स्नेहलौ मिथः ॥ द्राविडो वालिखिल्लश्च । नाम्ना धाम्ना यशःश्रियः ॥ २ ॥ प्रव्रज्यां स्वामिनः पार्श्वे । द्रविडोऽथ सुवासनः ॥ जग्राह मिथिलाराज्यं । द्राविडाय च दत्तवान् ॥ ३ ॥ मा भवत्वनयोर्वैर-वैरस्यं चैकराज्यतः ॥ इत्यदाद्वालिखिल्लाय । स ग्रामान् लक्षमुत्तमान् ॥ ४ ॥ प्रवर्द्धमानं क्रमशः । श्रिया कीर्त्या तथानुजं ॥ निरीक्ष्य द्राविडस्तस्मिन् । किंचिदप्यभ्यसूयत ॥५॥ सोऽपि क्रुद्धं निजं बंधुं । विज्ञाय न्या-



Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यवर्जितः ॥ तद्राज्यस्यापि लुब्धोऽभू-द्विभु लोभं दुःखभाजनं ॥ ६ ॥ पितरं मातरं बंधुं । मित्रं भार्यां सुतं गुरुं ॥ लोभाभिभूतो भूतार्त । इवावज्ञायते द्रुतं ॥ ७ ॥ ततो मिथोऽपि विद्वेष-भिन्नप्रीतिपराविमौ ॥ विषदग्धदुग्धसाम्यं । शिश्रियाते स्वचेतसि ॥ ८ ॥ तौ संभि-न्नमती काला-दन्योऽन्यं दुर्जनेरितौ ॥ जातावविश्वासकृते । शंकमानौ छलं मिथः ॥ ९ ॥

एकदानेकदावाग्नि-निभं भूपो जगौ वचः ॥ त्वयानुज निजे स्थाने । स्थेयं देयं च मत्पुरं ॥ १० ॥ ततः क्रोधमहायोध-रुद्धो बृद्धोदितं वचः ॥ श्रुत्वा तद्वालिखिल्लोऽपि । सशल्यः स्व-पुरं ययौ ॥ ११ ॥ अमेलयन्निजान् पत्तीन् । ग्रामदेशाधिपान् बहून् ॥ वालिखिल्लो ज्येष्टबं-धु-मभ्यसूयत् स्वदर्पतः ॥ १२ ॥ द्राविडो निविडोत्साहः । श्रुत्वा वंधुकथामथ ॥ अवादयत् ससंरंभं । भंभां यानाय सत्वरं ॥ १३ ॥ गजाश्वरथपादातै-र्वृतो द्राविडभूपतिः ॥ विपुलाम-प्यविपुलां । कुर्वन् प्रचलतिस्म च ॥ १४ ॥ तस्मिन् प्रचलिते कंप-मवाप वसुधा तथा ॥ यथा साद्यापि तत्स्मृत्वा । कंपतेऽरिष्टशंसिनी ॥ १५ ॥ यत्तदांभोधयः सैन्य-भारादुद्वेलताम-गुः ॥ तमभ्यासममी नित्य-मधुनापि विवृण्वते ॥ १६ ॥ रेणुभी रोदसी सैन्यो-द्भूताभिः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूरिता तथा ॥ यथा निगोदगोलानां। समत्वं साञ्जजत्तदा ॥ १७ ॥ वल्गाकृष्टा अपि हया।
नातिष्टन् स्वैरचारतः ॥ अर्हंयवो गुरूद्दिष्ट–धर्माकृष्टा जना इव ॥ १८ ॥ प्लावयन् पृथिवी-
पीठं । क्षोभयन् सरितां पतीन् ॥ दूषयन् दिग्गजान् कामं । स चचाल चमूवृतः ॥ १९ ॥
श्रुत्वा स्वदेशसीमाया–मापतंतं महीपतिं ॥ वालिखिल्लोऽपि वेगेन । बलैः परिवृतोऽचलत् ॥
॥ २० ॥ अंतरा सैन्ययोर्नृपौ । कृत्वा तौ पंचयोजनीं ॥ तत्रादापयतां वासान् । मिथो यु-
द्धाभिलाषिणौ ॥ २१ ॥ अपृष्ट्वैव निजौ नृपौ । प्रधानपुरुषैरथ ॥ मिथः संधिकृते दूताः ।
प्रेषयामासिरे तदा ॥ २२ ॥ सामदानभेदवाक्यै–र्न तौ तोषमवापतुः ॥ किंतु युद्धमुरीकृत्य।
स्थितौ रणदिनोत्सुकौ ॥ २३ ॥ वालिखिल्लस्ततो दानैः । कांश्चिन्नृपतिसैनिकान् ॥ स्वायत्ता-
नकरोद्दाना–यत्तत्सकलवश्यकृत् ॥ २४ ॥ कोटयो दश पत्तीना–मभूवन् दलयोर्द्वयोः ॥ प्र-
त्येकं दश लक्षाश्च । स्यंदनानां च कुंभिनां ॥ २५ ॥ पंचाशदश्वलक्षाश्च। तथाऽन्येऽपि मही- ॥३७७॥
भुजः ॥ अभवन् सैन्ययोः साम्य–मेवं त्रैलोक्यभीतिकृत ॥ २६ ॥

अथ युद्धदिने प्राप्ते । वीराः सत्कुलसंभवाः ॥ रोमांचकंचुकधरा । नद्धंन्भुजमंम्भिताः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ २७ ॥ सर्वशस्त्रकृताभ्यासा । निबद्धदृढमुष्टयः ॥ कपाटवक्षसः सिंह–नादत्रासितदिग्गजाः
॥ २८ ॥ उदाराः स्वामिभक्तास्ते । कृतानेकमहारणाः ॥ लुब्धा यशसि नो देहे । गेहे नो-
त्काः परं रणे ॥ २९ ॥ क्वणे क्वणे तूर्यनादा–दुल्लसद्वीरतास्पृशः ॥ चेलुर्निजबलैर्विश्वं । तृ-
णयंतस्तदा तयोः ॥ ३० ॥ [redacted] ॥ क्षरंतः सप्तधा दानं । सर्वलक्षणलक्षिताः ॥
उल्लालितमहाशुंडा–दंडा गर्जंत उच्चकैः ॥ ३१ ॥ तीक्ष्णाग्रैर्दंतमुशलैः । कुशला रिपुखंडने ॥
सन्नद्धा अपि मातंगाः । सयोधा अग्रतोऽभवन् ॥ ३२ ॥ [redacted] ॥ तुंगास्तरंगचपलाः । सर-
लाः पृथुकंधराः ॥ क्षिपंतः स्वांगलग्नेऽपि । वायौ तेजस्विनस्त्वराः ॥ ३३ ॥ प्रत्यंगप्रकटानेक–
लक्षणैर्लक्षिता वरैः ॥ शुद्धाकरसमुद्भूता । हया अपि रयाद्ययुः ॥ ३४ ॥ [redacted] ॥ सीमंतानि-
व चक्राणां । नेमिभिर्भुवि गर्जनां ॥ सन्नर्तकायां कुर्वाणा । हेमनाराचमुद्रिताः ॥ ३५ ॥ धा-
वद्भिस्तुरगैः कृष्टा–श्चलद्वेश्मसमा दृढाः ॥ सुसन्नद्धमहायोधाः । प्राचलन् स्यंदना अपि ॥
॥ ३६ ॥ [redacted] ॥ अथ मिथोऽपि पुरुषा । वेत्रिणो भ्रमुरग्रतः ॥ सैन्ययोः सैनिकानुच्चै–रा-
ह्वयंतो गुणानुगं ॥ ३७ ॥ भो भो वीरा रणे शूरा । युष्मानादिशति प्रभुः ॥ अस्मद्भिराद्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समरा–दानयंतु जयश्रियं ॥ ३८ ॥ नूनमन्यूनशौंडीर्य–शालिनो गुणमालिनः ॥ जयलक्ष्मी-
युजो जाने । युष्मान् सत्कुलसंभवान् ॥ ३९ ॥ तथा कुरुध्वं समरे । प्रावीण्यमधुनारिषु ॥
यथा वः सत्कुलं स्वामि–भीरता च न लज्जते ॥ ४० ॥ इति श्रुत्वा स्वयं वीराः । समराय
समुत्सुकाः ॥ जगर्जुः केऽपि संक्षुब्ध–जलधिध्वाननिष्ठुरं ॥ ४१ ॥ भुजास्फोटं व्यधुः केचित् ।
तथा वीरा महौजसः ॥ अदीर्यंत यथा घातै । रोदसी जीर्णभांडवत् ॥ ४२ ॥ कोपाग्निकी-
लाकल्पानि । शस्त्राण्येके महाभटाः ॥ उज्ज्वालयंतो दिविष–द्भीत्यै तेजस्विनोऽभवन् ॥४३॥
अश्वानारुरुहुः केचित् । ससन्नाहान् परे गजान् ॥ केचिद्रथानश्वतरान् । करभानपि केचन
॥ ४४ ॥ असाबला अपि तदा । पुरोऽभूवन् ससाबलाः ॥ स्फारकायाश्च फालक्का–स्तत्क्ष्णा-
कारिणोऽचलन् ॥ ४५ ॥ धनुर्धरा धनुर्ध्वानैः । कुर्वंतो निःस्वनान् रिपून् ॥ भ्रमंतो नमंत-
श्च । संचरंतिस्म सर्वतः ॥ ४६ ॥ पत्तिसेना महीमेना–मपूरयदसौ तथा ॥ यथा तिलोऽपि ॥३७०॥
तन्मध्ये । पतितो माति न क्वचित् ॥ ४७ ॥ अश्वैः स्वनाम सफलं । विश्वव्याप्त्या व्यधीयत
॥ तदन्वगामिभिरथो । रथैः सर्वत्र विस्तृतं ॥ ४८ ॥ रुषारुणितनेत्रास्याः । शृणिघातान्मतं-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गजाः ॥ पर्वता इव सत्पक्षाः । सवर्माणोऽप्यथाचलन् ॥ ४९ ॥

ततो निस्वाननिःस्वानै-रनशन् दिग्मतंगजाः ॥ भेरीणामपि भांकारै-र्बभार भुवनं भयं ॥ ५० ॥ ग्रहग्रह श्रंबकानां । ग्रेसुः कोलाहलैरलं ॥ आदिशूकरयूथानि । मुक्त्वा तां धीरतामपि ॥ ५१ ॥ नेदुश्च रणतूर्याणि । तदोच्चै रणकांक्षिणां ॥ उल्लासयंति वीराणां । हृदयानि समंततः ॥ ५२ ॥ नादार्णवस्तदा कोऽपि । तेषामाविरभून्नवः ॥ रोदसीकुलमर्यादा-मुदलंघयदाशु यः ॥ ५३ ॥ वीरा विशेषाद्वीरत्वं । कातरत्वं च कातराः ॥ तुरंगास्तरलत्वं च । प्रापुर्नादे प्रसर्पति ॥ ५४ ॥ सैन्ययोरुभयोः पादा-घातैर्निस्वाननिःस्वनैः ॥ त्रुटत्रुटदिति प्रोच्चै-र्द्यावाभूमी प्रचक्रतुः ॥ ५५ ॥ दलिता बहुधा धारा । तदा रेणुत्वमागता ॥ प्रसर्पंती बलैरुक्षा-न्योऽन्यं सन्मुखतामिता ॥ ५६ ॥ फूत्कारैर्हयमुख्यानां । प्रापिता सा नभोंगणं ॥ अमंती खलु तत्रापि । रुरोध जगतां दृशः ॥ ५७ ॥ युग्मं ॥ अग्रेसरैरथो वीरै-र्भिथश्चक्रे शराशरि ॥ स्वगोत्रप्रभुशौर्यश्री-व्यावर्णनपरायणैः ॥ ५८ ॥ सर्वतूर्यनिनादेन । सर्वारंभेण सैनिकाः ॥ अथो ढुढौकिरे कामं । सर्वसारेण सर्वतः ॥ ५९ ॥ गजा गजैर्हयैरश्वाः । पत्ति-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भिश्च पदातयः ॥ रथै रथा युयुधिरे । पूर्वमूर्वाग्निसंनिभाः ॥ ६० ॥ कश्चित्सादी गजारूढं । वीक्ष्य व्याकुलमानसं ॥ वेगिना हरिणा गत्वा । दंतिदंते पदान्यधात् ॥ ६१ ॥ वेगात्कृपाणमाकृष्य । जग्राहाशु शिरो रिपोः ॥ वीरद्रुमफलमिव । ननर्त्त च मुहुर्मुहुः ॥ ६२ ॥ कश्चित्खड्गपतिर्बाणै-र्व्याकुलः खेटकं दधत् ॥ बभार पंजरगत-कीरसाम्यं गिरः किरन् ॥ ६३ ॥ मृणालवद् बाणघाता-नवगणय्य परो भटः ॥ पश्यतः स्वस्य भूपस्या-वधीत्सत्वधरं रिपुं ॥ ॥ ६४ ॥ निरस्त्रेणापि केनाद्य । लात्वा दंतान् गजास्यतः ॥ स्वामिप्रसादादानृण्यं । लेभे रिपुवधात्तदा ॥ ६५ ॥ कश्चित्पतद्वैरिदेहो-च्छलच्छोणितबिंदुभिः ॥ लग्नैर्बभार संग्राम-लक्ष्मीरागच्छटाश्रियं ॥ ६६ ॥ गृध्रफेरववेताल-शाकिनीप्रेतरक्षकान् ॥ अतोषयत्परो वीरो । रिपुमांसैरनेकधा ॥ ६७ ॥ स्थलेऽपि रुधिराम्भोधिः । संचरिष्णुरितस्ततः ॥ उच्छलद्वाजिकल्लोलो । बभूव गजभूभ्रमत् ॥ ६८ ॥

रण एवं सप्तमासान् । यावदासीत्सुदुःसहः ॥ कोटयो दश मर्त्यानां । क्षयमापुश्च सेनयोः ॥ ६९ ॥ त्याजयन् भूपतीन् धनु-र्गजान् गर्जं च वारिदः ॥ गृह्णंस्तदात्मना गर्जन् ।

For Private And Personal Use Only

आगात्कज्जलमंजुलः ॥ ७० ॥ ये शूराः समरे धीरा । न कदाचित्पराङ्मुखाः ॥ अपासरंस्ते-
ऽपि धारा–धरे वर्षति संयुगात् ॥ ७१ ॥ मुशलोपमधाराभिः । पीडितास्त्राणवर्जिताः ॥ खे-
टकान् प्रगुणीचक्रु–र्वीरास्त्राणाय ही तदा ॥ ७२ ॥ नृपाज्ञयाथ ते सेने । रणाद्व्यावर्त्तिते क्ष-
णात् ॥ उच्चदेशान् समाश्रित्या–स्थातां कृततृणोटजे ॥ ७३ ॥ नीरैर्विलुलितैर्विश्वं–नराका-
ध्यस्त्रकर्दमान ॥ पुनस्तत्र प्ररोहं न । प्रापुर्दूर्वादयश्च ते ॥ ७४ ॥ पत्यौ धाराधरे प्राप्ते । ह-
रिद्भिन्न मेदिनी ॥ बभार नीलवसने । सरोमांचेव रागतः ॥ ७५ ॥ श्वभ्रकोटरगर्त्तादीन् । न-
दीह्रदतडागकान् ॥ अपूरयद्यान्नीरैः । संचरिष्णुर्निरंबुदः ॥ ७६ ॥ यज्जलानि लुलंतिस्म ।
जलदे जलदेऽनिशं ॥ पात्रापात्रविचारत्वं । तत्र हेतुस्तु युक्तिमान् ॥ ७७ ॥ उपाशैषुर्नृशं
सैन्यं । मशका दंशकुंतयः ॥ रागद्वेषद्विषो धर्मं । यथा साधुं च दुर्जनाः ॥ ७८ ॥ यथा य-
था पयोवाहः । कामं दोषासु गर्जति ॥ तथा तथापि पंचेषु–र्विप्रयोगिषु कुप्यति ॥ ७९ ॥
मानसेषु तथा तेषां । सिक्तोऽपि स्मरपावकः ॥ उद्दिदीपे नृशं तप्त–तैलवत्सह फूत्कृतैः ॥
॥ ८० ॥ स्मृत्वाऽरुदत्प्रियां कश्चि–द्यत्सन्नांतर्घने जने ॥ अपलापि पयोवाहे–नैव तद्गर्जता

नृशं ॥ ८१ ॥ तीक्ष्णान् शस्त्रान्निघातान् ये । चिंतयंति मृणालवत् ॥ तेषामपि तदा जाता । दुःसहाः कुसुमेषवः ॥ ८२ ॥ नीलकंचुकिनीं दृष्ट्वा । श्यामुन्नतपयोधरां ॥ अस्मरन् सैनिकाः कांतां । तथोन्नतपयोधरां ॥ ८३ ॥ अयि गर्जति पर्जन्यो । मयि स्फुर्जथुवत्पृथु ॥ दंतुरेव तृणांकुरै-र्जाता भूरिव कंटकैः ॥ ८४ ॥ झंझानिलो जीवितहृत् । दुःसहोऽनलवत्प्रिये ॥ विद्युत्खड्गेन कालो मां । भीषयत्येष भामिनि ॥ ८५ ॥ ज्वलयंति जलान्यंगं । स्मरस्तुदति सायकैः ॥ चंद्रे वृथा कथं कोपं । कुरुषे त्वं तु निर्दया ॥ ८६ ॥

इति स्वप्नोपलब्धां स्वां । वल्लभामथ कश्चन ॥ निशम्युपालंभयत्साश्रुः । पादप्रणतिपूर्वकं ॥ ८७ ॥ [redacted] ॥ प्रिये प्रियेति गदितं । श्रुत्वा चातकवक्त्रतः ॥ निजप्रियोक्तं सस्मार । कश्चित्कांतावियोगयुक् ॥ ८८ ॥ एवं विरहिणः सर्वे । पर्जन्ये गर्जति स्फुटं ॥ अवस्थामीदृशीं प्रापु-र्धिग्धिग्दैवविजृंभितं ॥ ८९ ॥ इतः शरत्सकमलां । कुर्वती वसुधामिता ॥ जलान्यपि प्रसन्नानि । सच्चेतांसीव सन्मतिः ॥ ९० ॥ फलपाकमुपेतानि । तदा शस्यानि सर्वतः ॥ मुदेऽभूवन् सुकर्माणि । यद्भावानिलोर्मिभिः ॥ ९१ ॥ अंतः प्रसन्नाः सन्मार्ग-गा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मिन्यः सरितोऽजवन् ॥ कुलद्वयोज्ज्वलानार्य । इव सद्धयो यथा ॥ ८२ ॥ चंदनं चंद्रकि-
रणा—श्चारुचीनांशुकं तदा ॥ धेनूनां च नदीनां च । पयः कस्य सुखाय न ॥ ८३ ॥ वर्षा-
सु संचितस्तापः । स्मरज्जूरविज्जूरपि ॥ तदा तेषामुद्दिदीपे । देहदाहप्रदो भृशं ॥ ८४ ॥ यो-
गमार्गे इवापंकः । शुद्धो मार्गस्तदाऽजवत् ॥ दिशः प्रसेडुः सर्वत्र । वीतरागदृशो यथा ॥८५॥
सप्तछदास्तदा पुष्प—मकरंदेनालेभिरे ॥ मधुनः सहकारित्वं । गजदानसुगंधयः ॥ ८६ ॥
नजो निर्मलतामाप । जिनधर्म इवोच्चकैः ॥ कूपदेशववदेतेषां । राज्ञां कलुषतां मनः ॥ ८७ ॥
इतश्च विमलबुद्धि—र्नाम्ना सचिवपुंगवः ॥ अन्येत्य शाविरं स्वेशं । प्रणिपत्य व्यजिज्ञपत् ॥
॥ ८८ ॥ स्वामिन्नत्रैव निकषा । कानने श्रीविलासके ॥ तापसाः पापशांत्यर्थं । तपंतः संति
सत्तपः ॥ ८९ ॥ धरंतो वल्कलान् जीर्णान् । कंदमूलफलाशिनः ॥ अस्ति चेद्युष्मदादेशो ।
नमामोऽमूंस्तदा वयं ॥ १०० ॥

इत्याकर्ण्य नरेशोऽपि । सचिवोक्तं समर्थयन् ॥ उच्चाय सर्वसैन्येन । तदंतिकमथागम-
त् ॥ १ ॥ वल्कलाछादनधरं । पर्यंकासनसंस्थितं ॥ जपमालापरावर्त्त—ध्यानसंलीनमानसं ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ २ ॥ गंगामृल्लिप्तसर्वांगं । जटामंडलमंडितं ॥ आदिनाथपदांभोज—न्यस्तहृद्षट्पदं मुनिं
॥ ३ ॥ तपस्विभिश्चान्यलोकै—र्धर्मार्थिभिरुपासितं ॥ पाणिपात्रकृताहारं । ददर्शाथ तपस्विनं
॥ ४ ॥ [redacted] ॥ सुवल्गुरिति तन्नाम । विज्ञायाथ महीपतिः ॥ ननाम नामग्राहं तं ।
भक्तिनिर्भरमानसः ॥ ५ ॥ सोऽपि मुक्त्वा मुनिर्ध्यानं । तस्मै नृपतये ददौ ॥ आशिषं सुकृ-
तश्रीणां । शिखामूर्ध्वं सृजन् करं ॥ ६ ॥ तदंतिके भक्तिनम्रः । स्पृहयालुस्तदुक्तिषु ॥ निष-
साद यथास्थानं । भूपतिः सपरिच्छदः ॥ ७ ॥ ततः श्रुतयुगादीश—वचनः स हि तापसः ॥
जगादातिस्फुरद्धर्म—बंधुरां विमलां गिरं ॥ ८ ॥ राजन्नयं हि संसारः । सागरोर्मिचलाचलः ॥
विषयावर्त्तसंलीना । निमज्जंतीह ही जनाः ॥ ९ ॥ संचरंतं शुभे मार्गे । छलयंति घनं जनं
॥ पिशाचा इव दुःखौघ—दायिनो विषया नृप ॥ ९ ॥ विषयैर्विजितो जंतुः । स्वच्छंदमथ सं-
चरन् ॥ परत्रेहापि दुःखानि । भुंक्ते तीव्राणि संसृतौ ॥ १० ॥ युगपत्पंचभिर्घातो । विषयै-
र्विषभृन्निभैः ॥ हंत जंतुरयं किं नु । कल्याणमधिगच्छति ॥ ११ ॥ ईषत्सुखाभिप्रलुभ्य । वि-
षया जंतुमादितः ॥ छलयंति मुहुर्दुष्टा । राक्षसा इव दारुणाः ॥ १२ ॥ कषाया वैरिणः का-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मं । पुण्यस्वं पूर्वसंचितं ॥ पश्यतामपि वेगेन । हरंति छलपंडिताः ॥ १३ ॥ तत्र क्रोधो महायोधो । न केनाप्यपसार्यते ॥ संचरन् प्रकृतौ जीवं । स्वस्थानमपि दूषयन् ॥ १४॥ क्रोधाग्निः पुण्यसर्वस्वं । ददेल्लग्नोंगवेश्मनि ॥ कषायेषु ततोऽमुष्य । जावो मुख्यः प्रकीर्त्तितः ॥ ॥ १५ ॥ धर्मडुबीजानि दया । दयापायो हि कोपतः ॥ तत्कोपिनो न च दया । न धर्मो न शुजा गतिः ॥ १६ ॥ प्रमादेनापि जीवानां । हिंसया स्युः कुयोनयः ॥ क्रोधेन जंतुहननं । यत्तन्नरककारणं ॥ १७ ॥ अप्येकेंडियजीवेषु । हिंसा त्याज्या मनीषिजिः ॥ दींडियादिषु यत्सा स्यात् । क्रोधात्तन्नरकप्रदा ॥ १८ ॥ धर्मडुछेदपरशु–र्बोधिबीजदवानलः ॥ परडोहोऽस्ति नरक–घारोद्घाटनकुंचिका ॥ १९ ॥ मनसापि स्मृता हिंसा । जवेद्दुःखौघकारिणी ॥ सा पुनर्विहिता सम्यक् । नरकं नयति क्षणात् ॥ २० ॥ ये राज्यादिसुखेष्वार्त्ता । ग्रंत्यश्वगजमानवान् ॥ ते दहंति निजं गेह–मुद्योतकृतबुद्धयः ॥ २१ ॥ नरकांतस्य राज्यस्य । तत्कृते किं त्वया नृप ॥ बंधुना सह वैरेण । हन्यंते जंतुकोटयः ॥ २२ ॥

अनित्यानि शरीराणि । लक्ष्मीर्बुद्बुदसन्निजा ॥ तृणाग्रितुल्या यत्प्राणाः । पापं माचर



For Private And Personal Use Only

तत्कृते ॥ २३ ॥ विरोधोऽपि भवेत्कार्ये । कस्मिन् कार्यः स वैरिणा ॥ बंधुना सह यद्वैरं ।
तदेकाकिनिषूदनं ॥ २४ ॥ निर्गुणोऽपि दरिद्रोऽपि । कदर्योऽप्यतिदुःखदः ॥ बंधुरेव वरो य-
स्मात् । स्वजीव इव सोऽपरः ॥ २६ ॥ तीव्रेणाप्यतिचंडेन । बंधुना संगमो वरः ॥ यन्मित्रे
म्रियते पद्म-ममृतांशौ न जातुचित् ॥ २७ ॥ ये राज्यादिकृते बंधू-न्निष्ठुरा घ्नंति कोपतः ॥
ते स्वांगानि स्वयं छित्वा । भुंजते ह्यतिलोभतः ॥ २८ ॥ द्वितीयबाहुतुल्येन । भ्रात्रा भूप क-
थं रणः ॥ त्वयारब्धो महालोभ-पिशाचायत्तचेतसा ॥ २९ ॥ तद्रणाद्विरम त्वं तु । संतु
सौख्येन सैनिकाः ॥ भजंतु दिग्गजा राजन् । विश्रांतिं पन्नगैः सह ॥ ३० ॥ त्वं चाराधय-
से धर्मं । श्रीयुगादिजिनं तथा ॥ तेन निर्वासिता हिंसा । कथमानीयते हि सा ॥ ३१ ॥ श्रु-
त्वेति तापसमुखा-द्दयार्द्रहृदयो नृपः ॥ उज्जगार गिरं धर्म-भिन्नस्वांतसमस्थितिं ॥ ३२ ॥
श्रीमुने भरतादित्य-यशोबाहुबलिमुखाः ॥ स्वामिपुत्रा अपि मिथः । कारणाद्रणमागमन् ॥
॥ ३३ ॥ तेऽपि तत्र निषूदंतो । गजाश्वनरसैरिभान् ॥ न दूषिता मनाग्यत्तत् । को हेतुर्घटते
ननु ॥ ३४ ॥ मज्ञाता कोपकलुष-स्त्वसन्मार्गप्रवर्त्तकः ॥ स्वयं रणधुराधुर्यो । जातोऽत्रगण-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यन् स्वकान् ॥ ३५ ॥ तथाप्ययं निजं राज्यं । भुनक्तु विरतो रणात् ॥ मदाज्ञयाहमपि च
। यास्यामि निजनिर्वृतिं ॥ ३६ ॥

ततः स तापसस्तस्य । निशम्येति वचोत्तरं ॥ जगाद सादरमना । धर्मसर्वस्वयुग्वचः
॥ ३७ ॥ नृप श्रीभरतादीनां । यत्त्वयोक्तं निदर्शनं ॥ नाटीकेते घटाकोटि—मत्र तत् श्रुणु त-
त्कथां ॥ ३८ ॥ एकेन चक्रिणो लक्ष्मी—रर्जिता मुनिदानतः ॥ परेणातिबाहुबलं । मुनिवि-
श्रामणाफलं ॥ ३९ ॥ चक्राप्रवेशाच्चक्री तु । क्रुद्धो बाहुबलिः पुनः ॥ अहं तातात्परं नौमि ।
नेति कारणतो मिथः ॥ ४० ॥ तौ तु देवोक्तितो वीरौ । जगत्संहारकारणं ॥ रणं मुक्त्वा नि-
युध्येना—युध्येतां बुद्धितांम्रवौ ॥ ४१ ॥ यत्कृतं बाहुबलिना । भरतेन च यत्कृतं ॥ तत्त्वं स्मर
महीनेतः । किं तौ दूषयसेतरां ॥ ४२ ॥ स्वामिनः सूनवस्ते तु । महोजस्का महागुणाः ॥
उदारचरिताः प्रापुः । क्षणाद् ज्ञानं च निर्वृतिं ॥ ४३ ॥ ऋषभस्वामिपौत्रोऽपि । विधाता य-
यदो भवान् ॥ तदा निदर्शनं तेषां । देयाः स्वस्यान्यथा न हि ॥ ४४ ॥ श्रुत्वेति तापसाद्वा-
णीं । किंचिन्नृपोऽथ लज्जितः ॥ व्याजहार नमन् मूर्ध्ना । नवधर्मस्य रागतः ॥ ४५ ॥ मुने

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मयाऽज्ञानवशा–द्वत्तेत्युपमितिर्वृथा ॥ किं पामरः काचचिंता–मणी नैकत्र संसृजेत् ॥ ४६ ॥
अस्मानकार्यप्रवणान् । तद्वाधि ननु तापस ॥ किं कर्त्तव्यं परत्रेह । धर्मशर्मकरं हि यत् ॥
॥ ४७ ॥ ज्ञात्वा मुनिर्धर्मरतं । दयार्द्रहृदयं नृपं ॥ पुनर्जगाद सानंद–वचोभिर्मधुसन्निभैः ॥
॥ ४८ ॥ राजन् रणात्पापकर्म–शरणाद्विरमाधुना ॥ अयं बंधुरयं वैरी । राज्यमेतदिति त्य-
ज ॥ ४९ ॥ तावत्संपत्तयः सर्वा–स्तावद्राज्यमखंडितं ॥ यावन्न मृत्युरायाति । सदा पृष्ठानु-
गोऽस्ति यः ॥ ५० ॥ क्षणविध्वंसिनः प्राणा । देहं रोगगृहं चलं ॥ संध्याभ्रसदृशं राज्यं । स्व-
हितं तद्विचिंतय ॥ ५१ ॥ देहार्थं कुरुते ह्यात्मा–त्मार्थं देहः करोति न ॥ तदसारेण देहेना–
त्मार्थं विद्वान् करोत्यलं ॥ ५२ ॥ सकृन्मूत्रवसामांस–मज्जामेदसमन्वितं ॥ श्रवन्नवश्रोत्रमि-
श्रं । भृतं रोगमलैरलं ॥ ५३ ॥ चलादतिचलं देह–मशुचेरशुचि स्मृतं ॥ तत्कृते कः सुधीः
पाप–माचरेद्दुर्गतिप्रदं ॥ ५४ ॥ [illegible] ॥ असारेणाप्यनित्येन । देहेन यदि शाश्वतः ॥ धर्मः
प्राप्येत तदहो । किं न लब्धं मनीषिभिः ॥ ५५ ॥

श्रुत्वेत्यथ गिरं भूपः । परं वैराग्यमुद्वहन् ॥ मुनेः सुवल्गोश्चरणौ । नत्वेत्याख्यद्वि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यां निधिः ॥ ५६ ॥ त्वं मे गुरुर्दैवतं त्वं । त्वमुद्धर्त्ता नवार्णवात् ॥ त्वं मे प्रसीद तद्दीक्षां । देहि कारुण्यसागर ॥ ५७ ॥ इत्यालप्य मुनेर्वाक्या–देकाक्येव ततो नृपः ॥ क्षंतुं स्वबंधुं वेगेन । तत्सैन्यांतर्मुदा ययौ ॥ ५८ ॥ ज्यायांसं भ्रातरं वीक्ष्या–गच्छंतं निर्द्वितीयकं ॥ बालिखिल्लोऽपि च रया–दुदतिष्ठन्निजासनात् ॥ ५९ ॥ स लुठित्वा महीपीठे । चरणान् पूर्वजन्मनः ॥ अमार्जयद्धूलिधूम्रौ । दोषानिव शिरोरुहैः ॥ ६० ॥ त्वं पूज्यो मद्गृहान् प्राप्तो । नाग्यैः पूर्वनवार्जितैः ॥ तत्प्रसीद गृहाणेदं । राज्यमित्यप्यसौ जगौ ॥ ६१ ॥ कनिष्ठनक्तिसंहृष्ट । उद्दिष्टं स्पष्टयन्मुनेः ॥ उवाच डाविमो वाच–मंचितां शुचिसद्गुणैः ॥ ६२ ॥ बंधो सद्बोधलाभेन । नरकडुःखनाघनं ॥ जिहीषुरस्मि राज्यं स्वं । कथं तच्च तवाद्रिये ॥ ६३ ॥ सप्तांगं राज्यमेतद्धि । सप्तापि नरका अहो ॥ चतुरंगं च डुर्योनि–शय्यायाश्चतुरंगकं ॥ ६४ ॥ गच्छतः स्वर्गतिं जंतो–राज्यलक्ष्मीः स्थितांतरा ॥ तामाछादयति स्वैर–वैरिणी छत्रदंननतः ॥ ६५ ॥ चामरे चामरेष्ठांतु । हत्वा तिर्यग्गतिं तथा ॥ अधो नयत एवामुं । राज्यतृष्णातुरं नरं ॥६६॥ कर्णैर्गजा हयाः पुच्छैः । कृपाणाश्च स्वकंपनैः ॥ चामरैर्वारवध्वश्च । शंसंत्यस्यापि चापलं ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ६७ ॥ सदा भीतिः सदा द्रोहः । सदाऽकीर्त्तिः कुचेष्टितैः ॥ सदान्यसूया यस्मिन् स्यात् ।
धिग्बंधो राज्यमप्यदः ॥ ६८ ॥ त्वामहं कोपितं भ्रातः । प्राप्तः क्षमयितुं यतः ॥ हित्वेदं रा-
॥३ए१॥ ज्यमादास्ये । व्रतसाम्राज्यमुच्चकैः ॥ ६ए ॥ ज्येष्ठस्येति गिरं धर्म्यां । श्रुत्वावोचत्ततोऽनुजः
॥ पूज्यस्यानुचरः पूर्व–मादास्ये व्रतमद्भुतं ॥ ७० ॥

इत्थमामंत्र्य तौ नृपौ । प्राप्तप्रीती ससैन्यकौ ॥ सुवल्गुमुनिपादांते । जग्मतुर्व्रतस-
स्पृहौ ॥ ७१ ॥ स्वपुत्रौ तौ निजे राज्ये । स्थापयित्वा समंत्रिणौ ॥ दशभिः कोटिभिर्मर्त्यैः
। सममासेदतुर्व्रतं ॥ ७२ ॥ ते जटाधारिणः सर्वे । कंदमूलफलाशिनः ॥ गंगामृल्लिप्तसर्वांगाः
। सर्वत्र हितबुद्धयः ॥ ७३ ॥ प्रत्यहं ध्यानसंलीना । मृगार्भकसहायिनः ॥ जपंतो जपमाला-
भिः । श्रीयुगादिजिनं सदा ॥ ७४ ॥ मिथो धर्मकथां स्वैरं । कुर्वाणा दोषवर्जिताः ॥ सदा-
र्जवगुणा वर्ष–लक्षाण्यप्यत्यवाहयन् ॥ ७५ ॥ [redacted]कं ॥ इतो विद्याधरमुनी । प्रति- ॥३ए१॥
शिष्यौ नमेरथ ॥ व्योम्नोऽवतेरतुः शुभ्रै–र्द्योतयंतौ नभोंशुकैः ॥ ७६ ॥ मूर्त्ताविव धर्मशांत–
रसौ तौ वीक्ष्य तापसाः ॥ आगत्य भक्तिभिर्बाढं । नेमुः सर्वे मुमुक्षवः ॥ ७७ ॥ कुतो यु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वां मुनी कुत्र । गंतव्यं पावनाय नः ॥ विज्ञो वा युवयोरत्रा–गतिं ते व्याहरन्निति ॥ ७८ ॥
ततो मुनीधर्मलाभ्ना–शिषं दत्वोचतुश्च तान् ॥ आवां श्रीपुंडरीकाद्रौ । गतौ श्रीजिनसेवया
॥ ७९ ॥ ततस्तैस्तौ मुनी पृष्टौ । शत्रुंजयकथां तथा ॥ आचख्यतुस्तानुदत्तुं । तादृशा हि ज-
गद्धिताः ॥ ८० ॥ अनंतसुकृताधारः । संसाराब्धितरंडवत् ॥ शत्रुंजयः सुराष्ट्रायां । गिरिर्ज-
यति शाश्वतः ॥ ८१ ॥ अत्र शत्रुंजये सिद्धा । अनंतास्तीर्थयोगतः ॥ सेत्स्यंत्यत्रैव बहवो–
ऽर्हद्यतिप्रमुखा जनाः ॥ ८२ ॥ सिद्धिलक्ष्म्या ह्ययं क्रीडा–शैलः शत्रुंजयोऽद्भुतः ॥ तत्रायाता-
न् नरान् सद्यः । सा स्वं स्थानं नयेत्सुखात् ॥ ८३ ॥ इहायातैर्नरैर्मुक्ति–सुखास्वादोऽनुभूय-
ते ॥ मुक्तिप्रभुयुगादीशो । यत्तत्रास्ते हि शाश्वतः ॥८४॥ शैलदुर्गस्थितं तत्र । नरं नाभिभवं-
त्यहो ॥ कुकर्मरिपवः क्रूरा । अप्यनंतभवानुगाः ॥ ८५ ॥ तत्र हत्यादिपापानि । विलयं यां-
त्यपि क्षणात् ॥ सूर्योदये तमिस्राणि । सज्जने कुगुणा इव ॥ ८६ ॥ श्रुत्वा तपस्विनस्तेऽपि
। शत्रुंजयकथामिति ॥ तत्र यांतौ मुनी भक्त्या । तीर्थोत्का अप्यनुव्रजन् ॥ ८७ ॥ गछंतो जी-
वयत्नेन । यथालब्धिभुजोऽथ ते ॥ ददृशुः पुरतः पाली–द्रुमालिव्याप्तिमत्सरः ॥ ८८ ॥ भी-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्मग्रीष्माककिरण–क्लिष्टैः श्वापदजंतुभिः ॥ विस्तारिभूरुहच्छाया—विश्रांतैः परिसेवितं ॥
॥ ८९ ॥ उद्भिन्नकमलामोदं । मकरंदामोदिषट्पदैः ॥ आयातैः सर्वदिग्भ्योऽपि । सच्छत्रमिव
यत्सरः ॥ ९० ॥ तापसास्तेऽपि तत्पालीं । तापशांतिकृते ययुः ॥ विशश्रमुश्च वृक्षाणां । छा-
यास्वचित्तसंश्रयाः ॥ ९१ ॥ किंचिद्विघूर्णितनयनं । चलत्स्रस्तशरीरकं ॥ श्वासोच्छ्वासोल्लसन्नी-
म्न–जठरं विरलास्यकं ॥ ९२ ॥ चालयंतं पदौ पिंगौ । गंगोज्ज्वलगुरूच्चयं ॥ मुमूर्षुं तत्र ते
हंसं । वृतं हंसैर्व्यलोकयन् ॥ ९३ ॥ [illegible] ॥ हंसा अथान्ये तं मुक्त्वा । ययुर्जनविमर्दनात् ॥
शत्रुंजयाश्रयात्पाप–कर्माणीव शरीरिणां ॥ ९४ ॥ तत्रैकोऽत्र मुनिर्गत्वा । जलमादाय पा-
त्रतः ॥ रसायनमिवामुंच–त्तन्मुखे सदयाशयः ॥ ९५ ॥ पतता तन्मुखे तेन । जलेनाकारि
तत्सुखं ॥ येन तस्मै शिवानंद–वर्णिकेव प्रदर्शिता ॥ ९६ ॥ निःशरणस्य ते जीव । चतुः-
शरणमस्तु तत् ॥ शरणं भवकांतारे । भ्रमतो भूरिदुःखदे ॥ ९७ ॥ ये केऽपि जीवा भव-
ता । यस्मिन् यस्मिन् भवे भवे ॥ विराधिताः क्षामय त्वं । तान् क्षाम्यंतु ते त्वयि ॥९८॥
शत्रुंजयं गिरिं तीर्थं । स्मरादीशं तथा जिनं ॥ इत्युक्त्वा स मुनिस्तस्मै । नमस्कारं मुहुर्ददौ

५०

For Private And Personal Use Only

॥ ९९ ॥ ~~त्रिभिर्विशेषकं~~ ॥

तेनार्त्तिरहितो हंसः । स्मृतपंचनमस्कृतिः ॥ समाधिना मृतिं प्राप्य । सौधर्मेऽनूत्सुरो-
त्तमः ॥ १०० ॥ तयोः शुद्धोपदेशेन । तापसा अपि ते तदा ॥ मिथ्यात्विकीं क्रियां मुक्त्वो-
ररीचक्रुर्जिनव्रतं ॥ १ ॥ ये मूर्धजा जटाबंधे-र्वृद्धिमापुः परं परां ॥ समूलकाषं कषिता-स्ते-
ऽलुठन् भुवि सागसः ॥ २ ॥ आलोच्यापि च मिथ्यात्वं । व्रतिनस्ते तयोः पुरः ॥ सम्यक्त्व-
मस्तुवन् भक्त्या । दुःप्राप्यं भवसागरे ॥ ३ ॥ पूर्वमेव जिने भक्ता । व्रतेऽपि च तथाभव-
न् ॥ ताभ्यामनुमतास्तेऽथा-चलन् शत्रुंजयंप्रति ॥ ४ ॥ मार्गे जनान् बोधयंतः । पावयंतो
महीतलं ॥ चलंतो जीवयत्नेन । सिद्धाद्रिं ते व्यलोकयन् ॥ ५ ॥ श्रीयुगादिजिनेशेन । शिरो-
रत्नेन मंडितं ॥ महीवधूमौलिमिव । वनकुंतलमंजुलं ॥ ६ ॥ उद्भिन्नरत्नकिरणै-रुच्चैः कांचन-
सानुभिः ॥ अष्टोत्तरशतेनाम्ना-सितं दीपैरिवान्वितः ॥ ७ ॥ वीक्ष्य पुण्योच्चयमिव । विमला-
द्रिं मुनीश्वराः ॥ अमंदां मुदमासेदु-र्वीणिकामिव निर्वृतेः ॥ ८ ॥ [redacted] ॥ सोत्सा-
हा दर्शनेनामी । उल्लाघाः कर्मरुक्क्षयात् ॥ तमारुरुहुरुत्तुंग-मिव मुक्तिगृहांगणं ॥ ९ ॥ ते

त्रिःप्रदक्षिणी कृत्य । नित्यां राजादनीं मुदा ॥ नेमुः श्रीऋषभं कुंद—कर्पूरोपमगौरनं ॥ १० ॥
उल्लसद्भक्तिनुन्नास्ते । निजशक्त्यनुमानतः ॥ अनंतान् जगदीशस्य । गुणानप्युज्जगुर्मुदा ॥
॥ ११ ॥ मासक्षपणपर्यंते । तौ मुनी ज्ञानिनौ परान् ॥ दशकोटिमितान् साधू—नन्वशिष्टा-
मिति द्रुतं ॥ १२ ॥ साधवः संसृतौ कर्मा—नंतमर्जितमादितः ॥ नवभिरशुभध्यान—योगतो
नरकप्रदं ॥ १३ ॥ तदत्र स्थेयमेवास्य । सत्क्षेत्रस्यानुभावतः ॥ केवलज्ञानमासाद्य । यूयं मु-
क्तिं गमिष्यथ ॥ १४ ॥

इत्थमादिश्य तान् सर्वान् । तौ देवर्षी विहायसा ॥ जग्मतुर्द्योतयंतौ स्व—प्रभाभी रोद-
सीं बहु ॥ १५ ॥ ते द्राविडवालिखिल्ल—मुखास्तत्र तपस्विनः ॥ तस्थुस्तीर्थजिनध्यान—परा
मासोपवासिनः ॥ १६ ॥ निःशेषक्षीणमोहांगाः । कृत्वा निर्यामणां ततः ॥ क्षामयित्वाखि-
लान् जंतून् । मनोवचनयोगतः ॥ १७ ॥ निर्मलं केवलं प्राप्य । दुष्टकर्माष्टकक्षयात् ॥ अंत-
र्मुहूर्तांते प्रापु—र्दशकोटिमिताः शिवं ॥ १८ ॥ [illegible] ॥ सौधर्मतः समागत्य । हंसदेवोऽपि भ-
क्तितः ॥ तेषां महर्द्ध्या व्यतनो—न्निर्वाणोत्सवमुच्चकैः ॥ १९ ॥ निजं स्वरूपमुक्त्वा च । ज-

॥३९९॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नेन्यस्तत्र पावनं ॥ हंसावतारमासूत्र्य । तीर्थं प्रापत्पुनर्दिवं ॥ २० ॥ युग्मं ॥ कार्त्तिकके
पूर्णिमास्यां । कृत्तिकस्थे निशाकरे ॥ मुनयः केवलेनैते । सिद्धिं शत्रुंजये ययुः ॥ २१ ॥ य-
था चैत्रस्य राकायां । पुंडरीकोऽगमच्छिवं ॥ कार्त्तिकस्य तथैतेऽपि । तदेते पर्वणी स्मृते ॥२२॥
चतुर्मासावधिस्तुर्य—पूर्णिमास्यां भवेदपि ॥ शिवलब्ध्युत्सवोऽप्येषां । तस्यामेव सुरैः कृतः ॥
॥ २३ ॥ यात्रया तपसा दाना—द्देवार्चनविधानतः ॥ अन्यत्रान्यकालपुण्या—त्तस्यां स्यादधिकं
फलं ॥ २४ ॥ युग्मं ॥ कार्त्तिके मासक्षपणं । तत्कर्म क्षयपत्यहो ॥ नरके सागरशते—र्नापि
यत्क्षप्यते न हि ॥ २५ ॥ एकेनाप्युपवासेन । कार्त्तिक्यां विमलाचले ॥ ब्रह्मयोषिद्भ्रूणहत्या
—पातकान्मुच्यते नरः ॥ २६ ॥ यः कुर्यात् कार्त्तिकीराका—मत्रार्हद्ध्यानतत्परः ॥ स भुक्त्वा
सर्वसौख्यानि । निर्वृतिं लभते ततः ॥ २७ ॥ वैशाखकार्तिकमधुप्रमुखेषु मास्सु । राकासु
ये समधिगम्य समं च संघैः ॥ श्रीपुंडरीकगिरिमादरतो विदध्यु—र्दानं तपांसि शिवसौख्य-
भुजो हि ते स्युः ॥ २८ ॥ तन्नंदनैस्तत्र समेत्य यात्रया । प्रासादपंक्तिर्विरचय्यतेस्म सा ॥
यया बभौ सिद्धिमहाचलो भृशं । प्रवर्धमानः किल पुण्यराशिभिः ॥ २९ ॥ इति मुनिपति-

॥३९६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कोटिभिः प्रभूता–भिरिह शिवं विमलाचलेऽथ लेभे ॥ त्रिजगति विदितं ततोऽस्ति तीर्थं ।
स्मृतिभवपुण्यचयेन पावनं तत् ॥ ३० ॥ गतायां भरतेशस्य । पूर्वकोटौ शिवोदयात् ॥ तै-
र्द्राविडवालिखिल्ल–प्रमुखैर्निर्वृतं गिरौ ॥ ३१ ॥ सुरेशात्रावसर्पिण्यां । प्रथमोद्धारकृद्भवौ ॥ भ-
रतेशोऽप्यशेषाणा–मुद्धाराणां शृणु स्थितिं ॥ ३२ ॥ इति प्रथमोद्धारः समाप्तः ॥

वंशे श्रीभरतस्यासी–दयोध्यायां महीपतिः ॥ अष्टमो दंडवीर्याख्य–स्तेजसां यशसां
पतिः ॥ ३३ ॥ आचारं भरतेशस्य । श्राद्धपूजनलक्षणं ॥ स सत्यापयति प्रोच्चै–स्त्रिखंडभर-
ताधिपः ॥ ३४ ॥ स षोडशसहस्रेषु । राजसु स्फुटभक्तिषु ॥ निषसेष्वन्यदास्थान्या–मलं-
चक्रे वरासनं ॥ ३५ ॥ गतेष्वथ च षट्कोटि–पूर्वेषु भरतादनु ॥ सौधर्मेंद्रः सभासीनः । स-
स्मार भगवद्गुणान् ॥३६॥ तुष्टाव च स तत्तादृग्–पुंरत्नाश्रयमीशितुः ॥ वंशं शाखाशतेनोच्चै–
र्जगदालंबनक्षमं ॥ ३७ ॥ वर्यवीर्यं दंडवीर्यं । ततः स्फूर्जद्यशस्विनं ॥ सूर्यवंशजतेजांसि । ह-
रंतं निजवीर्यतः ॥ ३८ ॥ सहस्राक्षमिवानेकान् । पश्यंतं चरचक्षुषा ॥ सहस्रबाहुवद्दिग्भ्य ।
आकर्षंतं श्रियोऽखिलाः ॥ ३९ ॥ सहस्रजिह्ववत्सर्वान् । योजयंतं च कर्मसु ॥ उद्वहंतं निजे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूर्ध्नि । मुकुटं जगदीशितुः ॥ ४० ॥ सर्वाभरणसंभार-तेजोभिर्भासुरं बहु ॥ मूर्त्याप्यदृश्यं दोष्मंतं । नयधर्मपरायणं ॥ ४१ ॥ दृढभक्तिं युगादीशे । सद्भक्तिं विश्वपालने ॥ सेव्यमानं घनं भूपै-र्वीज्यमानं च चामरैः ॥ ४२ ॥ शृण्वंतं धर्ममाहात्म्यं । हेमसिंहासनस्थितं ॥ सभासीनं सुधर्मेशो-ऽपश्यत्तं ज्ञानचक्षुषा ॥ ४३ ॥ [redacted] ॥ लोलमौलिः प्रीतचेताः । भक्तोवंशेऽतिभक्तिमान् ॥ अथ शक्रः श्राद्धवेशं । कृत्वायोध्यामुपागमत् ॥ ४४ ॥ वैकक्षवद्धेमसूत्र-त्रयेण हृदि भूषितं ॥ एकवासःपरीधानं । ब्रह्मव्रतपवित्रितं ॥ ४५ ॥ द्वादशव्रतधारित्वा-चार्वति तिलकान्यपि ॥ बिभ्राणमीषत्कपिल-शिखामात्रशिरोरुहं ॥ ४६ ॥ गृणंतं चतुरो वेदान् । भरतेशेन निर्मितान् ॥ अर्हद्यतिश्राद्धधर्म-लक्षणान् गतदूषणान् ॥ ४७ ॥ आचमंतं जलैः शुद्धैः । पताकाकारपाणिना ॥ तं वीक्ष्य दंभवीर्योऽभू-त्तस्मिन् सादरमानसः ॥ ४८ ॥ [redacted] ॥ आज्ञापयदथो सूदां-स्तद्भोजनकृते नृपः ॥ दानशालासु तैः सार्द्धं । ययौ सोऽपीर्यया चरन् ॥ ४९ ॥ पठतस्तत्र वेदांगान् । शांतिपाठांश्च कांश्चन ॥ जपतः परमं ब्रह्म-ध्यानलक्ष्यं तथा परान् ॥ ५० ॥ त्रिकालं देवपूजायै । त्रिशुद्ध्या कांश्चिदंबुभिः ॥ स्नानिनो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वंदमानांश्च । कांश्चिद्ध्यानपरान् मुनीन् ॥ ५१ ॥ कर्मेधनैस्तपोवह्ना—व्हिंसां जुह्वतः परान्
॥ जिनैरुक्तां गां पवित्रा—मित्युदीरयतः परान् ॥ ५२ ॥ आत्मारामे ज्ञावजलैः । स्नानिनः
शुचिमानसान् ॥ क्रमात्संक्रंदनः श्राद्धान् । वीक्ष्याप मुदमद्भुतां ॥ ५३ ॥ [redacted] ॥ श्रा-
द्धान्निवादये तुभ्य—मितिवादिन्निरुह्नितैः ॥ आचम्य शुचिन्निस्तोयै—स्तैः समं सोऽविशद्गृहान्
॥५४॥ कोटिश्राद्धकृते जात—मन्नपाकं क्षणादपि ॥ दिव्यप्रज्ञावादेकः सन् । सोऽभुग्मायानटः
सुरः ॥ ५५ ॥ परिवेषयतान्नं रे । बुभुक्षाकुलितस्य मे ॥ कथं सूदा दंभवीर्य—पुण्यं व्यर्थय-
ताधुना ॥ ५६ ॥

इत्याकर्ण्य तदुक्तिं तै—र्विज्ञप्तो विस्मितैर्नृपः ॥ स्वयमेत्य क्षामकुक्षि—मपश्यत्तं विसं-
स्थुलं ॥ ५७ ॥ सोऽपि दृष्ट्वा महीजानिं । श्राद्धश्रद्धासमन्वितं ॥ जगाद कठिनां वाचं । दी-
नन्नावं विज्ञावयन् ॥ ५८ ॥ राजन्नमी त्वया सूदा । नियुक्ताः श्राद्धवंचकाः ॥ मामप्येकं बु-
भुक्षं यत् । प्रीणयंति न सांप्रतं ॥ ५९ ॥ अन्यानपि नृशं लज्जा—सज्जानेवं हि सुस्थितान् ॥
वंचयंति सदैवामी । स्वयमौदरिकाः खलु ॥ ६० ॥ तत् श्रुत्वा कुपितोऽपीष—दपाचयदथो नृ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पः ॥ शतमूढकमानेन । सूदैरन्नं स्वदृकूपुरः ॥ ६१ ॥ मायया स क्षणादेव । पश्यतो नृपते-
स्तदा ॥ जग्रासान्नं यथा वह्निः । सर्वमिंधनसंचयं ॥ ६२ ॥ जगाद च महाराज । भरता-
न्वयभूषण ॥ सर्वेषामपि पूर्वेषां । कीर्त्तिं वर्द्धयसीह भोः ॥६३॥ मामप्येकं क्षुधाक्रामं । न प्री-
णासि यतः प्रभो ॥ भोक्तारस्तदमी स्वे स्वे । गृहे त्वयि तु कीर्त्तिदाः ॥ ६४ ॥ कीर्त्तिः श्री-
भरतेशस्य । भवता कुलसूनुना ॥ इत्थं पुण्यमतिप्रौढिं । गमिष्यति विशेषतः ॥ ६५ ॥ पू-
र्वेषां यः कुलं कीर्त्तिं । पुण्यं नाधिकतां नयेत् ॥ जातेनाप्यथ किं तेन । जननीक्लेशकारिणा ॥
॥ ६६ ॥ तस्य सिंहासने किं त्वं । निषीदसि विषीदसि ॥ भगवन्मुकुटं किंवा । मूर्ध्ना तेन
बिभर्षि हि ॥ ६७ ॥ श्राद्धभोज्यादिकां मायां । मुंच सात्म्यं निजं भज ॥ प्रतार्यंते कथं म-
र्त्याः । सत्रशंकाकृते त्वया ॥ ६८ ॥ तस्येति निष्ठुरां वाचं । श्रुत्वापि न चुकोप सः ॥ स्वपु-
ण्यापूर्णतां जानन् । प्रत्युत स्वं निनिंद च ॥ ६९ ॥ ज्ञात्वा च नृपतेर्भावं । जगौ मंत्री प-
वित्रवाक् ॥ स्वामिन्नयं श्राद्धरूपो । दैवतं छलकृत्पुनः ॥ ७० ॥ श्राद्धवेषेऽस्ति ते भक्ति–र्यदि
तां तत्समाचर ॥ भक्तिप्रीतः कदाप्येष । प्रकटीभविता ननु ॥ ७१ ॥ श्रुत्वेति भूपतिर्धूपं ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





चंदनागुरुमिश्रितं ॥ ददाह तत्पुरो भक्त्या । पुण्यं वाक्यं जगाद च ॥ ७२ ॥ कस्त्वं श्रावक-
वेषेणे—हागा मां पावितुं ननु ॥ कुर्वन्मयि कृपां देव । तद्भवान् प्रकटीभव ॥ ७३ ॥ अतःपरं
न ते युक्तं । देव खेदयितुं हि मां ॥ श्राद्धवेषधरं मर्त्यं । नमस्याम्येव निश्चयः ॥ ७४ ॥ यद्य-
स्ति मामकी भक्ति—र्जिनधर्मे गुरौ त्वयि ॥ तदा स्वं रूपमाधाय । मत्पुण्यं सफलीकुरु ॥
॥ ७५ ॥ भक्तिनिर्भरमित्यस्य । श्रुत्वा वाक्यं पुरंदरः ॥ चित्तांतः प्रीतिमान् जज्ञे । प्रशशंस
च तं मुहुः ॥ ७६ ॥ ज्ञात्वा खिन्नं मनश्चास्य । नाकिनाथस्ततोऽमुचत् ॥ मायारूपं च सह-
जं । तादृग्जग्राह वेगतः ॥ ७७ ॥ सविस्मयो वीक्ष्य शक्रं । दंडवीर्योऽनमन्मुदा ॥ उद्धृत्य
पाणिना तं चा—लिंग्य स्नेहात्पुरंदरः ॥ ७८ ॥ उवाच च महासत्व । धन्यस्त्वं चरमांगवान्
॥ दृष्टे त्वयि जगन्नाथं । स्मरे यत्तत्कुलोद्भवे ॥ ७९ ॥ सुधर्मायां मया स्वामी । स्मृतस्ता-
दृग्गुणाश्रयः ॥ तद्वंशो भरतादित्य—मुख्यश्चाद्य सुचित्रकृत् ॥ ८० ॥ गुणैस्तेभ्योऽधिकस्त्वं
तु । पूर्वांगीकृतकर्मयुक् ॥ त्वयैव कुलपुत्रेण । स्वामिवंशोऽद्य भासते ॥ ८१ ॥ वंशस्थिति-
र्गुणा धर्मः । कीर्त्तीराज्यमखंडितं ॥ नीयते यैर्नृशं वृद्धिं । त एव तनया ननु ॥ ८२ ॥ कृत्यं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भरतभूभर्त्तुस्त्वयि पुत्रे महीयते ॥ ततः शत्रुंजये यात्रां । तीर्थोद्धारं कुरुष्व च ॥ ८३ ॥
कर्त्तास्मि तव सांनिध्यं । सह देवैः समागतः ॥ अतस्त्वरस्व यात्रायै । श्राद्धपूजनवन्नृप ॥
॥८४॥ श्रवणादिति भूभर्त्ता । सानंदं प्रति तं जगौ ॥ साधु शक्र त्वयादिष्टं । त्वं मे भरतस-
न्निभः ॥ ८५ ॥ भक्तोऽस्ति जगतामीशे । नापरस्त्वत्समो ननु ॥ गृह्यसे भरतेशस्य । स्नेहे-
न यदिहागमः ॥ ८६ ॥ चलितोऽस्म्यथ यात्रायै । समं संघेन सांप्रतं ॥ आवयोः पुंडरीका-
द्रौ । संगमः पुनरेव हि ॥ ८७ ॥ ततः शक्रेण तुष्टेन । ददेऽस्मै सशरं धनुः ॥ दिव्यो रथश्च
हारश्च । कुंडले अमले अपि ॥ ८८ ॥ तस्मिन्दूरीकृते त्रिदशे । द्यां ययौ द्योतयन् जगत् ॥ दं-
डवीर्योऽथ यात्रायै ॥ भंभानादमकारयत् ॥ ८९ ॥ आकृष्टास्तेन नादेन । दूतेन च जनव्रजाः
॥ स्वस्ववाहनसंयुक्ता । ऐयरुस्तत्र वेगतः ॥ ९० ॥ कृतस्नानः पवित्रांगः । शुचिवस्त्रधरो नृ-
पः ॥ अर्हद्बिंबमथो नत्वा । चचाल सुदिने जनैः ९० ॥ विपुलायाश्च वैपुल्यं । हरन् विपुल-
सैन्यतः ॥ तेजस्विनां हि तेजांसि । लुंपन् रेणुभिरुत्थितैः ॥ ९१ ॥ चतुर्विधेन संघेन । च-
तुर्धा धर्मवृद्धये ॥ चतुरंगबलेनापि । चतुर्धाबुद्धिसंयुतः ॥ ९२ ॥ चतुर्गतिनिषेधाय । कषाया-

॥४०२॥

For Private And Personal Use Only

न् चतुरस्त्यजन् ॥ चतुर्भिर्लोकपालैस्तैः । पंचमो लोकपालकः ॥ ९३ ॥ महाधरैश्च सामंतै-
र्मंत्रिभिः सैन्यनायकैः ॥ वृतश्चतुर्भिः प्रत्येकं । स रराज पथि व्रजन् ॥ ९४ ॥ [illegible] ॥
पुरो देवालयन्यस्त-जिनबिंबप्रभावतः ॥ तस्य विघ्नं कर्तुमलं । नाभूवन् क्षुद्रदेवताः ॥ ९५ ॥
अतिक्रामन् बहून् देशान् । तत्पतिभ्य उपायनीं ॥ गृह्णन् काश्मीरदेशं च । प्रापत्कतिपयै-
र्दिनैः ॥ ९६ ॥ प्रातर्यावत्समं सैन्यै-रियेष गमनं नृपः ॥ तावच्छैलमहाशैलौ । शैलावरुधतां
पथः ॥ ९७ ॥ नाशीरं नृपतेः किंचिद् । दृष्ट्वा भीतेरुपागमत् ॥ स्वामिन् शैलौ स्थितौ मा-
र्गं । रुध्ध्वेति बहुभाषकः ॥९८॥ विज्ञाय कौतुकाद्राजा । समीपमगमत्तयोः ॥ तावत्प्रलयशै-
लाभौ । शैलावास्फलतां मिथः ॥ ९९ ॥ तयोः संघट्टजन्मा यः । स्फुलिंगोत्कर उद्ययौ ॥
जाने स एव वम्रवा-वह्निदंभोलिभास्कराः ॥ ३०० ॥ ततो वह्निः समुत्पन्न-स्त्रिजगद्दहनक्र-
मः ॥ सेहे न केनचित्तेजो-लेश्येव मुनिसत्तमात् ॥ १ ॥ आलोकितो महीशेन । सुमतिः स-
चिवो जगौ ॥ स्वामिन् केनापि देवेन । दुष्टेनैतद्विचेष्टितं ॥ २ ॥ तच्छांत्यै नृपपूजाद्यं । किं-
चिदाचर भक्तितः ॥ ततः प्रीतो यथा सोऽपि । स्वं रूपं दर्शयिष्यति ॥ ३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति मंत्रिगिरा राजा । शुचिः पूजादिकं स्वयं ॥ तस्मै चकार संतो हि । प्रायेण परतु-
ष्टिदाः ॥ ५ ॥ शांत्युपायैरपि कृतै–र्न तुतोष सुरो मनाक् ॥ वन्हवाग्निर्जलैः सिक्तो । ज्वल-
त्यपि विशेषतः ॥ ६ ॥ इंद्रदत्तं ततो धन्व । स्मृतिमात्रादुपागतं ॥ पूजयित्वा करे राजा ।
जग्राह रिपुनाशनं ॥ ७ ॥ तज्ज्योतिषा महीनेता । संवर्मित इवाबभौ ॥ दुःखांधकारविध्वा-
यी । रिपुश्चासीत्तदाधिकं ॥ ८ ॥ ईषदाकृष्य तद्राजा । टंकारं चाप्यकारयत् ॥ वज्रघातभ्रये-
नेव । तेन तावपसारितौ ॥ ९ ॥ वज्रेऽप्यकुंठमर्मरे–रप्यवार्यं महीधवः ॥ बाणं युयोज ध-
नुषा । रिपुप्राणनिषूदनं ॥ १० ॥ जीर्णपर्णमिवादित्य–बिंबं किं भेदयिष्यति ॥ कर्पासास्थी-
नीवोडूनि । बलादुन्मूलयिष्यति ॥ ११ ॥ भांडखंडमिवादित्यं । प्रोन्नाल्यापि कथं हठात् ॥
तूलपूलमिवेंदुं किं । दूरादुत्क्षेप्स्यति द्रुतं ॥ १२ ॥ भ्रमापयद्वा किं कीर्त्तिं । ब्रह्मांडं पाटयिष्य-
ति ॥ इत्याशशंके पार्श्वस्थैः । स बाणं योजयन्नृपः ॥ १३ ॥ [redacted] ॥ ततश्च कश्चिदत्यु-
ग्रो । दीप्तनेत्रो भयंकरः ॥ पिंगान् केशान् दधन्मूर्ध्नि । विंध्याद्रौ दाववह्निवत् ॥ १४ ॥ गुहो-
पमघ्राणरंध्र–वायुना भंजयन् द्रुमान् ॥ घर्षद्दंतसमुद्भूत–वह्निज्वालाकरालितः ॥ १५ ॥ ता-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लोपमबाहुदंभः । शिलासन्निभहृदूदृढः ॥ अंकुशाभनखव्रात–विदारितमृगाधिपः ॥१६॥ लो-
लया जिह्वया गृह्णन् । गजादीन् निकटस्थितान् ॥ उच्चरन् रक्ष रक्षेति । वेतालः प्रकटोऽभ-
वत् ॥१७॥ [redacted]॥ तद्गिरा धरणीजानि–रस्थादाकृष्टकार्मुकः ॥ विडंबयन् तीक्ष्णरश्मिं ।
कल्पांते परिवेषिणं ॥ १८ ॥ उवाच च त्वया मार्गः । कथं रुद्धोऽस्ति रौद्र रे ॥ बलेन कस्य
कोऽसि त्वं । वेताल तदहो वद ॥ १९ ॥

अथाचख्यौ स वेतालो । महाराज कृपापर ॥ दंभवीर्यं मयि क्रोधं । मा कृथास्तत्र किं-
करे ॥ २० ॥ शृणु येन निरुद्धोऽसि । मयानात्मज्ञशालिना ॥ सूर्यो जीर्णांबरेणेव । तृणेनेव
हुताशनः ॥ २१ ॥ पुरा वियद्गतिर्नामा–भूवं विद्याधराग्रणीः ॥ जितोऽहं च त्वया राजन् ।
संगरे बहुहेतिभिः ॥ २२ ॥ मृतस्तदर्त्या स्वल्पायु–र्भवान् भ्रांत्वात्र कानने ॥ पुण्येन केन-
चिज्जातो । वेतालोऽहं नगांतरा ॥ २३ ॥ भगिज्ञानात्समायांत–मीक्ष्वाकुकुलमंडनं ॥ भवंतं
वीक्ष्य मूर्खोऽह–मस्थां मार्गे निरुध्य ते ॥ २४ ॥ त्वद्धनुष्टंकृतेरेतौ । नगौ जातौ विसंस्थुलौ
॥ तार्क्ष्यपक्षाभिघातेन । नागपाशाविवायतौ ॥ २५ ॥ पुरा नाहं जितः कैश्चि–द्दक्षोदानव-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मानवैः ॥ त्वद्वलं सोढुमनलं । जितोऽस्मि जवताधुना ॥ २६ ॥ स्थास्याम्यत्र तवादेशात् ।
पूर्वकिंकरवद्विन्नो ॥ इति ब्रूवाणं वेतालं । तत्रैवास्थापयन्नृपः ॥ २७ ॥ व्यावृत्याथो विकोपः
सन् । स्नात्वा संपूज्य दैवतं ॥ कृतजेमनकल्याण–श्चचाल सपरिच्छदः ॥ २८ ॥ सोऽखंमग-
मनः पृथ्व्या–खंमलः कतिचिद्दिनैः ॥ जरतेशवदाश्वागा–च्छ्रीशत्रुंजयसन्निधिं ॥ २९ ॥ आनं-
दाख्ये पुरे सर्वं । जरतेश इवाकरोत् ॥ जिनपूजातीर्थपूजा–संघपूजादिकं नृपः ॥ ३० ॥ शत्रुं-
जयायाः कुंमाच्च । जारतादपरादपि ॥ तीर्थोदकमुपादाय । स चारोहन्महाचलं ॥ ३१ ॥ मु-
ख्यशृंगमथ प्राप्य । पुण्यसेवाविचक्षणः ॥ स त्रिःप्रदक्षिणीचक्रे । तद्भक्तेतरमानसः ॥ ३२ ॥
प्रासादान् जगतां जर्तु–र्जरतेन विनिर्मितान् ॥ दृष्ट्वा प्राप मुदं राजा । तत्कीर्त्तिङ्कूनिवामला-
न् ॥ ३३ ॥ इतश्चावधिना ज्ञात्वा । तत्रायातं नरेश्वरं ॥ आखंमलोऽप्यखंमाङ्कः । समं देवैरु-
पागमत् ॥ ३४ ॥ मुख्यशृंगं च चैत्यं च । तथा राजादनीडुमं ॥ स समवसरणे च । पादु-
के त्रिरपूजयत् ॥ ३५ ॥ शक्रोक्तविधिना देव–संघपूजोत्सवादिकं ॥ स चकार शुभं कर्म ।
दारिद्र्यद्रुदवानलः ॥ ३६ ॥ सोऽष्टाह्निकात्रयं याव–त्तीर्थोत्सवमिति व्यधात् ॥ शृण्वन् तद्गिरि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



माहात्म्य-मुत्तमं मुनिदेशितं ॥ ३७ ॥ जर्जरान् जगतः स्वामी । प्रासादान् वीक्ष्य दुःखितः
॥ शक्रानुमत्या नृपति-स्तदुद्धारमथाकरोत् ॥ ३८ ॥ रैवताद्रावपि तथा । पूर्ववन्महदुत्सवं ॥
निरमात्तीर्थोद्धरण-मपि शक्रयुतो नृपः ॥ ३९ ॥ अथार्बुदस्य वैभारा-ष्टापदाचलयोरपि ॥
सम्मेतेऽपि समं संघे-र्यात्रोद्धारौ नृपो व्यधात् ॥ ४० ॥ ततः स्वराज्यमासाद्य । धर्मधुर्यो ध-
राधवः ॥ प्रासादान् कोटिशोऽकार्षी-त्तीर्थयात्रादिपुण्यवान् ॥ ४१ ॥ भरतेशवदादर्शे-ऽन्यदा
पश्यन् वपुःश्रियं ॥ जानन्नसारतां चित्ते । वव्रे केवलसंपदा ॥ ४२ ॥ पूर्वार्द्धव्रतपर्यायं । पा-
लयित्वोपकारकृत् ॥ अंते शिवश्रियं प्राप । दंडवीर्यो महामुनिः ॥ ४३ ॥ पुरंदराद्राविह ती-
र्थराजे । द्वैतीयिकोद्धारकरो नृपोऽभूत् ॥ श्रीदंडवीर्यो भरतस्य वंशे । पुण्यः स मुक्तिं प्रययौ
हि तेन ॥ ४४ ॥

॥ [redacted] ॥

अन्यदेशानशक्रोऽगा-द्भक्त्या नंतुं जिनेश्वरान् ॥ क्षेत्रे महाविदेहाख्ये । सदार्हत्केवलस्थि-
तौ ॥ ४५ ॥ तत्र सिंहासनासीनं । छत्रत्रयविराजितं ॥ जिनं स्तुत्वा च नत्वा च । निषसाद



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हरिः सुरः ॥ ४६ ॥ स्वामी सर्वजनानंद-दायिन्या देशनागिरा ॥ अथाजाषत कैवल्य-कलिताशेषविष्टपः ॥ ४७ ॥ यथा जवेषु मानुष्यो । ग्रहेष्विव दिवाकरः ॥ तथा द्वीपेषु जंब्वाख्यो । द्वीपः सर्वोत्तमो गुणैः ॥ ४८ ॥ सुराष्ट्रा सर्वदेशेषु । पुंमरीको नगेष्विव ॥ तत्र देवेषु नाजेयः । कीर्त्तनादपि पापहृत् ॥ ४९ ॥ क्षेत्रं तजारतं धन्यं । धन्यास्तेऽपि जना ननु ॥ यत्र शत्रुंजयं तीर्थं । पूजयंति च ये जिनं ॥ ५० ॥ एनसां शांतिरेव स्यात् । हृदिस्थे विमलाचले ॥ तमसां किं प्रवृत्तिः स्यात् । सदा सूर्यंतिकस्थिते ॥ ५१ ॥ यद्बोधिबीजं दुःप्राप्यं । जवैः कोटिजिरप्यहो ॥ शत्रुंजये जिनध्याना-ल्लज्यते तत्क्षणादपि ॥ ५२ ॥ सम्यक्त्वं सर्वतत्वेषु । त्रिदशेषु यथा जिनः ॥ दुर्लजः सर्वतीर्थेषु । तथा शत्रुंजयो गिरिः ॥ ५३ ॥ इतीशानपतिः श्रुत्वा । देशनां त्रिजगद्गुरोः ॥ तीर्थोत्कंठी क्षणादेव । प्राप शत्रुंजयं गिरिं ॥ ५४ ॥ अष्टाह्निकां सुरैः सार्धं । तत्र चक्रे सुरेश्वरः ॥ पश्यन् स्तुवन्नमंस्तीर्थं । जिनवाचं समर्थयन् ॥ ५५ ॥ किंचिज्जर्जरितांस्तत्र । दिव्यशक्त्याथ वासवः ॥ प्रासादांश्च नवीचक्रे । जिनजक्तिवदुज्ज्वलान् ॥ ५६ ॥ अतीते सागरशते । दंमवीर्यनृपादजूत् ॥ उद्धारोऽसौ पुंमरीके । इशान-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पतिना कृतः ॥ ५७ ॥

॥ इति तृतीयोद्धारः ॥

अन्यदा चैत्रराकायां । पर्वणि त्रिदशोत्तमः ॥ आजग्मुः पुंडरीकाद्रौ । नंतुं श्रीवृषजप्रभुं ॥ ५८ ॥ तदा च हस्तिसेनाख्ये । पुरे देवी सुहस्तिनी ॥ जज्ञे कालवशान्मिथ्या—दृष्टिः कोटिसुरैर्वृता ॥ ५९ ॥ महाबलवती क्रूरा । द्वेषिणी जिनधर्मिणि ॥ तालध्वजमुखान् क्षेत्र—पालन् स्ववशागन् व्यधात् ॥ ६० ॥ तीर्थं विसंस्थुलं चक्रे । स्वगर्वोद्धुरया तया ॥ स्वैराचार-परद्रोह—मद्यमांसाशनाशया ॥ ६१ ॥ आगतेष्वथ देवेषु । मायया सा बहून् नगान् ॥ शत्रुंजयसमान् कृत्वा । वंचयामास तानलं ॥ ६२ ॥ सुरास्तान् सुबहून् दृष्ट्वा । विस्मयस्मेरमानसाः ॥ चिंतयामासुरन्योऽन्य—मुखवीक्षणदक्षिणाः ॥६३॥ शत्रुंजयनगा एते । किं संति बहवो भुवि ॥ किंचैकोऽस्मद्भक्तिदैर्घ्या—ज्जातो रूपैरयं घनैः ॥ ६४ ॥ एकस्मिन्नथवा शैले—ऽमातोऽस्मान् वीक्ष्य किं बहून् ॥ सहस्ररूपतां प्राप । पर्वतोऽयं प्रभाववान् ॥ ६५ ॥ चिंतापरैरिति सुरै—रप्रयुज्यापि चावधिं ॥ चक्रिरे सर्वतः सर्वैः । स्नात्रपूजादिका क्रिया ॥६६॥ या-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वदष्टाह्निकां कृत्वा—रीयुस्ते त्रिदशा गतिं ॥ तावन्नैकमपि शृंग—मपश्यन् विमलाचले ॥६७॥ किमेतदिति संभ्रांते—स्तैरतर्कि समं सुरैः ॥ कथमस्मत्कुलत्तयायं । तिरोऽभूद्विमलाचलः ॥ ॥ ६८ ॥ किं वयं भनसश्चिंता—मात्राद्धा दूरतो गताः ॥ यथैषोऽन्यान्नयेत्स्वर्गं । तथा किं स्वयमप्यगात् ॥ ६९ ॥ विश्वपावनकृत्तीर्थ—मेतद्भूमौ हि सुस्थितं ॥ पश्यामोऽनेकधा पूर्व—मेकमप्यधुना न हि ॥ ७० ॥ नाकिनश्चिंतयित्वेति । ज्ञानं त्ववधिसंज्ञकं ॥ प्रायुंजतालोकयंश्च । तत्सुरीकपटं स्फुटं ॥ ७१ ॥

ततः क्रुद्धाः सुराः सर्वे । प्रलये भास्करा इव ॥ कोपज्वालां महाघोरां । मुमुचुस्तां सुरींप्रति ॥ ७२ ॥ दह्यमाना भृशं तेन । कोपवैश्वानरेण सा ॥ आगत्य परिवारेण—नमत्तानतिदीनगीः ॥ ७३ ॥ स्वामिनो यूयमस्माकं । किंकर्यो भवतां वयं ॥ तृणोपमासु चास्मासु। न युक्तं पौरुषं हि वः ॥ ७४ ॥ अज्ञानवशतोऽस्माभि—रेतदेवं विचेष्टितं ॥ नातः परं करिष्यामो—ऽपराधोऽयं हि मृष्यतां ॥ ७५ ॥ इत्युक्ते त्रिदशाः प्रोचू—रे दुष्टे तीर्थघातिनि ॥ अन्यानपि जनान् विप्र—तारयस्यस्मदादिवत् ॥ ७६ ॥ मलीमसं त्वया चक्रे । तीर्थमेतत्पला-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिनि ॥ मुक्तासि तीर्थरक्षार्थं । विनाशयसि तत्पुनः ॥ ७७ ॥ भरते भृत्यभावं च । स्वाहतं
च करोषि रे ॥ अधुना म्रियसे नूनं । तीर्थविध्वंसकारिणि ॥ ७८ ॥ भीतेति वाक्यतो देवी ।
हस्तिनी शरणं ययौ ॥ जिनं विना तां मुंचेत । को भवादिव तत्क्रुधः ॥ ७९ ॥ वृषभस्वा-
मिशरणं । प्राप्तां तां वीक्ष्य नाकिनः ॥ दूरीभूय पुनः प्राहु-रे दुष्टे किमिदं कृतं ॥ ८० ॥
दंतैरंगुलपर्वाणि । चर्वयंती सुरी जगौ ॥ सुराः प्रसीदत मयि । क्रोधं त्यजत वत्सलाः ॥८१॥
स्मरेयं मनसाप्येवं । यद्यहं नाकिनः पुनः ॥ शपे तदा युगादीश-पादद्वंद्वं जगन्नतं ॥ ८२ ॥
इहार्थे साक्षिणो यूयं । दृष्टभावा जगत्स्वपि ॥ एकदैतच्चेष्टितं मे । क्षमध्वं करुणापराः ॥
॥ ८३ ॥ किरंतीमिति दीनां गां । व्यसृजंस्तां सुरेश्वराः ॥ संतो न प्रणते कोपं । कुर्वंत्यप्य-
पराधिनि ॥ ८४ ॥ साभूत्तदादितीर्थेऽस्मिन् । हस्तिसेनापुरं गता ॥ पूर्ववद्धस्तिनी रक्षा-द-
क्षा संघेऽतिभक्तिभृत् ॥ ८५ ॥ तुर्यकल्पपतिः शक्रो । माहेंद्रो नाम भक्तिमान् ॥ तत्राप-
श्यन्मनाग् भ्रष्टान् । प्रासादान् जगदीशितुः ॥ ८६ ॥ अहो किमेतत्संजातं । तीर्थेऽप्यस्मि-
न् जगद्धिते ॥ विचेष्टितं नूनमस्या । देव्या इत्यथ चिंतयन् ॥ ८७ ॥ तत्र वर्द्धकिना दिव्य-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शक्त्या संक्रंदनस्तदा ॥ अचीकरद्भक्तितुल्यान् । प्रासादान् नूतनानिव ॥ ८८ ॥ एवं बाहुबलौ ताल-ध्वजे कादंबकेऽपि च ॥ रैवताद्रौ च शृंगेषु । चान्येषूद्धरणं व्यधात् ॥ ८९ ॥ इशानो-द्धारतो जातः । कोटिसागरकालतः ॥ माहेंद्रश्चक्रमलकृत । उद्धारो विमलाचले ॥ ९० ॥

॥ इति चतुर्थोद्धारः ॥

इतश्चैरवते क्षेत्रे । जिनजन्मोत्सवं सुराः ॥ विधाय प्रययुर्नंदी-श्वरे द्वीपेऽष्टमे द्रुतः ॥ ॥ ९१ ॥ कृत्वाष्टौ दिवसान् यावत् । जिनार्चनमहोत्सवान् ॥ आजग्मुर्विमलाद्रौ ते । नंतुं श्रीप्रथमं जिनं ॥ ९२ ॥ तत्रार्चयंतः सर्वज्ञं । भक्त्याष्टदिवसावधि ॥ तेऽपश्यन् भ्रस्यतः किंचित् । प्रासादान् पुण्यमंदिरान् ॥ ९३ ॥ ब्रह्मेंद्रो भक्तिनिस्तंद्रः । सर्वदेवानुमोदितः ॥ दिव्यशक्त्या चकारोच्चै-रुद्धारं विमलाचले ॥ ९४ ॥ माहेंद्रादप्ययं जातो । दशकोट्यब्धिकालतः ॥ तीर्थे ब्रह्मसुरोद्धारः । श्रीशत्रुंजयपर्वते ॥ ९५ ॥

॥ इति पंचमोद्धारः ॥

चमरेंद्रप्रभृतयो । भवनेशा अथान्यदा ॥ स्वेच्छया भक्तितो जग्मु-र्द्वीपं नंदीश्वराभिधं ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ९६ ॥ इतो विद्याधरमुनी । चलंतौ तीर्थयात्रया ॥ नवेनैर्नतौ तत्रा–जग्मतुर्जितमन्मथौ ॥ ९७ ॥ मुनी तेभ्यः पुंडरीक–महिमानं जगद्वरं ॥ आचख्यतुर्भृशं प्रीतौ । पावनं श्रवणादपि ॥ ९८ ॥ सोत्कंठा मुख्यतीर्थेषु । यतिभ्यां प्रेरितास्तथा ॥ समं ताभ्यां नगं प्रापुः । पतयो नवनस्य ते ॥ ९९ ॥ यात्रां दानार्चने नक्त्या । प्रासादोद्धारमप्यमी ॥ विधाय सर्वतीर्थेषु । ययुर्देवा निजं पदं ॥ ४०० ॥ कोटिलक्षार्णवे काले । ब्रह्मेंद्रेश्वरतो गते ॥ नवेनैंद्रसमुद्धारो । बनूव विमलाचले ॥ १ ॥ अंतरांतरतोऽप्येवं । तीर्थे शत्रुंजयाभिधे ॥ पुण्योद्धारा इवोद्धारा । बनूवुर्नृसुरैः कृताः ॥ २ ॥ इत्थं श्रीनरताद्बनूवुरमराधीशाः प्रशस्याशया–स्तीर्थेऽस्मिन् सगरं हि यावदमलश्रेयोनिधानाधिपाः ॥ तीर्थोद्धारकरा नरामरवराः षट् च प्रपंचोर्जिताः । प्राज्यज्ञानधराः शिवालयमगुस्तत्र क्रमेण ध्रुवं ॥ ३ ॥ श्रीवर्धमानवदनांबुजसन्मरंद–संदोहसारमिदमाप्य वचः सुरेंद्राः ॥ आनंदमापुरमलं नियतं तदेव । येनापि लब्धशिवशर्मचया इवासन् ॥ ४ ॥

॥ इत्याचार्यश्रीधनेश्वरसूरिविरचिते श्रीशत्रुंजयमाहात्म्ये



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्राविमवालिखिल्लचरित्रतीर्थोद्धारवर्णनो नाम सप्तमः सर्गः समाप्तः ॥ श्रीरस्तु ॥

## ॥ अष्टमः सर्गः प्रारभ्यते ॥

वर्यैश्चतुर्भिराश्चर्यै–श्चरितं यस्य संश्रितं ॥ नाभिसूनुः स वः श्रीमान् । जिनो यच्छतु वांछितान् ॥ १ ॥ तद्यथा—अशिक्षिता विवेकश्रीः । कुमारे दानवासना ॥ चक्रिणोऽप्यधिकं स्थाम । भोगाभागेऽपि केवलं ॥ २ ॥ अथाखंमल निःशेषो–द्धारणां च शृणु स्थितिं ॥ पवित्रां तीर्थकृच्चारु–चरित्रोत्कीर्त्तनादपि ॥ ३ ॥ न जितं कर्मरिपुभि–र्जितमन्मथशात्रवं ॥ अर्हंतमजितं नत्वा । गुणान् तस्यैव कीर्त्तये ॥ ४ ॥ जंबूद्वीपेऽस्ति भरते–ऽयोध्या शत्रुचयैः पुरी ॥ अयोध्येति भुवि ख्याता । गतातंका निवासिनां ॥ ५ ॥ आगता रिपवो यत्र । मणिशालेषु बिंबितान् ॥ स्वदेहानेव संवीक्ष्य । सन्मुखाद्भियाद्ययुः ॥ ६ ॥ अर्हच्चैत्येषु घंटा-



For Private And Personal Use Only

नां । यत्र नादैरहर्निशं ॥ धर्मन्नृपचमूतूर्यै–रिव पापनृपोऽनशत् ॥ ७ ॥ मुक्तिं गतेष्वसंख्ये-
षु । चैकः सर्वार्थसिद्धिगः ॥ अन्नूदाद्यविन्नोर्वंशे । द्वितीयैकजिनावधि ॥ ८ ॥ तथा च पुत्र-
पौत्रेषु । क्रमात् पात्सु निजाः प्रजाः ॥ इक्ष्वाकुवंशः सत्यार्थों । जिनध्यानविशुद्धधीः ॥९॥
तस्यां निर्जितशत्रुश्री–र्जितशत्रुर्महीपतिः ॥ आसीदसीमगरिम–गुणमाणिक्यरोहणः ॥१०॥
[illegible] ॥ रिपूणां मार्गणानां च । ललाटेऽक्षरपंक्तयः ॥ दानं वितरता येन । लोपिता दैवनि-
र्मिताः ॥ ११ ॥ तस्यानुजो गुणैः सारः । सारवान् ज्येष्ठन्नक्तिमान् ॥ युवराजोऽन्नवन्नाम्ना ।
सुमित्रो मित्रवत्सने ॥ १२ ॥ जितशत्रुनृपस्यासी–दास्यदासीकृतेंडुन्ना ॥ विजया तस्य वि-
जयाख्या–खिलपत्नीनिदर्शनं ॥ १३ ॥ शीलशैलस्थिता यासी–दसीमगुणसंगता ॥ लोक-
चित्तस्य वश्याय । दुर्ग्राहपतिहृद्गृहा ॥ १४ ॥ पक्षद्वयविशुद्धा या। हंसीव सुविवेकिनी॥ नि-
र्मले मानसे पत्यु–र्वासस्थानमसूत्रयत् ॥ १५ ॥ जगन्मित्रसुमित्रस्य । युवराजस्य च प्रिया
॥ यशोमती नाम यशो–मती सच्चरितैरन्नूत् ॥ १६ ॥ तारुण्यारण्यसंचारि–कामतृष्णातुरं
मनः ॥ सारंगं स्वगुणैः पत्यु–रवध्याधानमंथरा ॥ १७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्यदा चंद्रशालायां । सुप्तजाग्रदवस्थिता ॥ अपश्यद्विजया स्वप्नान् । निशाशेषे चतुर्द-
श ॥ १७ ॥ गजसिंहवृषांभोज—वासा दाम शशी रविः ॥ ध्वजकुंभसरोवार्द्धि—विमानमणि-
वह्नयः ॥ १७ ॥ एवं स्वप्नास्तया स्वास्ये। प्रविशंतो विलोकिताः॥ लेभेच परमानंद—सुखसौ-
हित्यमुत्तमं ॥ २८ ॥ [redacted] ॥ राधशुक्ले त्रयोदश्यां । रोहिण्यां मृगलांछने ॥ विमानाद्विज-
याद्देवो—ऽनुत्तराद्भवसंक्षयात् ॥ २१ ॥ च्युत्वा निशीथे तत्कुक्षा—ववतार समाधिना ॥ उद्यो-
तश्च महान् जज्ञे । सुखं नारकिणामपि ॥ २२ ॥ [redacted] ॥ इतश्च युवराजस्य । सुमित्रस्य
प्रिया निशि ॥ यशोमत्यपि तान् स्वप्नान् । अपश्यत्सुप्रमोदिनी ॥ २३ ॥ प्रातः स्वप्नांस्तथा-
वस्थान् । पतिभ्यां ते ततो मुदा ॥ शशंसतुरिमौ चाप्य—पृच्छतां स्वप्नपाठकान् ॥ २४ ॥ वि-
जयायां जिनोत्पत्तिं । यशोमत्यां च चक्रिणः ॥ उत्पत्तिकथयितॄंस्तौ । मुदाप्रीणयतां धनैः ॥
॥ २५ ॥ गर्भानुभावतो राज्ञ्यौ । जीवानामनुकंपया ॥ अभूतां ते स्वभावाच्च । मंदयाने सु-
दोहदे ॥ २६ ॥ पूर्णेषु मास्सु नवसु । सार्धाष्टमदिनेष्वथ ॥ गतेषु माघशुक्लाष्ट—म्यां च रो-
हिणिगे विधौ ॥ २७ ॥ निशीथे विजयादेवी। हेमवर्णं गजांकितं ॥ असूत तनयं पूतं । जग-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुद्योतकारकं ॥ २८ ॥ कुलकं ॥ षट्पंचाशद्दिक्कुमार्य–स्ततश्चलितविष्टराः ॥ तत्राभ्येत्य सु-
कर्माणि । व्यधुः सर्वाणि भक्तितः ॥ २९ ॥ ततश्चतुःषष्टिसुरा–धीशाः स्वासनकंपतः ॥ जि-
नावतारं विज्ञायो–ल्लसद्धर्षभरोद्धुराः ॥ ३० ॥ विमानैः कृतशृंगारैः । परिवारैः समं चरैः ॥
अतिक्रम्य बहून् द्वीपान् । विनितापुरमाययुः ॥ ३१ ॥ दत्वावस्वापिनीं विद्यां । जिनमातु-
र्जिनेशितुः ॥ पार्श्वे मुक्त्वा प्रतिछंदं । सौधर्मेंद्रोऽग्रहीज्जिनं ॥ ३२ ॥ कुड्मलीकृतहस्ताभ्यां ।
लिप्ताभ्यां चंदनद्रवैः ॥ आदाय स्वामिनं शक्रः । प्राप मेरुगिरिं क्षणात् ॥ ३३ ॥ पांडुकाख्ये
वने तत्रा–तिपांडुकंबलाशिला ॥ विद्यतेऽर्धमृगांकाभा । शाश्वती स्फाटिकी वरा ॥ ३४ ॥
तत्र सिंहासने रम्ये । सौधर्मेंद्रः स्वयं विभुं ॥ अंकमारोप्यपूर्वाद्रि—रिव सूर्यमिवारुचत् ॥
॥ ३५ ॥ छत्रमेकेन रूपेण । द्वाभ्यां चामरचालनं ॥ एकेनांके दधौ देवं । वज्रमेकेन धारय-
न् ॥ ३६ ॥ पंचरूपधरः शक्र । इत्थं भक्तिपरो जिने ॥ जिनस्नात्रकृते शक्रा—भ्यमंत्रयदथो
परान् ॥ ३७ ॥ मृन्मयैः कांचनै रूप्यै–र्मणिरत्नमयैः परैः ॥ हेमरूप्यैर्मणिस्वर्णैः । कलशैर-
तिनिर्मलैः ॥ ३८ ॥ अष्टोत्तरसहस्रांकैः । प्रत्येकं तीर्थवार्भृतैः ॥ स्नात्रं श्रीजगदीशस्य । व्य-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धुस्ते ज्ञावनाजृतः ॥ ३ए ॥ [illegible] ॥ गोशीर्षचंदनैर्दिव्यै–र्गंधिज्ञिः कुसुमैरपि ॥ फलैः पत्रै-र्जिनं ज्ञक्त्या । पूजयामासुराशु ते ॥ ४० ॥

अथापसृत्य पूजांते । सौधर्मेंद्रः सुवासनः ॥ अर्घ्याज्ञिः स्तुतिज्ञिर्देवं । पूजयामासिवानिति ॥ ४१ स्वामिन्नजिततीर्थेश । जय त्रैलोक्यनायक ॥ देवाधिदेव ज्ञगवन् । जय सर्वजनोत्तर ॥ ४२ ॥ पंचविंशतिलक्षांक–कोटिसंख्येषु वर्षिषु ॥ गतेष्वाद्यजिनादद्य । मद्भाग्यैस्त्वमवातरः ॥ ४३ ॥ तवावताराज्ञगव–न्नवतारं ममाप्यहं ॥ मन्ये कृतार्थं त्वत्पूजा–देशनाश्रवणादिज्ञिः ॥ ४४ ॥ अद्यैव ज्ञारतं खंमं । पवित्रं स्वामिना त्वया ॥ अस्मदाद्याः सुरा नागा । मर्त्या अपि च सद्गुणाः ॥ ४५ ॥ ज्ञववारिधिनिमज्ज–ज्जनसंघाततारकः ॥ कषायविषयाराति–निर्घातातिबलोत्करः ॥ ४६ ॥ त्वममेयगुणाधारा–नंताव्यक्त जगत्प्रज्ञो ॥ द्वितीयार्हन् धर्ममिम–मुद्धर्तुमुदितोऽधुना ॥ ४७ ॥ आसने शयने याने । ध्याने सर्वेषु कर्मसु ॥ क्रिया निवासं मच्चित्ते । स्वामिंस्त्वं करुणाकरः ॥ ४८ ॥ त्वत्पूजननुतिध्यान–पुण्यात्त्वच्चरणांबुजं ॥ ज्ञवे ज्ञवेऽपि ज्ञगवन् । मानसे मम मावतु ॥ ४ए ॥ इत्यज्ञिष्टुत्य देवेशः । पंचांगप्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णतस्ततः ॥ पूर्ववत्प्रभुमादाय । प्रीत्या पश्यन् पुनः पुनः ॥ ५० ॥ मन्यमानो निजं धन्य-
ममरैः श्रितसन्निधिः ॥ जितशत्रुनृपागारं । क्षणादासादयन्मुदा ॥ ५१ ॥ प्रतिबिंबमपाचक्रे ।
मातुर्निद्रां च देवराट् ॥ मुक्त्वा प्रभुं च पल्यंके । द्वीपं नंदीश्वरं ययौ ॥ ५२॥ तत्राष्टौ दि-
वसान् याव-ज्जिनजन्मोत्सवं सुराः ॥ कृत्वा स्वं स्वं पदं प्रापु-र्जिनधर्मपरायणाः ॥ ५३ ॥
यशोमत्यथ संपूर्ण-दोहदा पूर्णकालतः ॥ प्रासूत तनयं पूतं । तस्मिन्नेव निशाक्षणे ॥ ५४ ॥
स्नात्रोत्सवे दृष्टमपि । स्वामिनं द्रष्टुमुत्सुकः ॥ नत्तुंगमुदयाद्रिं श-गारुरोहाथ नास्करः ॥
॥ ५५ ॥ नास्करस्य करश्रेणी । जिनवाणीव विश्वगं ॥ तमोऽहरद्यथाचोच्चैः । समंतात्क-
मलोदयं ॥ ५६ ॥ राजा प्रातः पुत्रजन्म-शंसिने वहुदानतः ॥ आजन्मांतं रोरनावं । दल-
यामास हर्षतः ॥ ५७ ॥ तदा च धनदः शक्रा-देशात्तस्मिन् पुरेऽखिले ॥ हिरण्यरत्नवासां-
सि । ववर्षाषाढमेघवत् ॥ ५८ ॥ न तैरपि मर्हेऽस्या-पूरि दानमनोरथः ॥ व्यर्थयन् देवगोवृ-
क्ष-शंखचिंतामणीनपि ॥ ५ए ॥ ध्वजतोरणमाणिक्य-स्वस्तिकागुरुदामन्निः ॥ जातः स-
र्वत्र नगरे । तदा कोऽप्युत्सवो महान् ॥ ६० ॥ स्थितिप्रतिस्थिती राजा । चकार द्वितीये दि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ने ॥ तृतीयेह्ह्युत्सवात्सूनो-र्दर्शनं चंद्रसूर्ययोः ॥ ६१ ॥ षष्ठेह्त्युत्सवतो गोत्रा-नुसृत्या कर्म-
न्निर्ह्यसौ ॥ न जेष्यतेऽतोऽर्हत्सूनो-रजिताख्यां नृपोऽकरोत् ॥ ६२ ॥ सशून्यं सगरं कर्त्तुं ।
विशून्या सगरान्निधा ॥ परस्यासीत्पुनर्गोत्र-मंत्रवाणीपवित्रिता ॥ ६३ ॥ धात्रीन्निः शक्रमु-
क्तान्नि-र्लाल्यमानोऽथ पंचन्निः ॥ व्रतं समितिन्निरिव । स्वामी वृद्धिमवाप्तवान् ॥ ६४ ॥ वि-
श्वालंबनयष्टिः सन् । जिनो यष्ट्यवलंबितः ॥ मंदं मंदं ददौ पादान् । न्नवाब्धिं स्ताघयन्निव
॥ ६५ ॥ केकीन्नूय हयीन्नूय । गजीन्नूय च केचन ॥ स्वामिनं रमयामासुः । सुराः शक्र-
नियोगतः ॥ ६६ ॥

इत्थं बालोचितां क्रीमां । संसारविरतोऽपि सन् ॥ चकार पित्रोर्देवानां । प्रमोदाय च स
प्रभुः ॥ ६७ ॥ स कलाः सकलाः काले । गुरुतो गुरुतोषकृत् ॥ अधीतेस्म सुधीः पित्रोः ।
प्रसत्यै सगरः क्रमात् ॥ ६८ ॥ चामीकरसमानान्नौ । तावुन्नौ भुवि न्नूषणौ ॥ प्रापतुर्विल-
सल्लक्ष्म-लक्षणौ मध्यमं वयः ॥ ६९ ॥ अर्द्धपंचमकोदंम-शतान्युत्तुंगविग्रहौ ॥ निस्सीमरू-
प लावण्यौ । तावन्नूतां जगन्मुदे ॥ ७० ॥ जानन् न्नोगफलं स्वस्य । विभुः पित्रोश्च हर्षदः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उपयेमे नृपकन्या । बलवत्कर्मणां फलं ॥ ७१ ॥ बह्वीनां नृपकन्यानां । सगरोऽपि पितुर्मु-
दे ॥ उद्धोढाजूत्कलाधार—स्तारकाणां शशीव सः ॥ ७२ ॥ इतश्च जगवान् पूर्व—लक्षानष्टादश
क्रमात् ॥ कौमार्ये व्यतिचक्राम । देवसेवासमाहितः ॥ ७३ ॥ जितशत्रुनृपः सूनु—मन्यूनगुण-
संगिनं ॥ अथो दृष्ट्वा न्यधाद्राज्ये—ऽनिछंतमपि वत्सलः ॥ ७४ ॥ युवराजः सुमित्रोऽपि । जि-
तशत्रोरनुज्ञया ॥ स्वपदे सगरं पुत्रं । न्यवेशयदतुछधीः ॥ ७५ ॥ जितशत्रुः सुमित्रश्च । परेऽपि
पृथिवीभुजः ॥ दीक्षामाददिरे धर्म—घोषात्सुगुरुतस्ततः ॥ ७६ ॥ सुरासुरैरप्यजितो—ऽजितो
नाम महीपतिः ॥ पालयन् पृथिवीं राज्यं । चकार सुरसेवितः ॥ ७७ ॥ युवराजस्तु सगरो
। नृपाज्ञानुगतस्ततः ॥ साधयित्वा बहून् देशा—नाययौ जयवान्द्रुतं ॥ ७८ ॥ पाति राज्यं प्र-
जौ देशे । नेतयो न जयं कुतः ॥ सुखमाकालवल्लोका । आसंस्तत्र सदासुखाः ॥ ७९ ॥ च-
क्रार राज्यं जगवान् । त्रिपंचाशत् पयोनिधीन् ॥ लक्षान् यावद्भोगकर्म । स्वक्षिपद्भोगकाम्य-
या ॥ ८० ॥ अन्यदोद्यानमेदिन्या—मवतीर्णेऽथ माधवे ॥ लोकानुरोधात्प्रययौ । स्वामी सां-
तःपुरीजनः ॥ ८१ ॥ कोलाहलैः कोकिलानां । मधुपानां च झंकृतैः ॥ निजश्रियं दर्शयितु—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



माकारयदिवाधिपं ॥ ८२ ॥ शिरोन्निन्नूरुहां तुंगै—रालोकयदिव प्रभुं ॥ दर्शनात्तस्य च मुदा
। कुड्मलैरिव यद्दसत् ॥ ८३ ॥ प्रत्यासन्नं च तं वीक्ष्य । शाखिशाखाभुजांचलैः ॥ आकारय-
दिव प्रीत्या । तद्वनं प्राप नायकः ॥ ८४ ॥ [redacted] ॥ तद्वने विकसत्पुष्प—मकरंदगतातपे ॥
स छत्र इव विश्वेशो । रंतुमैछज्जनैः समं ॥ ८५ ॥ काचित्पादाग्रसंस्थाना । गृह्णंत्युच्चैः फलं
डुमात्॥ अतर्कि जंगमा वल्ली । स्तनस्तवकशालिनी ॥ ८६ ॥ डुमाछादितदेहान्या । दर्शयं-
ती मुखांबुजं ॥ अन्यडुमेऽन्यकुसुमो—ऽमशंकामसूत्रयत् ॥ ८७ ॥ नखैः पुष्पाणि चिछेद ।
छेका काचिदतिक्रुधा ॥ मदंगुल्यः पंच बाणाः । पंचेषोर्धिगमूनिति ॥ ८८ ॥ मल्लिकाकुसु-
मैर्मालां । ग्रथित्वा काप्युरोजयोः ॥ चिक्षेप कुंन्निकुंन्नानां । जयाप्तैमौक्तिकैरिव ॥ ८९ ॥ व-
संतरागसंमिश्रं । गायंती पंचमं स्वरं ॥ विरहकान् काप्यकरोत् ॥ सद्यः कुसुमसुंदरान् ॥
॥ ९० ॥ काचिद्बकुलपुष्पाणि । चक्राणि स्मरचक्रिणः ॥ तद्भक्तिरिव चिक्षेप । स्वपतिंप्रति
लीलया ॥ ९१ ॥ वसाना वसनं शुभ्रं । कापि पुष्पोडुवेष्टिता ॥ मुखेंदुनागृहीत्नोज्ज्ञां । राकारा-
त्रिदिवो बलात् ॥ ९२ ॥ सर्वांगपुष्पाभरणो । निषसः पुष्पस्रस्तरे ॥ पुष्पकंडुकनृत्पाणौ । पु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ष्पशीर्षः प्रभुर्बभौ ॥ ए३ ॥ मंमलीभूय कामिन्यो । हल्लीसकपराः परं ॥ पुरः प्रभोर्हस्तता- लै–राशु चेतो ह्यनर्तयन् ॥ ए४ ॥

इत्थं कामरसव्यग्रे । कामिलोके मनो दधौ ॥ अत्रैवेत्थमुतान्यत्र । क्वाप्यस्तीत्यजितः प्र- भुः ॥ ए५ ॥ सस्माराावधिना पूर्व–भवांस्तांस्तान् गुणोत्तरान् ॥ अनुत्तरसुखान्येव। स्वस्या- नंदकराण्यपि ॥ ए६ ॥ स्मृत्वा तत्सहसा काम–रसाद्विभुरपासरत् ॥ शर्करास्वादतो निंब– फलास्वादादिव क्षणात् ॥ ए७ ॥ अहो सुखानि तान्येवं । भुक्त्वापि मम मानसं ॥ रंतुमि- छत्यमुत्रापि । धिगिदं कामचेष्टितं ॥ एण ॥ अनंतभवतो भुक्ता–न्यपि सौख्यानि भूरिशः ॥ भवे भवे नवानीवा–भिलषत्यविदन् जनः ॥ एए ॥ भुक्तेष्वनंतसौख्येषु । न तृप्यति मना- ग्जनः ॥ दुःखे तु लवमात्रेऽपि । सहसोद्विगमेति च ॥ १०० ॥ स्युः सुखानि भृशं पुण्या– न्मनाक् तस्मिंस्तु नादरः ॥ दुःखानि च प्रमादात्स्यु–स्तस्मिन् सादर एव सः ॥ १ ॥ कुर्व- न्नन्यं तथान्यस्य । फलानीछति ही जमः ॥ उप्तेऽपि हि निंबबीजे । किं स्यात्कल्पद्रुमांकुरः ॥ २ ॥ विषयामिषलोभेन । संसारजलधौ जनाः ॥ धीवरा अपि बद्धंते । मत्स्यवद्दुःखजा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लके ॥ ३ ॥ स्वैरिणो वैरिणो लोके । विषया नवचत्वरे ॥ छलाद्धरंति पुण्यैक–चैतन्यं हि ज-
गदात्मनां ॥ ४ ॥ पुत्रमित्रकलत्रादि–पाशैर्बद्धो नवे नवे ॥ पक्षिवत्स्वेच्छया धर्मे । रंतुं न ल-
नते जनः ॥ ५ ॥ ये तुच्छसुखलोन्नेन । पुण्यं स्वं हारयंति ही ॥ तेषां पीयूषमंह्रीणां । क्षा-
लनाय नवत्यपि ॥ ६ ॥ एवं चिंतयति स्वामि–न्याजग्मुस्त्रिदिवात्सुराः ॥ लोकांतिका जय
जये–त्युच्चरंतस्तदग्रतः ॥ ७ ॥ तीर्थं प्रवर्तय स्वामिन् । माञ्चवन्मोहमुह्यद ॥ इदीर्येति नि-
जं स्थानं । जग्मुस्ते विनयोन्नताः ॥ ८ ॥ स्वामी तदैव सहसा । क्रीमाद्यं च विसृज्य च ॥
आरेने वार्षिकं दानं । दातुमद्वीप्सितकामगौः ॥ ए ॥ गजवाजिरथोर्वीणां । रत्नमाणिक्यवास-
सां ॥ दाने सांवत्सरे संख्यां । वेत्ति स्वाम्येव नापरः ॥ १० ॥ नाविनं चक्रिणमथो । विज्ञा-
य सगरं तदा ॥ अनिच्छंतमपि स्वामी । बलाद्राज्ये न्यवेशयत् ॥ ११ ॥ चलितासनतः श-
क्राः । सर्वे कल्याणकं विनोः ॥ ज्ञात्वा स्वस्वपदादीयुः । संघट्टैर्व्योममालिनः ॥ १२ ॥ स्वा-
मी ततश्च सुस्नातो । दिव्यानरणवस्त्रनृत् ॥ संपूज्य गृहचैत्यांत–र्बिंबानि श्रीमदर्हतां ॥ १३ ॥
शिविकायां सुप्रनायां । निर्मितायां सुरासुरैः ॥ निषसाद जगन्नाथः । पालके शक्रवत्तदा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ १४ ॥ वर्धाप्यमानो वृद्धाभि–र्युग्मनीकृतपाणिभिः ॥ सहस्रवाह्यां शिविका–मधिरूढो य-
यौ वने ॥ १५ ॥ सहस्राम्रवनेऽशोक–तले ते शिबिकां न्यधुः ॥ अवातरच्च तस्या द्राक् । सू-
र्य इवोदयाचलात् ॥ १६ ॥ वस्त्राभरणमाल्यानि । मुक्तानि स्वामिना स्वयं ॥ प्रतीच्छद्देवरा-
जोऽथ । स्ववस्त्रांचलधारणात् ॥ १७ ॥ उच्चखान विभुः केशान् । क्लेशानिव कुकर्मजान् ॥
पंचभिर्मुष्टिभिः शक्रः । क्षीराब्धौ निदधे च तान् ॥ १८ ॥ संज्ञया सुरराजोऽथ । तुमुलं तं
न्यषेधयत् ॥ सामायिकं विभुरपि । स्वीचकार त्रिधा त्रिधा ॥ १९ ॥ समं राज्ञां सहस्रेण ।
जगृहे स्वामिना व्रतं ॥ देवदुष्यं न्यधात्स्कंधे । विभोः शक्रः समुज्ज्वलं ॥ २० ॥ माघशु-
क्लनवम्यां भे । रोहिण्यां रोहिणीपतौ ॥ उत्तराह्णे षष्ठतपा–श्चतुर्थज्ञानमाप सः ॥२१॥ निः-
संगोऽथ प्रभुर्मौनी । विजहार महीतलं ॥ शक्राद्याश्च सुरा द्वीपं । ययुर्नंदीश्वराभिधं ॥ २२ ॥
अयोध्यायां द्वितीयेऽह्नि । ब्रह्मदत्तगृहे विभुः ॥ पारणं परमान्नेन । चकार शुभकारणं ॥२३॥
सार्धद्वादशनिष्काणां । कोटयस्तद्गृहांगणे ॥ पुष्पाणि देवदुष्याणि । निपेतुर्नभसस्तदा ॥२४॥
देवदुंदुभयो नेदु–श्चेलोच्छ्रयो बभूव च ॥ देवा जयजयेत्युच्चै–र्जगुर्दातृप्रशंसिनः ॥ २५ ॥



For Private And Personal Use Only

जिनस्पृष्टामिमां न्नूमिं । मान्यः स्पृशतु तत्पदे ॥ अकारयद्ब्रह्मदत्तो । धर्मचक्रमिति स्फुटं ॥
॥ २६ ॥ आर्यानार्येषु देशेषु । विहरन्निर्ममो विभुः ॥ घातीनि निजकर्माणि । ददाह ध्यान-
वह्निना ॥ २७ ॥ हारे हरौ मणौ लोष्टे । तृणे स्त्रैणे रिपौ सुते ॥ कांचने काचसंघाते । सम-
दृक् समन्नूद्विभुः ॥ २८ ॥ सुखे दुःखे न्नवे मोक्षे । निर्जने जनसंकुले ॥ दिवा रात्रौ स सं-
ध्यायां । समन्नावोऽन्नवज्जिनः ॥ २९ ॥ गुप्तेंद्रियः कूर्म इव । निर्लेपो व्योमवत्क्रमी ॥ वसु-
धेव सहस्रांशु–रिव तेजोन्निरद्भुतः ॥ ३० ॥ विहृत्य सकलान् देशा–नित्थं त्रैलोक्यनायकः ॥
द्वादशाब्दीमतिक्रम्या–योध्यां पुनरुपागमत् ॥ ३१ ॥ सहस्राम्रवने तत्र । सप्तच्छदतरोस्तले ॥
ध्यानांतरमवाप्तस्य । गोदोहासनन्नाजिनः ॥ ३२ ॥ दशम्यां पौषशुक्ले न्ने । रोहिण्यां पश्चि-
मे दिने ॥ उत्पेदे केवलज्ञानं । विन्नोः कर्मक्षयादथ ॥ ३३ ॥ [illegible] ॥ चतुर्दशरज्जुमितं । क-
रस्थमणिवज्जगत् ॥ गतागती विपाकं च । कर्मणां स व्यलोकयत् ॥ ३४ ॥ अथासनविकंपे-
न । न्नक्त्यापि सुरनायकाः ॥ स्पर्धमानैरवैर्विचित्रै । विमानैः समुपाययुः ॥ ३५ ॥ व्यधुः स-
मवसरणं । योजनप्रमितं सुराः ॥ त्रिप्राकारं चतुर्द्वारं । हेमरूप्यमणीगणैः ॥ ३६ ॥

॥४२६॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इतश्च सगरं भूपं । सभायामासनस्थितं ॥ नत्वा वेत्री नरौ स्वामिन् । द्वारि स्त इत्य-
थो जगौ ॥ ३७ ॥ तयोर्वैशितयोर्मध्ये । भूपादेशाच्च वेत्रिणा ॥ प्रणम्यैकोऽवदच्चक्रिन् । व-
र्द्धसे केवलाद्विभोः ॥ ३८ ॥ अन्यः पुनः प्रणम्याख्य—ज्जय भूमीश वर्द्धसे ॥ शस्त्रागारे
चक्ररत्नो—त्पत्तितो हर्षकारणात् ॥ ३९ ॥ चक्रोत्सवं कथं कुर्वे । पूर्वं किं केवलोत्सवं ॥ उभ-
योरपि कर्त्तव्ये । तस्य दोलायितं मनः ॥ ४० ॥ त्रैलोक्याभयदः स्वामी । क्व क्वेदं विश्वभी-
तिकृत् ॥ चिंतयित्वेति भूपाल । उदस्थादासनाद् द्रुतं ॥ ४१ ॥ गजै रथैर्हयैः पुत्रैः । पत्ति-
भिर्व्यवहारिभिः ॥ लोकैरन्यैर्वृतः स्त्रीभिः । समं राजा ययौ वनं ॥ ४२ ॥ तत्र प्रदक्षिणीकृ-
त्य । नत्वा स्तुत्वा च सोऽजितं ॥ जिनेशवदनोद्भूतां । देशनामशृणोदिति ॥ ४३ ॥ धर्म ए-
व सदा सेव्यः । स्वर्गमुक्तिनिबंधनं ॥ विना धर्मं भवेद्दुःखं । दौर्भाग्यं च गतागती ॥ ४४ ॥
असाराद्विग्रहात्सारं । धर्मं गृह्णाति सारधीः ॥ दुःप्राप्यो धर्म एवाय—मन्यत्सर्वं हि लभ्यते ॥
॥ ४५ ॥ देशनांते नृपः प्राप्या—योध्यां चक्रस्य भक्तितः ॥ अष्टाह्निकामहं चक्रे । क्षत्रिया-
णामयं क्रमः ॥ ४६ ॥ स्वामी चतुर्विधं संघ—तीर्थं संस्थाप्य च स्वयं ॥ विजहार कृपाधारः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



। सर्वदेवनमस्कृतः ॥ ४७ ॥ शस्त्रागारात्ततश्चक्रं । बहिरासीद्विद्युतिः ॥ तस्मिन्नेव दिने च-
क्री । प्रयाणोद्यममातनोत् ॥ ४८ ॥ लक्षैः स चतुरशीत्या । मातंगरथवाजिनां ॥ पादातैः
कोटिभिः पूर्वं । पूर्वस्यां दिशि सोऽचलत् ॥ ४९ ॥ गजवाजिछत्रदंड–मणिकाकिणीवर्धकी-
न् ॥ पुरोधोगृहिचक्राणि । चर्मरत्नमुखान्यपि ॥ ५० ॥ लात्वा रत्नानि भूमीशो । यक्षलक्षैर-
धिष्ठितः ॥ स सैन्यैः स्थगयन् विश्वं । चचालातुलविक्रमः ॥ ५१ ॥ [redacted] ॥ पूर्वाब्धौ माग-
धं देवं । कृताष्टमतपा नृपः ॥ बाणेनाजूहवद् ह्यग्र–दशयोजनगामिना ॥ ५२ ॥ तस्मादा-
दाय रत्नैक–सारमारोप्य तत्र तं ॥ स्वयं तु पारणं चक्रे । महं सोऽष्टौ दिनानि च ॥ ५३ ॥
व्यावृत्य चक्रानुगतः । सोऽविच्छिन्नप्रयाणकैः ॥ दक्षिणोदधितीरेऽस्था–न्निवेशितचमूचयः ॥
॥ ५४ ॥ तत्र वासान् सैन्यकृते । चैकं पौषधमंदिरं ॥ वर्द्धकिर्विदधे चक्री । चागृहीत्पौषधव्र-
तं ॥ ५५ ॥ वरदामं मागधवत् । कृत्वा मनसि सायकं ॥ सोऽमुचत्तेन विज्ञाय । स चागा-
च्चक्रिणं द्रुतं ॥ ५६ ॥ तद्ढौकितं मणिस्वर्ण–मुक्तारत्नादिकं नृपः ॥ अगृहीत्तत्पदे तं चा–रोप-
यन्नतवत्सलः ॥ ५७ ॥ प्रतीच्यब्धौ प्रभासेशं । तथैव वशवर्त्तिनं ॥ कृत्वा न्यवेशयत्स्थाने ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चक्री स्वमिव पादपं ॥ ५८ ॥ चक्री सिंधुमहासिंध्वो–रोधः प्राप्य च दक्षिणं ॥ ते अप्यसा-
धयत्कृत्वा–ष्टमं मूलं तपःश्रियः ॥ ५९ ॥ दिशोदक्पूर्वया गछन् । शैलं वैताढ्यमाप्य सः ॥
वैताढ्याद्रिकुमारं चा–साधयद्भरतेशवत् ॥ ६० ॥ सिंधुसागरवैताढ्य–सीमानं सैन्यनायकः ॥
साधयित्वा नृपादेशा–दागादादाय तद्धनं ॥ ६१ ॥ तमिस्रायाः कपाटे स । दंडेनोद्घाट्य नि-
म्नगे ॥ निम्नगोन्निम्नगे तीर्त्वा । पद्यया निरगात्ततः ॥ ६२ ॥ तत्र म्लेछान् महाक्रूरा–नजयच्च-
क्रनायकः ॥ नितंबं दक्षिणं क्षुद्र—हिमाद्रेराससाद च ॥ ६३ ॥ त्रिस्ताम्रयित्वा स्वरथे–ना-
क्षिपत्सायकं च सः ॥ द्वासप्ततिं योजनानि । गत्वा तत्प्रभुमाह्वयत् ॥ ६४ ॥ तस्मादादाय र-
त्नानि । तमारोप्य च तत्र सः ॥ गत्वा ऋषभकूटाद्रौ । काकिण्या नाम चालिखत् ॥ ६५ ॥
दक्षिणोत्तरश्रेणीशौ । वैताढ्ये व्योमगामिनौ ॥ जित्वा तत्रैव चक्रेशो–ऽस्थापयत् किंकराविव ॥
॥ ६६ ॥ अथो गंगातटे सैन्यं । निवेश्य नृपशासनात् ॥ सेनानी चर्मरत्नेन । तामुत्तीर्याज-
यन्नृपान् ॥ ६७ ॥ ततोऽष्टमतपा गंगां । चक्री स्ववशमानयत् ॥ द्वारं खंडप्रपातायाः–स्त-
मिस्रावदसाधयत् ॥ ६८ ॥ मंडलानि लिखंस्तत्र । काकिण्या योजनांतरा ॥ पंचाशद्योजनां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तां च । नद्यावप्युदलंघयत् ॥ ६९ ॥ निर्गतस्तद् गुहाद्वारा—द्गंगारोधसि पश्चिमे ॥ कृताष्टम- तपाः प्राप । निधीन्नव स चक्रिराट् ॥ ७० ॥ नृपाज्ञयाथ सेनानी । गंगादक्षिणनिष्कुटं ॥ लीलयैव साधयित्वा । चक्रिपादावशिश्रियत् ॥ ७१ ॥ पंचत्रिंशत्सहस्राब्दीं । कृत्वेत्थं दिग्जयं नृपः ॥ भरतेश इव प्राप—दयोध्यां चक्रपृष्टगः ॥ ७२ ॥ द्वात्रिंशता सहस्रैश्च । नृपैर्यक्षैस्त- था परैः ॥ चक्रे तस्याभिषेकोऽथ । चक्रित्वस्य निबंधनं ॥ ७३ ॥ षट्खंडं भारतं सोऽपि । भ- रतेश इवान्वशात् ॥ सहस्रैः पंचविंशत्या । सेव्यमानोऽथ गुह्यकैः ॥ ७४ ॥

इतश्च विहरन् स्वामी । केवलालोकभास्करः ॥ विकाशयन् भव्यपद्म—वनं तैर्देशनांशु- भिः ॥ ७५ ॥ ज्ञात्वा ज्ञानात्पुंडरीकं । पावितं प्रथमार्हता ॥ श्रीमानजिततीर्थेशो । विजहा- राथ तंप्रति ॥ ७६ ॥ प्राबोधयन् मृगारीभ—मृगशूकरपन्नगान् ॥ सर्वभाषानुगामिन्या । गि- रा स्वामी जगद्धितः ॥ ७७ ॥ अथायात्प्रथमं तीर्थं । सुराष्ट्रदेशमुत्तमं ॥ सर्वत्र वृषभस्वामि— गुणोत्कीर्त्तनगर्वितं ॥ ७८ ॥ तत्रोत्तुंगमनंगारी—रत्नसानुविराजितं ॥ शत्रुंजयं गिरिं पुण्य— माससाद जगद्विभुः ॥ ७९ ॥ ध्यानस्थिते जगत्स्वामि—न्यायर्यौ केकिभिर्वृतः ॥ कश्चित्केकी



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कलापेन । उत्रयन् भक्तितो जिनं ॥ ८० ॥ ध्यानावसाने भगवान् । केकिनस्तानबोधयत् ॥
संबाधेऽपि सुरादीनां । व्रजतोऽन्यत्र नो भयात् ॥ ८१ ॥ स्वामी तैः केकिभिः सार्धं । मु-
ख्यशृंगमवाप्य च ॥ राजादन्यास्तले त्रीणि । दिनान्यस्थात्सुरार्चितः ॥ ८२ ॥ प्रातस्तं के-
किनं वृद्ध—मासन्नमरणं विदन् ॥ संलेखनां गताहारा—मभजयदिनस्ततः ॥ ८३ ॥ स्वामी द-
क्षिणपश्चिम्यां—दिशोऽस्थादाद्यकूटतः ॥ अवतीर्य सुभद्राख्ये । शृंगे सिद्धशिलोपरि ॥ ८४ ॥
तदैव देवाः संभूय । तीर्थे तीर्थजगद्विभोः ॥ चक्रुः समवसरणं । भेजे सिंहासनं च सः ॥
॥ ८५ ॥ इतः स केकी सद्ध्याना—न्निजमायुः प्रपूर्य च ॥ कृताशनपरित्याग—स्तुर्यं दिवम-
वासवान् ॥ ८६ ॥ विज्ञायावधिना स्वस्य । तीर्थं स्वर्गतिकारणं ॥ तद् दृष्टुं च जिनं नंतुं ।
वेगादागाद्दिवः स हि ॥ ८७ ॥ आगम्यतां केकिसुरे—त्याहूतः स जिनेंदुना ॥ द्योतयन् द्युति-
भिः शैलं । निषसाद च तत्पुरः ॥ ८८ ॥ अथापृच्छत् सुधर्मेशः । कोऽयमुक्तस्त्वया विभो ॥
स्वाम्यवोचादिदंशाय—मभूदत्रैव केकिराट् ॥ ८९ ॥ देशनां मन्मुखात् श्रुत्वा । त्यक्तजीववधः
शमी ॥ मयैव सह शैलाग्रं । प्रापानशनमप्ययं ॥ ९० ॥ एतत्तीर्थप्रभावेन । क्षिप्त्वायं सक-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लं तमः ॥ तिर्यग्नवाद्देवलोकं । चतुर्थं ननु लब्धवान् ॥ ८९ ॥ एकावतारी नूत्वाय–मत्रैवा-
त्तव्रतो मुनिः ॥ सेत्स्यत्यवश्यमत्रैव । लब्धकेवलदर्शनः ॥ ९० ॥

स श्रुत्वेत्थं सुरः केकि–मूर्त्तिं स्वस्य तरोस्तले ॥ अकारयत्तीर्थपूजा–मथानंदमनोहरः
॥ ९१ ॥ तदादि मूर्त्तिरेषात्र । पूज्यते पुण्यकारिणी ॥ निःशेषजनसंघात–बोधायास्य तरोस्त-
ले ॥ ९२ ॥ श्रीमानजितनाथस्तु । स्थितः सिंहासने वरे ॥ बोधाय विश्वजंतूना–मथारन्नत
देशनां ॥ ९३ ॥ समता सर्वसत्वेषु । नक्त्या संघस्य पूजनं ॥ शत्रुंजयस्य सेवापि । नाल्प-
पुण्यैरवाप्यते ॥ ९४ ॥ आत्मवत्सर्वनूतेषु । सूक्ष्मबादरनेदतः ॥ रागद्वेषविहीनं यत् । चित्तं
सा समता मता ॥ ९५ ॥ साधुः साध्वी साधुसेवी । श्राद्धी संघश्चतुर्विधः ॥ धर्मश्चतुःशाख
इव । पूज्यते त्रिजगज्जनैः ॥ ९६ ॥ गेहे यस्य समन्येति । संघः सोऽघहरः सुराः ॥ पूजि-
तश्च पुनर्याति । तद्गृहं सोऽपि तीर्थराट् ॥ ९७ ॥ नगः शत्रुंजयाख्योऽयं । शाश्वतः सर्वदा
स्थिरः ॥ नवाब्धिमज्जज्जनता–जीवितद्वीपसन्निनः ॥ ९८ ॥ प्राप्ता ये गिरिमेतं हि । न ग-
म्यास्ते कुकर्मणां ॥ मुक्त्वा तले नारमिव । पापमारोहयंति ते ॥ ९९ ॥ आराधितो येन जि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नो धर्मोऽपि च जिनोदितः ॥ येनायं सेवितः शैल–स्तस्य दुर्गतिज्ञीः कथं ॥ १ ॥ शैलस्या-
स्य च शीलस्य । सेवया फलमुत्तमं ॥ संदेहः शीलतः सिद्धेः । शैलादस्माच्च सा स्फुटं ॥
॥ २ ॥ तीर्थेऽस्मिन् यानि कर्माणि । विधीयंते सुमेधसा ॥ तानि कर्मक्षयाय स्यु–र्नेवेऽत्रा-
पि परत्र च ॥ ३ ॥ शत्रुंजये येऽत्र सिद्धाः । सेत्स्यंत्यपि च सर्वदा ॥ ज्ञात्वापि केवली वक्तुं
। तान्नेवस्त्येकजिह्वया ॥ ४ ॥ अस्य शृंगेषु सर्वेषु । महिमा यो हि विद्यते ॥ जिनेष्विव स नो
वक्तुं । पार्यते वर्षकोटिभिः ॥ ५ ॥ अत्र शीलैकसन्नाहाः । शैलस्था अत्रसा नराः ॥ क्षमा-
स्त्रेण विनिघ्नंति । रिपून् रागादिकान् क्षणात् ॥ ६ ॥ शृंगेऽस्मिंश्च सुभद्राख्ये । निधिरत्नरसा-
श्रिते ॥ आश्रितानां पुण्यवतां । सुखमेति भवद्वये ॥ ७ ॥ पूर्वार्हदाश्रयाद्यद्वद् । मुख्यशृंगं
हि पूज्यते ॥ तथास्मदाश्रयादेत–द्भविता पूज्यमुच्चकैः ॥ ८ ॥ इति विश्वगुरोः श्रुत्वा । देश-
नांतेऽतिहर्षिताः ॥ अष्टाह्नीमुत्सवं कृत्वा । ययुः स्थानं निजं सुराः ॥ १० ॥ ततो नीलं न-
भो नील–यंतोऽभ्रैर्जलदा भृशं ॥ भ्रमंति प्रापुरौदीच्य–वायुना हितकारिणा ॥ ११ ॥ गर्जंतो
मधुरं धीराः । संपाखड्गेन तोयदाः ॥ व्योमाजिरे ग्रीष्मजया–न्यासमिव हि चक्रिरे ॥ १२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नीले व्योमन्यलक्ष्यंत । बलाकाः कंबुपांडुराः ॥ अमावास्यात्रियामाया–मिव तारकपंक्तयः ॥ १३ ॥ यदीषत्तोयदा गर्जा । कुर्वते प्रथमोदये ॥ तज्जाने बलवद्ग्रीष्म–विजयास्फुटमंत्रिणः ॥ १४ ॥ वायुस्तदग्रसारीव । व्यजृंभत मुहुर्मुहुः ॥ नीरंध्रैरभ्रसंघातै–र्मेघः संवर्मयन्निव ॥ १५ ॥ दुर्जयं चपलाखड्गै–रपि ज्ञात्वोष्मकं घनाः ॥ शरासनं शक्रदत्तं । जगृहुस्तज्जयक्षमं ॥ १६ ॥ जृंभते बलवानेष । निदाघश्चंडरोचिषा ॥ अतोऽभ्रैः प्रथमं मेघाः । स्थगयामासुराशु तं ॥ १७ ॥ स्थूलैः स्थूलैश्च विरलै–र्बिंदुभिस्तुन्निरंबुदः ॥ अताडयन्महीं पूर्वं । ग्रीष्मे किंचित्कृतादरं ॥ १८ ॥ बलाकाहारिणी संपा । स्फुरद्धास्या जनप्रिया ॥ किंचिदंतर्गृणंती द्यौ–रासीत्पीनपयोधरा ॥ १९ ॥ धाराहारानिव दिशो–ऽकिरद्धाराधरो भुवि ॥ रत्नधाराधरः सोऽपि । तस्मिन्नुत्किरतिस्म च ॥ २० ॥ यथा मेरौ जिनस्नात्रे । तथा शत्रुंजये तदा ॥ उन्मार्गगा महीं व्यापु–र्जलवाहाः समंततः ॥ २१ ॥ उदिते जलदे धारा । पत्याविव नितंबिनी ॥ उद्यदंकुररोमांचा । स्पंदिनीवाभवद्भृशं ॥ २२ ॥ जीविता जीवनेनेव । जीमूतेनेह दर्दुराः ॥ उच्चैरनिष्टमारावैः । कलुषानुकृतिं व्यधुः ॥ २३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्थं वर्षोत्तरं ज्ञात्वा । स्वामी तैर्मुनिभिः समं ॥ अस्थात् शृंगे सुभद्राख्ये । तस्मि-
न्नेव सुरैर्वृतः ॥ २४ ॥ निषेदुः कंदरास्वेके । परे सिंहगुहासु च ॥ केचित्सर्पबिलस्याग्रे । मु-
नयो नियमेन ते ॥ २५ ॥ मंडपं स्वामिने चक्रु–स्तत्रोत्तुंगं सुरेश्वराः ॥ तत्र ध्यानाज्जगत्स्वा-
मी । चतुर्मासीमलंघयत् ॥ २६ ॥ तत्रापुः केऽपि सम्यक्त्व–मन्ये भद्रकभावतां ॥ जीवहिं-
सां जहुः केचि–ज्जीवा जिननिषेवणात् ॥ २७ ॥ विरराम ततो वर्षा । प्राप्तापि बहुधोन्नतिं ॥
सहसैव भद्रासंगा–दवसानं न दुर्लभं ॥ २८ ॥ पंकानथ शोषयंती । निर्मलां सृजती दिवं ॥
विकाशयंती कासानां । कुसुमान्याययौ शरत् ॥ २९ ॥ भद्राण्यपि हि नैर्मल्यं । विकासं
पंकजान्यपि ॥ निम्नगा मार्गगामित्वं । तस्यां शरदि लेभिरे ॥ ३० ॥ विश्वे जीवनदानेन ।
मलिना अपि तोयदाः ॥ ते नैर्मल्यं तदा प्रापु–रहो दानविजृंभितं ॥ ३१ ॥ इतश्च सुव्रता-
चार्य–स्तंडुलोदकभृत्करः ॥ ग्लानत्वात्प्रथमं शृंग–मारोहन्मुनिमंडितः ॥ ३२ ॥ गिरिसंधौ वि-
शश्राम । कस्यचिच्च तरोस्तले ॥ तृषातुरोऽथ काकस्त–ज्जलपात्रमलोठयत् ॥ ३३ ॥
॥ शुष्यत्तालपुटो भीम–भानुभानुकरालितः ॥ लुठत्तत्स मुनिर्वीक्ष्य । कोपकालुष्यमुज्जगौ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ३४ ॥ यत्काण ज्नवता प्राण—रक्षणं क्षणतः पयः ॥ आलोठि तदकृत्येन । नात्र त्वत्संततेर्गतिः ॥ ३५ ॥ अशेषमुनितोषाय । निर्जंतु प्रासुकं पयः ॥ अत्र स्थाने सदा ज्नावि । प्रज्नावात्तपसो मम ॥ ३६ ॥ यत्तदैव ययुः काकाः । काकुकोलाहलाकुलाः ॥ तत्तदादि सिद्धिशैले । काकानामागतिर्न हि ॥ ३७ ॥ डुर्निक्षविड्वरानर्थ—समर्थनपरोऽथ चेत् ॥ अत्रैति काकस्तत्कार्यं । शांतिकं विघ्ननाशनं ॥ ३८ ॥ श्रीयुगादिजिनस्याग्रे । राजादन्याश्च शांतिकं ॥ पुरतो जैनमुनिज्निः । कृतं चारिष्टकोटिनुत् ॥ ३९ ॥ यत् शैलसंधौ तत्तोयं । प्रवृत्तं तपसो बलात् ॥ नैरुत्यां दिशि सौख्यानि । नैरंतर्याणि यछति ॥ ४० ॥ रोगशोकार्त्तिवेताल—ग्रहडुःखानि यांति च ॥ पापजान्यपि तोयस्य । तस्य स्पर्शान्न संशयः ॥ ४१ ॥ ततश्च ज्नगवान् मुख्य—शृंगमारुह्य तन्मुनीन् ॥ कांश्चित्तत्क्षेत्रमाहात्म्या—न्मुमुक्षूनन्वशादिति ॥ ४२ ॥ अत्रैव स्थीयतां ज्नावि । ज्नवतां पुंमरीकवत् ॥ केवलं कर्मणां घाता—न्मुक्तिश्च शुज्नज्नावतः ॥४३॥ इत्यालाप्य मुनीनर्हन् । विहर्त्तुं प्रययावथ ॥ मुनयः केवलं लब्ध्वा । प्रापुश्च पदमव्ययं ॥ ४४ ॥ इतश्च सगरश्चक्री । सेव्यमानो नृपव्रजैः ॥ षट्खंमं ज्नारतं पाति । सदैकपुरवहली

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ४५ ॥ तस्य जह्नुमुखाः पुत्राः । सहस्राः षष्टिरद्भुताः ॥ तारुण्यपुण्यपूर्णांगाः । शस्त्रशास्त्र-
विदोऽभवन् ॥ ४६ ॥ अन्यदा ते स्वपूर्वेषां । नंतुं तीर्थानि सोत्सुकाः ॥ अनुज्ञाप्य वलात्ता-
तं । चेलुः सहबलवाहनाः ॥ ४७ ॥ स्त्रीरत्नवर्जं रत्नानि । त्रयोदशमितानि ते ॥ यक्षान् नृपां-
श्चमूं वह्निं । जगृहुः सगराज्ञया ॥ ४८ ॥ क्रमाच्चलंतः कतिचित् । प्रयाणैर्योजनांकितैः ॥ अ-
ष्टापदं नगं प्रोच्चैः । कुमाराः प्रापुरद्भुतं ॥ ४९ ॥ कल्पद्रुचंपकाशोक–वटाश्वत्थतमालकैः ॥
पाटलासल्लकीचूत–बकुलाद्यैर्द्रुमैर्वृतं ॥ ५० ॥ मणिरत्नप्रभापूरै–श्चित्रयंतं नभस्तलं ॥ निज-
पूर्वजकीर्त्तिंडो–स्ते कंदमिव मेनिरे ॥ ५१ ॥ [illegible] ॥ अष्टाभिः पदिकाभिस्ते । तमारुह्याति-
हर्षिताः ॥ प्रासादान् जगदीशस्य । त्रिःप्रदक्षिणयन् क्षणात् ॥ ५२ ॥ प्रविश्य दक्षिणद्वारा
। तत्र ते चतुरो जिनान् ॥ पश्चिमायां जिनानष्टौ । कौबेर्यां च जिनान् दश ॥ ५३ ॥ ऐंद्र्यां
च द्वौ जिनावेवं । चतुर्विंशतिमर्हतां ॥ अपूजयंस्त्रिधा शुद्ध्या । सर्वे पुष्पाक्षतस्तवैः ॥ ५४ ॥
पूजांते तु महोत्तुंगं । प्रासादं जगदीशितुः ॥ दर्शं दर्शं भृशं प्रीत्या । जगुरन्योऽन्यमित्यथ ॥
॥ ५५ ॥ प्रासादोऽयं चतुर्द्वार–श्चतुर्धाधर्मभूभृतः ॥ प्रवेशायाभवत्ताव–त्क्षतिकष्टनिषिद्धये ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ५६ ॥ दिवं यद्विलिखत्येष । कलशध्वजतोरणैः ॥ तामंतरा मुक्तिपुरा–र्गलामिव नुदत्य-
सौ ॥ ५७ ॥ कुहूनिशीथेऽपि तमो । यद्रत्नैर्नाशयत्यसौ ॥ पुण्यैस्तथांतःप्रभवं । हरिष्यत्यपि
निश्चयः ॥ ५८ ॥ कल्याणैर्यदयं जात–स्तदन्येभ्योऽपि यच्छति ॥ उत्तुंगोऽयंपरानुच्चै–र्नयत्यपि
निजाश्रयात् ॥ ५९ ॥ चक्रिणो भरतेशस्य । कंदः किं कीर्त्तिवीरुधः ॥ किं वा तद्भक्तिताडूर्ध्वं
। दर्शयत्येष निर्मलः ॥ ६० ॥ किं वा विश्वभ्रमोत्तप्त–लोकलोचनचंद्रमाः ॥ किंवायं मूर्त्ति-
मान् धर्मो । यतोऽमुष्मात्स वर्त्तते ॥ ६१ ॥ अपरेऽपि हि पुण्यांगाः । प्रासादा अत्र भांति
हि ॥ पालकप्रतिच्छन्दानां । विमानानां विडंबकाः ॥ ६२ ॥ द्वारपालाश्चतुर्दिक्षु । देवैरप्यजिता
अमी ॥ दुरारोहा मनुष्याणा–मष्टौ च पदिका अमूः ॥ ६३ ॥ तद्ध्रुवं भरतेशेन । लोभिनो
भाविनो जनान् ॥ ज्ञात्वा चक्रे प्रयत्नोऽयं । सर्वः प्रासादरक्षणे ॥ ६४ ॥

इत्यालापपरान् जह्नु–रूचे प्रीत्या स्वबांधवान् ॥ स्वपूर्वेषां दिनैः कश्चि–द्धर्मस्थानं वि-
नंक्ष्यति ॥ ६५ ॥ न दूरे भविता लोभ–ग्रस्तानां शतयोजनी ॥ तस्मादत्र करिष्यामो । र-
क्षार्थं खातिकां दृढां ॥ ६६ ॥ परस्परं विमृश्येति । सोद्यमाश्चक्रिसूनवः ॥ खातिं च खनया-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मासुः । सवाहनपरिच्छदाः ॥ ६७ ॥ पृथ्वीप्रमाणपिंडेन । खनतां खातिकां बहु ॥ तेषां घा-
तान्नागलोके । रजोवृष्टिरजायत ॥ ६८ ॥ मणीनहेर्मलिनयन् । दृष्टीराच्छादयन्नपि ॥ कोपवृ-
द्धिविधौ चूर्णः । श्वभ्रे रेणुभरोऽपतत् ॥ ६९ ॥ तदाकुलेष्वहिकुले–ष्वभूत्कोलाहलो महान्
॥ तदीशा अथ सर्वेऽपि । चुकुपुस्तस्य हेतवे ॥ ७० ॥ अथ ज्वलन् भृशं कोपा–दहीशो ज्व-
लनप्रभः ॥ जह्नावबधिना चक्रि–सुतांस्तत्कारणस्थितान् ॥ ७१ ॥ तथैव कोपं संहृत्य । वेगा-
देत्य च भोगिराट् ॥ उवाच सामवाक्येन । तानिति प्रणयोज्ज्वलः ॥ ७२ ॥ वत्साश्चक्रिसु-
ता यूय–मन्वये भरतेशितुः ॥ विवेकिनश्च किमिदं । तदारब्धं महोद्यमैः ॥ ७३ ॥ युष्मत्ख-
ननघातेन । नागलोकोऽद्य पीड्यते ॥ विरमंतु ततोऽमुष्मा–दायासात्स्नेहवृद्धये ॥ ७४ ॥ अ-
स्मत्स्वामी युगादीशो । वयं तस्यैव किंकराः ॥ तत्कुले यूयमुत्पन्ना–स्तत्स्नेहः स्थिर एव नौ
॥ ७५ ॥ इत्यालाप्य गते तस्मिं–स्तेऽपि खातादपासरन् ॥ संभूय पुनरेवेति । मंत्रयामासु-
रुद्धताः ॥ ७६ ॥ निर्जलेयं दिनैः कश्चि–द्भविता खातिका ननु ॥ सुलंघ्या लोभिनामस्ति ।
किमसाध्यं जगत्त्रये ॥ ७७ ॥ इत्युक्त्वा दंडरत्नेन । सागरात्सुरनिम्नगां ॥ आकृष्य परिखां वा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भिर्जह्नुरापूरयद्यात् ॥ ७८ ॥ अथ क्षुब्धेषु नागेषु । भज्यमानेषु वेश्मसु ॥ पंकपातादार्त्त-
नादै–श्चुकोप ज्वलनप्रभः ॥ ७९ ॥ अहो मूर्खा अमी चक्रि–सूनवो राज्यदुर्मदाः ॥ अस्म-
दुक्तं युक्तमपि । मन्यते न हि धिग्मदं ॥ ८० ॥ चिंतयित्वेति नागेशै–रन्यैरपि समन्वितः ॥
फणाटोपं महाकोपाद् । बिभ्राणः फूत्कृतिं सृजन् ॥ ८१ ॥ उत्पत्य सहसा श्वभ्रा–त्तत्रैत्य वि-
षदृष्टिभिः ॥ तानि षष्टिसहस्राणि । युगपज्ज्वलनोऽदहत् ॥ ८२ ॥ [redacted] ॥

इत्यासुत्र्य महादाहं । ज्वलनो भुजगेश्वरः ॥ पुनः स्वं स्थानमापेदे । कोपो रिपुवधाव-
धिः ॥ ८३ ॥ ततस्तु सैन्ये तुमुल–स्तदाघातान्महानभूत् ॥ वज्रपातादिव जने–ऽन्योऽन्यं
व्याकुलताकरः ॥ ८४ ॥ तदनाथं महत्सैन्यं । कांदिशीकमितस्ततः ॥ सर्वोपायपरिभ्रष्ट–मा-
सीद्दैवविपर्ययात् ॥ ८५ ॥ क्षणे क्षणे मनस्त्वन्य–च्चिंतयत्यात्मनो हितं ॥ स्वेच्छया कुरुते दै-
व–मन्यदेवात्मनोऽहितं ॥ ८६ ॥ दुःखोरगविषग्रस्ताः । सैनिका गतनायकाः ॥ प्रमार्ज्य किं-
चिदश्रूणि । चिंतयामासुरित्यथ ॥ ८७ ॥ पश्यतामपि सर्वेषा–ममी चक्रीशसूनवः ॥ युग-
पद्दग्धा नागै–स्तदास्माकं बलं वृथा ॥ ८८ ॥ भूपैर्विधीयते सेना । स्वरक्षायै समंततः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सत्यामपि ततस्तस्या—ममी जाता गतासवः ॥ ८९ ॥ पुरे किं दर्शयिष्यामः । स्वमुखा-
नि गतत्रपाः ॥ चक्रीशः पुनरस्मान् ही । नानोपायैर्हनिष्यति ॥ ९० ॥ अमीषामेव त-
न्मार्गं । निरुपाया भजामहे ॥ सद्भक्त्या भूपतेर्मार्गं । श्रयंतीति जनस्थितिः ॥ ९१ ॥ इत्या-
लोच्य मिथो व्याप्य । स्थितं द्वादशयोजनीं ॥ ते काष्ठैर्वेष्टयामासुः । सैन्यमश्वरथेभयुत् ॥
॥ ९२ ॥ यावन्मुमुर्षवो दाहे—स्तेऽग्निं पाणिभिरस्पृशन् ॥ अज्ञासीत्तावता शक्रो—ऽवधिना त-
दुपप्लवं ॥ ९३ ॥ दयालुः सहसोपेत्य । विप्रवेषं विधाय च ॥ मा म्रियध्वं मा म्रियध्वं ।
तानित्यूचे दिवस्पतिः ॥ ९४ ॥ वचसा तेन धीरेण । सर्वे तस्थुस्तथैव ते ॥ शक्रविप्रः पुरो
भूत्वा । जगौ तान् पुनरित्यपि ॥ ९५ ॥ एष वः सर्वसंहारः । कथमद्य विजृंभते ॥ परा-
भवाद्वा दुःखाद्वा । शोकाद्वेष्टकृतेऽथ किं ॥ ९६ ॥ श्रुत्वा तस्येति वचन—मवोचंस्ते कृता-
दराः ॥ परव्यसनदुःखिन् भो । शृण्वस्मद्व्यसनागतिं ॥ ९७ ॥ अमून् सगरचक्रेश—सुता-
नालोकयाग्रतः ॥ चेष्टितेन निजेनैव । भस्मसात्कृतविग्रहान् ॥ ९८ ॥ यत्सतामपि नः स्वा-
मि—सुताः प्रापुरिमां दशां ॥ तेनैव लज्जिता वह्निं । प्रविशामो वयं ननु ॥ ९९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्युक्ते स पुनः प्राह । यत्साहसमनुष्ठितं ॥ तत्स्वामिन्नत्तया वा स्वामि—न्नयाह्ना शोकतोऽपि वा ॥ ३०० ॥ अनिह्नवोऽपि यन्मृत्यु—मिह्नामस्तत्र चक्रिन्नीः ॥ कैः कैरुपायैः स हि नो । हनिष्यत्यूचुरित्यमी ॥ १ ॥ ततः शक्रो निजं रूप—माधायेदमुवाच तान् ॥ अत्र वो दूषणं किंचित् । पश्यामि न मनागपि ॥ २ ॥ तन्मा म्रियध्वं चक्रीशं । युष्मास्वेशोऽपनोदये ॥ प्रयतंतु प्रयाणाय । मदाहूताः पुरंप्रति ॥ ३ ॥ इत्याश्वास्य स तान् शक्र—स्तिरोऽन्नूत्पश्यतोऽपि हि ॥ विशोकास्ते कथंचिच्चा—योध्यांप्रत्यचलन् शनैः ॥ ४ ॥ प्रयाणैर्न्निगनपादैस्ते । प्राप्यायोध्यां सुराधिपं ॥ अस्मरन् स पुनर्वेगा—दाययौ तत्कृपापरः ॥ ५ ॥ पंचवर्षशतायुष्कं । गतासुं बालकं धरन् ॥ विप्रवेषधरः शक्रो । जगाम च नृपांतिकं ॥ ६ ॥ नृपद्वारगतः प्रोच्चै—रुदित्वा च कठोरगीः ॥ विगर्हन् वसुधां देवं । चक्रिणं च जगौ हरिः ॥ ७ ॥ सर्वंसहासि वसुधे । कठिनासि न यत्त्वकं ॥ वृषन्नं न्नरतं नाथं । नानुजातासि रे जमे ॥ ८ ॥ धिक् दिक्पाला इमे काला—पेक्षया पाथ हा क्षितिं ॥ यूयं हि साक्षिणः सर्व—व्यापाराणां शुन्नाशुन्ने ॥ ९ ॥ सर्वेषु सुखकृन्नावं । सृजसि दैव समाहितं ॥ अयि किं निष्टुरं दुःखं । सृजसी-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ह पराङ्मुखः ॥ १० ॥ मयैव दुःकृतं चक्रे । किंतु चात्यंतदारुणं ॥ वृद्धे वयसि तन्मेऽद्य फलितं सुतहानितः ॥ ११ ॥ त्वयैनं बालकं देव । हरता स्मरता क्रुधं ॥ वृद्धं मां मत्कलत्रं च । मुमुर्षुं हतवानसि ॥ १२ ॥ पाहि चक्रिन् कुदेवान्मां । न्यायाङ्क वसुंधरां ॥ निर्वासय पुरात्पापं । भरतेशस्थितिं स्मरन् ॥ १३ ॥ सुखगृध्रा हि दिक्पाला । विचैतन्या च भूरियं ॥ सर्वदेवमयस्तत्त्वं । किं न पासि नरेश मां ॥ १४ ॥ सर्वथाप्यजिते नाथे । व्रतभाजि जिनाधिपे ॥ त्वमेव पालको लोके । दोषाकर इवाऽरवौ ॥ १५ ॥

तस्याकर्ण्येति वचनं । विषण्णोऽथ नृपोऽपि तं ॥ आकारयज्ञनैर्दोषं । स्वस्मिन्नेव विचिंतयन् ॥ १६ ॥ दर्शनाच्चक्रिणः सोऽपि । मुक्त्वा तं बालकं पुरः ॥ उच्चैरुरोद संस्थानात् । रोदयन्नपरानपि ॥ १७ ॥ रोदनांते पुनः पृष्ट—श्चक्रिणेति स गां जगौ ॥ स्वामिन् ममैकपुत्रस्य । दुःखं किं कथयामि ते ॥ १८ ॥ अद्यैष मत्सुतो बालो । निद्राणो रजनीमुखे ॥ सहसैव महाक्रूरै—रदश्यत सरीसृपैः ॥ १९ ॥ नैष दोषो भुजंगानां । न चैतस्य ममापि च ॥ किंत्वधर्मो जने देशे । त्वयि वा वर्त्तते ननु ॥ २० ॥ मंत्रयंत्रादिभिस्तत्त्व—मुद्धाद्यं कुरु बा-



For Private And Personal Use Only

लकं ॥ अन्यथा त्वयि दोषः स्या–दस्माकं तु कुलक्षयः ॥ २१ ॥ अथ चक्रधरो वैद्यान् । मां-
त्रिकानप्यजूहवत् ॥ गतासुं तं तु ते वीक्ष्य । कृतोपाया मिथो जगुः ॥ २२ ॥ स्वामिन्नसाध-
साध्याना–मौषधानां प्रतिक्रिया ॥ पूर्वाऽमृतगृहाद्भस्म । यद्येत्युल्लाघ एष तत् ॥ २३ ॥ नि-
शम्येति तदा भूप । आदिक्षत्तत्कृते नृपान् ॥ शक्रोऽपि वैक्रियै रूपैः । पश्यतिस्म गृहाद् गृहं
॥ २४ ॥ महानसाद्यत्र यत्र । भस्म ते लांति पूरुषाः ॥ तत्र तत्रेत्यपृच्छन्वः । कुले कः किं
मृतो न वा ॥ २५ ॥ पितृमातृस्वसृबंधु–मृतिं तेभ्यो निशम्य ते ॥ पुनस्तथैव तद्भस्म । मु-
क्त्वागच्छन् परान् गृहान् ॥ २६ ॥ भ्रमित्वाऽलब्धभस्मान । एवं ते सकलं पुरं ॥ राज्ञः स-
मीपमासेदुः । शक्रविप्रोऽपि दुःखितः ॥ २७ ॥ ततो जगाद चक्रेशो । मारिहीनाद् गृहान्म-
म ॥ महानसोद्भवं भस्म । विप्र त्वं समुपानय ॥ २८ ॥ विप्रेण गृह्णता भस्म । चक्रिमा-
ता यशोमती ॥ पृष्टा जगौ चक्रिपितृ–सुमित्रमरणं गृहे ॥ २९ ॥ तन्मुक्त्वा स तथैवेत्य ।
नृपमाह पितुर्मृतिं ॥ वैद्याश्च लब्धसमयाः । प्राहुस्तमिति हर्षिताः ॥ ३० ॥ भेषजैरपरैः स-
न्नि–रसाध्यो भूतिवर्जितैः ॥ विपत्स्यते बालकोऽयं । नात्र दोषो चिकित्सके ॥ ३१ ॥ इति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रुत्वा शक्रविप्रो । मुक्तकंठं च मायया ॥ उच्चैरुरोद राजेंद्र । दयार्द्रहृदयं सृजन् ॥ ३२ ॥ इतश्चक्रिबलं सर्वं । राजद्वारमुपागतं ॥ राजाथ दुःखितं विप्रं । तं जगादेति सामगीः ॥३३॥ मा कुरुष्व शुचं विप्र । संसारस्थितिरीदृशी ॥ जातो म्रियेत जीवोऽत्र । न स्थिरं वस्तु तः क्वचित् ॥ ३४ ॥ जगत्पूज्या वज्रकाया । योगींद्रा जिननायकाः ॥ गता अनंतास्तेऽप्यंतं । का चिंता परदेहिनां ॥ ३५ ॥ सप्तधातुनिबद्धं यत् । क्षुत्तृट्शीतातपादिभिः ॥ पीड्यते तत्र देहे का । स्थिरता मूर्खकल्पिता ॥ ३६ ॥ भ्रातृपुत्रकलत्राद्याः । सर्वेऽपि स्वार्थहेतवे ॥ आयांति यांत्यपि सदा । दुःखं केवलमात्मनः ॥ ३७ ॥ यस्य स्वस्यापि देहो नो । वशे सर्वत्र लालितः ॥ तस्य मातृपितृभ्रातृ-पुत्राद्या वशगाः कथं ॥ ३८ ॥

इति ब्रुवाणे पृथ्वीशे । शक्रः प्रत्यक्षरूपवान् ॥ जगाद च महीनेत-र्वेत्सि किं संसृतेः स्थितिं ॥ ३९ ॥ सत्यमेतादृगेवायं । संसारः सर्वदुःखदः ॥ किंत्वस्मिंश्च प्रमादांधा । विचेष्टंते यथा तथा ॥ ४० ॥ कर्मणोत्पद्यते विश्वं । कर्मणा च विलीयते ॥ तत्र बंधुसुतद्रव्य-लाभालाभे तु का स्पृहा ॥ ४१ ॥ चक्रिन्निदर्शनमिदं । यथा पूर्वं मृतास्तव ॥ षष्टिसहस्रास्तन-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्ते । सूनवोऽपि मृता ननु ॥ ४२ ॥ ततश्च सैनिकाः संस–इंतरेत्य शुचाकुलाः ॥ सोरस्ताडं
चक्रिणोऽग्रे ॥ शशंसुस्तत्कुलक्षयं ॥ ४३ ॥ श्रुत्वेति विह्वलस्येंद्र–श्चक्रिणो व्यजनानिलैः ॥ गो-
शीर्षचंदनैर्देहे–ऽभिषेकं कमलैर्व्यधात् ॥ ४४ ॥ कथंचिल्लब्धचैतन्य–श्चक्री संस्मृत्य नंदनान्
शोकग्रंथिरुद्धकंठो । मूर्छतिस्म मुहुर्मुहुः ॥ ४५ ॥ मूर्छया चक्रिमरणं । विज्ञाय सुरराडथ ॥
तत्कंठाश्लिष्टबाहुस्तं । मुक्तकंठमरोदयत् ॥ ४६ ॥ तयो रोदननादेन । रोदसीवासिनो जनाः ॥
शोकसागरनिर्मग्ना । इवाभूवंश्चराचराः ॥ ४७ ॥ विलीने निबिडे ग्रंथौ । शक्रः प्रोवाच चक्रि-
णं ॥ किं मुह्यसि महीनेत–स्त्वमप्यज्ञ इवार्त्तिभिः ॥ ४८ ॥ भवे स्वकर्मणा कश्चि–दल्पायु-
र्जायते जनः ॥ दीर्घायुश्च भवेदन्यः । का चिंतात्र ध्रुवे क्षये ॥ ४९ ॥ त्वमेवाबोधयः पूर्वं ।
मां वैराग्यवचोभरैः ॥ स एव च पुनर्मोहं । किमेवं लब्धवानसि ॥ ५० ॥ इत्यालापिनि दे-
वेशे । द्वाःस्थो भूपं व्यजिज्ञपत् ॥ स्वामिन् द्वौ पुरुषौ द्वारि । वर्त्तेते त्वन्नतिप्रियौ ॥ ५१ ॥ ॥४४६॥
भ्रूसंज्ञामीषदासाद्य । चक्रिणो वेत्रिभृन्नरौ ॥ प्रावेशयच्च नत्वैकः । शशंस जिनमागतं ॥५२॥
अन्योऽप्याह जय स्वामिन् । जाह्नवी तव सूनुभिः ॥ आकृष्टाष्टापदे गर्त्ता–मापूर्याप्लावयन्म-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





र्दीं ॥ ५३ ॥ तस्याः पूरैः प्रसर्पद्भिः । पार्श्ववासिजनः स्थलीं ॥ आरुह्य वारिधौ द्वीप-वदस्था-
द्देहमात्रभृत् ॥ ५४ ॥ प्रलये वारिधिरिव । स पूरो वृद्धिमाप्नुवन् ॥ जाने समग्रं भरतं । क-
र्त्ता नूनं द्वीपोपमं ॥ ५५ ॥ पाहि पाहि विभो तस्मा-दंभसोऽस्मान्निमज्जतः ॥ नाथान्यथा
गतनाथा-निव नेता यमः क्षयं ॥ ५६ ॥ जिनागमनपुत्रांतः । देशप्लावविसंस्थुलं ॥ विभौ-
जाश्वक्रिशं प्राह । वितर्कः कोऽत्र ते स्थिरः ॥ ५७ ॥ त्यज पुत्रशुचं चक्रिं-स्तद्दैवं स्वामिनं
भज ॥ स्वामिप्रणामजं पुण्यं । शोकान्मा विफलीकुरु ॥ ५८ ॥ भगीरथं जह्नुसुतं । रोधा-
यादिश वारिणः ॥ स हि नागकुले तात-दोषमार्ष्टा भविष्यति ॥ ५९ ॥

श्रुत्वेति चक्री निःश्वस्य । किंचिदश्रूणि धारयन् ॥ भगीरथं समाहूय । निजस्यांके न्य-
वेशयत् ॥ ६० ॥ आघ्राय वदने मूर्ध्नि । चुंबित्वा तं च सोऽवदत् ॥ वत्स भारतवंशस्य । प-
श्येदं किमुपागतं ॥ ६१ ॥ दवदग्धद्रुमारण्ये । त्वमस्मत्कुलसंततौ ॥ अवशिष्टांकुर इव । वि-
द्यसे महदुन्नतौ ॥ ६२ ॥ तत्त्वं लोकस्य रक्षार्थे । व्रज गंगां पुनर्नय ॥ मुख्यप्रवाहं दंडेन ।
ज्वलनप्रभसेवनात् ॥ ६३ ॥ इत्यादेशं समासाद्य । समं सैन्यैर्भगीरथः ॥ चचाल ह्रादयन्न-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कं। रजोभिः क्षोभयन्महीं ॥ ६४ ॥ समं शक्रेण भूशक्रः। सोऽपि सांतःपुरो जिनं ॥ अपु-
नस्क्रियशोकाय। ययौ नंतुं धृतादरः ॥ ६५ ॥ तत्र समवसरण–स्थितं ज्ञानधरं जिनं ॥ तौ
त्रिःप्रदक्षिणीकृत्य। नेमतुर्नुतितत्परौ ॥ ६६ ॥ जय स्वामिन्ननंतार्त्त–जनशोकापनोदक ॥ आं-
तरव्याधिहरण–प्रवीणाय नमोऽस्तु ते ॥ ६७ ॥ स्तुत्वेति तौ भक्तिपरौ। यथास्थानं निषीद-
तुः ॥ स्वाम्यपि क्लेशहरणीं। वाणीमित्युज्जगार च ॥ ६८ ॥ चक्रिन्नसारः संसारः। सौख्यं
राज्यं च न स्थिरं ॥ पुत्रमित्रकलत्राणि। बंधनानि दृढान्यपि ॥ ६९ ॥ रोगशोककरं देहं।
विषया विषयातनाः ॥ भोगिभोगसमा भोगा। जीवितं जलबिंदुवत् ॥ ७० ॥ क्षणे यद् दृ-
श्यते रम्यं। तत्क्षणांते तु दारुणं ॥ तत्वादिहास्ति संसारे। तत्वादन्यत् स्थिरं न हि ॥७१॥
वध्यंते केवलं पाशैः। कुटुंबव्हिणात्मकैः ॥ संसारकारागारस्था। विद्वांसोऽपि प्रमादतः ॥
॥ ७२ ॥ विरलास्ते भवंत्यत्र। कृष्णचित्रकसन्निभाः ॥ भवाब्धौ विषमावर्त्ते। न वाह्यंते हि
ये नराः ॥ ७३ ॥ देशनावाक्सुधां पीत्वा। प्रभोरिति स चक्रभृत् ॥ दुःखहालाहलं मुक्त्वा।
व्याजहार मुदा जिनं ॥ ७४ ॥ कर्माधीनं जगत्स्वामिन्। तदमीभिः कथं कृतं ॥ षष्टिसह-

For Private And Personal Use Only

स्तैर्युगप–द्युगपन्मृत्युदं हि यत् ॥ ७५ ॥ इति पृष्टो जगन्नाथो । ज्ञानदृष्टचराचरः ॥ जगाद तद्भवांस्तादृक् । कर्मबंधनकारणं ॥ ७६ ॥

कस्मिन् पल्लीपुरेऽभूवन् । दुर्दांताश्चौर्यवर्त्तिनः ॥ एते किराता दुश्चित्त–ध्यातान्यद्रविणांगनाः ॥ ७७ ॥ अन्यदा भद्दिलपुरा–च्चलन् शत्रुंजयंप्रति ॥ संघः किरातैस्तैर्मार्गे–ऽदर्शि द्रविणसंभृतः ॥ ७८ ॥ लोभांधैर्मंत्रयांचक्रे । लुंटाकैस्तैर्निशामुखे ॥ एष संघो व्रजन्मार्गे । ग्राह्योऽस्माभिरिति स्फुटं ॥ ७९ ॥ षष्टिसहस्रेष्वेतेषु । प्रतिपन्नेषु तद्वचः ॥ एकः कुलालो भद्रात्मा । श्रुत्वा तच्च जगावति ॥ ८० ॥ धिग्नश्चिंतितमेतद्धि । यदेवं यात्रिका जनाः ॥ लुठ्यंते सर्वथास्माभिः । सत्स्वन्येषु धनेष्वपि ॥ ८१ ॥ एते स्ववित्तं सत्क्षेत्रे । वप्स्यंति हि शुभाशयाः ॥ अस्माभिर्गृह्यते तच्चा–धर्मत्वमिदमुच्चकैः ॥ ८२ ॥ पाप्मभिः प्राक्तनैरेवा–धुनास्माकं कुजन्मता ॥ पुनर्लुंटाकपापेन । गतिः का हि भविष्यति ॥ ८३ ॥ पुण्यानुबंधिभिः पुण्यै–र्दानशौंडा इहाप्यमी ॥ यात्रया तीर्थनाथस्य । भाविनः सुखिनः पुनः ॥ ८४ ॥ सर्वथा कातरं भीरुं । यूयं वदथ मामहो ॥ तथापि नाहमत्रार्थे–ऽनुगंतानुमतिप्रदः ॥ ८५ ॥ इत्याल-

पंतं तं कुंभ–कारं कारागृहादिव ॥ ते पुरादसहग्भावं । सर्वथा निरवासयन् ॥ ७६ ॥ संभू-
य तैरथ ज्ञात्वा । प्रत्यासन्नपथा व्रजन् ॥ पापैरलुंटि श्रीसंघ–श्छलघातिभिरुद्धतैः ॥ ७७ ॥
दिशो दिशः पलायंते । तेषां पाताज्जनव्रजाः ॥ यशांसीव दुराचारात् । पैशून्यात्सुगुणा इव
॥ ७८ ॥ लुंटित्वा तेऽथ तं संघ–मघौघोद्बोधदुर्धियः ॥ पुनः प्रापुर्निजं स्थानं । नारका इव व-
क्रगाः ॥ ७९ ॥ इतश्च भद्दिलपुरा–धीश्वरोऽथ निशम्य तत् ॥ वेगादेत्य महासैन्यैः । पल्ली-
पुरमवेष्टयत् ॥ ८० ॥ तत्सैन्यं महदालोक्य । भिल्ला भीतिभृतो भृशं ॥ तस्थुः प्राकारमध्य-
स्था । जीवा इव निगोदगाः ॥ ८१ ॥ तेषां कुकर्मभिरिव । नुन्नो वायुभिरुद्ययौ ॥ तदा
तस्य पुरस्यांत—र्ज्वालयन् ज्वलनो जनान् ॥ ८२ ॥ क्रोधः पुण्यमिवासाधुः । सद्गुणानि-
व सोऽनलः ॥ तत्पुरं दग्धुमीशोऽभू–द्वार्यमाणोऽपि वारिभिः ॥ ८३ ॥ दह्यमानैः किरातै-
स्तै–र्ज्वलनेन समंततः ॥ धूमव्याकुलितैः कुंभी–पाकदुःखानि सेहिरे ॥ ८४ ॥ धिगस्माभि-
रयं संघो । ही पाप्मभिरुपद्रुतः ॥ तत्कर्म फलितं शीघ्र–मस्माकमतिदारुणं ॥ ८५ ॥ नि-
र्लोभः पुण्यवान् कुंभ—कारोऽस्मानप्यवारयत् ॥ निर्वासितः स चास्माभिः । कुकर्मभि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रिवोत्तमः ॥ ९६ ॥

इति ध्यानपराः सर्वे । सगोत्रा वह्निहेतिभिः ॥ युगपन्मृत्युमासेदुः । कर्मणां स्थितिरीदृशी ॥ ९७ ॥ यः संघोऽप्यर्हतां पूज्य–स्तीर्थं तीर्थस्य यः स्मृतः ॥ तस्यापि प्रत्यनीकं ये । कुर्वते नारका हि ते ॥ ९८ ॥ आराध्यः सर्वथा संघो । न विराध्यः कदापि सः ॥ संघाराधनतो मुक्ति–र्नरकस्तद्विराधनात् ॥ ९९ ॥ वर्त्तमानांस्तीर्थमार्गे । यात्रिकान् पीरुयंति ये ॥ सगोत्रास्ते विनश्यंति । कुगतिं यांति च ध्रुवं ॥ ४०० ॥ पश्चत्तापार्त्तितो मृत्वा । तेऽप्यग्रेमर्नरकं ययुः ॥ जाता मत्स्यास्ततोंऽज्ञोधौ । समं वक्राश्च धीवरैः ॥ १ ॥ कर्णशृगालाः संजाता–स्ततोऽप्येवं ज्नवान् बहून् ॥ भ्रांत्वा तेऽप्यज्नवन् ज्निल्लाः । सदा पापर्द्धितत्पराः ॥ २ ॥ ज्ञ्रमंतस्त्वन्यदा ज्निल्ला–स्तेऽपश्यंस्तद्वने मुनिं ॥ शांतप्रकृतिकमिति–चानमंस्तं सुवासनाः ॥ ॥ ३ ॥ मुनिश्च तेज्यो धर्मस्यो–पदेशं ज्ञानवान् ददौ ॥ ज्नद्रकत्वं च तैर्लेज्ने । साशंकैरिव दुर्नये ॥ ४ ॥ विशेषाद्धर्मलाज्नाय । तेषां ज्ञानधरो मुनिः ॥ तत्पुरेऽस्थाच्चतुर्मासी–मासन्नोदयशालिनां ॥ ५ ॥ तत्यजुः प्रथमे मासि । सप्तापि व्यसनानि ते ॥ द्वितीयेऽनंतकायांश्च । ॥४५१॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तृतीये रात्रिभोजनं ॥ ६ ॥ तुर्येऽनशनसंपन्ना । विद्युत्पातात्समं मृताः ॥ चक्रिंस्त्वत्सूनवो जाताः । प्राधान्यं कर्मणो हि यत् ॥ ७ ॥ येन नानुमतं संघ–लुंटनं स प्रजापतिः ॥ तस्मिन्नेव भवे राज्य–मवापत्परमार्द्धिकं ॥ ८ ॥ शुभभावात्ततो लब्ध्वा । स भवानुत्तरोत्तरान् ॥ भगीरथो जह्नुसूनु–रयमासीन्महोदयी ॥ ९ ॥ तेनैव कर्मणा चक्रि–न्नधुनापि समं मृताः ॥ त्वत्सूनवोऽमी यत्तत्वं । तत्वं मनसि धारय ॥ १० ॥ मनसापि न संघस्या–वज्ञा कार्या विपश्चिता ॥ सा हि बोधिद्रुमस्याग्नि–र्भवित्री कुगतिप्रदा ॥ ११ ॥ ये तीर्थयायिनो लोकान् । वस्त्रान्नांबुविसर्जनैः ॥ पूजयंति भवेत्तेषां । तीर्थयात्राफलं महत् ॥ १२ ॥ श्रीसंघः प्रथमं तीर्थं । सोऽपि तीर्थपथे व्रजन् ॥ पूज्यते हि विशेषेण । श्रेयस्कामयितानिशं ॥ १३ ॥ न कार्यस्तदयं शोको । धर्मशेही मनागपि ॥ अर्जितैः कर्मभिरमी । उत्पन्ना विलयं गताः ॥ १४ ॥ राज्ये पुत्रे कलत्रेऽपि । कोऽद्यापि तव विभ्रमः ॥ स्वहितं कुरु चक्रेश । क्व पुनर्मानवो भवः ॥ १५ ॥ इति भद्रोर्मुखात्तेषां । भवान् ज्ञात्वा महीधवः ॥ अवाप मुक्तशोकोऽथ । वैराग्यं परमं हृदि ॥ १६ ॥ इतः प्राह सुराधीशो । यथा चक्रिंस्त्वया मही ॥ भरतेशवदासा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धि । तथैव भव संघपः ॥ १७ ॥ श्रुत्वेति सादरस्तीर्थ—यात्रायै चक्रनायकः ॥ स्वामिनाहृ-
तवासैश्च । सुप्रतिष्ठो ययौ गृहान् ॥ १८ ॥ सौधर्मपतिना तस्मै । ददे देवालयो वरः ॥ तत्र
रत्नमयं बिंब—मभूच्छ्रीप्रथमप्रभोः ॥ १९ ॥ कृताभिषेकः सद्भासो । वसानः शुभ्रवासनः ॥
चतुर्विधेन संघेन । सहासौ सुदिनेऽचलत् ॥ २० ॥ गणभृद्भिर्मुनिवरैः । श्रावकैः श्राविकाव्र-
जैः ॥ महाधरैर्मंडलीकै—श्चतुरंगचमूचयैः ॥ २१ ॥ गायनैर्मागधैर्नृत्य—विदुरैः कौतुकप्रियैः ॥
चक्रदर्शितमार्गोऽसौ । चलतिस्म रथांगभृत् ॥ २२ ॥ [redacted] ॥

पुरे ग्रामे तीर्थमार्गे । पूजयन् जिनसत्तमान् ॥ नमन् मुनीन् ददद्दानं । स प्राप विम-
लाचलं ॥ २३ ॥ आनंदाख्ये पुरे तीर्था—र्हत्संघार्चनमादरात् ॥ साधर्मिवत्सलत्वं च । च-
क्री चक्रे समं नृपैः ॥ २४ ॥ अग्रेसरसुरागार—महोत्सवपुरस्सरं ॥ समं संघेन तत्तीर्थं । त्रिः-
प्रादक्षिणयन्नृपः ॥ २५ ॥ चतुर्दशनदीभ्योऽपि । लब्ध्वा तीर्थोदकानि सः ॥ आरुरोह गिरिं
संघो । मार्गं सर्वत्र संसृजन् ॥ २६ ॥ आरुरोह महीनेता । गिरिं पूर्वपथा परे ॥ स्वशक्त्या
सर्वमार्गेणा—रुहन् कौतूहलाकुलाः ॥ २७ ॥ आरूढे चक्रिणि गिरिं । प्रीत्यागादपि देवराट् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राजादनीद्रुमतले । तौ मिथोऽमिलतामथ ॥ २८ ॥ इतश्च जह्नुतनयो । निर्देशाच्चक्रिणस्त-
दा ॥ भगीरथः समं सैन्यैः । प्रापदष्टापदं गिरिं ॥ २९ ॥ तत्र स्वपितृपितृव्य-दाहभस्म नि-
रीक्ष्य सः ॥ दुःखाकुलः समं सैन्यै-मूर्छामाप क्षणादपि ॥ ३० ॥ स पुनर्लब्धचैतन्यः । स-
त्ववानमुचच्छुचः ॥ नागं चाराधयामास । भक्त्या पूजापुरस्सरं ॥ ३१ ॥ तस्य भक्त्याति-
शायिन्या । तुष्टः स ज्वलनप्रभः ॥ सममागान्नागलोकै-श्चंचत्कांचनकुंडलः ॥३२॥ भगीरथो
गंधमाल्यैः । स्तुतिभिश्च तमर्चयत् ॥ हृष्टचित्तस्ततः सोऽपि । जगादेति नृपांगजं ॥ ३३ ॥
वार्यमाणा अपि यदा-नैते खातादपासरन् ॥ नागलोकभ्रंशभया-त्तन्मया भस्मसात्कृताः ॥
॥ ३४ ॥ एतैरपीदृशं कर्मा-र्जितमासीद्भगीरथ ॥ तदमीषामूर्ध्वदेह-क्रियां कुरु मदाज्ञया ॥
॥ ३५ ॥ प्लावयंतीं भुवं गंगां । मुख्यवाहमिमां नय ॥ नागेशस्तमिति प्रीत्या-नुशिष्यागा-
न्निजं पदं ॥ ३६ ॥ भगीरथोऽपि तद्भस्म । पैतृकं सरिति न्यधात् ॥ तदाद्ययमभूद्विश्वे । व्या-
पारः पितृकर्मणि ॥ ३७ ॥ कृत्वा तत्पैतृकं कर्म । स्वर्धुनीं दंडरत्नतः ॥ मुख्यमार्गे निचिक्षे-
प । नारीमिव कुमार्गगां ॥ ३८ ॥ ज्ञात्वा स सगरं शत्रुं-जयमात्तं जनास्यतः ॥ चचाल

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चाप च गिरिं । प्रयाणैरधरोत्तरैः ॥ ३९ ॥ राजादनीतले तत्र । तदा सोऽपि भगीरथः ॥ श-
क्रभूशक्रयोः पादान् । नमंस्ताभ्यां च सस्वजे ॥ ४० ॥ सहैवैस्तैरयो तीर्थे । भक्त्या श्रीप्र-
थमप्रभोः ॥ स्नात्रपूजादिकं कर्म । निर्ममे भरतेशवत् ॥ ४१ ॥ तीर्थे च मरुदेवाख्ये । शृंगे
बाहुबलावपि ॥ तालध्वजे च कादंबे । हस्तिसेनाभिधे तथा ॥ ४२ ॥ एवं सर्वेषु शृंगेषु । ते
कृत्वा जिनपूजनं ॥ यतिभक्तिमन्नदान–मारात्रिकमहाध्वजं ॥ ४३ ॥ इंद्रोत्सवमिंद्रपूजां । छ-
त्रचामरमोक्षणं ॥ रथावन्यश्वदानानि । व्यधुः सर्वे गुरोर्गिरा ॥ ४४ ॥ [redacted] ॥ ततश्च भा-
रतान् शक्रः । प्रासादान् वीक्ष्य तद्विधान् ॥ खेदपूर्वमुवाचेदं । सगरं धर्मजागरं ॥ ४५ ॥
तीर्थेऽस्मिन् शाश्वते चक्रिन् । स्वपूर्वपुरुषस्य तत् ॥ कर्त्तव्यं भरतेशस्य । पश्य पुण्यनिबंधनं
॥ ४६ ॥ भाविनः कालमाहात्म्या–द्विवेकविकला जनाः ॥ विधर्माणोऽतिलोभांधा–स्तीर्थेऽपि
न कृतादराः ॥ ४७ ॥ मणिरत्नरुक्मलोभात् । कदाचित्ते मलीमसाः ॥ आशातनां करिष्यं-
ति । प्रासादे प्रतिमासु वा ॥४८॥ तज्जह्नुवस्त्वमप्यस्य । कांचिद्रक्षां कुरुष्व भोः ॥ नाहं त्वयि
प्रभवितुं । कश्चिदस्ति जगत्त्रये ॥ ४९ ॥ श्रुत्वेति चक्री चित्तांत–श्चिंतयामासिवानिति ॥ म-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्सूनुन्निर्यदानीता । गंगा सागरसंगता॥ ५० ॥ यद्यहं तत्पिता नूत्वा । नयामि किल सागरं तदा तेन्यो विशिष्येऽह–मन्यथा मानहीनता ॥ ५१ ॥

इत्यावेशवशाद्ध्यात्वा । शक्रोक्तं हेतुयुक् स्मरन् ॥ यक्षैरानाययामास । सगरः सागरं क्षणात् ॥ ५२ ॥ टंकणान् वर्बरान् केशां–श्चीणान् नोटांश्च सिंहलान् ॥ प्लावयन् विविधान् देशान् । दारयन् महतो गिरीन् ॥ ५३ ॥ प्लावयन् नवनेंशणां । नवनान्यपि नीषणः ॥ नच्छलन्मकरग्राह–तिमिशंखसमाकुलः ॥ ५४ ॥ नश्यन्निर्विविधैर्दैवै–रपि नीत्या निरीक्षितः ॥ वेगवात्तोङुतानेक–जंतुजातिषु डुस्सहः ॥ ५५ ॥ अपाराद्वारतो गर्ज–न्नूर्मिमाली महोर्मिन्निः ॥ व्याप्नुवन् वसुधां वेगा–दागाच्छत्रुंजयांतिकं ॥ ५६ ॥ [redacted] ॥ लवणांबुधिनाथोऽथ । योजितांजलिरादरात् ॥ प्रणम्य चक्रिणं कुर्वे । किं जगादेति साम्रगीः ॥ ५७ ॥ ततश्च मघवा प्राह । स्मृतावधिजिनागमः ॥ चक्रिन् विरम विरमे–त्याकुलां कलयन् गिरं ॥ ५८ ॥ रविं विना यथा घस्रो । विना पुत्रं यथा कुलं ॥ विना जीवं यथा देहं । विना दीपं यथा गृहं ॥ ५९ ॥ विना विद्यां यथा मर्त्यो । विना चक्षुर्यथा मुखं ॥ विना गयां यथा वृक्षो । य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



था धर्मो दयां विना ॥ ६० ॥ विना धर्मं यथा जीवो । विना वारि यथा जगत् ॥ विना त-
था तीर्थमिदं । नूतसृष्टिर्हि निष्फला ॥ ६१ ॥ [redacted] ॥ निरुद्धेऽष्टापदे शैले । सत्य-
सौ जनतारकः ॥ अस्मिन् रुद्धे न पश्यामि । त्रातारमपरं भुवि ॥ ६२ ॥ न यदा तीर्थकृद्दे-
वो । न धर्मो न सदागमः ॥ तदासौ सर्वलोकानां । शैलः कामितदायकः ॥ ६३ ॥ इति श-
क्रगिरा चक्री । जगाद लवणं सुरं ॥ अग्निज्ञानकृते वार्द्धि—रस्तु त्वं याहि सांप्रतं ॥ ६४ ॥ तं
विसृज्येति देवेशं । चक्री प्रीतमनाः पुनः ॥ पप्रच्छ तस्य तीर्थस्य । रक्षोपायं मलीमसात् ॥
॥ ६५ ॥ जगौ शक्रोऽपि चक्रीश । मूर्त्तीः रत्नमणिमयीः ॥ नय स्वर्णगुहां स्वामि—कोशं दे-
वैर्दुरासदां ॥ ६६ ॥ सर्वेषामर्हतां मूर्त्तीः । सौवर्णा ननु कारय ॥ प्रासादान् कांचनान् रूप्य--
मयानपि च सांप्रतं ॥ ६७ ॥ प्रभोः पश्चिमदिग्भाग—संस्थां स्वर्णगुहामथ ॥ सकूपिकाकल्प-
वृक्षां । दर्शयमानां स वज्रिणा ॥ ६८ ॥ गत्वा यत्नादुपानीय । तत्र मूर्त्तीर्जिनेशितुः ॥ निद-
धावपि पूजायै । यक्षानादिशदंजसा ॥ ६९ ॥ प्रासादान् जगदीशस्य । दृषद्रूप्यमयानथ ॥
मूर्त्तीश्च कांचनाश्चक्रे । चक्रिराट् शक्रसंयुतः ॥ ७० ॥ सुनन्दाख्ये च शिखरे । द्वितीयस्य ज-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गर्भिणोः ॥ अजितस्य व्यधाद्रूप्य–प्रासादं भावतोऽथ सः ॥ ७१ ॥ गणभृद्भिर्ज्ञानवद्भिः । श्रा-
वकैश्च सुरैरपि ॥ चक्रे तत्र प्रतिष्ठाया । महः पूजापुरस्सरं ॥ ७२ ॥

एवं शत्रुंजये तीर्थे । कृत्वोद्धारं महीधवः ॥ चचाल रैवतं शृंगं । नंतुं सुरनरैः सह ॥
॥ ७३ ॥ चंद्रप्रभासे श्रीचंद्र–प्रभं नत्वा जिनेश्वरं ॥ विमानै रैवतं शृंग–माससाद नराधिपः
॥ ७४ ॥ विधाय तीर्थे तत्रापि । त्रिःप्रदक्षिणमादरात् ॥ गजेंद्रपदकुंभांबु । लात्वा प्राप जि-
नालयं ॥ ७५ ॥ पूजां नुतिं नतिं तत्रा–प्यकरोत्पूर्ववन्नृपः ॥ ददौ पात्राभयौचित्य–दीनदानं च
भावतः ॥ ७६ ॥ श्रीदे सिद्धगिरौ विद्या–धरे देवगिरावपि ॥ अंबिकाख्येऽप्युमाशंभा–वेवं स-
र्वनगेष्वपि ॥ ७७ ॥ यात्रां च विधिना देव–पूजामपि च चक्रभृत् ॥ चकार गुरुभिः सार्द्धं ।
तदाज्ञावशगो हि सः ॥ ७८ ॥ व्यावृत्याथार्बुदे श्रीस–म्मेते वैभारनामनि ॥ नमन् जिनां-
श्च श्रमणान् । प्रापायोध्यां महीधवः ॥ ७९ ॥ पावयन्नथ विश्वेशः । पादन्यासैर्वसुंधरां ॥
आकृष्ट इव तत्पुण्यै–स्तत्रागादजितो जिनः ॥ ८० ॥ जिनागमनशंसिभ्य–श्चक्री दत्वा धनं
घनं ॥ चिरोत्कंठी महोत्साहै–र्ययौ तं वंदितुं विभुं ॥ ८१ ॥ नत्वा भक्त्योल्लसद्रोमा । स्तु-

For Private And Personal Use Only

त्वा च जिननायकं ॥ चक्री तन्मुखशीतांशु-वचः पातुं पुरोऽविशत् ॥ ८२ ॥ जिनेशस्तस्य
बोधाय । क्रोधाहिविषगारुडं ॥ जगाद वचनं चंच-द्धर्मकर्मपटु स्फुटं ॥ ८३ ॥ राज्यं पुत्र-
कलत्रबंधुनगराण्यावासवित्तादिकं । देवर्द्धिश्च भवार्णवेऽत्र सुलभान्यन्यानि रम्याण्यपि ॥ मु-
क्ताविद्रुमरत्नवत्पुनरिदं चारित्रमुक्तं जिनै-श्चिंतारत्नमिवातिदुर्लभतमं सर्वार्थसंसाधकं ॥८४॥
चारित्रादेकदिवस-पालितादपि मानवः ॥ अवश्यं कर्मसंघातं । क्षिप्त्वा याति परं पदं ॥८५॥
श्रुत्वेत्थं चारुचारित्र-प्रभावं स विरागवान् ॥ नमन् जिनेंद्रं तच्चक्री । प्रार्थयामास भावतः
॥ ८६ ॥ स्वे पदे गुणिनं शूरं । राज्यार्हं च भगीरथं ॥ अस्थापयन्महानेता । स्वयं च व्रत-
मादेदे ॥ ८७ ॥ चक्री राजसहस्रेण । समं शक्रकृतोत्सवः ॥ भगवच्चरणांभोज-तले व्रतम-
वाप सः ॥ ८८ ॥ धन्यस्त्वं सुकृती त्वमेव जननी धन्या च ते सत्कुलं । येनेदं भवता जि-
नैरधिगतं चारित्रमत्युज्ज्वलं ॥ लब्धं संसृतिवारिधौ वहनवत् कुग्राहदुःकर्मभित् । क्षांत्याद्यं
दशधातिदुष्करतरं ग्राह्यं प्रयत्नात्ततः ॥ ८९ ॥ इत्यनुशिष्टिमासाद्य । स विभोः प्रीतिपेशलः
॥ नमन्पादौ जिनेंद्रस्य । विजहार महामुनिः ॥ ९० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इतश्च स्वामिनः सिंह–सेनाद्या गणधारिणः ॥ अभूवन् पंचनवति–र्जिनवत्सत्यवादिनः ॥ ९१ ॥ लक्षं मुनीनां साध्वीनां । त्रीलक्षी त्रिंशताधिका ॥ सहस्रैश्च लक्षयुगं । श्रावकाणां शुभात्मनां ॥ ९२ ॥ अष्टौसहस्रा नवतिश्चा–संलक्षाश्च पंच च ॥ सहस्राः पंचचत्वारिं–शच्च श्राद्धीमितिर्विभोः ॥ ९३ ॥ इत्थं चतुर्विधः संघः । परिवारे जगद्विभोः ॥ शासने च महा-यक्षो । यक्षिणी चाजिताभवत् ॥ ९४ ॥ अष्टादशपूर्वलक्षाः । कुमारत्वेऽभवन् विभोः ॥ राज्ये च त्रिपंचाशत् । स पूर्वाणि तथा व्रते ॥ ९५ ॥ पूर्वमेकं च वर्षाणि । छाद्मस्थ्ये द्वादशाभव-न् ॥ एवं द्विसप्ततिलक्षाः । पूर्वाण्यायुर्विभोः परं ॥ ९६ ॥ [redacted] ॥ अथापविहरन् स्वामी । सम्मेतशिखरं वरं ॥ सहस्रमुनिसंयुक्तो । जग्राहानशनं च सः ॥ ९७ ॥ मासांते चैत्रपंच-म्यां । शुक्लायां रोहिणीदिने ॥ मुनिभिस्तैः समं स्वामी । लब्धवान् पदमव्ययं ॥ ९८ ॥ शक्राद्या अमराः सर्वे । ततश्चलितविष्टराः ॥ अजितस्वामिनश्चक्रु–र्निर्वाणमहिमोत्सवं ॥९९॥ सगरोऽपि मुनिः सत्वान् । बोधयन्नजितेशवत् ॥ केवलज्ञानमापेदे । घातिकर्मक्षयादथ ॥ ॥ १०० ॥ सोऽपि द्विसप्ततिं पूर्व–लक्षाण्यायुः प्रपाल्य च ॥ संमेतशिखरे स्वामि–वदाप्तप-



For Private And Personal Use Only

दमव्ययं ॥ १ ॥ द्वितीयैकजिनेंद्रबोधिवशतः शक्रोपदेशादपि । श्रीमांश्चक्रिशिरोमणिः स स-
गरः शत्रुंजये पर्वते ॥ उद्धारं भरतेशवद् यदकृत श्रीसंघयुक्तो मुदा । क्षिप्त्वा तेन हि घा-
ति-कर्मपटलं प्रापत्पदं शाश्वतं ॥ २ ॥

॥ इति श्रीसगरोद्धारः सप्तमः ॥

अथ तुर्यो जिनः पृथ्वीं । पावयंश्चरणैर्निजैः ॥ प्राप शत्रुंजयं देवैः । स्तूयमानोऽभिनंद-
नः ॥ १ ॥ राजादनीतले तत्र । देवास्त्रिजगदीशितुः ॥ चक्रुः समवसरणं । तस्यैव बहुभक्तितः
॥ २ ॥ तत्र सिंहासनासीन-श्छत्रत्रयविराजितः ॥ सर्वभाषानुयायिन्या । गिरा विभुरथाव-
दत् ॥ ३ ॥ अयं शत्रूंजयः शैल-आंतरारिनिषूदनः ॥ सर्वपापहरो मुक्ति-लीलावेश्म विराजते
॥ ४ ॥ अत्र कल्याणकुंभाभः । सर्वकल्याणकारणं ॥ कल्याणवर्णो भगवा-नादिदेवः सनात-
नः ॥ ५ ॥ प्राप्तेषु मुक्तिमर्हत्सु । भ्रष्टे धर्मेऽपि केवले ॥ सर्वकल्याणकृत्तीर्थ-मिदमेव भवि-
ष्यति ॥ ६ ॥ अत्रागता जिनं भक्त्या । चिंतयंतोऽर्चयंति ये ॥ अप्यल्पकालात्ते पुण्य-मर्ज-
यंत्यजरामरं ॥ ७ ॥ प्रासादप्रतिमापात्र-दीनदानानि कुर्वते ॥ अत्र ये ते भवंत्याशु । भव-

॥४६१॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्भयसुखाकरः ॥ ८ ॥ व्यंतरेंद्रा निशम्येति । तदेवोन्निद्रनक्रयः ॥ चक्रुस्तत्र निजोत्साहात् । प्रासादान्नूतनानिव ॥ ए ॥ इत्रमत्रान्नवब्रत्रुं–जये तीर्थवरे ननु ॥ उद्धारो व्यंतरेंद्राणा–मन- र्घ्यसुकृताकरः ॥ १० ॥

॥ इत्यष्टमोद्धारः ॥

अथाष्टमजिनेंद्रस्य । चारुचंद्रप्रन्नस्य च ॥ चंद्रप्रन्नस्य चरितं । संक्षेपादिह तन्यते ॥ ॥ ११ ॥ जंबूद्वीपेऽत्र न्नरते । पुरी चंद्रानना वरा ॥ अस्ति शस्ततरानेक–जनता जनितस्तु- तिः ॥ १२ ॥ तत्र राजा प्रजारागा–ज्ञागामुकगुणस्पृहः ॥ जितारातिमहासेनो । महासेनान्नि- धोऽन्नवत् ॥ १३ ॥ लक्ष्मणा नाम तत्पत्नी । गतलक्ष्मेंदुशीलन्नृत् ॥ अन्नूदन्नूमी दोषाणां । परिवारेऽनितोषिणी ॥ १४ ॥ सान्यदा सुखशय्यायां । सुप्ताधिव्याधिवर्जिता ॥ चतुर्दशमहा- स्वप्ना–न्निशाशेषे व्यलोकयत् ॥ १५ ॥ कृष्णचैत्रेऽथ पंचम्या–मनुराधां गते विधौ ॥ वैजयं- ताद्विमानात्त–त्कुक्षाववतरद्विभुः ॥ १६ ॥ पूर्णेऽथ काले पौषाख्ये । मासि कृष्णे सुलक्ष्मणा ॥ द्वादश्यामनुराधायां । सुतरत्नमजीजनत् ॥ १७ ॥ कुमारीन्निः सुरेंद्रैश्च । कृतजन्मोत्सवो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जिनः ॥ लाल्यमानोऽप्सरोभिश्च । क्रमाद्यौवनमासदत् ॥१८॥ चंद्रोज्ज्वलश्चंद्रलक्ष्मा । ना-
म्ना चंद्रप्रभो विभुः ॥ सार्धधन्वशतोत्तुंगो । वज्रवानंदकृज्जिनः ॥ १९ ॥ कृतोद्वाहो प्रभू रा-
ज्यं । पैतृकं चाप्यपालयत् ॥ सार्धषट्पूर्वलक्षाणि । सममंगैर्जिनांगकैः ॥ २० ॥ पोषकृष्ण-
त्रयोदश्या—मनुराधास्थिते विधौ ॥ अपराह्ने विभुर्नेजे । सहस्रेण नृपैर्व्रतं ॥ २१ ॥ व्रतादथो
गते मास—त्रये फाल्गुनके सितौ ॥ सप्तम्यामनुराधायां । केवलज्ञानमाप सः ॥ २२ ॥ च-
तुर्विधास्ततो देवा । विज्ञायावधिना क्षणात् ॥ केवलज्ञानकल्याणं । कर्तुं त्वरितमाययुः ॥२३॥

श्रुत्वा समवसरणे । देशनां जगदीशितुः ॥ पुनः प्रापुर्निजं स्थानं । सर्वेऽपि त्रिदशा मु-
दा ॥ २४ ॥ ततश्च विहरन् स्वामी । संयुतोऽतिशयैर्वरैः ॥ प्राप शत्रुंजयं शैलं । सर्वार्हत्प-
रिशीलितं ॥ २५ ॥ कृत्वा प्रदक्षिणां राजा—दनीं चंद्रप्रभः प्रभुः ॥ स मुनिः समवासार्षी—द्धर्षे-
न पुण्यजलं गिरा ॥ २६ ॥ महिमानं महीयांस—मुक्त्वा तीर्थस्य तीर्थपः ॥ तच्च प्रदक्षिणी-
कृत्य । चंद्रोद्यानमवाप सः ॥ २७ ॥ सगराहृतपाथोधि—तीरे ब्राह्मीनदीतटे ॥ चंद्रोद्यानापरे
भागे । जिनेशः समवासरत् ॥ २८ ॥ कृते समवसरणे । देवैरेत्य जनव्रजाः ॥ अनमंस्तु ज-



For Private And Personal Use Only

गन्नार्थं । न्यषीदंस्तत्पुरोऽपि च ॥ २९ ॥ शशिप्रन्नायास्तत्रैव । नगर्याः शशिशेखरः ॥ रा-
जा चंद्रप्रन्ना राज्ञी–युतस्त्वरितमाययौ ॥ ३० ॥ पुत्रेण चंद्रयशसा । सहितः स स्तुवन् वि-
भुं ॥ निषसाद पुरः पातुं । वचनामृतसारिणीं ॥ ३१ ॥ जगौ विभुरथामुष्मिन् । संसारे स-
र्वतोऽस्थिरे ॥ सारं शत्रुंजये ध्यान–मर्हतां द्विविधो वृषः ॥ ३२ ॥ सेवनात्पुंमरीकाद्रे–र्ध्या-
नाज्जिनपतेरपि ॥ द्विविधाद्धर्मतः सिद्धिः । शाश्वता वर्त्तते करे ॥ ३३ ॥ तीर्थेष्विदं मुख्यती-
र्थं । देवेष्विव जिनेश्वरः ॥ ध्यानेषु विमलं ध्यानं । ब्रह्मचर्यं व्रतेष्विव ॥ ३४ ॥ श्रामण्यं स-
र्वधर्मेषु । प्रथमं खलु कथ्यते ॥ यत्तन्मुद्रां विना मुक्ति–नारी नो वरयेद्वरं ॥ ३५ ॥[illegible]॥
विन्नोरिति मुखात् श्रुत्वा । देशनां चंद्रशेखरः ॥ क्षणात्प्रबुद्धः श्रामण्यं । सन्नार्योऽपि समा-
सदत् ॥ ३६ ॥ धरणेंद्रो विन्नोः कायो–त्सर्गस्थानेंबुधेस्तटे ॥ चंद्रकांतमणीबिंब–प्रासादं नि-
रमापयत् ॥ ३७ ॥ न्नगवानपि लोकाना–मनुग्रहपरस्ततः ॥ रैवताद्रिषु शृंगेषु । विजहार स-
मंततः ॥ ३८ ॥ ततोऽपि विहरन् स्वामी । विश्वं तीर्थमयं सृजन् ॥ सम्मेतशिखरं प्राप ।
सहस्रमुनिसंयुतः ॥ ३९ ॥ नन्नस्यकृष्णसप्तम्यां । श्रवणस्थे निशाकरे ॥ चंद्रप्रन्नः प्रभुस्त-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थौ । तत्र निष्कंपमानसः ॥ ४० ॥ सार्धसप्तपूर्वलक्षा–नायुः पूर्णं प्रपाल्य सः ॥ गृहीतान-
शनः स्वामी । प्रापत्पदमखंमितं ॥ ४१ ॥ सर्वैः सुरेंद्रैर्निर्वाण–महिमा त्रिजगद्विभोः ॥ पूर्व-
वन्निर्ममे तत्र । गतं च स्वे पदे मुदा ॥ ४२ ॥

इतश्च विहरंस्तत्र । स मुनिश्चंद्रशेखरः ॥ चंद्रप्रभां पुरीं प्राप । पावितां भगवत्क्रमैः ॥
॥ ४३ ॥ तत्सूनुरथ तं प्राप्तं । श्रुत्वा चंद्रयशा नृपः ॥ वेगादागादखंमाज्ञो । राजपंचशतीयु-
तः ॥ ४४ ॥ मुनिर्ज्ञानी नतांस्तांश्च । धर्मलाभादनु स्फुटं ॥ गिरानुजग्राह धर्मा–नुसारि-
एया दयामयः ॥ ४५ ॥ यदत्रास विभुश्चंद्र–प्रभस्तेनेदमुत्तमं ॥ तीर्थं चंद्रप्रभासाख्यं । वि-
ख्यातं यास्यति क्षितौ ॥ ४६ ॥ विभुर्यत्र जलध्यंत–रस्थात्प्रतिमया स्थिरः ॥ तद्वेलश्चाभव-
द्वार्द्धि–रूर्ध्वमूर्ध्वं गतस्ततः ॥ ४७ ॥ लवणांबुधिनाथेन । लवणेन च भक्तितः ॥ स एवा-
रुंधि तत्कालं । छत्रीभूतेन सर्वतः ॥ ४८ ॥ यत्र चाकारि धरणे–नार्हद्वेश्म सुनिर्मलं ॥ त-
त्तीर्थं पावनं तस्मात् । पवित्रोंबुधिरप्ययं ॥ ४९ ॥ [redacted] ॥ पूर्वमत्र युगादीश–पौ-
त्रेण शशिकीर्त्तिना ॥ चंद्रोद्यानसमीपेऽथ । भाविनो निजभावतः ॥ ५० ॥ चंद्रप्रभस्य प्रा- ॥४६५॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सादः । स्वपुरे निरमीयत ॥ तत्तदाद्यतुलं तीर्थ–मिदं सर्वत्र पावनं ॥ ५१ ॥ [redacted] ॥ यत्र
समवसरणं । योजनांकक्षितौ विभोः ॥ तत्र मृता नरा देवा–द्यास्यंति सुगतिं ध्रुवं ॥ ५२ ॥
कुणपेषु न दुर्गंधो । न कीटा न च पूतयः ॥ भविष्यंति यतस्तत्र । जिनपादपवित्रिते ॥
॥ ५३ ॥ अत्र ये त्यक्तसावद्या । जिनध्यानपरायणाः ॥ तपस्यंति तपस्तेषां । न दूरे मुक्ति-
कामिनी ॥ ५४ ॥ नरके न न तिर्यक्षु । प्रयांत्यत्र मृताः खलु ॥ किंतु नृत्रिदिवश्रेयः–श्रेयां-
सि कलयंति ते ॥ ५५ ॥ सागरो यदयं तीर्थ–रक्षायै सगरेण च ॥ कृष्टोऽष्टमजिनस्नात्रो—
दस्पृष्टस्तेन पावनः ॥ ५६ ॥ यद्ब्राह्मीयं जिनस्नात्र–कृते ब्रह्मविभौजसा ॥ आनिन्ये सर्वथा ते-
न । पवित्रेयं बहूदका ॥ ५७ ॥ घनानामपि तीर्थानां । यत्संगतिरिहाभवत् ॥ तेनेदमुत्तमं
तीर्थं । सर्वकल्मषघातकं ॥ ५८ ॥ चतुःशाखाभिराराद्धो । धर्मोऽत्र शुभभावतः ॥ विस्तारं
शतशाखाभिः । प्राप्स्यत्यभिमतप्रदः ॥ ५९ ॥ धर्मोपदेशमासूत्र्य । स इत्थं मुनिपुंगवः ॥
पुनर्विहर्तुमन्यत्र । ययौ सर्वोपकारकः ॥ ६० ॥ तत्र चंद्रयशाश्चंद्र–प्रभोश्चंद्रमणीमयां ॥ स
प्रासादं महामूर्त्तिं । कारयामास हर्षतः ॥ ६१ ॥ अदूरे सोमयशसा । कारितस्यार्हदोकसः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ स प्रासादोऽजवच्चंद्र—यशसस्तत्समो ननु ॥ ६२ ॥ स चंद्रशेखरस्यापि । पितुर्मूर्त्तिं मणिमयीं ॥ अकरोत्सुतजक्तिर्हि । पितर्येवं विराजते ॥ ६३ ॥ चंद्रं चंद्रप्रजस्यैव । लांछनं तस्य मूर्द्धनि ॥ अकारयत्पितुः स्नात्रं । जिनस्नात्रोदकेन च ॥ ६४ ॥ समानमुजयोर्मूर्त्योः । स चकार यतो महं ॥ लोकश्च नृपजक्त्यास्य । पितर्यातनुतेऽर्चनं ॥ ६५ ॥ ततश्चंद्रयशास्तीर्थ—यात्रायै शुजजावतः ॥ अचालीत्स्वह्नि सगर—वदग्रो संघसंयुतः ॥ ६६ ॥ दिनैः कतिपयैस्तीर्थे । स गुरूद्दिष्टवर्त्मना ॥ चकार सर्वं विधिव—दानपूजनलक्षणं ॥ ६७ ॥ सोऽपि तत्र क्वचिज्जीर्णान् । प्रासादान् वीक्ष्य दुःखितः ॥ उद्दधार कृतस्फार—गुरुवाग्जार आदरात् ॥ ६८ ॥ पुंमरीके रैवते चा—र्बुदे वाहुबलावपि ॥ शिखरेष्वथ सर्वेषू—द्धारं चक्रे स जक्तितः ॥ ६९ ॥ स तीर्थयात्रामुद्धारं । कृत्वा चंद्रयशा नृपः ॥ जग्राह दीक्षां मुक्तिस्त्री—सखीं सद्गुरुसन्निधौ ॥ ॥ ७० ॥ स पूर्वलक्षं समवाप्य दीक्षां । क्षीणाष्टकर्मार्जितकेवलश्रीः ॥ अंते सुखान्याप शिवस्य यत्तत् । तीर्थप्रजावो विमलोऽमरेंद्र ॥ ७१ ॥

॥ इति नवमोद्धारः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शांतिः शांतिकरः संघे । सदा स्यात्सुरसेवितः ॥ मुक्त्वेंदुं मलिनं यस्य । पादपद्मं मृगो-
ऽभजत् ॥ ७२ ॥ बभूव भारते क्षेत्रे । पुरे गजपुरे वरे ॥ जितविश्वविश्वसेनो । विश्वसेनो म-
हीधवः ॥ ७३ ॥ अचिरानाम तत्पत्नी । शीललीलासमुज्ज्वला ॥ सा द्विश्चतुर्दशस्वप्नान् । नि-
शाशेषे व्यलोकयत् ॥ ७४ ॥ सर्वार्थसिद्धितः स्वामी । मासे भाद्रपदे सितौ । सप्तम्यां च भ-
रण्यां भे । तस्याः कुक्षाववातरत् ॥ ७५ ॥ द्विस्वप्नदर्शनादर्ह–चक्रिजन्मसुनिश्चया ॥ रत्नग-
र्भेव सा गर्भे । बभार शुभदोहदा ॥ ७६ ॥ पूर्णे काले सितौ ज्येष्टे । त्रयोदश्यां शुभेंशके
॥ भरणीस्थे विधौ देवी । सुतरत्नमजीजनत् ॥ ७७ ॥ कुमारीशक्रभूशक्र–मुखैः सर्वादरा-
ज्जनैः ॥ चक्रे जन्मोत्सवो नाम । शांतिरप्यस्य हर्षतः ॥ ७८ ॥ स यौवने स्वर्णरुचि–श्चत्वा-
रिंशद्धनुस्तनुः ॥ राज्यस्य भारमुररी–चकार पितृशासनात् ॥ ७९ ॥ चक्ररत्नानुसारेण ।
जितषट्खंडभारतः ॥ चकार राज्यं सुहितः । स्वाराज्यमिव देवराट् ॥ ८० ॥ ज्येष्टकृष्णच-
तुर्दश्यां । भरण्यां विश्वनायकः ॥ सहस्रेण नृपैर्भेजे । व्रतं शक्रकृतोत्सवः ॥ ८१ ॥ छद्मस्थः
सकलान् देशान् । विहृत्य विभुरन्यदा ॥ वनं गजपुरोपांते–ऽशिश्रियद्ध्यानधीरधीः ॥ ८२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पौषशुक्ले नवम्यां स । लोकालोकप्रकाशकं ॥ केवलज्ञानममल–माप कर्मक्षयादथ ॥ ७३ ॥ तैस्तैरतिशयैर्युक्तः । सेवितः सर्वतः सुरैः ॥ स्वामी शत्रुंजयोपांते । सिंहोद्यानमशिश्रियत् ॥ ॥७४॥ इतश्च कश्चिन्मिथ्यात्वी । पुराभूद् ब्राह्मणः पुरे ॥ प्रतिष्ठानाभिधे यज्ञ–कर्मनिष्ठोऽतिदुष्टधीः ॥ ७५ ॥ आजगाम मुनिः कश्चि–दन्यदा यज्ञवाटके ॥ तस्य सद्भक्तिसंसिद्ध–लोकव्रातवृतस्य च ॥ ७६ ॥ तत्र हिंसां मुनिर्दृष्ट्वा । किंचिदूनोहृदंतरा ॥ इत्युच्चैरवदद्धिग् धिक् । शुद्धसिद्धांतदूषकान् ॥ ७७ ॥ पुरा चकार भरतो । वेदान् धर्मपरांस्तु तान् ॥ ग्रासांधाः सांप्रतममी । दूषयंत्यंगिघाततः ॥ ७८ ॥

इति तस्य मुनेर्वाक्यात्स क्रुद्धोऽथ द्विजब्रुवः ॥ श्रवमुत्पाद्य वेगेना–धावत स्मृतदुष्टधीः ॥ ७९ ॥ स क्रोधांधो द्विजो धावन् । यज्ञस्तंभे समुच्छ्रिते ॥ आस्फाल्य प्रात्यजत्प्राणान् । सापराधानिव क्षणात् ॥ ८० ॥ सोऽस्यां मृत्वा द्विजः सिंहो–द्याने पंचाननोऽभवत् ॥ मुनिदर्शनपुण्याच्च । प्रपेदे तीर्थमुत्तमं ॥ ८१ ॥ सोऽपिपंचाननस्तत्र । त्रासयन् सत्वसंचयं ॥ ॥ ध्यानाधिरूढमुन्निद्रं । पश्यतिस्म तदा प्रभुं ॥ ८२ ॥ दर्शनाच्छांतिनाथस्य । तस्य कोपानलो-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ऽज्वलत् ॥ शीतोपचाराज्ज्वरवत् । खलवत्सामवाक्यतः ॥ ए३ ॥ पुछेनाछोटयन् पृथ्वीं । भ-
भैरध्वनिदूषितां ॥ गुंजारुणांबकः पाणि–मुत्पाट्याधावत द्रुतं ॥ ए४ ॥ प्रभोः पंचकरासन्न–
मेत्य भित्ताविवैणहा ॥ आस्फाट्य लोष्टुवत्पापः । सप्तचापानपासरत् ॥ ए५ ॥ फालच्युत-
मिवात्मानं । मन्यमानोऽतिमर्षणः ॥ अथोत्पुत्र्यमानस्तु । प्रतिनाथमधावत ॥ ए६ ॥ पुनः
पुनः स्खल्यमानः । स एवं क्रोधदुर्धरः ॥ अग्रे किंचिददृष्ट्वाथ । मनस्येवं व्यचिंतयत् ॥ ए७ ॥
पुरः किंचिन्न पश्यामि । फालामे न फलत्यपि ॥ असामान्यस्ततः कश्चि–दयं शांतशरीरभृत् ॥
॥ ए८ ॥ चिंतयन्निति पश्यंश्च । स्वामिनं स पुनः पुनः ॥ सस्मार प्राग्भवस्याथ । तत्तादृ-
क्कृतकर्मणः ॥ एए ॥ शांतकोपं परिज्ञाय । स्वामी तमथ चावदत् ॥ तप्ते हि तैले पयसः
। पातो भवति दाहकृत् ॥ ६०० ॥ अयि त्वमात्मनः पूर्वं । भवं स्मरसि वाग्भव ॥ तत्तादृक्क-
र्मणस्तिर्यक् । जातोऽसि मृगघातकः ॥ १ ॥ लब्ध्वापि तीर्थनाथस्य । सामीप्यं कथमद्य भोः ॥ ४७० ॥
॥ हिंसां नरकजननीं । त्वं करोष्यतिरोषणः ॥ २ ॥ हितोपदेशिनि मुना–वपि क्रुद्धोऽसि य-
द्यदा ॥ तदैव तत्फलं विप्र । प्राप्तवानसि मृत्युतः ॥ ३ ॥ मुंचाधुनापि जीवानां । घातमाश्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



य तत्कृपां ॥ जज धर्ममनिर्विंस–स्तीर्थमाराधयेति च ॥ ४ ॥ प्रतिबोध्येति तं स्वामी । ध-
र्मोत्त्याथ पुरोऽचलत् ॥ सोऽपि शांतमनाः सिंहो । ययौ श्रीजिनपृष्टगः ॥ ५ ॥ स्वामी स्व-
गिरिमारूढ–स्तमुवाचेति पृष्टगं ॥ स्थेयमत्रैव ज्ञवता । कुर्वता साम्यमंगिषु ॥ ६ ॥ अत्रैव
ज्ञवतो ज्ञावि । क्षेत्रस्यास्य प्रज्ञावतः ॥ स्वर्गतिश्च ततोऽप्येका–वतारात्पदमव्ययं ॥ ७ ॥

इत्याज्ञाराधनपर–स्ततोऽसौ स्वामिचिंतकः ॥ तत्रातिष्ठद्दयादक्षो । मुनिवच्छांतमानसः
॥ ८ ॥ शुज्ञध्यानान्मृतः सोऽथ । प्रापत्स्वर्गतिमुत्तमां ॥ तीर्थप्रज्ञावो विफलो । जायते न क-
दापि हि ॥ ए ॥ मरुदेवाख्ये ततः शृंगे । स्वामी सुरगणैर्वृतः ॥ अजितस्वामीवन्मासां–श्चतु-
रोऽप्यत्यवाहयत् ॥ १० ॥ तत्र गंधर्वविद्याज्ञृ–दमरोरगमानवाः ॥ प्रत्यहं पूजयामासुः । प्रभुं
प्रीतिज्ञृता नताः ॥ ११ ॥ तत्र प्रावृट्चतुर्मासी–मतिक्रम्येति तीर्थराट् ॥ व्यहार्षीद्विश्वबोधा-
या–न्यत्राथो ज्ञानुमानिव ॥ १२ ॥ एत्य स्वर्गात्सिंहदेवो । जगदीशपवित्रिते ॥ शृंगे तत्र शां-
तिजिन–चैत्यं चक्रे समूर्त्तिकं ॥ १३ ॥ स्वस्वर्गतिहेतौ च । शृंगे तत्राथ सोऽमरः ॥ प्रासा-
दान् कारयामास । जिनस्वप्रतिमान्वितान् ॥ १४ ॥ शृंगमेतात्सिंहसुरे–णान्यैस्तदनुगैरपि ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अधिष्ठितं सर्वकामान् । शांतिन्नक्त्या प्रयच्छति ॥ १५ ॥ प्राङ्मुखस्याथ चैत्यस्य । तस्य पं-
चधनुर्मिते ॥ इशानकोणे यक्षोऽस्ति । चिंतारत्नं स यच्छति ॥ १६ ॥ अध्युष्टकोटयो देवा–स्त-
त्र कल्पद्रुमस्थिताः ॥ शांत्याराधनकर्तृन्न्यो । ददते सर्वमीप्सितं ॥ १७ ॥ पारलौकिकसंसि-
द्धि–स्तीर्थत्वादर्हदाश्रयात् ॥ तत्रैव न्नवति प्राज्य–पुण्यन्नाजां न संशयः ॥ १८ ॥ विहृत्य
सर्वशृंगेषु । न्नगवानथ पावयन् ॥ पादन्यासैर्धरां प्राप । क्रमाद्गजपुरं पुरं ॥ १९ ॥ शांतिसू-
नुश्चक्रधरो । मत्वा तातं जिनेश्वरं ॥ संप्राप्तं त्वरितं नंतु–माययौ सपरिच्छदः ॥ २० ॥ नत्वा
स्तुत्वा निषसेषु । सन्न्येष्वथ जिनेश्वरः ॥ देशनामास्यकमला–न्मकरंदवडुज्जगौ ॥ २१ ॥
शीलं शत्रुंजयः शैलः । शमत्वं जिनसेवनं ॥ संघः संघाधिपत्वं च । शिवप्रतिभुवस्त्वमी ॥
॥ २२ ॥ श्रुत्वा चक्रधरः स्वामि–देशनामिति शस्तधीः ॥ नत्थायोवाच संघाधि–पत्यं यच्छ
मम प्रन्नो ॥ २३ ॥

अथ स्वामी सुरानीतान् । लात्वा वासाक्षतांस्तदा ॥ मालया सममेतस्य । मूर्ध्न्यधा-
द्विहितोत्सवं ॥ २४ ॥ तामाशिषं जगन्नर्त्तु–रादायाथ धराधवः ॥ संघं निमंत्रयामास । वास-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वाहतचैत्ययुक् ॥ २५ ॥ सुलग्ने संघसहितः । कुलस्त्रीकृतमंगलः ॥ चचाल चालयन् विश्वं ।
सैन्यजारैः स संघपः ॥ २६ ॥ प्रयाणैरनवच्छिन्नै–र्नमन् ग्रामे जिनान् मुनीन् ॥ सुराष्ट्राराष्ट्र-
मापेदे । स तीर्थस्यापि सन्निधिं ॥ २७ ॥ देवालयपुरस्तस्य । निषण्णस्यान्यदागमत् ॥ कश्चि-
द्विद्याधरः स्फार–शृंगाराद् द्योतयन् नजः ॥ २८ ॥ तद्दर्शनाच्चक्रधरः । किंचिदच्युत्थितो न-
यात् ॥ वरासने निषण्णेऽथ । सोऽपि तस्मिन्नुपाविशत् ॥ २९ ॥ युतांजलिरथ प्राह । विद्या-
धरपतिर्नृपं ॥ अर्हत्सूनो चक्रधर । त्वमीक्ष्वाकुकुलाचलः ॥ ३० ॥ मणिप्रियस्य पुत्रोऽहं ।
खेटइंगपतेर्ननु ॥ नाम्ना कलाप्रियः कामं । शत्रुन्निर्वेष्टितश्छलात् ॥ ३१ ॥ आदेशाज्ञोत्रदेवी-
नां । त्वत्तो वैरिक्षयं विदन् ॥ त्वां नेतुमागतः शीघ्रं । तत्प्रसीद मयि प्रज्ञो ॥ ३२ ॥ इत्यु-
क्तितश्चक्रधरा–देशं प्राप्य कलाप्रियः ॥ विमानं रचयामास । तदैवामितशक्तिन्निः ॥ ३३ ॥
विद्यान्नृता समं चक्र–धरो विद्याविमानतः ॥ क्षणात् खेटपुरं प्राप । खेदितं रिपुसंचयैः ॥
॥ ३४ ॥ समायाते चक्रधरे । जलकांत इवारयः ॥ अपासरन्नाप इव । तस्य तेजोऽसहिष्ण-
वः ॥ ३५ ॥ विद्राणे शत्रुसंघाते । स्वांते हृष्टः कलाप्रियः ॥ जगाद सादरं चक्र–धरं धरणि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वल्लभं ॥ ३६ ॥ स्वयं त्वय्यनुरक्तां मे । स्वसारं ददतः प्रभोः ॥ कथं प्रत्युपकारोऽयं । तथा-प्येनां समुद्वह ॥ ३७ ॥



इत्युक्त्वा स ददौ तस्मै । गुणमालां गुणावलीं ॥ बभौ तत्संगमात्सेंदु—संगमादिव कौ-मुदी ॥ ३८ ॥ अन्या अपि हि तद्रूप—मोहिताः खेचरांगजाः ॥ उपयेमे चक्रधरो । भाग्यं सर्वत्र तादृशं ॥ ३९ ॥ स्पृहयालुं ततस्तीर्थे । तं मत्वा स कलाप्रियः ॥ अधिरोह्य विमाने द्राक् । तत्रानैषीत्प्रियायुतं ॥ ४० ॥ चलत्यपि विमाने स्राक् । संगीतं स समाहितः ॥ रच-यामास नारीभि—स्तन्मनःप्रीतिहेतवे ॥ ४१ ॥ वातायनस्थो विश्वस्य । स पश्यन् सुखमा-सुखं ॥ दृष्ट्वोद्यानं क्वचिद्रम्यं । जगौ विद्याधरं नृपः ॥ ४२ ॥ पश्यैतत्कुसुमामोद—मेदुरा-लिकुलाकुलं ॥ सहकारसारसूत—प्रहृष्टपरपुष्टभृत् ॥ ४३ ॥ तदस्मिन् विपिने चेतो । रंतुमि-च्छति मेऽनघ ॥ अवतारय रयाद्यानं । सानंदोऽत्र भवानपि ॥ ४४ ॥ कलाप्रियः प्रियं तच्च ।



श्रुत्वा यानं घनाध्वनः ॥ भूमावुत्तारयच्छीघ्र—मिष्टोक्तं सफलं सृजन् ॥ ४५ ॥ तस्मिन् वने ड्डु-मच्छन्ने । सन्नेत्रामृतवर्षिणि ॥ रंतुं चक्रधरः कांता—सममैच्छत्स कौतुकी ॥ ४६ ॥ स पश्यन् द्रु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मचारुत्वं । फलपुष्पाण्यपाहरत् ॥ सुधाकुंभमिवाभ्यर्णे । पुरश्चालोकयत्सरः ॥ ४७ ॥ अतु-
च्छोर्मिसंवर्मि-तांबुजप्रचलद्दलैः ॥ शिलीमुखान् क्षिपद् दृष्ट्वा । सरः स खेचरं जगौ ॥
॥ ४८ ॥ पालीतालीद्रुमालीतलमिलितपथश्रांतविश्रांतपांथ—व्रातप्रख्यातघर्मातपहरणचणः
कंकणश्रीर्धरित्र्याः ॥ हेलोन्मीलन्नवीना मलवहुलल्लुलल्लोलकल्लोलमाला-लीलाखेलन्मराली-
कुलकलविरुतैरुल्लसणः पल्वलोऽयं ॥ ४९ ॥ इषल्लोलोर्मिपातप्रजवरवजवल्लास्यलीलाभिरु-
च्चै-रेकच्छेकश्च केकी कलयति विरुतान्यावहन्नृत्तवृत्तं ॥ मंशारावप्रलुभ्यन्निजयुवतियुतश्चैष च-
क्रोऽपि वक्री-कृत्य ग्रीवां नवांभोरुहविशकवलानत्ति चात्यंतहृष्टः ॥ ५० ॥ उन्निन्नांबुजजात-
गंधगरिमप्रोन्निद्रमुत्षट्पदः । सोऽयं स्वां सुदतीं मधूनि स विधौ संभोजयंत्यंबुजात् ॥ यत्पी-
त्वा जलमेष हंसविहगश्चंचुं निजामुन्मुखां । धत्ते तज्जलदं तमागत इतीवास्माद्धसत्याशयैः ॥
॥ ५१ ॥ तदत्रैव मनो रंतुं । ममेच्छति कलाप्रियः ॥ परितः पालिमेतस्य । पश्यामीह प्रद-
क्षिणं ॥ ५२ ॥

स इत्युक्त्वा समं तेन । भ्रमंश्चक्रधरः सरः ॥ वृक्षशाखातिरोभूत-मपश्यच्चैत्यमग्रतः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





५३ ॥ तच्चैत्यांतर्मणीबिंब—मादिदेवस्य निर्मलं ॥ दृष्ट्वा स हृष्टः पूजायै । ययावंतः सन्नार्यकः ॥ ५४ ॥ जिनं पुष्पाक्षतस्तोत्रैः । पूजयित्वा समाधिभिः ॥ आलोकयामास शोभ्नां । प्रासादस्य गरीयसीं ॥ ५५ ॥ स बाह्ये यावदायाति । तावद्वातायनस्थितां ॥ विचित्ररूपां नारीव । वानरीं द्राग् व्यलोकयत् ॥ ५६ ॥ सुंदरेयमितीवासौ । यावत्स्पृशति पाणिना ॥ नारीभूतां दिव्यरूपां । तावत्तां वीक्ष्य सिस्मिये ॥ ५७ ॥ यावत्किंचिन्नृपो वक्ति । तावत्तत्परिचारकौ ॥ विद्याधरावुभावेत्य । मुदाजगदतुर्नृपं ॥ ५८ ॥ विस्मयं मा कृथा राज—न्नस्या रूपविपर्ययात् ॥ चित्रामस्मत्कथां श्रोतु—मर्हसीह निषीद भोः ॥ ५९ ॥ इति श्रुत्वा निषण्णेऽग्र । तस्मिन्नेको जगाविति ॥ वैताढ्यस्योत्तरश्रेण्यां । वसामो नृपते वयं ॥ ६० ॥ इयं मद्दुहिता मूर्त्या । श्रृंगाररसजीविनी ॥ श्रृंगारसुंदरीनाम । क्रमाद्यौवनमासदत् ॥ ६१ ॥

अन्यदोद्यानमेदिन्यां । मधौ रंतुं सखीयुता ॥ जगामेयममेयश्री—र्वसंतश्रीरिवांगिनी ॥ ६२ ॥ गृह्णंती स्वेच्छयाप्यत्र । प्रसूनफलपल्लवान् ॥ ययौ वनांतरं तत्रा—प्यैच्छल्लातुं फलादिकं ॥ ६३ ॥ तद्वनाधीश्वरी चक्रे—श्वरी नाम्नास्ति देवता ॥ तयेयं चपलत्वेन । शप्तेति भव वानरी



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ६४ ॥ विन्यत्या त्वनया नत्वा । विज्ञप्तानुग्रहाय सा ॥ हृष्टा बभूव प्रायेण । नोत्तमा ह्यतिकोपिनः॥ ६५ ॥ उवाच च शांतिसूनु-र्नाम्ना चक्रधरो नृपः ॥ जवतीं करसंस्पर्शात् । स्वरूपे योजयिष्यति ॥ ६६ ॥ गृहिष्यति स एवापि । तव पाणिं सुलोचने ॥ इत्यनुग्रहमासूत्र्य । पुनर्देवी तिरोदधे ॥ ६७ ॥ असावपि क्षणाद् भूत्वा । वानरी चात्र कानने ॥ स्थिता जाग्यैरमुष्याश्च । त्वमप्यत्रागतोऽधुना ॥ ६८ ॥ मर्त्यत्वदानतः सेयं । त्वया क्रीता महीधव ॥ करावलंबदानेन । कामाब्धेः पुनरुद्धर ॥ ६९ ॥ अभ्यर्थितः स इति तैः । कलाप्रियकृतादरः ॥ तदैवोदवहत्कन्यां । श्रीयुगादीशसाक्षिकं ॥ ७० ॥ कलाप्रियेण । ताभ्यां च । ददिरे विमलाः कलाः ॥ तस्मै प्रत्यक्षरूपाश्च । ददुर्देव्यो वरं वरं ॥ ७१ ॥

स इत्थं परिणीयाथ । भ्रमंस्तत्र वनांतरा ॥ जटिनामाश्रमानैक्ष-त्सरित्तीरे तपस्यतां ॥ ॥ ७२ ॥ विज्ञाय लक्षणैर्भूपं । तं तपस्विन आदरात् ॥ सभावयामासुरर्घ-पाद्यैरभ्युत्थिताः क्षणात् ॥ ७३ ॥ के यूयं किंव्रता अत्र । किं ध्येयं भवतामिति ॥ तानपृछन्महीनेता । बहुमानपुरस्सरं ॥ ७४ ॥ ततस्ते जगदू राजन्। वयं कच्छान्वये ननु ॥ तापसाः कंदमूलानि ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भक्षयामो जटाधराः ॥ ७५ ॥ नमस्यामो युगादीशं । वल्कलानि वसीमहि ॥ भजामहे ब्र-
ह्मचर्यं । शयाना भूमिमंमले ॥ ७६ ॥ निशम्येति चक्रधरः । प्राह तान् वंचिता हहा ॥ यूयं
धर्मेण मिथ्यात्व—मोहितास्तद्विपर्ययात् ॥ ७७ ॥ निस्संगा ब्रह्मचर्यादि—तपोजपपरायणाः ॥
युगादिदेवशरणा—स्तदखाद्ये कथं रताः ॥ ७८ ॥ गूढस्नसाश्छिन्नरुहाः । समभंगाश्च पल्लवाः ॥
मिथ्यादृशामविज्ञाता । अखाद्या हि प्रकीर्त्तिताः ॥ ७९ ॥ तीक्ष्णसूचीमुखाक्रांते । भागेऽनं-
ताः शरीरिणः ॥ उत्पद्यंते हि लीयंते । यत्र तेऽनंतकायिनः ॥ ८० ॥ उदंबरवटप्लक्ष—काको-
दुंबरशाखिनां ॥ अश्वत्थस्यापि फलं ना—श्नीयात्कृमिकुलाकुलं ॥ ८१ ॥ त्याज्या महाविकृत-
य—श्चतस्रोऽनंतदोषदाः ॥ मद्यं मांसं नवनीतं । मधूनि च भवंति ताः ॥ ८२ ॥ हिमं विषं
च करकान् । सर्वमृच्च नवं फलं ॥ रजनीभोजनानंत—कायान् संधानकं तथा ॥ ८३ ॥ वृं-
ताकाज्ञातफलानि । तद्वद्वा पुष्पितौदनं ॥ बहुबीजामगोरस—संपृक्तं द्विदलं त्यजेत् ॥ ८४ ॥
॥[illegible]॥ द्वाविंशतिरभक्ष्याणि । जिनैरुक्तान्यमूनि यत् ॥ अत्यक्त्वा तत्कथं पूज्यो । भव-
द्भिः प्रथमो जिनः ॥८५॥ जातिहीनत्वमज्ञातृ—भावो रोगस्य संभवः ॥ दरिद्रत्वममीषां स्या—

For Private And Personal Use Only

च्छक्षणान्नारको मृतः ॥ ८६ ॥ ज्ञात्वा जिनोक्तमेतानि । यो जहाति सुधीर्नरः ॥ स भुक्त्वा-
नंतसौख्यानि । निःपापो याति निर्वृतिं ॥ ८७ ॥ निशम्येति चक्रधरात् । सर्वे तेऽथ तपस्वि-
नः ॥ संविज्ञाः प्रोचुरस्माकं । भव मार्गनिदर्शकः ॥ ८८ ॥ मिथ्यात्वभावतोऽस्माभि–रि-
यान् कालः स्वजन्म नः ॥ व्यर्थीकृतं महाराज । चिंतामणिरिवांधलैः ॥ ८९ ॥ जगौ भूप-
तिरप्येवं । खेदं मा कुरुतेति यत् ॥ आगच्छत मया सार्द्धं । नंतुं श्रीवृषभप्रभुं ॥ ९० ॥ इत्या-
मंत्र्यातिमानेन । नृपस्तान् व्योमयानयुक् ॥ प्रतिसंघं जगामाय । जनदृग्दत्तकौतुकः ॥ ९१ ॥
सवधूकं तमायांतं । दृष्ट्वा संघजना मुदा ॥ तूर्याणि नादयामासुः । समं धवलगायनैः ॥९२॥
तदागमात्तदा संघे । प्रमोदः कोऽप्यभून्नवः ॥ यः परानंदसदृशी–भावमासादयत्क्षणात् ॥
॥ ९३ ॥ ततस्तपस्विनस्तेऽपि । नृपदर्शितवर्त्मगाः॥ क्रमात्तत्रागमन् राज–सन्मानादतिहर्षि-
णः ॥ ९४ ॥ तीर्थपूजां संघपूजां । क्रमात्कृत्वा महीधवः ॥ आरुरोह पुंडरीक–गिरिं शक्रकृ-
तोत्सवः ॥ ९५ ॥ विधिवत्तत्र पूजां चा–रात्रिकं दानमादरात् ॥ इंद्रोत्सवमुखं कृत्यं । चका-
र सकलं नृपः ॥ ९६ ॥

॥४७९॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इतः सिंहसुरः सोऽग्र। प्रत्यक्षीभूय तत्पुरः ॥ उवाचाहं तव पितुः। प्रसादादीदृगर्द्धिकः ॥ ९७ ॥ तिर्यग्भवमतिक्रम्य। यदनंतभवप्रदं ॥ अभूवं त्रिदशः सोऽहं। तत्फलं जिनतीर्थयोः ॥ ९८ ॥ शृंगे श्रीमरुदेवाख्ये। त्वत्पितुर्जगदीशितुः ॥ प्रासादोऽस्ति ततस्तत्र। गत्वा पूजय तं मुदा ॥ ९९ ॥ नृपस्तद्वाक्यतः शांति–मानर्च्य बहुभक्तितः ॥ पूर्ववत्सकलं कृत्यं। तत्रापि निरमापयत् ॥ ७०० ॥ तपस्विनोऽपि ते तत्र। दृष्ट्वा श्रीवृषभं प्रभुं ॥ कृतकृत्यं मन्यमाना। जन्म स्वं मुदमादधुः ॥ १ ॥ उत्तरेण स्वर्गगिरि–मधो योजनभूमितः ॥ तस्थुस्तपस्विनस्तेऽपि। निर्देशात् केवलिप्रभोः ॥ २ ॥ घातिकर्मक्षये तत्र। तेषां ज्ञानमजायत ॥ प्रत्याख्यानपराणां च। मुक्तिरप्यभवत्क्रमात् ॥ ३ ॥ यत्र ते तापसाः सिद्धाः। शक्रनिर्मितसत्क्रियाः ॥ नाम्ना तदादि समभूत्। स तापसगिरिर्वरः ॥ ४ ॥ ततश्चक्रधरस्तीर्थं। पश्यन्मुक्तिगृहोपमं ॥ सानंदः पुरुहूतेना–वादि नादयता गिरिं ॥ ५ ॥ त्वत्पूर्वेषामिदं तीर्थं। कालयोगाद्विसंस्थुलं ॥ उद्धर्तुमर्हसि प्राज्य–गुणोत्तरजिनांगज ॥ ६ ॥ जीर्णांस्तानेव भूभर्त्ता। प्रासादानकरोद् दृढान् ॥ आत्मनश्च पुनस्तस्मा–ज्जर्जरं भवपंजरं ॥ ७ ॥ त्वं जीर्णो-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्धारकृत्तीर्थे । जातोऽस्मिन्निति तं मुदा ॥ स्तुवन्नवर्द्धयद्भूप्यैः । पुष्पवर्षैः समं हरिः ॥ ८ ॥ पुं-
डरीकाचलशृंगि–ष्वशेषेषु स पूर्ववत् ॥ प्रासादान् रचयामास । कांश्चित्सज्ञान्नवान् परान् ॥
॥ ९ ॥ ततश्चंद्रप्रभासाख्ये । क्षेत्रे सागरसन्निधौ ॥ चंद्रप्रभस्य देवस्य । चक्रे चाष्टाह्निकोत्स-
वं ॥ १० ॥ ततोऽपि रैवतं शैल–मुन्मीलत्संपदालयं ॥ आरुरोह विशामीशः । समं संघज-
नैर्घनैः ॥ ११ ॥ कृतपंचशरोन्माथं । नेमिनाथं जिनेश्वरं ॥ भाविनं नुतिभिः संघ–लोका आ-
नर्चयन्मुदा ॥ १२ ॥ तत्रापि सर्वशृंगेषु । जीर्णोद्धारमचीकरत् ॥ शिल्पिभिर्नूतनान् कांश्चि-
त् । प्रासादांश्च धराधवः ॥ १३ ॥ कृत्वेत्थं तीर्थनाथं तं । प्रदक्षिणमिलापतिः ॥ नंदिवर्द्धनशै-
लाग्र–मारोहत्संघसंयुतः ॥ १४ ॥ तत्राप्यर्चामन्नदानं । संघपूजादिकं नृपः ॥ जीर्णोद्धारं च
विधिव–न्निरमापयदंजसा ॥ १५ ॥ सम्मेतादिषु शृंगेषु । यात्रामासूत्र्य भक्तितः ॥ हस्तिना-
गपुरं प्राप । सद्युत्सवमिलापतिः ॥ १६ ॥ राज्यव्यापारमखिलं । पुनश्चक्रधरो नृपः ॥ स्कंधे
बभार भरत–त्रिखंडाखंडलो बली ॥ १७ ॥

इतश्च भगवान्नम्र–शचीकान्तार्चितक्रमः ॥ श्रीशांतिनाथः सम्मेत–शिखरं मुनियुग् य-





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यौ ॥ १८ ॥ लक्षाब्धिं परिपूर्यायुः । समग्रं षोडशो जिनः ॥ जग्राहानशनं सार्द्धं । मुनिभि-
र्नवभिः शतैः ॥ १९ ॥ राधकृष्णत्रयोदश्या–मपराह्ने जगद्विभुः ॥ तैः समं मुनिभिर्मुक्ति–म-
वाप क्रमयोगतः ॥ २० ॥ तत्र निर्वाणमहिमा । पूर्ववत्सकलैः सुरैः ॥ विदधे जिनचैत्यं च ।
तथोत्तुंगं मणीमयं ॥ २१ ॥ निर्वाणं शांतिनाथस्य । श्रुत्वा चक्रधरो नृपः ॥ वैराग्याच्चारु-
चारित्र–मग्रहीत्कुरुसन्निधौ ॥ २२ ॥ दशवर्षसहस्राणि । खड्गधारासमं व्रतं ॥ प्रपाल्य केवलं
प्राप । मुनिश्चक्रधरस्ततः ॥ २३ ॥ ज्ञानादित्यकरैः स विश्वमखिलं पश्यन् करस्थांगिवत् ।
भव्यांभोरुहकाननं च विकचं कुर्वन् समंतादपि ॥ बाह्याभ्यंतरगं तमोऽपि सकलं निर्नाशय-
न् ध्यानतः । श्रीमांश्चक्रधरः शिवालयमगात् सम्मेतशैलस्थितः ॥ २४ ॥

॥ [redacted] ॥

इत्याचार्यश्रीधनेश्वरसूरिविरचिते महातीर्थश्रीशत्रुंजयमाहात्म्ये
अजितस्वामिश्रीसगरश्रीशांतिजिनचक्रधरादिमहा-
पुरुषतीर्थोद्धारवर्णनो नामाष्टमः सर्गः समाप्तः ॥ [redacted] ॥



For Private And Personal Use Only

## ॥ नवमः सर्गः प्रारभ्यते ॥

---

जयति जगतामधीश्वरः श्री-प्रथमजिनोऽभूतवैभवावदातः ॥ निखिलजनभवद्वयार्थहेतु-
प्रकटितमार्गयुगो युगादिदेवः ॥१॥ अस्यैवेक्ष्वाकुवंशस्य । पुंरतस्य गिरेरपि ॥ शृणु शक्र चरित्रं
तत् । कर्णामृतरसायनं ॥ २ ॥ वञ्हिमश्रीसुव्रतजिनें-ऽस्य तीर्थे सुजन्मनः ॥ नारायणस्य
रामस्य । चरितं रावणस्य च ॥ ३ ॥ इतश्चादित्ययशसो । वंशे भूपेषु भूरिषु ॥ गतेष्वासीद-
योध्यायां । विजयो नाम पार्थिवः ॥ ४ ॥ अस्य श्लोकस्य व्याख्या—

(विजय १ वज्रबाहु २ पुरंदर ३ कीर्त्तिधर ४ सुकोशल ५ हिरण्यगर्भ ६ नघुष ७ सोदा-
स ८ सिंहरथ ९ ब्रह्मरथ १० चतुर्मुख ११ हेमरथ १२ शतरथ १३ उदयपृथु १४ वारिरथ १५
इंदुरथ १६ आदित्यरथ १७ मांधाता १८ वीरसेन १९ ( प्रतिमन्यु १९ ) पद्मबंधु २० रविम-
न्यु २१ वसंततिलक २२ कुबेरदत्त २३ कुंथु २४ शरभ २५ द्विरद २६ सिंहदशन २७ हिर-
ण्यकशिपु २८ पुंजस्थल २९ ककुस्थ ३० दिलीप ३१ रघु ३२ अज ३३ अजपाल ३४ अन-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रन्य ३५ अनंतरथ ३६ दशरथ ३७ श्रीराम ३८ लवणांकुश ३९—इत्यादिरामपूर्वजाः )

हिमचूलाकुक्षिजातौ । वज्रबाहुपुरंदरौ ॥ अभूतां तत्सुतावाद्यः । शालहास्याद्व्रतं दधौ ॥ ॥ ५ ॥ विजयोऽपि निजे राज्ये—ऽधिरोप्य च पुरंदरं ॥ स्वयं तु व्रतसाम्राज्या—दवाप परमं पदं ॥ ६ ॥ पुरंदरात्कीर्त्तिधर—स्ततश्चासीत्सुकोशलः ॥ स तु गर्भवतीं पत्नीं । मुक्त्वा राज्ये- ऽगृहीद्व्रतं ॥ ७ ॥ सहदेवीति तन्माता । मृत्वार्या व्याघ्र्यभूद्वने ॥ संयमस्थौ पतिसुतौ । पूर्वक्रोधाददारयत् ॥ ८ ॥ ततो हिरण्यगर्भोऽभू—न्नघुषो नाम तत्सुतः ॥ चलितेऽन्यत्र नघुषे । तद्राज्ञी चाजयद्रिपून् ॥ ९ ॥ पत्युस्तस्यामसतीत्वं । चिंत्यमानस्य सान्यदा ॥ सतीत्वश्रावणात्तीव्रं । ज्वरं देहादनाशयत् ॥ १० ॥ सोदासस्तु तयोः पुत्रो । रक्षोवन्मर्त्यमांसभुक् ॥ निर्वास्य मंत्रिभी राज्ये । तज्जः सिंहरथः कृतः ॥ ११ ॥ सोदासोऽपि मुनेर्धर्मं । श्रुत्वा जीवदयापरः ॥ महापुरेऽभवद्राजा । मृतेऽपुत्रे च तद्विभौ ॥ १२ ॥ सोदासोऽथ सिंहरथं । जित्वा राज्यद्वयेऽपि तं ॥ स्थापयित्वा स्वयं चारु । चारित्रं गुरुतोऽग्रहीत् ॥ १३ ॥ सूनुः सिंहरथस्याभू—द्राजा ब्रह्मरथस्ततः ॥ चतुर्मुखस्ततो हेम—रथः शतरथस्ततः ॥ १४ ॥ अथोद-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यपृथुर्वारि–रथोऽथैंदुरथस्ततः ॥ आदित्यरथमांधातृ–वीरसेनास्ततः क्रमात् ॥ १५ ॥ प्रतिम-
न्युर्नृपस्तस्मात् । पद्मबंधुर्नृपस्ततः ॥ रविमन्युस्ततो राजा । वसंततिलकस्ततः ॥ १६ ॥ कु-
बेरदत्तोऽथ कुंथु–शरन्नद्विरदाः क्रमात् ॥ ततश्च सिंहदशनो । हिरण्यकशिपुस्ततः ॥ १७ ॥
पुंजस्थलः ककुस्थोऽथ । रघुरेवं नृपेषु तु ॥ केषुचिन्मोक्षमाप्तेषु । स्वर्गमाप्तेषु केषुचित् ॥
॥ १८ ॥ ततोऽनरण्यो नृपतिः । साकेते पत्तनेऽभवत् ॥ विख्यातो यो जनेऽजोऽपि । तेजो-
गोपितशात्रवः ॥ १९ ॥ स दिशः सकला जिष्णु–र्जयन् प्राग्भवकर्मणा ॥ सप्तोत्तरशतेना-
थ । व्याधिभिः परिपीड्यते ॥ २० ॥ स रोगार्त्तिपरिक्लिष्टो–ऽप्यंतः पौरुषयुग् नृपः ॥ साध-
यामास दुःसाध्यान् । धरानाथान् परःशतान् ॥ २१ ॥ आक्रामन्निति भूपालान् । बलात्सौ-
राष्ट्रमंडलं ॥ क्रमात्प्रापदखंडाङ्ग–स्त्रिखंडावनिमंडनं ॥ २२ ॥ नत्वा शत्रुंजये तीर्थे । जिन-
मत्यर्थवासनः ॥ अलंचकार संसार–शृंगारो द्वीपपत्तनं ॥ २३ ॥ इतश्च रत्नसाराख्यः । सां-
यात्रिकशिरोमणिः ॥ वस्तुभिः पोतमापूर्या–विशद्वार्द्धिपरात्तटात् ॥ २४ ॥ शुभानिलवशात्
स्वैरं । चरंती नौः पयोनिधिं ॥ अतिक्रम्य घनं पार–सीमानमनयज्जनान् ॥ २५ ॥ दृश्यमा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नेषु शैलेषु । जीविताशास्थिते जने ॥ वायुरग्निकुकुपूवक्ता—न्नाविकायुर्हरो ववौ ॥ २६ ॥ त-
दैवांबुदवृंदेन । चरता सर्वदिङ्मुखं ॥ योगिकंथेव विदधे । पुटालियुतमंबरं ॥ २७ ॥ नल्ल-
लासांबुधिः काम—मूर्मिन्निः स्वकरैरिव ॥ आशिश्लिषुरिव प्राप्त—मंबुदं स्ववनीपकं ॥ २८ ॥
वात्यावर्त्तन्नमत्पोत—हतजीवितकल्पनः ॥ दध्यौ पोतपतिः कष्ट—मुदतिष्ठदिदं मम ॥ २९ ॥
मयैते वित्तलोन्निन । चित्तलोलत्वधारिणः ॥ प्रतार्य पाथसां मध्ये । निर्बुद्धित्वान्निवेशिताः ॥
॥ ३० ॥ योऽयं जीवनदो मेघः । स मेऽधन्नरन्नारितः ॥ आसीज्जीवनहृद्दासी—न्नूतः पवनन्नू-
पतेः ॥ ३१ ॥ ललत्कंडुकवत्पोतः । प्रहतः परितोऽधुना ॥ कल्लोलयष्टिन्निः कामं । चलाचल
इहान्नवत् ॥ ३२ ॥ यावन्न शीर्यते पोतो । न यावज्जनसंक्षयः ॥ तावत्स्वयं निमज्ज्याब्धौ ।
क्षिपामि निजजीवितं ॥ ३३ ॥ चिंतयित्वेति स यदा । पोतप्रांतमुपाविशत् ॥ तावद्व्योमन्य-
लक्ष्यान्नू—न्नारती श्रवणप्रिया ॥ ३४ ॥ साहसं मास्म कुर्वीथाः । समुत्पतनात् श्रुणु ॥ लं-
न्नितोऽसि मयैवैना—मीदृशीं त्वं दशामिह ॥ ३५ ॥ अत्र पाथोनिधेरंतः । कल्पद्रुफलकावृता
॥ न्नाविनो जिननाथस्य । पार्श्वस्यार्चास्ति निर्मला ॥ ३६ ॥ धरणेनार्चिता पूर्वं । प्रतिमा सा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रभावयुक् ॥ वर्षलक्षं कुबेरेण । ततो वर्षशतानि षट् ॥ ३७ ॥ वरुणेन तमभ्यर्च्य । जगृहे
सा ततोऽद्भुता ॥ पूजिता वर्षलक्षाणि । सप्त सद्भक्तिशालिना ॥ ३८ ॥ अधुनाजय भूपाल–
भाग्येनेयमिहागता ॥ उद्धृत्यैनां ततस्तस्मै । प्रयच्छेक्ष्वाकुजन्मने ॥ ३९ ॥ स जित्वा सांप्रतं
सर्वां । दिशः प्राप्तोऽस्ति पत्तनं ॥ द्वीपाख्यमेनां तत्तस्मै । देया विस्मेरसंपदे ॥ ४० ॥ तस्या-
लोकयतश्चैनां । यास्यंति विलयं रुजः ॥ समं दुःकर्मणा शीघ्रं । तथान्येषामपि स्फुटं ॥४१॥
प्रतिमायास्तथैतस्याः । पार्श्वगाहं प्रभाविनी ॥ नाम्ना पद्मावती देवी । सर्वमेतद्व्यधां ननु ॥
॥४२॥ इत्याकाशगिरं श्रुत्वा । रत्नसारो धियां निधिः ॥ सद्यश्चिक्षेप वार्द्ध्यंत–र्नाविकान् प्रति-
माकृते ॥ ४३ ॥ सहसा संपुटं धृत्वा । ते पोतांतरुपागमन् ॥ जीववद्धर्ममासाद्य । त्रिदिवां-
तः समाधिना ॥ ४४ ॥ तदैव मेघपटलं । दृष्टनष्टमिवाभवत् ॥ हरिद्रारागवद्दुष्ट–मैत्रीवत्
पद्माबिंदुवत् ॥ ४५ ॥ तदैव पवनः प्राणि–प्रीणनादपुषत्परां ॥ प्रसत्तिं चित्तवच्चिंता–पटलप्र-
क्षयात्क्षणात् ॥ ४६ ॥ गंभीरोऽपि पयोराशिः । प्रसादमगमत्तदा ॥ जिनागमोंतर्निविष्टो । ब-
हिर्मृदुरिव स्फुटं ॥ ४७ ॥ ततो वायुवशात्पोतो । द्वीपाख्यं पुरमाप्तवान् ॥ गत्वा वेगान्नर-



For Private And Personal Use Only

श्चैको-ऽजयपालमवर्द्धयत् ॥ ४८ ॥ सोऽपि श्रीपार्श्वमायातं । श्रुत्वोत्फुल्लविलोचनः ॥ अधि-
रुह्य तुरंगं झाक् । सम्मुखं समुपाययौ ॥ ४९ ॥ ततः कृतोत्सवं वेश्म-मध्यात्तं संपुटं ज-
नाः ॥ आजह्रुर्नृपहृत्कपद्म-विकाशनविभाकरं ॥ ५० ॥ वाद्यमानेषु वाद्येषु । हर्षान्नृत्यत्सु के-
षुचित् ॥ पठत्सु भट्टलोकेषु । दीयमाने महाधने ॥ ५१ ॥ उत्सृतध्वजमुद्गंधि-कर्पूरागुरुधूप-
नैः ॥ तं संपुटं महीभर्ता । पुरं प्रावेशयन्निजं ॥ ५२ ॥ [redacted] ॥ तत्र सिंहासने रम्ये । वि-
न्यस्य नृपतिः स्वयं ॥ तं संपुटं समभ्यर्च्य । भक्त्या झगुदघाटयत् ॥ ५३ ॥ फणीशफण-
रत्नांशु-निरस्ततमसां भरं ॥ छत्रत्रयेण संशोभि-शीर्षं पद्मासनस्थितं ॥५४॥ पार्श्वयोश्चाम-
रग्राहि-प्रतिमामानदोर्द्वयं ॥ धरणेंद्रधृतोत्तान-सिंहासननिषेदुषं ॥ ५५ ॥ नखांशुनिचयप्रा-
स-प्रभाप्रौढनवग्रहं ॥ कृत्रिमाकृत्रिमारिष्ट-निपिष्टनपटीयसं ॥ ५६ ॥ श्रीवत्सलांछितोरस्कं ।
प्रभावप्रथिमावृतं ॥ सर्वाभरणसंभार-शृंगारितसुविग्रहं ॥ ५७ ॥ कल्पद्रुकुसुमामोद-वासि-
ताशेषविष्टपं ॥ ददर्श देवं श्रीपार्श्वं । मध्ये मध्यमलोकपः ॥ ५८ ॥ [redacted] ॥ पंचांगस्पृष्ट-
भूपीठ-प्रमोदभरभावितः॥ ननाम देवं नृपतिः । प्राप्यं सुकृतसंचयैः ॥ ५९ ॥ तदानंदसुधा-



Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पूरा—पसारितगदोरगः ॥ तदंगाद्दूरगस्तस्य। चित्ते तोषमवर्द्धयत् ॥ ६० ॥ जक्तयार्चयित्वा ता-मर्चां । नृपः सोत्सवमोकसि ॥ रत्नसारेण सहितो । बुभुजे प्रीतिपेशलः ॥ ६१ ॥

अथ तस्यां निशि स्वैरं । निद्राणेऽजयजूपतौ ॥ स्वप्नमागत्य ते सर्वे । व्याधयस्तंमुदाव-दन् ॥ ६२ ॥ त्वया राजन् मुनिर्दूनः । प्राग्जवे तत्फलादिह ॥ त्वमस्माज्जिर्घनापायैः । पी-मितोऽसि सहस्व तत् ॥ ६३ ॥ तवांगतो गता दूरं । वयं पार्श्वावलोकनात् ॥ तत्कर्माद्यापि षएमास—जोग्यं तिष्ठति किंचन ॥ ६४ ॥ इतः शाखापुरे सूर—इत्यस्ति पशुपालकः ॥ वक्तः-पुच्छास्यदेशेषु । पांडुस्तस्यास्ति या अगी ॥ ६५ ॥ वयं तस्याः शरीरे स्मो । निबद्धाः पूर्वक-र्मणा ॥ तावत्कालं ततस्त्वं तां । चारयस्व तृणादिजिः ॥ ६६ ॥ चंदनाद्यं स्वदेहस्यो—द्वर्त्तनं जलमिश्रितं ॥ देयं तस्यै वयं प्रीता । जविष्यामस्ततो नृप ॥ ६७ ॥ ततः षएमासपर्यंते । त्वं सुवर्णसमद्युतिः ॥ बहुकालं निजं राज्यं । पाता पार्श्वप्रजावतः ॥ ६८ ॥ इत्युक्त्वा जूप-तिं तेऽथ । क्वचिज्जग्मुरलक्ष्यतां ॥ सोऽपि प्रबुद्धः स्वं देह—मपश्यद्व्याधिवर्जितं ॥ ६९ ॥ च कार नगरस्यांतः । प्रशांतोपद्रवो नृपः ॥ महोत्सवं महादाना—नंदिताशेषमानवं ॥ ७० ॥ त-





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देव निजनाम्ना सा–ऽजयं ग्राममुत्तमं ॥ निवेश्य पार्श्वनाथस्य । प्रासादं निरमापयत् ॥ ७१ ॥
शासने पार्श्वनाथस्य । दशग्रामसमन्वितं ॥ तमदान्नृपतिर्ग्राम–मर्चकांश्च न्ययोजयत् ॥७२॥
स्वयमानर्च यत्तत्र । त्रिसंध्यं जिननायकं ॥ तत्प्रभावाच्च तद्गेहे । श्रियो वृद्धिं समासदन् ॥
॥ ७३ ॥ तामजां तत्र चानीय । व्याध्युक्तविधिना विभुः ॥ तावत्कालं स कालज्ञो–ऽपालय-
द्धान्यपोषणैः ॥ ७४ ॥

इतः सौराष्ट्रनृपाल–कुलजो गिरिदुर्गतः ॥ पुरादेत्य वज्रपाणि–र्गोत्रिणेऽस्मै मुदामिलत्
॥ ७५ ॥ अजयोऽप्यतुलप्रीत्या । बहुदेशादिदानतः ॥ अमानयदमुं तीर्थ–द्वयशास्तारमुच्चकैः
॥ ७६ ॥ अथाग्रहाद्वज्रपाणेः । प्रद्युम्नश्चातिभक्तिभिः ॥ गिरिनारगिरौ नेमि–मनमद्रघुनंदनः ॥
॥ ७७ ॥ ततोऽर्चितः पुनस्तेना–जयोऽजयपुरे निजे ॥ अनमत्पार्श्वपादाब्ज–मत्यब्जं पंकशो-
षणात् ॥ ७८ ॥ इतः कश्चिन्मुनिर्ज्ञानी । तत्रागाद्वंदितुं जिनं ॥ नत्वा तं नृपतिस्तस्या–पृ-
च्छन्माहात्म्यमुज्ज्वलं ॥ ७९ ॥ मुनिरप्याह नृमीश । प्रभावः कोऽत्र कथ्यते ॥ प्रत्यक्षलक्ष्ये
संदेग्धि । को वस्तुनि विदग्धधीः ॥ ८० ॥ चिरप्ररूढा अपि ते । व्याधयो नेशुरंगतः ॥ अ-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्या दर्शनमात्रेण । प्रतिमाया जगद्विज्ञोः ॥ ७१ ॥ तद्वत्सर्वाणि कुष्टानि । नेत्रास्यजठरोद्भ-
वाः ॥ परेऽपि रोगा यास्यंति । सर्वेषां पश्यतां जिनं ॥ ७२ ॥ शाकिनीभूतवेताल–रक्षो य-
क्षोद्भवा अपि ॥ उपसर्गाः प्रयास्यंति । श्रीपार्श्वस्मरणादपि ॥ ७३ ॥ कालज्वरविषोन्माद–
सन्निपातमुखा अपि ॥ यास्यंति दोषा विलयं । तीर्थेऽत्र जिनसेविनां ॥ ७४ ॥ विद्यालक्ष्मी-
सुतसुख–कलत्राद्यभिलाषिणां ॥ सर्वेऽपि कामाः सेत्स्यंति । ध्यानादत्र जगद्गुरोः ॥ ७५ ॥
यच्च वर्षशतातीतं । तद्बिंबं तीर्थमेव हि ॥ इदं तु वर्षलक्षाणि । स्वर्गाब्धौ पूजितं सुरैः ॥
॥ ७६ ॥ तदस्य दर्शनादेव । पापशांतिर्भविष्यति ॥ अत्र दानानि दत्तानि । फलं दास्यंति
चाधिकं ॥ ७७ ॥

इत्युदीर्य मुनिस्तस्य । तीर्थस्य महिमां भृशं ॥ ततो भूपतिना वेगा–द्ययौ व्योमन्यल-
क्ष्यतां ॥ ७८ ॥ षण्मासावधि तत्रैव । स्थित्वाऽजयमहीपतिः ॥ वज्रपाणिनतः सिद्धि–गिरौ
जिनमथार्चयत् ॥ ७९ ॥ स्नात्रपूजादिकं कृत्यं । शक्रोत्सवमहाध्वजौ ॥ व्यधात्तत्र महीजा-
निः । स्वजन्म सफलं सृजन् ॥ ८० ॥ पुनः स्वराज्यमासाद्यो –द्धृत्य धर्मं जिनोदितं ॥ प्रां-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ते व्रतधरः स्वर्ग–मवापाजयन्नूपतिः ॥ ए१ ॥ तस्य ज्येष्ठसुतोऽनंत–रथोऽनूद्भरतन्नाक् परः ॥ पृथ्वीकुक्षिन्नवो राजा । ततो दशरथोऽन्नवत् ॥ ए२ ॥ चतस्रो वल्लन्नास्तस्य । कौशल्या केकयात्मजा ॥ सुमित्रा सुप्रन्ना चेति । मूर्त्तिमंत्य इव श्रियः ॥ ए३ ॥ अन्येद्युर्गजसिंहेंडु–सूर्यस्वप्नोपसूचितं ॥ असूत सूनुं कौशल्या । रामं पद्मं च नामतः ॥ ए४ ॥ स्वप्नैस्तथेन्नसिंहेंडु–वार्धिश्रीवह्निन्नास्करैः॥ सुमित्रा लक्ष्मणं चाथा–सूत नारायणं च तं ॥ एए ॥ सुस्वप्नोपस्थितं शांतं । न्नरतं केकयात्मजा ॥ सुषुवे सुप्रन्नाप्युच्चैः । शत्रुघ्नं नाम नंदनं ॥ ए६ ॥ विद्याविनयसंपन्नै–श्चतुर्निश्चतुराशयैः ॥ दानाद्यैर्धर्म इव । तै रेजे तनयैर्नृपः ॥ ए७ ॥ यथा मिथः स्नेहपरौ । पद्मनारायणौ तथा ॥ अन्नूतामवियुक्तौ हि । शत्रुघ्नन्नरतौ मिथः ॥ ए८ ॥

इतश्च वासवकेतु–विपुलाकुक्षिजो नृपः ॥ हरिवंश्यो मिथिलायां । पुर्यासीज्जनकान्निधः ॥ एए ॥ तस्य जाया विदेहेति । सुस्वप्नमुदिता ततः ॥ असूत पुत्रीं पुत्रं च । युगपद् द्योतितांबरौ ॥ १०० ॥ सौधर्मतः पिंगलाख्यो । देवः प्राग्जन्मवैरतः ॥ तत्रैत्य तं युग्मजात–मदरत्तनयं रयात् ॥१॥ पुनः संजातकारुण्यो । न्नूषणैः कुंमलादिन्निः ॥ तं न्नूषयित्वा वैताढ्ये ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वनेऽमंदं मुमोच सः ॥ २ ॥ रथनूपुरपूःस्वामी । ततश्चंद्रगतिः खगः ॥ तमासाद्य पुष्पवत्याः
स्वपत्न्याश्चार्पयन्मुदा ॥ ३ ॥ अथैव तनयो जातो । घोषणामित्यसावपि ॥ भामंडलत्वान्ना-
मास्य । भामंडल इति व्यधात् ॥ ४ ॥ लाल्यमानो भृशं चंद्र-गतिना तत्र सोऽर्भकः ॥ पु-
ष्पवत्या च संप्राप । क्रमाद्वृद्धिं सुरद्रुवत् ॥ ५ ॥ इतश्च जनकः पुत्र-मपश्यन् सर्वतोऽपि हि
॥ क्रमाद्विशोकः सीताख्यां । सुतायाः प्रददावपि ॥ ६ ॥ संपूर्णयौवनां दृष्ट्वा । वरार्हां तां
सुतां नृपः ॥ नामज्ज्वरचिंताब्धौ । स्वयंवरणवेलया ॥ ७ ॥ इतश्च मातरंगाद्या । म्लेच्छा दै-
त्या इव क्रुधा ॥ जनकक्ष्मामुपाद्रौषु-र्धर्मस्थानजनार्दनाः ॥ ८ ॥ तं वृत्तांतं दशरथा-याख्य-
द् दूतैः स सौहृदात् ॥ रामो युयुत्सुं पितरं । निषिध्यागात्स्वयं रणे ॥ ९ ॥ रामे रणप्रण-
यिनि । प्रणेशुः परपार्थिवाः ॥ तरणेः किरणे स्थातुं । नालं तिमिरसंचयाः ॥१०॥ हृष्टस्ततः
स जनको । रामं स्वपुरमानयत् ॥ सीतां च स्वसुतां तस्मै । दातुमैहत् संमदात ॥ ११ ॥
इतस्तत्रागतं पिंग-केशं च छत्रिकाधरं ॥ भीषणं नारदं प्रेक्ष्य । सीता भीतानशत्क्षणात् ॥
॥ १२ ॥ ततस्तुमुलकारिण्यो । दास्यस्तं कोपकश्मलाः ॥ धृत्वा कंठे शिखायां च । गृहाद्बा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गू निरवालयन् ॥ १३ ॥ नारदर्षिस्ततः क्रुद्ध–स्तद्रूपं सत्पटेऽलिखत् ॥ अदर्शयच्चंडगति–
सुतन्नामंडलाय च ॥ १४ ॥ सोऽप्यजानन्निजां सीतां । स्वसारं कामविह्वलः ॥ तस्थावुद्विग्न-
चित्तः सन् । मीनवत्स्तोकवारिणि ॥ १५ ॥ अथ चंडगतिर्ज्ञात्वा । सुतोद्वेगनिबंधनं ॥ सीतां
चपलगतिना । जहार जनकं द्रुतं ॥ १६ ॥ प्रीत्याथ तं चंडगति—रुक्त्वा सीतामयाचत ॥
सोऽप्याह रामाय मया । सा दाशरथये ददे ॥ १७ ॥ ततश्चंडगतिः प्रोचे । मया त्वं स्नेहवृ-
द्धये ॥ आनीय याचितः कन्यां । क्षमस्तां हर्तुमप्यहं ॥ १८ ॥ वज्रावर्त्तार्णवावर्त्ते । धनुषी
देवताश्रये ॥ तथापि रामो मत्सूनु–र्वारोप्य परिणेष्यति ॥ १९॥ अंगीकृत्येति जनको–ऽप्य-
न्येत्य च पुरीं निजां ॥ अमुचद्धनुषी तत्र । कारयित्वा च मंडपं ॥ २० ॥ प्रत्येकाकारणैः
प्रौढ–हर्षादहमहं पुरा ॥ गमिष्यामीति तत्रैयु–र्नृचराः खेचरा अपि ॥ २१ ॥ न्नामंडलयुत-
स्तत्रा–गमच्चंडगतिर्नृपः ॥ विद्याधरास्तथान्येऽपि । समंतात्समुपागमन् ॥ २२ ॥ चतुर्भिरा-
वृतः पुत्रै–रामादिभिरुदारमुत् ॥ तत्राययौ दशरथो । राजाप्यन्यैर्नृपैः समं ॥ २३ ॥ यथा-
वर्जनया सर्वे । नृभुजो जनकेन ते ॥ मानितास्तु विशेषेण । रामादीनां गुरुर्नृपः ॥ २४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथास्थानस्थितैर्नृपैः । सुदिनेऽथ दिनोदये ॥ सुवेषा सुविमानेन । सीता मंमपमाविशत् ॥ ॥ २५ ॥ अथ नृपकुमारास्ते । खेचराश्च बलोद्धताः ॥ असमर्था धनुर्ग्राहे–ऽप्यस्थुर्न्यग्वदनांबुजाः ॥ २६ ॥

इतश्च लीलया रामो । मंचादुत्तीर्य पाणिना ॥ धनुर्जग्राह चक्रे चा–धिज्यं निष्ठुरनिःस्वनं ॥ २७ ॥ पुष्पवर्षैः समं तस्य । कंठे चिक्षेप जानकी ॥ वरमालां जनैश्चक्रे । हर्षात्कोलाहलो महान् ॥ २८ ॥ अनामयल्लक्ष्मणोऽपि । द्वितीयं धनुरुच्चकैः ॥ अष्टादश निजाः कन्या । ददुस्तस्मै च खेचराः ॥ २९ ॥ विवाहः सुदिने राम–सीतयोरप्यथाभवत् ॥ उपयेमे च भरतो । भद्रां कनकभूपजां ॥ ३० ॥ चतुर्भिस्तनयैः सार्द्धं । ययौ दशरथो निजां ॥ पुरीमन्ये च जनका–नुमताः प्रकृतोत्सवं ॥ ३१ ॥ तैः समं तनयैरुग्र–विक्रमः सागरांबरां ॥ रामादिभिर्दशरथः । शशासानन्यशासनः ॥ ३२ ॥ अपरेद्युर्जिनस्नात्र–पयो दशरथो नृपः ॥ सुमित्रायै कंचुकिना । महिष्यै प्रजिघाय सः ॥ ३३ ॥ अन्यासामपि राज्ञीनां । दासीभिः प्राहिणोन्मुदा ॥ तास्तारुण्याद्ययुः शीघ्रं । तच्च ताभिश्च वंदितं ॥ ३४ ॥ वृद्धत्वान्नागतं शी-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



घ्रं । तमज्ञात्वापि सातुरा ॥ मानत्नंगजन्नयात्कंठे । सुमित्रा पाशमक्षिपत् ॥ ३५ ॥ संज्ञाविता न प्रथम-मर्हत्स्नात्रांजसेत्यहं ॥ सुमित्रां कुपितां मत्वा-नुनयाय नृपो ययौ ॥ ३३ ॥ तथावस्थां च तां वीक्ष्य। चंद्रे किं कुरुषे ह्यदः ॥ वदन्निति नृपः पाशं । चित्त्वेदांके च तां न्यधात् ॥ ३७ ॥ तदा कंचुकिनं प्राह । स्नात्रांजःसहितं नृपः ॥ जगौ किं मंदमायासीत् । सोऽप्याख्यद्वृद्धनावतः ॥ ३८ ॥ लालाजालकरालास्यं । पलितं मंदगामिनं ॥ कंपमानं स तं दृष्ट्वा । मनस्येवं व्यचिंतयत् ॥ ३९ ॥ पतद्गृहमिवासाध्य-मधोन्मूलितवृक्षवत् ॥ स्थिरीकर्त्तुं न शक्तोऽत्र । कोऽपीदृक्षं कलेवरं ॥ ४० ॥ ममापि यावदस्त्येत-च्छरीरं न जराहतं ॥ तावदात्मार्थमाधातुं । यतिष्ये किं सुखैः परैः ॥ ४१ ॥

चिंतयित्वेति नृपालः । पुनरास्थानमेत्य च ॥ कियत्कालमतिक्रम्या-न्यदा नंतु मुनिं ययौ ॥ ४२ ॥ यावन्नत्वा मुनिं राजा । निषसाद तदग्रतः ॥ तावद्ग्रामंमल्लोऽप्यागा-द्दियान्नृत्तत्र संभ्रमन् ॥ ४३ ॥ मुनिर्ज्ञाननिधिर्धर्मं । सर्वशर्मनिबंधनं ॥ शशंस पुंमरीकस्य । माहात्म्यमपि निर्मलं ॥ ४४ ॥ ग्रामंमल्लो मुनेः श्रुत्वा । सीतायां युग्मजाततां ॥ निजस्येत्यान-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मत्तां स । ददावस्मै च साशिषं ॥ ४५ ॥ जामंगलोपरोधेन । ततो दशरथो नृपः ॥ स्वज-
न्म सफलं कर्त्तुं । प्रतितीर्थमथाचलत् ॥ ४६ ॥ चतुर्भिस्तनयैर्युक्तो । मंगलीकैर्न्यराणकैः ॥
यच्छन् पंचविधं दान–मर्जयत्सुकृतं नृपः ॥ ४७ ॥ ततो देवालयन्यस्त—जिनपूजनतत्परः ॥
स्थाने स्थाने पुरे चैत्य–मानमन् स ययौ पथि ॥ ४८ ॥ क्रमाच्छत्रुंजये शैले । स ननाम जि-
नेश्वरान् ॥ तत्रोच्चैः कारयामास । प्रासादं च नराधिपः ॥ ४९ ॥ तत्राभ्यर्च्य गुरून् जक्त्या ।
ददद्दानं यथाविधि ॥ श्रीसंघसहितः शैला–न्नरेशोऽवततार च ॥ ५० ॥ इतश्चंद्रप्रजासाख्ये ।
पत्तने जानकी जिनं ॥ चंद्रप्रजं नवे चैत्ये–ऽस्थापयत्कारिते स्वयं ॥ ५१ ॥ तं प्रतिष्ठाप्य चा-
नर्च । गुरूंश्च प्रत्यलाजयत् ॥ सतीशतस्तुता सीता–व्यधात्तीर्थे प्रजावनां ॥ ५२ ॥ ततो रै-
वतके शैले । नेमिमानर्च जूपतिः ॥ दत्वा दानं सुपात्राय । तीर्थोद्धारमचीकरत् ॥ ५३ ॥
वीक्ष्याथो बरटं शैलं । कैकेयी तत्र सोत्सुका ॥ जगाम पत्यनुमता । सार्द्धं रामादिसूनुजिः
॥ ५४ ॥ तत्रासौ नेमिनश्चैत्ये । कारिते बरटेन सा ॥ महोत्सवं व्यधाज्जक्त्या । ददौ दानं त-
थार्थिषु ॥ ५५ ॥ तदेव जर्जरं किंचि–च्चैत्यमालोक्य सार्त्तिता ॥ सज्जीचकार कैकेयी । नेमिं





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चास्थापयन्मुदा ॥ ५६ ॥ सा तत्रापि महातीर्थे—कर्त्तव्यं निरमापयत् ॥ तस्या नाम्ना च त-
त्तीर्थं । पप्रथेऽपायनाशनं ॥ ५७ ॥ ढंकायां च पुरि प्रोच्चैः । कौशल्या वृषभप्रभोः ॥ संस्था-
प्य प्रतिमां चैत्ये । गुरुणा प्रत्यतिष्ठिपत् ॥ ५८ ॥ प्रभाविनी सुप्रभाथ । शांतिचैत्यं महोन्न-
तं ॥ वल्लभ्यां कारयामास । प्रतिष्ठायामहं तथा ॥ ५९ ॥ रामः कांपिल्यनगरे । वामनाख्ये
च लक्ष्मणः ॥ कारयामासतुस्तुंगौ । प्रासादौ परमार्हतः ॥ ६० ॥ अन्यैः कुमारैः सामंतै-
र्मंडलीकैश्च भक्तितः ॥ भामंडलेन चैत्यानि । कारितान्यर्हतां तथा ॥ ६१ ॥ निर्माय यात्रा-
मिति स । सर्वतीर्थेषु भूपतिः ॥ पुनः स्वपुरमापेदे । महोत्सवमयं मुदा ॥ ६२ ॥ भवोद्वि-
ग्नोऽथ नृपतिः । सभामेत्य च तान् सुतान् ॥ राज्यायाकारयत्प्रीत्या । प्राप्य तेऽप्यानमन्
विभुं ॥ ६३ ॥ कूटपेटाथ कैकेयी । विज्ञायावसरं तदा ॥ पूर्वदत्तौ वरौ भूपं । प्रार्थयामास
भक्तितः ॥ ६४ ॥ राज्यं मत्सूनवे देहि । चतुर्दशसमाः पुनः ॥ रामोऽरण्ये प्रवसतु । लक्ष्म-
णेन समं नृप ॥ ६५ ॥ अकालवज्रपाताभ-मिति श्रुत्वा वचो नृपः ॥ मुमूर्छ च लब्धसंज्ञ-
स्तस्थावुद्विग्नमानसः ॥ ६६ ॥ ज्ञात्वा रामो नमंस्तातं । ससीतालक्ष्मणो द्रुतं ॥ तदैव वन-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वासाया–चलल्लोकानुमोदितः ॥ ६७ ॥ देहयष्टिर्विना मूर्ध्ना । मुखश्रीर्नासया विना॥ दृग्वि-
ना तारया वल्ली । विना पत्रेण शाड्वला ॥ ६८ ॥ विजला सरसी चैत्य–शिलाका देववर्जि-
ता ॥ विद्या निरधिदेवोव । गुहेव हरिवर्जिता ॥ ६९ ॥ द्यौरनकैंडुरमयी–रेखिता चित्रपंक्ति-
वत् ॥ यथा तथा गतश्रीका–ऽयोध्याभूद्रामवर्जिता ॥ ७० ॥ [redacted] ॥

इतः स्वराज्ये भरतं । संस्थाप्य शुचिमानसः ॥ सत्यभूतेर्मुनेः पार्श्वे–ऽगृहीद्दशरथो व्र-
तं ॥ ७१ ॥ कांतारवर्त्ती रामोऽथ । गंभीरां तटिनीं द्रुतं ॥ उत्तीर्य वटवृक्षाधो । निषण्णो ल-
क्ष्मणं जगौ ॥ ७२ ॥ देशोऽयमधुनैवाभू–दुद्वसः कस्यचिद्भयात् ॥ यद्वृक्षाः सरसा एते ।
सान्नानि च खलान्यपि ॥ ७३ ॥ ब्रुवतोश्च तयोरित्थं । नरः कश्चिदुपाययौ ॥ रामः पप्रच्छ तं
देशो–द्वसहेतुमुदारगीः ॥७४॥ सोऽप्याख्यत् सिंहकर्णोऽत्र । राजा देवं जिनं गुरुं॥ विना च
साधुमन्यं स । नानमन्नियमोज्ज्वलः ॥ ७५ ॥ तस्य तं नियमं श्रुत्वा । राजा सिंहोदरः क्रु-
धा ॥ तमभ्यषेणयत् सोऽथ । नंष्ट्वा दूरं ययौ भयात् ॥ ७६ ॥ देशोद्वसनिमित्तं तत् । श्रुत्वा
सौमित्रिणाथ तं ॥ आर्हतं तत्र पद्मो द्राक् । प्रत्यतिष्ठिपदादरात् ॥ ७७ ॥ इतोऽन्यत्र गते रा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मे । विद्याधरमुनी शुभ्रौ ॥ व्योम्नोऽवतीर्णौ सद्भक्त्या । सीतया प्रतिलाभितौ ॥ ७८ ॥ वपु-
र्देवता गंध—पयस्तत्र कृतादरं ॥ जटायुरायया गंध—माघ्रातुं पक्षिराट् त्वरं ॥ ७९ ॥ धर्मोप-
देशमाकर्ण्य । तयोः श्रमणयोर्वरं ॥ जातजातिस्मृतिस्तस्थौ । जटायुरनुजानकिं ॥ ८० ॥
जिनधर्मस्थिरीकारं । कृत्वा तेषां महामुनी ॥ जग्मतुर्व्योमयानेन । वंदितुं शाश्वतार्हतः ॥८१॥

रक्षोद्वीपेऽथ लंकायां । विहरत्यजिते जिने ॥ घनवाहन इत्याख्यो । रक्षोवंशेऽभवन्नृपः
॥ ८२ ॥ राक्षसेंद्रो ददौ भीम—स्तस्मै स्वस्याग्रजन्मने ॥ राक्षसीं नाम विद्यां त—द्रक्षोवंश-
स्ततोऽभवत् ॥ ८३ ॥ महारक्षास्तु तत्सूनु—र्जिनपादाब्जषट्पदः ॥ तत्सूनुस्तु देवरक्षाः । प्र-
व्रज्य च शिवं ययौ ॥ ८४ ॥ गतेष्वेवं नरेंद्रेषु । रक्षोवंशेऽत्र भूरिषु ॥ श्रेयांसतीर्थेऽभूत्कीर्ति—
धवलो राक्षसेश्वरः ॥ ८५ ॥ तदा च वैताढ्यगिरेः । श्रीकंठं नाम खेचरं ॥ प्रीत्या स च स-
मानाय्य । कपिद्वीपे न्यवासयत् ॥ ८६ ॥ योजनत्रिशतीमाने । तत्र किष्किंधपर्वते ॥ कि- ॥५००॥
ष्किंधा नाम तद्राज—धानीपूरुत्तमाऽभवत् ॥ ८७ ॥ वानरद्वीपचिह्नेन । नरास्तत्र चकासिरे ॥
क्रमादसाधयन् विद्यां । वानरांगत्वकारिणीं ॥ ८८ ॥ श्रीकंठतो वज्रकंठ—दिष्वतीतेषु भूरिषु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ मुनिसुव्रततीर्थेऽनूद् । घनोदधिरथो नृपः ॥ ७९ ॥ लंकापुर्यामपि तदा । तमित्केशोऽनव-न्नृपः ॥ स्नेहस्तयोरपि तदा । पूर्ववद्ववृते घनः ॥ ८० ॥ किष्किंधायां घनोदधि—सूनुः कि-ष्किंधिरित्यनूत् ॥ लंकायां च तमित्केशात्। सुकेशाख्यश्च नूपतिः ॥ ८१ ॥ विद्याधराधिनाथे-ना—शनिवेगेन निर्जितौ ॥ पाताललंकां ययतु—र्लंकाकिष्किंधनायकौ ॥ ८२ ॥ तत्र पाताल-लंकायां । सुकेशस्यापि सूनवः ॥ इंद्राण्यामनवन्माली । सुमाली माल्यवानपि ॥ ८३ ॥ श्रीमालायां तु किष्किंधे—र्द्वौ बनूवतुरात्मजौ ॥ नाम्नादित्यरजा ऋक्ष—रजाश्चेति महाभुजौ ॥ ८४ ॥ नित्यार्हद्यात्रया मेरो—र्निवृत्तो मधुपर्वते ॥ निधाय किष्किंधपुरं । तस्थौ किष्किं-धपार्थिवः ॥ ८५ ॥

सुकेशस्य सुताः क्रुधा । लंकायामेत्य ते त्रयः ॥ निर्घातमशनिवेग—नृत्यं जघ्नुः स्ववै-रतः ॥ ८६ ॥ माली तत्रानवद्राजा । किष्किंधायां तु नूपतिः ॥ बनूव चादित्यरजाः। स्नेह आसीत्तयोरपि ॥ ८७ ॥ सहस्रारनृपस्याथा—शनिवेगांगजन्मनः ॥ नार्यायां चित्रसुंदर्या—मिं-द्रनामासुतोऽनवत् ॥ ८८ ॥ इंद्रः स इंद्रवल्लोक—पालानस्थापयन्निजान् ॥ पुनः पाताललंका-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यां । कपीन् रक्षांसि च न्यघात् ॥ ९९ ॥ सुमालिनस्ततस्तोऽभू–त्तत्र रत्नश्रवाः सुतः ॥ त-
स्य साधितविद्यस्य । प्रियासीत्कैकसीति च ॥ १०० ॥ शतयोजनविस्तारा । सप्तप्राकारवेष्टि-
ता ॥ अष्टद्वारशता लंका–पातालेति प्रकीर्त्तिता ॥ १ ॥ तयोः सूनुस्ततो हार–नवरत्नानुबिं-
बनात् ॥ सत्याख्यार्थो दशमुख । इत्यासीदतिदुर्मदः ॥ २ ॥ कुंभकर्णसूर्पणखे । बिभीषण-
मथापि सा ॥ कैकसी सुषुवेऽपत्या–न्येवं हि क्रमयोगतः ॥ ३ ॥ मातुर्मुखाद् द्विषद्भ्यस्ते ।
श्रुत्वा तादृक् पराभवं ॥ भीमारण्यं त्रयोऽप्यापु–र्विद्यासाधनहेतवे ॥ ३ ॥ विद्यासहस्रमतु-
लं। दशग्रीवस्य चाभवत्॥ कुंभकर्णस्य ताः पंच । चतस्रश्चापरस्य तु ॥ ४ ॥ हेमवत्याः कु-
क्षिजातां । खचरेशमयात्मजां ॥ उपयेमे दशास्योऽथ । नाम्ना मंदोदरीस्त्रियं ॥ ५ ॥ षट्स-
हस्राः खेचरेंद्र–सुताश्च दशकंधरः ॥ अन्याश्चोदवहत्प्राप्ताः । स्वयं तद्गुणरंजिताः ॥ ६ ॥ म-
होदरनृपस्याथ । तडिन्मालां सुतां वरां ॥ उपायत कुंभकर्ण–स्तडिन्मालामिवांबुदः ॥ ७ ॥
वीरविद्याभृतः पुत्रीं । नामतः पंकजश्रियं ॥ पर्यणैषीत् सुदर्षेण । पित्रादेशाद्बिभीषणः ॥
॥ ८ ॥ अथ शक्रजितं मेघ–वतं च तनयावुभौ ॥ अजीजनच्छुभे लग्ने । राज्ञी मंदोदरी क्र-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मात् ॥ ए ॥

इतो वैश्रवणं जित्वा । विद्याभृच्छक्रसेवकं ॥ दशास्यः स्वपुरीं लंकां । पुष्पकेन समासदत् ॥ ॥ १० ॥ शक्रभृत्यं यमं जित्वा । भंक्त्वा च नरकानसौ ॥ आदित्यरजसेऽदत्त । किष्किंधां सुहृदे पुरीं ॥ ११ ॥ नवमृक्षपुरं कृत्वा । स ऋक्षरजसे ददौ ॥ आदित्यरजसश्चासी—द्वाली नाम सुतो बली ॥ १२ ॥ सुग्रीव इति चान्योऽभू—द्वीक्रमी तनयोऽद्भुतः ॥ कन्या कनीयसी तस्य । श्रीप्रभेति च नामतः ॥ १३ ॥ अभूतामृक्षरजसो—ऽप्युभौ भुवनविश्रुतौ ॥ कांतायां हरिकांतायां । नलनीलाभिधौ सुतौ ॥ १४ ॥ अथादित्यरजाः कृत्वा । राज्येशं वालिनं सुतं ॥ युवराजं च सुग्रीवं । स्वयं तु जगृहे व्रतं ॥ १५ ॥ अथ सूर्पणखां हृत्वा । जित्वा चंद्रोदरं नृपं ॥ आदित्यरजसः सूनुं । श्वभ्रलंकां खरोऽग्रहीत् ॥ १६ ॥ गतक्रोधो दशग्रीवो । मंदोदर्युक्तितः खरं ॥ सदूषणं तत्र राज्ये । न्यधाद्यामिपतिं स्वयं ॥ १७ ॥ मृते चंद्रोदरे भार्या—ऽनुराधेति स्थिता वने ॥ अजीजनद्विराधाख्यं । नंदनं गुणभाजनं ॥ १८ ॥ श्रुत्वैकदाथ बलिनं । वालिनं वानरेश्वरं ॥ दशास्योऽसहमानः सन् । दूतेनाकारयद् द्रुतं ॥ १९ ॥ विना-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हंतं परं कंचि–दनमंतं च वालिनं ॥ श्रुत्वा महता सैन्येन । दशास्योऽप्यन्यषेणयत् ॥ १० ॥
युध्ध्वास्त्रैर्बहुन्निर्वाली । प्रक्षिप्य करकोटरे ॥ सचंद्रहासं लंकेशं । बभ्राम चतुरार्णवीं ॥११॥
मुक्त्वा च रावणं सद्यो । वाली वैराग्यमालितः ॥ स्वराज्ये न्यस्य सुग्रीवं । प्रव्रज्यामाददे
स्वयं ॥ १२ ॥ सुग्रीवो दशकंठाय । श्रीप्रज्ञां प्रददौ तदा ॥ चंद्ररश्मिं वालिपुत्रं । यौवराज्ये
न्यवेशयत् ॥ १३ ॥ वैताढ्याद्रौ रत्नवती–मुद्वोढुं चलितस्य खे ॥ चस्खले रावणस्याष्टा–प-
दोर्ध्वं यानमन्यदा ॥ १४ ॥ यानस्खलनहेतुं स । मार्गयंस्तत्र वालिनं ॥ प्रतिमास्थं स्तंभ-
मिव । निश्चलं पश्यतिस्म च ॥ १५ ॥ अद्याप्यसौ मयि क्रोधी । दंभेन व्रतवेषभृत् ॥ सशै-
लमेनं तदहो । क्षेप्स्यामि लवणांबुधौ ॥ १६ ॥

इत्युक्त्वा रावणः पृथ्वीं । विदार्याधो गिरेरथ ॥ प्रविश्यास्मरदस्मेर–स्मयो विद्याः सह-
स्रशः ॥ १७ ॥ त्रुटत्त्रुटदृग्रावसंधिं । झलझलिति सागरं ॥ उद्भ्रांतभूतसंभार–मुद्दधार स प-
र्वतं ॥ १८ ॥ आः कथं मयि मात्सर्या–दयं तीर्थविनाशकृत् ॥ निःसंगोऽप्यस्य शिक्षायै । द-
र्शयामि बलं मनाक् ॥ १९ ॥ ध्यात्वेति वामचरणा–गुष्टाग्रेण मुनीश्वरः ॥ अष्टापदाद्रेर्मूर्द्धा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नं । वाली किंचिदपीडयत् ॥ ३० ॥ रावणः संकुचद्गात्रो । वमद्रुधिरपंकिलः ॥ तदैव दीनव-
द्विश्वं । रावयन् विरराम सः ॥ ३१ ॥ तस्य चारटनं दीनं । श्रुत्वा वाली कृपापरः ॥ विररा-
माशु मत्कर्म । शिक्षामात्रं न तु क्रुधा ॥ ३२ ॥ निःसृत्य दशकंठोऽपि । क्षमयित्वा च वालि-
नं ॥ भरतेशकृते चैत्ये । जगाम जिनमर्चितुं ॥ ३३ ॥ सांतःपुरो जिनं भक्त्या । पूजयामा-
स सोऽष्टधा ॥ समाकृष्य स्नसातंत्री-र्भुजवीणामवादयत् ॥ ३४ ॥ धरणेंद्रश्च तदायात-स्तद्भ-
क्त्याहृष्टमानसः ॥ अर्हद्गुणान् गृणंतं तं । व्याजहार वरं वृणु ॥ ३५ ॥ अर्हत्सु भक्तिरेवास्तु
। ममेत्युक्ते स रक्षसे ॥ अमोघविजयां शक्तिं । दत्वा विद्याश्च निर्ययौ ॥ ३६ ॥ तीर्थनाथा-
न्नमस्कृत्य । नित्यालोकपुरे गतः ॥ व्युह्य रत्नावलीं लंका-माजगाम च रावणः ॥ ३७ ॥
आसाद्य केवलं वाली । घातिकर्मक्षयादथ ॥ सुरासुरैः कृतोपास्तिः । पदमव्ययमासदत् ॥
॥ ३८ ॥ विद्याभृज्ज्वलनशिख-सुतां ताराभिधां वरां ॥ साहसगत्यभ्यर्थमानां । सुग्रीवः परि-
णीतवान् ॥ ३९ ॥ तारायां रममाणस्य । सुग्रीवस्य बभूवतुः ॥ द्वावंगदजयानंदा-भिधानौ
तनयौ वरौ ॥ ४० ॥ स साहसगतिस्तारा-वंचितो हिमवद्गिरौ ॥ गत्वा साधयितुं विद्याः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





प्रारेभे हृदि तां स्मरन् ॥ ४१ ॥ इतश्च रावणो विद्या–धरैः खरमुखैर्वृतः ॥ सुग्रीवेणापि वै-
ताढ्ये । जेतुं शक्रमथाचलत् ॥ ४२ ॥ अथानर्च जिनं रेवा–तीरे तद्वारिवारिजैः ॥ दशाननो
रत्नपीठे । स्थापयित्वातिभक्तिमान् ॥ ४३ ॥ ततो ध्याननिलीनस्य । दशास्यस्य क्षणादपि ॥
अकस्माद्वारिपूरेण । जिनपूजा व्युदस्यत ॥ ४४ ॥ क्रुद्धोऽथ दशमौलौ द्राक् । कश्चिद्विद्याधरो-
ऽवदत् ॥ स्वामिन्माहिष्मतीनाथः । सहस्रांशुर्जलप्लुतौ ॥ ४५ ॥ संरोधाद्वारिणो मोक्षा–
दपि ते क्रोधकारणं ॥ अस्त्यात्मरक्षनृपालैः । स्त्रीभिश्च श्रितसन्निधिः ॥ ४६ ॥ [redacted] ॥ श्रु-
त्वा तत्कुपितो मंक्षु । राक्षसांस्तज्जयाय सः ॥ प्रजिघाय द्रुतास्तेना–जग्मुस्ते चोपरावणं ॥
॥ ४७ ॥ रावणोऽपि स्वयं गत्वा । सहस्रांशुं बलेन सः ॥ जित्वानयामास निज–शिबिरे तु-
मुलोद्धुरे ॥ ४८ ॥ यावद् हृष्टः सभायां स । निषण्णस्तावदंबरात् ॥ तत्राऽयातो मुनिः कश्चि–
द्रावणेन च पूजितः ॥ ४९ ॥ मत्सूनुरयमित्युक्ते । मुनिना शतबाहुना ॥ तं मुमोच दशा-
स्यः श्राक् । जग्राह च स तु व्रतं ॥ ५० ॥

ततो नारदवाक्येन । मरुत्तनृपतेः क्रतुं ॥ हिंसामयं दयाशीलो । दशकंठो न्यवारयत्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ ५१ ॥ दुर्लंघनगरेऽथेंद्र–दिक्पालं नरकूबरं ॥ जेतुं ययुः कुंभकर्ण–मुखा रावणशासनात्
॥ ५२ ॥ आशालीविद्यया वह्नि–मयं वप्रमथ व्यधात् ॥ स्वपुरे योजनशत–प्रमाणं नलकूब-
रः ॥ ५३ ॥ अशक्तास्तं दृष्टुमपि । कुंभकर्णादयश्च ते ॥ एत्य विज्ञपयामासू–रावणाय कथं-
चन ॥ ५४ ॥ सानुरागा दशास्याय। नलकूबरपत्न्यथ ॥ स्वयमेत्योपरंभाख्या । विद्यामाशा-
लिनीं ददौ ॥ ५५ ॥ संहृत्य विद्यया वह्नि--प्राकारं दशकंधरः ॥ जग्राह दुर्लंघपुरं । चापचक्रं
सुदर्शनं ॥ ५६ ॥ तत्रैव तत्पुराधीशं । स्थापयित्वाथ तत्प्रियां ॥ परस्त्रीमित्यभुक्तां चा–र्पया-
मास दशाननः ॥ ५७ ॥ ततोऽपि रावणः सैन्यै–र्वैताढ्ये रथनूपुरं ॥ वेष्टयामास तत्स्वामी
। कोपादिंद्रोऽप्यढौकत ॥ ५८ ॥ किमेभिर्मारितैः सैन्यै–रावयोरेव वैरतः ॥ युक्तं युद्धमिति प्रो-
च्य । रावणः शक्रमाह्वयत् ॥ ५९ ॥ तावुभौ कुंजरारूढौ । विद्यास्त्रचयवर्षिणौ ॥ अभूतां न-
गकंप्राय । स्वर्गिणामपि भीतिदौ ॥ ६० ॥ छलज्ञो रावणः स्वेभा–दुत्पत्यैरावणं ययौ ॥ ब-
द्ध्वा चेंद्रं पुनः स्वेभ–माजगाम जयोर्जितः ॥ ६१ ॥ ततो राक्षससैन्येऽभू–त्तुमुलो जयशा-
लिनि ॥ म्लानिमाप च विद्याभृत्–सैन्यं जयविपर्ययात् ॥ ६२ ॥ ततो निवृत्य लंकायां । ग-



For Private And Personal Use Only

तो राक्षसनायकः ॥ चिक्षेप शक्रं कारायां । पंजरे पक्षिणं यथा ॥ ६३ ॥ सलोकपालो न-
त्वाथ । सहस्रारो दशाननं ॥ ययाच पुत्रभिक्षां सो–ऽप्याख्यत्तद्विनयाहृतः ॥ ६४ ॥ यद्यसौ
मत्पुरीं नित्यं । तृणकाष्टादिवर्जितां ॥ कृत्वाभिर्षिचेच्च जलैः । पुष्पैरापूजयत्यपि ॥ ६५ ॥
एवंविधानि कर्माणि । कुरुते तद्विमुच्यते ॥ अंगीकृत्य च तत्पुत्रं । सहस्रारो व्यमोचयत् ॥
॥ ६६ ॥ [illegible] ॥ रथनूपुरमेत्यैंद्रो । निर्विणो व्रतमाप्य च ॥ चिरं तप्त्वा तपो मुक्ति–मवाप
कर्मणां क्षयात् ॥ ६७ ॥

अन्यदा रावणोऽन्यस्त्री–संगात् स्वं मरणं विदन् ॥ स्वयं तामप्यनिच्छंतीं । गुरोर्वाक्या-
न्यषेधयत् ॥ ६८ ॥ इतश्चादित्यनगरे । प्रह्लादतनयोऽभवत् ॥ केतुमतीकुक्षिजन्मा । विद्या-
भृत्पवनंजयः ॥ ६९ ॥ इतो माहेंद्रनगरा–धिपमाहेंद्रनंदिनीं ॥ हृत्सुंदरीकुक्षिजातां । स्त्री-
चक्रेंजनसुंदरीं ॥ ७० ॥ केनापि सोऽवलेपेन । न संभावयतिस्म तां ॥ सतीधुरंधरा सा तु ।
दुःखात्कालमवाहयत् ॥ ७१ ॥ ततो राक्षसराजस्य । दूतः प्रह्लादपार्थिवं ॥ उपेत्याजूहवद्वा-
दो–नाथं जेतुमुपेयुषः ॥ ७२ ॥ नत्वाथो विनयात्तत–मापृच्छ्य पवनंजयः ॥ नंतुं मातरमभ्या-

गा–दपश्यत्तत्र च प्रियां ॥ ७३ ॥ कांतां पादनतामप्य–वज्ञाप्य पवनंजयः ॥ ससैन्यो व्योम-
मार्गेण । गत्वोवास सरस्यसौ ॥ ७४ ॥ रात्रौ तत्र वियोगार्त्तां । चक्रवाकीं विलोक्य सः ॥
सस्मार स्वप्रियां तादृ–गसंभावनदूषितां ॥ ७५ ॥ तदैव सह मित्रेण । वेगात् प्रहसितेन सः
॥ गत्वा तद्वासमासाद्य । तामपश्यद्धिसंस्थुलां ॥ ७६ ॥ आश्वास्य मधुरैर्वाक्यै–र्वल्लभां पव-
नंजयः ॥ रेमे क्षणार्धवद्रात्रिं । नयन् कामसुरोपमः ॥ ७७ ॥ प्रातः पुनश्च पवने । व्रजत्यथ
जगौ प्रिया ॥ भवामि यद्युदरिणी । तद् ज्ञेयं भवता विभो ॥ ७८ ॥ दत्वाभिज्ञानमुद्रां स ।
मा भैषीरिति चोच्चरन् ॥ ययौ मानसवेषांत–संस्थिते शिबिरे निजे ॥ ७९ ॥ इतस्तस्या ग-
र्भलक्ष्म । काले गच्छति च स्फुटं ॥ दृष्ट्वा केतुमती श्वश्रूः । साधिक्षेपमदोऽवदत् ॥ ८० ॥ ह-
ले किमिदमाचारि । कुलद्वयकलंकभृत् ॥ देशांतरगते पत्यौ । पापे यदुदरिण्यभूः ॥ ८१ ॥
ततो रुदत्यंजनापि । दर्शयंती च मुद्रिकां ॥ तस्यै गुप्तां पतिप्राप्तिं । कथयामास सा सती ॥
॥ ८२ ॥ क्रुद्धा साऽप्रत्ययवती । तलारक्षनरैरथ ॥ रथमारोप्य माहेंद्र–पुरोपांते व्यमोचयत्
॥ ८३ ॥ तत्पितापि सदोषां तां । मन्यमानो निजाद् गृहात् ॥ वसंततिलकायुक्तां । तदैव नि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रवासयत् ॥ ८४ ॥ ग्रामादिष्वप्रवेशं सा । लभती नृपशासनात् ॥ प्राघारण्यं चारणर्षिं । दृ-
ष्ट्वा हर्षान्ननाम च ॥८५॥ वसंततिलकासख्या । उक्त्वा वृत्तांतमादितः ॥ पप्रछ तं मुनिं ता-
दृ—कर्मपाकमशेषतः ॥ ८६ ॥ ततो जगौ मुनिर्देवो । लांतकात्प्रच्युतो दिवः ॥ अस्या भवि-
ष्यति सुतो । विद्याभृन्मुक्तिगामुकः ॥ ८७ ॥

अन्यच्च कनकरथ—नृपपत्न्यावुभे पुरा ॥ लक्ष्मीवती च कनको—दरी ते प्रथमार्हती ॥
॥ ८८ ॥ तस्या हृत्वार्हदर्चां तां । सापत्न्यात्कनकोदरी ॥ अवजज्ञौ च साध्वीनां । वाक्या-
दाराधयच्च सा ॥ ८९ ॥ प्रांते धर्मावबोधात्सा । देव्यभूत्कनकोदरी ॥ च्युत्वा चात्र सखी-
यं ते । जातार्हद्द्वेषतोऽर्त्तिभाक् ॥ ९० ॥ भुक्तप्रायमिदं कर्मा—धुना धर्मं त्वमार्हतं ॥ गृहा-
णागण्यसौख्याय । निगृहाण च तानरीन् ॥९१॥ इतो गंधर्वनाथस्य । मणिचूलस्य शासना-
त् कंदरायां वसंती सा । तनयं सुषुवेऽद्भुतं ॥ ९२ ॥ दीनां रुदंतीं वीक्ष्याथ । प्रतिसूर्याख्य-
खेचरः ॥ तां विदन् भागिनेयीं चा—चलदादाय यानगः ॥ ९३ ॥ विमाने वेगतो याति । ज-
नन्युत्संगतोऽर्भकः ॥ उत्प्लुत्य निपतन् शैलं । देहभारादचूर्णयत् ॥ ९४ ॥ प्रतिसूर्योऽपि वे-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गेन । बालमादाय भूमितः ॥ अक्षतांगं भागिनेया । अर्पयामास हर्षदं ॥ ९५ ॥ प्रतिसूर्यो
निजे ऽंगे । तां च हनुरुहाभिधे ॥ आनीयामुचदानंदा–नद्धांछितमपूरयत् ॥ ९६ ॥ जातमा-
त्रो हनुरुहे । पुरे बालोऽयमागमत् ॥ इति मातुलदत्ताख्यो । हनुमान् वृद्धिमाप सः ॥९७॥
इतश्च पवनः संधिं । विधाय वरुणेन सः ॥ प्राप्य प्रसादं लंकेशा–दाजगाम निजं पुरं ॥९८॥
श्रुत्वा तत्र प्रियोदंतं । विषमः श्वसुरौकसि ॥ गतस्तत्राप्यपश्यंस्तां । स बभ्राम वनाद्वनं ॥
॥ ९९ ॥ तामपश्यन् स शून्यात्मा । शोकादात्ममृतिं ध्रुवं ॥ मित्रात्प्रहसितात्पित्रो–राशं-
सन्नतिपूर्वकं ॥ ३०० ॥ प्रल्हादोऽप्यथ तत् श्रुत्वा । वीक्षितुं पवनांजने ॥ समं विद्याधरैर्वे-
गा–द्भ्रामावनिमंडलं ॥ १ ॥ ततश्च पवनोऽयोग–वह्निं जानन् सुदुस्सहं ॥ प्रविशन् ज्वलि-
ते वह्नौ । प्रह्लादेन विलोकितः ॥ २ ॥ वत्साविमृष्टं कर्मैत–न्मा कुरूचरतीति तं ॥ तस्मिन्ने-
युस्तत्प्रयुक्ताः । खगा अंजनया सह ॥ ३ ॥ ततः सर्वेऽपि सानंदाः । प्रतिसूर्योपरोधतः ॥ पु-
रं हनुरुहं प्रापु–र्महोत्सवपरायणाः ॥ ४ ॥ जग्मुः सर्वेऽप्यथ निजं । निजं पुरमनुत्सुकाः ॥
पवनांजने तत्रैव । समं पुत्रेण तस्थतुः ॥ ५ ॥ हनुमानथ तत्रस्थो । ववृधे जनहर्षदः ॥ ज-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ग्राह च कलाः सर्वा । लब्धवानपि यौवनं ॥ ६ ॥ वरुणस्याहवे दृष्ट्वा । हनुमद्विक्रमद्भुतं ॥ हृष्टो दशाननश्चक्रे । तं प्रसादास्पदं भृशं ॥ ७ ॥ वरुणस्य सुतां सत्य–वतीं च खरनंदिनीं ॥ अनंगकुसुमां चान्या । नुपयेमे स भूरिशः ॥ ८ ॥ विद्याभृतः सूर्यमुखान् । जित्वा नव दशाननः ॥ कृत्वेंद्रवत्कर्मकरान् । सुखाद्राज्यमपालयत् ॥ ९ ॥

इतोऽरण्ये दंमकाख्ये । रामस्य किल तस्थुषः ॥ क्रीमया लक्ष्मणो भ्राम्यन् । वने खड्गमलोकयत् ॥ १० ॥ क्षात्रभावात्तमादाय । सविधे वंशजालिकां ॥ अविधेयविनेता सों–ऽभोजनालमिवाछिनत् ॥ ११ ॥ दृष्ट्वा पुरो निपतितं । शिरः कस्यापि तत्क्षणात् ॥ सौमित्रिश्चिंतयामासा–ऽयुध्यमानो हतो हहा ॥१२॥ गृहीत्वा तमथागत्य । लक्ष्मणो राममब्रवीत् ॥ तद्वृत्तांतं स च प्राह । न वत्स विहितं शुभं ॥ १३ ॥ एषोऽस्ति चंद्रहासाख्यः । पुमानस्यात्र साधकः ॥ हतस्त्वया ततोऽस्यास्ति । कुतोऽप्युत्तरसाधकः ॥ १४ ॥ इतः सूर्पणखा सूनुं । सिद्धविद्यं च जानती ॥ आत्तपूजोपचाराथा–पश्यच्छिन्नं हि तच्छिरः ॥ १५ ॥ हा वत्स शंबूक हहा । नीतोऽसि यममंदिरं ॥ केनाकालद्विषेत्युच्चै–ररोदीद्रावणस्वसा ॥ १६ ॥ दृष्ट्वा च सा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुरः पुंसः । पदपंक्तिं मनोहरां ॥ ययौ तदनुसारेणा-पश्यद्रामं स्मरोपमं ॥ १७ ॥ वैरं वि-
स्मृत्य तद्रूप-मोहिता शोकवर्जिता ॥ वृषस्यंती ययाचैनं । रताय धिगहो स्त्रियः ॥ १८ ॥
सद्भार्योऽहमतो याहि । लक्ष्मणं रामनोदिता ॥ इति सा लक्ष्मणेनापि । भ्रातृजायेति तत्य-
जे ॥ १९ ॥ भ्रष्टा ह्युभयतो दुष्टा । रुष्टा नंष्ट्वा स्वभर्त्तरि ॥ कुट्टयंती शिरः सूनु-वधं तत्कृ-
तमाह सा ॥ २० ॥ चतुर्दशसहस्रैस्ते । युता विद्याधरैर्भटैः ॥ खरादयः खररुषः । प्रतिराम-
मयुस्ततः ॥ २१ ॥ रामः प्राहात्र वत्स त्वं । तिष्ठ हन्मि रिपूनहं ॥ स्वस्थां तावदिमामत्र ।
पालयेथाः प्रजावतीं ॥ २२ ॥ ऊचे लक्ष्मण आर्य त्व-च्छासनादहितानमून् ॥ लीलयैव हनि-
ष्यामि । तन्मामादिश संगरे ॥ २३ ॥ रामोऽप्युवाच तद्गच्छ । वत्स चेद्वैरिसंकटं ॥ ज्ञापे-
येथाः सिंहनादा-त्तदा मामरिषूदनं ॥ २४ ॥ तद्रामशासनं मूर्ध्ना । नमन्नादाय लक्ष्मणः ॥
धनुर्ध्वानैर्भुजास्फोटै-स्त्रासयन्नहितान् ययौ ॥ २५ ॥ वैरीभसिंहे सौमित्रि-ण्यग्र क्रुद्धे दुरा-
शया ॥ गत्वा चंद्रनखा प्राह । रावणं भर्तृपृष्टये ॥ २६ ॥ भ्रातः कावपि देवाभौ । नरौ दंड-
ककानने ॥ तिष्ठतस्तव जामेयं । जघ्नतुः स्वतपःस्थितं ॥ २७ ॥ मद्वाक्याद्भावुकस्ते तु । य-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यौ तद्वधवांछया ॥ लक्ष्मणेन समं सोऽस्ति । रणकर्मपरायणः ॥ २८ ॥ तज्ज्येष्टस्तस्य सारेण । रामज्ञश्शे निजेन च ॥ असारं मन्यते विश्वं । स्वज्ञार्यारूपतोऽपि च ॥ २९ ॥ गौरी दूरीकृता रंज्ञा । हंसीवोष्मितमानसा ॥ तविषी तु मषीकल्पा । शची साचीज्ञवन्मुखी ॥ ॥ ३० ॥ निंदत्प्राचीनपुण्या च । घृताची मेनका न का ॥ मृगी विगीतमूर्त्तिस्ति–लोत्तमा न तिलोत्तमा ॥ ३१ ॥ सावित्री सत्रपा नाग–योषितोऽयोत्तमा रमाः॥ प्रीतिरप्रीतिजनका । रतिर्निरतिज्ञाजनं ॥ ३२ ॥ यथा कृता हताशेष–स्त्रैणरूपसवर्गया ॥ सा तवैवोचिता भ्रातः। सीता रामपरिग्रहा ॥ ३३ ॥ [redacted] ॥ राज्यमेतत् स्त्रियो दिव्या । रूपश्रीरद्भुता बलं ॥ तावन्न बहु मन्येऽहं । यावन्न तव सा करे ॥ ३४ ॥ श्रुत्वेति सानुरागोऽसौ । पुष्पकेण तदैव हि ॥ विमानेन ययौ दंरू–कारण्यं रामपावितं ॥ ३५ ॥ तेजसा रामज्ञद्रस्य । गरुडस्यैव जिह्मगः ॥ हतात्मिमानगरल–श्चिंतयामास सर्पवत् ॥ ३६ ॥ अतीत्य वेधसः सृष्टि–मियं विश्वत्रयाद्भुता ॥ सीता विनेता दुष्टाना–मयं रामः करोमि किं ॥ ३७ ॥ दोलायमानचित्तेन । स्मृता तेनावलोकिनी ॥ विद्यासा जानकीहारो–पायं पृष्टा जगाविति ॥ ३८ ॥ बाहुज्यां ती-

For Private And Personal Use Only

र्यतेंत्नोधि–र्वेष्मणा सह्यते शिखी ॥ पंचाननमुखे हस्तः । सुकरो दुष्करं त्वदः ॥ ३९॥ किं-
त्वसौ लक्ष्मणक्ष्वेडां । श्रुत्वा संकेततो व्रजेत् ॥ सुखेन हर्यास्त्वं सीतां । तां करोमीति त्व-
त्कृते ॥ ४० ॥ एवं कुर्विति सा श्रुत्वा । साक्षाल्लक्ष्मणशब्दवत् ॥ सिंहनादं व्यधाद्रामो—
ऽप्यन्वधावत् प्रियोक्तितः ॥ ४१ ॥ अत्रांतरेंबरोत्तीर्ण–श्चौराचीर्णपथोऽधमः ॥ जहार रावणः
सीतां । विन्यतीं तन्निरीक्षणात् ॥ ४२ ॥ हा तात कांत हा भ्रात–र्हा देवर सुदारुणात् ॥
अस्मान्मां रक्ष रक्षेति । सा चक्रंद मुहुर्मुहुः ॥ ४३ ॥ सीतावचो निशम्येति । जटायुर्जातम-
त्सरः ॥ आश्वास्य तां दशास्यास्यं । नखैस्त्रोटयद्दटन् ॥ ४४ ॥ क्रुद्धस्ततो दशग्रीवः । खड्ग-
माकृष्य तं न्यहत् ॥ सीता विशेषतो न्नीता–स्मरन्नाभंडलं ततः ॥ ४५ ॥ हा न्नामंडल इ-
त्याशु । श्रुत्वा न्नामंडलानुगः ॥ विद्याधरो रत्नजटी । ज्ञात्वा सीतामधावत ॥ ४६ ॥ तमा-
क्षिपंतं लंकेशो । दृष्ट्वा पृष्टानुधाविनं ॥ तद्विद्यां निजविद्याभि–र्हृत्वा न्नूमावपातयत् ॥ ४७ ॥
अविघ्नयानो लंकेशो–ऽनिच्छंतीं तत्कलत्रतां ॥ अमुंचद्देवरमणो–द्याने तां खेचरीवृतां ॥ ४८ ॥
इतश्च लक्ष्मणो रामं । दृष्ट्वा मुक्त्वा रिपून् जगौ ॥ आर्यामेकाकिनीं मुक्त्वा । किमार्य



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वमिहागमः ॥ ४९ ॥ त्वत्सिंहनादादित्युक्ते । रामेणोचे स लक्ष्मणः ॥ न मयाकारि यत्त्वे-
मा । तत्केन किल वंचितौ ॥ ५० ॥ याहि रक्षार्यं सीतां त्व–महं हत्वा रिपून् द्रुतं ॥ याव-
दायामि रामोऽपि । शीघ्रं तत्र ययौ स्खलन् ॥ ५१ ॥ तत्रागतो दाशरथि–रपश्यन् जानकीं
क्षणात् ॥ मुमूर्छ वनवातैश्च । लब्धसंज्ञोऽरुदद्भृशं ॥ ५२ ॥ इतस्ततो भ्रमन् रामो । मुमूर्षुं
तं जटायुषं ॥ नमस्कारश्रुतेः स्राक् तं । स्वर्गतिं चाप्यलंभयत् ॥५३॥ ततः खरे त्रिशिरसं ।
दूषणं च समं भटैः ॥ निहत्य लक्ष्मणः सख्या । विराधेनाचलत्समं ॥ ५४ ॥ लक्ष्मणस्त्वा-
गतो दृष्ट्वा । निस्तारमिव लोचनं ॥ निष्कलं निष्कलत्रं तं । ज्येष्ठं प्राहाश्रुवारिमुक् ॥ ५५
॥ ज्येष्ठाहमागतो हत्वा । रिपूंस्त्वन्नतिकाम्यया ॥ तत्किमेवं क्व सा पूज्या । रामः श्रुत्वेति
सस्वजे ॥ ५६ ॥ जगौ च सीताहरणं । लक्ष्मणोऽप्येवमब्रवीत् ॥ नूनमेतत्कृते जातः । सिं-
हनादस्तु मायिनः ॥ ५७ ॥ कातर्यं मुंच तज्ज्येष्ठा–न्वेष्यानेष्यामि तां द्रुतं ॥ आश्वासितस्तु ॥५१६॥
रामोऽपि । सानुजस्तत्र चाभ्रमत् ॥ ५८ ॥ विराधेन ततो युक्ता–स्तामनालोक्य पत्तयः ॥
आगताः सानुजं रामं । विराधं दुःखिनं व्यधुः ॥ ५९ ॥ ततः पातालंकायां । प्राप्तं खरसुतं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





द्गात् ॥ जित्वा सुंदं विराधं तं । राज्ये निदधतुस्तकौ ॥ ६० ॥

इतश्च सिद्धविद्यः सन् । स साहसगतिः खगः ॥ अधिकिष्किंधमायातः । सुग्रीवे क्रीमितुं गते ॥ ६१ ॥ प्रतारिण्या विद्यया स । सुग्रीवोपमवेषभृत् ॥ ताराभिलाषी शुद्धांते । यावद्याति स्मरातुरः ॥ ६२ ॥ तावत्सत्योऽपि सुग्रीवः । प्रविशन् द्वारपालकैः स्खलितोऽग्रे गतो राजा । सुग्रीव इति वादिभिः ॥ ६३ ॥ वालिसूनुश्चंद्ररश्मि–र्दृष्ट्वा सादृश्यमेतयोः ॥ अंतरे स्खलयामास । मायिनं मातृरक्षकः ॥ ६४ ॥ इतोऽमिलन्नुभययोः । पक्षयोरमितौजसां ॥ अर्द्धेऽर्धेऽज्ञातवता–मक्षौहिण्यश्चतुर्दश ॥ ६५ ॥ महायुद्धे द्रुतावीराः । सुग्रीवोऽपि विटेन सः ॥ क्षीणास्त्रः पुरबाह्येऽस्था–दित्यंतश्चिंतयन्नपि ॥ ६६ ॥ सुकृती वालिरतुल–बलो योऽकृतपौरुषः । दीक्षामादाय परमं । पदमाप सुसंयमी ॥ ६७ ॥ धन्यस्तदंगजो येंतः–पुरे तमरुधद्बली ॥ अजानानो द्वयोर्भेदं । कं रक्षतु च हंतु कं ॥ ६८ ॥ मत्सहायो खरः सोऽपि । हतो रामेण दोष्मता ॥ तत्तमेवाश्रयाम्येष । विराधस्योपकारिणं ॥ ६९ ॥ एवं विमृश्य दूतेन । विराधं सोऽभिपृच्छ्य च ॥ गत्वा ननाम श्रीरामं । शरण्यं सानुजं मुदा ॥ ७० ॥ रामो-



For Private And Personal Use Only

ऽपि सानुजो गत्वा । किष्किंधाया कृपापरः ॥ आह्वायाह्वयन्माया–सुग्रीवं सपरिछदं ॥७१॥
छयोः साहश्यतो रामो–ऽनभिज्ञो भिन्नताकृते ॥ वज्रावर्त्तस्य धनुषो । आघातमकरोत्ततः ॥
॥ ७२ ॥ वेषप्रावर्त्तनी विद्या । तन्नादेन पलायिता ॥ एकबाणेन तं रामः । परासुं मायिनं
व्यधात् ॥ ७३ ॥ अमिलत्तस्य सर्वोऽपि । सुग्रीवस्य परिग्रहः ॥ अस्थापयद्दाशरथि–स्तं च
राज्ये पुरातने ॥ ७४ ॥ कालज्ञोऽथ कृती काले । विराधः सपरिछदः ॥ अगाधात्मबलो रा-
म–मागान्नामंमलोऽपि च ॥७५॥ जांबुवंत हनुमंतं । नीलं निषधचंदनौ ॥ गवाक्षरथभंजादी-
न् । सुग्रीवोऽमेलयत्ततः ॥ ७६ ॥ ततो रामाज्ञया सीता–न्वेषणाय कपीश्वरं ॥ महासारं ह-
नुमंतं । प्राहिणोद्विनयान्वितं ॥ ७७ ॥ अनिच्छंतीं परस्त्रायाँ–मरमन् रावणोऽपि हि ॥ सीतां
संबोधयामास । स्वपत्नीभिरहर्निशं ॥ ७८ ॥ विभीषणादिभिर्मंत्रे । सुखं संबोधितोऽपि सः
॥ नामुचज्जानकीं जातु । नान्यथा भवितव्यता ॥ ७९ ॥ ।।५१८।।

इतः खे प्रव्रजन् वायु–सूनुर्माहेंद्रपर्वते ॥ मातामहमहेंद्रस्य । पुरं दृष्ट्वा व्यचिंतयत् ॥
॥ ८० ॥ निर्वासिता मे जननी । निर्मंतुर्यदनेन तत् ॥ दर्शयामि किमप्यस्य । महेंद्रस्य बलं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निजं ॥ ८१ ॥ इति स्मृत्वा क्रुधा सिंह–नादं च हनुमान् व्यधात् ॥ माहेंद्रश्च क्रुधा वेगा–
न्निर्गत्याह्वास्त तं युधे ॥ ८२ ॥ चिरं युद्ध्वा मोहयित्वा । नत्वा मातामहं कपिः ॥ स्वज्ञा-
तेऽयं स्वामिकार्यं । कथयित्वा च निर्ययौ ॥ ८३ ॥ लंकापरिसरे विद्यां । हत्वाशालीं कपी-
श्वरः ॥ न्यहन्वज्रमुखं लंका–सुंदरीं च रणातिथिं ॥ ८४ ॥ जित्वोपयेमे गांधर्व–विवाहेन च
पावनिः ॥ रमयित्वा तया रात्रिं । विभीषणगृहान् ययौ ॥ ८५ ॥ [illegible] ॥ विभीषणोऽपि
तद्वाक्याद् । बोधितुं रावणं ययौ ॥ उत्प्लुत्य हनुमान् सीता–सनाथं प्राप काननं ॥ ८६ ॥
राक्षसीभिः परिवृतां । मलिनांशुकधारिणीं ॥ परिम्लानां क्षुधाक्षीणां । स्मरंतीं रामनाम च
॥ ८७ ॥ दृष्ट्वा तामिति दध्यौ स । सतीयं विश्वपावना ॥ युक्तमस्याः कृते रामः । खिद्यते
रूपसंपदः ॥ ८८ ॥ [illegible] ॥ ततस्तिरोहितो मुद्रां । रामदत्तां तदंकगां॥ स चक्रे सापि तं दृ-
ष्ट्वा । मुदोच्छ्वासमियाय च ॥ ८९ ॥ त्रिजटा तन्मुदं मत्वा । गत्वाख्यद्दशमौलये ॥ स च
मंदोदरीं तत्र । प्राहिणोद्दौत्यपंडितां ॥ ९० ॥ सीतया धिक्कृतायां द्राक्। मंदोदर्यां मरुत्सु-
तः ॥ शिंशपाद्रोरथोत्तीर्य । प्रणनामेति वाग्भरः ॥ ९१ ॥ भर्त्ता ते सानुजो मातः। कुशली

॥५१९॥

For Private And Personal Use Only

रावणांतकृत् ॥ तद्दूतोऽहं तु हनुमान् । पवनांजनयोः सुतः ॥ ९२ ॥ तिष्ठतोदंडकारण्ये ।
ह्यादेशादागमं तयोः ॥ इति श्रुत्वा जहर्षोच्चैः । सादात्तस्मै तथाशिषं ॥९३॥ हनूमदुपरोधेन ।
रामोदंतमुदा च सा ॥ एकविंशत्यहोरात्र–प्रांते पारणकं व्यधात् ॥ ९४ ॥ चूडामणिमभि-
ज्ञानं । तस्या आदाय मारुतिः ॥ चचाल देवरमणो–द्यानवृक्षान् बभंज च ॥ ९५ ॥ जघा-
न वनपालांश्चा–वधीदक्षं च रावणिं ॥ सोऽथाहिपाशैर्बध्ध्वेंद्र–जिता निन्ये नृपांतिकं ॥ ९६ ॥

अथ रावणदुर्वाक्या–त्रोटयित्वाहिबंधनं । पौलस्त्यमौलिं हनुमान् । पादघातैरचूर्णयत्
॥ ९७ ॥ अभांक्षीच्च पुरीं वेगा–दुत्प्लुत्य वियता कपिः ॥ रामाय गत्वा तं चूडा–रत्नमार्पय-
दंजसा ॥ ९८ ॥ चूडामणिमथो सीता–मिव साक्षादुपागतां ॥ आलिंग्य पावनिं प्रेम्णा । श्री
रामः समभावयत् ॥ ९९ ॥ रामाज्ञयाथ सुग्रीवा–दयः सर्वे ससंभ्रमं ॥ अताडयन् प्रयाणा-
य । तूर्याण्याजिरसादराः ॥ ४०० ॥ चेलुर्विमानैः खचरा–श्छादयंतो नभस्तलं ॥ सरामल-
क्ष्मणैर्दृष्टाः । सुग्रीवादिभिरीश्वरैः ॥ १ ॥ दशवक्त्रभटौ सेतु–समुद्रौ संगराजिरे ॥ बबंध
रामश्चिच्छेद । सीताशां रावणस्य तु ॥ २ ॥ सुवेलशैले जित्वाथ । सुवेलं नाम पार्थिवं ॥ अजै-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





षीदुपलंकं च । हंसे हंसरथं तटे ॥ ३ ॥ प्रत्यासन्नेऽथ काकुस्थे । लंका क्षोज्ञमियाय पूः ॥
रावणो नादयामास । रणतूर्याणि च क्रुधा ॥ ४ ॥ ज्ञात्वा राममथायातं । दक्षिणः स बि-
ज्ञीषणः ॥ अनुजोऽपि गुणैर्ज्येष्ठः । प्रणम्योवाच रावणं ॥ ५ ॥ अविमृश्य हृता देव । त्वया
यत्परकामिनी ॥ अन्यागताय रामाय । तां तदर्पय सत्वरं ॥ ६ ॥ एकस्यान्यकलत्रस्य । कृ-
ते राज्यमिदं कथं ॥ जहासि च परं लोक-मपि पापन्नरात्पतन् ॥ ७ ॥ समुद्रसेतुबंधेन ।
न प्रत्येषि हनूमता ॥ रामसेवककूतेन । यत्कृतं तदपि स्मर ॥ ८ ॥ क्षमा यस्येदृशी कोपे ।
नयो यस्य बलेऽप्ययं ॥ लघूत्थानोदयः सोऽयं । राघवो विजयी सदा ॥ ९ ॥ वैरिप्रशंसया
क्रुद्धो । रावणो निरवासयत् ॥ तं पुर्याः सोऽपि शरणं । प्राप रामं सुवत्सलं ॥ १० ॥ बिज्ञी-
षणमनुप्राप्तां-स्त्रिंशदक्षोहिणीज्ञटान् ॥ रक्षसां खेचराणां च । प्रीत्या स समज्ञाषत ॥ ११ ॥
बिज्ञीषणाय लंकायाः । प्रतिश्रुत्य च ज्ञूपतां ॥ कंपयन् वसुधां सैन्यैः । पद्मः पुरमवेष्टयत्
॥ १२ ॥ तदैव सन्नह्य ज्ञटा । रावणस्य बलोत्कटाः ॥ भुजास्फोटं वितन्वंतो । निर्ययुरथ को-
टिशः ॥ १३ ॥ शिलावृक्षायसैरस्त्रै-रन्योऽन्योत्क्षेपदारुणैः ॥ रामरावणसैन्यानां । रणोऽज्ञूद्वा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




रुणश्चिरं ॥ १४ ॥ शरपाषाणसंपर्क—भवो वह्निर्मृतेष्वलं ॥ रणतीर्थे दहन् वृक्षान् । संस्का-
रायाभवत्तदा ॥ १५ ॥ जायमाने तदा युद्धे । परस्परजयेच्छया ॥ उद्धतेषु भटेष्वासी—ज्जयश्री
दोलया चला ॥ १६ ॥ संदेहशंसिनि जये । रामभ्रूक्षेपनोदिताः ॥ आढौकंत रणायोच्चै—रांज-
नेयादयो भटाः ॥ १७ ॥

अथ रक्षोबले भग्ने । वीरौ हस्तप्रहस्तकौ ॥ रणायाधावतां सद्यो । धन्वपाणीरथस्थि-
तौ ॥ १८ ॥ इतश्च रामसैन्याद् द्वौ । नलनीलौ महाकपी ॥ सन्मुखीनावुदस्थाता—मयुध्ये-
तां च द्वौ तयोः ॥ १९ ॥ तेषां रथानां निर्घोषा—नसहंती वसुंधरा ॥ आरराटेव चित्का-
रात् । पुस्फोट च समंततः ॥२०॥ इतो नलकपिर्हस्तं । प्रहस्तं नीलवानरः ॥ अवधीत्पुष्पवृष्टिश्च ।
दिवोऽभूद्देवनिर्मिता ॥ २१ ॥ हस्तप्रहस्तनिधना—द्दशाननबलादथ ॥ मारीचः सिंहजघनः ।
स्वयंभुः सारणः शुकः ॥ २२ ॥ चंद्रार्कोद्दामबीभत्साः । कामाक्षो मकरो ज्वरः ॥ गंभीरः
सिंहरथश्च । रथ्या अन्येऽप्युपासरन् ॥ २३ ॥ [illegible] ॥ मदनांकुरसंताप—प्रथिताक्रोशनंदनाः
॥ दुरितानघपुष्पास्त्र—विघ्नप्रीतिकरादयः ॥ २४ ॥ वानरा योधयित्वेति । राक्षसान् जघ्नुरुच्च-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कैः ॥ ज्ञास्वानपि यथावस्तं । सैन्ये चापि निजालये ॥ २५ ॥ [redacted] ॥ विज्ञातायां विज्ञाव-
र्या—मथ रामबलं प्रति ॥ रक्षोयोधा अढौकंत । प्रेरिता रावणभ्रुवा ॥ २६ ॥ प्रोत्तस्थुरथ का-
कुत्स्थ—भटा वीररसोद्भटाः ॥ नटीमिव नर्तयंतः । करस्थां खड्गवल्लरीं ॥ २७ ॥ तिरयंतः श-
रैर्व्योम । ध्वानयंतो दिशः स्वनैः ॥ दारयंतो महीं पादैः । कंपयंतो गिरीनपि ॥२८॥ उद्वेलयं-
तः पाथोधीन् । भंजयंतो महीरुहान् ॥ उत्पतंतः पतंतश्च । भटा जघ्नुः परस्परं ॥२९॥ सु-
[redacted] ॥ अथ रावणहुंकार—प्रेरिता रजनीचराः ॥ बभंजुर्वानरभटान् । तटवृक्षानिवोर्मयः ॥३०॥

अथोत्थितं च सुग्रीवं । निवार्य हनुमान् स्वयं ॥ अभ्यगाद्धत कोपेन । वीरो राक्षसवा-
हिनीं ॥ ३१ ॥ ततो माली धनुस्तूण—माली गर्जन्महोर्जितं ॥ आक्षिप्याढौकत क्रोधा—द्यो-
द्धुं हनुमता स्वयं ॥ ३२ ॥ मिथोऽस्त्रैरस्त्रसंघातं । छेदयंतौ महाभटौ ॥ अभूतां विश्वदुःप्रेक्ष्यौ
। प्रलयार्काविवोद्यतौ ॥ ३३ ॥ श्रीशैलो मालिनं चक्रे । निरस्त्रं हस्तलाघवात् ॥ यावत्तावद्र-
णायागा—द्रक्षो वज्रोदरः स्फुरन् ॥ ३४ ॥ स बूत्कारैर्बधिरय—न्नाशाः पवननंदनः ॥ तिरया-
मास तं बाणैः । प्रावृट्काल इवाचलं ॥ ३५ ॥ अहो वीराविमौ घोरौ । परस्परमबाधया ॥

For Private And Personal Use Only

इति लोकगिरोऽसोढा । तं जघान मरुत्सुतः ॥ ३६ ॥ वज्रोदरवधक्रुद्धो । रावणिर्जंबुमाल्यथ
॥ आह्वास्त मारुतिं तर्जन् । ववले सोऽपि सन्मुखः ॥ ३७ ॥ हनुमानथ तं कृत्वा । विरथ्य-
रथसारथिं ॥ मुद्गरेण न्यहन्मूर्ध्नि । लकुटेनेव मूढकं ॥ ३८ ॥ जंबुमालिन्यथो मूर्छा-विधुरे
ऽगमहोदरः ॥ रक्षोवीराः परेऽप्युच्चै-र्हनुमंतं दधाविरे ॥ ३९ ॥ चिक्षेप कांश्चिद्वदने । दोष्णोः
कांश्चित्परान् हृदि ॥ कुक्षौ कांश्चित् शरैः कांश्चि-ज्जघान पवनात्मजः ॥ ४० ॥ कुंभकर्णोऽथ
सेनाया-मर्दनमसहो द्रुतं ॥ शूलपाणिः करालास्यो । दधावे द्रुमभंगकृत् ॥ ४१ ॥ सर्वतो-
ऽपि कपीन् घ्नंतं । तं दृष्ट्वा समधावत ॥ कुमुदांगदमाहेंद्र-युतः सुग्रीवभूपतिः ॥ ४२ ॥ भा-
मंडलमुखाश्चान्ये । वर्षंतोऽस्त्राणि भूरिशः ॥ कुंभकर्णोऽस्तस्वाप-शस्त्रान्निद्रामयुः क्षणात् ॥
॥ ४३ ॥ विद्ययाथ प्रबोधिन्या । गतनिद्रं निजं बलं ॥ कृत्वाभांक्षीद्रथं रथ्यान् । सुग्रीवो
गदया रिपोः ॥ ४४ ॥ कुंभकर्णोऽपि रोषेण । समुद्गरकरः स्फुरन् ॥ सुग्रीवरथमहत्या-चू-
र्णयज्जीर्णभांडवत् ॥ ४५ ॥ सुग्रीवोत्क्षिप्तशैलांत-कारिमुद्गरघाततः ॥ कुंभकर्णोऽपतत्पृथ्व्यां ।
तद्भृतशस्त्रनिपीडितः ॥ ४६ ॥ मूर्छिते भ्रातरि क्रुद्धं । निषिध्य दशकंधरं ॥ इंद्रजित्प्रविवे-

शोच्चैः । कपिसैन्यमुपद्रवन् ॥ ४७ ॥ दर्पायमाणं सुग्रीवो । युद्धायाह्वास्त तं क्रुधा ॥ भामं-
डलस्तत्कनिष्टं । मेघवाहनमुच्चकैः ॥ ४८ ॥ चत्वारोऽपि महावीरा । आस्फलंतः परस्परं ।
वसुधार्णवदिक्कुंभि–गिरिक्षोभाय तेऽभवन् ॥ ४९ ॥ बबंधतुर्नागपाशै–रिंद्रजिन्मेघवाहनौ ॥
क्रुद्धौ कपीशं सुग्रीवं । भामंडलमुदायुधौ ॥ ५० ॥ इतश्च लब्धसंज्ञः सन् । कुंभकर्णोऽनि-
लांगजं ॥ निहत्य गदया कक्षा–कोटरेऽक्षिपदंशलः ॥ ५१ ॥ अथो विभीषणो राम–मानम्य
स्यंदनस्थितः ॥ अधावत मोचयितुं । भामंडलकपीश्वरौ ॥ ५३ ॥ अनेन पितृतुल्येन । सार्द्धं
योद्धुं न युज्यते ॥ विमृश्येतींद्रजिन्मेघ–वाहनौ नेशतूरणात् ॥ ५४ ॥

इतः पूर्वप्रतिपन्न–वरस्तार्क्ष्यामरः क्षणात् ॥ रामस्मृतिमभिज्ञाया–वधिना तत्र चाय-
यौ ॥ ५५ ॥ रामाय सिंहनिनदां विद्यां च स्यंदनं हलं ॥ मूशलं लक्ष्मणायाथ । ददौ विद्यां
स गारुडीं ॥ ५६ ॥ गदां च विद्युद्वदनां । समरे रिपुनाशिनीं ॥ दत्वा पराणि चास्त्राणि ।
स सुपर्वा तिरोदधे ॥ ५७ ॥ **युग्मं** ॥ सौमित्रेर्वाहनीभूत–गरुडस्य विलोकनात् ॥ सुग्रीवभा-
मंडलयोः । प्रणेशुः पाशपन्नगाः ॥ ५८ ॥ अथो जयजयारावो । जज्ञे रामबलेऽखिले ॥ म्ला-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

नं रक्षोबलमन्नू–ध्ययौ चास्तं दिवाकरः ॥ ५ए ॥ इतः प्रातः पुना रक्षो–वीरैर्न्नग्ने निजे ब-
ले ॥ सुग्रीवाद्या महावीरा । बन्नंजू रजनीचरान् ॥ ६० ॥ रक्षोन्नंगादथ क्रुद्धो । दधावे रा-
वणः स्वयं ॥ इंद्रजित्कुंन्नकर्णाद्या । अपि सर्वे महौजसः ॥ ६१ ॥ तद्रणायोद्यतं रामं । प्रति-
षिद्ध्य बिन्नीषणः ॥ रुरोध रावणं प्रीत्या । बोधयामास चेत्यपि ॥ ६२ ॥ अद्यापि बंधो म-
न्यस्व । मद्वचो मुंच जानकीं ॥ कृतांत इव रामोऽय–मागतस्त्वत्कुलांतकृत् ॥ ६३ ॥ ऊचे-
ऽथ दशकंठोऽपि । वनेचरमनुश्रितः ॥ त्वध्यमानमद्य किं रे । मां च न्नापयसे ततः ॥ ६४ ॥
इत्यास्फाल्य धनुः काम–मुन्नौ तौ वीरकुंजरौ ॥ वर्षंतौ शस्त्रसंघात–मारेन्नाते महारणं ॥
॥ ६५ ॥ रामोऽरौत्सीत् कुंन्नकर्णं । लक्ष्मणो रावणं पुनः ॥ नीलस्तु सिंहजघनं । दुर्मद-
स्तु घटोदरं ॥ ६६ ॥ स्वयंभुं दुर्मतिः शंभुं । नलवीरोंगदो मयं ॥ स्कंदः पुनश्चंद्रणखं । वि-
घ्नं चंडोदरात्मजः ॥ ६७ ॥ युग्मं ॥ इत्येवं कपिन्निः सार्धं । राक्षसीये रणे सति ॥ इंद्रजि-
न्नामसं शस्त्रं । लक्ष्मणायामुचत्क्रुधा ॥ ६८ ॥ तदस्त्रं तपनास्त्रेण । सौमित्रिर्विरवासयत् ॥ तं
बध्ध्वा चाहिपाशेना–नैषीत्स्वशिबिरं द्रुतं ॥ ६ए ॥ नागैर्बध्ध्वा कुंन्नकर्णं । रामोऽपि कटके नि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





जं ॥ प्रैषीद्रक्षांसि चान्यानि । रामवीरैर्वैबंधिरे ॥ ७० ॥ तद् दृष्ट्वा रावणः क्रुद्धो । विभीष-
णवधोद्यतः ॥ शूलं चिक्षेप सौमित्रि–श्चिच्छेद त्वंतरा शरैः ॥ ७१ ॥ धरणेंद्रप्रदत्तां तां । शक्ति-
मादाय रावणः ॥ धगद्धगितिकुर्वाणां । व्योमन्यभ्रमयद्रुषा ॥ ७२ ॥ सौमित्रिरथ विज्ञाय ।
भावं रामस्य सत्वरः ॥ अस्थाद्विभीषणस्याग्रे । रावणं चाक्षिपद्भृशं ॥ ७३ ॥ रावणस्तं गरु-
डस्थं । दृष्ट्वा कोपारुणेक्षणः ॥ मुमोच शक्तिं कल्पांता–शनिकल्पामनल्पभां ॥ ७४ ॥ श-
स्त्रौघानप्यवज्ञाय । लक्ष्मणोरसि सापतत् ॥ मूर्छया लक्ष्मणोऽप्युर्व्यां । शोकस्तच्छिबिरे तथा
॥ ७५ ॥ रघूद्वहोऽथ संक्रुद्धः । पंचाननरथस्थितः ॥ रावणं योद्धुमारेभे । पंचानन इव द्विपं
॥ ७६ ॥ बभंज रावणरथान् । काकुत्स्थः पंच सत्वरं ॥ तद्वीर्यमसहिष्णुश्च । रावणः स्वपु-
रं ययौ ॥ ७७ ॥ रामो लक्ष्मणमभ्येत्य । गतस्तावस्तमीयुषि ॥ तं च दृष्ट्वा तथावस्थं ।
मूर्छितेऽवददित्यथ ॥ ७८ ॥ अहत्वा वैरिसंघात–मदत्वा जानकीं मम ॥ असंपाद्य स्वयं दत्तं
लंकाराज्यं विभीषणे ॥ ७९ ॥ राममेकाकिनं शत्रु–वेष्टितं कुल्यवर्जितं ॥ मा मुंचात्र न ते
दोषो । मम जीवाम्यतोऽपि यत् ॥ ८० ॥ सुग्रीव साधि नः कृत्यं । हनुमन्नग्रतो भव ॥ चं-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्राशे भवोत्साही । भव भामंडलोद्यमी ॥ ८१ ॥ मामकीनो न कोऽप्यत्र । सज्जं यः कुरु-
तेऽनुजं ॥ एवं शून्यं मन्यमानो । रामोऽमूर्छद्विलापवान् ॥ ८२ ॥ [redacted] ॥ विभीषणो ज-
गादाथ । भज धैर्यं विभो यतः ॥ शक्त्याहतः पुमान् रात्रिं । जीवत्यत्रोद्यमं कुरु ॥ ८३ ॥
आमेति राघवेणोक्ते । सुग्रीवाद्यास्तु विद्यया ॥ सप्तवप्रांश्चतुर्द्वारान् । राघवोपरितो व्यधुः ॥
॥ ८४ ॥ सुग्रीवांगदचंद्रांशु–भामंडलमुखाः खगाः ॥ तस्थुः संवेष्ट्य तं वप्रं । स्वामिदुःखेन
दुःखिताः ॥ ८५ ॥ मित्रं भामंडलस्याथ । भानुर्विद्याधराग्रणीः ॥ हितकांक्षी समागत्य ।
रामं व्याचष्ट भक्तितः ॥ ८६ ॥ अयोध्यातो द्वादशभि–र्योजनैरस्ति पत्तनं ॥ पालितं द्रोणभू-
पेन । कलं कौतुकमंगलं ॥ ८७ ॥ कैकेयीसोदरस्यात्र । विशल्या नामतः सुता ॥ अस्ति त-
स्याः करस्पर्शा–च्छल्यं याति शरीरतः ॥ ८८ ॥ दिननाथोदयादर्वाक् । सा चेदानीयते वि-
भो ॥ तदयं लक्ष्मणः सज्जो । सशल्यान् कुरुते रिपून् ॥ ८९ ॥

तत् श्रुत्वा प्रीतिभृद्रामो–ऽङ्गदं भामंडलं तथा ॥ पावनिं च समादिक्ष–द्भरतंप्रति सत्वरं ॥
९० ॥ गत्वायोध्यां विमानेन । प्रबोध्य भरतं च ते ॥ सर्वं वृत्तांतमाचख्युः । सीताहरणपूर्व-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




कं ॥ ९१ ॥ स्वामिकार्योद्यतस्तान्यां । विमानमधिरुह्य सः ॥ तत्रागमद् द्रोणघनं । विश-
ल्यां चाप्ययाचत ॥ ९२ ॥ युक्तां कन्यासहस्रेण । तां ददौ द्रोणराडथ ॥ अयोध्यामुक्तभर-
तो । रामं भामंडलो ययौ ॥ ९३ ॥ विशल्याकांतिसंतान-भानूदयविशंकिनः ॥ निजाः स्थि-
रीकृताः कार्य-वादिना तु हनूमता ॥ ९४ ॥ विशल्यापाणिसंस्पर्शा-दुत्पतंती विहायसा ॥
उत्प्लुत्य पाणिनादायि । शक्तिर्हनुमता क्षणात् ॥ ९५ ॥ साप्यूचे देवतारूपा । दोषो भृ-
त्यत्वतो न मे ॥ विशल्याप्राग्भवतपः-प्रभावाद्यामि मुंच तत् ॥ ९६ ॥ प्रज्ञप्तिभगिनीश-
क्तिः । सा मुक्ताथ हनूमता ॥ उत्पत्य प्रययौ व्योम्नि । लिम्पतीव निजागसा ॥ ९७ ॥ प्रज्ञ-
प्तिस्नानपयसा । सिक्तो रामानुजः पुनः ॥ रूढव्रणपदः सुप्तो-त्थितवत्सहसोत्थितः ॥ ९८ ॥
आलिंग्य रामभद्रस्तं । तद्वृत्तांतं निवेद्य च ॥ कन्यासहस्रसहितां ॥ विशल्यामुदवाहयत् ॥
॥ ९९ ॥ तस्याः स्नानांबुनान्येऽपि । रूढव्रणपदा भटाः ॥ विद्याधरैः समं चक्रु-रुत्सवं प-
रमं मुदा ॥ ५०० ॥ रावणोऽथ चरात् श्रुत्वा । जीवितं लक्ष्मणं तदा ॥ विद्याया बहुरूपा-
या । हृदि निर्णीतवान् वधं ॥ १ ॥ कृत्वा चाष्टविधां पूजां । श्रीशांतेः षोडशार्हतः ॥ तां सा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धयितुमारेने । विद्यां लंकाधिपोऽचलः ॥ २ ॥ मंदोदर्या निदेशेन । सर्वोऽप्यष्टाह्निकावधि ॥
पुरीजनो जैनधर्म–रतश्चासीत्समंततः ॥ ३ ॥ सिद्धविद्योऽथ पौलस्त्यः । प्रातः सैन्यैः सम-
न्वितः ॥ रणाजिरमगाद्भंग–इकोन्नरघटोत्कटः ॥ ४ ॥ भूयः प्रववृते युद्धं । सैन्ययोरतिदारुणं
॥ पतत्सुभटकोट्यंग–क्षोणीस्खलितस्यंदनं ॥ ५ ॥ विधूयान्यानि रक्षांसि । लक्ष्मणोऽथ म-
हाबलः ॥ विशिखैस्ताडयामास । दशग्रीवमनारतं ॥६॥ तैराकुलो दशग्रीवो । विद्ययाथ त-
या क्षणात् ॥ विचक्रे स्वानि रूपाणि । भैरवाणि बहून्यपि ॥ ७ ॥ भूमौ नभसि पृष्टेऽग्रे ।
पार्श्वयोरपि लक्ष्मणः ॥ अपश्यद्रावणानेव । विविधायुधवर्षिणः ॥ ८ ॥ एकोऽप्यनेकीभूयेव ।
तार्क्ष्यस्थः सोऽपि तान् बलीन् ॥ जघान बाणधाराभिः । शरभ्रानिव वारिदः ॥ ९ ॥ तैः
शरैरथ पौलस्त्यो । विधुरश्चक्रमस्मरत् ॥ आजगामार्धचक्रित्व–जीववत्तज्ज्वलभृशं ॥ १० ॥
तद्भ्रा भ्रामयित्वा स । मुमोचारुणलोचनः ॥ तत्तु प्रदक्षिणीभूय । सौमित्रेः करमागमत् ॥
॥ ११ ॥ नारायणोऽपि तेनैव । चक्रेण दशकंधरं ॥ वक्षस्यताडयच्छैल–मिवेंद्रः पविना पृथुं ॥
॥१२॥ तदा च ज्येष्टकृष्णैका–दश्यामह्नश्च पश्चिमे ॥ यामे मृतो दशग्रीव–श्चतुर्थं नरकं ययौ



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥१३॥ तदा जयजयेत्युच्चै–र्व्याहरंतो दिवौकसः ॥ वितेनुः सुमनोवृष्टिं । प्रीत्या नारायणोपरि ॥
१४ ॥ बिभीषणोऽथ स्नेहेन । कांदिशिकान्निशाचरान् ॥ स्वस्थीचक्रे स्वजाते हि । प्रतिपन्नं
सदा स्थिरं ॥ १५ ॥ कुंभकर्णेंद्रजिन्मेघ–वाहनाद्या निशाचराः ॥ रामेण मुक्ताः पौलस्त्य–
प्रेतकर्माणि चक्रिरे ॥ १६ ॥ कुंभकर्णेंद्रजिन्मेघ–नादा मंदोदरी तथा ॥ अप्रमेयबलस्यर्षेः ।
समीपे प्राव्रजंस्तदा ॥ १७ ॥ निष्कलंकामथो सीता–मादाय रघुपुंगवः ॥ बिभीषणोक्तमार्गे-
ण । पुरीं प्राविशदुत्सवैः ॥ १८ ॥ बिभीषणाय लंकाया । दत्वा राज्यं रघूद्वहः ॥ षडब्दीं त-
त्र च स्थित्वा । मातृवर्गोत्सुकोऽभवत् ॥ १९ ॥ अत्रांतरे विंध्यस्थल्या–मिंद्रजिन्मेघवाहनौ
॥ तौ सिद्धिमीयतुर्जज्ञे । तीर्थं मेघरथं च तत् ॥ २० ॥ नर्मदायां कुंभकर्णो । नद्यां सिद्धि-
मियाय च ॥ पृथुरक्षितमित्यासी–त्तत्तीर्थं चाभिधानतः ॥ २१ ॥ तथा सुदिवसे रामः । सी-
तालक्ष्मणसंयुतः ॥ सुग्रीवाद्यैरनुगतः । पुष्पकयानमाश्रितः ॥ २२ ॥ पश्यन् पदे पदेऽप्युच्चै–
राश्चर्याणि महीतले ॥ क्रमादवाप साकेत–मुच्चकेतुकुलाकुलं ॥ २३ ॥ [illegible] ॥ भरतोऽथ ग-
जारूढः । प्रौढोत्सवपुरस्सरं ॥ ननाम रामचरणान् । समं शत्रुघ्नबंधुना ॥ २४ ॥ बंधू आलिं-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ग्य पद्मोऽपि । विनयाल्लक्ष्मणोऽपि च॥ वर्धाप्यमानो वृद्धाभिः। पुरीं प्राविशतां मुदा ॥२५॥
रामोऽपराजितामुख्यं । मातृवर्गमथाखिलं ॥ प्रणनामानुसौमित्रि-रप्यानंदैककारणं ॥ २६ ॥
भरतो रामपादानां । राज्यं न्यासमिव स्वयं ॥ पुनः प्रत्यर्पयद्धृष्ठ । इवास्थाभक्तिमोहितः ॥
॥ २७ ॥ अन्यदा भरतो देश-भूषणस्य मुनेः पुरः ॥ श्रुत्वा पूर्वभवान् स्वस्य । व्रतं जग्राह
भावतः ॥ २८ ॥ इतः शत्रुंजयस्याद्रे-र्महिमानं निशम्य सः ॥ समं मुनिसहस्रेण । चचा-
ल पथि यत्नतः ॥ २९ ॥ सोऽत्र शत्रुंजयं प्राप्य । नत्वा च वृषभप्रभुं ॥ तत्प्रभावं स्मरंश्चि-
त्ते । ध्यानांतरमशिश्रियत् ॥ ३० ॥ प्रक्षीणाशेषकर्मा सन् । केवलज्ञानमाप्य च ॥ भरतो
मुनिभिः सार्द्धं । पदमव्ययमासदत् ॥ ३१ ॥ तत्र सौमित्रिरामाभ्यां । यात्रोत्सवध्वजादिकं ॥
व्यधायि पुण्यं तत्तीर्थो-द्घोषणा च मुहुर्मुहुः ॥ ३२ ॥ सीतापवादं निर्वास्य । वेहरव्ददनिदर्श-
नात् ॥ आत्तव्रता तपस्तप्त्वा । च्युतेंद्रः समजायत ॥ ३३ ॥ श्रीशैलोऽपि निजं राज्यं । पु-
त्रेऽध्यास्य विरागवान् ॥ पालयित्वा चिरं दीक्षां । जगाम पदमव्ययं ॥ ३४ ॥ भ्रातृस्नेहपरी-
क्षार्थं । प्राप्तयोः सुरयोर्गिरा ॥ रामांतोक्त्या शोकशल्यात् । सौमित्रिः प्राप पंचतां ॥ ३५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत् श्रुत्वा रामतनयौ । विरागौ लवणांकुशौ ॥ आदाय दीक्षां क्रमतः । प्रापतुः शिवसंपदं ॥ ३६ ॥ जटायुसुरसंबोधात् । सौमित्रेर्मृतकर्म च ॥ विधायानंगदेवाय । ददौ राज्यं रघूद्वहः ॥ ३७ ॥ स्वयं शत्रुघ्नसुग्रीव–विन्नीषणमुखैरपि ॥ राज्ञां षोमशसहस्रैः । समं दीक्षामुपाददे ॥ ३८ ॥ नानान्निग्रहवान् राम–मुनिः सर्वत्र संचरन् ॥ प्राप्य कोटिशिलां ध्यानाद् । ज्ञानं केवलमासदत् ॥ ३९ ॥ विहृत्य तीर्थेषु स पुंडरीक–मुख्येषु विस्तार्य च तत्प्रन्नावं ॥ समाः सहस्राणि दशापि पंच । प्रपाजितायुः शिवमाप रामः ॥ ४० ॥ शत्रुंजयाऽशविति तत्र काले । ययुः शिवं श्रीन्नरतादिन्नूपाः ॥ अतोऽधिकं तीर्थमिदं सुसेव्य–मव्याहतं मुक्तिनिबंधनं यत् ॥ ४१ ॥ इत्यानंदकरं सुतीर्थमहिमप्रोद्भासिपुण्योत्करं । श्रीमान् वीरजिनोऽन्निवृष्य जनताक्षेत्रेषु सद्भाग्न्नरं ॥ चक्रेऽनध्ययनं तदुन्नमकृतेऽध्यारोपयन् पुष्करा–वर्त्तान्नोद इवांबु कंबुविशदप्रोद्दामकीर्त्तिप्रदं ॥ ४२ ॥

इत्याचार्यश्रीधनेश्वरसूरिविरचिते श्रीमन्महातीर्थशत्रुंजयमाहात्म्ये श्रीरामप्रन्नृतिमहापुरुषचरितवर्णनो



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाम नवमः सर्गः समाप्तः

॥ श्रीरस्तु. ॥

॥ इति श्रीशत्रुंजयमाहात्म्ये प्रथमखंडः समाप्तः ॥

॥ अथ श्रीरैवताद्रेर्माहात्म्यं ॥

॥ दशमः सर्गः प्रारभ्यते ॥

गिरिनारगिरेर्मौलौ । नत्वा ये नेमिनं जिनं ॥ पातकं क्षालयंति स्वं । धन्यास्ते धृतसं-
मदाः ॥ १ ॥ सर्वज्ञः सर्वदर्शी सकलसुखकरः सर्वसंतापहर्त्ता । पूज्यः सर्वेश्वराणामनणुगु-
णयुतः कर्मसाक्षीव भास्वान् ॥ सोमः पंचेषुवैरी नरकविमथनो योगिभिर्ध्येयमूर्त्ति—र्योऽनंतो-
ऽव्यक्तरूपो न निधनकलितो वीतरागः स पातु ॥ १ ॥ इतश्च त्रिदशाधीशः । प्रणिपत्य जि-
नेश्वरं ॥ महावीरं महाभक्त्या । व्यजिज्ञपदिदं पुनः ॥ २ ॥ स्वामिन्नस्मत्समुद्धार—कृते शत्रुं-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जयप्रथा ॥ मुख्यशृंगस्य याख्यायि । तेन जातोऽस्मि पावनः ॥ ३ ॥ पुनरष्टोत्तरशतं । शृं-
गाणामस्य भूभृतः ॥ यदवादीस्तदंतस्तु । प्रोत्तमान्येकविंशतिः ॥ ४ ॥ स्वामिंस्तेष्वपि य-
स्यास्ति । शृंगस्य महिमाधिकः ॥ तमहं श्रोतुमिच्छामि । पावनायाखिलांगिनां ॥ ५ ॥ येन
श्रुतेनापि भवेत् । सर्वपापपरिक्षयः ॥ प्रसद्य महिमानं तं । समादिश जगद्विभो ॥ ६ ॥ अ-
वधार्येति शक्रस्य । वचनं त्रिजगद्गुरुः ॥ कृपया सर्वजंतूनां । प्रारेभे वक्तुमप्यदः ॥ ७ ॥ शृणु
शक्र महान् योऽसौ । गिरीशो रैवताभिधः ॥ सिद्धाद्रेः पंचमं शृंगं । पंचमज्ञानदायकं ॥ ८ ॥
समग्रक्षितिभृत्सेव्यः । समग्रक्षितिभृत्पतिः ॥ आश्रितक्षतिहर्त्तासौ । जयी रैवतपर्वतः ॥ ९ ॥
यश्चानेकतमः स्तोम–तिरस्कारविभाकरः ॥ अदोषाकरकृद्विश्वे । कमलोल्लासभासुरः ॥ १० ॥
यत्र दानानि दत्तानि । भक्त्योचितदयादिभिः ॥ ददते सर्वसौख्यानि । भवद्वयहितानि च ॥
॥ ११ ॥ भवभ्रमणसंभूत–पापपिंडो गलत्यपि ॥ दिप्तपुण्यांशुना यत्र । नवनीतमिव क्षणात्
॥ १२ ॥ असकृत्कृतसत्कृत्यैः । कृतिभिः क्रियते पथि ॥ नेत्रयोरेष गिरिराट् । रैवतः सर्वदैव-
तः ॥ १३ ॥ चमरीभिश्चामरीभि–र्वीज्यते व्यजनैस्तु यः ॥ सर्वदा सर्वदः सर्व–पर्वतप्राभवा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिव ॥ १४ ॥ आपल्लवस्तरुष्वेव । दरीष्वेव तमोजरः ॥ सरस्यामेव जडता । दुर्वर्णं यत्र धातुषु ॥ १५ ॥ अहिष्वेव द्विजिह्वत्वं । जडेषु कुमुदाकरः ॥ काठिन्यं च दृषत्स्वेव । यत्रोग्रत्वं तपस्यलं ॥ १६ ॥ चापल्यं च लतास्वेव । पक्षिष्वेव सपक्षता ॥ प्रदोषे रजनीवक्त्रे । यत्रैनस्यैव भीः सदा ॥ १७ ॥ मुक्ताहाराः शुभाचारा । हतमारा मनोहराः ॥ नमंति नेमिनं नित्यं । मुनयो यत्र चामराः ॥ १८ ॥ अमानध्यानसंम्लान–मानोद्यद्ज्ञानशालिनः ॥ ध्यायंति यत्र मुनयो । महदर्हन्महः क्वचित् ॥ १९ ॥ पवित्रपवनाहारा । व्रजंतो विषमाध्वनि ॥ किंचिद्दृष्टपदोपास्या । यत्रान्यत्र च योगिनः ॥ २० ॥ अप्सरोगणगंधर्व–सिद्धविद्याधरोरगैः ॥ सेव्यतेऽत्र जिनो नेमिः । सर्वदा विशदाशयैः ॥ २१ ॥ मार्जारमूषकौ सिंह–वारणावहिबर्हिणौ ॥ प्रशांतवैरा वर्त्तंते । पवित्रे यत्र पर्वते ॥ २२ ॥ मणीनां भाभिरेवात्र । विनापि शशिभास्करौ ॥ अतमःस्तोमसंचाराः । प्रदेशा निखिला अपि ॥ २३ ॥ प्रत्यासन्नोदयमिषा–द्यत्र सर्वेऽपि ते ग्रहाः ॥ आराद्धुमिव नेमीशं । कुर्वते प्रत्यहं भ्रमिं ॥ २४ ॥ ऋतवो यत्र वर्त्तंते । परित्यक्तनिजक्रमाः ॥ एकैकस्पर्द्धया नेमिं । नंतुं नित्यमिवाकुलाः ॥ २५ ॥ शशिकांतकरस्प-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्शी—ज्ञशिकांतगलज्जलैः ॥ यत्र सद्यो महानद्यो । वरोल्लासिहृदा बभुः ॥२६॥ ज्ञानुज्ञानुज्जरो-
ल्लासि—ज्ञानूपलसमुन्नवैः ॥ जज्वाल ज्वलनैर्यत्र । जंतुः कर्मेंधनं घनं ॥ २७ ॥ कीचकैः कि-
किन्नरीगीतै—र्झरन्निर्झरझात्कृतैः ॥ तूर्यत्रिकं स्वयंजूतं । सेवते स ततं तु यं ॥ २८ ॥ परित-
श्चतुरश्चारू—श्चतुर्दिक्षु महाचलान् ॥ चतुर्गतिजवं डुःखं । रक्षितुं चतुरो दधौ ॥ २९ ॥ नल्ला-
सिस्वछसलिल—लूनपापमहापदः ॥ यत्र ज्ञांति महानद्य—श्चतस्रस्तु चतुर्दिशं ॥ ३० ॥ गजेंड्-
पदमुख्यानि । यत्र कुंमानि रेजिरे ॥ अमरैरमरत्वाया—ऽमृतैरिव ज्ञृतान्यलं ॥ ३१ ॥ व्यधुरे-
त्य स्वयं यत्र । निवासं कल्पपादपाः ॥ अन्यस्तुं मोक्षदानं तु । हंतुं डुःखं च देहिनां ॥ ३२ ॥
सुवर्णसिद्धिकारिण्यः । सर्वेप्सितफलप्रदाः ॥ यत्र संति न चेक्ष्यंते । निःपुण्यै रसकूपिकाः ॥
॥ ३३ ॥ क्षिणंति क्षणतो यत्र । पवित्रपयसां ज्ञरैः ॥ सरांसि च महैनांसि । शर्मौकांसि श-
रीरिणां ॥ ३४ ॥ कमलोदयदंज्ञेन । कमलोदयदायिनः ॥ कमलोदयतो हृद्या । हृदा यत्र मु-
दास्पदं ॥ ३५॥ राजहंसपदोपास्या । राजहंसपदप्रदाः ॥ राजहंसपदप्राप्ति—प्रकाशिकुमुदांबुजाः ॥ ५३७॥
॥ ३६ ॥ युग्मं ॥ स्मृतोऽयं कुरुते शर्म । दृष्टः कष्टजरं हरेत् ॥ स्पृष्टस्त्विष्टं च सिद्ध्यादेः । शं-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गं यच्छति रैवतः ॥ ३७ ॥ श्रीमान्नेमिजिनोऽयं तु । समाश्रयति सर्वदा ॥ मुक्त्वान्यच्छृंगमृद्धि-
षयो । वर्ण्यते स कथं बहु ॥ ३८ ॥ यथा दानानि दीयंते । तप्यंतेऽथ तपांसि च ॥ शत्रुंज-
यमुख्यशृंगे । तथात्रापि सुखाप्तये ॥ ३९ ॥ समुद्रसिकतासंख्या-रसना वाक्पतिर्वदन् ॥
यदीयं न गुणग्रामं । वक्तुमीशो जनातिगं ॥ ४० ॥ तस्यैव चरितं शक्र । शृणु त्वभृदधी-
शितुः ॥ चित्रं पवित्रं कष्टघ्नं । लवित्रं सर्वकर्मणां ॥ ४१ ॥ पुरा मार्तंडकल्पस्य । मार्तंडस्त्रि-
दशाग्रणीः ॥ चैत्र्यां शत्रुंजययात्रां । कृत्वा सुरगुणैर्वृतः ॥ ४२ ॥ वैशाख्यां पूर्णिमायां तु
। नंतु नेमिनमादरात् ॥ रैवते गिरिनाथेऽस्मिन् । विशुद्धात्मा समागमत् ॥ ४३ ॥ युग्मं ॥
नीत्वा पयांसि कुंभेभ्यो । नदीभ्यश्च सरोगणात् ॥ जिनं स्नात्वार्चयित्वा च । स प्रासादाद्ब-
हिर्ययौ ॥ ४४ ॥ तत्र कोऽपि समागत्य । सुरः शक्रमुवाच च ॥ स्वामिन् ज्ञानशिलासीनो
। मुनिः कश्चित्प्रवर्त्तते ॥ ४५ ॥ मुनिभिः सेवितो लक्षै-र्यक्षैश्च क्षमया युतः ॥ कुर्वन्नस्ति त-
पस्तीव्रं । सर्वाघध्वंसिमूर्त्तिभाक् ॥ ४६ ॥ श्रुत्वेति च समुत्थाय । नमन् शक्रो जिनाधिपं ॥
एत्य ज्ञानशिलां नत्वा । मुनिं तं च पुरोऽविशत् ॥ ४७ ॥ निविष्टं तत्र मार्तंडं । देवाः सर्वे



For Private And Personal Use Only

व्यजिज्ञपन् ॥ स्वामिन् कोऽयं मुनिः कुर्या–त्किमुदग्रं तपस्तरां ॥ ४८ ॥ ततः शक्रोऽप्यव-
धिना । तस्य ज्ञात्वा विचेष्टितं ॥ प्रोवाच देवान् शृणुतै–तच्चरित्रं महाद्भुतं ॥ ४९ ॥
जंबूद्वीपेऽत्रभरते । श्रावस्त्यस्ति पुरी वरा ॥ तत्राभूद्वज्रसेनाख्यो । भूपतिर्भूरिभाग्य-
भृत् ॥ ५० ॥ जिनार्चनपरो नित्यं । जनतारंजनव्रतः ॥ सर्वैर्गुणैरतिश्रेष्ठो । ज्येष्ठोऽभूत्स च
राजसु ॥ ५१ ॥ सुभद्राकुक्षिजस्तस्या–भवदेष तनूरुहः ॥ भीमसेनाभिधो भीमो । द्यूतादि-
व्यसनी सदा ॥ ५२ ॥ अन्यायैकगृहं शश्व–ल्लोकसंतापकारकः ॥ गुरुं दवांश्च पितरौ । द्विष-
न् सोऽभूत्कुलक्षणः ॥ ५३ ॥ प्रादात्पिता क्रमेणाथ । भीमसेनस्य तादृशः ॥ यौवराज्यपदं
राज्य–पदादपि मनोहरं ॥ ५४ ॥ स लब्धयौवराज्यश्री–रन्यायैकनिकतनं ॥ परस्त्रियं परद्रव्यं
। हरन् पीडयति प्रजाः ॥ ५५ ॥ अन्यदा सकलैर्लोकै–र्वज्रसेनो महीपतिः ॥ समेत्य भीम-
दुर्नीति–दूनैर्विज्ञप्त इत्यपि ॥ ५६ ॥ राजसूनोर्न चैतस्य । विज्ञप्तो युज्यते विभो ॥ तथापि
चेतसि किय–दुःखं स्थापयितुं क्षमाः ॥ ५७ ॥ आकंठमस्य दुर्न्यायैः । संभृताः स्मो मही-
पते ॥ तद्विमृश्य प्रजापाल । यथोचितमुपाचर ॥ ५८ ॥ श्रुत्वा राजेति तं लोकं । सांत्वयि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





त्वातिसामग्रीः ॥ दत्वा किंचित्प्रसादं च । पुनः प्रैषीन्निजालयान् ॥ ५९ ॥ कुमारं तं समाहूय । राजा शिक्षामदादिति ॥ लोकाराधनवान् वत्स । यशोऽर्जय सुकुलजं ॥ ६० ॥ न परस्त्रीपरद्रव्या—पहारः क्रियते नृपैः ॥ पित्रोर्गुरौ जिने भक्तिः । सचिवोक्तिश्च चिंत्यते ॥ ६१ ॥ स्वीकार्यः सर्वथा न्यायो । त्याज्योऽन्यायोऽतिदूरतः ॥ वाक्प्रतिष्ठा धृतिर्धर्म्या । सप्तव्यसनमुक्ता ॥ ६२ ॥ अयमेव परो धर्मः । प्रायः पृथ्वीभृतामपि ॥ समाश्रितः श्रियं कीर्तिं । यशः स्वर्गं प्रयच्छति ॥ ६३ ॥ राज्ञानुवेलमित्येष । शिक्षितोऽपि न सोऽत्यजत् ॥ दुर्वृत्तं वा विषं सर्पो—ऽमृतपानं भजन्नपि ॥ ६४ ॥ अशक्याविनयत्राणं । तं परिज्ञाय भूपतिः ॥ चिक्षेप निगडे सूनुं । प्रसूनतनुमार्दवं ॥ ६५ ॥ निगडस्थः कियत्काले । विलोक्यावसरं कुधीः ॥ जघान पितरौ मंत्रा—न्मित्राणां समशीलिनां ॥ ६६ ॥ भीमसेनोऽथ राज्यस्थः । कुमित्रपरिवारितः ॥ मद्यादिव्यसनी लोकान् । पीडयामास नित्यशः ॥ ६७ ॥

इतश्च सचिवैः सर्वैः । सामंतैः सपरिग्रहैः ॥ आलोच्य धृत्वा पापी स । देशान्निष्कासितः क्षणात् ॥ ६८ ॥ राज्ये तस्यानुजं सर्व—शास्त्रन्यायविशारदं ॥ सुमुहूर्तेऽभ्यषिंचंस्ते । स-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चिवा जिनवल्लभं ॥ ६९ ॥ भीमसेनोऽन्यदेशेषु । देशान्निष्कासितो व्रजन् ॥ चौर्यं चकार सर्वत्र । व्यसनं खलु दुस्त्यजं ॥ ७० ॥ जघान पथि पाथेय—कृतेऽसौ पथिकान् घनं ॥ वेश्यादिव्यसनी नित्यं । कलुषं स्वमनो व्यधात् ॥ ७१ ॥ अन्यायान् सुबहून् कुर्व—न्नित्थं प्रतिदिनं हि सः॥ ताड्यते पीड्यते लोकै—र्न पुनर्हन्यते क्वचित् ॥७२॥ ततो विमुक्तो विचर—न्ननुग्रामं स नृपभूः ॥ क्रमान्मगधदेशेषु । प्रापत्पृथ्वीपुरं पुरं ॥ ७३ ॥ मालाकारगृहे तत्र । तस्थौ कर्मकरश्च सः ॥ विक्रीणात्यपि चौर्येण । पत्रपुष्पफलादिकं ॥ ७४ ॥ निर्वासितः स तेनापि । हट्टेऽस्थाच्छ्रेष्ठिनः क्वचित् ॥ कर्मकृन्नामुचत्किंतु । व्यसनं स्वस्य वृद्धिमत् ॥ ॥ ७५ ॥ तत्रापि निखिलं वस्तु । हट्टान्निष्कास्य सर्वदा ॥ विक्रीणाति स चौर्येण । स्वभावो दुस्त्यजो हि यत् ॥ ७६ ॥ परिज्ञातचौर्यवृत्ति—श्रेष्ठिनिर्वासितस्ततः ॥ अभूदीश्वरदत्तस्य । कर्मकृद्व्यवहारिणः ॥ ७७ ॥ सोऽन्यदेश्वरदत्तेन । समं द्रविणलोलुपः ॥ चचाल जलमार्गेण । नावमारुह्य सत्वरं ॥७८॥ सा नौः समुद्रे गच्छंती । मासेनैकेन चैकदा ॥ अस्खलत्सहसा रात्रौ । प्रवलांकुरकोटिषु ॥ ७९ ॥ कृतोपायैरपि घनं । नाविकैर्नौस्ततो मनाक् ॥ नापक्रामद-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पि क्षीण–मन्नमंबु च कालतः ॥ ८० ॥ चतुःशरणमुच्चार्या–ष्टादशांहःपदं[1] त्यजन् ॥ मिथ्या-
दुःकृतमाधाय । जंतुजातिषु च त्रिधा ॥ ८१ ॥ स्मरन् पंचपरमेष्ठि–नमस्कारं सुभावनः ॥
यावन्मुमूर्षुः पातेन । व्यवहार्यस्ति सोंबुधौ ॥ ८२ ॥ युग्मं॥ तावत्कुतोऽपि पालाश–कुसुमा-
न्नमुखः शुकः ॥ तमालनीलः सहसा–भ्येत्य मानुषवाग् जगौ ॥ ८३ ॥ अपंभितममुं मृत्युं ।
व्यवहारिंस्त्यज त्यज ॥ जीवितोपायमेतेषां । शृणु मद्वचनादरी ॥ ८४ ॥ मा मां शुकं तु
जानंतु । शकुंतं कोमलत्विषं ॥ अहमत्र नगस्यास्या–धिष्ठाता देवताग्रणीः ॥ ८५ ॥ गदितुं
जीवितोपायं । निषेद्धुं मरणाच्च वः ॥ समायातोऽस्मि तत्तस्मा–दुपायं शृणुताखिलं ॥ ८६ ॥
युष्मास्वेको निजं मृत्यु–मंगीकृत्य प्रयात्विह ॥ तीर्त्वाब्धिं पर्वते प्रोच्चैः । साहसी कृपयान्वि-
तः ॥ ८७ ॥ तत्र गत्वा च भारंडा–नुत्थाप्य खलु पक्षिणः ॥ तद्वातेन च सर्वेषां । जीवितं
प्रददातु सः ॥ ८८ ॥

एवमीश्वरदत्तोऽत्र । श्रुत्वा तद्वाक्यमादरात् ॥ पप्रच्छ सकलान् लोकान् । तत्र यानार्थि-

१ अष्टादशपापस्थानानि.



For Private And Personal Use Only

मुत्सुकः ॥ ७९ ॥ प्रदर्श्यमाने लोभे च । भीमसेनो गतभयः ॥ दीनारशतमर्थित्वा । ती-
र्त्वाब्धिं पर्वतं ययौ ॥ ८० ॥ तेनोल्लापितभारंड-पक्षप्रोद्भूतवायुना ॥ प्रवालावर्त्तसंमुक्ता । क्ष-
णात्सा नौरथाचलत् ॥ ८१ ॥ अथ तत्र गिरौ भीम-सेनो मनसि चिंतयन् ॥ जीवितोपाय-
मैक्षिष्ट । पटिष्ठवचनं शुकं ॥ ८२ ॥ दृष्ट्वा तं स शुकं प्रोचे । महापुण्य ममाप्यहो ॥ इतो
निर्गमनोपायं । वद त्वं तरणेरिव[1] ॥ ८३ ॥ श्रुत्वेति स शुकः प्राह । भीमसेन जले पत ॥
मत्स्यास्त्वां तु गलिष्यंति । व्रजिष्यंति तटोन्मुखं ॥ ८४ ॥ फूत्कारं च यदा कुर्यु-स्तदेमा-
मौषधीं द्रुतं ॥ प्रक्षेपेर्गलके तेषां । यथा स्याद्विवरं महत् ॥ ८५ ॥ तथाभूतेऽथ मकरे । निः-
सृत्य त्वं तटे भवेः ॥ एवं ते जीवितोपायो । नान्यथा तु कदाचन ॥ ८६ ॥ शुकेनेति तदा
प्रोक्ते । भीमसेनोऽतिसाहसी ॥ तत्कृत्वा प्राप सपदि । सैंहलं तटमुद्भटः ॥ ८७ ॥ भूत्वा
स्वस्थोऽथ वेलायां । पर्यटन् सलिलाशयान् ॥ वृक्षांश्च वीक्ष्य सलिलं । पपौ विश्राममासवा-
न् ॥ ८८ ॥ भीमसेनस्ततः कांचि-द्दिशमाश्रित्य निःसृतः ॥ गव्यूतीः कियतीः क्रांत्वा । पुरो-

१ प्रवहणस्येव.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ऽप्यद्यत्रिदंग्दिनं ॥ ९९ ॥ तस्मै मुनिवरायैव । नमस्कारं चकार च ॥ आशीःपुरस्सरं जीम-मुवाच च मुनिर्मुदा ॥ १०० ॥

कस्त्वं जो किं च गहने । विपिनेऽस्मिन् व्रजन्नसि ॥ दृश्यसे दुःखित इव । स्वस्थो जव वदस्व तत् ॥ १ ॥ प्रीतस्तद्वचसा जीम-स्तेनोऽवददिदं वचः ॥ मुने किं कथयाम्यद्य । मंदजाग्योऽस्मि सर्वथा ॥ २ ॥ वर्त्तंते येऽत्र संसारे । महादुःखपरा नराः ॥ अजाग्या गतसौजाग्या-स्तेषामाद्योऽस्मि चिंत्यतां ॥ ३ ॥ यत्र यामि यदर्थं तु । तत्र तन्नैव सिद्ध्यति ॥ समुद्रेऽपि न पानीयं । गते मयि पिपासिते ॥ ४ ॥ न फलानि तरोर्लक्ष्ये । न पानीयं नदीशते ॥ न रत्नं रोहणाद्रौ च । मंदजाग्ये गते मयि ॥ ५ ॥ न मे भ्राता न मे माता । न कांता न पिता मम ॥ परमस्मि न शक्तोऽपि । कर्त्तुं तूदरपूरणं ॥ ६ ॥ समाकर्ण्येति मुनिराट् । तस्योचे दैन्यजाजिनः ॥ मायागारः सुधासार-प्रतिमं प्रति तं वचः ॥ ७ ॥ अहो त्वं मा विषादाय । जव त्यज पराजवान् ॥ मयि लब्धे मुनीशेऽत्र । दारिद्र्यं ते गतं ध्रुवं ॥ ८ ॥ परोपकारं सततं । कर्त्तुं वयमितस्ततः ॥ विचरामो न च स्वार्थे । किमर्थं दुःखवानसि ॥ ९ ॥ यत्तपेत्त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पनो नित्यं । दयाद्यज्जलदो जलं ॥ यद् द्रुमाः फलवंतश्च । सुधावर्षी च यच्छशी ॥ १० ॥ य-
च्चंदनतरूत्पत्ति–र्यच्छाति मलयानिलः ॥ यद्भ्रमंतेऽत्र सुजना–स्तत्परोपकृतिकृते ॥ ११ ॥ युग्मं ॥
द्वीपेऽत्र सिंहले श्रेष्ठे । समेहि त्वं मया सह ॥ रत्नखानेर्यथा तत्र । ददे रत्नानि ते सुखात्
॥१२॥ इति श्रुत्वा भीमसेन–स्तेन सार्द्धं चचाल च ॥ प्रायेण मुनिवेषो हि । विश्वासाय श-
रीरिणां ॥ १३ ॥ दीनारशतपाथेयं । पथि कृत्वा कियद्दिनैः ॥ प्रापतू रत्नखानिं तौ । प्रमोद-
कलिताशयौ ॥ १४ ॥ अथ कृष्णचतुर्दश्यां । भीमसेनं स तापसः ॥ प्रक्षिप्य खानिमध्ये तं
। रत्नान्याकर्षयद् द्रुतं ॥ १५ ॥ नीत्वाथ तस्माद्रत्नानि । छित्वा रज्जुं च तापसः ॥ अधिष्ठा-
तृसुरायैनं । खानिमध्येऽक्षिपत्क्षणात् ॥ १६ ॥ तं दत्वा भीमसेनाख्यं । पूजापुरुषमुत्सुकः ॥
प्रचचालाथ स मुनि–स्त्रिदंडी पुनरन्यतः ॥ १७ ॥ ततः स भीमसेनोऽपि । भ्रमन् खानावि-
तस्ततः ॥ ददर्श पुरुषं कंचित् । कृशमत्यंतपीडितं ॥ १८ ॥ सकृपः सोऽपि तं भीम–मालो-
क्यावददित्यथ ॥ किमायातोऽसि वत्स त्व–मत्रांतकमुखोपमे ॥ १९ ॥ त्वमप्यहमिव प्रायः ।
पापिना किं तपस्विना ॥ रत्नानां लोभमुद्दिश्य । नियतं विप्रतारितः ॥ २० ॥ एवमेवैतदि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





त्याह । जीमसेनस्ततश्च तं ॥ इतो निर्गमनोपायं । वदस्वेति पप्रछ च ॥ २१ ॥ ततो जगा-
द सोऽपीमं । शृणूपायं स्वजीविते ॥ स्वर्गात्सुर्यः समेष्यंति । स्वरत्नविहितोत्सवाः ॥ २२ ॥
रत्नचंडमधिष्टातृ–देवं खानेः सुजावनाः ॥ पूजयिष्यंति विविधै–र्गीतनृत्योपचारकैः ॥ २३ ॥
तद्गीतदत्तचित्तेऽस्मिन् । सुरे तत्किंकरान्विते ॥ निःसरेस्त्वं बहिर्यातो । दैवतस्यापि दुर्गमः ॥
॥ २४ ॥ इत्याश्वास्य जीमसेनं । स नरोऽतिविचित्रवाक् ॥ तेनैव सार्द्धं तदह–र्निनाय बहु-
वार्त्तया ॥ २५ ॥ इतः प्रातर्मृदंगादि–ध्वानबंधपुरस्सरं ॥ देव्यः सर्वा विमानस्था–स्तत्राज्ये-
युर्महोत्सवैः ॥ २६ ॥ तद्गीतमग्नमनसि । तस्मिन् खान्यधिपे सुरे ॥ स किंकरयुतः शीघ्रं ।
खानेर्बहिरुपाययौ ॥ २७ ॥ मंदं ततो मार्गमति–क्रामन् सोऽग्र कियद्दिनैः ॥ सिंहले मुख्य-
नगरं । क्षितिमंमनमासवान् ॥ २८ ॥ तत्र कस्यापि सोऽतिष्ठ–त्कर्मकृद्व्यवहारिणः ॥ जांड-
शालासु सुजन्न–संपूर्णाखिलवस्तुषु ॥ २९ ॥ चक्रे चौर्यमनाचारं । चतुरः परवंचने ॥ तस्य
गेहे जीमसेनो । जूरिशो जीमदर्शनः ॥ ३० ॥

अथैकदा परिज्ञाय । तं चौरं तलरक्षकाः ॥ प्रतिशूलीमधीकाढ्यं । समंतात्समचालयन्



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ३१ ॥ इतश्चेश्वरदत्तस्तं । वीक्ष्यं स्वस्योपकारिणं ॥ उपलक्ष्य च राजानं । विज्ञप्यामोच-
यद् द्रुतं ॥ ३२ ॥ नावं चारोह्य तं शीघ्रं । कियद्भिर्दिवसैर्निजं ॥ आगात्पृथ्वीपुरं नाम । पुरं
महापराक्रमः ॥ ३३ ॥ भीमसेनः समुत्तीर्य । वाहनाद्वीक्ष्य कंचन ॥ देशांतरिणमाहस्म ।
स्ववृत्तं तत्पुरस्तदा ॥ ३४ ॥ सोऽपि तद्वृत्तमाकर्ण्य । मा विषीदेति च ब्रुवन् ॥ नीत्वा सहैव
तं चेले । प्रतिरोहणपर्वतं ॥ ३५ ॥ गच्छंतौ पथि तौ तूर्ण—मीकतुस्तापसाश्रमं ॥ मुनिं वृद्धं च
जटिल—नामानं नेमतुर्मुदा ॥ ३६ ॥ अस्मिन् क्षणे जांगलाख्य—आगाज्जटिलसन्निधौ ॥ शि-
ष्यः कुर्वन्नमस्कारं । गुरौ विनयवामनः ॥ ३७ ॥ पप्रच्छ जांगलं शिष्यं । जटिलोऽकुटिलाश-
यः ॥ वत्स त्वमधुना यातः । कुतः कथय तन्मम ॥ ३८ ॥ अथाह जांगलः स्वामिन् । सुरा-
ष्ट्रायामहं गतः ॥ शत्रुंजयोज्जयंताद्री । कृत्वेतो जिनपूजनं ॥ ३९ ॥ तीर्थयोः कथ्यते कीदृ-
ग् । महिमैर्महिमैतयोः ॥ यं न जानाति जनता । केवलं वेत्ति केवली ॥ ४० ॥ भवद्वयसु-
खं सर्वं । नृणां स्याद्यदुपासनात् ॥ विशेषादुज्जयंताद्रे—र्महिमानममुं शृणु ॥ ४१ ॥ कांतिं
कलाश्च कमलां । प्रभूतां चक्रिवज्रिणोः ॥ यदाराधनतो जंतु—र्लभेताशोकचंद्रवत् ॥ ४२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथाहि पुर्यां चंपायां । क्षत्रीयः परजीवकः ॥ अशोकचंद्रनामाभू—दरिद्रो विरतो गृहा-
त् ॥ ४३ ॥ भ्रह्मिंश्रो विचरन् सोऽथ । वीक्ष्य जैनतपोधनान् ॥ नत्वापृच्छच्च दौर्भाग्य—भंगो-
पायं दयामयान् ॥ ४४ ॥ ऊचुस्तं मुनयो वत्स । प्रमादकलितो भवे ॥ जंतुर्भ्राम्येत सर्वत्र ।
कर्मणा सबलोऽबलः ॥ ४५ ॥ तत्कर्म त्वन्यथाकर्तुं । शक्यते केनचिन्न हि ॥ बाध्यते केवलं
स्वात्मा । विकल्पैरेव निर्भरं ॥ ४६ ॥ विना भोगं न मुच्येत । जीवस्तत्कर्मपंजरात् ॥ से-
वया रैवताद्रेर्वा । कृतया शुद्धभावतः ॥ ४७ ॥ इत्युक्त्वा विरतेऽथैषु । स ययौ रैवताचलं ॥
चित्ताभिलाषी सद्भक्तिः । प्रातनोत्स तपः स्थिरः ॥ ४८ ॥ कियद्भिर्दिवसैरंबा—देवी प्रीतिपरेत्य-
थ ॥ अदात्स्पर्शोपलं तस्मै । स्पर्शाल्लोहस्य हेमकृत् ॥ ४९ ॥ गत्वाथ स्वपुरं भृत्यान् । स्था-
पयित्वाथ भूरिशः ॥ राज्यमर्थबलाल्लब्ध्वा । सर्वसौख्यान्यभुंक्त सः ॥ ५० ॥ अथैकदा चका-
रासौ । चिंतां चेतसि चारुधीः ॥ धिग्मे जीवितमर्थं च । राज्यं च निखिलाः स्त्रियः ॥ ५१ ॥
अंबिकायाः प्रसादेन । सर्वमेतदुपार्जितं ॥ तामेव न स्मरामिच । न नमामि च पापवान् ॥
॥ ५२ ॥ युग्मं ॥ अथ संघस्य सामग्रीं । कृत्वान्येद्युः स संयुतः ॥ स्वजनैरचलचित्ते—ऽचलः

For Private And Personal Use Only

सकलदानदः ॥ ५३ ॥ दिनैः कियद्भिर्गत्वा स । शत्रुंजयगिरिं जिनं ॥ पूजयित्वा च विधिना। पुना रैवतमागमत् ॥ ५४ ॥ गजेंद्रपदकुंडादि–पयोभिः स्नानमाचरन् ॥ तज्जलैः स्नाप्य नेमीशं । पुपुज कुसुमैर्घनैः ॥ ५५ ॥ अथांबां जगतामंबां । भक्त्या संपूज्य चादरात् ॥ विरक्तोऽचिंतयच्चित्ते । स इति प्रीतिपेशलः ॥ ५६ ॥ शतानि त्रीणि वर्षाणि । राज्यं कृतममुष्य तु ॥ देवस्यैवांबिकायाश्च । प्रसादान्महतो मया ॥ ५७ ॥ ततोऽतः परमेतस्य । श्रीनेमेरेव पादुके ॥ शरणं मम भूयास्तां । सुतो राज्यं करोतु च ॥ ५८ ॥ निवेश्य राज्ये तनयं । प्रेष्य देशान् प्रति द्रुतं ॥ नीत्वा दीक्षां शुभध्याना–त्प्रांते प्रापद्दिवं च सः ॥ ५९ ॥ प्रत्यक्षं भगवन्नेत–त्समग्रं वीक्षितं मया ॥ तज्जानेऽहं महातीर्थ–मिदमेव न चापरं ॥६१॥ प्राप्यते पुरुषैर्नूनं । यस्य तीर्थस्य सेवनात् ॥ इह सर्वस्य संपत्तिः । परत्र च परं पदं ॥ ६२ ॥ लभंते सेवनाद्यस्य । प्राणिनः पापिनोऽप्यलं ॥ सर्वकर्माणि संक्षिप्य । शिवमव्यक्तमक्षयं ॥ ६३ ॥ भ्रमतां पक्षिणां खेऽपि । छाया येषां स्पृशत्यमुं ॥ लभंते कुगतिं नैते । किं पुनः सहवासिनः ॥६४॥ इति जांगलतः श्रुत्वा । महिमानं महागिरेः ॥ रैवतस्य मुदं प्रापुः । सर्वे तत्र तपोधनाः


॥५४७॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ६५ ॥ वैदेशिकोऽपि ज्ञीमस्त—न्महिमानं निशम्य तौ ॥ रोहणे प्रथमं यानं । चिरान्निश्चि-
त्य चक्रतुः ॥६६॥ मार्गमुल्लंघ्य तरसा । रोहणं प्राप्य तौ ततः ॥ जजागर्तुरर्चित्वा । देवं प-
र्वतनायकं ॥ ६७ ॥ प्रातः खनिं प्रपद्याथ । हा दैवमिति वादिनौ ॥ ददतुस्तौ प्रहारं द्राक् ।
खानौ रत्नोद्दिधीर्षया ॥ ६८ ॥ लब्ध्वा रत्नद्वयं ज्ञीम—स्तेनोऽनर्घ्यं महाप्रज्ञं ॥ एकं राजकुले
दत्वा । नीत्वा चैकमथाचलत् ॥ ६९ ॥ स गच्छन् जलधौ पोत—स्तस्थो निशि निशाकरं ॥ वी-
क्ष्य रत्नं करे कृत्वा । साम्यमालोकयद् द्वयोः ॥ ७० ॥ ज्ञीमसेनस्य कृच्छ्रेण । संप्राप्तं मुद्दुरी-
कृतः ॥ अन्नाग्ययोगाज्जलधौ । तद्रत्नमपतत्करात् ॥ ७१ ॥ मूर्छांते पूत्त्कारायथ । हा दैव कि-
मिदं कृतं ॥ त्वया मे हरता रत्नं । जीवितं न कथं हृतं ॥ ७२ ॥ धिग्जीवितं मेधिग्जन्म ।
धिग्मानुष्यमवैन्नवं ॥ धिग्दैवं चेति विलपन् । मूर्छितः पतितः पुनः ॥७३॥ तुमुलारावतस्तस्य ।
मिलिता नाविका नराः ॥ वायुना वीजयित्वा च । मूर्छाभंगं व्यधुः क्षणात् ॥ ७४ ॥ अथा-
सौ लब्धचैतन्य—स्तानाहोच्चैरहो द्रुतं॥ मद्रत्नं पतितं वार्धौ । मृग्यते स्थाप्यतां च नौः ॥७५॥
मित्रेण देशांतरिणा । ततः स प्रतिबोधितः ॥ किमिदं मित्र ते जातं । क्व रत्नं क्व जलं क्व



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नौः ॥ ७६ ॥ शुचं त्यज महाबंधो । भज धैर्यं विषीद मा ॥ भूरीणि तव रत्नानि । भवि-
ष्यंति मयि स्थिते ॥ ७७ ॥ इदं मदीयं रत्नं वा । गृहाण गुणवत्परं ॥ अद्यापि रैवतो भू-
भृ-दस्ति किं विलपन्नसि ॥ ७८ ॥ इति मित्रस्य वचसा । धैर्यमालंब्य चेतसा ॥ समुद्रं च
समुल्लंघ्य । क्रमात्प्रापत्तटावनीं ॥ ७९ ॥ चलितौ तु ततस्तौ द्वौ । प्रतिरैवतपर्वतं ॥ पथि र-
त्नसुपाथेयौ । चौरैर्मुष्टौ कुदैवतः ॥ ८० ॥ असंबलौ विवसानौ । निराहारौ श्रितक्लमौ ॥ तौ
निरीक्ष्य मुनिं कंचि-न्मुमुदाते भृशं पथि ॥ ८१ ॥ नत्वा तौ मुनये भक्त्या । शांतस्वांताय
हर्षितौ ॥ शशंसतुः स्वच्छचित्तौ । स्ववृत्तांतं तथार्त्तितौ ॥८३॥ मुने दरिद्राद्भाग्याना-मावां जा-
नीहि भूपती ॥ अतः पर्वतपातेन । मरणायाभिलाषुकौ ॥ ८४ ॥ धाराधरो विना वारि । वि-
ना जीवं कलेवरं ॥ विना गंधं च सुमनो । विना पद्मं जलाशयः ॥ ८५ ॥ विना तेजश्च श-
शभृद् । विना वाणी च संस्कृतं ॥ विना कुलीनताचारं । विना विद्यां तपस्विता ॥ ८६ ॥
विना गृहं च गृहिणीं । नयश्च विनयं विना ॥ विना दोषाकरं दोषा । प्रासादः प्रतिमां विना
॥ ८६ ॥ विना वयश्च शृंगारो । विना सेना च नायकं ॥ विना कुलं सुपुत्रं च । विना दानं



For Private And Personal Use Only

यथा धनं ॥ ८७ ॥ विना दयां महाधर्मो । विना सत्यं च वक्तृता ॥ यथा विनाक्षिणी व-
क्त्रं । तथा द्रव्यं विना नरः ॥ ८८ ॥ कुलकं ॥

इति तद्वचनं श्रुत्वा । सविषादं मुनीश्वरः ॥ अनल्पकृपयोपेतो । जजल्प प्रति तौ वचः
॥ ८९ ॥ धर्मो भवद्भ्यामसकृ—न्न कृतः पूर्वजन्मनि ॥ ततो निर्द्रव्यता ह्येषा । मा प्राणेषु वि-
षीदतां ॥ ९० ॥ कुले जन्मापरोगत्वं । सौभाग्यं सौख्यमद्भुतं ॥ लक्ष्मीरायुर्यशोविद्या । हया
रामास्तुरंगमाः ॥ ९१ ॥ मातंगा जनलक्षैस्तु । परिचर्यार्यता तथा ॥ चक्रिशक्रेश्वरत्वं च ।
धर्मादेव हि देहिनां ॥ ९२ ॥ युग्मं ॥ ततो मात्र गिरौ प्राण—त्यागं हि कुरुतां युवां ॥ रैव-
तं पर्वतं यातं । सर्वचिंतितदायकं ॥ ९३ ॥ भीमसेन त्वया पूर्वे । जन्मन्यन्यायतो मुनिः ॥ अ-
ष्टादशघटीर्याव—त्पीडितस्तत्फलं ह्यदः ॥ ९४ ॥ आराध्या न विराध्यंते । विबुधैर्दुर्विधा अपि
॥ तद्विराधनतः कष्ट—मिष्टं तत्सेवनात्त्विह ॥ ९५ ॥ अतः परं च ते भद्रं । भविष्यति न सं-
शयः ॥ व्यतीतो ह्यशुभः कालो । मा विषादं मनाक्कुरु ॥ ९६ ॥ त्वयेयं भाविनी भूमि—
र्निखिला जिनमंडिता ॥ न त्वत्सदृग्नरः कश्चि—न्महापुण्यो भविष्यति ॥ ९७ ॥ मुनेरित्युप-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देशेन । स च वैदेशिना समं ॥ मुनिं नत्वाचलच्चारु । चिंतयन् प्रतिरैवतं ॥ ९८ ॥ क्रमाद्-
थ गिरिं प्राप्या—नुजं भीमोऽर्हदालये ॥ गृहीतारात्रिकं संघा—मात्यसंयुक्तमैक्षत ॥ ९९ ॥
विधायारात्रिकं सोऽपि । भीमं तमुपलक्ष्य च ॥ अमात्यानवदन्नेव—मितः किंचिद्विलोक्यतां
॥ १०० ॥ तेऽप्यमात्या विलोक्याथ । प्रोचू राजन् भवेदसौ ॥ भीमसेनश्चरैर्यः सन् । प्रति-
देशं विलोकितः ॥ १ ॥

इतश्च सैवैरुत्थाय । राजा संजातहर्षतः ॥ भीमसेनं समाश्लिष्य । हर्षात्किंचिन्ननाम सः
॥ २ ॥ भीमसेनोऽपि तं श्लिष्ट—माश्लिष्याश्लिष्य हर्षभाक् ॥ चुचुंब मूर्ध्नि सत्प्रीति—वल्लीव-
र्धनबाष्पमुक् ॥ ३ ॥ इतः प्रोचेऽनुजो भक्त्या। भीमसेन मया विभो ॥ न तत्किंचिदिह स्था-
नं । यत्र त्वं नावलोकितः ॥ ४ ॥ क्व भ्रातरभवो भूरि । वत्सराणि मया विना ॥ न्यासव-
द्रक्षितं राज्यं । स्वीकरोतु भवान् स्वकं ॥ ५ ॥ इत्यस्य विनयोक्तेन । प्रमोदपरमानसः ॥
सचिवै राज्यभारं सों—गीचकार सुसारधीः ॥ ६ ॥ जलैः स्नात्वाथ विमलै—र्भीमसेनः सुवा-
सनः ॥ जिनं स्नात्वार्चयित्वा चा—रात्रिकं विधिना व्यधात् ॥ ७ ॥ अष्टाह्निकां प्रतिदिनं । न-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वैस्तत्र महोत्सवैः ॥ जिनं सोऽपूजयन्नेमिं । सह भ्रात्रानुजेन च ॥ ८ ॥ ततो नत्वा जिना-
धीशं । स्वदेशंप्रति सोऽचलत् ॥ संपूजितः पथि नृपैः । स्वपुरीं प्रापदुत्सवैः ॥ ९ ॥ अथ
पौराः कृतोत्साहा—स्तं निरीक्ष्य सुलक्षणं ॥ उत्सवैर्विविधैर्नृत्या—दिभिः प्रावेशयन्पुरीं ॥१०॥
गृह्णन् लाजाः पुरस्त्रीणां । करैर्मुक्ता गवाक्षतः ॥ आशीःपुरस्सरं प्राप—दुन्मना निजमंदिरं ॥
॥ ११ ॥ वस्त्रद्रविणतांबूल—वाजिवाग्वीक्षणादिभिः ॥ सन्मान्य प्रेष्य लोकं तं । स सद्मांत-
स्ततोऽविशत् ॥ १२ ॥ कुलदेवान् स नत्वाथ । भुक्त्वा सार्द्धं स्वबंधुना ॥ विश्रम्य च क्षणं
प्राप । सभां सभ्यैः स भ्राजितां ॥ १३ ॥ ररक्ष स्वं च न त्रस्त—श्चक्रे धर्मं गतामयः ॥ ज-
ग्राहार्थान्न लोभार्थी । समभुंक्त न शक्तितः ॥ १४ ॥ चौराणां समभून्नार्त्ता । नार्त्ताः पौराः
कदाचन ॥ न स्वधर्मच्युतिर्लोके । तस्मिन् राज्यं प्रकुर्वति ॥ १५ ॥ स्मरन् पित्रोः सदा स्वे-
न । हतयोः शोकतत्परः ॥ तावुद्दिश्य महीमेना—मादधे जिनमंडितां ॥ १६ ॥ दुःस्थानां द-
लयन् दैन्यं । गुरुदेवेषु भक्तिभाक् ॥ राज्यं चकार संसार—विकारत्रासकारकः ॥ १७ ॥ अ-
लंघ्यो वैरिणां दत्त—यौवराज्यो निजानुजे ॥ मित्राय देशांतरिणे । कोशव्यापारमादिशत् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ १८ ॥ सोऽन्यदा बहिरुद्याने । जिनपूजनसोद्यमः ॥ गतो विद्याधरं वीक्ष्य । पप्रच्छेति कु-
तो जवान् ॥ १९ ॥ सोऽपि तं प्राह नूपाल । नमस्कृत्य जिनानहं ॥ शत्रुंजयोज्जयंताद्यो-
रिहागां श्रीजिनांतिकं ॥ २० ॥

अथ राजापि तद्वाक्या-ज्जिनं सस्मार रैवते ॥ चिंतयन्निति धिग्जन्म । मम यो न नमा-
मि तं ॥ २१ ॥ राज्यं दत्वानुजायाथ । जयसेनाय तत्क्षणात् ॥ चचालाल्पपरीवार-ऋद्धि-
युक् रैवतंप्रति ॥ २२ ॥ क्रमाच्छत्रुंजयं गत्वा । पूजयित्वादिमं जिनं ॥ अष्टाह्निकामहं कृत्वा ।
ततोऽगाद्रैवतं गिरिं ॥ २३ ॥ कर्पूरकेसरैश्चारु-चंदनैर्नंदनोद्भवैः ॥ तत्रार्चयत्स नेमीशं । विधि-
ना विविधैः सुमैः ॥ २४ ॥ दानशीलतपोजाव-नेदैरब्दचतुष्टयं ॥ सोऽतिचक्राम सर्वेषां । पू-
रयन्नर्थमर्थिनां ॥ २५ ॥ ज्ञानचंद्रादथातंद्रो । दीक्षामादाय मुक्तिदां ॥ तपत्येष तपोऽत्यंतं ।
नीमसेनो महामुनिः ॥ २६ ॥ पूर्वमीदृग्महापाप-करोऽयं यत्र पर्वते ॥ अतोऽष्टमे दिने नू-
त्वा । केवली मुक्तिमेष्यति ॥ २७ ॥ इदमेतस्य माहात्म्यं । पर्वताधिपतेः सुराः ॥ ज्ञानचंद्र-
मुनींद्रस्यात् । श्रुणुमोऽर्बुदगा वयं ॥ २८ ॥ महापापप्रकर्त्तारो । महाकुष्टादिरोगिणः ॥ ज-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वंति सर्वसौख्याढ्या । नरा रैवतसेवनात् ॥ २९ ॥ अल्पमप्यत्र जावेन । प्रदत्तं बहुधा जवेत् ॥ मुक्तिसीमंतिनीप्राप्ति–करं च बहुवृद्धिमत् ॥ ३० ॥ इव्याजिलाषिणो इव्यं । शर्म सौख्याजिलाषिणः ॥ राज्यार्थिनोऽत्र राज्यं च । प्राप्नुवंतींइतामपि ॥ ३१ ॥ स्वयं श्रीनेमिनाथोऽपि । यत्तीर्थं श्रितवानतः ॥ कैरन्यैः सेव्यते नैतत् । सर्वं पापापहारकं ॥ ३२ ॥ मार्कंडेइादिति श्रुत्वा । देवास्ते जक्तितत्पराः ॥ विधिना जिनमर्चित्वा । ययुः कल्पं निजं निजं ॥ ॥ ३३ ॥ इत्थमत्र मुनीशास्ते । बहवोऽपि निजं तमः ॥ संक्षिप्य कर्मविगमा–द्ययुर्मुक्तिं सुरेश्वर ॥ ३४ ॥ पुनश्चात्रावसर्पिण्यां । जरतेन प्रकाशितं ॥ तीर्थमेतज्ञाविनेमेः । समाश्रयवशादथ ॥ ३५ ॥ हरिवंशे जिनः सोऽजू–द्रैवताचलमंडनं ॥ अतः संक्षेपतः पूर्वं । तं वंशं कीर्त्तयाम्यहं ॥ ३६ ॥

तत्तत्पुरुषरत्नाना–माकरोऽनेकपर्वजृत् ॥ कल्याणनिकषः प्रोच्चै–र्हरिवंशो जयत्वयं ॥ ३७ ॥ तद्यथात्रैव जरते–ऽतीवतेजोविराजिता ॥ विक्रमाहतविट्कोशा । कोशांब्यस्ति पुरी वरा ॥ ३८ ॥ सारिका सारकाव्यानि । पठंती पुरमध्यगा ॥ यत्र विस्मापयत्यन्य–विदुषो मुख-



For Private And Personal Use Only

रानपि ॥ ३९ ॥ अन्योऽन्यजनसंघट्ट–स्पष्टमौकुटरत्नजाः ॥ रश्मयो यत्र वेश्मानि । चित्रयंति समंततः ॥ ४० ॥ सदानंदमया लोकाः । सदा शांतकुविग्रहाः ॥ सुविग्रहा गृहासन्न–चरद्ग्रहशुभग्रहाः ॥ ४१ ॥ यत्रार्हमिंद्र भक्तिद्–जिनेंद्राज्ञाविभूषिताः ॥ विभूषिता इव सुरा । विशेषवृषलालसाः ॥ ४२ ॥ युग्मं ॥ तत्राभूद्भुवनाभोग–विस्तारितशुभव्रतः ॥ विदुषां मानसे हंसः । सुमुखो नाम भूपतिः ॥ ४३ ॥ सत्सु सन् विदुषां विद्वान् । द्विषां छिद् बलिनां बली ॥ धर्मिणां धर्मवान् रूप–वतां सद्रूपवान् नृपः ॥ ४४ ॥ वीतरागोऽपि यच्चित्ते । वासमाप सरागिवत् ॥ यतयोऽप्यापुरास्थानं । संयता इव तद्गुणैः ॥ ४५ ॥ ऐश्वर्यं पाति विश्वस्य । स विश्वस्य सुकर्मभिः ॥ विश्वस्य सुखकृद्राजा । राजमानो निजैर्गुणैः ॥ ४६ ॥ सोऽन्यदा सुरभौ वृत्ते । सुरभूरुहवद्वने ॥ फलपल्लवपुष्पाणि । विकासयति सर्वतः ॥ ४७ ॥ खेलितुं बहुहेलाभि–र्महेलाभिरिलाविभुः ॥ गच्छन्मार्गे सुकुमालां । बालां कांचिद्व्यलोकयत् ॥ ४८ ॥ युग्मं ॥ पीनोन्नतकुचद्वंद्व–भारादीषन्नतांगकां ॥ वदने मदनेशस्य । तूणीरमिव नासिकां ॥ ४९ ॥ बिभ्राणां कातरैणाक्षीं । शुभश्रोणिसुमध्यमां ॥ स्मररत्योर्धन्वसम–भ्रुवं पद्मकरक्रमां ॥ ५० ॥

॥ ५५७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



युग्मं ॥ भ्रमन्मन्मथबाणैस्तै–र्मन्मथैः स विसंस्थुलः ॥ पश्यंस्तां मानसे भूपो । विकल्पानी-
त्यसूत्रयत् ॥ ५१ ॥ निर्जित्यैषा दिवं देवी । किं जेतुं भुवमागमत् ॥ किं वा कस्यापि पुण्य-
स्य । भोक्तुः पुण्यैरिवाहृता ॥ ५२ ॥ चिंतयंतमिति क्ष्माप–मक्रामंतं क्रमांतरं ॥ जिज्ञासु-
रिव तद्भावं । सचिवः प्राह शुद्धगीः ॥ ५३ ॥ स्वामिन्निःशेषमप्यागा–द्बलं तत्किं विलंब्यते ॥
उत्कंठते रंतुकामा । मधुलक्ष्मीस्त्वयि प्रभो ॥ ५४ ॥ भिन्नोक्तिमिति संचिंत्य । राजा तत्रैव
मानसं ॥ मुक्त्वा कथंचित्प्रययौ । वक्रग्रीवं विलोकयन् ॥ ५५ ॥ न मधौ न वधूलोके–ऽस्तो-
के पंकेरुहेऽपि न ॥ न वापीषु स तापी सन् । विकसद्बकुलेऽपि न ॥ ५६ ॥ न कर्णिकारे मा-
रेण । सर्वतो व्याप्तविग्रहः ॥ अन्यत्रापि रतिं नाप । मीनः स्तोक इवांभसि ॥५७॥ युग्मं ॥
अग्रतः पार्श्वतः पश्चा–च्छयने कानने ग्रहे ॥ यथादृष्टां स तां पश्य–न्नासीन्नष्टापरेंद्रियः ॥५८॥
सचिवः सुमतिर्नाम । तद्विधं वीक्ष्य भूपतिं ॥ अजानन्निव तद्भाव–मित्यवोचत भक्तितः ॥
॥ ५९ ॥ स्वामिंस्त्वदाज्ञा मान्यास्ति । समस्तेऽपि धरातले ॥ तृणवत्समरे शत्रु–र्नामितो
भवताखिलः ॥ ६० ॥ मूर्तेव लक्ष्मीस्त्वद्वेश्मि । सदा वसति शाश्वती ॥ कारणं नात्र प-

॥५५८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्यामि । तव खेदकृते कश्चित् ॥ ६१ ॥ सर्वापहृतवत्तत्किं । विषीदसि निषीदसि ॥ निःश्व-
सीष्यपि भूपाल । तदालपितुमर्हसि ॥ ६२ ॥ इति मंत्रिगिरा भूपः । किंचिन्निःश्वस्य तं ज-
गौ ॥ मंत्रिन्नभिज्ञोऽपि भवा-ननभिज्ञ इवाधुना ॥ ६३ ॥ इतो गवाक्षमापतता ह्यद्य । मया रत्यर-
तिप्रदा ॥ सर्वस्त्रीरूपलुंटाकी । दृष्टा काचिन्नितंबिनी ॥ ६४ ॥ तीक्ष्णैस्तया नेत्रशरै-रुत्कृत्य
मम मानसं ॥ ज्ञातृत्वं यदु हृतं तेन । जातोऽस्मि गतचेतनः ॥ ६५ ॥ श्रुत्वेति सचिवः किं-
चि-द्विहस्य नृपतिं जगौ ॥ ज्ञातवानस्म्यहं राजं-स्तत्सर्वं तव दुःखकृत् ॥ ६६ ॥ भार्या
वीरकुविंदस्य । नाम्नेयं वनमालिका ॥ संपादयिष्ये तामेष । यातु स्वामी निजालयं ॥
॥ ६७ ॥ राजा तद्वाक्यतो हृष्ट-स्तत्पृष्ठे पाणिमर्पयन् ॥ परिवारयुतः प्राप । राजवेश्मा-
प्तचेतनः ॥ ६८ ॥

विमृश्य सचिवः किंचि-दुपायं कृतनिश्चयः ॥ आत्रेयिकां नाम परि-व्राजिकां प्राहिणो-
त्ततः ॥ ६९ ॥ विचित्रोपायनिपुणा । सात्रेय्यपि च वेश्मनि ॥ जगाम वनमालाया । वंदि-
ता च तया जगौ ॥ ७० ॥ घर्मम्लाना मृणालीव । दिवा शशिकलोपमा ॥ रंभेव वनदग्धा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वं । वशे किमिव लक्ष्यसे ॥ ७१ ॥ सा तस्यामथ विश्वस्य । निःश्वस्यापि जगाद च ॥ दुः-
प्रापार्थस्पृहाढ्वी किं । कथयाम्यंब मंदधीः ॥ ७२ ॥ मयाद्य जंगमः कामो । नृपतिर्न पति-
र्मम ॥ पथि यान् ददृशे याता । रतिरप्यनु तं ततः ॥ ७३ ॥ सर्वदैवतमत्कायः । क्वायं स-
त्कुलसूर्नृपः ॥ क्व चाहं हीनजातिर्हा । विषमा दैवसंस्थितिः ॥ ७४ ॥ दुःप्रापेष्टजनप्राप्ते-
र्निःकृपानंगपीडनात् ॥ कुजातेर्मंदज्ञाग्यायाः । मरणं शरणं मम ॥ ७५ ॥ वदंतीमिति ता-
मात्रे-प्यूचे वत्से विषीद मा ॥ मंत्रयंत्रादिभिः संपा-दयिष्ये तव कामितं ॥ ७६ ॥ आश्वा-
स्येत्थं वनमाला-मात्रेयी सचिवौकसि ॥ आगत्य कार्यसंसिद्धिं । कथयामास हर्षिता ॥
॥ ७७ ॥ निशीथे सचिवोऽप्येनां । गुप्तामंतःपुरे प्रभोः ॥ तथैवानाययद्राजा । पट्टे प्रीत्याध्य-
रोपयत् ॥ ७८ ॥ ज्योत्स्नाचंद्रमसौ छाया-देहौ कूलंकषांबुधी ॥ तद्वत्तौ सर्वदा युक्तौ । ब-
भूवतुरतिप्रियौ ॥ ७९ ॥ तया समं महोद्याने । दीर्घिकासु निशासु च ॥ सरित्तीरे शैलशृं-
गे । रेमे सुमुखभूपतिः ॥ ८० ॥

इतो वीरकुविंदोऽपि । वियुक्तो वनमालया ॥ भूताविष्ट इवोन्मत्तो । हृतसर्व इवाभवत्



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ८१ ॥ नोदन्या न क्षुधा निद्रा । न च छायासु नातपे ॥ न सौधे न जने तस्य । रतिरासी-
द्वियोगिनः ॥ ८२ ॥ मलाविलतनुर्जीर्ण—वासाः कर्परमृत्करः ॥ दधानो देवनिर्माल्यं । स ब-
भ्राम गृहाद् गृहं ॥ ८३ ॥ विकीर्णकेशो विलुल—त्सर्वांगः सर्वतो जनैः ॥ पामरैर्वेष्टितः प्रो-
च्चै—श्चत्वरे स त्रिकेऽभ्रमत् ॥ ८४ ॥ हा प्रिये वनमाले त्वं । कृशोदरि सुलोचने ॥ मुक्त्वा
मां क्व गतासीति । देहि प्रत्युत्तरं मम ॥ ८५ ॥ डिंभानुकृततच्चेष्ट—स्तस्य कोलाहलो महान्
॥ नृपेणेति गृहस्थेन । शुश्रुवे श्रवणाप्रियः ॥ ८६ ॥ किमेतदिति जिज्ञासुः । सदैव वनमाल-
या ॥ राजा वेश्मांगणेऽभ्यागात् । कौतुकोत्फुल्ललोचनः ॥ ८७ ॥ तं तथा विकृताकारं । स-
र्वांगे धूलीधूसरं ॥ नष्टचैतन्यमालोक्य । राजा राज्ञी च दध्यतुः ॥ ८८ ॥ कर्मैतन्निर्घृणमहो ।
अस्माभिः सौनिकैरिव ॥ दुःशीलैर्विदधे हंत । विश्वस्तो ह्येष वंचितः ॥ ८९ ॥ धिग् धिग् वि-
षयलांपट्य—मविवेकपटीयसां ॥ नरकेऽपि हि न स्थानं । पाप्मनानेन नः खलु ॥ ९० ॥ जि-
नधर्ममहोरात्रं । ये शृण्वंत्याचरंति च ॥ वंद्यास्ते स्वविवेकेन । ये च विश्वोपकारिणः ॥ ९१ ॥
इति स्वं निंदतोर्धर्म—प्रसक्तांश्चाभिनंदतोः ॥ तयोः पपात खाद्विद्युत् । प्राणानपजहार च ॥





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ ९२ ॥ मिथः स्नेहपरिणामा-च्छुभध्यानाच्च तौ मृतौ ॥ उत्पेदाते हरिवर्षे । वर्षे मिथुनरूपिणौ ॥ ९३ ॥ हरिश्च हरिणीचेति । पितृभ्यां कल्पिताभिधौ ॥ प्राग्जन्मवद्दंपती ता-ववियुक्तौ बभूवतुः ॥ ९४ ॥ कल्पद्रुमैर्दशविधैः । संपादितसमिहितौ ॥ सुखेन तस्थतुस्तत्र । विलसंतौ सुराविव ॥ ९५ ॥ विद्युत्पातेन हतयो-र्वनमालानरेंद्रयोः ॥ चक्रे बालतपो वीर-कुविंदोऽपि सुदुस्तपाः ॥ ९६ ॥ मृत्वा च कल्पे सौधर्मे । सोऽभूत् किल्बिषिकः सुरः ॥ प्राग्जन्मावधिनापश्यत् । स्वं तथा हरिणीहरी ॥ ९७ ॥ तदैवोल्लसदत्युग्र-रोषारुणविलोचनः ॥ भृकुटीभीषणः शीघ्रं । हरिवर्षे जगाम सः ॥ ९८ ॥ एवं च स सुरो दध्या-विहावध्याविमौ खलु ॥ मृतौ च यास्यतः स्वर्गे-ऽवश्यं क्षेत्रप्रभावतः ॥ ९९ ॥ निर्बंधने दुर्गतिना-मकालेऽपि हि मृत्युदे ॥ नयाम्यन्यत्र तत्स्थाने । पूर्वजन्मद्विषाविमौ ॥ ३०० ॥ इति निश्चित्य स सुर-स्तौ कल्पतरुभिः सह ॥ आनैषीदत्र भरते । चंपापुर्यामुभावपि ॥ १ ॥

इतश्च प्रथमस्वामि-वृषभस्य तनुप्रसूः ॥ अभून्नृपो बाहुबलिः । श्रीमान् सोमयशास्ततः ॥ २ ॥ तद्वंश्या ये नृपा जाताः । सोमवंश्या हि ते स्मृताः ॥ ऐक्ष्वाकाश्च सोमसुतः ।



For Private And Personal Use Only

श्रेयांसः समभून्नृपः ॥ ३ ॥ सार्वभौमः सुभूमश्च । सुघोषो घोषवर्धनः ॥ महानंदी सुनंदी च । सर्वभद्रः शुभंकरः ॥ ४ ॥ एवं क्रमादसंख्येषु । मुक्तिं स्वर्गं गतेषु च ॥ चंद्रकीर्तिस्तदा तत्रा–पुत्रः स्वर्गं ययौ नृपः ॥ ५ ॥ ध्यायत्सूपायमतुलं । नृपाय सचिवेष्वथ ॥ अंतरीक्षे स्थितो देवः । स इत्थमकिरद्गिरः ॥ ६ ॥ हंहो लोकाः किमस्तोका । चिंता चेतसि वः खलु ॥ एष स्वामी भवद्भाग्यै–र्भावी नामितशात्रवः ॥ ७ ॥ कल्पद्रुमफलैः सार्धं । मांसमद्यादि दीयतां ॥ स्वैराचारो निराचारो । ह्येतयोः स्वामिनोर्हि वः ॥ ८ ॥ लोकानित्यनुशिष्याथ । ह्रस्वमायुस्तयोरपि ॥ कृत्वोच्चत्वे शतं धन्व । कृतार्थः स तिरोदधे ॥ ९ ॥ सामंतसचिवैः प्रीति–निर्भरैर्मंगलारवैः ॥ तीर्थाहृतैर्जलै राज्ये–ऽभिषिक्तः स हरिर्नृपः ॥ १० ॥ शीतलस्वामिनस्तीर्थे । हरिराजा बभूव सः ॥ तदादिहरिवंशोऽयं । पप्रथेऽनेकपर्वभृत् ॥ ११ ॥ असाधयद्धरीराजा । वसुधामब्धिमेखलां ॥ राज्ञां कन्याः श्रिय इवो–पयेमेऽनेकशश्च सः ॥ १२ ॥ हरेर्हरिण्यामजनि । गते काले कियत्यपि ॥ पृथुलोरस्थलः पृथ्वी–पतिरित्याख्यया सुतः ॥ ॥ १३ ॥ हरिः समं हरिण्या च । विपेदेऽर्जितपातकः ॥ पृथ्वीपतिस्तयोः सूनुः । पृथ्वीपति-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रथाऽन्नवत् ॥ १४ ॥ पालयित्वा चिरं राज्यं । स्वीयसूनुं महागिरिं ॥ सोऽन्निषिच्य तपस्त-
प्त्वा । त्रिदिवं प्रत्यपद्यत ॥ १५ ॥ तत्सुतोऽनूद्दिमगिरि–स्ततो वसुगिरिस्ततः ॥ गिरिस्ततो
मित्रगिरि–स्ततोऽनूत्सुयशा नृपः ॥ १६ ॥ सर्वे त्रिखंमत्रोक्तारः । सर्वे संघाधिपा नृपाः ॥
आसन् श्रीसोमवंशेऽस्मिन् । जिनधर्मधुरंधराः ॥ १७ ॥ एवं क्रमेणासंख्याता । हरिवंशेऽन्न-
वन्नृपाः ॥ तपसा केऽपि निर्वाणं । ययुः स्वर्गं च केचन ॥ १८ ॥ प्रसंगाद्वंशविस्तारे । वीं-
शार्हत्सुव्रतस्य च ॥ पंचपर्वान्निरामश्रि । चरित्रं कीर्त्तयिष्यते ॥ १९ ॥

इतश्चात्रैव न्नरते । क्षेत्रे मगधमंडनं ॥ नाम्ना पुरं राजगृह–मस्ति स्वस्तिकवद्भुवः ॥ २० ॥
सुमेरोराहृतानीव । शृंगाणि कनकोत्कराः ॥ गृहेऽपि दृश्यंते । यत्र दारिद्र्यतस्काराः ॥ २१ ॥
तीर्थन्नूतं न्नव्यसत्वं । सच्चैत्यं सुप्रदेशमत् ॥ आसीन्मुनीनामपि तत् । सेवनीयं सदा पुरं ॥
॥ २२ ॥ सुपर्वन्निर्बुधैर्यत्र । कविन्निश्च कलाकरैः ॥ प्रीत्यास्थीयत मित्रश्चै । गुरुन्निस्त्रिदिवा-
धिके ॥ २३ ॥ बन्नूव हरिवंशस्य । मुक्तामणिरिवामलः ॥ तत्रोग्रतेजसा मित्रः । सुमित्र इ-
ति न्नूपतिः ॥ २४ ॥ विनयेन बलेनापि । सौन्नाग्येन च सोऽधिपः ॥ विदुषां विद्विषां स्त्रीणां



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



। चित्ते वासमसूत्रयत् ॥ २५ ॥ पद्मादेवीत्यभिधया । पद्मादेवीव जंगमा ॥ तस्याश्चांगं च राज्यं च्चा–लंचकार विकारमुक् ॥ २६ ॥ गुणैः शीलादिभिस्तैस्तै–र्बाह्याभ्यंतरनिर्मलैः ॥ सात्मानं भूषयामास । यथा हारादिभिर्वपुः ॥ २७ ॥ इतश्च प्राणतात्कल्पात् । पूर्णायुर्भवसंक्षयात् ॥ प्रभुः श्रावणराकायां । तस्याः कुक्षाववातरत् ॥ २८ ॥ चतुर्दशमहास्वप्नां–स्तीर्थकृज्जन्मसूचकान् ॥ सुखसुप्ता निशाशेषे । तदा देवी ददर्श सा ॥ २९ ॥ ज्येष्टस्य कृष्णाष्टम्यां भे । श्रवणे कूर्मलांछनं ॥ तमालश्यामलच्छायं । समयेऽसूत सा सुतं ॥ ३० ॥ विहिते दिक्कुमारीभिः । सूतिकर्मणि भक्तितः ॥ अर्हन् स विंशतितमो । निन्ये मेरौ बिडौजसा ॥ ३१ ॥ सौधर्मेशोत्संगभाज–स्त्रिषष्टींद्रैर्जगद् गुरोः ॥ जन्माभिषेको विदधे । पावनैस्तीर्थवारिभिः ॥ ३२ ॥ कृत्वा पूजां स्तुतिं भक्त्या । सर्वेऽपि सुरनायकाः ॥ मातुः पार्श्वे विभुं मुक्त्वा । ययुर्नंदीश्वरादिषु ॥ ३३ ॥ चक्रे जन्मोत्सवं सूनोः । सुमित्रोऽपि नृपः प्रगे ॥ मुनिसुव्रत इत्याख्या–मपि लोकंपृणीभवन् ॥ ३४ ॥ ज्ञानत्रयपवित्रात्मा । बाल्यमुल्लंघ्य सर्ववित् ॥ यौवने भगवान् जातो । विंशतिर्ध्वासनोन्नतः ॥ ३५ ॥ प्रभाकरनरेंद्रस्य । पृथ्वीपुरपतेः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुतां ॥ प्रजावतीं सुव्रताई–न्नुपयेमे स्वयंवरे ॥ ३६ ॥ मुनिसुव्रतनाथस्य । सुव्रतो नाम नं-
दनः ॥ जज्ञे प्रजावतीदेव्यां । प्राच्यामिव विजाकरः ॥ ३७ ॥ प्रपाल्य राज्यं जगवान् । द-
शम्यां शुक्ले फाल्गुने ॥ श्रवणे प्राव्रजज्राज्ञां । सहस्रेण समं ततः ॥ ३८ ॥ फाल्गुने कृष्ण-
द्वादश्यां । श्रवणे जे जगद्विज्ञोः ॥ घातिकर्मक्षयाज्जज्ञे । ज्ञानं शक्रकृतोत्सवं ॥ ३९ ॥ बो-
धयन् जगवान् विश्वं । देशनांशुजिरन्यदा ॥ नगरे समवासार्षीत् । प्रतिष्ठानाजिधे निशि ॥
॥ ४० ॥ मत्वाश्वमेधे प्राड्मित्रं । हन्यमानं विभुर्हयं ॥ प्रातः पुरे जृगुकच्छे । निशायामेव
चाचलत् ॥ ४१ ॥ विशश्राम क्षणं रात्रि–मध्यं सिद्धपुरे विभुः ॥ प्रातस्तत्र च तच्चैत्य–म-
करोद्ध्ज्ञजृन्नृपः ॥ ४२ ॥ रात्रिचारेण षष्टिं स । योजनान्यतिलंघ्य च ॥ कानने समवासा-
र्षी–त्तत्र कोरंटकाजिधे ॥ ४३ ॥ प्रातर्देवैः कृते सम–वसरणे पुरप्रभुः ॥ जितशत्रुर्विभुं नंतुं ।
तुरंगं तमधिश्रितः ॥ ४४ ॥ स्वामिनो दर्शनादेवो–त्कर्णः स तुरगोऽपि सन् ॥ सर्वलोकंपृ-
णां तत्र । देशनामशृणोदिति ॥ ४५ ॥

अस्मिन् क्रूरे जवारण्ये । कुकर्मश्वापदाकुले ॥ अशरण्यो हि संसारी । बाध्यते नरका-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रिभिः ॥ ४६ ॥ चरंश्चतुर्गतिद्वारे । चतुर्भिः स कषायकैः ॥ रुद्धः किल्बिषभिल्लेन । स्वेच्छयैव विडंब्यते ॥ ४७ ॥ तत्राकारणमित्रेण । जगत्पूज्येन देहभृत् ॥ रक्ष्यते सर्वथा धर्मे–णैव नान्येन केनचित् ॥ ४८ ॥ निःस्वामिकानां यः स्वामी । धर्मः सर्वाभयंकरः ॥ सेव्यः स सर्वदा भव्यैः । स्वर्मुक्तिसुखकारणं ॥४९॥ देशनांते ततोऽपृच्छ–ज्जितशत्रुर्जगद्विभुं ॥ के केऽत्र भगवन्नापु–र्जना धर्मं तवोदितं ॥ ५० ॥ विनाश्वं नापरः कश्चि–दित्युक्तेऽथ जिनेन सः ॥ पुनरूचे विभो कोऽय–मश्वो यः प्राप्तवान् वृषं ॥ ५१ ॥ स्वाम्यप्यथो वाचमुपा–ददे शृणु महीपते ॥ सुरश्रेष्टः पुराभूवं । चंपायामहमीश्वरः ॥ ५२ ॥ मन्मित्रं सचिवः सोऽयं । मतिसागरनामभृत् ॥ बभूव मायामिथ्यात्व–ग्रस्तसर्वांगचेतनः ॥ ५३ ॥ ततो मृत्वा भवं भ्रांत्वा । पद्मिनीखंडपत्तने ॥ अयं सागरदत्ताख्यो । मिथ्यात्वी समभूद्वणिक् ॥ ५४ ॥ तत्र चाभूज्जिनधर्मो । नाम्ना श्रावकशेखरः ॥ सागरेण समं प्रीति–स्तस्यासीदतिशायिनी ॥ ५५ ॥ तावन्यदा मुनिं नंतुं । गतौ पौषधवेश्मनि ॥ तद्वक्त्रपद्मादश्रौष्टां । धर्ममित्यपि कामदं ॥५६॥ मृन्मयं हैमनेरत्न–मयं वा त्रिंबमार्हतं ॥ यः कारयेत्कुकर्माणि । स मथ्नाति भवांतरे ॥५७॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रुत्वा सागरदत्तस्तत् । सौवर्णं बिंबमार्हतं ॥ कारयित्वा निजगृहे । साधुभिः प्रत्यति-
ष्टपत् ॥ ५८ ॥ नगरस्य बहिस्तस्य । तेनासीत्कारितं पुरा ॥ शिवायतनमुत्तुंगं । सोऽगात्तत्रो-
त्तरायने ॥५९॥ घृतकुंभेभ्य आकृष्य-माणेभ्य उपदेहिकाः ॥ पूजकैश्चूर्ण्यमानाः स । तत्रा-
लोकयातिदुःखितः ॥ ६० ॥ वस्त्रेणापनयत्ताः स । कृपावांस्तत्क्षणादथ ॥पूजकोऽचूर्णयत्पाद-घा-
ताश्चेत्युच्चरन् मुहुः ॥ ६१ ॥ पाखंडिभिः श्वेतपटै-रसि किं रे प्रतारितः ॥ यदेवं मायया जं-
तून् । वृथा रक्षसि सागर ॥ ६२ ॥ [illegible] ॥ उपेक्ष्यमाणे च तदा । तदाचार्येऽपि सागरः ॥
एवं विचिंतयामास । धिगहो निर्घृणानमून् ॥ ६३ ॥ गुरुबुद्ध्या कथममी । पूज्यते दारुणा-
शयाः ॥ आत्मानं यजमानं च । दुर्गतौ पातयंति ये ॥ ६४ ॥ विचिंत्येत्युपरोधाच्च । कृत्वा त-
त्कर्म सागरः ॥ अनासादितसम्यक्त्वो । दानशीलस्वभावतः ॥ ६५ ॥ महारंभार्जितधन-स्था-
णनिष्ठो विपद्य सः ॥ जात्यस्तवाश्वोऽयमभू-त्तद्घोषायाहमागमं ॥ ६६ ॥ प्राग्जन्मकारितजि-
न-प्रतिमायाः प्रभावतः ॥ मद्योगं धर्मयोगं च । लब्धवानेष सांप्रतं ॥ ६७ ॥ इति श्रुत्वा स
जात्योऽश्वो । जातजातिस्मृतिस्ततः ॥ जग्राह स्वामिनः पार्श्वे-ऽनशनं भवभीरुकः ॥ ६८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ सती स सन्नाहान् । यावत् सम्यक्त्ववान् मृतः ॥ समाधिना सहस्रारे । अन्नूव सुरस-त्तमः ॥ ६ए ॥ प्राग्जन्मावधिना ज्ञात्वा । स सुरो भुवमेत्य च ॥ स्वर्णप्राकारमध्यस्थां । सुव्रतप्रतिमां व्यधात् ॥ ७० ॥ अश्वानुकारि च पुर-स्तत्कृत्वा सुव्रतार्हतः ॥ ज्नक्तानां पूरयामास । स मनोरथमुच्चकैः ॥ ७१ ॥ ततः प्रजृति तल्लोके । प्रख्यातमतिपावनं ॥ तीर्थमश्वावबोधाख्यं । नृगुकच्छमनूत्पुरं ॥ ७२ ॥ स यथैकगुणं धर्मं । कृत्वापत्तत्फलं बहु ॥ तद्धन्नाप्यत्र लन्नते । दातासंख्यगुणं धनं ॥ ७३ ॥ यत्र नृगौ नर्मदायास्त-त्पुरं कच्छनिन्नं ननु ॥ शाड्वलं तेन तत्ख्यातं । नृगुकच्छमनूत्स्फुटं ॥ ७४ ॥ सुव्रतार्हत्स्नात्रपयो-निर्मला नर्मदा नदी ॥ दीनानदीनान् कुरुते । तरुसंततिशोन्निनी ॥ ७५ ॥ तव प्रपातो यन्नीचैः । स्यादुच्चैर्मम सेविनां ॥ गतिरित्यूर्मिन्निर्यत्र । स्वर्धुनीं नर्मदाहसत् ॥ ७६ ॥ निम्नगां नर्मदां लोको । वदतु स्वेच्छया पुनः ॥ उन्निम्नगेयं यद्धत्ते । जनानुन्निम्नगानपि ॥ ७७ ॥ मुनिसुव्रततीर्थेश-स्तीर्थेशे विमलाचले ॥ ततस्तु समवसृतः । पूजितः स सुरासुरैः ॥ ७८ ॥ तत्र सर्वाणि शृंगाणि । पादन्यासैर्जगद्विन्नुः ॥ विधाय तीर्थरूपाणि । नृगुकच्छं पुनर्ययौ ॥ ७ए ॥ सौरी-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुरे च चंपायां । प्रतिष्टानपुरे तथा ॥ सिद्धिपुरहस्तिनाग–मुखेष्वन्येषु सुव्रतः ॥ ८० ॥ वि-
हृत्य सर्वतीर्थानि । कृत्वोद्धृत्य जनान् बहून् ॥ सम्मेतशिखरं प्राप । सहस्रमुनिसंयुतः ॥८१॥
युग्मं ॥ मासस्यांते ज्येष्टकृष्ण–नवम्यां श्रवणे च ज्ने ॥ समं तैर्मुनिज्निः स्वामी । ययौ प-
दमनश्वरं ॥ ८२ ॥ सार्धाः सप्ताब्दसहस्राः । कौमारव्रतयोः पृथक् ॥ राज्ये पंचदश त्रिंश–
दित्यायुः सुव्रतप्रज्नोः ॥ ८३ ॥ सुव्रतार्हन्मृगुकच्छ–तीर्थयोरनयोरदः ॥ चरितं ज्नव्यसत्वानां । ज्नू-
यात् किल्बिषशांतये ॥ ८४ ॥

मुनिसुव्रततीर्थेशात् । सुव्रतो नाम ज्नूपतिः ॥ बज्नूवान्ये ततो भूपा–स्तद्वंशे ज्नूरिशोऽज्नवन्
॥८५॥ इतश्चात्रास्ति ज्नरते । मथुरापुः श्रियःपदं ॥ धाराक्लिवद्यमुनया । कल्लोलेनव शोज्निता ।८६।
तस्यां पुर्यां हरिवंश्या–द्वसुपुत्राद्बृहद्ध्वजात् ॥ गतेषु ज्नूयस्सु नृपे–ष्वज्नून्नाम्ना यदुर्नृपः ॥८७॥
यदोरप्यज्नवत्सूनुः । सूरः सुरसमद्युतिः ॥ सूरस्यापि सुतौ शौरि–सुवीरौ वीरकुंजरौ ॥८८॥ शौरिं
राज्ये यौवराज्ये । सुवीरं न्यस्य सूरराट् ॥ जातसंसारवैराग्यः । पारिव्राज्यमुपाददे ॥८९॥ शौ-
रिस्तु मथुराराज्यं । सुवीरायानुजन्मने ॥ दत्वा कुशार्त्तदेशेऽगा–त्तत्र शौर्यपुरं न्यधात् ॥९०॥ सू-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नवांधकवृष्ण्याद्या। जज्ञिरे शौरिनूभुजः ॥ सुवीरस्य पुनर्भोज-वृष्ण्याद्या अमितौजसः ॥९१॥
सुवीरो मधुराराज्यं। स्वं दत्वा भोजवृष्णये ॥ पुरं सिंधुषु सौवीरं। निधायास्थान्महाभुजः॥९२॥
विन्यस्यांधकवृष्णिं स्वे। राज्ये शौरिर्यशस्विनं ॥ सुप्रतिष्ठमुनेः पार्श्वे। प्रव्रज्य प्रययौ शिवं
॥ ९३ ॥ भोजवृष्णेर्मधुरायां। राज्यं पालयतः सतः ॥ उग्रसेनोऽभवत्सूनु-रुदग्रभुजविक्रमः
॥ ९४ ॥ जज्ञिरेंधकवृष्णेश्च। सुभद्रायां दशात्मजाः ॥ समुद्रविजयोऽक्षोभ्यः। स्तिमितः
सागरोऽपि च ॥ ९५ ॥ हिमवानचलश्चैव। धरणः पूरणस्तथा ॥ अभिचंद्रो वसुदेवो। दशा-
र्हाख्या दशापि ते ॥ ९६ ॥ युग्मं ॥ समशीला अमी सर्वे। मिथः प्रीतिपरायणाः ॥ श-
स्त्रशास्त्रकृताभ्यासाः। पितृभक्तिं व्यधुर्मुदा ॥ ९७ ॥ तेषामभूतामनुजे। कुंतीमद्री च नाम-
तः ॥ मिथो रूपश्रिया कामं। स्पर्द्धमाने कलोज्ज्वले ॥ ९८ ॥

इतश्च पूर्वं वृषभ-स्वामिनः कुरुरित्यभूत् ॥ सूनुर्यस्याभिधानेन। कुरुक्षेत्रमिहोच्यते ॥
॥ ९९ ॥ कुरोः सूनुरभूद्धस्ती। यन्नाम्ना हस्तिनापुरं ॥ हस्तिभूपतिसंताने। विश्ववीर्योऽभ-
वन्नृपः ॥ ४०० ॥ सनत्कुमार इत्यासी-च्छांतिः कुंथुररस्तथा ॥ ततः क्रमादमी चक्र-धरा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्तीर्थकृतस्ततः ॥ १ ॥ इंद्रकेतुस्ततः कीर्त्ति-केतुर्वैरिकुलांतकृत् ॥ शुन्नवीर्यः सुवीर्यश्चा-नंत-
वीर्यो नृपोऽजनि ॥ २ ॥ तस्य सूनुः कृतवीर्यः । सुन्नूमश्चक्रन्नृत्ततः ॥ ततोऽप्यसंख्यन्नूपेषु ।
गतेष्वजनि शांतनुः ॥ ३ ॥ हस्तिनापुरसंस्थानः । स पातिस्म धरातलं ॥ ध्रुवस्त्रिदशशैल-
स्थो । ज्योतिश्चक्रमिवाखिलं ॥ ४ ॥ सोऽन्यदा नीलवसनो । बर्हिबर्हधरो नृपः ॥ पूर्वं वागु-
रिन्नी रुद्धं । धनुष्मान् वनमाविशत् ॥ ५ ॥ सर्वे कौतूहलोत्ताला । व्याधा विपिनमध्यगाः ॥
क्षोन्नयामासुरारण्यान् । जीवान् बूत्कारवैर्नवैः ॥ ६ ॥ धसंतः केऽपि धावंत-स्तर्जयंतश्च के-
चन ॥ हक्कान्निर्वनसत्वानि । विसत्वानि व्यधुः क्षणात् ॥ ७ ॥ नृपधन्वरवोत्कर्णा । अरण्ये
मृगशावकाः ॥ चटुलैः स्मारयामासु-र्लोचनैर्वनितांबकं ॥ ८ ॥ पापर्द्धिरससंसक्ते । समग्रे
धीवरे जने ॥ हयाकृष्टो नृपो दूरं । जगाम मृगपृष्टगः ॥ ९ ॥ यथा यथा मृगो याति । शां-
तनुश्च तथा तथा ॥ आकृष्टधन्वा समन्नू-दाकृष्ट इव पृष्टगः ॥ १० ॥ वेगिना तुरगेणाथ । रा-
जा तत्र ब्रमन् वने ॥ गंगातटे महाचैत्य-मपश्यद्रत्ननिर्मितं ॥ ११ ॥ ततो दध्यौ धराधीशः ।
प्रासादोऽयं सुधोज्ज्वलः ॥ यदीयकिरणैर्जाता । मन्ये गंगापि निर्मला ॥ १२ ॥ अस्य कांति-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भ्राजंति । परितोऽपि द्रुमा अमी ॥ सपुष्पा इव सज्ज्योत्स्नाः । स्फुरिता इव वारिदाः ॥१३॥
चिंतयन्निति भूपालः । कौतुकी पूतकीर्त्तिभृत् ॥ जगाम देवतागार–मध्यं मध्यमलोकपः ॥
॥ १४ ॥ स तत्र विन्नसत्पापां । प्रतिमां प्रथमप्रभोः ॥ ददर्श देवतागारे । चंद्रे चंदनबिंदुवत्
॥ १५ ॥ नमस्कृत्य जिनं सोऽग्र । निषण्णो मत्तवारणे ॥ कन्यामप्सरसस्तुल्या–मेकामैक्षिष्ट
तत्र च ॥ १६ ॥ एषा सुवेषा किं शेषा । सृष्टेरिष्टेन वेधसा ॥ सृष्टा विष्टपशृंगारा । शृंगाररस-
जीविनी ॥ १७ ॥ किं स्वर्गसद्मशोभाकृत्–सुंदरीदरकारिणी ॥ विष्टपत्रयसौंदर्य–सारभूतेय-
मुत्तमा ॥ १८ ॥ विकल्पानिति संचिंत्य । तन्मुखे दत्तलोचनः ॥ जगाद सादरं राजा । गि-
रा स्नेहपवित्रया ॥ १९ ॥ कासीह काश्यपीरत्न । किमयत्नमिति स्थितिः ॥ कस्यासि दुहि-
तावश्य–मंगिवश्यमहौषधी ॥ २० ॥ किं वा मत्रैत्रपुण्येना–गण्येनागा इहाधुना ॥ मत् श्रु-
ती प्रीणय प्रीत्या । तन्निजास्यवचोऽमृतैः ॥ २१ ॥ ततश्च कश्चिदभ्येत्य । त्वरितं तत्पुरः
स्थितः ॥ उवाच वाचं राजेंद्र । शृणवस्याश्चरितं शुभं ॥ २२ ॥
विद्याधरपतेर्जह्नो–र्नंदनानंदकारिणी ॥ सेयं समग्रशास्त्रार्थ–मधीतेस्म कलागुरोः ॥२३॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्रमेण स्मरसाम्राज्य–राजधानीयमुत्तमं ॥ प्राप्तेयं यौवनं नाम्ना । गंगा रंगाय देहिनः ॥२४॥ अन्यदास्यां मुदोत्संगे । निषण्णायां पितुः प्रगे ॥ चारणश्रमणः कश्चि–द्दिवो ज्ञानी समाययौ ॥ २५ ॥ तं नत्वा जह्नुनृपालो । निवेश्य च वरासने ॥ वरं पप्रच्छ दुहितुः । सदृक्षं रूपविद्यया ॥ २६ ॥ ततो जगौ मुनिर्नृपः । शांतनुः स्वर्धुनीतटे ॥ यास्यति मृगयाकृष्टः । स वरोऽस्या भविष्यति ॥ २७ ॥ इति श्रुत्वा महीशेन । वंदितः स मुनिर्ययौ ॥ जह्नुस्तु गंगातीरेऽत्र । मणिसौधमिदं व्यधात् ॥ २८ ॥ पितुरादेशतो बाला–पीयमत्र कृतस्थितिः ॥ नित्यमाराधयत्यादि–नाथं गंगातटस्थिता ॥ २९ ॥ तदस्या भाग्यसंभारै–र्जाने त्वं स इवाधुना ॥ आयातस्तदिमां राज–न्नुद्वहादिजिनाग्रतः ॥ ३० ॥ इति श्रुत्वाथ सा स्मित्वा । विमलैर्दशनांशुभिः ॥ प्रवेशे प्रेयसः प्रीते–स्तोरणं सृजती जगौ ॥ ३१ ॥ स मे वरयिता योऽनु–ल्लंघ्य मां कर्मकृन्नृपः ॥ यदा न कर्त्ता कथितं । तदैष्यामि पितुर्गृहान् ॥ ३२ ॥ तदंगीकृत्य नृपाल–स्तदैव जिनसाक्षिकं ॥ जग्राह पाणिना गंगा–मनंगाधीनमानसः ॥ ३३ ॥ तदैव जह्नुस्तद् ज्ञात्वा । वेगादागत्य तत्र च ॥ तयोरासूत्रयामास । विवाहं विहितोत्सवः ॥ ३४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निजं स्थानं गते जह्वा–वथ तौ दंपती मुदा ॥ निषस्नावविषस्नांगौ । तेजो व्योमन्यपश्यतां ॥ ३५ ॥ किमेतद् द्युमणेः किं वा–शुशुक्षणिजवं किमु ॥ निशामणेर्विद्युतो वा । तपस्तेजोऽथवा मुनेः ॥ ३६ ॥ तयोश्चिंतयतोरित्थं । तत्तेजः स्फुर्त्तिमद्दिवः ॥ रोदसी द्योतयद्वेगा—न्नेत्रयोर्लक्ष्यतां ययौ ॥ ३७ ॥ युग्मं ॥ तेजोविवर्त्ति श्रमण–द्वंद्वमद्वंद्वपुण्ययुक् ॥ ततस्तौ वीक्ष्य प्रत्यक्ष–मुदस्थातां निजासनात् ॥३८॥ तौ मुनी कमनीयाभिः । स्तुतिभिः प्रथमं प्रभुं ॥ अर्चयामासतुर्भक्त्या । मुक्त्यागाराग्रवर्त्तिनं ॥ ३९ ॥ व्यावर्त्तमानावथ तौ । ताभ्यां भक्त्या नमस्कृतौ ॥ निषीदतुः क्षणं तत्र । जिनवेश्मावलोकिनौ ॥ ४० ॥

ततः श्रीशांतनू राजा । तावपृच्छन्मुनीश्वरौ ॥ भगवंताविह कुतो–ऽधुना प्राप्तौ जिनालयं ॥ ४१ ॥ तयोरेको मुनिः प्राह । ह्यावां विद्याधरौ मुनी ॥ तीर्थात्तीर्थे जिनान्नंतुं । भ्रमावः पुण्यलंपटौ ॥ ४२ ॥ सम्मेतार्बुदवैभार–रुचकाष्टापदादिषु ॥ शत्रुंजये रैवताद्रौ । जग्मिवार्हन्नमस्यया ॥ ४३ ॥ भावितं तत्र नेमीशं । नत्वा यावत्तुरीयके ॥ शिखरे कांचनाभिख्ये । गह्वावो रैवतस्य च ॥ ४४ ॥ तावत्तुष्णकराकारं । देहतेजोभिरुच्चकैः ॥ द्योतयंतं दिशः सर्वा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



। रत्नमूर्त्तिमिवाद्भुतं ॥ ४५ ॥ अपश्याव सुरं पुण्य–न्नासुरं तत्र कंचन ॥ प्रासादे नूतने नेमिं
। पूजयंतं स्वभक्तितः ॥ ४६ ॥ युग्मं ॥ ततश्चैकेन देवेन । स पृष्टो रूपतां जगौ ॥ पुराहं रै-
५७६॥ वतोपांते । सुग्रामे क्षत्रियोऽभवं ॥ ४७ ॥ सदैवोपद्रवं लोकान् । यात्रिकान् मलिनाशयः ॥
निर्घृणोऽमारयं जीवा–नवदं वितथं वचः ॥ ४८ ॥ हत्यादिदोषदुष्टांत–र्भूताव्याप्तकलेवरः ॥
प्राप्याहं तीर्थमाहात्म्यं । मुनेरत्रागमं ननु ॥ ४९ ॥ अत्र मे कांचने शृंगे । नेमिं पूजयतः
सतः ॥ उज्जयंत्या जलस्नानात् । क्रमाद्रोगो व्यपासरत् ॥ ५० ॥ चक्रिणा भरतेशेन । का-
रिते नेमिमंदिरे ॥ जिनमर्चयतः पाप–संततिर्व्यरमन्मम ॥ ५१ ॥ अत्रैव तीर्थमाहात्म्या–दा-
त्मारामं भजन्नहं ॥ इष्टकूरूपं सुरत्वं च । प्राप्तं लोकोत्तरं महः ॥ ५२ ॥ सेवनेनास्य देवत्वं ।
यल्लब्धं तेन तत्पुनः ॥ स्प्रष्टुमागां जिनवेश्म–मप्यकारयमादरात् ॥ ५३ ॥ यस्मादासाद्यते
सिद्धि–राश्रयेत न तद्यदि ॥ तदा दुर्गतिपातः स्यात् । स्वामिद्रोहैनसानिशं ॥ ५४ ॥ अस्यै- ॥५७६॥
व सेवनान्नित्यं । ममागामिभवे ननु ॥ भूत्वा केवलमानंदि । मुक्तिभुक्तिर्भविष्यति ॥ ५५ ॥
अमुष्य सेवनाद्धत्या–मुखा दोषाः प्रयांत्यपि ॥ विशेषादत्र भाव्यस्मि । सदा सान्निध्यकारकः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ५६ ॥ सिद्धिविनायकाख्येन । मया देवेन संश्रितं ॥ तीर्थमेतद्धि सौख्याया-ऽन्नयाय न्न-
विता मुनी ॥ ५७ ॥ स इत्थं तीर्थमाहात्म्य-मात्मनोऽपि कथामिति ॥ कथयित्वा नन्नोद्यो-
ती । ज्योतीरूपो दिवं ययौ ॥ ५८ ॥

श्रुत्वात्रामपि नत्वा च । जिनं तीर्थेषु लोलुपौ ॥ मणिचैत्यमिदं रम्य-मपश्यावात्र या-
यिनौ ॥ ५९ ॥ अत्राप्यादिजिनं नत्वा-ऽाढ्यावैराग्यरंजितौ ॥ स्वजन्म सफलीकर्त्तुं । यास्या-
वस्तीर्थमन्यतः ॥ ६० ॥ इत्युक्त्वा गतयोः सद्यो । व्रतिनोः शांतनुर्नृपः ॥ दध्यौ मनस्यदं ती-
र्थे । कदा यास्यामि पुण्यतः ॥ ६१ ॥ इति चिंतयतस्तस्य । सैन्यं पृष्टानुगं क्षणात् ॥ तच्च गं-
गातटे चैत्य-मपश्यत्सप्रियं नृपं ॥ ६२ ॥ ततो जयजयाराव-पुरस्सरमधीश्वरं ॥ जगुस्ते
सैनिका नत्वा । हर्षोत्कर्षप्रकार्षिणः ॥ ६३ ॥ अस्माकं पश्यतां दूर-मगमस्त्वं विन्नो हहा ॥
चिराल्लब्धोऽसि तेनाद्य । सुमंगलमखंडितं ॥ ६४ ॥ ततो राजा गजारूढो । लक्ष्म्येव किल
मूर्त्तया । गंगया सहितः पत्न्या । ययौ स्वं हस्तिनापुरं ॥ ६५ ॥ वने द्रुमघने केलि-शैले स-
रिति सर्वतः ॥ अवियुक्तस्तयारंस्त । दिवानिशमथो नृपः ॥ ६६ ॥ गतेऽथ काले कियति । गं-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गायां नृपनंदनः ॥ सुस्वप्नसूचितो जातो । गांगेय इति नामतः ॥६७॥ तेजोभिर्भास्कर इव ।
कलावानमृतांशुवत् ॥ कविः कविरिवात्यंतं । बुधो विबुधवल्लभः ॥ ६८ ॥ गुरुवत्सर्वविद्योऽ-
भूत् । सर्वतो मंगलप्रियः ॥ असत्कर्मणि मंदोऽपि । स महीपतिनंदनः ॥ ६९ ॥ युग्मं ॥ धा-
त्रीभिः स्नेहधात्रीभिः । स धात्रीपतिनंदनः ॥ लाल्यमानोऽनुरोधेन । क्रमेण प्रापदुन्नतिं ॥७०॥
तयार्थितोऽशांतनयः । शांतनुर्विनयाधिकं ॥ गंगयाथापि मृगया—व्यसनं नामुचत्क्षणं ॥ ७१ ॥
नाम्नापि परिणामेन । पापर्द्धिः सर्वथा त्वियं ॥ तव स्वामिन् युज्यते ना—दिनाथकुलजन्मनः
॥ ७२ ॥ स इत्थं वार्यमाणोऽपि । पापर्द्धिं न यदा जहौ ॥ तदादाय सुतं गंगा । ययौ पितृ-
निकेतनं ॥ ७३ ॥ युग्मं ॥ वनान्निवृत्तोऽथ नृपो—ऽपश्यन् भार्यां मुमूर्छ च ॥ लब्धसंज्ञस्त्विव-
ति प्रोच्चै—र्विललाप शुचाकुलः ॥ ७४ ॥ गंगेऽनंगेन रंगेण । मदंगं निविडैः शरैः ॥ तद्रक्ष्यमा-
णं कथं वीक्ष्यो—पेक्ष्यसे क्षत्रियाण्यसि ॥ ७५ ॥ हा प्रिये नाप्रियं तुभ्यं । कदापि कृतवानहं
॥ तन्मामेकपदे किं त्वं । जहासि किल सागसं ॥ ७६ ॥ कुलामात्या नृपमिति । विह्वलं वि-
रहाग्निना ॥ नयवाक्यामृतैः संबो—धयामासुरिति स्फुटं ॥ ७७ ॥ स्वामिन्नज्ञ इवज्ञोऽपि ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मेरुवद्वायुवीजनैः ॥ शोकादिन्निस्त्वमप्येवं । वाध्यसे किमिवाधुना ॥ ७८ ॥ नवंति किल रा-
जानो । वसुधापतयोऽखिलाः ॥ तत्त्वं किमु महेलार्थ-मवहेलयसि मेदिनीं ॥ ७९ ॥ संयोगा
देहिनां नित्यं । नवंति न नवंति च ॥ तत्कृते कः सुधीर्हर्ष-शोकाभ्यामपि वाध्यते ॥ ८० ॥
स्मर स्वयं प्रतिज्ञातं । प्राक्तनं हि निजं वचः ॥ त्वयावधीरिता गंगा-ऽगमत्तेन मनस्विनी ॥
॥ ८१ ॥ तैरित्थं मंत्रिन्नी राजा । वोधितः स्मारितोऽपि च ॥ असुचच्च शुचं वाह्यं । किं तु
चित्तात्मनाग्रतु ॥ ८२ ॥ स इत्थं विरहव्याप्तः । सागरोपमवत्सरान् ॥ चतुर्विंशतिमंगार-तप्त-
वत्रात्यवाहयत् ॥ ८३ ॥

इतश्च गंगा तं पुत्र-मादाय पितृमंदिरे ॥ गता सन्मानिता जह्नु-नृपनर्त्रा सुखमास्थि-
ता ॥ ८४ ॥ वर्द्धमानः क्रमात्तत्र । गांगेयो गुरुसन्निधौ ॥ आग्रहादथ जग्राह । सकला विम-
लाः कलाः ॥ ८५ ॥ अधीयानो धनुर्विद्यां । पितृबंधोः शरैः स हि ॥ जिगायाषाढपाथोद-धा-
राः शक्रधनुर्नवाः ॥ ८६ ॥ क्रमादशेषशास्त्राणां । शस्त्राणामपि पारगः ॥ सोऽनूर्यौवनसंप-
न्नः । स्पृहणीयोऽबलाजनैः ॥ ८७ ॥ चारणश्रमणा धर्म-मासाद्य स विरागवान् ॥ दयावा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





न सर्वजीवेषु । बभूव यतिवत्क्षमी ॥ ८८ ॥ वैराग्याच्च सुरसरि–त्तीरे नंदनकानने ॥ आग-
त्याराधयामास । श्रीयुगादिजिनेश्वरं ॥ ८९ ॥ इतस्तु शांतनू राजा । पर्यटन् मृगयारसात्
॥ तद्वनं जालिकैर्वागु–रिभिरास स वेष्टयां ॥ ९० ॥ संचारैर्न्नेषणानां च । व्याधानामपि ह-
क्कितैः ॥ तद्वनं चुक्षुभे सर्वं । त्रस्यद्वन्यांगिचालनैः ॥ ९१ ॥ वेष्टिता अपि नश्यंति । केचि-
न्नापयतः परान् ॥ केचित्संतर्जयंत्याशु । व्याधं प्रत्युत धाविनः ॥ ९२ ॥ स्फुरंत्येके पतंत्येके
। हन्यंते केऽपि दुर्मदैः ॥ इत्थं तदा वन्यसत्वाः । कांदिशिका वनेऽभवन् ॥९३॥ ततश्च धन्वी
कवचा–बद्धतूणीरपक्षवान् ॥ वेगादेत्य नृपं प्राह । गांगेयो विनयान्वितः ॥ ९४ ॥ राजंस्त्व-
मसि भूपालः । सर्वे जीवास्त्वयावनौ ॥ रक्षणीया अपायेभ्यो । लोकपालो यतो नृपः ॥९५॥
हंतव्याः सागसो राज्ञा । रक्षणीया निरागसः ॥ एते तु जलघासादा । न हंतव्या निरागसः
॥ ९६ ॥ बलवत्परभूपेषु । समरे युज्यते नृप ॥ पराक्रमस्तथैवात्र । चारुतां नाधिगच्छति ॥
॥ ९७ ॥ यथा च तव सीमासु । मृष्यसे नानयं क्वचित् ॥ तथात्राप्यस्म्यहं रक्षा–करो मृ-
ष्यामि नानयं ॥ ९८ ॥ इत्युक्तवंतमपि तं। राजावज्ञाय रोषतः ॥ प्रावर्त्तत पुना रंतुं । मृग-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





यारसवाहितः ॥ ९९ ॥ गांगेयोऽप्यथ संक्रुद्धो—ऽधिज्यं कृत्वा शरासनं ॥ ससिंहनादमकरो—ट्टंकारं कर्णदारुणं ॥ ५०० ॥ यथैकोऽपि मृगाराति—र्मृगानेको यथा रविः ॥ तमिस्राणि तथा व्याधा—नेकोऽपि स नृपाऽभवत् ॥ १ ॥

अथ कोपान्नृपो धन्वी । तत्रागत्य रणप्रियः ॥ तमाह्वयन्नियुद्धाय । स्वभुजाबलगर्वितः ॥ २ ॥ तौ कोपादथ वीरेंद्रौ । सदोन्निद्रौ रणे मिथः ॥ युयुधातेऽस्त्रसंघातै—स्त्रिजगज्जयकारिणौ ॥ ३ ॥ ततश्च गंगा तद् ज्ञात्वा । चराद्वेगादुपेत्य च ॥ विसृजंती निजान् ज्ञावान् । जगाद नृपतिं मुदा ॥ ४ ॥ स्वामिन् व्यसनसंरूढः । किमेवं विदधासि हा ॥ निजांगजं युद्धयसे यत् । सत्वात्तत्वं विदन्नपि ॥ ५ ॥ इति श्रुत्वा नृपः स्मित्वा । वीक्ष्य तां जह्नुनंदनां ॥ प्रत्यक्षां सहसा स्माह । प्रिये गंगे कुतोऽधुना ॥ ६ ॥ गंगा तत्कथयित्वा च । वेगादेत्य निजांगजं ॥ बोधयामास जल्पंती ॥ पितायं शांतनुस्तव ॥ ७ ॥ अवरुह्य हयाद्राजा । हर्षोत्कर्षाद्वदन् मुहुः ॥ वत्स वत्सेति मामद्या—लिंगयस्व चिरोत्सुकं ॥८॥ गांगेयोऽपि विमुच्यास्त्रं । लुठन् भक्त्या महीतले ॥ केशहस्तैः पितुः पादान् । पस्पर्शाश्रुजलप्लुतैः ॥ ९ ॥ राजा सु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तमथादाय । दोर्भ्यामालिंगदुत्सुकः ॥ द्विधाभूतस्य देहस्य । पुनरैक्यं सृजन्निव ॥ १० ॥ त-
योर्मिलितयोस्तत्र । तदानीं हर्षवारिभिः ॥ सिक्ता महाप्युदलस-त्स्नेहा भर्तृपुत्रयोः ॥११॥
 गंगापि सात्विकान् भावान् । नाटयंती नृपाग्रतः ॥ निषसाद सुतं स्वांके । तमध्यारोपय-
न्मुदा ॥ १२ ॥ राजा तयोः स्नेहभरै-रुद्धकंठः क्षणांतरा ॥ जगाद तद्गतं स्नेहं । वमन्निव नि-
जां प्रियां ॥ १३ ॥ गंगे भज निजं राज्य-मंगीकुरु निजांगजं ॥ प्रिये स्नेहपरैर्नेत्रैः । संभा-
वय च मामपि ॥ १४ ॥ त्वया विरहितः कांते । स्वांते प्रीतिं भजामि न ॥ रात्रिहीनः सु-
धारश्मि-र्मुधारश्मिः कथं न हि ॥१५॥ तदेहि गेहिनि मयि । निधेहि कुटिलां दृशं ॥ नि-
र्वापय मदंगं च । तप्तं त्वद्विरहाग्निना ॥ १६ ॥ ततो जगाद गंगापि । स्वामिन् स्मर निजं
वचः ॥ त्वं चेत्तस्मात्परिभ्रष्टो । भ्रस्याम्येषापि किं तथा ॥ १७ ॥ या जीवहिंसा सकल-दुः-
खौघकुमुदेंदुभा ॥ अहितामपि नात्याक्षी-र्यस्त्वं तां किं पुनर्मया ॥ १८ ॥ तव सूनुरयं स- 
र्वा-न्यूशास्त्रास्त्रकोविदः ॥ धर्मवांस्त्वयि भक्तस्ता-न्मयि लोभं विधेहि मा ॥ १९ ॥ एनमे-
व तत्र स्वामि-न्नुपलक्षयितुं सुतं ॥ आगमं मय्यनुज्ञां त-द्देहि स्वपितृवेश्मनि ॥ २० ॥ इ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 



त्युक्त्वा कामिनी साथ । वार्यमाणापि सादरं ॥ चाटुभिर्भर्तृपुत्राभ्यां । ययौ पितृनिकेतनं ॥ ॥ २१ ॥ राजा प्रियाविरहितो । युक्तः पुत्रेण चाऽन्वभूत् ॥ समदुःखसुखो ग्रीष्मे । सरोवद्व्यं-बु सद्रुमं ॥ २२ ॥ आदाय राजा स्वं पुत्रं । स्वगजाग्रेऽधिरोप्य च ॥ पुरे प्रवेशयामास । महोत्सवपुरस्सरं ॥ २३ ॥ स रेजे तेन पुत्रेण । गुणविद्याकलान्वृता ॥ दिनेनेव दिवानाथ-स्तडागमिव वारिजैः ॥ २४ ॥

अथान्यदा महीजानि-र्लीलया सर्वतो भ्रमन् ॥ कालिंदीकुलमापेदे । गतखेदेन वाजिना ॥ २५ ॥ किमेषा नूत्निया वेणि-स्तस्या एवाक्षिकज्जलं ॥ किंवाप्सरःकुचभ्रष्ट-कस्तूरीवांबु-गाहनात् ॥ २६ ॥ किमस्या जलमादाय । जलदांजनसन्निभः ॥ तस्योत्सर्गात्पुनः शुभ्रो । जायते यन्नरहतौ ॥ २७ ॥ किं वा तीरद्रुमाराम-पौष्यपोषकसंश्रयात् ॥ असौ च तेऽपि च मिथो । दधुर्मेचकवर्णतां ॥ २८ ॥ इत्थं वर्णयतस्तस्य । यमुनायां च खेलती ॥ नावा का-चित्कुरंगाक्षी । तदक्षिपथमाययौ ॥ २९ ॥ किमेषा यमुनादेवी । प्रत्यक्षा निजवारिणि ॥ स्वर्गंगामथवा त्यक्त्वा । प्रागादप्सरसो ह्यसौ ॥ ३० ॥ चिंतयन्निति नृपालो । विद्धो मन्म-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रमार्गणैः ॥ कैशा देवीव नार्यत्रा—पृच्छेहमावहानिति ॥ ३१ ॥ युग्मं ॥ तेषु मुख्यस्ततोऽभ्ये-
त्य । प्रणिपत्य च नाविकः ॥ जगादैषा मम स्वामिन् । दुहिता गुणसंयुता ॥ ३२ ॥ विदु-
षी सर्वशास्त्रेषु । जंगमेव सरस्वती ॥ सर्वलक्षणसंपूर्णा । लक्ष्मीरिव शरीरिणी ॥ ३३ ॥ दि-
व्यौषधीव संस्पर्शात् । सर्वरोगविघातिनी ॥ कल्पवल्लीव गेहस्था । दारिद्र्यरवितापहृत् ॥
॥ ३४ ॥ निष्कलंकेंदुलेखेव । गुरुकाव्यबुधाश्रया ॥ द्यौरिव सदृशप्रेयो—ऽप्राप्त्याद्यापि कुमा-
रिका ॥ ३५ ॥ विशेषकं ॥

श्रुत्वेति राजा व्यावृत्त्य । प्रधानपुरुषान्निजान् ॥ कन्यार्थनाय निपुणान् । प्रैषीन्नाविक-
मंदिरे ॥ ३६ ॥ तेऽत्र सन्मानितास्तेन । निविष्टा विष्टरे वरे ॥ बहुमानान्नृपस्यार्थे—ऽयाचंत कि-
ल तत्सुतां ॥ ३७ ॥ राजा सर्वप्रजापालः । सर्वदेवमयः किल ॥ स ते दुहितरं साक्षा—द्या-
चते शांतनुर्ननु ॥ ३८ ॥ सुतासंबंधविधिना—धुना त्वमपि नाविक ॥ अस्माकमपि पूज्यः स्याः
। सदा नृपसन्मानितः ॥ ३९ ॥ ततः सोऽपि वचः प्राह । नाहमत्रार्थे उच्चकैः ॥ अभ्यर्थनी-
यो हीनत्वात् । सर्वदेवमयो हि सः ॥ ४० ॥ युज्यते ननु संबंधः । समानकुलयोर्द्वयोः ॥

अन्यथा पक्षघाताय । रजनीभास्वतोरिव ॥ ४१ ॥ ततस्तेऽपि जगुर्नेदृग् । रूपं दुष्कुलजं भ-
वेत् ॥ जात्यरत्नोद्भवो नूनं । रोहणाद्रेर्नचान्यतः ॥ ४२ ॥ कार्यांतरेण केनापि । वसतीयं गृहे
तव ॥ अन्यथा तस्य भूपस्य । किमस्यां रमते मनः ॥ ४३ ॥ युक्तायुक्तविचारेण । न युक्तं
तव नाविक ॥ सर्वथा भूपतेराज्ञां । मन्यस्वास्माकमाग्रहात् ॥ ४४ ॥ उवाच स पुनर्मान्या
। भवत्याज्ञा महीभुजः ॥ कन्यार्थे तु विचारो हि । मन्यते विबुधैरपि ॥ ४५ ॥ कन्या नीच-
कुलोत्पत्ते-रियं दुःखाय भाविनी ॥ पत्युरप्यवमानेन । दग्धांगे पिटको यथा ॥ ४६ ॥ गंगा-
यां भूपतेः पुत्रो । गांगेयोऽस्ति स विक्रमी ॥ राज्यैकभारधौरेयो । मदपत्याय दुःखकृत् ॥४७॥
भवित्रीयमपि प्रेष्या । सूनवोऽस्याश्च तद्विधाः ॥ उभयार्थभ्रंशकृते । दास्ये भूपाय नो सुतां
॥ ४८ ॥ श्रुत्वेति सचिवा एत्य । तद्भूपाय व्यजिज्ञपन् ॥ भूपोऽपि दुःखाद्विक्रीता-वशिष्ट इ-
व चाभवत् ॥ ४९ ॥ तद्वृत्तांतमथो ज्ञात्वा । गांगेयोऽपि स्वयं गृहान् ॥ तस्य गत्वा पितृकृ-
ते । प्रार्थयामास कन्यकां ॥५०॥ इयमंबा मे गंगेव । मया पूज्या निरंतरं ॥ सुखं तिष्टतु तद्वा-
चः । सफला मे भवंत्वपि ॥ ५१ ॥ अहं विरागवान् पूर्वं । न राज्येऽस्ति मतिर्मम ॥ अस्याः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सूनुर्मम भ्राता । राज्यभागस्तु निश्चयः ॥ ५२ ॥ मत्सूनवो बलात्तस्मा-दाहरिष्यंति संपदं
॥ इति चेत्तव चित्तेऽस्ति । ब्रह्मचर्यं तदास्तु मे ॥ ५३ ॥ अत्रार्थे साक्षिणो देवा । नृपाः प्र-
तिभुवो मम ॥ प्रतिज्ञायेति गांगेय-स्तस्मात्कन्यामयाचत ॥ ५४ ॥ ततः पुष्पाणि ववृषु-
र्जयशब्दपुरस्सरं ॥ भीष्मव्रतत्वात्तं भीष्मं । जगुश्च त्रिदशा दिवि ॥ ५५ ॥ हृष्टोऽथ नाविकः
प्राह । शृणवस्याः कुलमादितः ॥ ज्योत्स्ना चंद्रमसो ह्येव । न तु मेघान्नदीसूत ॥ ५६ ॥
अस्तीह भारते रत्न-पुरं पुररत्नमंडितं ॥ जिनाज्ञाशेखरो रत्न-शेखरस्तत्र च प्रभुः ॥५७॥
संचरिष्णुः सदा येन । निजाज्ञा सर्वदिङ्मुखं ॥ विश्राम्यते क्षणं वैरि-भूपमूर्ध्नि श्रमच्छिदे
॥ ५८ ॥ भार्या रत्नवती तस्या-ऽनिवार्यांगगुणाश्रया ॥ विद्यते हृदि भूभर्त्तु-र्वसंत्यतुलशी-
लतः ॥ ५९ ॥ सान्यदा शशिलेखायाः । स्वप्नदर्शनतः सुतां ॥ अजीजनदिमां संध्ये-वेंदु-
लेखामनिंदितां ॥ ६० ॥ जातमात्रामिमां कश्चि-द्विद्याभृदपहृत्य च ॥ कालिंदीसैकतेऽत्रैव । ॥ ५८६ ॥
मुक्त्वा वेगात्तिरोदधे ॥ ६१ ॥ रत्नशेखरपुत्रीयं । नाम्ना सत्यवती ननु ॥ सर्वलक्षणसंपूर्णा ।
भाविनी शांतनुप्रिया ॥ ६२ ॥ इत्यंबरगिरं श्रुत्वा । दृष्ट्वा कन्यामिमामहं ॥ आदाय स्वगृहे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





त्रोज्यै–रवर्द्धयमहर्निशं ॥ ६३ ॥ युग्मं ॥ देवोपदिष्टो नृपति–र्वरोऽस्याः शांतनुः किल ॥ गांगेय तव सत्वेन । ममोह्यतु कन्यकां ॥ ६४ ॥ ततः प्रहृष्टो गंगाया । नंदनोऽन्येत्य वेगतः ॥ जगौ पितुः प्रमोदाय । कन्यावृत्तांतमादितः ॥ ६५ ॥ राजापि सुतसत्वेन । किंचिदंतश्चमत्कृतः ॥ हीनं सत्वतया स्वस्य । किंचिदव्रीडत क्षणं ॥ ६६ ॥ विद्याधरैः कृतमहः । शांतनुः पृथिवीपतिः ॥ पर्यणैषीत्सदा सत्य–वर्तीं सत्यवतीं वधूं ॥ ६७ ॥ गंगयेव पयोराशि–र्व्योमेव शशिलेखया ॥ मुद्र्येव वरं रत्नं । तया रेजे महीपतिः ॥ ६८ ॥ तस्याः प्रेमनिमग्नोऽथ । शांतनुः सर्वकर्मन्निः ॥ बुभुजे विषयान् कामं । रम्योद्यानेषु वेश्मसु ॥ ६९ ॥ राज्ञस्तस्यां नयधर्मा–विव पुत्रौ बभूवतुः ॥ नीत्यामिव चित्रांगदो । विचित्रवीर्य इत्यपि ॥ ७० ॥ पापर्द्धिविरतो राजा । ततः शत्रुंजयादिषु ॥ तीर्थेषु कृत्वा सत्पुण्यं । स्वजन्म सफलं व्यधात् ॥ ॥ ७१ ॥ दिवं गतेऽथ क्रमतः । शांतनौ कर्मयोगतः ॥ राज्ये चित्रांगदं भीष्मः । सत्यसंधोऽन्यषेचयत् ॥ ७२ ॥ चित्रांगदोऽन्यदा भीष्म–मवगण्यापि दुर्मदः ॥ चक्रे नीलांगदेनोच्चै–र्गंधर्वेण समं रणः ॥ ७३ ॥ चित्रांगदमथ क्रुद्धो । न्यहन्नीलांगदो बली ॥ अथाङ्गासुतस्तं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च । परासुं समरे ह्यगात् ॥ ७४ ॥ विचित्रवीर्यमवनी–कमनीयपतिं ततः ॥ चकार गंगातनुजो । मनुजोत्तमतां व्रजन् ॥ ७५ ॥ दधौ निजे शिरस्याज्ञा–मर्हतां रिपुमौलिषु ॥ निजाज्ञां धारयामास । यो धरावासवो बली ॥ ७६ ॥

इतश्च काशीनृपते–रंबांबालांबिकाभिधाः ॥ कन्यास्तिस्रोऽभवन् काम–नृपतेः शक्तयो यथा ॥ ७७ ॥ स्वयंवरे तत्र नृपे–ष्वाहूतेषु समंततः ॥ विचित्रवीर्यो नाकारि । तेन सामान्यजातितः ॥ ७८ ॥ ततः क्रुद्धो धुनीसूनु–र्गत्वा तत्र स्वयंवरे ॥ अहरत्कन्यकास्ताश्च । पश्यतामपि भूभुजां ॥ ७९ ॥ ततः क्रुद्धाश्च युद्धाय । सर्वे संभूय भूभुजः ॥ भुदस्त्रिणः ससन्नाहा । भुजकैस्तमढौकयन् ॥ ८० ॥ नक्षत्राणीव तीव्रांशु–स्तुषानिव महाबलः ॥ जिगाय तेजसा सर्वान् । नदीजः परभूभुजः ॥ ८१ ॥ वेगादागत्य गांगेयः । स्वबंधुं तं कनीयसं ॥ महोत्सवैर्नवैः कन्या । मदवानुदवाहयत् ॥ ८२ ॥ तृतीयपुरुषांभोधिं । तरितुं तास्तरीरिव ॥ स तिस्रः कन्या धन्यांगी–रमन्यत महीधवः ॥ ८३ ॥ भुंजानस्य महीजानेः । सुखं वैषयिकं क्रमात् ॥ तासु प्रियासु निपुणा । बभूवुर्नंदनास्त्रयः ॥ ८४ ॥ अंबिकायां धृतराष्ट्रः । स ज-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्मांधः कुकर्मतः ॥ अंबालायामभूत्पांडुः । स चाखंमपराक्रमः ॥ ८५ ॥ अंबायां विडुरो नाम । विटूदराय कृतादरः ॥ इत्येते तनयाश्चारु–विनयावनता बभूः ॥ ८६ ॥ कामाज्ञावशिनो राज्ञो । राजयक्ष्मा वपुः क्षयं ॥ नीत्वा क्षणाहुःखलक्ष्मा–क्षणोत्प्राणान् बलादपि ॥ ८७ ॥ विचित्रयति देवानां । दृशो रूपविपर्ययात् ॥ विचित्रवीर्ये सचिवाः । पांडुं पृथ्वीपतिं व्यधुः ॥ ॥ ८८ ॥ सदाधिनिधनेनोच्चै–र्येन कीर्त्तिधनेन च ॥ गृह्णता न्यायतो दंमं । सधना जनता कृता ॥ ८९ ॥ पूजार्हः स्वगुणैरेवा–र्हत्पूजानिरतो हि सः ॥ जक्त्या मुनींश्च नमति । नम्योऽपि रिपुपार्थिवैः ॥ ९० ॥

अन्यदा स मुदा राजा । विनोदाय मधूत्सवे ॥ अक्षीणां वनलक्ष्मीणा–मीक्षितुं चारुतां ययौ ॥ ९१ ॥ माकंदे समदी चारु–नारंगरंगवानरं ॥ चंपके कामदेवस्य । दीपकेऽदीप्यं-तांतरा ॥ ९२ ॥ अलंचकार स मुदं । बकुले कुड्मलाकुले ॥ अशोकोऽनूदशोके च । मल्लिकामाढ्यमालितः ॥ ९३ ॥ [illegible] ॥ पांडुरीकृतब्रह्मांमः । कीर्त्या कुमुदगौरया ॥ वनावनिमलंचक्रे । वसंत इव पांडुराट् ॥ ९४ ॥ व्रजन् पुरश्चूततले । पश्यंतं फलकं मुहुः ॥ निर्नि-



For Private And Personal Use Only

मेषं नरं कंचि–द्पश्यत्कौतुकाकुलः ॥ ९५ ॥ आछादयंतं तं वस्त्रा–चलेन नृपतिस्ततः ॥ तं
जगादेति फलकं । प्रार्थयन् किमिदं ननु ॥ ९६ ॥ तत्र वीक्ष्य कुरंगाक्ष्याः । कस्याश्चिद्रूपम-
द्भुतं ॥ तल्लावण्यांबुसंगात्स । शिरःपद्ममधूनयत् ॥ ९७ ॥ अहो सर्वांगसौंदर्य–महो लवणि-
मा नवः ॥ अहो कांतिभरः कश्चि–त्सहजोऽस्याः शरीरजः ॥ ९८ ॥ अस्याः सविधमासा-
द्य । पद्मेंदुतिमिराण्यपि ॥ चक्षुर्वक्त्रकचव्याजा–दमुचन्नित्यवैरतां ॥ ९९ ॥ अस्याश्चित्राकृते-
र्हेम–लतायाः पल्लवाः करौ ॥ पुष्पं दंता हासो गंधः । फलानि निबिडौ कुचौ ॥ ६०० ॥
न गीर्वाणकृते सृष्टि–रस्या मधुरवाग्गिरः ॥ आशीर्विषकृते नाप्या–ऽस्येंदुकांतिसुधाभृतः ॥१॥
अमर्त्यदुर्लभां मर्त्या । लभंते किमिमामिति ॥ तदियं कस्य भोगाय । भविष्यति जगत्त्रये
॥ २ ॥ कुलकं ॥ क्षणं मौनपरश्चित्ते । चिंतयित्वेति भूपतिः ॥ जगाद तं पुनः प्रीत्या । क-
स्याः प्रतिकृतिस्त्वियं ॥ ३ ॥ सोऽप्याचख्यौ शौर्यपुरा–धीश्वरांधकवृष्णिजा ॥ दशानां सा
दशार्हाणां । स्वसा कुंत्यस्ति नामतः ॥ ४ ॥ चतुःषष्टिकलादक्षा । तारुण्यतरुमंजरी ॥ स-
दृग्वरैकदारिद्र्या–च्चिंताब्धौ पितरं न्यधात् ॥ ५ ॥ निस्सीमरूपलावण्या–मगण्यगुणगर्वितां

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ तामहं वीक्ष्य फलके–ऽलिखं त्वत्प्रीतये स्वयं ॥६॥ श्रुत्वा राज्ञापि तद् हृद्यं । तमावर्ज्यापि दानतः ॥ आदाय फलकं चास्मा–त्तदालोकी ययौ गृहान् ॥ ७ ॥ चित्रे तां लिखितां बाला–मालोकयन्निलाविभुः ॥ मानसं सर्वतस्तस्यां । योजयामास नित्यशः ॥ ८ ॥ स यदा मान्मथं भावं । नापलापयितुं क्षमः ॥ तदा च वनचारुत्व–वीक्षणच्छद्मना ययौ ॥ ९ ॥ स कैतकं क्रकचवद् । हृद्दारुणि सुदारुणं ॥ चंपकं कंपकार्युच्चैः । कमलं दुःखदं ह्यलं ॥ १० ॥ मन्यमानो महीजानि–र्दीर्घिकास्वप्यदीर्घहृत् ॥ वनं बभ्राम सर्वत्र । तामेवालोकयन्निव ॥११॥ युग्मं ॥ चरंश्चंपकवीथीषु । नरं कंचिन्नियंत्रितं ॥ कीलितं लोहनाराचैः । सोऽपश्यन्मूर्छितं पुरः ॥ १२ ॥ तद्दर्शनाद्वियोगार्त्तिं । मुक्त्वा नृपः कृपापरः ॥ कोऽयमित्यामृशन् खड्गं । तत्पुरश्च व्यलोकयत् ॥ १३ ॥

राजा तं खड्गमादाय । प्रतीकारमपाकरोत् ॥ औषधीवलये तत्रा–पश्यद्वित्रस्तशात्रवः ॥ १४ ॥ तमेकयाकरोन्मर्त्यं । विशल्यं त्वन्यया नृपः ॥ रूढव्रणं महौषध्यो–पकारी सहजान्महान् ॥ १५ ॥ कस्त्वमीदृगवस्था ते । किमित्युक्ते नृपेण सः ॥ जगौ नाम्नानिलगति–रहं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विद्याभृतां पतिः ॥१६॥ विद्याभृताशनिवता । हरता मन्त्रितंबिनीं ॥ पृष्ठानुयायी कोपेन । लं-
भितोऽस्मीदृशां दशां ॥ १७ ॥ निष्कारणोपकारी त्वं । मद्भाग्येनैव चालितः ॥ अत्रागाद् दुः-
खतो मां च । कृपया यदमोचयः ॥ १८ ॥ इति जीवितदातुस्ते । किं प्रत्युपकरोम्यहं ॥ त-
थाप्येते महौषध्यौ । गृहाणेमां च मुद्रिकां ॥ १९ ॥ कल्पितस्थानगामी त्वं । मुद्रायोगाद्भ-
विष्यसि ॥ स्मृतोऽहं च सदा तुभ्यं । दातोत्तरमसंशयं ॥ २० ॥ इत्युक्त्वा नृपसन्माना-ययौ
विद्याधरः क्वचित् ॥ ध्यायन् राजापि तं तां चा-लंचकार निजं पुरं ॥ २१ ॥

इतोंधकवृष्णिपुरः । फलकाहारको गतः ॥ रूपमैश्वर्यं विज्ञानं । पांडोर्भृशमवर्णयत् ॥
॥ २२ ॥ अथ कुंत्यपि तत् श्रुत्वा । पितुरुत्संगगा मम ॥ भवेऽस्मिन् वल्लभः पांडु-रित्यभि-
ग्रहमग्रहीत् ॥ २३ ॥ तद्वक्तुमक्षमा दक्षा । क्ष्माभुजि निजाग्रहं ॥ मृणालीव मरुस्थाना ।
स्मराग्नेर्ग्लानिमाययो ॥ २४ ॥ भर्तृदुर्लभतां ज्ञात्वा । सान्यदोद्यानवर्तिनी ॥ निबध्नती गले पा-
श-मित्यवोचत दुःखिता ॥ २५ ॥ मातरः कुलदेव्यो वो-ऽभ्यर्थयेऽहं कृतांजलिः ॥ दुःप्राप-
भर्तृलब्ध्याद्य । म्रिये ह्यशरणाधुना ॥ २६ ॥ भवेऽस्मिन् पांडुमेवाहं । व्रिये नापरमित्यतः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तदर्थं म्रियमाणाया–स्तस्मै मे कथ्यतां कथा ॥ २७ ॥ परत्रापि भवे युष्म–त्प्रसादाद्वल्लभः स हि ॥ भवत्विति निगद्याथ । कंठे पाशं न्यधत्त सा ॥ २८ ॥ विशेषकं ॥ यावदूभ्रमार्त्ता भ्रमति । ध्यायंती पांडुमेव सा ॥ तावन्मुद्राप्रभावेण । तत्रागात्पांडुराडपि ॥ २९ ॥ राजापि फलकालेख्य–दर्शनादुपलक्ष्य तां ॥ चिच्छेद पाशं तत्कंठा–द्दोर्भ्यां पाशं भृशं सृजन् ॥ ३० ॥ ज्ञातभर्त्रागतिः सापि । दत्वास्मायर्घमश्रुभिः ॥ स्तंभवेपथुरोमांच–मुख्यं भावमनाटयत् ॥ ॥ ३१ ॥ सख्याहृतोपकरणा । पर्यणैषीत्तदैव तं ॥ गांधर्वेण विवाहेने–ष्टंती कुंती सती सती ॥ ३२ ॥ तदैव तत्र संभोगा–दृतुस्नाताथ सा दधौ ॥ कुंती गर्भं पांडवे चा–चख्यौ दक्षावतंसिका ॥ ३३ ॥ कृतकृत्योऽथ राजापि । मुद्रायोगान्निजं पुरं ॥ जगाम बिभ्रती गर्भं । कुंत्यपि स्वगृहान् ययात् ॥ ३४ ॥ धात्रीभिश्च सखीभिश्च । गोप्यमाना समंततः ॥ कुंत्यसूत सुतं काले । गुप्तं रत्नमिवोर्वरा ॥ ३५ ॥ निशीथे कांस्यपेटायां । क्षिप्त्वा बालं ह्रिया सती ॥ प्रवाहयामास गंगा–प्रवाहे गुप्तमालिभिः ॥ ३६ ॥ नीयमाना प्रवाहेण । सा पेटी हस्तिनापुरं ॥ गता सारथिना सूत–नाम्ना चासादिता प्रगे ॥ ३७ ॥ अभ्रमुक्तं रवेर्बिंब–मिव तं वी-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्य हर्षितः ॥ निजप्रियायै राधायै । सूतः सुतवदार्पयत् ॥ ३८ ॥ कर्ण इत्याख्यया ताभ्या
–मुच्यमानो नृपस्य सः ॥ सूतसूनुर्गुणज्ञोऽय–मित्यासीद्वल्लभो भृशं ॥ ३९ ॥ इतश्च कुं-
त्या विज्ञाय । भ्रात्रमंधकवृष्णिराट् ॥ तां पांडुनेंदुना रात्रि–मिवोच्चैरुदवाहयत् ॥ ४० ॥ म-
द्रकस्याथ भूपस्य । मद्रकीनाम नंदना ॥ स्वयंवरात्सा पत्न्यासीद् । द्वितीया पांडुभूपतेः ॥
॥ ४१ ॥ इतो गांधारदेशीय–सुबलस्यांगजन्मनः ॥ राज्ञोऽष्टौ शकुनेर्जाता । गांधारीप्रमु-
खाः सुताः ॥ ४२ ॥ शकुनिर्गोत्रदेव्युक्ते–र्धृतराष्ट्राय ता ददौ ॥ यादृक् भवेत्कृतं कर्म । ता-
दृगासाद्यते जनैः ॥ ४३ ॥ विदुरो देवकनृप–पुत्रीं कुमुदिनीं मुदा ॥ शशीव पर्यणैषीत् स्व–
योग्यसंगमकाम्यया ॥ ४४ ॥

इतो राज्येंधकवृष्णिः । समुद्रविजयं न्यधात् ॥ स्वयं तु सुप्रतिष्ठांते । प्रव्रज्याप शिव-
श्रियं ॥ ४५ ॥ तच्च शौर्यपुरं प्राप्य । समुद्रविजयं नृपं ॥ अनेकवर्णचित्राढ्यं । चकासे स्व-
रिवाद्भुतं ॥ ४६ ॥ यत्रानेकपदानेन । कस्तूरीस्तबका इव ॥ सन्नर्तकाया दृश्यंते । स्थिराना-
र्या निरंतरं ॥ ४७ ॥ अर्हद्गुणान् गृणंतीनां । स्खलंतीनां च योषितां ॥ केलिकीराः पदं यत्र



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



। व्याहरंति सदा श्रुतेः ॥ ४८ ॥ यत्रार्हतां पुरो धूप—धूमाभ्रंकषतोवरे ॥ उन्नता इव धर्माब्दा । दृश्यंते शुभ्रवारिदाः ॥ ४९ ॥ यत्र चारित्रिवदनो—द्गीतसिद्धांतदंभतः ॥ सर्वत्र धर्मसाम्राज्यं । पटहोद्घोषया बभौ ॥ ५० ॥ तस्मिन् सौर्यपूरे सूर्य । इव व्योमन्युदाररुक् ॥ कवींद्रविबुधाधारे । समुद्रविजयोऽभवत् ॥ ५१ ॥ यः कुंथुकमुखान् जीवान् । स्वजीव इव रक्षति ॥ सोऽपि संयति मातंग—मुखान् कोपान्निहंति च ॥ ५२ ॥ अभ्रंलिहान् जिनगृहान् । यः कारयति भक्तितः ॥ स एव रिपुभूपाल—प्रासादान् पातयत्यपि ॥ ५३ ॥ स्वदारेषु रतो यस्तु । जितेंदुमुखशोभिनीं ॥ अहरद्वल्लभां शत्रोः । कीर्तिमंबरमंभितां ॥ ५४ ॥ ध्यायन्नपि वीतरागं । वीतरागेण चेतसा ॥ यश्चकार महीमेनां । सरागामात्मनि स्फुटं ॥ ५५ ॥ पंचानां परमेष्टीनां । ध्यानाद्यः समभून्नृपः ॥ परमेष्ट्यपि सर्वेषा—मंतर्ध्याननिबंधनं ॥ ५६ ॥ स्वयं जिनाज्ञां मूर्द्धन्यो । भूपानां मूर्ध्नि यो वहन् ॥ जिनवर्णविपर्यासा—न्निजाज्ञां त्वरिमूर्ध्न्यदात् ॥ ५७ ॥ शिवेव हि शिवा तस्या—ऽशिवविध्वंसिनी शिवा ॥ शिवास्पदमभूत् कांता । स्वांतारोपितसद्गुणा ॥ ५८ ॥ पत्यावेकांतभक्तापि । शीललीलासमुज्ज्वला ॥ परेण चे-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्रव्रगैव । स्पृष्टान्नूत्स्त्रजता किल ॥ ५ए ॥

आननेनेंदुसंपत्तिं । सुधासारं च वाक्यतः ॥ मनसा धर्मतत्वं च । देहेन रतिसंपदं॥६०॥ गृह्णंत्यपि जनैः प्रोचे । या सुवक्ता सुवाक्यदा ॥ धर्मविस्तारिणी देहे—नाप्यसौ रतिकारिणी ॥ ६१ ॥ युग्मं ॥ लोचनाभ्यां च शिरसा। कृष्णं वर्णं दधत्यपि॥ मलीमसमपुण्यं या । नूतलान्निरवासयत् ॥ ६२ ॥ अपश्यंत्यपि या सूर्यं । सिद्धांतार्कप्रकाशनात् ॥ जगन्नावान् कर्मपाक—पुजलादींश्च पश्यति ॥ ६३ ॥ सुवत्सला परिवारे । नक्ता देवे गुरावपि ॥ सकृपा सूक्ष्मजीवेऽपि । निःकृपा कर्महिंसने ॥ ६४ ॥ आसक्ता दानधर्मेषु । विरक्ता नवसागरे ॥ संसक्ता शीलवार्त्तासु । सा बनूव नृपप्रिया ॥ ६५ ॥ परस्परं प्रीतिपरौ । धर्मरक्तौ परस्परं ॥ शिवासमुद्रविजयौ । निन्यतुः समयं सुखात् ॥ ६६ ॥ प्राव्राजीन्नोजवृष्णिश्च। मथुरायां ततोऽनवत् ॥ उग्रसेनो नृपस्तस्य । महिषी धारणी पुनः ॥ ६७ ॥ उग्रसेनवधे बद्ध—निदानस्तापसस्ततः॥ कश्चित्पारणविध्वंसा—त्तस्याः कुक्षाववातरत् ॥ ६८ ॥ तस्मिन् गर्नस्थिते नर्तृ—पलालादनदोहदः ॥ यदनूत्तेन तं जातं । पेटायां धारिणी न्यधात् ॥ ६ए ॥ सा कां-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्यपेटी यमुना—प्रवाहेण प्रसर्पता ॥ निन्ये शौर्यपुरं तत्रा—सादिता वणिजा पुनः ॥ ३० ॥ कां-
स्यपेट्यां यतो लब्ध—स्ततः कंसोऽभिधानतः ॥ स वर्धमानः पृथुकान्। कुट्टयामास नित्यशः
॥ ३१ ॥ विज्ञाय स्वकुलायोग्यं । समुद्रविजयाय तं ॥ वणिग्ददौ परं सोऽभू—द्वसुदेवस्य
वल्लभः ॥ ३२ ॥

इतः पुरे राजगृहे । जरासिंधो बृहद्रथात् ॥ त्रिखंडभरताधीशः । प्रतिविष्णुरभूद्बली ॥
॥ ३३ ॥ तदाज्ञया वसुदेवो । रिपुं सिंहरथं नृपं ॥ आनिनाय सारथिना । कंसेन बलशालि-
ना ॥ ३४ ॥ कुलद्वयक्षयकरी । जरासंधस्य नंदिनी ॥ वसुदेवो जीवयशां । कंसायादापयत्त-
दा ॥ ३५ ॥ किंचित्पुरं प्रार्थयिता । स जरासंधशासनात् ॥ अर्थयामास मथुरां । पितृवैरेण
चासवान् ॥ ३६ ॥ चिक्षेप कंसः कारायां—मुग्रसेनं तदात्मजः ॥ अतिमुक्तः पितृदुःखात् ।
प्रव्रज्यामाददे पुनः ॥ ३७ ॥ मथुरायां नृपः कंसो—ऽन्वशाद्राज्यं बलोत्कटः ॥ दशार्हास्ते
जरासंधा—ज्ञया चापुर्निजां पुरीं ॥ ३८ ॥ वसुदेवः कुमारोऽथ । विकल्पं मानसे वहन् ॥
किंचिन्मनस्वी रोषेण । ययौ देशांतरंप्रति ॥३९॥ स्थानेस्थानेऽपि विद्याभृ—न्नृपसामान्यनंदि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नीः ॥ काश्चित्कलाज्ञी रूपेण । काश्चित्स्वयमुपागताः ॥ ८० ॥ स एवं शतशो रामा । ज्ञो-
ग्यकर्मफलोदयात् ॥ नपयेमे निदानं हि । नान्यथा तपसां ज्ञवेत् ॥ ८१ ॥ युग्मं ॥ वसुदेव-
कुमारोऽथ । रोहिण्याश्च स्वयंवरे ॥ आगात्समुद्रविजय—नृपायामिलदाहवे ॥ ८२ ॥ चतुरो
हलज्रृज्जन्म—सूचकान्निशि रोहिणी ॥ स्वप्नानैक्षत्तत्प्रज्ञावात् । काले राममसूत सा ॥ ८३ ॥
कंसस्यैवोपरोधेन । वसुदेवः कुमारराट् ॥ देवकीं देवकनृप—पुत्रीमुदवहन्मुदा ॥ ८४ ॥ तदु-
त्सवे जीवयशा । कंसपत्नी मदाकुला ॥ कंसानुजं मुनिं चाति—मुक्तं साह तदागतं ॥ ८५ ॥
एह्येहि देवरामुष्मि—न्नुत्सवे त्वं मया सह ॥ पिब खाद रम स्वैरं । वैरं देहे करोषि किं ॥
॥ ८६ ॥ श्लिष्टस्तयेति कंठेऽसौ । हस्यमानो मुनिर्जगौ ॥ देवक्याः सप्तमो गर्ज्रो । हंता त्व-
त्पितृकांतयोः ॥ ८७ ॥

इति श्रुत्वामुचज्जीव—यशा गतमदा मुनिं ॥ कंसाय तं च वृत्तांत—माचख्यौ रहसि
स्थिता ॥ ८८ ॥ कृतोपायेन कंसेन । प्रीत्यैवानकदुंदुज्जिः ॥ याचितो देवकीगर्ज्रान् । सप्ता-
प्यंगीचकार सः ॥ ८९ ॥ इतश्च देवकीगर्ज्रा—न्नैगमेषी हरेः सुरः ॥ षडप्यदात्सुलसायै । दे-

For Private And Personal Use Only

वक्यै तत्सुतानपि ॥ ९० ॥ कंसोऽपि प्राप्य गर्भांस्तान् । दृषद्यास्फालयद्गृहे ॥ सुलसाया अवर्द्धंत । देवक्यास्ते सुताः पुनः ॥ ९१ ॥ नाम्नाऽनीकयशोऽनंत—सेनादजितसेनकः ॥ निहतारिर्देवयशाः । शत्रुसेनश्च ते त्वमी ॥ ९२ ॥ अथ देवक्यनुस्नाता । सिंहार्काग्निगजध्वजान् ॥ विमानपद्मसरसी । निशांते स्वप्नमैक्षत ॥ ९३ ॥ स्वप्नानुभावतो गर्भं । सा दधौ शुभदोहदा ॥ पुत्रं नभःसिताष्टम्यां । निशीथेऽसूत चासितं ॥ ९४ ॥ तद्गृह्या देवताः कंसा—युक्तानारकपूरुषान् ॥ स्वशक्त्या स्वापयामासु—र्निद्राधिष्ठायिकानिव ॥ ९५ ॥ देवक्युक्त्या वसुदेवो । बालमादाय गोकुले ॥ मुमोच नंदभार्यायै । यशोदायै समर्पयत् ॥ ९६ ॥ यशोदायाः सुतां लात्वा । जातां तत्काल एव हि ॥ अर्पयामास देवक्यै । वसुदेवोऽतिहर्षवान् ॥ ९७ ॥ अथ प्रबुद्धाः कंसस्य । पुरुषास्तां सुतामपि ॥ आदाय चार्पयन् कंसा—याथ दध्याविदं च सः ॥ ९८ ॥ पीडितस्य मुनेरुक्तं । मिथ्यायं यद्वि सप्तमः ॥ गर्भः स्त्रीमात्रमस्यास्तु । न मे मृत्युर्भुजाभृतः ॥ ९९ ॥ विमृश्येति स तां छिन्न—नासां कृत्वा समर्पयत् ॥ रक्ष्यमाणश्च देवीभि—र्ववृधे गोकुलेऽर्भकः ॥ ७०० ॥ कृष्णांगत्वात्कृष्ण इति । ललन् शकुनिपूतने ॥ सोऽत्र-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धीत्रकटं जिद—न्नन्नांक्षीयमलार्जुनौ ॥ १ ॥ तत्र श्रुत्वा देवकी नित्यं । पर्वाण्याधाय कानि-
चित् ॥ वृता नारीभिरन्याभि—र्गोकुले याति हर्षिणी ॥ २ ॥ वसुदेवः कृष्णरक्षा—कृते राम-
मथादिशत् ॥ तौ द्वौ दशधनुस्तुंगौ । रेमाते तत्र नित्यशः ॥ ३ ॥

इतश्च श्रीसूर्यपुरे । समुद्रविजयप्रिया ॥ शिवापश्यन्निशाशेषे । महास्वप्नांश्चतुर्दश ॥ ४ ॥
तदा च कार्त्तिके कृष्ण—द्वादश्यां त्वाष्ट्रगे विधौ ॥ च्युत्वापराजिताच्छंखः । शिवाकुक्षाववा-
तरत् ॥ ५ ॥ श्रावणश्वेतपंचम्यां । निशीथे त्वाष्ट्रगे विधौ ॥ सा देवी सुषुवे सूनुं । कृष्णा-
न्नं शंखलांछनं ॥ ६ ॥ षट्पंचाशद्दिक्कुमार्य—श्चतुःषष्टिश्च वज्रिणः ॥ चक्रुस्ततो मेरुमूर्ध्नि । जि-
नजन्मोत्सवं मुदा ॥ ७ ॥ कारामोक्षादिसत्कर्म । समुद्रविजयः प्रगे ॥ सोत्सवैश्चारिष्टनेमि—
रिति नामास्य निर्ममे ॥ ८ ॥ वर्द्धमानोऽथ स स्वामी । लाल्यमानोऽप्सरोगणैः ॥ सिषेवे
सवयोभूतै—स्त्रिदशैः शक्रशासनात् ॥ ९ ॥ कांश्चित्पर्वतरूपेण । गजरूपेण कांश्चन ॥ स्थि-
तान् सुरान् जगत्स्वामी । लीलयाप्युदलालयत् ॥ १० ॥ रिंखंश्चलन् हसन्नृत्यन् । गायन्
जल्पन् जगद्विभुः ॥ प्रीत्यै बभूव सर्वेषां । विनैव किल कर्मणा ॥ ११ ॥ पुत्रजन्मोत्सवेऽथा- ॥ ६०० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्मिन् । समुद्रविजयो नृपः ॥ कर्तुमारामिकीं क्रीडां । चचाल स्वजनैर्वृतः ॥ १२ ॥ अशो-
कनागपुन्नाग–रसालदलपेशले ॥ वने स प्राविशद्भूपो । बिडौजा इव नंदने ॥ १३ ॥

इतश्च त्रिदशाराध्यः । सौधर्मेंद्रो जिनाधिपं ॥ तत्रालोक्य जगादेति । प्रमोदोत्फुल्ललोचनः
॥ १४ ॥ समुद्रविजयो राजा । धन्यः सौभाग्यभाग्यभूः ॥ पुत्रत्वेऽवातरत्स्वामी । यद्गृहे ने-
मितीर्थकृत् ॥ १५ ॥ अहो सत्वमहो सत्व–मस्मिन् बालेऽपि जृंभते ॥ तद्यन्न शक्यते वक्तुं
। देवे वा दानवेऽथवा ॥ १६ ॥ एकतो ध्रियते सार–मेकस्यास्यार्हतोऽद्भुतं ॥ अन्यतस्त्रिजग-
त्याश्चे–द्भवेन्मेरुस्तिलोपमः ॥ १७ ॥ वदतो वचनं केचि–त्सौधर्माधिपतेरिदं ॥ न सुराः सेहि-
रेऽब्दस्य । गर्जितं सरभा इव ॥ १८ ॥ ऊचुस्ते तं सुराधीश । वदतेति त्वया विभो ॥ बली-
यसीश्वरेच्छात्र । सत्यीचक्रे हि तद्वचः ॥ १९ ॥ शोषयामो महांभोधीं–श्चूर्णयामो महान्
नगान् ॥ हेलयैव बलेनाशु । सह्यास्माभिः कथं स्तुतिः ॥ २० ॥ यांतो वर्त्तामहे स्वामिं–स्त-
द्बलं द्रष्टुमुत्सुकाः ॥ आपृच्छ्यैवं सुरा जग्मु–रुद्याने नेमिपाविते ॥ २१ ॥ ददृशुर्लाल्यमानं ते
। करात्करगतं जनैः ॥ प्रौढिं गच्छ चिरं जीव । वदद्भिरिति कोमलं ॥ २२ ॥ प्रीत्या केश्चिच्चुं-





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





व्यमानं । घ्रीयमाणं तथांगुलौ ॥ स्वशिरोधूननात्कैश्चि–द्धास्यमानं मुहुर्मुहुः ॥ २३ ॥ न्युंछ-
नान्यनुत्सवंतं । क्रियमाणानि कोविदैः ॥ रूपोत्कर्षेक्षणाद्दृष्टै–र्नेमीशं निजपूर्वजैः ॥ २४ ॥ वि
शेषकं ॥ अथैवं चिंतयामासुः । स्वचित्ताह्लादकारकं ॥ स्मेराननं जिनं दृष्ट्वा । दुष्टात्मानोऽपि कौ-
तुकात् ॥ २५ ॥ उत्कंठोत्पादकत्वेन । मूर्त्तः श्रीमारसः किमु ॥ सौभाग्यश्यामलत्वाभ्यां ।
शृंगारः किमु रूपवान् ॥ २६ ॥ बलान्वेषिण एवं ते । कदाचिन्निर्जनं जिनं ॥ विश्रांतं पालने
वीक्ष्य । प्रजह्रुस्तस्करा इव ॥ २७ ॥ गछंतिस्म करप्राप्तं । कृत्वा कोशे जिनाधिपं ॥ सुव-
र्णकमलांतःस्थं । रसबद्धमालिं यथा ॥ २८ ॥ योजनांते सपादेऽति–क्रांते लक्षे तदा प्रभुः ॥
ज्ञानेनावधिनाज्ञासी–द्विकारं त्रिदशोद्भवं ॥ २९ ॥ प्रयुक्ते स्वामिना तत्र । बललेशेऽपि ते सु-
राः ॥ पेतुस्तथा यथा जग्मु–र्भूतले शतयोजनीं ॥ ३० ॥ तत्स्वरूपं निरूप्यागात् । सुरेंद्रो
नेमिसंनिधौ ॥ स्वयं विहितदोषाणां । सुराणामनुकंपया ॥ ३१ ॥ रक्ष रक्ष जगन्नाथ । वि-
श्वत्रातर्महाबल ॥ वराकान् स्मयभारेण । भंगुरान् मा कदर्थय ॥ ३२ ॥ एवं चेच्चण्डते नाथो ।
रक्षिता कोऽस्ति संसृतौ ॥ दीनाननुगृहाणैतान् । कृपालो विश्वपालक ॥ ३३ ॥ शरण्योऽश-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रणानां त्वं । धर्माधारो धरातले ॥ बालरूपोऽप्यबालोऽसि । नाथ किं स्तूयसे बहु ॥ ३४ ॥
स्तुतिं विधाय देवेंद्रो । मोचयित्वेति तान् सुरान् ॥ स्वामिनं पालने मुक्त्वा । क्रमयित्वा दि-
वं ययौ ॥ ३५ ॥ श्रीसमुद्रादयः सर्वे । सद्यः संजातसंमदाः ॥ श्रीनेमेर्बलमालोक्य । नन्-
तुर्विहितोत्सवं ॥ ३६ ॥ कृत्वा महोत्सवं तत्र । प्रासादे श्रीमदर्हतां ॥ स्थानं निजं निजं ज-
ग्मुः । स्मरंतो नेमिनं मुदा ॥ ३७ ॥ तत्प्रभृत्यमरेंद्राज्ञा—नुगतामरकोटिभिः ॥ संरक्ष्यमाणः
स स्वामी । वृद्धिमाप दिने दिने ॥ ३८ ॥

अथान्धृतराष्ट्रस्य । महिष्या गर्भलक्षणात् ॥ गांधार्या अतिदुष्टत्वे । जनयुद्धे च दोह-
दः ॥ ३९ ॥ आरुह्य करिणं युद्धे । हन्म्यरातीन् महायुधैः ॥ क्षिपामि लोकं कारया—मि-
त्यसावप्यचिंतयत् ॥ ४० ॥ नानमत्कुरुवर्गेषु । साहंकारा निषीदति ॥ गर्वेण मोटयंत्यंगं । सा
सर्वैः कलहायते ॥ ४१ ॥ ततश्च पांडुमहिषी । कुंती स्वप्ने सुरालयं ॥ क्षीराब्धिं भास्करं चं-
द्रं । श्रियं चालोकयन्निशि ॥ ४२ ॥ तत्प्रभावाच्छुभं गर्भं । रत्नगर्भेव बिभ्रती ॥ दिने दिनेऽ-
पि सा धर्म्यं । मनोरथमचिंतयत् ॥ ४३ ॥ सुलग्ने सुदिने पंच—ग्रहैरुच्चाश्रयैः सुतं ॥ कुंत्य-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सूत दिवः पुष्प–वृष्टिरप्यपतद्गृहे ॥ ४४ ॥ धर्मपुत्रोऽयममल–दयादानगुणान्वितः ॥ इत्यु-
च्चरंतस्त्रिदशा–स्तदा तद्गृहमाययुः ॥ ४५ ॥ महोत्सवैर्देवगिरा । सुदिनेऽस्य युधिष्ठिरः ॥ इ-
ति नामाज्ञवत्सर्व–प्रियमप्रियहृत्सतां ॥ ४६ ॥ पुनः कुंती निशि स्वप्ने । पवनेन निजांगणे
॥ अपश्यदोपितं कल्प–तरुं च फलितं क्षणात् ॥ ४७ ॥ तादृक्स्वप्नानुभावेन । सा दधौ ग-
र्भमुत्तमं ॥ मुदं च पांडुराट् विश्वं । प्रसत्तिं परमां पुनः ॥ ४८ ॥ गर्भातिवृद्ध्या गांधारी ।
ततो दूना निरंतरं ॥ महौषधैर्गर्भपात–मैच्छत् कूटपटीयसी ॥ ४९ ॥ दृष्ट्वा तु कुंतीमासन्न–
प्रसवां सातिपीडिता ॥ आघ्नाना जठरं गर्भ–मनिष्पन्नमपातयत् ॥ ५० ॥ सा मासैस्त्रिंशता-
सूत । सुतं वज्रदृढं ततः ॥ षण्मासान् पेटिकासंस्थं । पूर्णदेहमदर्शयत् ॥ ५१ ॥ अस्मिन्
गर्भस्थिते माता–ऽभवद्दुर्योधसादरा ॥ अतोऽस्य सूनोर्नामासी–द्दुर्योधन इति स्फुटं ॥ ५२ ॥
असूत दिवसे यस्मिन् । गांधारी तं तनूरुहं ॥ तस्मिन् यामैस्त्रिभिः पश्चा–त्सुतं कुंत्यप्यजी-
जनत् ॥ ५३ ॥ अयं वायुसुतो भीमो । वज्रकायोऽतिधर्मधीः ॥ भक्तो ज्येष्ठे गुणज्येष्ठ । इ-
त्यासीद्द्वयोर्मिथो भारती ॥ ५४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथान्यदा गिरौ कस्मिन् । रंतुं पांडुनृपे गते ॥ कुंतीकरतलाद्भीमो । वज्रकायोऽपतत्
क्षितौ ॥ ५५ ॥ वज्रेणेव हता भीम-पातेन दृषदोऽखिलाः ॥ चूर्णीबभूवुर्निःपिष्टा । घरट्टेने-
व तंडुलाः ॥ ५६ ॥ अक्षतांगं तमादाय । वज्रकायस्त्वसाविति ॥ वदंतस्त्रिदशाः कुंत्यै । ददुः
पुत्रं मुदः पदं ॥ ५७ ॥ अथ कुंती तृतीयं सा । गर्भमाधत्त पुण्यतः ॥ स्वप्ने शक्रं गजारूढं
। दृष्ट्वा बोधमवाप च ॥ ५८ ॥ वेत्त्यहंकृतितः कुंती । धनुरारोप्य यद्दृढं ॥ दानवान् दल-
याम्येषा । चूर्णयामि रिपोरुरः ॥ ५९ ॥ इतश्च समयेऽसूत । सा सुतं जगदुत्तरं ॥ इंद्रपुत्रोऽ-
र्जुनस्त्वेष । इत्यभूद्व्योम्नि भारती ॥ ६० ॥ सुरमुक्तापतत्पुष्प-वृष्टिर्दुंदुभयोऽनदन् ॥ नृत्यै-
रप्सरसां सार्द्ध-मकरोच्च नृपो महं ॥ ६१ ॥ मद्यामभूतां नकुल-सहदेवौ सुतौ ततः ॥ पां-
डोस्तैः पंचभिः कीर्त्ति-देहमासीदिवेंद्रियैः ॥ ६२ ॥ अभूवन् क्रमतः पुत्रा । धृतराष्ट्रस्य दु-
र्जयाः । दोष्मंतस्ते शतं सर्वे । शस्त्रशास्त्रविशारदाः ॥ ६३ ॥ शुशुभे तैर्धृतराष्ट्रः । सुतैः श-
तमितैर्भृशं ॥ शशी शतभिषक्तारै-रिव पूर्णत्वमागतः ॥ ६४ ॥ यात्रायै त्वन्यदा कुंती । ना-
शिक्ये नगरे ययौ ॥ तत्र चंद्रप्रभस्वामि-चैत्यं नवमकारयत् ॥ ६५ ॥ पूजारात्रिकनेपथ्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुनिदानादिकां क्रियां ॥ तत्र कृत्वा समं जत्रां । कुंती स्वपुरमाययौ ॥ ६६ ॥ नाशिक्ये ह्य- ष्टमं तीर्थ-नाथं ये प्रणमंति ते ॥ आगामुके नवे लब्ध्वा । बोधिं यांति परां गतिं ॥ ६७ ॥

इतो नैमित्तिकोक्तेन । कंसः कृष्णादशंकत ॥ केशिहयखरमेष-वृषनारिष्टघातनात् ॥ ॥ ६८ ॥ स प्रत्येतुं निजारातिं । शार्ङ्गं पूजोत्सवं व्यधात् ॥ स्वजामिं सत्यनामां च । तत्पु- रोऽथ न्यवीविशत् ॥ ६९ ॥ देवकन्योपमामेतां । ददे धन्वाधिरोपणात् ॥ सर्वत्र कंसः स्वन- रै-रित्यघोषयदुच्चकैः ॥ ७० ॥ तत्र कर्मण्यसक्तेषु । नृपेषु वसुदेवसूः ॥ अनाधृष्टिर्वीरमानी । प्राचलद्र्यमाश्रितः ॥ ७१ ॥ स सुप्तो गोकुले रात्रौ । प्रातः कृष्णं सहायिनं ॥ कृत्वा पुर- स्सरं मार्गे । मधुरांप्रति निर्ययौ ॥ ७२ ॥ रथस्खलनहेतुं द्रुं । कृष्णः पथ्युदमूलयत् ॥ स्यं- दने तमनाधृष्टिः । पुनः प्रीत्याध्यरोपयत् ॥ ७३ ॥ प्राप्तः सन्नामनाधृष्टि-र्गृह्णंस्तद्धनुरस्खलत् ॥ जहास च जनः सर्वः । सत्यन्नामाप्यलज्जत ॥ ७४ ॥ कृष्णस्तद्धासकुपितो-ऽधिज्यं धन्व द्रुतं व्यधात् ॥ कटाक्षकुसुमैर्नामा । तद्भुजावप्यपूजयत् ॥ ७५ ॥ मयाधिरोपितं शार्ङ्ग-म- नाधृष्टिर्वदन्निति ॥ वसुदेवेन स्वगृहान् । प्रहितः कंसजीतितः ॥ ७६ ॥ तदुत्सवमिषेणाथ ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मल्लयुद्धदिदृक्षया ॥ नृपानाजूहवत्कंसो । वैरिनिश्चयहेतवे ॥ ७७ ॥ कौतुकयथ स कृष्णोऽपि । समं रामेण संचरन् ॥ यमुनाया ह्रदे कालि—मादिनस्तितवान् बलात् ॥ ७८ ॥ पद्मोत्तरं गजं कृष्णो—ऽवधीशमोऽपि चंपकं ॥ तौ वीक्ष्य मुक्तौ कंसेन । तौ हि वैरिनिवारिणौ ॥ ॥ ७९ ॥ रामस्तत्रागतांस्तस्मै । समुद्रविजयादिकान् ॥ ज्ञापयामास कृष्णाय । नामग्राहं प्रदर्शितान् ॥ ८० ॥ निजबंधुप्रहंतारं । कंसं कृष्णोऽपि संविदन् ॥ अंतर्निहितकोपाग्नि—र्निषसादाथ मंडपे ॥ ८१ ॥ रंगांगणमुपेतौ द्राग् । मल्लौ चाणूरमुष्टिकौ ॥ वीक्ष्य कृष्णबलौ कोपा—दुदस्थातां च मंचकात् ॥ ८२ ॥ जघान कृष्णश्चाणूरं । मुष्टिकं च हलायुधः ॥ तद्धात्कुपितः कंस । इत्यवोचत्तथोच्चकैः ॥ ८३ ॥ अरे गोपाधमावेतौ । मार्यतामविलंबितं ॥ एतयोः पोषणान्नंद—मपि तत्पक्षपातिनं ॥ ८४ ॥ अथाख्यत्पुंडरीकाक्षो—ऽरुणाक्षो रोषपोषणात् ॥ मृतं मन्योऽसि नाद्यापि । त्वं चाणूरे हतेऽपि रे ॥ ८५ ॥ तावद्रक्ष त्वमात्मानं । हन्यमानं मयाद्य रे ॥ पश्चात्स्वामर्षसदृशं । नंदादिषु समादिशेः ॥ ८६ ॥ इत्युक्त्वोत्पत्य गोविंदो । मंचमारुह्य तत्क्षणं ॥ संगृह्य कंसं केशेषु । पृथिव्यां पर्यपातयत् ॥ ८७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इतश्च कंसरक्षार्थं । कंसगृह्या महाभटाः ॥ कृष्णं हंतुमधावंत । विविधायुधपाणयः ॥ ॥ ८८ ॥ मंचस्तंभमथोद्धृत्य । रामस्तान् परिताडयन् ॥ द्रुतं विद्रावयामास । मधुस्था मक्षिका इव ॥ ८९ ॥ कृष्णोऽपि पादं शिरसि । न्यस्य कंसं व्यपादयत् ॥ केशैः कृष्ट्वाक्षिपद्रंगा—द्बहिस्तं दार्विवार्णवः[1] ॥ ९० ॥ ततः संवर्मितान् प्रेक्ष्य । कंसगृह्यान् महीभुजः ॥ संवर्मयामास नृपः । समुद्रोऽपि सहानुजैः ॥ ९१ ॥ अनिवेणयति क्ष्मापे । समुद्रविजये तदा ॥ नाशकंस्ते पुरः स्थातुं । तमांसीव विभाकरे ॥ ९२ ॥ रामकृष्णावथादाय । समुद्रविजयादयः ॥ मथुरामुग्रसेनाय । दत्वा शौर्यपुरं ययुः ॥ ९३ ॥ अथो जीवयशा कंस—मरणादतिविह्वला ॥ यादवक्षयमामंत्र्य । ययौ राजगृहं पुरं ॥ ९४ ॥ विकीर्णकेशामत्युच्चै । रुदंतीं शोकसंकुलां ॥ जरासंधः सुतां वीक्ष्या—पृच्छद्रोदनकारणं ॥ ९५ ॥ अतिमुक्तकोक्तकंस—वधं यावदुवाच सा ॥ जरासंधोऽप्यवक् वत्से । रोदयिष्ये तव द्विषः ॥ ९६ ॥ तामित्युक्त्वा जरासंधः । सोमकं नाम पार्थिवं ॥ प्रजिघायानुशिष्याथ । समुद्रविजयांतिकं ॥ ९७ ॥ स- 

१ समुद्रः काष्टमिव.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





त्कतः स समुद्रेण । जरासंधस्य वाचिकं ॥ जगाविति कुलांगारा–वर्प्यतां रामशार्ङ्गिणौ ॥ ए८ ॥
एतौ कंसस्य हंतारौ । तवाकारणवैरिणौ ॥ त्वं त्यजन् पूर्ववद्राज्यं । साधि मद्वासना-
न्नृप ॥ एए ॥ दशार्हः प्रथमोऽश्रांत–दूनो व्याचष्ट सोमकं ॥ यन्न वेत्ति जरासंधो । मम त-
त्स्नेहकारणं ॥ ८०० ॥ मार्गयन् रामकृष्णौ किं । त्वं तु सोम न लज्जसे ॥ यावक्रिणी इव दे-
हे । हरिवंशस्य मंमनं ॥ १ ॥ वरं दानं जीवितस्य । वत्सयोर्नैतयोः पुनः ॥ वद स्वं स्वामि-
नं याहि । जामातृपथगामुकं ॥ २ ॥ दृष्टोऽथ सोमको राम–कृष्णाभ्यां कोपसंभ्रमात् ॥ उ-
त्थाय त्वरितं गत्वा । जरासंधाय तज्जगौ ॥ ३ ॥ अथोग्रसेनो नृपाग्रः । सत्यन्नामां स्वनंदि-
नीं ॥ पूर्वानुरागिणीं प्रीति–वृद्धये शार्ङ्गिणे ददौ ॥ ४ ॥ द्वितीयेऽह्नि दशार्हेशो । मेलयित्वा स्व-
बांधवान् ॥ पप्रच्छ क्रोष्टुकिं नाम । हितं नैमित्तिकोत्तमं ॥ ५ ॥ त्रिखंमन्नरताधीश–जरासंध-
स्य विग्रहे ॥ यज्ञाव्यं ब्रूहि नस्तत्त्वं । स्वस्थे पात्रे हि बंधनं ॥ ६ ॥ सोऽप्युवाच चिरादेतौ ।
रामकृष्णौ महाभुजौ ॥ त्रिखंमन्नरताधीशौ । तं निहत्य नविष्यतः ॥ ७ ॥ यात प्रतीच्या-
मधुना । समुद्दिश्यांबुधेस्तटं ॥ न्नावी शत्रुक्षयारंन्नो । गच्छतामपि तत्र वः ॥ ८ ॥ सत्यन्ना-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मा च यत्रैगा। प्रसूते तनद्वयं ॥ पुरीनिवेशं तत्रैव । कृत्वा स्थैर्यमशंकितैः ॥ ९ ॥अष्टादश-
कुलकोटि–युतो यादवनायकः ॥ चचाल चालयन् विश्वं । मध्ये विंध्याचलं ततः ॥ १० ॥
अथो जरासंधनृपः । सोमकोक्तं निशम्य तत् ॥ ज्वलन् क्रुधा सुतेनोचे । नाम्ना कालेन
तद्विदा ॥ ११ ॥ स्वामिन्नमी यादवाः के । तन्मामादिश तद्वधे ॥ आकृष्य तान् हनिष्यामि-
। वेह्व्योम्नो जलादपि ॥ १२ ॥ राज्ञां पंचशतीयुक्तं । बहुसेनासमन्वितं ॥ यवनेनानुजेनापि।
स तं प्रैषीन्निखंमराट् ॥ १३ ॥ साक्षात्काल इवाकाले । कालेऽथ समुपेयुषि ॥ विचक्रुर्देवताः
शैलं । रामकृष्णाग्निरक्षकाः ॥ १४ ॥ एकद्वारे चिता वह्नय–स्तत्रैकां रुदतीं स्त्रियं ॥ ज्वलितं य-
दुसैन्यं च । भस्मीभूतं कृशानुना ॥ १५ ॥ युग्मं ॥ तां प्रेक्ष्य कालः पप्रच्छ । भद्रे किमित्र
रोदिषि ॥ साख्यन्नीता जरासंधा–द्दुद्रुवुर्यदवोऽखिलाः ॥ १६ ॥ तेषां च पृष्ठतो वीरः । का-
लः काल इवाचलत् ॥ तत्रासन्ने च चकिताः । प्राविशन् यदवोऽनले ॥ १७ ॥ दशार्हा राम-
कृष्णौ च । चितायामविशन्निह ॥ तेषां वियोगे बंधूनां । विशाम्यग्नावसावपि ॥ १८ ॥ इत्यु-
क्त्वा साविशद्वह्नौ । देवतामोहितश्च सः ॥ स्मरन् स्वसंधामप्यग्ना–वविक्षत्सर्वसाक्षिकं ॥१९॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यवनाद्या निवृत्त्याख्यु–स्तत्सर्वं मगधेशितुः ॥ यदवोऽपि च तद् ज्ञात्वा–नर्चुः क्रोष्टुकिमादरात् ॥ २० ॥ ततस्तेऽपि सुराष्ट्रायां । गिरिनारगिरेर्दिशि ॥ प्रत्यगुत्तरतः सैन्यं । न्यधुः क्रोष्टुकिवाक्यतः ॥ २१ ॥ कृष्णपत्नी सत्यभामा । तत्रासूत सुतावुभौ ॥ भानुभामरनामानौ । जात्यजांबूनदद्युती ॥ २२ ॥ दशार्हाः पुंडरीकेऽथ । गिरिनारगिरावपि ॥ जिनमानर्चयामासु–र्धन्यंमन्या निजं भवं ॥ २३ ॥ दिने क्रोष्टुकिनाख्याते । स्नातः कृतबलिर्हरिः ॥ अंभोधिं पूजयामास । विदधे चाष्टमं तपः ॥ २४ ॥ ततस्तृतीययामिन्यां । लवणाब्धेरधिप्रभुः ॥ कृतांजलिस्तत्र चागा–दित्युवाच च माधवं ॥ २५ ॥ किं स्मृतोऽहं वासुदेव । तन्मामद्य समादिश ॥ पुराप्यहं मुख्यवार्द्धे–रिहागां सगराज्ञया ॥ २६ ॥ इत्युक्त्वा स ददौ देवः । पांचजन्यं मुरारये ॥ सुघोषमथ रामाय । रत्नमाल्यांशुकानि च ॥ २७ ॥ ततो जगाद तं कृष्ण । साधु त्वं यदिहागतः ॥ तीर्थरक्षाकृते तत्त्व–मेतदर्थे हि नार्थये ॥ २८ ॥ यासीदत्र पुरी पूर्व–शार्ङ्गिणां सा त्वया जलैः ॥ पिहितास्ति ततस्तत्र । ममावासाय यच्छतां ॥ २९ ॥

श्रुत्वेति देवः शक्राय । गत्वा तच्च व्यजिज्ञपत् ॥ शक्राज्ञयैत्य धनद–स्तत्र तां च पुरीं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





व्यधात् ॥ ३० ॥ द्वादशयोजनायामा । नवयोजनविस्तृता ॥ सुवर्णरत्नप्राकारा । तदा सा शु-
शुभे पुरी ॥ ३१ ॥ वृत्ताश्च चतुरस्राश्च । व्यायता गिरिकूटकाः ॥ स्वस्तिकाः सर्वतोभद्रा ।
मंदरा अवतंसकाः ॥ ३२ ॥ वर्द्धमानाश्चेतिसंज्ञाः । प्रासादास्तत्र लक्षशः ॥ एकभूमा द्विभू-
माश्च । त्रिभूमाद्याश्च निर्मिताः ॥ ३३ ॥ युग्मं ॥ विचित्रमणिमाणिक्यै-श्चत्वरेषु त्रिकेष्व-
पि ॥ जिनचैत्यानि दिव्यानि । तत्राभूवन् सहस्रशः ॥ ३४ ॥ सरांसि दीर्घिका वाप्य-श्चैत्या-
न्युद्यानवीथिकाः ॥ अन्यच्च सर्वं तत्राह्नो-रात्रेण धनदोऽकरोत् ॥ ३५ ॥ एवं च रम्या नगरी
। द्वारिकेंद्रपुरीसमा ॥ बभूव वासुदेवस्य । देवताभिर्विनिर्मिता ॥ ३६ ॥ ततः प्रातः कुबेरोऽ-
दात् । विष्णवे पीतवाससी ॥ नक्षत्रमालां मुकुटं । महारत्नं च कौस्तुभं ॥ ३७ ॥ शार्ङ्गध-
न्वाक्षय्यशरौ । तूणौ खड्गं च नंदकं ॥ कौमोदकीं गदां चैव । रथं च गरुडध्वजं ॥ ३८ ॥ रा-
मायादाद्वनमालां । मुशलं नीलवाससी । तालध्वजं रथं तूणा-वक्षयेषू धनुर्हलं ॥ ३९ ॥ अ-
रिष्टनेमये ग्रीवा-भरणं बाहुरक्षके ॥ हारं त्रैलोक्यविजयं । चंद्रसूर्याख्यकुंडले ॥ ४० ॥ गंगा-
तरंगविशदे । वाससी च मलोज्झिते ॥ सर्वतेजोहरं रत्न-मप्यदाद्धनदो मुदा ॥ ४१ ॥ युग्मं ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समुद्रविजयायार्सि । चंद्रहासं वरांशुके ॥ दिव्यं रथं च धनदो । ददौ वज्रभृदाज्ञया ॥
॥ ४२ ॥ गुरुध्वजं रथं शक्तिं । सहस्राख्यां च वासली ॥ कौसुंभे प्रददौ यक्षो । महानेमिकृ-
ते तथा ॥ ४३ ॥ अकृष्येषुं धनुर्हारं । ददौ च रथनेमये ॥ तद्बंधुभ्योऽपरेभ्योऽपि । वस्त्राण्य-
स्त्राणि योग्यया ॥ ४४ ॥ धनदाद्यैः सुरैः सर्वै–र्यादवैरपरैरपि ॥ कृष्णोऽभिषिषिचे राज्ये । ब-
लभद्रेण संयुतः ॥ ४५ ॥ तत्र कृष्णः सरामोऽपि । दशार्हाननुवर्त्तयन् ॥ राज्यं चकार विधि-
वत् । समुद्रविजयाज्ञया ॥ ४६ ॥ विश्वस्यापि मुदं तन्वं–श्चरितैर्जनतातिगैः ॥ अरिष्टनेमिर्भ-
गवान् । ववृधे तत्र च क्रमात् ॥ ४७ ॥ स्वामी दशधनुस्तुंगं । क्रमात्प्राप च यौवनं ॥ आ-
जन्मकामविजयी । तेनाविकृतमानसः ॥ ५० ॥

इतश्च दिवि देवेशः । सुराणामग्रतो मुदा ॥ श्रीनेमेरद्भुतं सत्वं । वर्णयामास संसदि ॥
॥ ५१ ॥ सत्वे शौर्ये बले शीले । दानरूपगुणेष्वपि ॥ स त्रैलोक्येऽपि नो कश्चि–द्यः श्रीने-
मिजिनोपमः ॥ ५२ ॥ ततश्च केचित्त्रिदशा । मिथ्यात्वभ्रमिताशयाः ॥ शक्रोक्तं वितथीकर्त्तु–
मिवाजग्मुर्महीं क्षणात् ॥ ५३ ॥ रैवतकोपत्यिकायां । सुरधारान्निधं पुरं ॥ स्थापयित्वा म-

र्यरूपा–स्तेऽस्थुरस्वस्थकारिणः ॥ ५४ ॥ द्वारिकोद्यानवृक्षाली–र्लीलयोन्मूलयंति ते ॥ वरा-
कान् नारिकान् भूयो–ऽभिभवंत्यप्यशंकिताः ॥ ५५ ॥ उपद्रवंति बहुशो । जलवाहांस्तथा-
परान् ॥ अप्राकारां निजामाज्ञां । दापयंति च दुस्सहां ॥ ५६ ॥ एवं तैः पीडिता लोकाः ।
सर्वकर्मसु सर्वदा ॥ उच्चैः कोलाहलं चक्रुः । समग्रपुरभीतिदं ॥ ५७ ॥ अनाधृष्टिस्तु तत् श्रु-
त्वा । वसुदेवाद्यनंदनः ॥ अनापृच्छ्यापि नृपतिं । समुद्रविजयं क्रुधा ॥ ५८ ॥ वीरमानी र-
थारूढः । प्ररूढप्रौढविक्रमः ॥ सर्वायुधैरपि युक्तो । दधावे तज्जिघृक्षया ॥ ६० ॥ युग्मं ॥ दृष्ट्वा
रैवतकोपांते । तत्पुरं प्रवरार्द्धिकं ॥ किमेतदिति सस्मार । विस्मयाद्वसुदेवसूः ॥ ६१ ॥ ज्ञात्वा
तत्रागसां कर्तॄ–ननाधृष्टिः क्रुधोद्धुरः ॥ शंखमापूर्य धनुषो । ज्यानिनादमसूत्रयत् ॥ ६२ ॥ त-
त् श्रुत्वा तेऽपि सामर्षाः । क्षणान्निःसृत्य मायया ॥ जित्वा तं स्वपुरस्यांत–र्निन्युर्मन्युसमा-
कुलं ॥ ६३ ॥ तद्वृत्तांतमथो ज्ञात्वा । समुद्रविजयो नृपः ॥ उल्लसद्वीररसतः । सर्वानाजूह-
वद्भटान् ॥ ६४ ॥ तदा भंभानिनादेन । क्षुभ्यत्क्षत्रियसंचयाः ॥ अमिलन् देहभाजस्ते । रौ-
द्रवीररसा इव ॥ ६५ ॥ समनाहयन्केऽप्यश्वान् । केऽप्यशृंगारयन् गजान् ॥ उद्यदस्त्रपरा वी-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





राः । परेऽपि समवर्मयन् ॥ ६६ ॥ तदा समुद्रविजये । नृपे रणरसोद्यते ॥ क्षुभ्यन्नगरसंपर्का–दुद्वेलोऽभून्महोदधिः ॥ ६७ ॥ संरंभं तमिति ज्ञात्वा । रामकृष्णौ महौजसौ ॥ वैरिवारणपंचास्या–वित्यूचतुरधीश्वरं ॥ ६८ ॥ किमर्थमेष संरंभ–स्तात युष्मासु विद्यते ॥ लघूनामपि चास्माकं । कृत्यं कथयताधुना ॥ ६९ ॥ उदितो नूतनः कश्चि–द्देवः किं राक्षसोऽथवा ॥ यदर्थं पूज्यपादैर–प्येवमायास्यतेतरां ॥ ७० ॥ तयोरुक्तमिति श्रुत्वा । समुद्रविजयो जगौ ॥ लोकोपद्रवमुख्यं त–दनाधृष्टिजयावधिः ॥ ७१ ॥ स्मित्वाचख्यौ ततः कंस–रिपुस्तात वृथोद्यमः ॥ अयं तेषु वराकेषु । युष्माकं सर्वविश्रुतः ॥ ७२ ॥ अस्मास्वपि हि जीवत्सु । न युक्तं तात पौरुषं ॥ जेष्येऽहं युष्मदादेशा–द्दरार्तीस्तत्समादिश ॥ ७३ ॥ ततः समुद्रादेशात्तौ । रामकृष्णौ महानुजौ ॥ पांचजन्यादिनादेन । मेलयित्वा बहून् भटान् ॥ ७४ ॥ स्वस्वायुधयुतौ वीरौ । रथस्थौ प्राप्य तत्पुरं ॥ आह्वयतामाहवाय । तान्मायानटान् सुरान् ॥ ७५ ॥ युग्मं ॥ तेऽपि वेगादुपागत्य । निजमायां प्रदर्श्य च ॥ जित्वा सरथिनौ तौ तु । लात्वा स्वपुरमापतन् ॥ ७६ ॥



For Private And Personal Use Only

इतश्च द्वारिकायां तु । रामकृष्णापहारतः ॥ उच्चैः कोलाहलो जज्ञे । निर्नाथानामियं स्थितिः ॥ ७७ ॥ वीरावेतौ हलिविष्णू । यत्पूज्यौ स्वर्गिणामपि ॥ अजेयौ हि जितौ तत्किं । ज्ञाप्यतोऽचिंतयन् जनाः ॥ ७८ ॥ ततश्च लीलया स्वामी । विहरन् सौधमध्यतः ॥ इत्यौच्यताच्युतवधू–जनैर्नर्मोक्तिभंगिभिः ॥७९॥ अरिष्टनेमे सर्वज्ञाः । श्रूयंतेऽनंतवीर्यतः ॥ मेरुदंडे मही छत्री–कर्त्तुमुच्चैरलं ननु ॥ ८० ॥ ततोऽधुना त्वमस्माकं । कुलेऽर्हन्नवतीर्णवान् ॥ प्रकाशय निजं किंचि–त्पौरुषमस्खलितं ॥ ८१ ॥ पश्यतोऽपि तव भ्रातॄन् । शत्रवोऽभिभवंति यत् ॥ तत्ते बलं तीर्थकृतो । वृथैवास्त्वधुना न यत् ॥ ८२ ॥

स भ्रातृजायाभिरिति । हस्यमानो मनाग् विभुः ॥ किंचिद्युद्धोत्सवं चित्ते । चिंतयन् पर्षदं ययौ ॥ ८३ ॥ तत्र युद्धोद्यतस्याश्च । समुद्रविजयस्य सः ॥ आरुरोह सद्युत्संगं । मेरूत्संगमिवार्यमा ॥ ८४ ॥ ततः क्रोष्टुकिराचख्यौ । निमित्तज्ञशिरोमणिः ॥ स्वामिन् समुद्रविजय । प्रयासोऽत्र तवाफलः ॥ ८५ ॥ विश्ववीरौ हलिविष्णू । जितौ यैर्लीलयैव हि ॥ ते जेयास्तीर्थनाथेन । नासुरैर्न सुरैरपि ॥ ८६ ॥ इत्युक्तिभाग्ज्यशो तस्मिन् । शक्रादेशाद्रथं वरं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ आनीय मातलिर्नेमिं । प्रणिपत्य व्यजिज्ञपत् ॥ ८७ ॥ स्वामिंस्त्वदिच्छया सार्द्धं । शक्रादे-
शादहं रथं ॥ आनैषं तत्प्रसीदैन-मारुह्य जय तानरीन् ॥ ८८ ॥ पश्यन् समुद्रविजय-मुखं
नाथोऽथ तं रथं ॥ अध्यास्त धन्ववर्जं च । जहौ शस्त्रसमुच्चयं ॥ ८९ ॥ सर्वेषामप्यहं र-
क्षा-मंत्रः सर्वत्र तत्कथं ॥ ममापि रक्षान्येभ्यः स्या-दिति वर्मात्यजद्विभुः ॥ ९० ॥ भग-
वान् रथमारूढः । क्षणात्तत्पुरमासदत् ॥ शंखध्वानाद्रिपून् सर्वा-नाह्वयच्च समंततः ॥ ९१ ॥
पुरस्य परितो वेगा-द्भ्रमतस्तद्रथस्य च ॥ निर्घाताक्रढशीर्षाणि । पेतुः प्रत्यर्थिशीर्षवत् ॥९२॥
तदाघातात्सुरास्तेऽपि । सर्वे संभूय वेगतः ॥ सेनाभिश्चतुरंगाभि-र्विमानैश्च समापतन् ॥
॥ ९३ ॥ नादयामासुरुच्चैस्ते । भंभानिःस्वानकाहलाः ॥ प्रतिध्वानैश्च कल्पांत-शंकामासूत्र-
यन् जने ॥ ९४ ॥ वात्यावर्त्तान् विचक्रुश्च । गंधशैलसुदुस्सहान् ॥ निष्ठुरं च निनादोऽभू-
द्व्योम्नि शैलान् विदारयन् ॥ ९५ ॥ स्थिराभूदस्थिरा कामं । कंपयंती कुलाचलान् ॥ उद्दं-
डा काप्यभूज्ज्वर्जा । स्फूर्जथुप्रतिमोर्जितं ॥ ९६ ॥ महीमध्याद्धूमशिखा । निस्सरंती विहाय-
सि ॥ विस्तारमाप्य तामिस्त्रैः । कर्णैर्विश्वमपूरयत् ॥ ९७ ॥ स्थाने स्थाने महानागाः । पं-



For Private And Personal Use Only

चास्या अतीभीषणाः ॥ फूत्कारिणो व्याघ्रमुखा । वृश्चिकाजगरादयः ॥ ९८ ॥ शाकिन्यो भू-
तवेतालाः । कराला अपि भूरिशः ॥ विजृंभंतस्तदा भूमा-वभूवन्नतिभीतिदाः ॥ ९९ ॥ यु-
ग्मं ॥ दृष्ट्वा तथाविधं तेषां । तत्स्वरूपं विहस्य च ॥ चकाराधिज्यमिष्वासं । लीलयैव जग-
द्विभुः ॥ ९०० ॥ नमतो धनुषस्तस्य । झंकारैरतिदुस्सहैः ॥ तदा सिंहादयस्त्रेसुः । सिंहनादै-
र्गजा इव ॥ १ ॥ विभुः शरासनं कृष्ट्वा । पुनरास्फालयद् दृढं ॥ तदुद्भवाग्नेरभवन् । दूरं ति-
मिरसंचयाः ॥ २ ॥ अथैतान् प्रकटान् कांश्चि-द्व्योम्नि कांश्चिच्च भूतले ॥ दृष्ट्वा स्मित्वा ज-
गौ स्वामी । भाव्यतः सकलं वरं ॥ ३ ॥ उक्त्वेत्यमोघं धनुषि । समधत्त जगद्विभुः ॥ वाय-
व्यास्त्रं महीशैल-सागरोद्धरणक्रमं ॥ ४ ॥ आकर्णांतमथो नीत्वा । कथयित्वेव किंचन ॥ सं-
रंभादमुचत्स्वामी । विश्वभीतिकरं शरं ॥ ५ ॥ तदुद्भवानिलेनोच्चै-स्तूलानिव समंततः ॥ उ-
ड्डीयोड्डीय संजग्मु-र्विमानानि क्वचित्क्वचित् ॥ ६ ॥ संरंभादुद्धता तेनो-द्धृता अपि कुला-
चलाः ॥ तदा सपक्षा इति ते । जनैराशंकिरे भृशं ॥ ७ ॥ उद्धतोऽथ पयोनाथः । कल्लोलै-
स्त्रिदशान् दिवि ॥ जलाधिदेवतं चक्रे । शक्तिरेषा जगद्विभोः ॥ ८ ॥ मिथस्तानि विमाना-

॥ ६१८ ॥

नि । बाढमास्फाल्य वायुना ॥ अंगारवृष्टिं मुमुचुः । प्रलयांबुधरा इव ॥ ९ ॥ ततोऽपि भ-
गवान् बाणं । द्वितीयं मोहनाभिधं ॥ मुमोच तेन भूमिस्था । व्यलुठन् गतचेतनाः ॥ १०॥
पक्षिणो मानवा देवाः । पशवोऽप्यपरेऽपि च ॥ तंद्रया तेन सर्वेऽपि । बभूवुः स्थावरा इव ॥
॥११॥ ततश्च मघवान् ज्ञात्वा । तद्विज्जृंभितमीशितुः ॥ सौधर्मतस्तदागत्य । नत्वा तमिति
चास्तुवत् ॥ १२ ॥ जय स्वामिन् जगत्सार । जगदुद्धरणक्षम ॥ अनंतवीर्य भगवन् । जय दु-
स्सहदोर्बल ॥ १३ ॥ नाथ लोकमलोके त्वं । क्षेप्तुमीशः सुरालयं ॥ अंगुष्ठलीलयोद्धर्त्ता । वि-
श्वविश्वविपर्ययं ॥ १४ ॥ सुरासुरमनुष्येषु । नागेषु जगतां विभो ॥ अस्मादृशैरपि न ते । स-
ह्यते बलसंचयः ॥ १५ ॥ स्वामिन् भवादृशां वृत्ति–र्जगद्रक्षाकृते भवेत् ॥ अधुना चेदृगारंभः
। कुत एव विजृंभते ॥ १६ ॥ एते वराका अज्ञाना । न सहंते तव क्रुधः ॥ तृणानीव गजें-
द्रस्य । भास्करस्येव तारकाः ॥ १७ ॥ एतैश्चंदनगोधाभि–रिव सौधं जगत्त्रयं ॥ विद्युतेव क्रु-
धा तेऽद्य । सर्वश्चेति क्षयं विभो ॥ १८ ॥ तस्मादस्त्राणि नाथ त्वं । पुनः संहर वेगतः ॥ त्व-
मेव विश्वधातासि । त्वमेव जगतां मुदे ॥ १९ ॥ इतींद्रस्तुतितः स्वामी । शस्त्रं वेगादपाह-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रत् ॥ सचैतन्याश्च ते नाथं । शक्रं दृष्ट्वैव लज्जिताः ॥ २० ॥ न्यग्मुखांस्तानथ प्राह । शक्रो-
ऽप्युपहसन्निव ॥ अहो दुर्ल्ललितैर्दृष्टं । युष्माभिः स्वविजृंभितं ॥ २१ ॥ जगत्पूज्यो जगत्स्वा-
मी । जगदाधार एव च ॥ नत्वा तदेनं त्रिदशाः । क्षमयध्वं क्षमापरं ॥ २२ ॥ स्वाम्ययं स-
हजेनैव । जगत्त्राणपरः सदा ॥ त्राता तदागसः कर्तॄन् । भवतोऽप्यभयंकरः ॥ २३ ॥ श्रुत्वेति
किंचित्सव्रीडा । विनयावनताः सुराः ॥ लुठत्काया जिनाधीश–मनमंश्चाटुवाकिरः ॥ २४ ॥
स्वामिन् पाप्मभिरस्माभि–र्मेरुवत्परमाणुभिः ॥ मातुं गणयितुं गंगा–वालुका बालकैरिव ॥
॥ २५ ॥ स्वयंभूदन्वदंभांसि । संख्यातुमिव बिंदुभिः ॥ तथा त्वत्सत्ववीक्षायै । कृत आरं-
भ एष धिक् ॥ २६ ॥ कुलकं ॥ इत्युक्त्वा भगवत्पादौ । शिरस्यारोप्य ते सुराः ॥ मन्यमानाः
सनाथं स्वं । तमेव शरणं ययुः ॥ २७ ॥ स्वामी प्रसाददानेन । तानथो समभावयत् ॥ स
एव विश्वस्थितिकृत् । पाता तां च सएव हि ॥ २८ ॥ विभुरेत्य पुरोमध्ये । रामकृष्णौ स्व-
बांधवौ ॥ अनाधृष्टिं च तं स्नेहा–दालिंग्यादात्परां मुदं ॥ २९ ॥ आखंडलस्ततः प्राह । स्वा-
मिन्नस्मास्वनुग्रही ॥ शत्रुंजयादितीर्थेषु । यात्रां कारय तारय ॥ ३० ॥



For Private And Personal Use Only

इत्युक्त्वा सोऽनुमत्या च । विभोस्तत्क्षणकल्पितैः ॥ विमानैः सर्वसुरयुग् । ययौ शत्रुंजयं गिरिं ॥३१॥ स्वाम्यादेशात्सुराधीश–स्तत्र कर्त्तव्यमात्मनः ॥ पूर्ववत्सकलं चक्रे । सफलं मानसं सृजन् ॥ ३२ ॥ तीर्थप्रभावं भगवां–स्तत्र सर्वं निवेद्य च ॥ चचाल शक्रसहितो । गिरिनारगिरिं प्रति ॥ ३३ ॥ पुरंदरस्तु तत्रापि । स्थावरापरयोरपि ॥ स्वामिनोरकरोत्पूजां । शृण्वंस्तीर्थकथां शुभां ॥ ३४ ॥ द्वारिकायां विभुं मुक्त्वा । सबंधुं सुरसत्तमः ॥ तत्तत्पित्रे निवेद्याथ । स्वरध्यास्त प्रमोदयुक् ॥ ३५ ॥ स स्वामी शीतकरव–द्विश्वानंदविधायकः ॥ सुरासुरै रामकृष्णैः । सेवितः सुखमास्थितः ॥ ३६ ॥ इतश्च नारदोद्दिष्टः । कंसारी रुक्मिभूपतेः ॥ भगिनीं रुक्मिणीं नामा–हरत्स्वभुजवीर्यतः ॥ ३७ ॥ खचरस्य जांबवतः । पुत्रीं जांबवतीं ततः ॥ हरिर्जहार जाह्नव्यां । स्नानिनीं तत्पितुर्जयात् ॥ ३८ ॥ लक्ष्मणा च सुसीमा च । गौरी पद्मावती ततः ॥ गांधारी चेति कृष्णस्या–ऽभूवन् पट्टेऽष्ट वल्लभाः ॥ ३९ ॥ तत्तत्पौरुषसंगरंगमुदिता नेमेस्त्रिलोकीप्रिया । कंपस्वेदविवर्णतास्वरहतिबाष्पौघरोमोद्गमान् ॥ वाग्व्यंभोधिक्षुधानुगर्जनपयोवाहद्रुमादिच्छला–दंतर्जातरतिः समाश्रयदसौ भावान् सुसत्वोद्भवान् ॥४०॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ इत्याचार्यश्रीधनेश्वरसूरिविरचिते महातीर्थश्रीशत्रुंजयमाहात्म्यां-
तर्भूतश्रीरैवताचलमाहात्म्ये भीमसेनहरिवंशपांडवो-
त्पत्तिकृष्णनेमीशजन्मवर्णनो नाम दशमः
सर्गः समाप्तः ॥ श्रीरस्तु ॥

---

## ॥ एकादशमः सर्गः प्रारभ्यते ॥

नमोऽस्तु नेमये नम्र—शचीकम्राय तायिने ॥ द्वाविंशार्हतेऽर्च्याय । हरिवंशयाय योगि-
ने ॥ १ ॥ धृतराष्ट्रसुतास्तेऽथ । पांडवाः पंच तेऽपि च ॥ कर्णः सूतसुतः सोऽपि । संभूया-
खेलयन् सदा ॥ २ ॥ दुर्योधनस्तु सततं । छलैकोऽपि खेलनैः ॥ वंचयत्यनिशं पांडु—पुत्रा- ॥ ६२२ ॥
न् सरलमानसान् ॥ ३ ॥ स्वभावादुद्धतो भीम—स्तेषां मायां विमृश्य च ॥ प्रत्यक्षं कुट्टय-
त्युच्चै—स्त्रासयत्यपि तान् बलात् ॥ ४ ॥ ते तु सुप्तं छलाद्भीमं । बध्ध्वा चिक्षिपुरंभसि ॥ प्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बुस्तु स रज्जूनि । त्रोटयत्यतिदुर्मदः ॥ ५ ॥ रुषा दुर्योधनो भीमं । संतर्जयति नित्यशः
॥ भीमस्तानभिभवति । तदैव भुजपीडनैः ॥ ६ ॥ दत्ते दुर्योधनो भोज्ये । विषं भीमस्य
दुष्टधीः ॥ तदैवामृततां याति । तस्य तत्पुण्ययोगतः ॥ ७ ॥ यद्यद्भीमकृते चक्रे । प्रत्यनीकं
सुयोधनः ॥ तत्तत्तस्य वृथैव स्यात् । कुपात्रे दत्तदानवत् ॥ ८ ॥ पंचोत्तरशतं तेऽपि । कर्णः
सूतसुतश्च सः ॥ कृपाचार्याद्गुरोर्विद्यां । जगृहुः पितृशासनात् ॥ ९ ॥ तेषु प्रज्ञागुणेनालं ।
कर्णशक्रसुतावपि ॥ दुर्योधनस्तु कूटज्ञो । द्वेष्टि तौ ह्यविशंकितः ॥ १० ॥ अनध्यायेऽन्यदा
तेषां । क्रीडतां कंदुकोऽवटे ॥ न्यपतत्ते तदाकृष्टौ । विद्वस्ताः परितोऽभवन् ॥ ११ ॥ इतस्त-
त्रागमद्विप्रो-ऽश्वत्थामसुतसंयुतः ॥ द्रोणो धनुर्विदां धुर्यः । कुमारांश्चेत्यभाषत ॥ १२ ॥ कथं
संभूय कूपस्य । भवंतः परितः स्थिताः ॥ निर्भाग्या इव पित्राढ्यं । संवेष्ट्य विगतोद्यमाः ॥
॥ १३ ॥ कूपेऽत्र नोऽपतत्क्रीडा-कंदुकस्तैरितीरिते ॥ द्रोणः शरैरनुस्यूतै-स्तमाकर्षत्क्षणाद-
पि ॥ १४ ॥ तस्येति लाघवं ज्ञात्वा । गंगासूनुर्नृपांगजान् ॥ कृपाज्ञयार्प्पयत्तस्मै । धनुर्वेद-
शिशिक्षया ॥ १५ ॥ तेष्वदीप्यत तेजोभिः । कर्णस्तारेषु चंद्रवत् ॥ तस्मादप्यधिकः शक्र-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सूनुर्भास्वानिवोच्चकैः ॥ १६ ॥ लालने योजने शीघ्रा-कर्षणे दूरपातने ॥ दृढप्रहारेऽप्यजव-
देक एवार्जुनोऽधिकः ॥१७॥ निक्षिपन्नित्यशो दृष्टिं । द्रोणस्तेषूक्तेषु च ॥ विनये विक्रमे शौ-
र्ये । पार्थं च बहुमन्यते ॥ १८ ॥ कालिंद्यामन्यदा शिष्यै-रममाणस्य रंगतः ॥ द्रोणस्यैकां-
हिरग्रेन । जीवेनाकर्षि केनचित् ॥ १९ ॥ जिज्ञासुः शिष्यविनय-मरटद्द्रोण उच्चकैः ॥ उ-
दासीनेषु सर्वेषु । शक्रसूनुरधावत ॥ २० ॥ तस्येदृक् सत्वमालोक्य । मान्येऽस्मिन् विद्विषं-
त्विति ॥ मा भूयादस्य गर्वोऽपि । द्रोणस्तं प्रशशंस न ॥ २१ ॥

अन्यदा पार्थपुरतो । रहस्यत्तोऽपरं न हि ॥ शिक्षयामि धनुर्विद्यां । स प्रतिज्ञामिति
व्यधात् ॥ २२ ॥ अथैकदैकलव्याख्यो-ऽभ्यगात् द्रोणस्य सन्निधौ ॥ नीचान्वयो धनुर्वेदं । न ले-
भे नयवानपि ॥ २३ ॥ गुर्वभावे स तु द्रोणं । मृन्मयं भूतले व्यधात् ॥ तत्साक्षिकमथो ध-
न्व-विद्यामभ्यस्तवान् स्वयं ॥ २४ ॥ तस्यैवं गुरुभक्तस्य । कलाभ्यासं वितन्वतः ॥ विचि-
त्रपत्रलिखने । लाघवं समभूच्चरैः ॥ २५ ॥ भ्रमंस्तत्रान्यदा द्रोणा-नुगतोऽर्जुन आययौ ॥ प-
त्रछेदादिकं तादृक् ॥ तद्दृष्ट्वा स्वगुरुं जगौ ॥ २६ ॥ धनुर्वेदं विना त्वां न । शिक्षयामि परं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जनं ॥ प्रतिज्ञातमभूदित्थं । भवद्भिस्तदिदं कथं ॥ २७ ॥ द्रोणोऽथ विस्मयादूचे । पार्थ नो-
क्तं वृथा मम ॥ तज्जाने सुरमर्त्येषु । कोऽप्ययं नूतनोऽभवत् ॥ २८ ॥ सुरो वाप्यसुरो वापि
। यः कश्चिदिह वर्त्तते ॥ प्रत्यक्षीभूय मम स । निजं दर्शयतूद्यमं ॥ २९ ॥ इति द्रोणवचः
श्रुत्वै-कलव्यो धन्वतूणभृत् ॥ वनादेत्य गुरुं साक्षा-त्तं ननाम स्वनामवक् ॥ ३० ॥ युग्मं ॥
गुरुः कस्तेऽत्र विद्याया-मिति द्रोणगिरा पुनः ॥ तेनोचे द्रोणचरणाः । प्रसन्ना गुरवो मम ॥
॥३१॥ कोऽयं द्रोण इति स्वांते । ध्यात्वे तस्मै धनुर्धरः ॥ आख्याय पूर्ववृत्तांतं । मृन्मूर्त्तिं ता-
मदर्शयत् ॥ ३२ ॥ तत्रार्चितं मृन्मयं स्वं । पश्यन्नेषोऽर्जुनोपमः ॥ मा भूयादिति तं द्रोणो ।
दक्षिणांगुष्ठमार्थयत् ॥ ३३ ॥ स्वांगुष्ठं स प्रहृष्टोऽदा-त्तस्मै भक्त्या नमोऽरोत् ॥ अंगुलीभिः
पुनर्धन्वा-भ्यासं चक्रे विशंकितः ॥ ३४ ॥ अशिक्षयदथो द्रोणो । राधावेधं किरीटिनं ॥ भीम-
दुर्योधनौ तद्व-द्गदायुद्धममुग्धधीः ॥ ३५ ॥ दक्षोऽसौ नकुलोऽस्त्रेषु । सहदेवयुधिष्ठिरौ ॥ अ-
श्वत्थामा स्वधाम्नाभू-त्कर्णार्जुनसमस्तदा ॥ ३६ ॥ द्रोणाज्ञयान्यदा गंगा-सूनुर्मंचकसंचयं ॥
रचयामास पुत्राणां । रणारंभदिदृक्षया ॥ ३७ ॥ निषण्णेषु धृतराष्ट्र-द्रोणगंगासुतेष्वथ ॥ त-



For Private And Personal Use Only

अन्येयुर्धर्मपुत्र-मुखाः सर्वास्त्रिणो भटाः ॥ ३८ ॥ दर्शयंतो निजाभ्यासं । सर्वे ते रणरंगिणः ॥ लोकान् विस्मापयामासुः । सर्वशस्त्रविशारदाः ॥ ३९ ॥ तत्रावसरमासाद्य । भीमदुर्योधनौ मिथः ॥ विरोधयंतौ द्रोणोक्त्या-श्वत्थाम्ना तु निषेधितौ ॥ ४० ॥ अभ्युत्तस्थावथो वीरो । गुरुदृक्प्रेरितोऽर्जुनः ॥ भुजास्फोटैर्मंचभित्तीः । पाटयन् ध्वनितांबरः ॥ ४१ ॥ पार्थमुक्तशरव्रात-पक्षवातैर्धुताचलैः ॥ खं समासीद् ग्रहैस्त्यक्तं । त्रस्यद्भिरथार्दितं ॥ ४२ ॥ राधावेधदुपत्रांक-चित्रमालोक्य भूभुजः ॥ तस्य प्रीत्या प्रशंसंतः । शिरांसि दुधुवुर्मुदा ॥ ४३ ॥ भ्रूसंज्ञया ततो नुन्नः । कर्णो दुर्योधनेन च ॥ उदस्थान्मंचनात्कोपा-द्गर्जन् पर्जन्यवद् घनं ॥ ॥ ४४ ॥ आनयन् धन्व साटोपं । भुजास्फोटं भृशं सृजन् ॥ अदर्शयन्निजं कर्णो । लाघवं वसुधाभुजां ॥ ४५ ॥ तत्तादृक्शीघ्रवेधित्वा-तुष्टो दुर्योधनः किल ॥ परितोषाद्ददौ चंपां । तस्मायर्जुनवैरिणे ॥ ४६ ॥ ततश्च सारथिः सूत-स्तत्रायातो नमस्कृतः ॥ कर्णेन पितृभक्तया तु । निषसाद नृपाग्रतः ॥ ४७ ॥ अथ क्रुद्धोऽर्जुनोऽवोच-त्समं भीमेन दोष्मता ॥ अस्मै हीनकुलायारे । ददे चंपा त्वया कथं ॥ ४८ ॥ त्वदन्यायमहं नैनं । सहिष्यामि कुलाधम ॥ इ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्युक्त्वा धनुरास्फाल्य । युद्धायासज्जतामुभौ ॥ ४९ ॥ ततो दुर्योधनः कर्ण-स्तद्गृह्या अपरे नृपाः ॥ अत्रंतेरुः क्षणान्मंचाद् । युद्धायोत्कंठिता इव ॥ ५० ॥ अमीषां समरारंभै-र्मा क्षोभीर्जगतां त्रयं ॥ इत्युत्थाय गुरुश्चैता-नपासारयदादवात् ॥ ५१ ॥ इतः सूतो धृतराष्ट्र-पृष्टः कर्णकुलादिकं ॥ जगौ गंगाप्रवाहेऽसौ । लब्धः पेटाप्रतिष्ठितः ॥ ५२ ॥ मुद्राक्षरादयं कुंती-सुतोऽज्ञायि मया मुदा ॥ जगृहे रविणा स्वप्नो-पदिष्टस्फुटविक्रमः ॥ ५३ ॥ कर्णाधःकृतदोर्दंडः । सुप्तोऽयं यदभूत्पृथुः ॥ तन्मया कर्ण इत्यस्य । कथ्यते ह्यभिधोत्तमा ॥ ५४ ॥ ततो हृष्टो धृतराष्ट्रः । कर्णमादाय पुत्रयुक् ॥ अंतर्मत्सरभृत्पांडु-पुत्रेषु स्वगृहान् ययौ ॥ ५५ ॥ पांडुपुत्रेष्वभूयद्व-ल्लोको हर्षनिबंधनं ॥ तद्वद्दुर्योधनमुखे-ष्वभूदतिविरागवान् ॥ ५६ ॥ अथ पांडुर्विभज्यादा-त्कुशस्थलपुरादिकं ॥ तद्राष्ट्रं धार्त्तराष्ट्रेभ्यो । वांछन् मत्सरनाशनं ॥ ५७ ॥

अन्यदाथ सभासीनं । पांडुं द्रुपदभूपतेः ॥ वेत्रिविज्ञप्त आगत्य । दूतो नत्वा व्यजिज्ञपत् ॥ ५८ ॥ स्वामिन् द्रुपदराजस्य । द्रौपदी नाम नंदना ॥ चुलनीकुक्षिजन्मास्ति । धृष्टद्युम्नस्य चानुजा ॥ ५९ ॥ तस्याः स्वयंवरे सर्वे । दशार्हाः शिरिशार्ङ्गिणौ ॥ दमदंतः शिशुपा-

॥६२७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लो । रुक्मी कर्णः सुयोधनः ॥ ६० ॥ अपरेऽपि हि राजानः । कुमाराश्च महौजसः ॥ राज्ञा-
दूताः प्रेष्य दूतान । गच्छंतः संति संप्रति ॥ ६१ ॥ युग्मं ॥ एभिर्देवकुमाराभैः । कुमारैः पं-
चभिः सह ॥ अलंकुरु त्वमप्येत्य । तं स्वयंवरमंमपं ॥ ६२ ॥ पांडुस्ततो दलभरैः । पंचभि-
स्तनयैः सह ॥ वाद्यमानेषु वाद्येषु । कांपिल्यपुरमासदत् ॥ ६३ ॥ द्रुपदः पांडुमायातं । ज्ञा-
त्वा तनयसंयुतं ॥ पुरप्रवेशमकरो–दुत्सवैरतिहर्षतः ॥ ६४ ॥ चंदनागुरुकाष्टौघै–रत्नमाणि-
क्यहेमभिः ॥ रौप्यैरप्यभवद्रम्य–स्तत्र मंचकसंचयः ॥ ६५ ॥ तोरणानि प्रतिद्वारं । तत्र मं-
चेषु रेजिरे ॥ स्मरघर्मभृतो नृपान् । वीजयंतीव वायुना ॥ ६६ ॥ हेमसिंहासनेष्वेत्य । त-
त्र नृपतिसूनवः ॥ अथो निषीदुर्व्योम्नीव । नक्षत्राणीव तेजसा ॥ ६७ ॥ पंचभिस्तनयैर्युक्तो
। बाणैरिव मनोभवः ॥ पंचास्य इव पंचास्यै–स्तत्र पांडुनृपोऽशुभत् ॥ ६८ ॥ अथ रत्नप्रभा-
पूर–क्षीरोदकमलासना ॥ जनयित्रीव कामस्य । मुक्ताविद्रुममंमिता ॥ ६९ ॥ मुखेंदुशशि-
ना मुक्ता–तारावलिविराजिता ॥ गजेंद्रगामिनी सिंज–न्मंजीरमधुरस्वरा ॥ ७० ॥ स्नाता-
र्चितवीतरागा । बिभ्रती वरमालिकां ॥ समेत्य द्रौपदी स्तंभ–समीपेऽस्थात्पितुः पुरः ॥७१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥विशेषकं॥ इतश्च द्रुपदादेशा–दनुरानीय वेत्रनृत् ॥ राधास्तंजसमीपस्थो नृपतीनित्यवोचत ॥७२॥
सर्वे शृणुत राजन्या–स्तंजाग्रे चक्रमद्भुतं ॥ वामदक्षिणपक्षेऽस्य । द्वादशारा भ्रमंत्यमी ॥७३॥
अत्र सर्पिष्कटाहांतः–प्रतिबिंबितवीक्षणात् ॥ जित्वा शिलीमुखैश्चक्रं । राधां विध्यतु कश्चन
॥ ७४ ॥ राधापणीकृतामेतां । द्रुपदस्य स नंदिनीं ॥ उद्वहत्ववनीरत्नं । वीरमानी स्वजाग्य-
तः ॥ ७५ ॥ विशेषकं ॥ न क्षमा धन्वधरणे । केऽपि नारोपणे क्षमाः ॥ ज्ञात्वा केऽपि नि-
जां शक्तिं । तथैवास्थुर्महीधवाः ॥ ७६ ॥ इतोऽर्जुनः समं जीम–सेनेन जुजशालिना ॥ मं-
चादुत्तीर्य हरिवत् । कृत्रदेवतमानमत् ॥ ७७ ॥ पश्यतां नृपवृंदानां । लज्जावनतमौलिनां ॥
जग्राह पाणिना धन्व । पाकशासननंदनः ॥ ७८ ॥ उध्ध्वबाहुस्ततो जीम । उवाचोच्चैर्दि-
शां पतीन् ॥ हहो जव त्वं शेषादे । निःशेषक्षितिजारनृत् ॥ ७९ ॥ ईशाग्नियमनैरुत्य–वरु-
णानिलयक्षपाः ॥ इशानब्रह्ममुख्यास्ते । विश्वस्थितिपराः स्थिराः ॥ ८० ॥ अद्य दृढधनुर्धा-
न–पादन्यासैर्ममानुजः ॥ सर्वराट्गर्ववद् धन्व । नामयिष्यति पश्यत ॥ ८१ ॥ त्रटत्रटिति-
कुर्वाण–मथारोप्य धनुर्बलात् ॥ अधोदृक् शक्रसूर्बाणं । चकर्षोर्ध्वं मरुज्जिये ॥ ८२ ॥ निष्ठुरं ॥६३१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धन्वसंरावैः । कर्णबाधिर्यकारिभिः ॥ कातरैरवनौ सुप्तं । त्रस्तं भीरुभिरंहसा ॥ ७३ ॥ तम-
सर्पिर्दत्तदृष्टि–स्तारां चक्रांतरर्जुनः ॥ दृष्ट्वा वेगान्मुमोचेषुं । विव्याध च सविस्मयं ॥ ७४ ॥
ततो जयजयाराव—दुंदुभिध्वनिमिश्रितं ॥ अमुचन् सुमनःश्रेणीः । सुमनःश्रेणयस्तदा ॥
॥ ७५ ॥ सानुरागा ततोऽनंगा–कुलांगा द्रुपदांगजा ॥ कंठेऽर्जुनस्य चिक्षेप । वरमालां ससा-
ध्वसा ॥ ७६ ॥ यथैकं मानसं पंच–करणेषु पृथग्भवेत् ॥ तथा सा वरमालापि । तेषु पंचत्व-
मासदान् ॥ ७७ ॥ यथा पंचापि विषया–श्चेतनामनुसंस्थिताः ॥ तथामी पांडवा एक–प्रि-
या इत्यामृशन्न के ॥ ७८ ॥ गंगासुते लज्जमाने । द्रुपदे नतमूर्द्धनि ॥ सविस्मयेषु शेशेषु ।
मुनिः कश्चिदुपाययौ ॥ ७९ ॥ पांचाल्याः पंच पतयः । किमु स्युरिति राजभिः ॥ कृष्णा-
दिभिश्चारणर्षिः । पृष्टः सोऽवोचदित्यथ ॥ ८० ॥ द्रौपदी पंचपतिका । प्राग्जन्मार्जितकर्मणा
॥ भविष्यति किमाश्चर्यं । कर्मणां विषमा गतिः ॥ ८१ ॥

तथा ह्यत्रैव चंपायां । नाम्नेयं सुकुमालिका ॥ श्रेष्ठिसागरदत्तस्य । सुभद्राकुक्षिजा सुता ॥
॥ ८२ ॥ यौवने जिनदत्तस्य । सूनुना सागरेण सा ॥ उपयेमे तया सार्द्धं । निशि तल्पं च-



For Private And Personal Use Only

सोऽश्रयत् ॥ ९३ ॥ पूर्वकर्मवशात्तस्याः । स्पर्शेनांगारवद्भृशं ॥ दह्यमानः क्षणं तस्थौ । कथं-
चित्तत्र सागरः ॥ ९४ ॥ निशायमाणां तां मुक्त्वा । नंष्ट्वा च स्वगृहान् ययौ ॥ अपश्यंती प-
तिं सापि । निशांतेऽरुदद्भृशं ॥९५॥ तस्या दुर्गंधहेतुत्वं । ज्ञात्वा सागरमोक्षणे ॥ स्वसुतां सा-
गरो दान-परामस्थापयद् गृहे ॥ ९६ ॥ वैराग्यात्सान्यदा गोपा-लिकार्याग्रेऽग्रहीद्व्रतं ॥ तुर्यष-
ष्ठाष्टमादीनि । तपांस्यप्यकरोत्सदा ॥ ९७ ॥ ग्रीष्मेऽन्यदा भूमिभागो-द्यानस्था सा तपस्वि-
नी ॥ आतापनामुपाक्रांस्त । सोढुं दृग्दृष्टभास्करा ॥ ९८ ॥ तत्रस्था पंचभिः पुंभिः । प्रण-
येन पुरस्कृतां ॥ सापश्यद्देवदत्ताख्यां । गणिकां रूपगर्वितां ॥ ९९ ॥ सा त्वसंभोगपूर्णेच्छा ।
निदानमकरोदिति ॥ एषेव पंचपतिका । भूयासं तपसामुना ॥ १०० ॥ संलेखनामष्टमासा-
न् । कृत्वानालोच्य तन्मृता ॥ नवपल्योपमायुष्का । सौधर्मे देव्यसावभूत् ॥ १ ॥ च्युत्वा चा-
भूद् द्रौपदीयं । निदानात्प्राक्तनादमी ॥ अमुष्याः पतयः पंच । संजाताः कोऽत्र विस्मयः ॥
॥२॥ मुनेरित्युक्तितो व्योम्नि । साधुसाध्वीतिगीरभूत् ॥ साध्वमी पतयोऽभूव-न्निति कृष्णा-
दयो जगुः ॥ ३ ॥ तैरेव राजस्वजनैः । स्वयंवरसमागतैः ॥ कृतोत्सवं पर्यणैषु-द्रौपदीमथ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पांमवाः ॥ ४ ॥ ततः पांडुर्दशार्हास्तान् । कृष्णमन्यांश्च नूभुजः ॥ विवाहार्थमिहानीतान् । गौरवात्स्वपुरेऽनयत् ॥ ५ ॥ पूजितो ड्रुपदेनाथ । पांडुः स्वतनयैः सह ॥ महोत्सवैर्हस्तिना- ख्यं । पुनः स्वं पुरमासदत् ॥ ६ ॥

इतोऽन्यदा धर्मपुत्रे । निषण्णे द्रौपदीगृहे ॥ नारदः पूजितस्तेन । कामचारी समागमत् ॥ ॥ ७ ॥ प्रीतोऽथ नारदो नक्त्या । शेषानाहूय पांडवान् ॥ पांचाली समये सेव्या । सर्वैरि- त्यकरोत् स्थितिं ॥ ८ ॥ सत्येकस्मिन् याज्ञसेन्या । गृहानन्यः समेष्यति ॥ स हि द्वादश- वर्षाणि । तीर्थवासी नविष्यति ॥ ९ ॥ युग्मं ॥ अजानन्नन्यदा तत्र । स्थिते धर्मसुतेऽर्जुनः ॥ गत्वन् व्यावृत्य यात्रायै । सत्यसंघोऽचलहलात् ॥ १० ॥ नमस्यन्नथ तीर्थेषु । सर्वेषु स जि- नान् मुदा ॥ क्रमाद्वैताढ्यमासाद्या–नमत्तत्रादिमं जिनं ॥ ११ ॥ इतश्च कश्चिद्विद्याभृ–द्विधु- रस्तत्र संचरन् ॥ पृष्टः सशोक इव किं । पार्थेन च जगाविति ॥ १२ ॥ वैताढ्यस्योत्तरश्रे- एयां । मणिचूमाजिधो ह्यहं ॥ स्वामी हेमांगदेनैत्य । बलाद्राज्यान्निराकृतः ॥ १३ ॥ इतिश्रु- त्वार्जुनो धन्वी । तत्कल्पितविमानगः ॥ बलाद्धेमांगदं जित्वा । तं राज्येऽस्थापयत्पुनः॥१४॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हेमांगदमणिचूड–मुखैर्विद्याधरैर्मुदा ॥ सेव्यमानः कियत्कालं । स्थित्वा तत्राचलत्स तु॥१५॥ तत्कल्पितविमानस्थ–स्तीर्थेष्वष्टापदादिषु ॥ नमन् जिनान् स कौंतेयो । ययौ रैवतकाचलं ॥ १६ ॥ इतश्च श्रीपुरे रुत्रे । पुरासीत्पृथुराख्यया ॥ दुर्गंधत्वेन विख्याता । दुर्गंधा तस्य नंदना ॥ १७ ॥ तामन्यदा सोमदेवः । पितृदत्तामुपायत ॥ तद्दुर्गंधान्निशि छन्नं । स क्वचित्प्रययौ रयात् ॥ १८ ॥ पतिद्वेषादभूत्पित्रो–रप्यसौ द्वेषभाजनं ॥ भर्तृप्रीत्यैव वनिता । सर्वत्र खलु पूज्यते ॥ १९ ॥ सा सर्वत्र पराभूता । त्यक्त्वा निशि निजं गृहं ॥ कर्मनाशाय बभ्राम । सर्वतीर्थेषु सोद्यमा ॥ २० ॥ प्राक्कर्मकर्दमेतेषु । न ज्ञात्वा सातिदुःखिनी ॥ मर्त्तुकामाभवद्दीना । नदीनायकझंपया ॥ २१ ॥ यांत्यरण्ये वल्कलिनं । जटिनं सा तपस्विनं ॥ दृष्ट्वा नमन् मुनिः सोऽभूत् । तद्दुर्गंधात्पराङ्मुखः ॥ २२ ॥ तमाचख्यौ तथा वीक्ष्य । सा मुने निर्ममो भवान् ॥ व्यावर्त्तयसि यत्तन्मां परित्रातास्ति कोंऽहसः ॥ २३ ॥ मुनिनाभिदधे वत्से–ऽत्रास्ते कुलपतिर्गुरुः ॥ स ते प्रतिक्रियां कर्त्ता । तमेत्याख्याहि भक्तितः ॥ २४ ॥ इति श्रुत्वा- मुनिपदा–नुगता तत्र कानने ॥ जटिनं वृषभार्हंतं । ध्यायंतं तं च सानमत् ॥ २५ ॥ तद्दुर्गं-



For Private And Personal Use Only

धाद्गुरुरपि । वक्रीकृत्य स्वनासिकां ॥ कुशाग्रेन निविष्टां तां । दुर्गंधामित्यवोचत ॥ २६ ॥
विधुरासि कथं वत्से । किमायातात्र कानने ॥ त्वद्देहजोऽयं दुर्गंधः । कथमीदृग्विजृंभते ॥
॥ ६३५ ॥ ॥ २७ ॥ श्रुत्वेति किंचिदश्रूणि । प्रमार्ज्योवाच सेति तं ॥ मुने जानेऽत्र मे पूर्व–कुकर्मैव वि-
जृंभते ॥ २८ ॥ आबाल्यादपि दुःखार्त्ता । त्यक्ता भर्त्रा च गंधतः ॥ अभ्रमं सर्वतीर्थेषु । प-
रं नाद्यापि तत्क्षयः ॥ २९ ॥ आधारोऽस्यसंगिनां नूनं । धर्मदानादृषीश्वर ॥ प्राक्पापान्मोच-
यित्वा मां । संसाराब्धेश्च तारय ॥ ३० ॥ वाचंयमोऽप्युवाचैवं । वशे ज्ञानं न मेऽस्ति तत् ॥
तथापि रैवते याहि । श्रीशत्रुंजयमध्यगे ॥ ३१ ॥ तत्र केवलिनिर्दिष्टा–गजेंद्रपदकुंभतः ॥ आ-
नीय बहुपानीयं । स्नायाः कर्मक्षयाय च ॥ ३२ ॥ श्रुत्वेति साथ सुप्रीता । मुनिपादौ प्रण-
म्य च ॥ कृत्वा चित्ते पुंडरीकं । रैवतं चाचलक्षितिं ॥ ३३ ॥ दिनैः कतिपयैर्नित्यं । चलंती
साथ निश्चयात् ॥ प्राप शत्रुंजयं शैलं । ननाम च जगद्गुरुं ॥ ३४ ॥ ततः प्रदक्षिणीकृत्य । शै- ॥ ६३५ ॥
लं तं साचलद्द्रुतं ॥ रैवते दैवतं नंतुं । हंतुं प्राक्कर्मसंचयं ॥ ३५ ॥ पद्ययोत्तरया शैल–मा-
रुह्य शुभवासना ॥ आससादेभपादाख्यं । कुंडं दर्पहरं च सा ॥ ३६ ॥ अर्हच्चैत्ये च कुंडे

चा–ऽज्ञानमाना प्रवेशनं ॥ बहिः पानीयमानाद्य । नित्यं स्नाति सुवासना ॥ ३७ ॥ त्यक्त्वा
दुर्गंधतां वस्त्रैः । सप्तभिः शुभगंधयुक् ॥ बिभ्रती देहमर्चायै । ययौ सा जिनमंदिरं ॥ ३८ ॥
तदा च पार्श्वस्तत्रस्थो–ऽर्हत्पूजानंतरं भवं । तस्याः पूर्वं कथ्यमानं । मुनिनेत्यशृणोदथ
॥ ३९ ॥ यद्भूः प्राग्भवे वत्से । त्वं विप्रकुलसंभवा ॥ श्वेतांबरं मुनिमिति । तदाहसितवत्य-
सि ॥ ४० ॥ वनौकसोऽपि यदमी । सदा स्नानविवर्जिताः ॥ शुभ्राण्यमूनि वासांसि । मलि-
नीकुर्वते हहा ॥ ४१ ॥ मोटयंतीति वदनं । पिट्टयंती कटौ करं ॥ यदर्जयः कुकर्म त्वं ।
तदाकर्णय तत्फलं ॥ ४२ ॥ मृत्वा जातासि नरके । श्वयोनौ च ततोऽभवः ॥ चांडालकुल-
जा तस्मा–त्ततोऽपि ग्रामशूकरी ॥ ४३ ॥ एवं भ्रांत्वा भवान् दुष्टान् । क्रमाज्जातासि मानु-
षी ॥ नाम्ना च परिणामेन । दुर्गंधा ह्यधुना ननु ॥ ४४ ॥ त्रैलोक्यवासिनां श्रेष्ठो । यः पू-
ज्यो योगिना जिनः ॥ निःक्रिया अपि किं निंद्या–स्तन्मुद्राधारिणो जनाः ॥ ४५ ॥ महाव्र-
तधरा ये च । ये च मिथ्यात्वनाशकाः ॥ येऽर्हच्छासनभास्वंत–स्ते निंद्या मुनयः कथं ॥४६॥
निःक्रिया अपि लोकोत्तया । ये च धर्मोपदेशकाः ॥ धर्मलाभगिरो नम्या–स्ते निंद्या मुनयः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कथं ॥ ४७ ॥ तीर्थप्रभावात्कर्माणि । क्षिप्त्वा त्वं लब्धवत्यसि ॥ बोधिं ततस्तीर्थसेवां कुर्याद्यत्स्याभवकृतिः ॥ ४८ ॥ इत्युक्त्वा विरते तस्मिन् । दुर्गधाप्यर्जुनोऽपि च ॥ नेमतुः स्वामिनं तं च । गुरुं तीर्थस्य भावतः ॥ ४९ ॥ वन्यंमन्योऽर्जुनस्तीर्थे । तस्मिन्नतिसुवासनः ॥ मणिचूडेन मित्रेण । सममस्थाद्दिनत्रयं ॥ ४९ ॥

इतः कृष्णस्तमायातं । विदंस्तत्रैत्य हर्षतः ॥ अदात्सुभद्रां भगिनीं । तस्मै प्रीतिविवर्द्धये ॥५०॥ पुनः शत्रुंजये नंदि–वर्द्धनेऽष्टापदेऽपि च ॥ द्वादशाब्दिमर्जुनोऽस्था–त्तीर्थेष्वन्येषु तत्परः ॥५१॥ इति स्वसंधामापूर्य । समंविद्याधरैर्घनैः ॥ विमानैश्छादयन् व्योम । स प्राप हस्तिनापुरं ॥ ५२ ॥ सवधूकंतमायांतं । ज्ञात्वा पांडुः समं सुतैः ॥ सदुत्कंठोऽर्जुनस्योच्चैः । प्रवेशोत्सवमातनोत् ॥ ५३ ॥ तदैव मणिचूडस्य । भगिनीं स्वाक् प्रभावतीं । छलेनापहृतां विद्या–भृता केनापि सोऽशृणोत् ॥ ५४ ॥ पार्थोऽथ मणिचूडेन । समं व्योमपथा बली ॥ गत्वा हत्वा च तं प्रत्या–हरद्दीघ्रं प्रभावतीं ॥ ५५ ॥ पांडुर्विजयिनं पार्थ–मभिनंद्य यशस्विनं ॥ तदैव धर्मतनयं । स्वपदेऽस्थापयन्मुदा ॥ ५६ ॥ व्योमेव व्योममणिना । ध्वजेनेव सुरालयः ॥ युधि-

॥ ६३६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्ठिरेण नृपेन । तदा विश्वमलंकृतं ॥ ५७ ॥ भीमाद्या अथ चत्वारः । समं सैन्यैस्तरस्विनः ॥ दिशो जित्वा चतस्रोऽपि । धर्मपुत्राङ्ग्रयागमन् ॥ ५८ ॥ पंचानामपि पांचाल्याः । पंचास्या इव नंदनाः ॥ अनुवन् यैः कुलं चक्रे । कल्पवृक्षैः सुराद्रिवत् ॥ ५९ ॥ बंधुवत्पुत्रवत्पत्ति–वन्मित्रवन्निजांगवत् ॥ युधिष्ठिरस्य चत्वार–स्तेऽभवन् विनयादिह ॥ ६० ॥

मणिचूडोऽथ तत्प्रीत्या । पुरे विद्याबलान्नवां ॥ आखंडलसभातुल्यां । कारयामास संसदं ॥ ६१ ॥ मणिस्तंभा बभुः संत–स्तत्रासंत इवात्मवत् ॥ योषिच्चित्तमिवानेक–वर्णा भूरत्नरोचिभिः ॥ ६२ ॥ शालभंज्योऽप्सरस्तुल्या । रत्नमय्यः सुरप्रियाः ॥ भित्तयो बुद्धमतव–त्क्षणदृष्टा इवाभवन् ॥ ६३ ॥ तत्र प्रीत्या मणिचूडो । हेमसिंहासने स्वयं ॥ युधिष्ठिरं निवेश्याग्र । स्वमैत्रीं सफलां व्यधात् ॥ ६४ ॥ इतस्तत्रार्हतः शांति–नाथस्याकारयन्नवं ॥ प्रासादं धर्मतनयो । मूर्त्तियुक्तं च हेमभिः ॥ ६५ ॥ कल्याणकत्रयं यत्र । श्रीशांतेरभवत्पुरा ॥ हस्तिनागाभिधं तीर्थं । तत्तेनापि वृषप्रदं ॥ ६६ ॥ सर्वदिग्विजयानीत–लक्ष्मीकल्पलताफलं ॥ तदुत्तमं मन्यमानो । राजा तत्राकरोन्महं ॥ ६७ ॥ दशार्हा रामकृष्णौ च । द्रुपदाद्याश्च



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नृभुजः ॥ तेनाहूतास्तदाजग्मु–स्तत्प्रतिष्ठामहोत्सवे ॥ ६८ ॥ अथ तेषु निषरणेषु । सन्नास्तं-
न्नानुर्विविषु ॥ राज्ञाहूतस्तदायातः । सबंधुः स सुयोधनः ॥ ६९ ॥ यादवान् पांडवांस्तत्र ।
मणिसिंहासनस्थितान् ॥ व्योमस्थानिव नैर्मल्यात् । स निरीक्ष्य विसिस्मये ॥ ७० ॥ संवृ-
एवन् वसनं नील–कुट्टिमे जलशंकया ॥ स्फाटिके व्योमबुद्ध्या तु । कुर्वन्नुत्प्लुतिसंगतिं ॥
॥ ७१ ॥ आस्फलन् मणिभित्तौ तु । मुख्यकृत्रिममूर्त्तिषु ॥ भ्रांतिमान् स तदा सर्वै–रहस्य-
त सुयोधनः ॥ ७२ ॥ युग्मं ॥ सोऽरणितरुवत्सूर्य–मणिवद् बाह्यशीतलः ॥ अंतः क्रोधाग्नि-
युक्तोऽपि । सूत्रयामास तं महं ॥ ७३ ॥ दानशौंडे तदा धर्म–पुत्रे कल्पद्रुमादयः ॥ हीणा
ययुस्तथा दूरं । तन्नामैव यथाभवत् ॥ ७४ ॥ अहिंसां सर्वधर्मस्य । मूलं जानन् स धर्मसूः
॥ सर्वत्रोद्घोषयामास । तामतः क्षितिमंडले ॥ ७५ ॥ प्रतिष्ठोत्सवमानंदा–दित्थमासूत्र्य ध-
र्मसूः ॥ चारणर्षीन्मुनीनन्या–न्नृपान् दानैर्व्यसर्जयत् ॥ ७६ ॥ सत्कृतो वस्त्ररत्नाद्यै–रपि दु-
र्योधनो नृपः ॥ प्राप्यात्मनगरं पित्रा । मातुलेनेत्यमंत्रयत् ॥ ७७ ॥ आबाल्यात्पांडवा एते।
सदा कपटतांडवाः ॥ गेहे शूरा नृशं क्रूरा । बहिर्मृदुगिरो ननु ॥ ७८ ॥ सगर्वै रामकृष्णा-



For Private And Personal Use Only

न्या–मेतै राज्यमदोद्धतैः ॥ हसितं यन्मयि तदा । तेन दूये सशल्यवत् ॥ ७९ ॥ छलेनापि
बलेनापि । साध्यो वैरीति नीतितः ॥ पांडवेभ्यो हरिष्यामि । राज्यं स्वामर्षशांतये ॥ ८० ॥

इत्युक्त्वा शिल्पिभी रम्यां । सभां द्रविणकोटिभिः ॥ स नवां कारयामास । तत्स्प-
र्धावद्धमानसः ॥ ८१ ॥ आकारयदथो दूतै–स्तदालोकनकौतुके ॥ दशार्हान् पांडवान् राम–
कृष्णौ दुर्योधनस्तदा ॥ ८२ ॥ प्रत्येकमागतानां स । तेषां कृत्रिममानदः ॥ सन्मुखागमनैः प-
स्त्य–दानैरावर्जयद्बहु ॥ ८३ ॥ भोज्यादिभिर्वनक्रीडा–जलयंत्रकुतूहलैः ॥ पांडवान् स्ववशी-
कृत्य । स द्यूतायाभ्यमंत्रयत् ॥ ८४ ॥ धर्मैकविदुरेणापि । विदुरेण निषेधितः ॥ द्यूतान्न ध-
र्मपुत्रोऽपि । व्यरमत्कर्मयोगतः ॥ ८५ ॥ धार्तराष्ट्रश्छलेनैव । दीव्यन् विधिविपर्ययात् ॥ नाल-
क्षि पांडवैः सर्व–कलाव्रततिमंडपैः ॥ ८६ ॥ आश्वमेभं च रथिकं । क्रमाद्ग्रामपुराण्यपि ॥
राज्यं चाहारयद्धर्म–पुत्रः सत्कर्महानितः ॥ ८७ ॥ जयाशया धर्मसूनु–र्यद्यत्पणमहो व्यधात् ॥
अपश्यन्मृगतृष्णाव–त्तदसत्तृष्णयातुरः ॥ ८८ ॥ पणीकृतामथो कृष्णां । कृत्स्नव्यसनवारिधिः
॥ सत्यसंधः पृथासूनु–र्हारयामास ही विधिः ॥ ८९ ॥

॥ ६३९॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततो दुर्योधनः सर्वं । कृत्वात्मायत्तमप्ययं ॥ द्रौपद्यानयने दुःशा-सनं च प्राहिणोत्कु-
धीः ॥ ९० ॥ रे कृष्णे हारितासि त्वं । मत्संगे भवाधुना ॥ विडंबिनः पांडुपुत्रान् । जही-
त्याख्यन् गृहान् ययौ ॥ ९१ ॥ इति तद्वचनं श्रुत्वा । नश्यंतीं द्रौपदीं द्रुतं ॥ धृत्वा कबर्यां
स सभा-मध्यमानीतवान् हठात् ॥ ९२ ॥ निषण्णेषु भीष्मद्रोण-विदुरेष्वथ सा सती ॥ ल-
ज्जमानापमानेन । जगाविति रुषा गिरं ॥ ९३ ॥ दुःशासन दुराचार । रे कुलांगार निस्त्रप
॥ कुर्वन्नेवं कुकर्म त्वं । वितथाशो भविष्यसि ॥ ९४ ॥ श्रुत्वाप्येवं गिरो दुःशा-सनस्तस्या
मदोद्धतः ॥ नितंबबिंबाद्वसना-न्याचकर्षातिमर्षणः ॥ ९५ ॥ यथा यथा स वासांसि । गृह्णा-
त्यस्या नितंबतः॥ तथा तथा शीललक्ष्मी-स्तां द्राक् परिदधात्यपि ॥ ९६ ॥ शतमष्टोत्तरं त-
स्या-श्चीराण्येवं चकर्ष सः ॥ विखिन्नोऽथ निषादाभो । निषसाद सदोंतरा ॥ ९७ ॥ दुर्यो-
धने क्रोधवह्नि-मारुतेर्ज्वलितोऽपि सन् ॥ धर्मजोक्त्यभिरकरो-द्भमद्भमिति वाङ्मिषात् ॥९८॥ ॥ ६४० ॥
सगोत्रं गदया दुर्यो-धनं संचूर्णयाम्यहं ॥ यद्यंतरा मम रुषो । न भवेद् गुरुवागियं ॥९९॥
गर्जंतमूर्जितमिति । श्रुत्वा भीमं धराधवाः ॥ न्यग्मुखाः केचिदभवन् । भयार्त्ताः केऽपि दुः-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





खिताः ॥ १०० ॥ युग्मं ॥ रोषोष्मदुःखितां जीष्मो । जगावथ गिरं नृपं ॥ रेधसूनो किमा-
रब्धं । त्वया साध्वीविमंबनं ॥ १ ॥ जीमार्जुनाद्या एते त्वा-मुद्यता हंतुमप्यहो ॥ निषिद्ध्यं-
ते धर्मभुवा । विनयो विक्रमो ह्ययं ॥ २ ॥ त्यजेमां त्वत्कुलांगार-धूम्यां कृष्णां पतिव्रतां ॥
त्वत्पिता बहिरंधोऽयं । त्वमंधोंतर्बहिश्च रे ॥ ३ ॥ श्रुत्वेति व्याहरद्दुर्यो-धनो द्वादशवत्सरान्
॥ अमी व्रजंतु कांतार-मेकाब्दं नष्टचारतां ॥ ४ ॥ कुत्रापि स्थानेऽमून् ज्ञास्ये । वत्सरे चे-
त्रयोदशे ॥ पुनर्द्वादशवर्षाणि । प्रापयिष्ये तदा वनं ॥ ५ ॥ अंगीकृत्येति धर्मांग-जन्मा न-
त्वा गुरूनथ ॥ जायानुजयुतः प्राप । हस्तिनाह्वयपत्तनं ॥ ६ ॥ नत्वा पित्रोरशेषं त-च्चरि-
तं धार्त्तराष्ट्रजं ॥ शशंस धर्मतनयो । न मनाक् खेदमेदुरः ॥ ७ ॥ तत् श्रुत्वा पांडुरप्यस्था-
त् । क्षणं मौनमुपेयिवान् ॥ चिंतयन्निव चित्तांतः । संसारस्थितिमादितः ॥ ८ ॥ पुनराख्य-
ततः सत्य-संधो मा खेदमुद्वह ॥ ताताहं वनवासेन । करिष्ये नाम सार्थकं ॥ ९ ॥ राज्य- ॥६४१॥
त्यागेऽपि राज्येऽपि । कांतारे नगरेऽपि वा ॥ स्वोर्क्तं पालयतां पुंसां । सर्वत्रापि समृद्धयः ॥
॥ १० ॥ धीरवीरोऽसि तात त्वं । कुरुगोत्रकुलाचल ॥ अतोऽस्माननुमन्यस्व । वनायात्मो-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कपालकान् ॥ ११ ॥ अनुमतमप्रतिषिद्धमिति । प्रविकल्प्य पितुः स निजां च प्रसूं ॥ वनगमनाकुरटंकवला-ह्रिदयेऽह्रिण सशोकपयःप्रविसूं ॥ १२ ॥

अथ पित्रोरनुज्ञाभिः । परिणेतुमिव श्रियं ॥ चचाल बंधुपत्नीभिः । समं धर्मतनूरुहः ॥ ॥ १३ ॥ पांडुः कुंती च मद्रीच । तथा सत्यवती गृहात् ॥ अंबांबालांबिकास्ताश्च । स्नेहादनु निर्ययुः ॥ १४ ॥ अश्रुप्रवाहा नेत्रेभ्यो । जनानां पश्यतां च तान् ॥ तत्स्नेहसागरमनु-प्रवृत्ता इव तेऽभवन् ॥ १५ ॥ तदा तैः पंचभिर्याद्भि-रिंद्रियैरिव तत्पुरं ॥ निश्चेतनं क्रियाहीनं । वभूवालेख्यगं यथा ॥ १६ ॥ पुराद्बहिरुपेत्याथ । स्थित्वा धर्मसुतो नृपं ॥ मातृन्नत्वा चेति जगौ । पाणी संयोज्य सत्ववान् ॥ १७ ॥ कुरुवंशावतंसस्त्वं । तात सत्वं समाश्रय ॥ पुत्रेष्वज्ञ इव स्नेहात् । किमश्रूणि विमुंचसि ॥ १८ ॥ प्रतिज्ञातार्थनिर्वाह-परैरस्माभिरंगजैः ॥ सद्भिः श्रेयो हि ते कीर्त्ति-रपि कौरवमंगलं ॥ १९ ॥ धार्त्तराष्ट्रै राष्ट्रलुब्धै-रप्येतद्विहितं हितं ॥ न चेन्मे सत्यसूनुत्वं । सत्यं भाति कथं पितः ॥ २० ॥ मातरः कातरा यूयं । यत्तत्स्नेहविजृंभितं ॥ स्मृत्वा स्वं वीरपत्नीत्वं । धीरतां भजताधुना ॥ २१ ॥ ताते वि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




धेया शुश्रूषा । पूजनीयो जिनेश्वरः ॥ देयास्मासु सदैवाशीः । प्रजा पाल्या हि पुत्रवत् ॥
॥ २२ ॥ लोकाः कदाचिदस्मानि-रपराद्धं नवेद्यदि ॥ राज्यांवैस्तत्क्षमध्वं हि । सर्वदेवमयी
प्रजा ॥ २३ ॥ विनयेनेति तातं स । मातृर्लोकान् विसृज्य च ॥ कुंतीकृष्णासुनद्रानि-र्बंधु-
निश्च समं ययौ ॥ २४ ॥ क्रूरकर्मिरनामाना-वथ दुर्योधनाज्ञया ॥ नापयंतौ याज्ञसेनीं ।
जितौ निमेन राक्षसौ ॥ २५ ॥ सर्वोपायेषु विदुरो । विदुरोऽन्येत्य पांमवान् ॥ विद्योपायैर-
नुशास्य । पूजितस्तैः पुरं ययौ ॥ २६ ॥ द्रौपदीसोदरो धृष्ट-द्युम्नो ज्ञात्वाथ पांमवान् ॥ स-
मेत्य प्रीत्या कांपिल्ये-ऽनयत्पांचालनूषणे ॥ २७ ॥

अथो समुद्रविजया-ज्ञया कृष्णोऽपि सोत्सुकः ॥ नंतुं कुंतीमगात्तत्र । समं यादवको-
टिनिः ॥२८॥ तदा ते पांडवा हर्ष-तांमवास्तमनोजयन् ॥ पार्थविद्याहृतैर्नोज्यैः । कृष्णं वि-
स्मयकारिनिः ॥ २९ ॥ हरिरूचेऽथ तान् प्रीत्या । जानेऽहं धृतराष्ट्रजान् ॥ आबाल्यात्कूट- ॥६४३॥
वासैक-राष्ट्राणि ठलघातिनः ॥ ३० ॥ दीव्यद्भिरेतैः कपट-पटुनिर्धृतराष्ट्रजैः ॥ राज्यान्निर्वा-
सिता यूय-महो दैवविपर्ययः ॥ ३१ ॥ आव्रजंतु निजं स्थान-महंहन्मि नवद्विषः ॥ ना-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कालेऽपि हि दुष्टानां । हननान्नियमक्रयः ॥ ३२ ॥ गोविंदे निगदत्येवं । धर्मसूनुर्जगौ ननु ॥
त्वयि संज्ञाप्यते सर्वं । हरे हरिपराक्रमे ॥ ३३ ॥ वयं त्रयोदश समाः । समासाद्य वनाश्र-
मं ॥ त्वया सहायिना शत्रून् । हनिष्यामोऽधुना व्रज ॥ ३४ ॥ इत्युक्त्वा पांडवैर्विष्णु-र्विसृ-
ष्टो भगिनीं निजां ॥ सुभद्रां रथमारोप्य । प्रापत्सतनयां पुरीं ॥ ३५ ॥ ततस्ते सप्त सत्सत्वाः
। क्रामंतः क्रमतो महीं ॥ पुरोचनेनोचिरेऽथ । दुर्योधनपुरोधसा ॥ ३६ ॥ नत्वा भवंतं पं-
चांग-स्पृष्टभूपीठ आदरात् ॥ सुयोधनो मन्मुखेन । नयाद्विज्ञपयत्यदः ॥ ३७ ॥ मयाऽज्ञान-
वशादेत-द्धर्मसूनो तदा कृतं ॥ ज्येष्ठो गुणैश्च वयसा । सोढवान्नियतं भवान् ॥ ३८ ॥ तथा म-
यि कृपां कृत्वा । पश्चात्तापपरायणे ॥ इंद्रप्रस्थपुरेशत्वं । सांप्रतं भज मानद ॥ ३९ ॥ इत्थं-
तद्दारुणां वाह्य । कोमलां तद्गिरं नृपः ॥ श्रुत्वा विश्वस्य सरलः । प्राप तां वारणावतीं ॥४०॥
ज्ञात्वा तद्विदुरः कूटं । गूढलेखाक्षरैरिति ॥ अशिक्षयद्धर्मसूनुं । विश्वसीर्मारिषु क्वचित् ॥४१॥
अस्ति निर्मापितं लाक्षा-गृहं वासाय वो नवं ॥ तत्र स्थितानसौ युष्मान् । गुप्तं धक्ष्यति वा-
नवः ॥ ४२ ॥ यत्कृष्णफाल्गुनस्यैष । चतुर्दश्यां महानिशि ॥ सुयोधनेन निर्दिष्टो-ऽनिष्टं क-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सौ जवत्सु हि ॥ ४३ ॥ इति श्रुत्वा तदा जीमो । निस्सीमोज्ज्वलपौरुषः ॥ जगौ रुषा नि-
जं ज्येष्ठं। कष्टं यत्तेऽरिषु कमा ॥ ४४ ॥ त्वदादेशादहं शत्रु–मेको दुर्योधनं रणे ॥ गदया ह-
न्मि कुलजं । कलंकमिव पंकिलं ॥ ४५ ॥ इति तस्योर्जितं कोप–वह्निं धर्मतनूरुहः ॥ नय-
वाक्यामृतैस्तैस्तैः । शमयामास सत्वरं ॥ ४६ ॥ विडुरोऽथ कलाविद्भिः । सुरंगां खनकैर्व्यधा-
त् ॥ धार्मिं च ज्ञापयामास । वंचयंस्तं पुरोधसं ॥४७॥ पुरोचनोऽथ सन्मानै–स्तत्र लाक्षा-
गृहे नवे ॥ पांडवान् वासयामास । स्वयं जक्तिपरायणः ॥ ४८ ॥ इतश्च तद्दिने काचि–ज्ञा-
रती पंचपुत्रयुक् ॥ एकवध्वा समं तत्रा–ययौ कुंत्या च वासिता ॥ ४९ ॥

अथ गुप्तं निशीथेऽग्निं । सोऽमुचत्तत्र शात्रवः ॥ लाक्षागृहे तु ज्वलिते–ऽनश्यंस्ते विवरा-
ध्वना ॥५०॥ स्थित्वा पश्चाच्च जीमस्तु । क्षिप्त्वाग्नौ तं पुरोचनं ॥ अमिलद्वेगतो गत्वा। स्व-
बंधुन्यः कृता नतिः ॥ ५१ ॥ इतः प्रातर्जना दृष्ट्वा। दग्धान् सप्तापि तान् गृहे ॥ शोचयामा- ॥६४५॥
सुरंतस्तु । चुक्रुशुर्धृतराष्ट्रजं ॥ ५२ ॥ पादाघातैः पितृवैरे–णेव तस्य पुरोधसः ॥ शिरस्ते चू-
र्णयामासु–र्लोकाः शोकाकुला नृशं ॥ ५३ ॥ सुयोधनोऽथ विज्ञाय। पांडवांश्च पुरोधसं ॥ त-

For Private And Personal Use Only

त्र दग्धान् बहिः शोका-द्दौ दापांजलीर्जलैः ॥ ५४ ॥ शंकया वैरिणां पांडु-पुत्रा अथ पथि
द्रुतं ॥ आस्फलंतः पतंतश्च । चलंतिस्म दिवानिशं ॥ ५५ ॥ न दुर्गेऽपि न चैत्येऽपि । न गि-
रौ न नदीतटे ॥ न सरस्यापि ते भीते-र्विशश्रमुरहो क्वचित् ॥ ५६ ॥ दर्भांकुरपरिश्लिष्टे ।
कंटकाढ्येऽपि भूतले ॥ चलंतस्तेऽपि सरले । सुखं दुःखं च नाविदन् ॥ ५७ ॥ इतः कुंती प-
रिक्लिष्टा । मार्गे चलितुमक्षमा ॥ जगाद भीममथापि । कियद्गंतव्यमस्ति नः ॥ ५८ ॥ क्र-
मितुं न क्षममहं । वधूरपि हि न क्षमा ॥ नकुलः सहदेवश्च । लज्जया चलतः परं ॥ ५९ ॥
श्रुत्वेत्यध्यारोपयत्स । मातृभार्ये निजांसयोः ॥ बंधू बबंध पृष्ठे तु । करयोरपरावधात् ॥६०॥
संचरन्निति वेगेन । भीमो निस्सीमपौरुषः ॥ अतिक्रम्य निशां प्रातः । प्रापत्किमपि काननं
॥ ६१ ॥ तत्र निद्रायमाणेषु । श्रांतेषु सकलेष्वपि ॥ जलार्थी भीमसेनोऽथ । भ्रमन् प्राप
महासरः ॥ ६२ ॥ तीर्त्वा तत्र क्षणं भीमो । यावच्चलति वारिभृत् ॥ तावत्पश्चाच्चलद्ग्रीवां ।
स्त्रियं कांचिद्व्यलोकयत् ॥ ६३ ॥ पूर्वं सा क्रूरदेहा रे-रे तिष्ठेति प्रभाषिणी ॥ भीमं चाथ
विलोक्यागा-द्वृषस्यंत्यतिरूपिणी ॥ ६४ ॥ तत्पुरो लीलयाभ्येत्य । घ्नंती नेत्रविकूणितैः ॥ सा

॥ ६४६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तं जगाद सानंदं । स्खलंत्या च गिरा मृदु ॥ ६५ ॥ जितकंदर्पदर्प त्वं । शृण्वस्मिन् पर्वते
मम ॥ सोदरोऽस्ति हिडंबाख्य–स्तत्स्वसाहं हिडंबिका ॥ ६६ ॥ स च त्वद्गंधमाघ्राय । क्षु-
धितो नयनाय ते ॥ प्राहिणोन्मामहं त्वां तु । वीक्ष्य जाता रतार्थिनी ॥ ६७ ॥ प्रसादाभि-
मुखस्तस्त्वं । मन्मथार्णवमज्जिनीं ॥ पाणिग्रहाग्रहान्नाथ । मामुद्धर दयामय ॥ ६८ ॥ कत्र्यहं
वनवासेऽपि । वसतां भवतां ननु ॥ महोपकारं शक्त्या त–न्मामुद्वह हृदीश्वर ॥ ६९ ॥ इ-
त्यालपंतीं तां भीमो । जगौ मैवं वदाधुना ॥ वनवासस्थितानां ना–स्माकमेतद्धि युज्यते ॥
॥७०॥ इत्थं तयोर्विवदतो–र्भीषणः स करालदृक् ॥ हिडंबोऽभ्येत्य भगिनीं । पाणिपातैरताड-
यत् ॥ ७१ ॥ क्रुद्धोऽथाख्यद्भीमसेनः । किमरे राक्षस त्वया ॥ ताड्यते मत्पुरो बाला । माम-
जित्वा रणोद्यतं ॥ ७२ ॥ इत्युक्तो भीषणं रक्षः । प्रोच्चैरुन्मूल्य पादपं ॥ दधावे पिंगनयनं ।
फेत्कुर्वत्तंप्रति क्रुधा ॥ ७३ ॥ भीमोऽपि वृक्षमुन्मूल्य । सन्नद्ध इव रोषणः ॥ सिंहनादं सृज-
न् रौद्रं । युद्धायाधावत द्रुतं ॥ ७४ ॥ तयोरन्योऽन्यसंघट्टा–त्पादचारात्ससागरा ॥ चकंपे व-
सुधा कामं । कंपयंती गिरीनपि ॥ ७५ ॥ एवं तयो रणे धर्म–सुताद्यानेत्य जाग्रतः ॥ नत्वा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुंतीं हिडंबाख्य–न्मार्यतेऽसौ तवांगजः ॥ ७६ ॥ तदमुष्य सहायत्वे । मातः प्रेषय कंचन
॥ जातास्म्यहं गुणक्रीता । हिडंबा भीमचेटिका ॥ ७७ ॥ इतो रक्षःप्रहारेण । भीममालो-
क्य जर्जरं ॥ अधावत धर्मसूनुः । खड्गपाणिस्तदाक्षिपन् ॥ ७८ ॥ सज्जीभूय तदा भीमो ।
गदापाणिर्यमोपमः ॥ तं जघानाममृद्भांड–मिवोद्दंडपराक्रमः ॥ ७९ ॥ तस्मिन् हते हिडंबा-
थ । भीमरूपेण मोहिता ॥ पृष्ठानुगाभवत्तेषां । परिचर्यापरायणा ॥ ८० ॥

अन्यदा मार्गवैषम्या–दरण्ये द्रौपदी क्वचित् ॥ तेभ्यो वियुक्ता बभ्राम । यूथभ्रष्टा मृ-
गीव सा ॥ ८१ ॥ सिंहशूकरमातंग–व्याघ्राह्यजगरादयः ॥ पराभवन्निमां नालं । शीलमंत्र-
पवित्रितां ॥ ८२ ॥ गिरौ सरसि कांतारे । पश्यंतोऽपि हि पांडवाः ॥ नापश्यंस्तां कुरंगाक्षीं
। वल्लीमिव तु मोहिनीं ॥ ८३ ॥ विषण्णेष्वथ तेषूच्चै–र्हिडंबा भीमवाक्यतः ॥ वनादालोक्य
तां तत्रा–नयत्पक्षीव भारतीं ॥ ८४ ॥ कुंतीं च द्रौपदीं स्कंधे–नोद्वहंत्यतिवत्सला ॥ यथाकामी-
नपानीया–न्नदात्री पथि साचलत् ॥ ८५ ॥ कुंतीयुधिष्ठिरौ हृष्टौ । ततो भीमेन तां वधूं ॥
उदवाहयतां रात्रि–मिव शीतमरीचिना ॥ ८६ ॥ सा सानुरागा निर्माय । सौधानि विविधा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्यपि ॥ अरंस्त सह भीमेन । यथाकामीनरूपिणी ॥ ८७ ॥ तयानीतान्नपानीय–निश्चिंतैः श्रमवर्जितैः ॥ द्विजवेषिभिराये तै–रेकचक्राभिधं पुरं ॥ ८८॥ देवशर्मद्विजागारे। वसता धर्मसूनुना ॥ तत्रावादि हिडंबेति । तथा वात्सल्यकारिणी ॥ ८९ ॥ सोढव्यं दुःखमस्माभि–र्द्वादशाब्दावधि स्फुटं ॥ अहर्निशमतो याहि। स्वगृहान् वधु सांप्रतं ॥ ९० ॥ ज्येष्ठानुमितिमित्याप्य । कुंत्यै गर्भं निवेद्य च ॥ समये स्मरणीयेति । वदंती सा तिरोदधे॥ ९१ ॥ तत्रान्यदा वसंतस्ते । प्रातिवेश्मनि योषितां ॥ अशृण्वन् क्रंदनं वक्षः–पीडनं दाहहेतिगां ॥ ९२ ॥ तद्दुःखदुःखितो भीमो । देवशर्माणमेत्य च ॥ पप्रच्छ किमिदं शोक–विकलं ते कुटुंबकं॥९३॥ सोऽपि स्वं पाणिना भालं । स्पृशन् दैवेऽतिनिःश्वसन् ॥ शंसयन्निजनिर्भाग्य–भावमित्यवदद्रुदन् ॥ ९४ ॥ महाभाग द्विजास्माक–माकस्मिकविडंबनां । निःशरण्यः कथं वच्मि । तथापि शृणु वत्सल ॥ ९५ ॥ बकाख्यो राक्षसः पूर्वं । सिद्धविद्योऽतिभीषणः॥अत्र कृष्ट्वा शिलां व्योम्नि । संजिहीर्षुः समागमत् ॥ ९६ ॥

भयभीतस्तदा राजा । सलोकः संस्मरन् जिनं ॥ कायोत्सर्गमदात्पंच– परमेष्टिस्तुतीः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पठन् ॥ ९७ ॥ तत्प्रज्ञावादलंजूष्णुः । पलादो न जनार्द्दने ॥ जगाविति महीजानिं । शां-
तात्मेव पुरः स्थितः ॥ ९७ ॥ राजन्नहं जनान् हंतु–मुद्यतोऽपि तवानया ॥ जिनेंद्रभक्त्या तु-
ष्टोऽस्मि । कुर्वेकं मम वांछितं ॥ ९९ ॥ दिने दिने त्वयैकैक–मर्त्यदानेन मां सदा ॥ राजन्
प्रीणयता स्थेय–ममेयसुखवर्त्तिना ॥ १०० ॥ राजन्यंगीकृतवति । संहृत्य च शिलामसौ ॥ जगा
म नित्यमेकैक–मश्नाति च नरं नवं ॥ १ ॥ कुमारी कलशान्नाम–पत्रीं यस्या हरेत्प्रगे ॥ स
भावी रक्षसस्तस्य । भक्षणाय नृपाज्ञया ॥ २ ॥ कीनासपत्रीवाद्यागा–दद्य मन्नामपत्रिका
॥ धिगेते राजपुरुषाः । परुषा इह चागमन् ॥ ३ ॥ पुरात्र केवली राज्ञा । पृष्टो रक्षःक्षयं
जगौ ॥ पांडवेभ्योऽद्यापि तेऽत्र । नायांत्यतः क्षयो हि मे ॥ ४ ॥ इति तद्वाक्यमाकर्ण्य । भी-
मस्तं वीक्ष्य चातुरं ॥ दध्यौ तद्दुःखदुःखेन । पीडितो हृदयांतरे ॥ ५ ॥ धिग्बलं धिक् शरी-
रं च । धिक्पौरुषमिदं मम ॥ धिक् क्षत्रं येन न पर–प्राणरक्षणशिक्षणं ॥ ६ ॥ जंतुः स्वयं
विपद्येत । रोगशस्त्राग्निभिर्जलैः ॥ स चेदेहं परप्राण–त्राणायादिक्षते सुधीः ॥ ७ ॥
इत्यंतः स्मृतिवान् स्माह । भीमः साहससेवधिः ॥ याहि विप्र गृहान् रक्ष–स्तर्पयिष्ये-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽहमद्य तत् ॥ ८ ॥ तस्येति साहसादंत–र्हृष्टो विप्रोऽवदद्वचः ॥ तवैतद्युज्यते नून–मुपकार-
परस्य नोः ॥ ९ ॥ समानेऽपि मनुष्यत्वे । राक्षसाद्रक्षयामि यत् ॥ त्वामहं जीवितव्यं स्वं
। रक्षयामीति को नयः ॥ १० ॥ सर्वेषामागतो[१] नूनं । गुरुरित्युच्यते बुधैः ॥ गुरुप्राणैर्निज-
प्राणान् । रक्षयामीति को नयः ॥ ११ ॥ इत्युक्तवंतं तं भीमो । बलात्स्थाप्यौकसि स्वयं ॥
जगाम रक्षोभुवनं । समं नृपतिपूरुषैः ॥ १२ ॥ रक्षोभिः सममेत्याथ । तद्रक्षस्तमवेक्ष्य च
॥ महाकायं शिलासुप्तं । जहर्षोचे च सेवकान् ॥ १३ ॥ अयं मद्भाग्यतोऽभ्यागा–न्महाका-
योऽद्य मानवः ॥ बुभुक्षितानां सर्वेषां । तृप्तिं नो जनयिष्यति ॥ १४ ॥ इत्युक्त्वा क्रकचा-
कारान् । पीषयन् दशनान् मुहुः ॥ लोलयन् वदने लोलां । भ्रामयन्नक्षिणी क्रुधा ॥ १५ ॥
क्षोभयन्नपरान् स्वस्य । दर्शनात्कृत्तिकाकरः ॥ अट्टहासपरो याव–द्राक्षसोऽभ्येति तत्पुरः ॥
॥ १६ ॥ युग्मं ॥ तावत्पटीं त्यजन् भीमो । भीषयन् प्रत्युतापि तं ॥ उदस्थाद्बयनाच्छैल । इ-
व लोहगदां धरन् ॥ १७ ॥ जनादनभवं पापं । रे पलाद तवोदितं ॥ स्मरेष्टं दैवतं नास्य–

१ अतिथिः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धुना तमिति सोऽक्षिपत् ॥ १८ ॥ इत्याक्रोशात्त्रस्तधैर्यो । राक्षसोऽपि रुषारुणः ॥ दधावे दं-डमुद्यम्य । राक्षसैरपरैः समं ॥ १९ ॥ भीमरक्षोऽभिघातेन । यत्क्षोभोऽभूद्धरातले ॥ वार्द्धे-रुच्छलन् यंत्रो-न्मुक्तानीव जलान्यतः ॥ २० ॥ लघुहस्तो भृशं भीमो । योधयन्निति तं ब-लात् ॥ जघान मूर्ध्नि गदया । पुस्फोटासौ च भांडवत् ॥ २१ ॥ पतंस्तेनाभिघातेन । महा-कायः स राक्षसः ॥ कंपयामास धरणीं । पातयन्नपि पादपान् ॥ २२ ॥ ततोऽपतत्पुष्पवृष्टि-र्नभस्तो भीममूर्द्धनि ॥ शब्दो जयजयेत्यासी-द्गीर्वाणगणवक्त्रतः ॥ २३ ॥ श्रुत्वा तत्पुर-नाथोऽथ । लोका अप्यतिहर्षिताः ॥ भीमं वर्धापयामासु-र्जनजीवितदायकं ॥ २४ ॥ ज्ञात-तत्पौरुषाद् ज्ञानि-वाक्यादपि च पांडवान् ॥ तान्नृपः प्रकटांश्चक्रे । भक्तितश्चार्चयत्सदा ॥२५॥ प्रकृष्टे तदरिष्टेऽथ । विनष्टे स्पष्टभक्तिभिः ॥ चैत्ये चैत्ये जिनाल्लोंका-श्चार्चयन्नस्तवन्नपि ॥२५॥

अथ पांडुसुताः शत्रु-चकिता निशि तत्पुरं ॥ त्यक्त्वा द्वैतवनं प्राप्य । गुप्तास्तस्थुः कु-टोटजाः ॥ २६ ॥ इतो रक्षोवधं श्रुत्वा । तत्रायातांश्च पांडवान् ॥ ज्ञात्वा दुर्योधनो हर्ष-म-संतमपि चाकरोत् ॥ २७ ॥ विज्ञाय भावं विदुरो । धार्त्तराष्ट्रस्य तद्विधं ॥ चरं प्रियंवदं ना-

॥ ६५२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



म । प्राहिणोत्पांमवान् प्रति ॥ २७ ॥ सोऽपि द्वैतवनं प्राप्य । नत्वा पांडुसुतानिति ॥ वाचिकं विदुरस्याख्य–दक्षय्यसुखबंधनं ॥ २९ ॥ यदू ज्ञात्वा ज्ञवतो द्वैत–वनस्थान् धृतराष्ट्रसूः ॥ सममेष्यति कर्णेन। तत्त्याज्यं तन्मदाज्ञया ॥३०॥ इति श्रुत्वा जगौ याज्ञ–सेनी मन्युसमाकुला ॥ अद्यापि पापिनः किं किं । कर्त्तारोऽस्मासु ते खलु ॥ ३१ ॥ त्यक्तं सत्योक्तितो राज्यं । राष्ट्रं सेनाधनानि च ॥ अद्याप्यपूर्णं किं तेषां । कर्त्तारोऽस्मासु यत्पुनः ॥ ३२ ॥ धिग्मां हि यन्मया यूयं । वृताः पंचापि पांमवाः ॥ धिक् क्षात्रं ज्ञवतां वीर्यं । धिग् धिग् शस्त्रपरिग्रहं ॥ ३३ ॥ क्लीबान् सुषुवुषुः पुत्रान् । मातस्त्वं वीरपत्न्यपि ॥ यत्तदा धार्त्तराष्ट्रैर्मे । चक्रे तादृग् विडंबना ॥ ३४ ॥ सोढं तदप्यमीज्निर्हा । त्यक्तं राज्यं श्रितं वनं ॥ अद्यापि धार्त्तराष्ट्रास्ते । विरमंति न वैरतः ॥ ३५ ॥ इति कांतामुखात् श्रुत्वा । पाणिनास्फाल्य ज्ञूतलं ॥ ज्नदस्थज्नीमसेनोऽथ । मूर्त्तो वीररसः किल ॥ ३६ ॥

गर्जन् पर्जन्यवत्पार्थो–ऽप्यूर्जितं चार्जयद्धुषं ॥ क्षुब्धेज्नासिंहसरज्नं । धनुष्टंकारमातनोत् ॥ ३७ ॥ प्रतिबिंबाविव तयो–स्ततोऽरुणविलोचनौ । नकुलः सहदेवश्च । प्रोदलालयतामसी



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ३८ ॥ तान् वैरिगजपंचास्यान् । क्षुब्धान् वीक्ष्याह धर्मसूः ॥ विरमंतु महावीरा । वैरिह- 
द्भि वो बलं ॥ ३९ ॥ युद्धोद्यतैर्भवद्भिर्मा । मद्वचो वितथास्त्विति ॥ प्रतीक्षध्वं कियत्कालं
। समयो यावता भवेत् ॥ ४० ॥ इति ज्येष्टाज्ञया सर्वे । पुनः प्रकृतिमासदन् ॥ सलिलौ-
घा निम्नगाया । ज्येष्टमासाज्ञयैव ते ॥ ४१ ॥ उदीर्य प्रतिवाच्यं च । सन्मान्याथ प्रियंवदं ॥
विससर्ज स्मरन् स्वांते । विदुरोक्तं युधिष्टिरः ॥ ४२ ॥ त्यक्त्वा तद्देशमथ ते । गंधमादनपर्वतं
॥ गता अपश्यन् पुरत । इंद्रकीलाभिधं नगं ॥ ४३ ॥ विज्ञाय समयं पार्थो-ऽनुज्ञाप्य च
युधिष्टिरं ॥ विद्याः साधितुमेकाग्र-मनास्तत्र ययौ द्रुतं ॥ ४४ ॥ नत्वा तत्र युगादीशं । पवि-
त्रः साधितुं स्थिरः ॥ मणिचूडादिखचर-प्राप्ता विद्या बभूव सः ॥ ४५ ॥ निष्कंपो मेरुवत्
श्वासो-च्छ्वासहीनो दृषन्मयः ॥ इवासीदर्जुनो ध्याना-धिरूढः कमलासनः ॥ ४६ ॥ भूतवे-
तालशाकिन्यः । सिंहव्याघ्रगजादयः ॥ नाशकंश्चालितुं ध्याना-त्तं मनागेकमानसं ॥ ४८ ॥ 
प्रसन्नाः समये सर्वा । विद्यादेव्योऽथ तत्पुरः ॥ तुष्टाः स्मो हि वरं वत्स । वृणीष्वेति गि-
रं जगुः ॥ ४९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथोत्थायार्जुनस्तासां । लुठन् जक्त्या नमोऽकरोत् ॥ ताश्च संचक्रमुर्देह–मर्जुनस्यार्जुनप्रज्ञं ॥५०॥ सिद्धविद्योऽर्जुनो हृष्टो । निविष्टो नगमूर्द्धनि ॥ हन्यमानं मृगयुणा । पुरः शूकरमैक्षत ॥ ५१ ॥ अथाख्यत्तं सव्यसाची । मामेत्युच्चैर्वदन् मुहुः ॥ अहो तीर्थेऽस्मिन् मद्दृष्टौ । किं निहंसि हि पोत्रिणं ॥ ५२ ॥ त्वद्बलं तवज्ञातृत्वं । त्वत्कुलं च वृथा ननु ॥ येनामुं त्वमशरण्यं । निहंस्यागोविवर्जितं ॥ ५३ ॥ इति संतर्जितो व्याध–स्तेनोचे पांथ किं मुधा ॥ निषेधयस्यरण्ये मां । स्वेच्छया संचरंतमाः ॥ ५४ ॥ परित्राता न कोऽप्यत्रा–मीषां काननवासिनां ॥ यदि क्षात्रबलेन त्वं । रक्षिता रक्ष तन्नयः ॥ ५५ ॥ अर्जुनोऽप्यथ कोदंड–मुद्दंडं यमदंडवत् ॥ करे कृत्वा क्रुधा कांडै–र्विहायः समपूरयत् ॥ ५६ ॥ व्याधोऽप्युद्योद्धुमाधत्त । शरासनमथो करे ॥ कंकपत्रैर्द्रुमानग्रे–ऽपत्रीकुर्वन् स्वलाघवात् ॥ ५७ ॥ तयोर्नाराचपूरेण । दूरेणेरितरेणुवत् ॥ गिरिशृंगाण्यगुः काम–मास्फलंति परस्परं ॥ ५८ ॥ स मायालुब्धकः पार्थ–शरासनमथाहरत् ॥ पार्थोऽप्यादाय निस्त्रिंशं । दधावे सत्फणाहिवत् ॥५९॥ तेनापहृतखड्गोऽथ । पार्थः पृथुपराक्रमः ॥ तमाह्वयद् द्वंद्वयुद्ध–कृते क्ष्वेडानिनादकृत् ॥ ६० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अंगेनांगं रुषान्योऽन्यं । पीडयंतावुभावपि ॥ अभूतां भीतये विश्वे । रौद्रवीररसाविव ॥ ६१ ॥
लघुहस्ततया पार्थ–स्तं धृत्वा चरणे रणे ॥ व्योमन्यभ्रमयद्भौत्र–पटीमिव पटीयसीं ॥ ६२ ॥
ततः प्रतत्पुष्पवृष्टे–रनुकुंडलमंडितं ॥ पश्यतिस्म पुरः कंचि–त्सुरं हृष्टं धनंजयः ॥ ६३ ॥
किमेतदिति चित्तांत–राश्चर्यसहितार्जुनं ॥ आख्यत्स तुष्टोऽस्मिजय । पार्थ प्रार्थय कामितं ॥
॥ ६४ ॥ पार्थोऽप्यवोचत्समये । प्रार्थयिष्ये वरं ननु ॥ कोऽसि त्वमिति किं त्वस्ति । जिज्ञा-
सा मम तद्वद ॥ ६४ ॥

इत्युक्तिश्रुतिहृष्टः स । जगौ पार्थ प्रथां शृणु ॥ रथनूपुरमित्यस्ति । पुरं वैताढ्यभूष-
णं ॥ ६६ ॥ तत्र विद्याधराधीश । इंद्रनामा महीधवः ॥ इंद्रवद्दिक्पतिव्रातैः । सेव्यमानप-
दांबुजः ॥ ६७ ॥ विद्युन्माली तदनुज–श्चपलो लोकशोककृत् ॥ पुरान्निर्वासितो राज्ञा । ययौ
रक्षःपुरे रुषा ॥ ६८ ॥ तत्र ते तलतालाख्या । राक्षसास्तेन संगताः ॥ अवस्कंदैरिंद्रदेशं ।
सक्लेशमसृजन् भृशं ॥ ६९ ॥ तदापातभयादात्त–कंपैर्विद्याधरैस्तदा ॥ तथा नष्टं यथा स्पष्टं ।
मार्गोऽप्यज्ञायि न क्वचित् ॥ ७० ॥ केवलज्ञानिनिर्देशाद् । ज्ञात्वा त्वामिंद्राम्दिह ॥ त्वदान-



For Private And Personal Use Only

यनेहतोर्मा। प्रजिघाय त्वदंतिकं ॥७१॥ अध्यास्व रथमेतं हि। कवचं मुकुटं धनुः ॥ गृहाण राक्षसान् पार्थ। निग्रहाणार्थयेप्सितं ॥७२॥ इतः करीटी सोत्साहः। किरीटी कवची रथी ॥ धन्वी निषंगी संप्राप्तः। क्षणाद्राक्षसपत्तने ॥७३॥ समं रथस्वनैरक्षः—पुरि कोलाहलध्वनिः ॥ कोऽप्यन्नूयेन वित्रस्तं। प्रहर्तारंऽस्त्रास्करैः ॥ ७४ ॥ वह्निर्नूतैरिवांहोभि—रंजनाद्रिनृगूपमैः ॥ तैः समं योऽस्मारेभ्र—ऽर्जुनेनार्जुनकीर्त्तिना ॥ ७५ ॥ कृत्वा महारणं घोरं। हत्वा तांश्च धनंजयः ॥ पुनर्वैताढ्यमासाद्य। शक्रपादौ मुदानमत् ॥ ७६ ॥ कृताभ्युत्थान इंद्रेण। जयवानिंद्रनंदनः ॥ न्यषदत्तदूहृदीवासौ। तदर्धासन आदरात् ॥ ७७ ॥ तल्लोकपालाः सर्वेऽपि। तं-नेमुः शक्रशासनात् ॥ निजांगजायेव ददौ। तस्मै दिव्यायुधानि सः ॥ ७८ ॥ चित्रांगदाय पार्थोऽपि। धनुर्वेदमदान्मुदा ॥ दानादानफलो मित्र—धर्मो हि महतां यतः ॥ ७९ ॥ बंधूत्कंठी किरीटींद्र—मनुज्ञाप्यापरान् खगान् ॥ विमानैर्व्याप्नुवन् व्योम। पुनः स्वस्थानमासदत् ॥ ८० ॥ ननाम कुंतीज्येष्ठौ च। लघू अस्वजदंजसा ॥ दृग्दानैर्याज्ञसेनीं चा—प्रीणयत्पार्थपार्थिवः ॥ ८१ ॥ चित्रांगदोऽथ विद्यान्—दुक्त्वार्जुनपराक्रमं ॥ विसृष्टस्तैरिंद्रदृष्टि—सुधावृ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्टिरमोऽभवत् ॥ ७२ ॥
इतस्तेषामशेषाणा–मक्षीणानंदशालिनां ॥ मध्याह्नयोम्नोऽपतद्धैम–पद्मं पांचाल्यथाददे
॥ ७३ ॥ तस्य स्वास्यस्य सादृश्यं । पश्यतीवांबुजं सती ॥ जग्राहादाय पाणिभ्यां । हृष्टा
भीममुवाच च ॥ ७४ ॥ प्रिय प्रियाणि पद्मानि । मह्यमीदृंशि दर्शय ॥ कुतोऽप्यानीय स-
रसः । सरसात्सरितोऽपि वा ॥ ७५ ॥ अन्वेष्टुमथ भीमोऽपि । पद्मानि विपिनांतरा ॥ जगा-
म सामजगतिः । स्मृतपंचनमस्कृतिः ॥ ७६ ॥ ततश्च लोचनं वामं । वामतां सूचयन्भृशं ॥
युधिष्ठिरस्य पस्पंदे । कुंत्या दक्षिणमक्षि च ॥ ७७ ॥ तदरिष्टमिति ज्ञात्वा । बंधूनूचे युधि-
ष्ठिरः ॥ न कोऽप्यस्तीह यो भीमं । पराभवितुमुद्यतः ॥ ७८ ॥ सूचयत्येव मन्नेत्रं । किंचि-
द्भीमेऽप्यमंगलं ॥ तदुत्तिष्ठंतु यास्याम–स्तत्पृष्टं पृष्ठगा इव ॥ ७९ ॥ सर्वतः संचरंतस्ते । नि-
बिडद्रुमसंततौ ॥ नासादयन् क्वचिद्भीमं । निर्भाग्या इव सेवधिं ॥ ८० ॥ संमूर्छंतः पतंतश्च ।
मूर्छन्मोहसमुद्गतः ॥ हिडंबोक्तं स्मरंतस्ते । रयात्तामस्मरन्नथ ॥ ८१ ॥ स्मृतागत्य हिडंबा-
पि । तानारोप्य शिरस्यपि ॥ निनाय भीमनिकटं । स्वगृहान्नाप च स्वयं ॥ ८२ ॥ भीम-

For Private And Personal Use Only

स्तत्पद्मसरसः । सेतुस्थो मार्गदुर्गतिं ॥ आख्याय सोदरेभ्योऽनू-दतीवानंददायकः ॥ ९३ ॥
हेमपद्मस्पृहापूर्त्यै । याज्ञसेन्या वृकोदरः ॥ यावज्जाहति वेसं त-मदृश्यस्तावताभवत् ॥९४॥
ततस्तमनुपदिको-ऽर्जुनोऽप्यासीददृग्गतः ॥ मीलिते लोचने ह्येक-स्मिन्नन्यदपि मीलति ॥
॥ ९५ ॥ युधिष्ठिरोऽप्यनूजन्मानृ-पृष्टगो यमलावपि ॥ अंगैकदेशे ह्याकृष्टे । सर्वमप्यंगमेति हि
॥९६॥ ततः कुंती च पांचाली । व्याकुले श्वापदाकुले ॥ अपश्यंत्यौ वने पांडु-पुत्रान् किंचि-
द्व्यषीदतां ॥ ९७ ॥ त्रैलोक्यवीरा अक्षोभ्या । देवदानवराक्षसैः ॥ पंचास्या इव पंचापि । क्व
ते जग्मुरहो विधिः ॥ ९८ ॥ यदीदृशामपि भवे-दीदृशी विपदागतिः ॥ सर्वथा दैवचरितं ।
तद्विचारं न चांचति ॥ ९९ ॥ इत्यादिरोदनैरत्र किमित्येवं विचिंत्य ते ॥ परमेष्ठिस्तुतिध्यानं
। कायोत्सर्गेण चक्रतुः ॥ ४०० ॥ विशेषकं ॥ निश्चलं स्थितयोरित्थं । शालभंजिकयोरिव ॥ त
योरित्यक्रमन् यामा । अष्टौ कष्टस्य संगमात् ॥ १ ॥ द्वितीये दिवसे भानो-र्भानोदिततमश्च- ॥६२९॥
याः ॥ उत्तीर्य व्योमतो मातु-रनमन् पांडवा जवात् ॥ २ ॥ कायोत्सर्गमथोत्सृज्य । नमत-
स्तनयान्निजान् ॥ कुंती कवोष्णैर्नेत्रांबु-पूरैरस्नापयन्मुदा ॥ ३ ॥ स्वर्णवेत्रधरः कश्चि-न्नत्वा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कुंतीमथावदत् ॥ प्रशस्तैस्तच्चरित्रैस्तै–स्तै स्तां विस्मापयन् भृशं ॥ ४ ॥ शृणु मातर्दिरेर्या-
तु–र्निर्मातुं केवलोत्सवं ॥ यानमागच्छदुपरि । भवत्योश्चस्खले तदा ॥ ५ ॥ तद्धेतुमथ विज्ञा-
तु–मद्दमत्रिग्मौजसा ॥ प्रहितः प्रहितो नाम । भवत्यौ वीक्ष्य चागमं ॥ ६ ॥ ज्ञात्वा स-
तीयुगध्यान–परमेष्ठिनमस्क्रियाः ॥ विमानस्खलने शक्रः । कारणं ध्यायतिस्म च ॥ ७ ॥
मामित्याह च पांचाल्या । वचनात् पांडवा अमी ॥ पश्चान्याद्दर्तुमविशन् । सरः स्फुरदुरू-
रगं ॥ ८ ॥ तस्येशः शंखचूडो हि । नागपाशैरमून् दृढं ॥ बध्ध्वा श्वभ्रमनैषीद्भिः । न त्य-
षेधि च केनचित् ॥ ९ ॥ सत्योरियं तन्निमित्ता । परमेष्ठिस्तुतिस्मृतैः ॥ अस्मद्विमानमांद्य-
त्वे । तत्वेनैतद्धि कारणं ॥ १० ॥ तज्ज्ञात्वा शंखचूडात्तान् । मोचयित्वा मदाज्ञया ॥ सतीस-
विधमानीय । ध्यानं मोचय मज्ञतौ ॥ ११ ॥ गत्वा ततोऽहं पातालं । कथमेतान्निरागसः ॥
व्यस्तान् बंधितवान्नाग । तं चेत्याक्षिपमुच्चकैः ॥ १२ ॥ मत्सरोऽजस्पृहालून–मूनबंधिषमित्य-
थ ॥ तेनोक्ते शक्रनिर्देश–मस्मै शंसितवानहं ॥ १३ ॥ शक्रादेशात् शंखचूडः । स्वे राज्येऽ-
मून्न्यवेशयत् ॥ मान्याज्ञा किल शक्रस्य । सुरासुरनरेष्वपि ॥ १४ ॥ राज्येषु निःस्पृहैरेतै–



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्तव पादाब्जषट्पदैः ॥ पार्श्वसान्निध्यकर्त्ताहि–श्चक्रे समरसीमनि ॥ १५ ॥ इमित्युक्तिपरः स-
रीसृपपतिः पार्थाय हारं वरं । भूपायांगदरत्नशेखरमदाद्भियाः परेभ्यो मुदा ॥ प्रैषीदत्र मया
सहांव तनयांस्तान्न्यायनिष्ठानथा–खंडाखंडलयानयानविधये मां सांप्रतं प्रेषय ॥ १६ ॥ कुं-
ती सुतागतिमुदा नमितानर्नेडु—मुल्लास्य हर्षवचनैर्व्यसृजत्सुरं तं ॥ पस्पर्श पाणिनलिनैस्त-
नयांगमंग । तेऽप्यानमन् विनयतो जननीपदाब्जे ॥ १७ ॥

॥ इत्याचार्यश्रीधनेश्वरसूरिविरचिते महातीर्थश्रीशत्रुंजयमाहात्म्यांतर्भूत-
श्रीरैवताचलमाहात्म्ये पांडवद्यूतक्रीडावनवासादि-
वर्णनो नाम एकादशमः सर्गः
समाप्तः ॥ श्रीरस्तु ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ॥ द्वादशमः सर्गः प्रारभ्यते ॥

अनादिनाथं विमलस्वरूपं । सर्वज्ञतादृष्टसमस्तवस्तु ॥ गोत्राज्निधांगादिविडंबनाज्यो । मुक्तं नमस्यामि हि दैवतोजः ॥ १ ॥ अथातिक्रम्य ते पांडु—पुत्राः षट् विषमाः समाः ॥ पुनर्ययुर्द्वैतवन—मद्वैतनयशालिनः ॥ २ ॥ इतो डुर्योधनः पांडु—पुत्रांस्तत्रागतान् विदन् ॥ वेगादेत्य बलं द्वैत—सरस्तीरे न्यवेशयत् ॥ ३ ॥ तत्रैत्यानुचरैश्चित्रां—गदविद्याज्नृता नृपः ॥ निषिध्यमानोऽपि सरो—ऽन्यगाहत तडुच्चकैः ॥ ४ ॥ ततः क्रुद्धः स विद्याज्नृ—द्दूर्योधनमयोधनं ॥ जहार सानुजं सार—परिवारादपाकृतं ॥ ५ ॥ अंतःपुरपुरंध्र्योऽस्य । क्रंदंत्यस्तस्य सत्वरं ॥ युधिष्टिरं ज्नर्तृज्निक्षां । विनयादर्थयन्निति ॥ ६ ॥ अपराद्धं यदि ज्येष्ट । युष्मासु धृतराष्ट्रजैः ॥ तथापि धर्मसूनुस्त्व—मनुजेषु कृपां कुरु ॥ ७ ॥ ताज्नी राज्नसिकाज्निः स । इत्युक्तो मुक्तकुन्नृपः ॥ तत्कार्ये पार्थमादिक्षत् । समर्थं रणकर्मणि ॥ ८ ॥ गत्वा पार्थोऽपि तं विद्या—धरं प्रार्थितवान् रणं ॥ तदारुणेक्षणः सोऽपि । कोपाद्युयावर्त्तत क्षणात् ॥ ९ ॥ वर्षतो



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





लोहनाराचै–र्गर्जतो गुणनिःस्वनैः ॥ अर्जुनस्यांबुदस्येवा–शुषद्वैरिजवासकः ॥ १० ॥ विद्ध-
स्तोऽस्तबलः शत्रु–रन्यमित्रीणतां व्रजन् ॥ सहसैत्य नमन्पार्श्व–प्रभुचक्रृतराड्रूजं ॥ ११ ॥
अथाददे खगमुदे । वार्णी प्राणीकृतां नयैः ॥ अर्जुनोऽहं गुरुगिरा । बद्धोऽकार्षमिदं सखे ॥
॥ १२ ॥ त्वं सदुर्योधनोऽन्येत्य । तन्नमन् गुरवे निजं ॥ शंसन्निरागसं मित्र । सत्यसंधं वि-
धेहि मां ॥ १३ ॥ इत्युक्तः सोऽपि हृष्टः सन् । विमानस्थो महर्द्धिमान् ॥ पार्श्वमग्रेसरं कृत्वा
। ययौ धर्मजसन्निधिं ॥ १४ ॥ युधिष्ठिरं तत्र दृष्ट्वा । स शिरोऽर्त्तैः सशल्यवत् ॥ दुर्योधनः
कीलितव–न्नानमदतिकोपनः ॥ १५ ॥ विद्याधरैर्श्वेंद्रभुवा । प्रणतांहिर्युधिष्ठिरः ॥ सुयोधनं स्ने-
हलया । दृशापश्यन्मुहुर्मुहुः ॥ १६ ॥ यस्ते गुरुस्तवान्याय–सोढा जीवातुकश्च यः ॥ न तं
नमसि मूढेति । बलात्ते तमनामयन् ॥१७॥ प्रणमंतं तमालिंग्य । धर्मसूनुः सुवत्सलः ॥ प-
प्रछ कुशलं प्रीत्या । सोऽप्याह निजचित्तवत् ॥ १८ ॥ राज्यभ्रंशो वैरिपीडा । न मे व्रीडाकृ-
ते तथा ॥ यथा त्वयि प्रणामोऽयं । बाधते मां सुदुस्सहः ॥ १९ ॥ इति श्रुत्वापि निःकोप–
स्तमाश्वास्य युधिष्ठिरः ॥ प्रैषीत्स्वपुरवासाय । कर्मैव किल देहिनां ॥ २० ॥ ततो गांगेयवि-

दुर–मुखास्तं प्रत्यबोधयन् ॥ दृष्टं त्वयार्जुनबलं । ततः संधेहि तैः सह ॥ २१ ॥ हितमप्यु-
क्तमित्यादि । तेषां नाजीगणन्नृपः ॥ त्रिदोषजो व्याधिरिवौ–षधानि त्रिविधान्यपि ॥ २२ ॥
इतो जयद्रथो राजा । दुःशल्यापतिराव्रजन् ॥ कुंत्या निमंत्रितस्तस्थौ । जामातेति त-
दा पथि ॥ २३ ॥ अर्जुनो दिव्यया शक्त्या । भोज्यान्यानीय सत्वरं ॥ अभोजयत्तं सत्प्रीते–
र्भोजनं प्रथमं फलं ॥ २४ ॥ पश्यतो द्रौपदीं तस्य । पद्मास्यां चित्तहंसराट् ॥ तल्लावण्यसर-
स्यासी–त्खेलितुं भृशमुत्सुकः ॥ २५ ॥ किंचिच्छलमथालोक्य । वंचयित्वा स पांडवान् ॥ पां-
चालीं रथमारोप्य । ययौ मूर्त्तामिव श्रियं ॥ २६ ॥ धावंतौ तमनुक्रोधा–त्कुंती भीमार्जुनौ
जगौ ॥ भवद्भ्यां मम जामाता । न हंतव्योऽपराध्यपि ॥ २७ ॥ बाणासारैरथो पार्थो । वा-
हिनीं तस्य भूभृतः ॥ उन्मार्गगामिनीं चक्रे । धनुष्टंकारदारुणैः ॥ २८ ॥ अपीडयद्गदाघातै–
र्मुशलैरिव मूटकं ॥ भीमो गजघटां तस्यो–दस्यच्छोणितसंकुलां ॥ २९ ॥ अर्धचंद्राशुगैस्तस्य
केतुकूर्चकचानि च ॥ चिच्छेद पार्थो जननी–वाक्यान्न निजघान तं ॥ ३० ॥ प्रत्यानयामास-
तुस्तौ । रथमारोप्य यज्ञजां ॥ नेमतुर्जननीपादौ । तत्तादृग्बलशालिनौ ॥ ३१ ॥ रणश्रमस्त्र-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वत्स्वेद-बिंदुपिच्छलविग्रहौ ॥ तौ तां च जननी स्नेहा-त्पाणिभ्यामस्पृशन्मुदा ॥ ३२ ॥
इतस्तेषां महातोष-युतानां नारदो मुनिः ॥ दिवोऽवतीर्य तन्मध्ये । निषसाद तदर्चितः ॥३३॥ नीत्वैकांते निजस्वांते । इवाख्यन्नारदोऽथ तान् ॥ दुर्योधनस्याभिमतं । शृणुताद्य पृथासुताः ॥३४॥ युष्मान्निर्मोचितः प्राप्य । पुरीं दुर्योधनोऽधमः ॥ तदादि युष्मद्धनने । कृतोपायोऽस्ति पापवान् ॥ ३५ ॥ यदा स्वयमशक्तोऽसौ । हंतुं वः कपटैरपि ॥ तदेत्याघोषणामुच्चैः । पुरे व्यरचयन्निशि ॥ ३६ ॥ यः कश्चिन्मायया बाहु-बलेनापि नरोत्तमः ॥ पांडवान् हंति राज्यार्द्धं । तस्मै यच्छामि निश्चितं ॥ ३७ ॥ श्रुत्वेति पितृवैरेण । पुरोचनपुरोधसः ॥ सुतो व्यजिज्ञपन्नृप—मायासः कोऽत्र वः प्रभो ॥ ३८ ॥ वरदा मम विद्यास्ति । कृत्याख्या सर्वकर्मकृत् ॥ तस्याः प्रभावात्त्रैलोक्य-मपि क्षोभं नयाम्यहं ॥ ३९ ॥ हृष्टस्ततः स पापिष्ट-स्तमिष्टकरणोद्यतं ॥ वस्त्रालंकारमालाभि-रानर्च प्रशशंस च ॥ ४० ॥ स साधयन्नस्ति विद्यां । समेष्यति च पापवान् ॥ अमोघया तया विश्व-मपि नाशयितुं क्षमः ॥४१॥ मया साधर्मिकत्वेन । स्नेहेनैतन्निवेदितं ॥ विमृशध्वं प्रतीकारं । तदस्याः कोऽपि पांडवाः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ४२ ॥ साधूक्तं नवता ज्ञातं । न हि प्रजवतीत्यदः ॥ इत्युक्त्वा व्यसृजद्धर्म–सूनुस्तं बहुमा-
नतः ॥ ४३ ॥ समं कुंत्या कलत्रेण । पांडवास्तत्र कर्मणि ॥ प्रमाणयंतोऽथ तपः । कायो-
त्सर्गमकुर्मुदा ॥ ४४ ॥ एकपादाग्रसंस्थाना–स्तीक्ष्णांशौ दत्तलोचनाः ॥ परमेष्टिस्तुतिध्यान–
निश्चलास्तस्थुरादरात् ॥ ४५ ॥ सप्ताहीमिति ते शीता–तपादिक्लेशनाजिनः ॥ जिनध्यानस-
माधान–तत्परा व्यतिचक्रमुः ॥ ४६ ॥ अथाष्टमदिने काष्टा–मुखेन्यः स्पष्टचंद्रिमा ॥ खंम-
यन् शैलशृंगाणि । सहसा वायुराययौ ॥ ४७ ॥ तदा पवननिर्धूत–शाखिशाखाग्रचालनैः ॥
वित्रस्तकंदुकीयंत–गल्लशैलो मरुन्मुदे ॥ ४८ ॥ यथा यथा महावायु–र्वाति चालितनूधरः ॥
तथा तथापि तद्ध्यान–दीपो निश्चलतां नृशं ॥ ४९ ॥

इतश्च हयहेषाभिः । हस्तिगर्जी रथचीत्कृतैः ॥ निःस्वानप्रमुखैर्वाद्यैः । पाटयत्पृथिवीध-
रान् ॥ ५० ॥ चतुर्दिक्षु मिलद्धर्षा–मेघवन्नरवार्दितन् ॥ रजोनिर्व्यापयद्व्योम । सहसा सैन्य-
माययौ ॥ ५१ ॥ युग्मं ॥ ध्यानस्थिते ततः कुंती–द्रौपद्यौ कश्चिदेत्य च ॥ अधिरोप्य हय-
स्कंधे । पुनः स्वं कटकं ययौ ॥ ५२ ॥ हा वत्सा हा रणे शूरा । हा वृकोदर हार्जुन ॥ अ-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भीन्यस्ताड्यमाने नौ । रक्षध्वं मातृवत्सलाः ॥ ५३ ॥ सद्रौपदिका सा कुंती । ताड्यमाना-
तिरोषतः ॥ तैः कशाभिरिति प्रोच्चैः । प्रललाप निजांगजान् ॥ ५४ ॥ युग्मं ॥ श्रुत्वेति ध्या-
नविधुरा–स्ते रुषात्तास्त्रसंचयाः ॥ दधाविरे सिंहनादै–र्गर्जंतः प्रलयाब्धिवत् ॥ ५५ ॥ अर्जु-
नस्य शरासारै–रपारैर्व्योमगामिभिः ॥ तच्छत्रुसैन्यं विदधे । जालांतर्गतपक्षिवत् ॥ ५६ ॥ ख-
ड्गपाणिर्धर्मसूनु–रन्यूनरणरंगवान् ॥ उद्यत्फणाधरः काल–नागवत्तत्र दिद्युते ॥ ५७ ॥ कणा-
निव रिपुव्रातान् । गदया स वृकोदरः ॥ खंडयामास कुशलः । कर्करानिव वारणान् ॥५८॥
यमलावस्खलंतौ तौ । वर्षंतौ शरधोरणीः ॥ चरंतावपि सेनासु । दुश्चरावित्यजायतां ॥५९॥
सदैन्यमिव तत्सैन्यं । पृषत्कैः पार्थपाणिजैः ॥ दुद्राव सर्वतः कामं । सहसादृश्यमप्यभूत् ॥
॥ ६० ॥ क्षणाद् दृष्टार्थवन्नष्टे । सैन्ये ताल्वोष्ठशोषिणी ॥ उदन्या धर्मतनयं । कृत्येवापीडय-
द्दृढ ॥ ६१ ॥ सर्वे तृष्णातुरा वारि–विलोकनपराः पुरः ॥ सरः सरोजसंशोभि । सहसा ते
व्यलोकयन् ॥ ६२ ॥ तत्रोत्तुंगतरंगाग्र–राजहंसविराजिते ॥ ते सरस्यातुरा वारि । पपुराकं-
ठमादरात् ॥ ६३ ॥ तदंबुपानात्सर्वे ते । मूर्छिता इव भूतले ॥ संसारिण इवाकस्मा–दलुठ-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न ही विधेः क्रमः ॥ ६४ ॥ भ्रमंत्यथ समायाता । द्रौपदी स्वपतीनिति ॥ लुठतो वीक्ष्य दुः-
खार्त्ता । दिशोऽपश्यद्विचेतना ॥ ६५ ॥

इतोऽकस्माल्लताजालै–र्बद्धकुंतलसंचया ॥ वसाना वल्कले काचि–त्पुरंध्री तत्पुरोऽजव-
त् ॥ ६६ ॥ विवक्ति द्रौपदी किंचि–द्यावत्तां तत्पुरःस्थिता ॥ तावज्ज्वलत्कृष्णांगा । धूम्येव ग-
गनाग्रगा ॥ ६७ ॥ दावाग्निकपिशं शीर्षे । विशीर्णं केशसंचयं ॥ तदंतरा कपालं च । बिभ्रती
तीव्रलोचना ॥ ६८ ॥ कपालकर्त्तिकापाणिः । साट्टहासातिभीषणा ॥ प्रादुरासीद्रकसीव ।
कृत्या सा कर्त्तिधारिणी ॥ ६९ ॥ विशेषकं ॥ वीक्ष्य ताल्लुँठतः कृत्या । स्वकृत्यकरणोन्म-
नाः ॥ बभ्राम परितो वक्त्रे । रसनां लोलयंत्यथ ॥ ७० ॥ तद्दर्शनाद्भिपमाना । द्रौपदी भिल्ल-
नायिकां ॥ चकार स्वांतरे सा च । जगौ कृत्यामकृत्यगां ॥ ७१ ॥ त्वदागमनवातेन । देव्यमी
चर्मदेहिनः ॥ जग्मुर्मूर्छा भयेनाशु । प्राणांस्त्यक्ष्यंति च क्षणात् ॥ ७२ ॥ न कोऽपि त्रिजग-
त्यस्ति । देवदैत्यनरेष्वपि ॥ यः सहेत तव क्रोधं । दंभोलिमिव वज्रिणः ॥ ७३ ॥ तन्मृतान्
स्वयमप्येतान् । पुनर्मारयसीह किं ॥ अत्र ते पौरुषं किंचि–न्न देवि खलु विद्यते ॥ ७४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति संबोधिता कृत्या । भक्तियुक्तोक्तिभिस्तया ॥ मन्यमाना कृतं कृत्यं । हसित्वा क्वचिद-
प्यगात् ॥ ॥ ७५ ॥

अथोपसृत्य पांचाली । तान् मृतानिव वीक्ष्य सा ॥ मूर्छांते विललापोच्चैः । पुनः पुन-
रभर्तृका ॥ ७६ ॥ ततस्तस्याः प्रमार्ज्याश्रू-ण्याख्यद्भिल्लनितंबिनी ॥ किं रोदिषि वृथा बाले
। सुशीलेऽरण्यमध्यगा ॥ ७७ ॥ मायया मूर्छितानेतान् । मणिकालानदीजलैः ॥ पुनरुज्जीव-
य गुणा-निव शीलेन यज्ञजे ॥ ७८ ॥ तत् श्रुत्वा द्रौपदी हृष्टा । प्रत्यासन्ननदीजलैः ॥ सु-
धाभिरिव सद्भर्तॄ-नभिषिच्योदजीवयत् ॥ ७९ ॥ सुप्तोत्थिता इवाकस्मात् । पांडवाश्चित्रतांड-
वाः ॥ द्रौपद्या वचनैश्चित्ते । चिंतयामासुरित्यथ ॥ ८० ॥ को नृपः सैन्यसंभारै-रत्रागात्केन
यज्ञजा ॥ अपाहारि सरः क्वैत-द्विषविच्छुरितांबुमत् ॥ ८१ ॥ प्रिया स्वयमिहायाता । पु-
लिंद्या वचनैरथ ॥ मणिकालाजलैरस्मा-नुदजीवयदा विधिः ॥ ८२ ॥ विभ्रमः किमयं चि-
त्ते । किं वा दैवविजृंभितं ॥ किमिदं स्वप्नदृष्टार्थ । इवाश्चर्यनिबंधनं ॥ ८३ ॥ तेषु चिंतापरे-
ष्वित्थं । द्योतयंस्तेजसा दिशः ॥ कश्चिद्देवः पुरो भूत्वा । जगौ तानिति शुद्धगीः ॥ ८४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुहकं ॥ धर्मसूनो कथं चित्ते । चित्रीयस्यत्र कर्मणि ॥ मायेयं मत्कृता सर्वा । कृत्याकर्त्त-
व्यवंचका ॥ ८५ ॥ अर्हतां भवतां ध्याना-त्तुष्टोऽहं हरिणामरः ॥ शक्रानीकपतिर्मायां । वि-
धायावंचयं सुरीं ॥ ८६ ॥ समये स्मरणीयोऽह-मित्युक्त्वाभरणान्यदात् ॥ विसृष्टस्तैर्दिवं प्रा-
प । स देवः परमर्धिकः ॥ ८७ ॥ गतांतराया प्राक्पुण्या-द्विशेषात्तेऽथ पांडवाः ॥ अमान्-
जिनसद्ध्यान-परा आसन् समाधितः ॥ ८८ ॥ मध्याह्ने त्वन्यदा धान्ये । निष्पन्ने पुण्यविग्र-
हः ॥ कश्चिन्मासतपास्तत्र । पारणायागमन्मुनिः ॥ ८९ ॥ साक्षाद्धमरसं जैन-मुनिं तं वी-
क्ष्य पांडवाः ॥ हर्षोत्कर्षभरान्नेमुः । सिंचंतोऽश्रुकणैर्महीं ॥ ९० ॥ रोमांचकंचुकधराः । पा-
परिं भेत्तुमुद्यताः ॥ स्तुवंतः स्वं मुदा दानं । भक्त्या ते मुनये ददुः ॥ ९१ ॥ युग्मं ॥ दि-
वि दुंदुभयो नेदुः । पेतुः कांचनवृष्टयः ॥ चेलोच्छ्रयोऽभवद्वाणी । जयेत्यवितथा तथा ॥
॥ ९२ ॥ तुष्टास्मि दानमाहात्म्या-द्वत्साः शासनसुर्यहं ॥ द्वादशाब्दी व्यतिक्रांता । वने वो
दुस्सहेति हा ॥ ९३ ॥ इतस्त्रयोदशं वर्षं । मत्स्यदेशे स्थिता ननु ॥ अतिक्रामंतु तद्वेष-प-
रावर्त्तपरायणाः ॥ ९४ ॥ इत्युक्त्वा सा तिरोधत्त । पांडवा अपि तद्वचः ॥ संभूय व्यमृशंस्त-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्र । जानंतः स्वं प्रतिश्रवं ॥ ९५ ॥ कंकाख्यो द्विजवेषोऽहं । स्थास्ये वैराटराड्गृहे ॥ इत्यू-
चे धर्मतनयो । मानसिद्धिनिबंधनं ॥ ९६ ॥ भीमोऽप्यधत्त सूदोऽहं । स्थास्ये वल्लवनामभृ-
त् ॥ बृहन्नडाख्यो भाव्येष—स्तद्गृहे शाक्रिराह च ॥ ९७ ॥ अश्वाधिभूर्गंधिकोऽहं । स्थाता न-
कुल ऊचिवान् ॥ गोविंदस्तंत्रपालाख्यः । स्थास्ये तस्माल्लघुर्जगौ ॥ ९८ ॥ कृष्णाप्युवाच
सैरंध्री । राजपत्न्या अहं ननु ॥ भवित्री किल तत्कर्म । शर्मकृन्मम सांप्रतं ॥ ९९ ॥

इत्यालोच्य मिथः सर्वे । स्वस्ववेषधराः क्रमात् ॥ विराटराष्ट्रमासेदु—रविज्ञाता जनैः
क्वचित् ॥ १०० ॥ पुरीपरिसरे पितृ—वने शंबतिरोहितं ॥ शमीस्कंधे न्यधुः शस्त्र—संचयं पां-
डुनंदनाः ॥ १ ॥ प्राप्ताः सभां विराटेन । नियुक्ताः स्वस्वकर्मणि ॥ सन्मानिताः सुखं तत्र ।
तस्थुस्ते गुप्तवृत्तयः ॥ २ ॥ सर्वे ते प्रत्यहं प्रात—रुत्थाय जननीं निजां ॥ नेमुर्गुप्तां क्वचिद्दे-
श्म—न्येतद्भिक्तां च संव्यधुः ॥ ३ ॥ भीमस्तत्र स्थितः सूद—वृत्त्या मल्लभटान् रणे ॥ निज-
घानान्यदा भूपा—द्विशेषान्मानमाप च ॥ ४ ॥ षडुत्तरशतं तत्र । सुदेष्णायाः सहोदराः ॥
अभूवन् भूपतेः शाला—स्तेषु मुख्यो हि कीचकः ॥ ५ ॥ स कदाचित्सुदेष्णायाः । सदने डु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पदात्मजां ॥ रूपलावण्यमर्यादा–मपश्यन्मोहमाप च ॥ ६ ॥ स रोमांचमिषात्काम–बाणा-
निव वहंस्तरां ॥ प्रत्यंगं प्रययौ वेश्म । धुन्वन्मूर्धानमादरात् ॥ ७ ॥ स्मरोपचारचतुरै–र्द्रौ-
पदीमन्यदा स हि ॥ वचोभिः प्रार्थयन् प्राप । तस्या धिक्कारमुच्चकैः ॥ ८ ॥ उद्यत्स्मरशर-
व्यग्र–समग्रांगविचेतनः ॥ सुदेष्णायाः स तत्कृत्स्नं । स्वाभिलाषं न्यवेदयत् ॥ ९ ॥ दुःसा-
ध्यव्याधिनिर्मग्नं । सुदेष्णा तमवोचत ॥ मिषादेनां त्वदावासं । मन्नियुक्तां तथार्थयेः ॥ १० ॥
तयेत्याश्वासितो मूढः । प्रौढमन्मथतापभृत ॥ गत्वा गृहानब्जशय्यां । शोषयन्नस्वपत्तदा ॥
॥ ११ ॥ प्रजिघायान्यदा कृष्णां । बलात्कीचकधाम्नि सा ॥ व्याजेनबांधवं तस्याः । संगादेव
जिजीविषुः ॥ १२ ॥ तामायांतीं गृहान् स्वस्य । दत्तभ्रूलोचनामसौ ॥ निरीक्ष्योत्क इवोत्था-
य । प्रसारितकरो जगौ ॥ १३ ॥ एह्येहि कातराक्ष्येहि । देहि मेहृद्गेहिनि ॥ परिष्वंगमनंगार्त्ते
। मां च संप्रीणय प्रिये ॥ १४ ॥

इति श्रुतिकटु श्रुत्वा । तद्वाक्यं द्रौपदी जगौ ॥ ४ ॥ मावोच इति रे मूढ । वचनं मयि
पापवत् ॥ १५ ॥ गुप्ता मत्पतयः पंच । त्वामन्यायकरं ननु ॥ नयिष्यंत्यपि पंचत्वं । तत्त्वं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मनसि संश्रय ॥ १६ ॥ इत्यालपंतीं तां कृष्णां । स कृष्णचरितस्ततः ॥ धृत्वा केशेषु चर-
णै–र्निजघान कृतार्त्तगां ॥ १७ ॥ तस्मात्कथंचिदासाद्य । जागरस्त्री सौनिकादिव ॥ सा मोक्षं
धूलिलिप्तांगा । ययौ मत्स्यप्रजोः सजां ॥ १८ ॥ दृष्ट्वा धर्मसुतं तत्र । मुक्तकेशा कृशोदरी ॥
विललाप पतीन् गुप्ता–भिधानाक्षरमित्यथ ॥ १९ ॥ ये स्थिरा युधि ये भीमा । जयांका ये
च दोर्भृतः ॥ सद्भिस्तैरप्ययहं राजन् । कीचकेन कदर्थिता ॥ २० ॥ इत्यालपंतीं तां कूट–रो-
षाक्षरमवोचत ॥ कंकस्ते पतयः केचि–त्सुगुप्ताः संति चेत्क्वचित् ॥ २१ ॥ भीमश्चेत्तव को-
ऽप्यस्ति । त्राता त्वां नियतं स हि ॥ कृशोदरेऽत्र मा विघ्नी–भूया व्रज निकेतनं ॥ २२ ॥ से-
ति श्रुत्वा गता रात्रौ । तद्भीमायाप्यचीकथत् ॥ भीमोऽप्याश्वास्य मधुरो–क्तिभिस्तामूचिवा-
निति ॥ २३ ॥ दुर्योधनागो यन्मृष्टं । तद्धर्मसुतसत्यता ॥ सांप्रतं कीचकस्यागः । सोढुं मे न
हि सांप्रतं ॥ २४ ॥ कूटसंगमवाग्जारै–राह्वये रंगमंडपे ॥ तमद्य रात्रौ त्वद्द्विष्टं । यथा ह-
न्मि द्रुतं रणे ॥२५॥ भीमेनाश्वासिता सेति । मिलितं कीचकं पथि ॥ कूटस्नेहाक्षरै रंग–स-
द्मामाकारयन्निशि ॥ २६ ॥ हृष्टस्तैरक्षरैर्मूर्खः । स पूर्वप्रहरे निशः ॥ प्रिये कुत्रासि कुत्रासी–



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्युच्चरन् मंडपं ययौ ॥२७॥ द्रौपदीविश्लभ्रमः । स्पृष्टस्तेन कणाड्णात् ॥ तं जघानादृष्टचा-
रः । प्रापद्वेगान्महानसं ॥ २८ ॥ प्रातस्तद्बांधवा वीक्ष्य । तमदृष्टचरान्मृतं ॥ आरोप्य शि-
बिकां यांतो-ऽपश्यंस्तां मालिनीं पुरः ॥ २९ ॥ एतदर्थं बंधुवधो । वदंत इति तेऽथ तां ॥ धृ-
त्वा केशेषु चक्रषु-श्चिताग्नौ क्षेप्तुमुत्सुकाः ॥ ३० ॥ रुदंती मनसा भर्तॄन् । स्मरंती द्रुपदा-
त्मजा ॥ जगृहे तैश्चितापार्श्वे । स्वा लक्ष्मीरिव देहिनी ॥ ३१ ॥ ततोऽकस्माद्बकद्वेषी । समे-
त्योन्मूल्य पादपान् ॥ कीचकान् कुट्टयित्वाग्नौ । चिक्षेपाक्षेपतो बली ॥ ३२ ॥ दत्वाग्नावाहु-
तीर्भीमः । कीचकैर्द्रुपदात्मजां ॥ चकाराद्दुषितां स्वस्य । शांतिलक्ष्मीमिवांगिनीं ॥ ३३ ॥ ता-
न् गंधर्वहतान् ज्ञात्वा । मत्स्यराट् बंधुशोकतः ॥ सुदेष्णां विह्वलां प्राह । स्नेहाद्भ्रातास्य पू-
र्वतः ॥ ३४ ॥ अदानि कानिचिद्देवि । वितथं मा कुरुष्व मां ॥ सन्मानय च सैरंध्रीं । त्य-
क्तकोपा सुलोचने ॥ ३५ ॥ स्वरूपभ्राजस्तत्कांताः । प्राप्ते काले स्वयं त्विमां ॥ नेष्यंतीति
च संबुध्य । भर्त्री सा सुस्थिताऽभवत् ॥ ३६ ॥ युग्मं ॥

इतो दुर्योधनादेशा-द्देशानालोक्य भूरिशः ॥ अदृष्ट्वा पांडुजानेत्य । हेरिकास्तं व्यजि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 



ज्ञपन् ॥ ३७ ॥ राजंस्त्वन्नीतिपाथोधौ । कच्छपा इव पांडवाः ॥ संतोऽप्यसंत इव ना–स्मा-
भिरासाकिताः क्वचित् ॥ ३८ ॥ श्रुत्वेति भीष्मविदुर–मुखमैक्षत पार्थिवः ॥ परिज्ञाय च त-
द्भावं । प्राह तं स्वर्धुनीभवः ॥ ३९ ॥ नेतयो यत्र नो भीति–र्यत्र नो रोगसंभवः ॥ ल-
क्ष्यंते पांडवास्तत्र । स्वयमर्हद्विहारवत् ॥ ४० ॥ जगुर्दूतास्ततो मत्स्य–देशो देशेषु राजते ॥
धनैर्धान्यैर्दिवः खंड–मिवाधिव्याधिवर्जितः ॥ ४१ ॥ अथाददे वचो दुर्यो–धनो ज्ञेयाः कथं हि
ते ॥ गुप्ताः शल्यमिव प्रौढ–दवथुप्रथिमाकराः ॥ ४२ ॥ ऊचे सुशर्मानृपति–स्ततो नत्वा सु-
योधनं ॥ तन्निश्चितं पांडुसुता । मत्स्यदेशे चरंति ते ॥ ४३ ॥ तन्मत्स्यराजनगरा–द्गोकुलं शा-
ग् हरामहे ॥ यथा स्वयमकालेऽपि । प्रत्यक्षास्ते भवंति हि ॥ ४४ ॥ मत्स्याधिभूः परो वै-
री । ह्यकृतः स निगृह्यते ॥ अन्यतो गोहरणतो । हन्यंते पांडवा अपि ॥ ४५ ॥ सुशर्मणो मं-
त्रमिति । श्रुत्वा भुम्नोऽर्कसूमुखैः॥ दुर्योधनोऽचलत्सैन्यै–र्धृतगोहरणाशयः ॥ ४६ ॥ त्रिगर्त्ताधि-
पतिर्याम्य–दिग्मुक्ताः सुरभीरभीः ॥ अहरद्बलिसैन्येन । विराटनगरांगणे ॥ ४७ ॥
तदा कलकलाराव–व्याकुलानन आलपत् ॥ शीघ्रं गोपाल आगत्य । विराटनृपतिं न 

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मन् ॥ ४८ ॥ राजन् यः कीचकेनाजौ । भंगमध्यापितो भृशं ॥ सुशर्मा सोऽहरत्त्वत्पुः—प-
रितो गोकुलं चरत् ॥ ४९ ॥ क्रोधोद्धुरोऽथ धरणी—धवः कोदंडटंकृतैः ॥ कुर्वन्ननेकं भुवनं ।
ससैन्योऽरीनधावत ॥ ५० ॥ युतः पुत्रैः सूर्यशंख—मंदिराश्वमुखैर्वरैः ॥ सन्नद्धयोधपटलः । स
शत्रूनभ्यवेष्टयत् ॥ ५१ ॥ परस्परामर्षवतां । रणतांडवशालिनां । तेषां बाणोत्करैर्व्योम ।
व्यानशे रिपुघातिभिः ॥ ५२ ॥ क्षणात्सहस्रांशुरिव । तमिस्राणि विराटराट् ॥ वैरिसहस्रम-
वधी—दस्तमाप च भास्करः ॥ ५३ ॥ तादृग्भटवधक्रुद्ध—स्त्रिगर्त्तनृपतिस्ततः ॥ ध्वानयन् ध-
नुरुद्भ्रांतं । मत्स्यराजमधावत ॥ ५४ ॥ तस्मिन् वेगात्त्रिगर्त्तेशे । शस्त्रवर्षिण्यमर्षिणि ॥ सै-
न्ये त्रासं गते त्वेकः । स्थिरोऽभून्मत्स्यभूपतिः ॥ ५५ ॥ उद्दंडकांडजालेन । मुक्तेनाथ सुशर्म-
णा ॥ रणाब्धौ विधुरो जातो । मत्स्यवन्मत्स्यभूपतिः ॥ ५६ ॥ क्षणाद्व्यस्त्रं च विरथं । ब-
द्ध्वा मत्स्यनृपं रथे ॥ क्षिप्त्वा त्रिगर्त्तनृपतिः । प्राचलत्सैन्यसंयुतः ॥ ५७ ॥ ततो युधिष्ठिरो
भीमो । यमलौ च क्रुधेरिताः ॥ त्रिगर्त्तेशचमूं काम—मुपद्रुद्रुवुरुन्मदाः ॥ ५८ ॥ दास्ये दा-
सस्तवैश्वर्य—मित्याख्यन् स त्रिगर्त्तराट् ॥ बद्धो भीमेन मत्स्येशं । निर्बंधं कुर्वता क्षणात् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ ५९ ॥ हृष्टस्तदा विराटेश–स्तत्रैव निशि सोत्सवः ॥ उवास पांमवाख्यान–मुदितो धर्मसूनुना ॥ ६० ॥

अथोत्तरककुप्मुक्ताः । सुयोधननृपः प्रगे ॥ विराटनगरोपांते । गा जहार विचारमुक् ॥ ६१ ॥ ततस्त्वरितमागत्य । गोपालोंतःपुरस्थितं ॥ कुमारमुत्तरं धेनु–हरणं तन्न्यवेदयत् ॥ ६२ ॥ ततो रोषोल्लसद्वीर्यो । मातृजायाजनाग्रतः ॥ व्याचख्यावुत्तरः सार–सारथिरहितोऽस्म्यहं ॥ ६३ ॥ नो चेदेकोऽपि कोपेन । पवमान इवोल्लसन् ॥ उन्मूलयामि कुरुज–वैरिसैन्यद्रुमावलीः ॥ ६४ ॥ युग्मं ॥ तदूर्जितमिति श्रुत्वा । यज्ञजांतःसमत्सरा ॥ जगौ बृहन्नटाख्यो यः । कलाचार्यः स्वसुस्तव ॥ ६५ ॥ सारथिः स हि पार्थस्य । तत्तद्वीरविमर्दने ॥ तवापि भविता योग्यो । यथाकामीनयानकृत् ॥ ६६ ॥ युग्मं ॥ कुमारोऽथानुजां प्रेष्यानिनाय च बृहन्नडं ॥ धारयामास च तदा । सारथ्यं बहुयत्नतः ॥ ६७ ॥ व्यत्ययेन दधत्पूर्वं । हासयन् युवतीजनं ॥ बभार कवचं पार्थो । रथमध्यास्त च क्षणात् ॥ ६८ ॥ पार्थवाहितथैरेय–वेगात्कौरववाहिनीं ॥ आससादोन्नदद्दंति–दंतुरामुत्तरः पुरः ॥ ६९ ॥ दृष्ट्वा भीष्मकृ-

पादित्य—सूनुदुर्योधनादिभिः ॥ बलं वीक्ष्योत्तरः प्रोचे । पार्थं स पृथुवेपथुः ॥ ७० ॥ बृहन्नड
रवेस्तेजो—दीप्रदंतुरशस्त्रभृत् ॥ सर्वत्र विस्तृतमिदं । बलं नालं विलोकितुं ॥ ७१ ॥ ततः पा-
र्थो हसित्वोचे । क्षत्रियान्वयभूरसि ॥ तदुक्त्वापि स्त्रियां पार्श्वे—ऽधुना किमिव वक्षसि ॥
॥ ७२ ॥ रणारंभप्रणयिनां । क्षत्रियाणां रिपुग्रहे ॥ जीवितं राज्यलाभाय । कीर्त्तिलाभाय
पंचता ॥ ७३ ॥ यद्वि मृत्योः कीर्त्तिफलं । कदलीतुल्यमस्तु मा ॥ तन्ममेति गिरं प्राह । कु-
मारोऽपि भयातुरः ॥ ७४ ॥

इत्युक्त्वा स्यंदनाद्दत्त—झंपो मत्स्यनरेंद्रभूः ॥ गंतुकामोऽर्जुनेनोचे । दत्तझंपेन पृष्टतः ॥
॥ ७५ ॥ धीरो भव कुमार त्वं । मम पार्थस्य सारथिः ॥ भव येन रिपून् जित्वा । त्वयि की-
र्त्तिं निवेशये ॥ ७६ ॥ अतो निर्भीः शवाकार—वृत्तं चापं ममेषुधीं ॥ समानय शमीस्कंधा—
च्चिकित्साविवर्जितः ॥ ७७ ॥ इत्याख्याय स्वरूपं स्वं । बंधूनां च धनंजयः ॥ गृहीतास्त्रो
रथारूढः । प्राचालीत्सैन्यसन्मुखं ॥ ७८ ॥ इतो गंगासुतो वीक्ष्य । तं शंखध्वनिभैरवं ॥ ज-
गौ दुर्योधनं पार्थ । एष स्त्रीवेषधारकः ॥ ७९ ॥ तन्नूनं समेय प्राप्ता—नद्य वोऽयं जिघांस-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ति ॥ जगत्त्रयप्रमोदाया–नेन संधेहि सांप्रतं ॥ ८० ॥ नो चेद्दलचतुर्थांश–गुप्तस्त्वं गोत्रजैः स-
ह ॥ याहि रक्ष्यो हि नृपति–र्वयमस्यांतरे स्थिराः ॥ ८१ ॥ पितामहादिति श्रुत्वा । मंत्रं दु-
र्योधनोद्भुतं ॥ बलांशेन समादाय । गोकुलं भीरुकोऽचलत् ॥ ८२ ॥ तद्वीक्ष्य फाल्गुनः प्रो-
चे । कुमारं भक्तयादसौ ॥ पलायते धार्त्तराष्ट्र–स्तद्वयानिह चालय ॥ ८३ ॥ तेनाथ शक्र त-
था नुन्नो । रथो रविरथोपमः ॥ प्रापारिसैन्यं सहैन्यं । तत्केतुकपिबूत्कृतैः ॥ ८४ ॥

पार्थोऽथ दध्मौ स्वं शंखं । यथा तन्नादमोहिताः ॥ स्वयं व्याजुघुदुर्गाव । उत्पुच्छाः स्व-
पुरंप्रति ॥ ८५ ॥ कलंकः प्रथितो वंशे । गाश्च पूर्वं जिहीर्षता ॥ त्वयाधुना नश्यता तु । ज-
गौ पार्थः सुयोधनं ॥ ८६ ॥ मिलिते वैरिणि तथा । किं गंतु शक्यमित्यपि ॥ तत्तिष्ठ धन्व
संधेही –त्युक्त्वाधिज्यं धनुर्व्यधात् ॥ ८७ ॥ तदा पार्थशरासारैः। पूरिते गगनार्णवे ॥ नालक्षि
शात्रवग्राह–गजकच्छपसंचयः ॥ ८८ ॥ भटकोटिक्षयं वीक्ष्य । पार्थः पृथुदयान्वितः ॥ संमोह-
नास्त्रममुच–दस्वप्नस्वप्नकारणं ॥ ८९ ॥ चतुरंगापि सा सेना । सुप्तेव चतुर्विधा ॥ पार्था-
नंगशरासंगा–न्मोहमाप सनर्तृका ॥ ९० ॥ मुक्त्वा भीष्मव्रतं भीष्मं । निशाणेष्वपरेष्वथ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्मृतोत्तरावचाः पार्थो । जगौ मत्स्येशनंदनं ॥ ९१ ॥ दुर्योधनस्य नीलानि । पीतान्यादित्य-
जस्य च ॥ विचित्रवर्णान्यन्येषां । वासांस्याहर वेगतः ॥ ९२ ॥ तथा कृते तेन शरै-र्भ्रंतो
भीष्मस्य वाजिनः ॥ हत्वार्जुनः पुरं प्राप । रिपुसैन्यं च दुद्रुवे ॥ ९३ ॥ पुरं विराटो विज-
यी । तत्प्राक् प्राप्तः प्रमोदभाक् ॥ रिपुपृष्टे गतं ज्ञात्वा । सुतं किंचिददूयत ॥ ९४ ॥ याव-
त्सन्नाहयेत्सेनां । स सुतानुगतिस्पृहः ॥ तावच्चरैः कुमारस्य । जयोऽशंसि प्रमोदिभिः ॥
॥ ९५ ॥ राजमानो मुदा राजा । कारयन्नगरोत्सवं ॥ स्वयं चकार कंकेन । सभायां सारि-
खेलनं ॥ ९६ ॥ प्रशंसंतं सुतजयं । कंकः प्राह नरेश्वरं ॥ जयोऽस्य किं न सुलभो । यंता
यस्य बृहन्नटः ॥ ९७ ॥ इतो रथादवारुह्या-र्जुने याति निजाश्रयं ॥ उत्तरस्तु सभासीनं ।
नत्वा नृपमुपाविशत् ॥ ९८ ॥ उवाच च मया राजन् । जयो यस्मादवापि सः ॥ प्रत्यक्ष-
तामतस्त्वद्यहः । स्वयमेष्यति बंधुयुक् ॥९९॥ ततस्तृतीयेऽह्नि युधि-ष्ठिरः स्नातः सुवस्त्रयुक् ॥ ॥६८०॥
कृतार्हत्पूजनः क्षुद्र-देवतेभ्यो वलिं व्यधात् ॥ १०० ॥ स्वरूपभ्राजश्चत्वारः । परे धर्मसुतं मु-
दा ॥ नेमुः सिंहासनस्थं च । विराटोऽपि नमोऽकरोत् ॥ १ ॥ इदं राज्यमियं संप-त्तथान्य-

For Private And Personal Use Only

दपि ते विज्ञो ॥ विराटेनेति विज्ञप्त–स्तत्रास्थाद्धर्मसूः सुखात् ॥ २ ॥ नत्वा विराटः स्वसुता –मुत्तरामभिमन्यवे ॥ पार्थपुत्राय योग्येति । धर्मपुत्रं व्यजिज्ञपत् ॥ ३ ॥ सोऽथ दूतैरभि-मन्यु–मानिनाय हरेः पुरात् ॥ समं च भागिनेयेन । तत्रागादपि माधवः ॥ ४ ॥ सुदिने माधवश्चक्रे । मत्स्यपांडवहर्षदं ॥ प्रीत्याभिमन्यूत्तरयोः । पाणिग्रहमहोत्सवं ॥ ५ ॥ अथो हृष्टो हृषीकेशो । विराटानुज्ञया समं ॥ पितृस्वस्रा पांडुसुता–न्निनाय द्वारिकापुरीं ॥ ६ ॥ चत्वारः पांडवास्तत्र । यादवानां च कन्यकाः ॥ चतस्रः पर्यणैषुस्ते । दत्तास्तज्जनकैर्मुदा ॥ ७ ॥

इतश्च रुक्मिणी स्वप्ने–ऽवलक्षवृषभस्थिते ॥ विमाने स्वं निषसं च । दृष्ट्वाचख्यौ मुरारये ॥ ८ ॥ सोऽप्याह भावी ते सूनु–स्तत् श्रुत्वा कापि चेटिका ॥ तदाह सत्यभामायै । सापि कृष्णांतिकं ययौ ॥ ९ ॥ हस्तिमल्लो मया स्वप्ने–ऽदर्शि चाह हरिः पुनः ॥ तत्कूटमिंगितैर्ज्ञात्वा । प्राह मा खेदमुद्वह ॥ १० ॥ भामाप्युवाच चेत्कूट–मिदं तत्परिणेष्यति ॥ पूर्वं यस्याः सुतो देयाः । स्वकेशा ह्यनया तदा ॥ ११ ॥ साक्षिणः प्रतिभुवश्च । कृत्वा ते तत्र जग्मतुः ॥ दैवादुभे अपि पुन–र्गर्भं च दधतुर्वरं ॥ १२ ॥ प्रद्योतनत्वात्प्रद्युम्नो । रुक्मिण्या नंद

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नोऽभवत् ॥ भानुश्च सत्यभामाया । मिथः स्पर्धापरे हि ते ॥ १३ ॥ प्राग्वैराद्रुक्मिणीवेश्मो । धूमकेतुस्तदा सुरः ॥ एत्य कृष्णाद् गृहीत्वार्भं । प्रतिवैताढ्यमभ्यगात् ॥ १४ ॥ तत्र टंकशिलायां तं । मुक्त्वा देवस्तिरोदधे ॥ लात्वैनं खेचरः काल-संवरः स्वपुरं ययौ ॥ १५ ॥ पत्न्यै कनकमालायै । पुत्रत्वेनार्पयच्च तं ॥ जातोऽद्य मत्सूनुरिति । घोषणां स्वपुरे व्यधात् ॥ १६ ॥ स तत्रापि हि पुत्रत्व-प्रीत्या ललितमानसः ॥ ववृधे नाम तस्यासी-त्प्रद्युम्नः कांचनद्युतिः ॥ १७ ॥ अथ दुःखातुरं कृष्णं । ज्ञात्वा सीमंधरार्हतः ॥ नारदस्त्वरितं पुत्रो-दंतादप्रीणयत्तदा ॥ १८ ॥ रुक्मिण्या प्राग्भवे यच्च । घुसृणांकेन पाणिना ॥ अंडान्यादाय मुक्त्वा च । मयूरी वंचिता भ्रमात् ॥ १९ ॥ तेनाधुनापि पुत्रेण । वियोगोऽस्या बभूव हि ॥ श्रुत्वेति साक्षात्तं दृष्ट्वा । नारदः प्रययौ पुनः ॥ २० ॥ भविता षोडशाब्दांते । सुतेन सह संगमः ॥ इत्यार्हतेन वचसा । स्वस्था तस्थौ च रुक्मिणी ॥ २१ ॥

इतश्च सर्वशास्त्रास्त्र-कुशलो विक्रमी क्रमात् ॥ प्रद्युम्नो युवतीचित्ते । प्रद्युम्न इव सोऽभवत् ॥ २२ ॥ उद्यौवनं तं कनक-माला व्यालोक्य सादरात् ॥ अभूत्स्मरातुरा धिग् धिग्



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



। नारीणामविचारतां ॥ २३ ॥ मन्यमाना निजं जन्म । तारुण्यं च कृतार्थं सा ॥ विना त-
द्भोगमूचे तं । सविकारवचोन्नरैः ॥ २४ ॥ मद्यानाग स्मरोर्वाग्नि—तापितं मद्पुन्नवान् ॥ स्व-
देहस्पर्शसुधया । निर्वापयतु सांप्रतं ॥ २५ ॥ इति तस्या वचः श्रुत्वा । दूनश्चित्तेऽतिकृष्णसूः
॥ अब्रवीद्धिगिदं पापं । त्वं मातात्वत्सुतोऽस्मि यत् ॥ २६ ॥ साप्यूचे नास्मि ते माता । सं-
वरेण क्वचिन्नवान् ॥ प्राप्तः संवर्द्धितश्चापि । जोगान् भुंक्ष्व ततो मया ॥ २७ ॥ गृहाण गौ-
रीप्रज्ञप्त्यौ । विद्ये विश्वजयक्षमे ॥ वितथं वचनं मे तु । मा कृथास्त्वं दयामय ॥ २८ ॥ न
ह्यकृत्यं करिष्यामी—त्यंतर्निश्चित्य कृष्णसूः ॥ ऊचे प्रयच्छ मे विद्ये । करिष्ये त्वद्वचस्ततः ॥
॥ २९ ॥ स लब्ध्वासाधयद्विद्ये । रंतुं तं प्रार्थयच्च सा ॥ मन्माता मद्गुरुस्त्वं चे—त्युक्त्वा सो-
ऽगात्पुराद्बहिः ॥ ३० ॥ नखैः कनकमाला स्वं । देहं दीर्त्वा कलिं व्यधात् ॥ किमेतदिति पृ-
च्छंत—स्तत्सुताश्च समाययुः ॥ ३१ ॥ ज्ञात्वा पराभवं मातुः । कुपितास्त उदायुधाः ॥ आग-
च्छंतो हता विद्या—बलेनाच्युतसूनुना ॥ ३२ ॥ संवरं च सुतवध—क्रुद्धं जित्वा स लीलया ॥
व्याहरत्कनकमाला—वृत्तांतं च सुदारुणं ॥ ३३ ॥ तदा च नारदोऽभ्येतः । प्रद्युम्नेन स पूजि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तः ॥ शशंस तस्मै रुक्मिण्याः । सीमंधरजिनोदितं ॥ ३४ ॥ भामाया भानुकः सूनुः । प्र-
थमं परिणेष्यति ॥ त्वन्मात्रा किल दातव्याः । स्वकेशाः पणहारिताः ॥ ३५ ॥ केशदानवि-
प्लवेन । त्वद्वियोगरुजा च सा ॥ सत्यपि त्वयि तनये । मरिष्यत्येव रुक्मिणी ॥ ३६ ॥

सनारदोऽपि प्रद्युम्न-स्ततः प्रज्ञप्तिनिर्मितं ॥ विमानमारुह्य ययौ । चाश्वेव द्वारिकां पु-
रीं ॥ ३७ ॥ सविमानं मुनिं बाह्यो-द्याने मुक्त्वान्यवेषभृत् ॥ जन्ययात्रामथापश्यत् । स
भान्वर्थमुपागतां ॥ ३८ ॥ हृत्वा विवाह्यां तत्कन्यां । सोऽमुचन्नारदांतिके ॥ कृष्णोद्यानं च वि-
द्याभि-श्च्युतपुष्पफलं व्यधात् ॥ ३९ ॥ जलाशयेभ्यः सर्वेभ्यो-ऽशोषयच्च जलान्यपि ॥ वि-
तृणं च पुरं कृत्वा । वह्निर्वादमवादयत् ॥ ४० ॥ स्पृहयालुर्हयं मूल्या-द्भानुकस्तं च वाहयन्
॥ मायया पातितः सर्वै-र्हस्यमानः पुरीं ययौ ॥ ४१ ॥ प्रद्युम्नोऽथ द्विजीभूय । पठन् वेदं पु-
रांतरा ॥ चकार सरलां दासीं । भामायाः कुब्जिकामपि ॥ ४२ ॥ यथेच्छमर्थयन् भोज्यं । मा-
याविप्रस्तया सह ॥ भामौकः प्राप भामा तु । तं न्यवेशयदासने ॥ ४३ ॥ ऊचे च द्विज रु-
क्मिण्या । मां रूपेणाधिकां कुरु ॥ सोऽप्यभाषत यद्येवं । विरूपा भव तद्द्रुतं ॥ ४४ ॥ तद्रु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्त्या मुंडितशिरो—जीर्णवासोंजनोक्षिता ॥ सा नत्वा कुलदेव्यग्रे—ऽजपद्दृक्षवडेति गां ॥ ४५ ॥
स भुंजानोऽथ विप्रोऽपि । विद्या शक्त्यान्नपानकं ॥ समापयच्च चेटीभिः । समुत्तिष्ठेति जल्पि-
तः ॥ ४६ ॥ स बालमुनिवेषोऽथ । रुक्मिण्याः सदनं ययौ ॥ सा तु तद्दर्शनादेव । दूरं प्री-
त्यातिमोदिता ॥ ४७ ॥ तदासनार्थं रुक्मिण्यां । गतायां स उपाविशत् ॥ कृष्णसिंहासने र-
म्ये । साथ दृष्ट्वा जगाविति ॥ ४८ ॥ कृष्णं वा कृष्णजातं वा । विना सिंहासनेऽत्र हि ॥
अन्यं पुमांसमासीनं । सहंते न हि देवताः ॥ ४९ ॥ सोऽप्यवोचत्तपोभावा—न्मय्यलं न हि
देवताः ॥ षोडशाब्दतपःप्रांते । पारणार्थमिहागमं ॥ ५० ॥ नो चेद्यास्यामि त्वामाया । वे-
श्मेत्युक्तेऽथ तेन सा ॥ आख्यदुद्वेगतो नाद्य । मया किंचिद्धि याचितं ॥ ५१ ॥ उद्वेगकारणे
पृष्टे । पुनः सावककुलामरी ॥ मयाराद्धा शिरोदाना—दयाख्यत्पुत्रसंगमं ॥ ५२ ॥ तदभिज्ञा-
नकथित—श्चूतोऽपि कुसुमैर्वृतः ॥ पुत्रागमनहेतुं त्व—मप्यहो तद्विलोकय ॥ ५३ ॥ सोऽप्यूचे
रिक्तहस्तानां । न होरा फलदायिनी ॥ साप्याख्यत्किं ददे तुभ्यं । पेयां यच्छेति सोऽवदत् ॥
॥ ५४ ॥ स पेयाद्रव्यमखिलं । विद्ययाज्वालयत्क्षणात् ॥ खिन्नां च तामथ प्रेक्ष्य । ययाचे कु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ष्णमोदकान् ॥ ५५ ॥ सप्यूपे मोदका ह्येते । कृष्णस्यान्यैः सुदुर्जराः॥ नर्विहत्यां करिष्यामि । इत्वैतान् व्रजते मुने ॥ ५६ ॥ सोऽप्यन्नाषिष्ट तरसा । न मे किमपि दुर्जरं ॥ सा सशंका ततस्तस्मा—येकैकं मोदकं ददौ ॥ ५७ ॥ दत्तान् दत्तान् शीघ्रमेव । भुंजानं तं तु मोदकान् ॥ सस्मिता विस्मिता सोचे । महर्षे बलवानसि ॥ ५८ ॥

इतस्तथा जपंतीं तां । ग्रामामेत्यावदन्नराः ॥ फलादिरिक्तं विपिनं । निस्तृणं च तृणापणं ॥ ५९ ॥ जलाशयान्निर्जलांश्च । ग्रानुकं पतितं हयात् ॥ कन्याया हरणं चापि । तत्तथा विप्रनिर्गमं ॥ ६० ॥ युग्मं ॥ ततो विषण्णा सामर्षा—त्केशानयनहेतवे ॥ दासीं पटलिकाहस्तां । प्राहिणोद्रुक्मिणीगृहे ॥ ६१ ॥ तस्या एव कचैर्माया—साधुः पात्राण्यपूरयत् ॥ प्रैषीद्ग्रामांतिकमथ । नापितानपि तद्विधान् ॥ ६२ ॥ ततः प्रतिभुवं कृष्णं । ग्रामा केशानयाचत ॥ त्वं मुंडासीति कृष्णोक्ते । हास्येनालं जगावसौ ॥ ६३ ॥ कृष्णेन प्रहितो रामः । केशार्थं रुक्मिणीगृहान् ॥ प्रद्युम्नविकृतं रूपं । कृष्णस्यालोक्य लज्जितः ॥ ६४ ॥ सन्नायामेत्य रामोऽथ । दृष्ट्वा कृष्णं जगाद च ॥ रूपहृयास्त्वया हंत । हेपिता हि वयं वधूः ॥ ६५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तत्र नागां हरिरिति । प्रोचे शपथपूर्वकं ॥ माया तथैवेति वदं–त्यगान्नामा निजे गृहे ॥६६॥ रुक्मिण्या नारदोऽप्याख्यत् । प्रद्युम्नोऽयं सुतस्तव ॥ निजरूपधरः सोऽथ । तस्याः पादौ न-नाम च ॥ ६७ ॥ रुक्मिणी प्रक्षरत्स्तन्या । बाहुभ्यामालिलिंग तं ॥ स जगाद च तां मात–र्न वाच्योऽहं पितुः पुरः ॥ ६८ ॥

इत्युक्त्वा रुक्मिणीं माया–रथमारोप्य सोऽचलत् ॥ शंखं च पूरयामास । क्षोभयन् जन-संचयं ॥ ६९ ॥ हरामि रुक्मिणीमेष। कृष्णो रक्षतु चेद्बली ॥ व्याहरन्निति वेगेन । स पुरा-द्बहिराययौ ॥ ७० ॥ कोऽयं मुमूर्षुर्दुर्बुद्धि–रिति जल्पन् जनार्दनः ॥ ससैन्योऽप्यन्वधान्निष्ट । शार्ङ्गमास्फालयन्मुहुः ॥७१॥ प्रद्युम्नस्तच्चमूं जित्वा । विद्यासामर्थ्यतो हरिं ॥ सद्यो निरायुधं चक्रे । निर्दंतमिव दंतिनं ॥ ७२ ॥ यावद्विष्णुर्विषण्णोऽभू–त्तावदेत्य स नारदः ॥ तं शशंस सुतस्तेऽयं । तमालिलिंग माधवः ॥ ७३ ॥ रुक्मिणीसहितः कृष्णः । मुदितः सुतसंगमात् ॥ पश्यन् पौरोत्सवोत्सेकं । प्रविवेश पुरीं मुदा ॥ ७४ ॥ व्यजिज्ञपदथो दुर्यो–धनः कृष्णं प्र-णम्य च ॥ पुत्री मे ते सुता स्वामिन् । केनाप्यपहृताधुना ॥ ७५ ॥ प्रज्ञप्त्या तामहं ज्ञा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





त्वा-भानेष्यामीत्युदीरयन् ॥ क्षणात्प्रद्युम्न आनैषी-त्तां स्वयंवरकन्यकां ॥ ७६ ॥ कृष्णेन दी-
यमानां तां । मम ह्येषा वधूरिति ॥ प्रद्युम्नो न हि जग्राह । पर्यणैषीच्च भानुकः ॥ ७७ ॥
अनिच्छुनापि प्रद्युम्ने-नोत्सवेन महीयसा ॥ खेचरीः क्ष्मापकन्याश्च । गोविंद उद्वाहयत् ॥
॥ ७८ ॥ अन्यदा जीर्णमंचस्थां । भामामालोक्य माधवः ॥ पप्रच्छ दुःखं प्रद्युम्न-समं सूनुं
च सार्थयत् ॥ ७९ ॥ चतुर्थाराधितो नैग-मेषी देवोऽक्षिगोचरः ॥ कृष्णेन याचितः पुत्रं ।
हारं दत्वा तिरोदधे ॥ ८० ॥ तत्स्वरूपं विदन् द्युम्नो । मातुर्जांबवतीं सखीं ॥ विधाय विद्यया
भामा-तुल्यां प्रैषीद्धरेर्गृहे ॥ ८१ ॥ हारं दत्वा हरिस्तां तु । बुभुजेऽथ दिवश्च्युतः ॥ आगा-
त्कश्चित्सुरस्तस्याः । कुक्षौ सुस्वप्नसूचितः ॥ ८२ ॥ ततो ययौ जांबवती । हृष्टा निजनिकेतनं
॥ आययौ सत्यभामा च । कृष्णोक्तो विषयार्थिनी ॥ ८३ ॥ अहो अतृप्तिर्भोगेऽस्या-श्चिंत-
यन्निति केशवः ॥ रेमे तां रौक्मिणेयस्तु । विष्णोर्भंभामताडयत् ॥ ८४ ॥ प्रद्युम्नताडितां भे-
रीं । विदन् क्षुब्धोऽथ माधवः ॥ जगाद भामां ते सूनु-र्भावी भीरुश्च सोमिति ॥ ८५ ॥
प्रातर्जांबवतीकंठे । तद्धारस्य विलोकनात् ॥ प्रशंसन् द्युम्नमायां तु । हरिः कामं विसिस्मये



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ८६ ॥ कालेऽथासूत तनयं । शांबं जांबवती शुभे ॥ भामापि भीरुकं पुत्रं । जन्मतोऽप्यतिभीरुकं ॥ ८७ ॥ अथोपायाद्रुक्मिसुतां । वैदर्भीं रुक्मिणीसुतः ॥ उपयेमे सुहारिणीं । शांबो हेमांगदांगजां ॥ ८८ ॥

मत्सुतं भीषयत्येष । शांबो जांबवतीमिति ॥ भामाख्यत्सापि तामूचे । कृष्णाग्रे मत्सुतो नयी ॥ ८९ ॥ स्वरूपं दर्शयाम्यस्ये–त्युक्त्वा जांबवतीं हरिः ॥ कृत्वाभीरीं स्वयं भूत्वा–भीरो व्यक्रापद्दधि ॥९०॥ तावाभीरौ पुरस्यांत–र्दृष्ट्वा शांबः सदागतिः ॥ प्राहाभीरीमिहागच्छ । यथा गृह्णामि गोरसं ॥ ९१ ॥ इत्युक्त्वा शून्यवेश्मांत–स्तामाकर्षदसौ बलात् ॥ तौ तु जांबवतीकृष्णौ । प्रकटौ प्रेक्ष्य चानशत् ॥ ९२ ॥ हरिर्जांबवतीं प्राह । दृष्टस्तनयदुर्नयः ॥ भद्रं–सौम्यं सुतं सिंही । मन्यते करिकर्कशं ॥ ९३ ॥ अथागच्छद् द्वितीयेऽह्नि । शांबः कीलकनृत्करः ॥ पृष्टो जगाद मद्वृत्त–वक्तुर्वक्त्रे क्षिपाम्यमुं ॥ ९४ ॥ स्वैराचारीति निर्लज्जो । हरिणा त्याजितः पुरं ॥ प्रद्युम्नात्स हि प्रज्ञप्ती–विद्यां प्राप्य विनिर्ययौ ॥ ९५ ॥ अर्दयन् भीरुकं नित्यं । प्रद्युम्नो भामयोच्यत ॥ शांबवत् किं न निर्यासि । त्वं रे शठमते पुरात् ॥ ९६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





क्व गच्छामीति तेनोक्ते । स्मशाने याहि सा जगौ ॥ कदा मया समेतव्य–मित्यवोचत्स तां
पुनः ॥ ९७ ॥ यदा हस्ते गृहीत्वाहं । शांबमत्रानयाम्यरे ॥ तदा त्वया समागम्य–मित्यू-
चे सापि तं क्रुधा ॥ ९८ ॥ यदादिशति मे माते–त्युदित्वा रुक्मिणीसुतः ॥ ययौ स्मशाने
शांबोऽपि । भ्रमंस्तत्र समाययौ ॥ ९९ ॥

ततश्च भीरवे भामै–कोनं कन्याशतं शुभं ॥ अमेलयत्प्रयत्नाच्च । कन्यामेकामियेष च
॥ ३०० ॥ प्रज्ञप्त्या तत्तु विज्ञाय । प्रद्युम्नो जितशत्रुराट् ॥ बभूव शांबोऽपि कनी । तत्पुरां-
तेऽवतस्थतुः ॥ १ ॥ भामा सुतार्थे तां कन्यां । जितशत्रुमयाचत ॥ सोऽप्याख्यन्मत्सुतां भा-
मा । धृत्वा बाहौ व्रजत्वसौ ॥ २ ॥ अन्यच्चोद्वाहकालेऽस्याः । करं भीरुकरोपरि ॥ चेत्कारय-
ति भामा त–द्भीरवेऽस्तु ममात्मजा ॥ ३ ॥ तदंगीकृत्य भामागा–त्तत्र द्युम्नप्रयुक्तया ॥ प्र-
ज्ञप्त्या वेत्ति तं कन्यां । भामा शांबं परो जनः ॥ ४ ॥ आगच्छंती करे धृत्वा । शांबं भा-
मेत्यतर्क्यत ॥ सुतोद्वाहोत्सवे प्रीत्या–नयत्येनमसावहो ॥ ५ ॥ भामौकसि गतः शांबो ।
भीरोर्वामेतरं करं ॥ स्वहस्तेनोपरिस्थेनादाय वामेन वामधीः ॥ ६ ॥ कन्यानां नवनवति–पा-

॥६९०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णेन दक्षिणपाणिना ॥ धृत्वा च युगपद्वहिं । परितो विधिनाभ्रमत् ॥ ७ ॥ युग्मं ॥ वृत्तो-
द्वाहः समं ताभिः । शांबो वासगृहं ययौ ॥ भीरुश्च तेन तत्रायान् । भ्रूकुट्या भीषितोऽगम-
त् ॥ ८ ॥ गत्वा स आख्यन्नामायै । साप्यश्रद्दधती स्वयं ॥ तत्रागतैक्षिष्ट शांबं । शांबोऽपि प्र-
णनाम तां ॥ ९ ॥ सकोपा साप्युवाचैवं । केनानीतोऽसि धृष्ट रे ॥ सोऽप्यूचेऽहं त्वयानीतः
। कन्योद्वाहं च कारितः ॥ १० ॥ अत्र साक्षी जनः सर्वः । पृछ्यतां मातरादरात् ॥ तया च
पृष्टा जनता । तत्सर्वं सत्यमुज्जगौ ॥ ११ ॥ मायी बंधुः पिता मायी । मायिनी यस्य च प्र-
सूः ॥ मायी सोऽछलयत्कन्या–रूपो मां सहजो रिपुः ॥ १२ ॥ इत्युक्त्वा बहुरोषात्ता । भामा-
निःश्वस्यमानिनी ॥ स्वगृहे दुःखिता मंचं । जीर्णमाशिश्रयत्ततः ॥ १३ ॥ युग्मं ॥ वसुदेवं न-
मस्कर्तुं । गतः शांबोऽन्यदाब्रवीत् ॥ तात त्वया चिरं कालं । भ्रमतोद्वहिताः स्त्रियः ॥१४॥
अल्पकालेन तु मया । युगपत्कन्यकाशतं ॥ परिणिन्ये ततः सत्य–मावयोर्महदंतरं ॥ १५ ॥
वसुदेवोऽप्यथ प्राह । कूपमंडुक वेत्सि किं ॥ अहं हि विक्रमात्प्रापं । देशाद्देशांतरे स्थितिं ॥
॥ १६ ॥ स्वयंवरसमायाताः । पर्यणैषं च कन्यकाः ॥ तत्ताद्दकूसमये वधू–परोधादागमं पु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नः ॥ १७ ॥ मायया त्वं तु निर्लज्जः । कन्याः पर्यणयः स्फुटं ॥ छलयित्वा मातरं तु । स्व-
यमागा न चादरात् ॥ १८ ॥ पितामहमिति क्रुद्धं । ज्ञात्वा शांबः प्रणम्य च ॥ जगाद तात
क्षंतव्यं । बालदुर्ललितं मम ॥ १९ ॥ विनयगर्भमनर्थकहारि त—द्वचनमिद्धमथो स
निशम्य तु ॥ मनसि हर्षभरं बहुधाधरत् । सपदि तं प्रशशंस नयास्पदं ॥ २० ॥ प्रद्युम्नप्रमु-
खा एवं । कुमारा यदुभूभृतां ॥ पांडवानां च सर्वेऽपि । संभूयाखेलयन्मुदा ॥ २१ ॥ तत्र
यादवसंप्राप्त—सन्मानमुदिताः सुखं ॥ स्ववेश्मनीव संप्राप्त—कामास्तस्थुर्दिवानिशं ॥ २२ ॥

अथो समुद्रविजय—प्रमुखा यादवेश्वराः ॥ संभूय बलकृष्णाद्याः । पांडवैरित्यमंत्रय-
न् ॥ २३ ॥ सत्यप्रतिज्ञैर्युष्माभिः । सर्वं सेहेऽरिचेष्टितं ॥ प्रलयेऽपि हि नो संत—श्चलंति नि-
जवाक्यतः ॥ २४ ॥ प्राप्तकालैरिदानींत—द्वर्द्धमाना रिपुद्रुमाः ॥ छेद्याः कंटकिनः कामं । की-
र्तिपंगुत्वकारिणः ॥ २५ ॥ इतो जगाद धर्मांग—जन्मा नाहं स्वबांधवान् ॥ हन्मि श्रीलव-
लाभाय । स्वपक्षानिव संगरे ॥ २६ ॥ अथोचे द्रौपदीदृष्टो । भीमो निस्सीमपौरुषः ॥ सोढा
भवान् रिपोर्वृद्धिं । नाहं तादृक् पराभवान् ॥ २७ ॥ वध्याश्चेद्विद्विषो भीम—मुखाश्चेत्समरो-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्सुकाः ॥ बोध्यास्तथापि ते पूर्वं । सांत्वेत्यूचे युधिष्ठिरः ॥ २८ ॥ समुद्रविजयादीना–माज्ञ-
या च रथस्थितः ॥ हस्तिनागपुरं प्राप । वाग्मी दूतो जयाभिधः ॥ २९ ॥ निषण्णेषु नदीसू-
नु–धृतराष्ट्रमुखेष्वथ ॥ सभामुपेत्य विजयो । दुर्योधनमभाषत ॥ ३० ॥ द्वारिकाधीशकंसा-
रि–दूतोऽहं विजयाभिधः ॥ तद्वाचिकं महीनेत–राकर्णय मदास्यतः ॥ ३१ ॥ सत्यप्रतिज्ञास्ते
पांडु–पुत्रास्तव तु बांधवाः ॥ निजोक्तं समयं लब्ध्वा–धुना प्रत्यक्षतां गताः ॥ ३२ ॥ गमयं-
तो निजं कालं । यथा ते सत्यतामिताः ॥ ददंतो राज्यभागं च । तथा यूयं प्रपद्यथ ॥ ३३ ॥
महीलवकृते राजन् । पुरावद्युवयोरपि ॥ माधुना समरारंभो । भूयात्पक्षद्वयोर्मिथः ॥ ३४ ॥
इंद्रप्रस्थं तिलप्रस्थं । वारुणावतमेव च ॥ काशीं च हस्तिनाख्यं च । देह्येभ्यो ग्रामपंचकं
॥ ३५ ॥ इति दूतोक्तमाकर्ण्य । जगौ दुर्योधनः क्रुधा ॥ दशन्नोष्ठं स्पृशन्मूर्ध्नि । ददच्चक्षुर्निजांस-
योः ॥ ३६ ॥ एते द्यूतपणाद्राज्यं । लभंते हारितं कथं ॥ भीमादयस्तु मत्पूर्व–विद्विषो न तु
बांधवाः ॥ ३७ ॥ मद्भक्तितायां यद्भूमौ । चेरुरेते हि सर्वतः ॥ स एव भूमिभागः स्या–न्नाप-
रं किंचिदर्पये ॥ ३८ ॥ पांडवा मयि मित्रं तु । द्विषं तु यदि वा जय ॥ द्यूताल्लब्धं तथाप्येभ्यो



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



। न ददे भूलवं क्वचित् ॥ ३९ ॥ पुनर्जगाद विजयो । न्यायोदययुतं वचः ॥ विधेहि राजन्
मे वाचं । मुंच गोत्रकदर्थनां ॥ ४० ॥ हिडंबकीचकबक–क्रूरकिर्मीरदानवान् ॥ यो जघान
मरुत्सूनु–स्तस्माद्भयं सुयोधन ॥ ४१ ॥ अपकारपरस्त्वं तु । पार्थेनोपायतः पुरा ॥ यद्रक्षि-
तोऽसि तत्तेना–प्यमी पूज्या हि ते सदा ॥ ४२ ॥ धर्मैकसारो धर्मांग–जन्मा त्वयि तु वत्स-
लः ॥ भवदग्निमिवांभस्ता–ननुजानपि रक्षति ॥ ४३ ॥ तेऽधुना हरिणा वैरि–गजेंद्रहरिणा
समं ॥ वायुनेवाग्नयो युष्मान् । धक्ष्यंति किल काष्टवत् ॥ ४४ ॥ भीष्मकृपद्रोणपांडु–विदु-
रप्रमुखैर्नृपैः ॥ जयप्रतिश्रुतिनिभं । वचः प्रोचे तदा शुभं ॥ ४६ ॥ तद्वाक्यैरिव तोयेन । त-
प्ततैलमिवाधिकं ॥ जज्वाल क्रोधजो वह्नि–र्दुर्योधनहृदंतरा ॥ ४७ ॥

अथावधीरितस्तेन । हरिदूतोऽत्यमर्षणः ॥ धार्त्तराष्ट्रा अद्य नष्टा । उच्चरन्निति निर्ययौ ॥
॥ ४८ ॥ स दूतः शीघ्रमागत्य । तत्कृष्णाय न्यवेदयत् ॥ द्रष्टातिमुदिता भीम–मुखाश्च न-
नृतुर्घनं ॥ ४९ ॥ रणरंगाजिरप्रौढ–तांडवा अथ पांडवाः ॥ समुद्रविजयादेशा–द्दलवंधमिति
व्यधुः ॥ ५० ॥ यादवा मत्स्यराट् धृष्ट–द्युम्नसात्यकिद्रौपदाः ॥ सौभद्रेयमुखा आसन् । पांड-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वानां बले नृपाः ॥ ५१ ॥ पुत्रः पार्थस्याभिमन्यु–र्भीमस्य च घटोत्कचः ॥ परेषामपि त-
त्रैयुः । पुत्राः क्षात्रव्रतोज्ज्वलाः ॥ ५२ ॥ इंद्रश्चंद्रो मणिचूड–श्चंद्रापीडो वियद्गतिः ॥ चित्रां-
गदश्च पार्थस्य । स्नेहादेयुः खगामिनः ॥ ५३ ॥ पार्थः कर्णं सोऽपि पार्थ–मन्योऽन्यवधकांक्ष-
या ॥ वव्राते भूपपर्षत्सु । समत्सरतया पणं ॥ ५४ ॥ इतः कर्णादिभिः प्रेर्य–माणो दुर्योध-
नो नृपः ॥ दूतेनाजूहवद्भूपान् । स्वगृहान् रणकांक्षया ॥ ५५ ॥ भूरिश्रवा भगदत्तः । शल्यः
शकुनिरंगराट् ॥ भीष्मः कृपागुरुः सोम–दत्तवाल्हीकशुक्रयः ॥ ५६ ॥ सौबलः कृतवर्माथ ।
वृषसेनो हलायुधः ॥ उलूकप्रमुखा भूपा । धार्त्तराष्ट्रदलेऽमिलन् ॥ ५७ ॥ विज्ञाय विदुरो गो-
त्र–कदर्थनमुपागतं ॥ वैराग्याद्व्रतमादाय । ययौ वननिकेतनं ॥ ५८ ॥ कर्णः कुंत्या स्वपुत्र-
त्वं । ज्ञापितोऽपि जगाविति ॥ पूर्वं मया निजप्राणा । दत्ता दुर्योधनाय यत् ॥ ५९ ॥ परि-
हृत्य ततस्तं चे–दन्यं मातर्भजाम्यहं ॥ लज्जसे त्वमेवाद्या–वकीर्णत्वे स्थिते मयि ॥ ६० ॥
इति कर्णगिरा कुंती । कुंतैरिव निपीडिता ॥ अर्वाक् पांडुसुतेभ्योऽस्मिन् । जयमीहत व-
त्सला ॥ ६१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इतश्च यवनद्वीपा–द्भांमान्यादाय केचन ॥ वणिजो द्वारिकामीयु–र्विक्रीणंतेस्म तानि च ॥ ६२ ॥ लिप्सवोऽधिकं लाभं । वणिजो रत्नकंबलान् ॥ आदाय मगधेशस्य पुरं। राजगृहं ययुः ॥ ६३ ॥ जरासंधसुतां जीव–यशसं मूल्यहानितः ॥ गृह्णंतीं तत्र वणिजः । क्रुधा तामिति चुक्रुशुः ॥ ६४ ॥ किमस्मान्निरिहानीता । एते त्यक्त्वा हरेः पुरीं ॥ दूरतोऽस्तु महालाभो । मूलनाशोऽत्र नः खलु ॥ ६५ ॥ इति श्रुत्वा जीवयशाः । का नाम द्वारिका पुरी ॥ तत्र कोऽस्ति महीनेता । पुनः पप्रच्छ तानिति ॥ ६६ ॥ प्राहुस्ते पश्चिमांभोधे–स्तीरे धनदनिर्मिता ॥ द्वारिकेत्यस्ति नगरी । नगारिनगरीनिभा ॥ ६७ ॥ तत्र यादववंश्योऽस्ति । वसुदेवनृपप्रसूः ॥ कृष्ण उष्णकराकार–प्रतापाधार ईशिता ॥ ६८ ॥ तन्नामश्रवणादेव । संजातार्तिज्वरातुरा ॥ रुदंती सा जरासंध–सन्निधौ प्रार्थयन्मृतिं ॥ ६९ ॥ जगाद नृपो मा रोदीः । पुत्रि कंसारियोऽचितः ॥ रोदयिष्ये मदज्ञान–वशादेषोऽस्ति जीवितः ॥ ७० ॥ इत्युक्त्वा सिंहनादेन । सभं भंभामवादयत् ॥ जरासंधः सत्यसंधी–न्नवन्नाजूहवन्नृपान् ॥ ७१ ॥ महौजसस्तमन्वीयुः । सहदेवादयः सुताः ॥ चेदिराजः शिशुपालः । स्वर्णनाभश्च रुक्मिरा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



टू ॥ ७२ ॥ अन्येऽपि बहवो नृपाः । सामंताश्च सहस्रशः ॥ जरासंधं समापेतुः । प्रवाहा इव सागरं ॥ ७३ ॥ जरासंधोऽप्यदुर्बोध—क्रोधयोधसमन्वितः ॥ प्रयाणमकरोच्छत्रु—प्राणनिर्वाणकारणं ॥ ७४ ॥ मंत्रिभिश्चाप्यशकुनै—र्वार्यमाणोऽपि भूरिशः ॥ स चचालार्धचक्रेशो । भूचक्रं कंपयन् बलैः ॥ ७५ ॥ समायांतं जरासंधं । नारदः कलिकौतुकी ॥ आख्यच्चराश्च कृष्णाय । सतृष्णाय रणाय ते ॥ ७६ ॥ कृष्णवर्त्मेव कृष्णोऽपि । तेजसामेकमास्पदं ॥ अवादयत्प्रयाणाय । भंभां नृपाश्च तेऽमिलन् ॥ ७७ ॥

समुद्रविजयस्तेषु । समुद्र इव दुर्धरः ॥ तत्रागात्सर्वसन्नाही । तस्यैते तनया अपि॥७८॥ महानेमिः सत्यनेमि—र्दृढनेमिसुनेमिनौ ॥ अरिष्टनेमिर्भगवान् । जयसेनो महीजयः ॥७९॥ तेजसेनो जयो मेघ—श्चित्रको गौतमोऽपि च॥ श्वफल्कः शिवनंदश्च । विश्वक्सेनो महारथः॥ ॥ ८० ॥ अक्षोभ्यो हिषदक्षोभ्यः । समुद्रविजयानुजः ॥ आययौ युधि धौरेया—स्तस्याष्टौ च सुता इमे ॥ ८१ ॥ उद्धवश्च धवश्चैव । क्षुभितोऽथ महोदधिः ॥ अंभोनिधिर्जलनिधि—र्वामदेवो दृढव्रतः ॥ ८२ ॥ स्तिमितोऽपि हि तत्रागा—त्पंचैते तत्सुतोत्तमाः ॥ सुर्मिमान् वसुमान्



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वीरः । पातालः स्थिर एव च ॥ ७३ ॥ सागरः षट् च तत्पुत्रा । निष्कंपः कंपनस्तथा ॥ ल-
क्ष्मीवान् केसरी श्रीमान् । युगांतश्च समाययुः ॥ ७४ ॥ आययौ हिमवांस्तत्र । तत्तनूजा-
स्त्रयोऽप्यमी ॥ विद्युत्प्रभस्तथा गंध-मादनो माल्यवानपि ॥ ७५ ॥ अचलोऽचलपुत्रास्तु ।
सप्ताजग्मुर्महौजसः ॥ महेंद्रो मलयः सह्यो । गिरिः शैलो नगो बलः ॥ ७६ ॥ पूरणः सून-
वस्तस्य । चत्वारश्च समाययुः ॥ दुःपुरो दुर्मुखश्चैव । दर्दुरो दुर्धरस्तथा ॥ ७७ ॥ धरणः पं-
च तत्पुत्राः । कर्कोटकधनंजयौ ॥ विश्वरूपः श्वेतमुखो । वासुकिश्च समाययुः ॥ ७८ ॥ आय-
यावभिचंद्रोऽपि । षट् च तस्य सुता इमे ॥ चंद्रः शशांकश्चंद्राभः । शशी सोमोऽमृतप्रभः ॥
॥ ७९ ॥ वसुदेवश्च तत्रागा-त्सुत्रामेव वरौजसा ॥ तत्सूनवश्च बहवो । दोष्मंतो नामतस्त्व-
मी ॥ ८० ॥ अक्रूरो वैरिषु क्रूरः । क्रूरोऽथ ज्वलनप्रभः ॥ वायुवेगोऽशनिवेगो । महेंद्रगति रे-
व च ॥८१॥ सिद्धार्थोऽमितगतिश्च । सुदारुर्दारुकस्तथा ॥ अनादृष्टिर्दृढमुष्टि र्हेममुष्टिः शिलायुधः
॥ ८२ ॥ जरत्कुमारवाल्हीकौ । गंधारः पिंगलस्तथा ॥ रोहिण्यास्तु सुतो रामः । सारणोऽथ
विदूरथः ॥ ८३ ॥ आपेतू रामतनया । उल्मुको निगधस्तथा ॥ चारुदत्तो ध्रुवः शत्रु-दमनः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पीठ एव च ॥ ९४ ॥ विष्णुपुत्राश्च बहवो । युयुत्सव उपाययुः ॥ भानुश्च भामरश्चैव । महाभान्वनुभानुकौ ॥ ९५ ॥ बृहद्ध्वजश्चाग्निशिखो । वृष्णुः संजय एव च ॥ अकंपनो महासेनो । धीरगंभीरगौतमाः ॥ ९६ ॥ सुधर्मोदधिसूर्याश्च । चंद्रधर्मौ प्रसेनजित् ॥ चारुकृष्णकभरताः । सुचारुर्देवदत्तवत् ॥ ९७ ॥ प्रद्युम्नशांबप्रमुखा । अपरेऽपि महौजसः ॥ उग्रसेनस्तत्सुताश्च । रामविष्णोश्च भूरिशः ॥ ९८ ॥

एवं पुत्रा दशार्हाणां । बहवश्च युयुत्सवः ॥ पितृस्वसृस्वसृसुता । अप्याजग्मुर्महाभुजाः ॥ ९९ ॥ ततः क्रोष्टुकिनाख्याते । दिने दारुकसारथिं ॥ तार्क्ष्यांकं रथमारूढः । सर्वैर्यदुभिरावृतः ॥ ४०० ॥ शुभैर्निमित्तैः शकुनैः । संसूचितजयोत्सवः ॥ प्रतिपूर्वोत्तरामाशां । प्रचचाल जनार्दनः ॥ १ ॥ युग्मं ॥ यदूनां पांडवानां च । चलतां सैन्यभारतः ॥ चकंपे काश्यपी कामं । कुलाचलचलत्वकृत् ॥ २ ॥ पंचचत्वारिंशतं तु । योजनानि निजात्पुरात् ॥ गत्वा तस्थौ शनिपल्ल्यां । ग्रामे संग्रामविद्धरिः ॥ ३ ॥ अर्वाग्जरासंधसैन्या—चतुर्भिर्योजनैः स्थिते ॥ तत्र कृष्णबले केचि—दागुर्विद्याधरोत्तमाः ॥ ४ ॥ समुद्रविजयं नत्वा । तेऽवोचन्नृपते वयं



For Private And Personal Use Only

माहा० ॥ ३०० ॥

॥ गुणगृह्यास्त्वदीयस्य । भ्रातुरानकदुंदुभेः ॥ ५ ॥ येषां कुलेऽरिष्टनेमि–र्जगदेकाक्रमो विभुः
॥ एतौ च रामगोविंदा–वद्वितीयपराक्रमौ ॥ ६ ॥ प्रद्युम्नशांबप्रमुखा । नप्तारोऽमी च को-
टिशः ॥ तेषां वो युधि साहाय्य–मन्येभ्यः कीदृशं ननु ॥ ७ ॥ [redacted] ॥ तथाप्यवसरं
ज्ञात्वा । स्वभक्त्या वयमागताः ॥ समादिश स्वसामंत–वर्गे गणयन् प्रभो ॥ ८ ॥ एवम-
स्त्विति तेनोक्ते । ते भूयोऽप्येवमूचिरे ॥ जरासंधस्तृणमसौ । केवलस्यापि शार्ङ्गिणः ॥ ९ ॥
वैताढ्याद्रौ जरासंध–गृह्या ये संति खेचराः ॥ इहायांति न यावत्ते । प्रति तांस्तावदादिश ॥
॥ १० ॥ सेनानीश्चायमस्माकं । वसुदेवोऽस्तु तेऽनुजः ॥ प्रद्युम्नशांबसहितः । सत्येवं ते जि-
ताः खलु ॥ ११ ॥ समुद्रविजयः कृष्ण–मापृछ्यानकदुंदुभिं ॥ प्रैषीत्प्रद्युम्नशांबौ च । तत-
स्तैः खेचरैः समं ॥ १२ ॥ तदा च वसुदेवाय । प्रददेऽरिष्टनेमिना ॥ जन्मस्नात्रे सुरैर्दोष्णि ।
बद्धौषध्यस्त्रवारिणी ॥ १३ ॥

अथ दुर्योधनो ज्ञात्वो–द्यतं यादवपांडवान् ॥ वधाय मगधाधीशं । नमस्कृत्य व्यजिज्ञ-
पत् ॥ १४ ॥ स्वामिन् केऽमी हि गोपालाः । पांडवा अपि के त्वमी ॥ सन्निरस्मान्निरस्त्रार्थे ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नयुक्तस्तव विक्रमः ॥ १५ ॥ अस्मानादिश तत्स्वामि—न्वधाऽपांडवयादवं ॥ कुर्महे विश्व-
मस्मेर—रिपुरंजोरुदारुणं ॥ १६ ॥ इत्याग्रहाज्जरासंधः । पट्टबंधनपूर्वकं ॥ तं न्ययुंक्त रिपौ
व्यक्त—शक्तिं सेनायुतं रणे ॥ १७ ॥ अथोडुरमहायोध—वृतो दुर्योधनः क्रमात् ॥ प्रयाणैः कै-
श्चिदप्याप । कुरुक्षेत्रमतिद्रुतं ॥ १८ ॥ गजांतर्द्वीपपत्त्यंबु—मानुषाश्वमहोर्मिभिः ॥ एकादशा-
क्षौहिणीभि—र्नदीभिरिव सोऽशुभत् ॥ १९ ॥

दुर्योधनोऽथ प्रपिता—महं भीष्मं नमन्मुदा ॥ चकार वीरकोटीरं । स्वसेनापतिमादरा-
त् ॥ २० ॥ अक्षौहिणीभिः सप्ताभि—र्युतास्ते पांडवा अपि ॥ चलंतोऽचलचालाय । कुरुक्षे-
त्रमुपाययुः ॥ २१ ॥ द्रौपदेयं ततः सर्वा—नुमतं पांडवा अपि ॥ चमूपत्वेऽभिषिषिचु—र्धृष्टद्यु-
म्नं महौजसं ॥ २२ ॥ निवृत्तोपायत्रितया । निर्णीतरणवासराः ॥ अथानर्चुर्महावीराः । श-
स्त्राणि क्षत्रदैवतं ॥ २३ ॥ अशुभन्मल्लिकामाला—मालितान्यायुधान्यपि ॥ स्वभर्तृषु यशोरा-
शिं । दातुं तत्रोद्यतानीव ॥ २४ ॥ नदंति निशि शस्त्राग्रे । रणतूर्याणि रेजिरे ॥ आयांतीनां
जयश्रीणां । नूपुराणां रवा इव ॥ २५ ॥ इतस्तेषां वीररस । इवालोहिततिग्मरुक् ॥ उद्ययौ



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





रिपुतामिस्र–परमाणून् हरन्नरं ॥ २६ ॥ वृक्षाग्रेषु खगा व्योम्नि । खगा अथ रवं व्यधुः ॥ वर्ध्यंतः सिंहनादं । वीराणां रणकांक्षिणां ॥ २७ ॥ सैन्ययो रणतूर्याणि । तदा नेदुः समंततः ॥ उच्चइविहयस्पर्द्धा–कारिणो वाजिनः पुनः ॥ २८ ॥ नदंतो वारणा रेजु–र्झरन्मदजलप्लुताः ॥ पर्यन्या इव वर्षासु । छिदूजवासकशोषिणः ॥ २९ ॥ निःस्वानकाहलाभेरी–तूर्यढक्काहुडुक्कैः। परयश्वेभरथारावै–रभून्नादमयं जगत् ॥ ३० ॥ सुवर्णरत्नवर्माणः । कृपाणस्थितपाणयः ॥ उल्लालयंतः फलकान् । प्रसस्रुः सर्वतो भटाः ॥ ३१ ॥ दुर्धरा ध्वानयंतोऽथ । धनुश्चेलुर्धनुर्धराः ॥ शर्वलाधारिणोऽभूवन् । सबलास्तत्पुरस्ततः ॥ ३२ ॥ संवर्मिणोऽब्धिकल्लोल–धर्मिणोऽथ हया रयात् ॥ प्रसस्रुस्त्यक्तमर्यादा–स्तूर्यध्वनिविनिद्रिणः ॥ ३३ ॥ गजा उत्तानशुंडाग्र–जाग्रदर्गलभीषणाः ॥ रणारंभकृतादभ्र–द्वेषाः सज्जा अथो ययुः ॥ ३४ ॥ शस्त्रैकसदना नेमि–स्पंदनिष्पिष्टभूतलाः ॥ स्यंदनाः प्राचलंस्तत्रा–चलयोधबलाकुलाः ॥ ३५ ॥ उच्छलंतिस्म पाथोधेः । पयांसि पृथुवेपनात् ॥ शुशिरेषु पादपाता–दिव सैन्यभरात्तदा ॥ ३६ ॥ रणरंगाजिरे वीरै–श्चलद्भिस्तूर्यनादतः ॥ नर्त्तयित्वा पादचारै–रारेभे सैन्ययो रणः ॥ ३७ ॥ 

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विन्नावरीनिन्ने रेणु—न्नरे स्फुरति सर्वतः ॥ खद्योतद्युतिधर्माणो—ऽन्नूवन् बाणमुखानि खे ॥
॥ ३८ ॥ निषादिन्निर्गजारूढाः । सादिन्निः सादिनो मिथः ॥ रथस्था रथिन्निः पत्ति—वृंदाः प-
त्तिन्निरास्फलन् ॥ ३९ ॥ संघट्टन्नाजां रोषेण । रदिनां च मिथो रदैः ॥ अन्योऽन्यमभ्रैर्योधा-
नां । पादचारैरन्नूद्रणः ॥ ४० ॥ योधा उदायुधाः क्रोधो—द्बोधाः संवर्मिणोऽरिषु ॥ दुःप्रेक्ष्या
जगतो जाताः । सहस्रांशुवडुज्ज्वलाः ॥ ४१ ॥ सनद्धा वाजिनो गत्यो—त्प्लुतंतो वद्भन्नस्वयः
॥ सपक्षा इत्यतर्क्यंत । रिपुन्निर्न्नयन्नंगुरैः ॥ ४२ ॥ नक्रंति सर्वशस्त्राणि । पर्वतंति च वार-
णाः ॥ कल्लोलंति हयास्तोय—मानुषंति च पत्तयः ॥ ४३ ॥ मकरंति रथास्तत्रो—द्वेले समर-
सागरे ॥ यानंति च विमानानि । हुंकृतैर्गर्जति स्फुटं ॥ ४४ ॥ युग्मं ॥

अथ प्रवृद्धमन्युः स—न्नन्निमन्यू रथस्थितः ॥ अविशद्रिपुसेनां तां । रविवत्तिमिरोत्करे ॥
॥ ४५ ॥ तस्मिन् बाणोत्करैः कोपा—दर्षत्युत्कर्षशालिनि ॥ रिपुदुर्न्निक्रमन्नव—त्तद्धीरत्वविना-
शनात् ॥ ४६ ॥ विस्फुरंतमिति प्रेक्ष्य । तं बृहद्बलराट्कृपौ ॥ अधावतां शरैर्व्योम—व्याप्नुवंतौ
रथस्थितौ ॥ ४७ ॥ अथो बृहद्बलमन्नि—ययावेर्जुननंदनः ॥ सहायत्वे च तस्यैव । प्राप कैके-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





यराट् कृपं ॥ ४८ ॥ चत्वारस्ते मिथो युद्ध–पराः सेनाचरैर्भटैः ॥ आलोकिरे बहिर्भूत्वा । भु-
वनस्यापिभीतिदाः ॥ ४९ ॥ मिथो विरथिनौ खड्ग–पाणी कैकेयराट्कृपौ ॥ उद्यत्फणाधरौ
सर्पा–विव विश्वक्षयक्षमौ ॥ ५० ॥ विजृंभिणस्तथा बाणै–रभिमन्योर्बृहद्बलः ॥ चिच्छेद केतु-
यंतारौ ॥ सारौजा रणसंकटे ॥ ५१ ॥ गर्जन्निष्ठुरनिर्घोषै–श्चक्रैर्भूमिं विदारयन् ॥ अथो भी-
ष्मरथो धर्म–सूनुसैन्यमयाऽऽयात् ॥ ५२ ॥ भीष्मे भीष्मरुषा बाणै–र्मंडपं व्योम्नि कुर्वति॥
अस्थिरा रिपुसेनाभू–न्नौरिवाब्दे विजृंभति ॥ ५३ ॥ क्रुद्धोऽभिमन्युरिषुभिः । सूतं दुर्मुखभूप-
तेः ॥ भीष्मकेतुं च सपदि । चिच्छेदाच्छादयन्नभः ॥ ५४ ॥ क्रुद्धेऽथ भीष्मे रथिनो । दश पां-
डवसैन्यतः ॥ रक्षितुं पार्थतनयं । परिवव्रुरुदायुधाः ॥ ५५ ॥ भीमोऽपि रथचित्कारैः । क्षोभ-
यन् भुवनं रणे ॥ अथाययौ भीष्मबाणै–श्छिन्नकेतुरमर्षणः ॥ ५६ ॥ आत्मयुग्यगजध्वस्त–
सूतस्यंदनवाजिने ॥ उत्तराय स्वर्णशक्ति–ममुचत् शल्यपार्थिवः ॥ ५७ ॥ सर्वायुधैर्निषिद्धा-
पि । निपत्योत्तरमूर्द्धनि ॥ जग्राह तदसून् शक्तिः । सुरोक्तिर्हि फलेग्रहिः ॥ ५८ ॥ कपिध्व-
जोऽथ कोपेन । कांडजालैरनर्गलैः ॥ वरूथिनीं विपक्षस्य । तिरयामास तीव्ररुट् ॥ ५९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दृष्ट्वार्जुनशरैः सेनां । दीनां कौरवजूपतेः ॥ जीष्मवीरव्रतो जीष्मो । दधावे ध्वानयन् धनुः ॥ ॥ ६० ॥ मार्गयंतो रिपुप्राणान् । प्राप्नुवंतोऽपि मार्गणाः ॥ स्वसिद्धं मार्गणत्वं हि । गांगेयस्य न तत्यजुः ॥ ६१ ॥ धृष्टद्युम्नोऽथ सेनानीः । प्रतिजीष्ममधावत ॥ क्षिप्तानेकजनप्राणस्तयोरासीन्महारणः ॥ ६२ ॥

अथाष्टमदिनप्रांते । पांडवा इत्यमंत्रयन् ॥ दुर्जयः सर्वथा जीष्मः । कथं वध्योऽरिसैन्यपः ॥ ६३ ॥ ततो जगाद गोविंदः । संधेयं स्वर्धुनीरुहः ॥ व्यस्त्रे षंढे स्त्रियां यन्न । प्रहर्त्तव्यं पराङ्मुखे ॥६४॥ षंढं शिखंडिनं पार्थ । द्रौपदेयं निजे रथे ॥ त्वमारोप्य व्यस्तहस्तं । प्रहरेस्तमशंकितः ॥ ६५ ॥ अंगीकृत्येति ते प्रातः । पुनः सनद्धसैनिकाः ॥ रणाजिरमगुः पांडु–पुत्राश्च धृतराष्ट्रजाः ॥ ६६ ॥ नासीरस्थस्तथैवेषु–व्रातैः शांतनुजोऽब्दवत् ॥ उपदुद्राव करकैः । सरजानिव पांडवान् ॥ ६७ ॥ स्वे रथे षंढमारोप्य । पार्थोऽपि निशितैः शरैः ॥ मंदमस्त्रविधौ जिष्मं । जर्जरांगमसूत्रयत् ॥ ६८ ॥ वर्ममर्मजिदो बाणाः । पार्थस्य न शिखंडिनः ॥ यंतारमित्यसौ जल्पन् । रथक्रोडे लुलोठ हा ॥ ६९ ॥ परिवव्रुस्ततः सर्वे । जीष्मं ग्रीष्मे



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सरो यथा ॥ तद्वोचोंबुपिपासार्त्ताः । शोकशोषमलग्रहाः ॥ ७० ॥ तृष्णार्त्तेऽथ नदीसूनौ । पा-
र्थो दिव्यास्त्रवित् शरैः ॥ चकर्षोर्ध्वं जलं श्वभ्रा–द्विवित्सर्वचित्रकृत् ॥ ७१ ॥ दर्शयित्वाथ त-
च्चित्रं । धार्त्तराष्ट्राय सोऽवदत् ॥ विधेहि पांम्वैः संधिं । त्वत्तोऽधिकपराक्रमैः ॥ ७२ ॥ अना-
कर्णितमासूत्र्य । तत्र क्रूरः स कौरवः ॥ कोपपाटलितं चक्षु–श्चिक्षेप पवनात्मजे ॥ ७३ ॥
अथ गीर्वाणवाणीभि–र्गंगाभूर्व्रतमग्रहीत् ॥ विमुक्तसर्वसावद्यो–ऽनशनाच्चाच्युतं ययौ ॥७४॥
स्वसैन्येऽभिषिषेचातो । द्रोणं स धृतराष्ट्रसूः ॥ प्रातस्तं च पुरस्कृत्य । कुरुक्षेत्रमवापतत् ॥
॥ ७५ ॥ सव्यसाची चकाराथ । तस्मै प्रणतिपूर्वकं ॥ गुरवे दक्षिणां दक्षो । धनुर्वेदं तदा त-
था ॥ ७६ ॥ तयोरथ शरव्रातैः । क्रमादात्मकरान् हरन् ॥ मिहिरो विरहोल्लालं । चक्रवाक-
कुलेऽकरोत् ॥ ७७ ॥ तदाहूतो बहिर्भूय । सैन्यात्संसप्तकाभिधान् ॥ प्रावर्त्तताऽर्जुनो योद्धुं ।
मृगानिव मृगाधिपः ॥ ७८ ॥ द्वादशेऽह्नि गजारूढो । भगदत्तोऽथ भीषणः ॥ उपद्रुताव कौं-
तेय–कटकं पार्थनिर्गमात् ॥ ७९ ॥ श्रुत्वात्मसैन्ये पार्थोऽपि । तत्क्षोभप्रभवं रवं ॥ मुक्त्वा
संसप्तकान् शीघ्रं । भगदत्तमयोधयत् ॥ ८० ॥ जघानामर्षणः पार्थ–श्चिरं युध्वाथ तं गजं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भगदत्तं च देवानां । प्रतीच्छन् पुष्पवर्षणं ॥ ७१ ॥ हते तस्मिन् हतत्राणा । कुरुसेना नृ-
पोक्तिभिः ॥ रजन्यां रचयामास । चक्रव्यूहमखंडितं ॥७२॥ संसप्तकान् कवलय-त्यथो पा-
र्थे वहिर्गते ॥ भीमादिभिरभिमन्यु-श्चक्रव्यूहं वृतोऽविशत् ॥ ७३ ॥ सुयोधनकृपद्रोण-राधे-
यकृतवर्मणां ॥ अस्त्राण्यवगणय्यौच्चै-र्ममाथ व्यूहमार्जुनिः ॥ ७४ ॥ सुयोधनादिभिर्भीमा-
दिषु रुद्धेषु संयुगे ॥ जयद्रथोऽभिमन्युश्च । युयुधाते मिथो भटौ ॥ ७५ ॥ आयसैरथ दिव्यै-
श्च । चिरं युध्वास्त्रसंचयैः ॥ अभिमन्युं निनायांतं । दिनांते स जयद्रथः ॥ ७६ ॥

क्रुद्धो जयद्रथवधं । प्रतिज्ञाय दिनावधि ॥ कपिध्वजोऽथ कोपेन । जगाहे रिपुवाहिनीं
॥ ७७ ॥ द्रोणादिभिस्ततो रुद्धः । कपिकेतुरमर्षणः ॥ शरासारैररिक्षेत्रे । व्यधाद्रुधिरकर्दमं ॥
॥ ७८ ॥ सत्यकिश्च मरुत्सूनुः । पार्थानुपदमीयतुः ॥ भीमं सुयोधनोऽरौत्सी-त्परं भूरिश्रवाः
पुनः ॥ ७९ ॥ जयद्रथं दिनांतेऽथ । प्राप्य शक्रतनूरुहः ॥ तैस्तैर्नृपतिभिर्गुप्तं । रोगराजमि-
वापरैः ॥ ८० ॥ षसामपि हि वीराणा-मस्त्रैस्तेषां सुपातिभिः ॥ प्रलयोभ्दवशंकाभू-द्विश्व-
स्यापि सुदुस्सहा ॥ ८१ ॥ सत्यकेर्वधनिष्णात-स्य भूरिश्रवसो भुजं ॥ चिच्छेद पार्थस्तं रो-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





षा—त्सत्यकिस्तु व्यसुं व्यधात् ॥ ए२ ॥ विरथ्यरथसारथ्यं । व्यस्त्रं कृत्वा जयद्रथं ॥ जघान पार्थो घस्रांते । स्वांते संधां स्मरन्निजां ॥ ए३ ॥ रणे चतुर्दशदिना—वधौ क्रयमुपाययुः ॥ धार्त्तराष्ट्रस्य सप्ताप्य—क्षौहिण्योऽक्षीणदुःखदाः ॥ ए४ ॥ रात्रियुद्धनिबद्धाशा—स्ततस्ते धार्त्त-राष्ट्रजाः ॥ सुप्तेषु पांडुपुत्रेषु । घूकपातमुपाययुः ॥ एए ॥ न्नीमसूर्न्नीमवन्नीमो । विविधास्त्रै-र्घटोत्कचः ॥ मायायुद्धैश्च युयुधे । तत्र वित्रासिताहितः ॥ ए६ ॥ कर्णोऽथ कुपितः कांडै—र-कांडकृतमंडपैः ॥ तिरयामास तत्सैन्यं । सोऽपि तान् गदयालुनात् ॥ ए७ ॥ देवदत्तां ततः श-क्तिं । स्फुर्जद्वह्निकणावृतां ॥ मुमोच शक्तिं राधेयः । प्राणानथ घटोत्कचः ॥ ए८ ॥ प्रा-तर्द्रोणोऽथ विद्राण—रणकर्मा कृतांतवत् ॥ विराटद्रुपदौ युध्ध्वा । देहांतरमलंन्नयत् ॥ एए ॥ म्लानेऽथ तपसः सूनु—सैन्ये निधनतस्तयोः ॥ स्थिरीकुर्वन् निजान् धृष्ट—द्युम्नो द्रोणं रुषाय-यौ ॥ ५०० ॥ पतन्नजं त्रसदश्वं । त्रस्यस्त्यंदनमेतयोः ॥ चिरं समरमालोक्य । दधुर्न्नीतिं ख-गा अपि ॥ १ ॥

इतो मालवन्नूजर्त्तु—रश्वत्थामा गजो हतः ॥ हतोऽश्वत्थामेत्यासीत् । सर्वत्र ध्वनिरद्भु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




ता ॥ २ ॥ मन्यमानो निजं पुत्रं । हतं श्रेणस्तया गिरा ॥ रणकर्मणि मंदोऽनूत् । किंकर्त्तव्यजडो गुरुः ॥ ३ ॥ विद्यावाग्र शरैर्वृष्ट–द्युम्नस्तं छलसद्दलः ॥ विधुरः सोऽप्यनशना–द्ब्रह्मलोकं ययौ गुरुः ॥ ४ ॥ स्वपितुर्हननं ज्ञात्वा–श्वत्थामा तु बलोद्धतः ॥ सेनां पांरुवन्नूनर्त्तु–रनाशयदिषुव्रजैः ॥ ५ ॥ नारायणीयं रोषाच्च । तद्वधायास्त्रमामुचत् ॥ तत् स्फुलिंगकणैः काष्टाः । पूरयद्द्युते दिवि ॥ ६ ॥ कृष्णोक्त्या विनयप्रह्वै–स्तदस्त्रं पांडवैरथ ॥ निन्ये विफलतां तूर्यं । विनयात्किं न सिध्यति ॥ ७ ॥ इत्थं महारणे तस्मिन् । द्वादशप्रहरायुषि ॥ बहवः क्षयमासेदुः । क्षयं च बहवः परे ॥ ८ ॥ ततोऽभिषिच्यत क्षिप्रं । सेनानीत्वेंगनूपतिः ॥ धार्त्तराष्ट्रैर्बलवती । ह्याशा सर्वशरीरिणां ॥ ९ ॥ पुरस्कृत्य ततः सर्वे । कर्णमन्न्यर्णपौरुषं॥ गांधारेया रणमयु–र्युयुत्सव नदायुधाः ॥ १० ॥ संफेटः सैन्ययोर्जज्ञे । प्रोच्छलच्छस्त्रदंतुरः ॥ डुस्सहः सर्वजंतूनां । दुर्नेदश्च परस्परं ॥ ११ ॥ कर्णान्यर्णात्तकोदंरुः । कर्णोऽर्णवसमध्वनिः ॥ पपात वातवित्रस्त–समस्तरिपुरादितः ॥ १२ ॥ विष्वगूर्ध्वमधो यद्व–दुष्णांशुस्तारयेत्करान् ॥ तदासीत्तत्तनूजोऽपि । तथारिषु शरान् क्षिपन् ॥ १३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पार्थकर्णावथान्योऽन्यं । समानभुजक्रमौ ॥ युयुधाते शरैरस्त्रै–रिवार्कौ प्रलयोदितौ ॥
॥ १४ ॥ दुःशासनमरौत्सीच्च । भीमः पूर्वरुषेरितः ॥ निपात्य च भुवः पृष्ठे । तद्भुजावुदपा-
टयत् ॥ १५ ॥ वीक्ष्येव भास्करो भूमिं । रक्तां दुःशासनासृजा ॥ तन्वन् द्यामपि तद्वर्णां ।
। वारुणीं दिशमाश्रयत् ॥ १६ ॥ प्रातः पार्थवधापेक्षी । राधेयः शल्यसारथिः ॥ शंखस्वन-
मिषाद्गर्जन् । रणाजिरमवासवान ॥ १७ ॥ विहायसि दिशि क्ष्मायां । परितः प्राणिवर्गिषु ॥
अलक्ष्यंत तयोर्बाणा । वार्षुकाब्दकणा इव ॥ १८ ॥ पार्थो गारुडशस्त्रेण । कर्णमुक्तसरीसृ-
पान् ॥ न्यवारयत्पराण्येवं । प्रत्यस्त्रैः सर्वमंत्रवित् ॥ १९ ॥ पूर्वोपकारसंक्रीत–पन्नगें-
द्रसहायिना ॥ धनंजयो न्यहन् कर्ण–मर्णवाभ्यर्णगे रवौ ॥ २० ॥ पुनः प्रातः पुरस्कृत्य । से-
नानीं शल्यमाजये ॥ मंदोत्साहा अपि ययु–र्धृतराष्ट्रतनूरुहाः ॥ २१ ॥ मुंचत्यरिमनःशल्ये।
शरान् शल्ये समंततः ॥ एको युधि स्थिरो जज्ञे । तत्रैकः स युधिष्ठिरः ॥ २२ ॥ सहदेवो-
ऽपि संक्रुद्धः । संक्रुद्धं शकुनिमितं॥ रुरोध शरसंघातैः । पूरयन् गगनार्णवं ॥ २३ ॥ उत्तरस्य
स्मरन् शल्यं। शक्त्या सफलया क्रुधा ॥ जघान तपसः सूनु–र्वैरिग्राही हि वीररुट् ॥ २४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वकर्मलज्जितो भीरु–स्तदास्तं कर्मसाक्षिणि ॥ गते सुयोधनो नंष्ट्वा । सरोंतः प्राविशत्कुधीः
॥ २५ ॥ अश्वत्थामा कृतवर्मा । कृपो दौर्योधनीं गतिं ॥ पश्यंतः पदवीं दृष्ट्वा । ययुस्तत्सरसि
द्रुतं ॥ २६ ॥ यावत्तत्र स्थितं दुर्यो–धनमेते बभाषिरे ॥ तावत्तत्पृष्ठगाः पांडु–पुत्रा अपि स-
माययुः ॥ २७ ॥ एकया तत्सरोऽप्येते–ऽक्षौहिण्या क्षोभितारयः ॥ संवेष्ट्य तमिति प्रोचु–
रुच्चैरंभस्तिरोहितं ॥ २८ ॥ न युक्तं तव वीरेंद्र । दुर्योधन पलायनं ॥ पूर्वकीर्त्तिगुणक्षात्र–प-
लायनमिदं ननु ॥ २९ ॥ किं चात्र शक्यते स्थातुं । रुष्टे सम्यक् किरीटिनि ॥ यः शोषयि-
तुमीशोऽस्ति । विद्यास्त्रैरपि वारिधिं ॥ ३० ॥ नालं चेत्सकलैर्योद्धुं । तदेकेनैव केनचित् ॥ यु-
द्धस्वेप्सितयुद्धेन । बुधस्व मनसि स्वयं ॥ ३१ ॥

श्रुत्वेति व्याजहाराथ । मनस्वी धृतराष्ट्रसूः ॥ गदायुद्धेन योत्स्येऽहं । सह भीमेन दो-
षमता ॥ ३२ ॥ अंगीकुर्वद्भिरेतैस्त–त्सरसः शीघ्रमेव सः ॥ प्रादुरासीज्जलचर–सत्ववज्जयकां-
क्षया ॥ ३३ ॥ सज्जीभूय स्थितेषूच्चै–रपरेषु युधि मारुतिः ॥ दुर्योधनश्च सगदौ । मिथो रो-
षादधावतां ॥ ३४ ॥ तौ वंचयंतौ सुचिरं । गदाघातं परस्परं ॥ द्युसदामपि दुःप्रेक्ष्यौ । जा-

॥ ७११ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तौ ताम्राननौ रुषा ॥ ३५ ॥ उत्प्लुतिप्रवणं भीमो । गदया पादयो रुषा ॥ दुर्योधनं निहत्योच्चै–रलोठयदिलातले ॥ ३६ ॥ पतितस्यापि तस्याग्र । मौलिं मारुतिरंह्रिभिः ॥ अचूरयद्बलवर–श्चित्ते रोषमवाप च ॥ ३७ ॥ ज्ञातेयशंकितः किंतु । चित्ते कोपपरो हली ॥ मुक्त्वा तथैव कौंतेया–नवमन्य च निर्ययौ ॥ ३८ ॥ तेऽपि स्वबलरक्षायै । धृष्टद्युम्नशिखंडिनौ ॥ नियुज्य कृष्णानुगता । ययुः सांत्वयितुं बलं ॥ ३९ ॥ कृतवर्मकृपाचार्या–श्वत्थामानस्त्रयोऽप्यमी ॥ तावत्सुयोधनं द्रष्टुं । रणक्षेत्रमुपाययुः ॥ ४० ॥ तथावस्थं च तं वीक्ष्य । निंदंतः स्वं नृपं जगुः ॥ प्रसीदादिश नो येना–द्यापि हन्मो हि पांडवान् ॥ ४१ ॥ पांडवान् हन्म इत्येषां । वचसाप्युत्सवन्मनाः ॥ स्पृशंस्तान्पाणिना भूप–स्तद्वधाय निसृष्टवान् ॥ ४२ ॥ तेऽपि शून्ये बले गत्वा । धृष्टद्युम्नशिखंडिनौ ॥ चिराद्युध्ध्वा च हत्वा च । प्रजहुः पांडवात्मजान् ॥ ४३ ॥ तेषां शिरांसि चानीय । सुयोधनपुरोऽमुचत् ॥ सुयोधनोऽपि भ्रूणानां । मत्वा तानीत्यवोचत ॥ ४४ ॥ धिक् स्तनंधयमौलीनि । किमानीतानि मे पुरः ॥ भागधेयानि तादृंशि । न वा यैः पांडवक्षयः ॥ ४५ ॥ नश्वरन्निति दुःखार्त्तः । प्रापदंतं सुयोधनः ॥ कृपाद्या लज्जितास्तेऽपि



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





। क्वचिज्जग्मुः शुचाकुलाः ॥ ४६ ॥

इतोऽनुकूल्य न्नक्त्युक्तैः । सीरिणं पांडवा अपि ॥ प्राप्ताः स्वसैन्यं तनयान् । हतान् ज्ञात्वा शुचं दधुः ॥ ४७ ॥ तेषां च धार्त्तराष्ट्राणा—मन्येषां च पृथासुताः ॥ सरस्वतीनदीतीरे । प्रेतकार्याणि चक्रिरे ॥ ४८ ॥ इतो दुर्योधनं ज्ञात्वा । हतं मगधन्नूपतिः ॥ तदैव प्रज्वलत्क्रोधः । प्राहिणोत्सोमकं नृपं ॥ ४९ ॥ सोऽपि पांडुसुतैर्युक्तं । समुद्रविजयं नृपं ॥ एत्याचख्यौ जरासंध—वाचिकं धीरगीरिति ॥ ५० ॥ यद्वतो मत्सखा पांडु—पुत्रैर्दुर्योधनो नृपः ॥ युष्मद्बलाद्गृशं तेन । द्वये कंसवधादपि ॥ ५१ ॥ तत्सांप्रतं च मे देहि । रामकृष्णौ च पांडवान् ॥ नो चेदायत एवास्मि । रणधुर्यो न्नव ध्रुवं ॥ ५२ ॥ जरासंधोक्तमित्येष । न्नचरन् रोषपोषितं ॥ धिक्कृतो रामकृष्णाच्यां । तन्नत्वाख्यत्स्वन्नूभुजे ॥ ५३ ॥

इतश्च हंसको मंत्री । जरासंधं जगाविति ॥ न्नत्साहप्रभुशक्त्योर्हि । मंत्रशक्तिर्बलीयसी ॥ ५४ ॥ अमंत्रात्कंसकालाद्याः । प्रापुस्तं तं पराज्ञवं ॥ अतो मंत्रधुरीणानां । संपदः स्युः पदे पदे ॥ ५५ ॥ अधुनोदयन्नाजोऽमी । यादवाः सर्वथैव हि ॥ स्वामिना च पुरा दृष्ट—स्तेषां ॥ ७१३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तादृक् पराक्रमः ॥ ५६ ॥ रामकृष्णौ च तस्मात्तौ । जातौ सर्वोत्तरौजसौ ॥ तत्पुत्रौ च म-
हावीरौ । प्रद्युम्नशांबौ तथापरे ॥ ५७ ॥ तत्कुले नेमिरेको य–स्त्रैलोक्यविजयक्रमः ॥ युयुत्स-
ते हि कस्तेन । नेतन त्रिदशाधिपैः ॥ ५८ ॥ तत्तादृग्विक्रमाधाराः । पांडवा अपि तद्बले ॥ म-
हानेमिस्तु तेष्वेको । ग्रहेष्विव दिवाकरः ॥ ५९ ॥ एवं कालबलं ज्ञात्वा । शत्रूणामुन्नतिं च
तां । न योद्धुं युज्यते स्वामिन् । सहसा महसः क्षयात् ॥ ६० ॥ इत्यस्य वचसा दीप्त–को-
पो राजारुणेक्षणः ॥ जगाद यदुभिर्मूढ । भेदितोऽस्ति ध्रुवं भवान् ॥ ६१ ॥ तव मंत्रैः सहा-
मीषां । गोपालानां बलं रणे ॥ हत्वा स्वदुहितुः संधां पूरयिष्येऽद्य मंत्रिक ॥ ६२ ॥ इत्यु-
क्त्वा मंत्रिभिर्भूप–श्चक्रव्यूहमकारयत् ॥ प्रातर्यदूंश्च समरे । शनिपल्ल्यां न्यमंत्रयत् ॥ ६३ ॥
जरासंधः स्वयं पट्ट–बंधपूर्वं निजे बले ॥ हिरण्यनाभं सेनानीं । चकाराखिलसम्मतं ॥ ६४ ॥
गरुडव्यूहमासूत्र्य । प्रातस्ते यादवा अपि ॥ सुनिमित्तधृतोत्साहाः । समराजिरमासदन्
॥ ६५ ॥ समुद्रविजयोऽथात्म–बले बलवतां प्रभुं ॥ सेनानीत्वे ह्यनादृष्टि–मभ्यषेचयदुत्सवैः
॥ ६६ ॥ द्योतयंतं रुचाकाशं । रथं मातलिरप्यथ ॥ आनिनायेंद्रनिर्देशा–न्नेमिस्तं च समाश्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





यत् ॥ ६७ ॥ परस्परास्त्रसंघट्ट—स्फुरद्वह्निकणोल्बणौ ॥ तावथामिलतां व्यूहौ । प्रलयेऽद्री इ-
वापरौ ॥ ६८ ॥ तेषां तूर्यरवैर्वाजि—हेषितै रथचीत्कृतैः ॥ भटक्ष्वेडाभिरासीच्च । जगदप्य-
तिभंगुरं ॥ ६९ ॥ चक्रव्यूहाग्रगैर्वीरै—र्नृपहुंकारभर्त्सितैः ॥ अथाभज्यंत कृष्णस्य । सैनिकाः
प्रथमे रणे ॥ ७० ॥ अवामवामपक्षाभ्यां । महानेमिधनंजयौ ॥ व्यूहस्य मुखतस्तद्ध—दना-
दृष्टिरधावत ॥ ७१ ॥ सिंहनादं महानेमि—र्देवदत्तं च फाल्गुनः ॥ बलाहकमनादृष्टि—र्दध्मौ
शंखं महाध्वनिं ॥ ७२ ॥ तेषां शंखस्वनैर्धन्व—कैंकारैरथचीत्कृतैः ॥ शरोत्करैश्च शत्रूणां । सै-
न्यं दैन्यं परं ययौ ॥ ७३ ॥ तैस्त्रिभिर्विभिदे कोपा—त्रिषु स्थानेषु वैरिणां ॥ व्यूहस्तन्मार्गगा
वीरा—स्तदंतश्चाविशन् घनाः ॥ ७४ ॥

अथो रुक्मी महानेमिं । शिशुपालो धनंजयं ॥ हिरण्यनाभोऽनादृष्टिं । योद्धुं क्रोधाद-
धावत ॥ ७५ ॥ षण्णामपि मिथस्तेषां । विविधायुधवर्षिणां ॥ समरः सोऽमरैरप्य—सह्योऽभू-
दतिभीषणः ॥ ॥ ७६ ॥ न स सादी निषादी न । न पदाती रथी न च ॥ महानेमेः शरा
यत्र । न विशश्रमुरुन्नताः ॥ ७७ ॥ महानेमिशरैर्व्याप्तं । रुक्मिणं रक्षितुं नृपाः ॥ वेणुदारि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मुखाः सप्त । जरासंधाज्ञया ययुः ॥ ७८ ॥ महानेमिः शरैस्तेषा–मष्टानामपि सायकान् ॥
चिच्छेद लघुहस्तत्वा–ज्ज्योतींषीव विभाकरः ॥ ७९ ॥ वरुणासामथो शक्तिं । रुक्मी शैवेय-
संहतौ ॥ मुमोच व्यंतराः क्रूरा । व्यजृंभन्त तदग्रतः ॥ ८० ॥ अरिष्टनेमेरादेश–मथासाद्य स
मातलिः ॥ महानेमेः शरे वज्रं । समक्रमयदाशु च ॥ ८१ ॥ तद्वज्रशरघातेन । महानेमि-
र्न्यपातयत् ॥ शक्तिं तां रुक्मिणं चाले । जघानान्येन चेषुणा ॥ ८२ ॥ पतंतं वेणुदारी तं ।
क्षिप्त्वा स्वे स्यंदने ययौ ॥ सप्ताप्यन्ये च भूपाला । दुद्रुवुर्भयभंगुराः ॥ ८३ ॥ न्यहन् समु-
द्रविजयो । द्रुमं च स्तिमितो नृपं ॥ भद्रकंठं सुसेनं च । क्षोभ्योऽक्षोभ्यपराक्रमः ॥ ८४ ॥
एवं यादववीरैर्है–र्जरासंधस्य भूभुजः ॥ समरे जघ्निरे क्रुद्धै–र्बहवो बलशालिनः ॥८५॥
अपि तीव्रकरो वीर–तीव्रतामसहः किमु ॥ जगाम पश्चिमांभोधिं । सैनिकाश्च निजाश्रयं ॥
॥ ८६ ॥ प्रातर्हिरण्यनाभोऽथ । महारथिनृपैर्वृतः ॥ जगाहे यादवीं सेनां । नदीमिव महा-
द्विपः ॥ ८७ ॥ अधावतामथ क्रुद्धौ । जयसेनमहीजयौ ॥ नभोनभस्याविव तौ ॥ शरधा-
राभिवर्षिणौ ॥ ८८ ॥ महायुद्धमभूत्तेषा–मस्त्रैर्दिव्यैस्तथायसैः ॥ त्रिजगन्नाथशंकाभू–द्यथा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिविषदामपि ॥ ८९ ॥ क्रुद्धो हिरण्यनाम्नोऽथ । लब्ध्वावसरमात्मनः ॥ अवधीज्जयसेनं च
॥ महीजयमथाचिरात् ॥ ९० ॥ दृष्ट्वाथ तद्वधं क्रुद्धो-ऽनाधृष्टिः स्पष्टविक्रमः ॥ रथं रथ्यान्
सारथिं च । हिरण्यं च क्रमादहन् ॥ ९१ ॥ रथनेमिरथ श्रुत्वा । स्वबंधू निहतौ रुषा ॥ ए-
एकोनत्रिंशतिपुत्रान् । जरासंधस्य चावधीत् ॥ ९२ ॥ रथनेमिर्महौजस्वी । जरासंधस्य सू-
नृतः ॥ विलोड्य सकलां सेनां । ववले स्वबलंप्रति ॥ ९३ ॥ चकाराथ जरासंधः । प्रातः से-
नापतिं नृपं ॥ शिशुपालं प्रतिज्ञां च । रामकृष्णवधे स्वयं ॥ ९४ ॥ शिशुपालं पुरस्कृत्य ।
जरासंधचमूरथ ॥ यदून्निमंत्रयामास । रणसत्रे बुभुक्षितान् ॥ ९५ ॥ हंसकोक्त्या जरासंध।
उपलक्ष्य बलाच्युतौ ॥ प्रत्यप्रेरयदीर्ष्यालू-रथं नीतिप्रदोऽरिषु ॥ ९६ ॥ क्रुद्धं यममिवायातं।
तं वीक्ष्य बलसूनवः ॥ दशाधावंत रोषेण । वर्षतः शरधोरणीः ॥ ९७ ॥ विब्रुवन् शिशुपा-
लोऽपि । वीरंमन्यो निजं रथं ॥ निनाय कृष्णपुरतो । मुमोच च शरोत्करं ॥ ९८ ॥ मुकुटं
कवचं धन्व । सारथिं च रथं हयान् ॥ शिरोऽपि शिशुपालस्य । क्रमात्कृष्णोऽछिनद्रुषा ॥
॥ ९९ ॥ अथाष्टाविंशतिः पुत्रा । जरासंधस्य रोषिणः ॥ रामेण सहायुध्यंत । तदस्त्रैर्मृति-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मासदन् ॥ ६७० ॥

हत्वा रामसुतान् शेषा–ञ्जरासंधोऽपि नृपतिः ॥ जघान गदया रामं । मूर्ध्नि रामोऽप्य-
मूर्छत ॥ १ ॥ जिघांसुं तं पतंतं च । जरासंधं कपिध्वजः ॥ अंतरा योधयामास । सर्ववीर-
शिरोमणिः ॥ २ ॥ तथाभूतं विदन् रामं । रोषणो रुक्मिणीपतिः ॥ एकोनसप्ततिपुत्रान्। ज-
रासंधस्य चावधीत् ॥ ३ ॥अस्ताचलंप्रति गते । रवावथ रणाजिरात् ॥ स्वाम्यादेशगते सैन्ये
। तदापासरतां क्रमात् ॥ ४ ॥ मत्वाथ दुर्जयान् शत्रून् । हेतिभिर्मगधाधिपः ॥ स्वसिद्धाम-
मुचद्धात्रौ । जरामसुरसुंदरीं ॥ ५ ॥ विना रामं हरिं नेमिं । सा जरातिजरत्वकृत् ॥ संच-
क्रामाखिलांगेषु । कालरात्रिरिवापरा ॥ ६ ॥ विजृंभमाणया स्वैरं । तया सर्वत्र सा चमूः ॥
श्वदुच्छ्वासमात्राभू–त्सर्वथा भ्रष्टचेतना ॥ ७ ॥ अथ प्रातः प्रबुद्धः सन् । दृष्ट्वा तद्वच्चमूं नि-
जां ॥ खिन्नम्लानमना नेमिं । प्रोचे विष्णुः प्रतापभाक् ॥ ८ ॥ किमंग समभूत्सैन्ये । बंधो
नः कयसन्निभं ॥ बलस्तु घातविधुरः । संतोऽसंत इवापरे ॥ ९ ॥ नेत्रे इवावां हि परं । गते
देहे स्व उज्ज्वले ॥ ततः किं भाव्यथो हन्मि । त्वया शत्रून् सहायिना ॥ १० ॥ गलप्रियो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





रिपुस्त्वेष । निःशेषबलसंयुतः ॥ हतमात्मबलं हंतु-मेति तत्समरे नव ॥ ११ ॥ त्वद्दोर्दंडब-
लादेव । त्रैलोक्यं तन्मयं व्रजेत् ॥ इंद्रोपेंद्रादयश्चामी । त्वत्पुरः किंकरा इव ॥ १२ ॥ इति
श्रुत्वा हरेर्वाक्यं । विलोक्यावधिनापि च ॥ नेमिर्जगाददंतेंदु-द्युतिपापतमोहरः ॥ १३ ॥
शृणु श्रीकांत संभ्रांतो । रिपुस्ते विक्रमौजसा ॥ यन्मुमोच जरां तेन । तयायं विधुरो ज-
नः ॥ १४ ॥ सत्यं हंति नवान् शत्रू-नेकोऽपि रणसंकटे ॥ जरया परमेते तु । प्राणान् मो-
क्ष्यंति तच्छृणु ॥ १५ ॥ पाताले धरणेंद्रस्य । विद्यते देवतालये ॥ नविष्यत्पार्श्वनाथस्य । प्र-
तिमा महिमाधिका ॥ १६ ॥ आराध्य धरणेंद्रं त-मुपवासैस्त्रिभिस्त्र्यहं ॥ प्रतिमां तां च या-
चस्व । स ते दास्यति सेवितः ॥ १७ ॥ तस्याः पादांबुजस्नात्र-पयसा कृतसेचनं ॥ तव
सैन्यमिदं मोह-मुज्झित्वोत्थास्यति क्षणात् ॥ १८ ॥ कृष्णोऽप्युवाच तद्ध्यान-निरते मयि
कश्चमूं ॥ पास्यत्येनां जिनोऽप्याह । पाताहं शत्रुसंकटात् ॥ १९ ॥ श्रुत्वेति हर्षनाक् कृष्ण
-स्तदाराधनतत्परः ॥ बभूव विशदोमौन-ध्यानप्रक्षिप्तमानसः ॥ २० ॥

इतश्च स जरासंधः । समियाय सुविक्रमः ॥ चतुरंगचमूयुक्त-स्तद्बलं च तथा विदन्



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ २१ ॥ नन्नोमंरूपमातन्वन् । रविर्भाह्लादयन् सुखं ॥ बाणवृष्टिं व्यधात्सोऽत्र । धाराधर इ-
वापरः ॥ २२ ॥ अथ नेमिनिदेशेन । मातलिः स्वबलान्वितः ॥ वात्यावर्त्तमिव स्वैरं । भ्राम-
यामास स्यंदनं ॥ २३ ॥ अपूरयन्महाशंखं । त्रिजगद्व्यापिनिःस्वनं ॥ शार्ङ्गीयं च चकर्षोच्चै-
र्धनू रौद्रवं विभुः ॥ २४ ॥ सर्वतोऽपि मुमोचोच्चैः । शरान् संख्यातिगान् लघु ॥ रिपवः
सर्वतस्तं चा-पश्यन् सर्वमयं यथा ॥ २५ ॥ तद्ध्यावर्त्ततद्बाण-धोरणीर्जंतुमक्रमाः ॥ दूरे
तस्थुर्नृपाः सर्वे । तद्गणे साक्षिणो यथा ॥ २६ ॥ चिच्छेद कवचेष्वास-मुकुटध्वजसायकान् ॥
नृपाणां भगवान् प्राणान् । नाहरत्स दयामयः ॥ २७ ॥ इतो ध्याननिलीनस्य । कृष्णस्य
पुरतोऽभवत् ॥ पद्मावती तृतीयेऽह्नि । प्रभापुंजांतरस्थिता ॥ २८ ॥ वीक्ष्य तां पुरतः कृष्णः ।
सुरीगणसमन्वितां ॥ प्रणम्य भक्तिमान् प्राह । स्तुतिपूर्वमिदं वचः ॥ २९ ॥ धन्योऽद्याहं कृ-
तार्थोऽस्मि । पवित्रोऽद्यास्मि पावने ॥ अद्य मे सफलाः कामा । यदद्भूदर्शनं तव ॥ ३० ॥
वर्णयामि कियद्देवि । वैभवं ते स्वजिह्वया ॥ शक्रादयोऽपि यद्वक्तुं । सम्यग्नो विबुधाधिपाः
॥ ३१ ॥ इति भक्तिवचःप्रीता । प्राह सा परमेश्वरी ॥ यत्कृते संस्मृता कृष्ण । भवताहं त-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दुच्यतां ॥ ३२ ॥ अवोचदच्युतः श्रुत्वा । तद्वचः परमेश्वरि ॥ यदि तुष्टासि तेद्देहि । पार्श्वा-
र्हद्बिंबमद्भुतं ॥ ३३ ॥ यश्चैतज्जरया ग्रस्तं । सैन्यं तत्स्नात्रवारिभिः ॥ सज्जीभूय रिपून् हंति ।
सदा त्वां पूजयत्यपि ॥ ३४ ॥ अथो पद्मावती प्राह । कृष्ण सार्चात्र न व्रजेत् ॥ तां विनेदं
भवत्सैन्यं । सचैतन्यं करोम्यहं ॥ ३५ ॥ अथैनं ते रिपुं हन्मि । जरासंधं ससैनिकं ॥ ब-
द्ध्वाथ पुरतस्तेऽमुं । क्षणादेव समानये ॥ ३६ ॥ यद्यद्वदसि तत्सर्वं । करोमि भवदीप्सितं
॥ न पुनः प्रतिमामत्र । समानेतुं समुत्सहे ॥ ३७ ॥ ततः कृष्णोऽवदद्देवि । त्वयैतत्सकलं भ-
वेत् ॥ इह्वं कृते न चास्माकं । पौरुषं किंचिदीक्ष्यते ॥ ३८ ॥ ततो यदि प्रसन्नासि । तत्ता-
मर्चां ददस्व मे ॥ प्रसादात्ते यथा हन्मि । स्वयमेष रिपून् रणे ॥ ३९ ॥ इत्यत्याग्रहतो वि-
ष्णो-र्भक्त्या पद्मावती ततः ॥ स्मृत्वार्चां तां समानीय । दत्वास्मै तु तिरोदधे ॥ ४० ॥

अथाच्युतोऽर्चाचरण-च्युतस्नात्रजलेन सः ॥ आसिंचत्सैन्यमखिलं । तदुत्तस्थौ च तत्क्ष-
णात् ॥ ४१ ॥ पांचजन्यं तथा दध्मौ । सहर्षो रुक्मिणीपतिः ॥ तन्नादाकर्णतो जातो । नि-
र्घातो वैरिणां यथा ॥ ४२ ॥ ततो लक्षं नृपान् जित्वा । जरासंधं जिनोऽमुचत् ॥ प्रतिविष्णु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विष्णुनैव । वध्य इत्यनुपालयन् ॥ ४३ ॥ जातेऽथ सकले सैन्ये । रणसज्जे जिनेश्वरः ॥ वि-
रराम रणात्सैन्य–रक्षायै केवलं स्थितः ॥ ४४ ॥ तद्व्यग्राममवधूयाथ । लांगली धृतलांगलः ॥
बहुशश्चूर्णयामास । मुशलेन रिपुव्रजान् ॥ ४५ ॥ जरासंधोऽथ रोषांधः । प्रतिकृष्णं निजं
रथं ॥ अचालयज्जरासारैः । कुर्वन् वैरिषु दुर्दिनं ॥ ४६ ॥ कृष्णवर्त्मेव कृष्णोऽपि । वैरिकाष्ठे-
षु दुस्सहः ॥ आस्पदं तेजसामेकं । दधावे स्यंदनस्थितः ॥ ४७ ॥ तयोः स्यंदनयोश्चक्र–पिष्टा
न्नः कणशोऽभवत् ॥ गतागतैश्च विश्वेऽपि । प्रक्षोभो रणधुर्ययोः ॥ ४८ ॥ आयसैरायसान्य-
स्त्रै–र्दिव्यैर्दिव्यानि तौ मिथः ॥ अस्त्राणि जघ्नतुर्वीरौ । भयाद् दृष्टौ सुरैरपि ॥ ४९ ॥ प्रक्षी-
णास्त्रोऽथ चक्रस्य । जरासंधोऽस्मरद्रुषा ॥ तच्च वह्निकणाकीर्णं । तत्पाणौ द्रुतमागमत् ॥
॥ ५० ॥ गोप गर्वं विमुच्याद्या–प्याज्ञां मन्यस्व मेऽधुना ॥ जीवन् पुनः स्वकर्म त्वं । ल-
प्स्यसे चारणं गवां ॥ ५१ ॥ न चेच्चक्रमिदं कृष्ण । मूर्धानं तव नेत्स्यति ॥ विब्रुवाणं जरा-
संध–मिति तं प्राह माधवः ॥ ५२ ॥ कृष्णः ॥ हत्वा तां गामहं सत्यं । पातास्मि निजकर्म-
तः ॥ मुंच चक्रं जरासंध । चिरयस्यधुना कथं ॥५३॥ जरासंधोऽपि रोषेण । भ्रमयित्वा विहा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यसि ॥ चक्रं मुमोच कल्पांत–वह्निवन्नीतिदायकं ॥ ५४ ॥ तच्च प्रदक्षिणीकृत्य । कृष्णं कृष्णकरे ययौ ॥ स्वमर्द्धचक्रिणं जानन् । कृष्णस्तद्रिपवेऽमुचत् ॥ ५५ ॥ चक्रकृत्तगलनाल आपत–भूतले मगधभूपतिर्द्रुतं ॥ प्राप च प्रचुरकर्मभारित–स्तुर्यनारकसखित्वमाकुलः ॥ ५६ ॥ विष्णुरेष नवमोनवमौजो–विभ्रदभ्रविशदोच्चसुकीर्त्तिः ॥ उच्चरंत इति नाकिगणा द्राक् । कृष्णमूर्ध्नि ववृषुः कुसुमौघं ॥ ५७ ॥ अथो जरासंधसुताः समेत्य । नेमुर्मुकुंदं सहदेवमुख्याः ॥ संभावयंस्तानपि स प्रमोदा–दस्थापयद्राजग्रहे पुरे तु ॥ ५८ ॥ कृष्णोऽत्र वामेयजिनस्य मूर्त्ति–ममेयभक्तिर्यदुभिः प्रणुन्नः ॥ अस्थापयत्तत्र निजां च मूर्त्तिं । तन्नासने तच्च पुरं चकार ॥ ५९ ॥

श्रीशंखेश्वरपार्श्वबिंबममलं संपूज्यसंपूजितं । प्रीत्या यादवनायका बहुतरां भक्तिं निजे मानसे ॥ संमातुं ह्यनलं भविष्णव इव स्तोत्रैः पवित्रैस्ततो । दृष्टानेकमहाप्रभावसुभगं नाथं तथैवास्तुवन् ॥ ६० ॥ तत्ताद्दग्वरपौरुषाकरमथ श्रीनेमिनं यादवा । हर्षोत्तालविलोचनांशुकुसुमैर्वाणीसुधावर्द्धितैः आनर्चुः प्रणिपत्य मातलिरपि प्राप्यैतदाज्ञां पुनः । प्रीत्यै स्व-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गेपतेर्बज्नूव ज्ञगवद्दीरत्वसंकीर्त्तनात् ॥ ६१ ॥ इंडप्रस्थं पांडवानामयोध्यां । प्रादात् कृष्णो-
रुक्मनाज्ञस्य दर्षात् ॥ शौर्यइंगं तं महानेमये चा—न्येज्यस्तद्द्ययथायोग्यमेव ॥ ६२ ॥ च-
क्रानुगोऽथ ज्ञरतार्ऊमसौ विजेतुं । संवेष्टितो यडुज्निरुच्चपदाग्ररूढैः ॥ मार्गे मिलद्विजयदंनक-
तप्रमोदो । विष्णुश्चचाल सबलः सवलस्ततो नु ॥ ६० ॥ ज्ञरतार्ऊनिवासिदेवता—कलितां को-
टिशिलां ततो हरिः ॥ चतुरंगुलमुद्दधारज्नू—वलयादाकलयन्निजां स्थितिं ॥ ६१ ॥ मासैः ष-
ड्जिरसौ विजित्य वसुधां राज्ञां सहस्रैः सदा । ज्ञक्तिप्रह्वशिरोज्निरर्चितपदस्तैः षोडशांकैस्ततः
॥ तत्तत्प्रौढभुजाप्रतापदलितप्रत्यर्थिसार्थो हरिः । स्वीयां प्राप पुरीं सदुत्सवमयीमेकातप-
त्राश्रितः ॥ ६२ ॥ नम्रानेकनरेंड्मौलिमणिरुकूरोचिष्णुपादांबुजो । नारीनेत्रसुपात्रपेयसुज्न-
गप्रत्यंगचारुत्वज्नृत् ॥ विद्याज्नृत्सुरसेवितो गुणगणाधारो रमावल्लज्नः । स्फुर्जत्कीर्त्तिनदीनगः
स ज्ञरतस्यार्ऊ सुखेनान्वशात् ॥ ६३ ॥

इत्याचार्यश्रीधनेश्वरसूरिविरचिते श्रीशत्रुंजयमाहात्म्यांतर्ज्नूतश्रीरैवताचलमाहा-
त्म्यपांडवादिसंग्रामवर्णनो नाम द्वादशमः सर्गः समाप्तः ॥ श्रीरस्तु ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ॥ त्रयोदशमः सर्गः प्रारभ्यते ॥





सुरासुरा अप्यतुलप्रमाणं । नमंति बद्धांजलयो यमुच्चैः ॥ ध्यायंति यं योगविदो हृदंत-
स्तं नेमिनाथं प्रणतः स्तवीमि ॥ १ ॥ अथ प्रभुर्नेमिजिनः समान-देहोपमानस्त्रिदशैरमानः
॥ वृतोऽन्नितोऽपि प्रतिबंधमुक्तो । रेमे रमेशाशयसम्मदाय ॥ २ ॥ यथा यथा नेमिजिनाभि-
लाष-स्तथा तथाचेष्टत देवसार्थः ॥ नाथोऽपि तत्तत्प्रतिकर्त्तुमिद्ध-मिच्छानुरूपं विदधे सुराणां
॥ ३ ॥ यं यं प्रदेशं रविवच्चचार । विभुः स स स्यादधिकाभिरामः ॥ मुमोच यं यं स सुरो-
परोधात् । स शोभया तद्विरहादिवौज्झि ॥ ४ ॥ अथोपकार्येष विभुः सलीलं । विनोदयन् से-
वकदेववृंदं ॥ संरक्षितं रक्षकलक्षशस्त्रै-र्जगाम कृष्णायुधधाम नाम ॥ ५ ॥ राहोर्भयात्किं भु-
वमिंदुरागात् । क्षीराब्धितो वा नवनीतपिंडः ॥ यशश्चयो वाथ हरेर्निरीक्ष्य । शंखं सुखं चे-
तसि चेति दध्युः ॥ ६ ॥ गतागतत्रस्त इहांशुरागा-दुर्वानलो वाब्धिविरोधनष्टः ॥ करोत्करै-
र्व्याप्तमुदीक्ष्य चक्रं । चक्रुश्च ते तत्र वितर्कमित्थं ॥ ७ ॥ स्वदंडवक्त्राग्रमिलत्खगाभां । भो-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गीशन्नोगाग्रमणिप्रकाशां ॥ पुष्पोन्नवत्कांतिकलापरम्यां । व्यलोकयंस्तेऽग्र गदां मुरारेः ॥
॥ ८ ॥शक्रोऽनूजत्वं हरये ददौ य–त्ततोऽस्य चापेन शरासनस्य ॥ शाक्रस्य दत्तं निजजन्म-
वत्त्वं । तदूदृश्यतेऽत्रेति जगुः स्फुटं ते ॥ ए ॥ तत्तद्द्विपक्षोत्करपातन्नोगा–द्रागादसंख्यत्वमयं
प्रतापः ॥ वीक्ष्याच्युतस्यायुधवृंदमन्य–दचिंतयंश्चेति सुरा वितर्कं ॥ १० ॥

इतश्च विश्वोद्धरणप्रवीणः । कुतूहलात्कंबुमथोद्दिधीर्षुः ॥ ऊचे नृपस्यायुधवेश्मरक्षा–धि-
कारिन्निर्नक्तिन्नरात्प्रणम्य ॥ ११ ॥ स्वामिन्नसि स्वांसविधूतवैरी । मुरारिबंधुर्यदि वीर्यसिंधुः
॥ तथापि मायासपरोंबुजेऽन्नूः । क्षमोऽसि नोद्धर्तुमपीममीषत् ॥१२॥ निशम्य वाणीमिति
स स्मितश्री–संन्नाविताम‍र्त्यगणो जिनेशः ॥ न्नऊृत्य शंखं रदनांशुयोधि–द्युतिं प्रदध्मौ कि-
ल लीलयेव ॥ १३ ॥ स पांचजन्यप्रन्नवः प्रणादः । पुरीं प्रपूर्य प्रचुरं प्रसर्पन् ॥ पयोधिपूरं
परतीरपारं । संप्रापयन् कंपयतिस्म पृथ्वीं ॥ १४ ॥ हत्वाब्धिना तुंगतरंगघातैः । समुद्धृता ॥७३६॥
मत्स्यगणाः पतंतः ॥ पुरांतराकुट्टिमसौधमूर्ध्नि । दधुस्तदंतःस्थितकामचिन्हं ॥ १५ ॥ वियु-
ज्य पृथ्वीं जननीमुदस्य । ये धातवो दूरमवापिता हि ॥ त्रस्यन्महासौधमिषेण तेऽस्याः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संयोगमापुर्जलजोत्थशब्दात् ॥ १६ ॥ स्थातुं न सज्जा ह्यनवन् गजास्ते । हया स्यात्कंपम-
थाययुश्च ॥ रथा वृथा यानविधौ विधूता । वज्रूवुरुत्सर्पति तन्निदादे ॥ १७ ॥ कर्णेषु वाक्री-
लकघातपाता–दचेतना भुव्यलुठन् जनौघाः ॥ तद्दुःखदूना इव शीरिशार्ङ्गि–दशार्हमुख्या अ-
पि चुक्षुभुस्ते ॥ १८ ॥ चमत्कृतोंतः क्षणमीक्षणे द्रा–गुन्मेष्य मूर्धानमसौ विधूय ॥ जगाद
तन्नादविघूर्णमान–सत्त्येषु शार्ङ्गी बलमस्खलश्रीः ॥ १९ ॥ किं नूतनः कश्चिदभूदभूतः । पु-
रा मुरारिर्जितवैरिवारः ॥ किं वा नवः कोऽपि जिनोक्तमुक्त–श्चक्रीव वज्री भुवि जृंभमाणः
॥२०॥ त्रैलोक्यलोकेऽस्ति परो नरो न । यः क्षोभयेन्मां च बलं बलेन ॥ केनेव तद्वादित एष
शंखः । प्रक्षोभकृत्सर्वजनस्य पश्य ॥ २१ ॥ सन्नह्यतां रे रणकर्कशांगा । गाढं गजान् वा-
जिगणान्नुदंतु ॥ नृत्तेजयंत्वस्त्रभरं हरंतं । स्फुरद्रविप्रांशुकरोपमानं ॥ २२ ॥ आयांतु ते व-
र्यभुजोर्जवीर्य–विध्वस्तविश्वारिचमूसमूहाः ॥ वीराः स्वबाहूद्धृतमेरुशैला । हेलावलोल्लंघित-
वार्द्धिवेलाः ॥ २३ ॥

इत्युच्चरन् विस्फुरदोष्टपृष्ठा–धरः कराघातविकंपितक्ष्मः ॥ स्मृत्यागतानंगविभीषणांगः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



। सिंहासनाद् द्रागुदतिष्ठदेषः ॥ २४ ॥ साटोपमन्योऽपि जनः समन्युः । कुर्वन् करोत्खालि तशस्त्रजालैः ॥ खं दंतुरं क्रोन्नितपर्षदंत–रुत्तिष्ठदंशोऽस्य किलावन्नासे ॥ २५ ॥ नेदुस्तदैवाद्य-रणार्थवादा । वादित्रवृंदा वसुधां विहायः ॥ प्रस्फोटयंतः प्रतिशब्दघाता–त्संरावयंतः ककु-न्नोऽपि हंत ॥ २६ ॥ गजाश्मिमान् कुंभुन्निघोरगर्ज–स्तुरंगरंगत्प्रचुरोर्मिवर्मा ॥ शस्त्रांबुपूर्णो न-रवार्द्धिरासी–द्भृशं तदोच्छ्ल श्लातत्वांतः ॥ २७ ॥ निःस्वाननिःस्वानभुजान्निघात–ह्योच्चहेषा-गजबृंहितैस्तैः ॥ तच्छंखघोषैर्न्नटसिंहनादै–स्त्रैलोक्यमप्याप चलाचलत्वं ॥ २८ ॥ सन्नाह्य या-वच्चतुरंगसेना–मियेष गंतुं मुरजित्तदैव ॥ नुपेत्य नत्वास्त्रगृहाधिकारी। व्यजिज्ञपत्तं विनयाव-नम्रः ॥ २९ ॥ शार्ङ्गं धनुर्मार्दवतोऽवधूय । खड्गः करग्राहसहो न चेति ॥ गदागदाभुग्न जर-त्यसौख्यी । चक्रं नृशं क्रंदति हस्तगं मे ॥ ३० ॥

इत्थं कृतावज्ञमसौ विमुच्य । शस्त्राणि सामान्यजयंकराणि ॥ विनोदमीषत्कमते मदी-यं । ख्यातश्च शुक्रेष्वयमादिमस्तत् ॥ ३१ ॥ स्वामिन्नयोक्तैरपि वार्यमाण–स्त्वच्छंखमादाय कु-तूहलेन ॥ अपूरयद्बंधुररिष्टनेमिः । संक्रांतत्वत्तद्दलवानिवोच्चैः ॥ ३२ ॥ तन्मुंच शत्रूचितसैन्य-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 



संगो—ज्ञवद्भुतं पौरुषमत्र नाथ ॥ ज्ञवच्चमूज्ञारविकारमग्नः । शेषाहिरप्याहितज्ञीतिरस्ति॥३१॥ श्रुत्वाथ तादृग् निजबंधुवीर्यं । चमत्कृतोंतर्मधुसूदनोऽस्थात् ॥ तथैव विष्टब्ध इव व्यरंसी— दायासतोऽथ प्रचचाल नापि ॥ ३२ ॥ संदर्श्य किंचिन्निजवीर्यमित्थं । मुमोच शंखं ज्ञगवां- स्तथैव ॥ जगत्पुनः स्वां प्रकृतिं प्रपेदे । कार्यं निदानानुगतं हि तद्वत् ॥ ३३ ॥ ज्रमंस्तथै- वाथ स नेमिनाथो । ज्रष्टाट्टमालामणिकुट्टिमानि ॥ त्रस्ताश्वमातंगकुलानि पश्यन् । रयाद- यान्माधवपर्षदंतः ॥ ३४ ॥ कुंतासिपुत्रीकुलिशासिज्ञल्ली—कुद्दालकुःस्फोटधनुर्धरौघैः ॥ रोमां- चवर्मोन्नतरांगरक्षैः । क्वचिन्नटैर्वीररसावदातां ॥ ३५ ॥ सिंदूरपूरारुणपाणिजाग्र—ज्ञोदार्गलै- र्वर्मितविग्रहैर्ज्ञैः ॥ वारीधृतैर्वारिदवृताद्रिवृंदैः । क्वचित्परीतां निबिडं नदद्भिः ॥ ३६ ॥ फेना- वृतोर्मिप्रकरानुकारैः । सन्नाहिज्ञिर्वाजिगणैः क्वचिच्च ॥ सुखाधिरूढैर्बहुहेषमाणैः । खुरांचलैः क्षोज्ञितज्ञूमिज्ञागां ॥ ३७ ॥ संयुज्यमानाश्वधृताग्रज्ञागै—र्भृशं च कुर्कित्ज्ञरिज्ञिर्महास्त्रैः ॥ क- चिद्रथै रुद्धपथां धृतांगै—रारोहणायोग्रज्ञटाधिनाथैः ॥ ३८ ॥ वेश्मेव वीराद्भुतरौद्रज्ञीति—रसो- च्चयानां घनवाहनौघैः ॥ ज्ञटोज्ञवहुंकृतिशस्त्रनादै—र्हरेः सज्ञां प्रापदरिष्टनेमिः ॥ ३ए ॥ कुल-





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कं ॥ आक्रम्य चैकेन पदेन पृथ्वी–मन्येन रुध्ध्वा च पदासनाग्रं ॥ स्थितं रुषोल्लासिमुखारु-
णत्व–विडंबितोद्यत्खररश्मिबिंबं ॥ ४० ॥ सोष्णोक्तियुक्त्यानुमितांतरस्थ–कोपानलं कंप्ररदच्छ-
दाग्रं ॥ वलित्रयाधारललाटपट्ट–स्वेदोदबिंदुप्रकरानुविद्धं ॥ ४१ ॥ गदामवष्टभ्य करेण तत्त—
त्कार्येषु वीरान् वहु योजयंतं ॥ तत्तऽणोद्भूतजयोद्भगर्वो–द्धुरं हरिं नेमिरपश्यदग्रे ॥४२॥ विलो-
कं ॥ लीलाचलाभ्यामथ लोचनाभ्यां । तत्तज्जनोद्योगविलोकनोत्कं ॥ वीक्ष्याभ्युपेतं सहसैव
नेमिं । लज्जावनम्रोऽब्रवदच्युतो द्राक् ॥४३॥ तूष्णीं स्थितेष्वन्यजनेषु विष्णुः। कृत्वाकृतेः सं-
वरणं क्षणेन ॥ ससंभ्रमालापनभावितात्म–प्रीतिः प्रभुं प्राह हसन्मुखाब्जं ॥ ४४ ॥ भ्रातः
स्मृताभ्यागत पांचजन्य–स्त्वया किमापूरि विदूरिताशः ॥ यत्क्षुब्धमद्यापि ससागराद्रिं । च-
राचरं विश्वमिदं समस्ति ॥ ४५ ॥ बालोचिताः संति पराः क्रिया हि । क्रीडाकृतेऽस्मत्सदने
घनास्ताः ॥ मृदंगरंगाय न ता बभूवुः। शंखोद्धृतिः कर्कशदेहयोग्या ॥ ४६ ॥ तदाशयार्थप्र-
तिचक्रवाचं । विभाव्य तां नेमिजिनो गभीरं ॥ अक्षुब्धचित्तः सहजेन रंग–रसेन चेत्युत्तर-
माससाद ॥ ४७ ॥ तादृग्बलं तस्य च धीरतां ता–मालोक्य साशंक इवाह विष्णुः ॥ रामा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ननेक्रानिरतो गम्भीरं । वचः शुचि स्वादु च कर्कशं च ॥ ४८ ॥ भ्रातस्तवानेन जनोत्तरेण
। बलेन गांभीर्यगुणेन हृष्टः ॥ जाने त्वया विश्वमिदं मदीयं । भ्रमन्महाशासनवासयोग्यं ॥
॥ ४९ ॥ यदोः कुलं विश्वमलंकरिष्णु । त्वयाद्य हीरांकुरदीप्तभासा ॥ आसादयंत्यन्यकुला-
नि काच-कल्पानि संकल्पयताधिशोभं ॥ ५० ॥ मदोजसा यद्वदसौ महीशान् । बलस्तृणं
चिंतयतीह तद्वत् ॥ त्वदोजसा विश्वपतीनशेषान् । मन्ये तृणायावरजोद्भवीर्यात् ॥ ५१ ॥ त-
वेयताप्येष बलेन बंधो । सुधांधसोरोधकरां समृद्धिं ॥ मुदः प्रपन्नोऽस्मि तथापि दोष्णोः । स्व-
योर्बलं दर्शय मे प्रसत्त्यै ॥ ५२ ॥

श्रुत्वा तदुक्तिं निजभावलिप्ता-मक्षुब्धचित्तो वसुधावलोकी ॥ ओमित्युवाचोचितकार्यवेदी । ने-
दीयसां प्रीतिकरो जिनेशः ॥ ५३ ॥ बंधू ततस्तौ परबंधुयुक्ता-वुत्साहधैर्याविव देहभाजौ
॥ उत्थाय सिंहासनतोऽस्त्रवेश्म । निरीक्ष्यमाणौ ययतुर्जनौघैः ॥ ५४ ॥ दध्यावथो नेमिजि-
नः कृपालुः । प्रायः परापायविमुक्तशक्तिः ॥ बंधुर्ममायं हरिराहितांत-स्तुलत्वतो मय्यपि शं-
केत हा ॥ ५५ ॥ नाहं स्पृहावान् भुवनाधिपत्ये । भवांबुधौ नो पतयालुरस्मि ॥ आदित्सु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रुच्चैर्व्रतमित्यथैनं । वच्मि त्रिशुद्ध्यापि न मन्यतेऽसौ ॥ ५६ ॥ दोष्णोरसा पाणितलेन पादै-
र्मया हतोऽयं कथमत्र ज्ञाती ॥ रंन्नातरुः पक्षिपदानि सोढा । नैरावतस्योल्लिखितानि तानि
॥ ५७ ॥ नायं यथानर्थमुपैति मत्तो । मत्तो यथा वेत्ति च मे बलांशं ॥ स्यान्मानसिद्धिश्च
यथास्य कार्यं । विचार्य सर्वं हि मया तथैव ॥ ५८ ॥ संचिंत्य चित्तांतरिदं जिनेंदु-र्जगाद
गोविंदममंदबुद्धिः ॥ गंभीरवाग्भारविगाढितान्धि-ध्वनिः प्रकुर्वन् मुखरा दिशोऽपि ॥ ५९ ॥
पादप्रहारावनिपातपांशु-पूरोत्क्रमात्पामरहर्षकारि ॥ नियुद्धमेतन्नहि युक्तमुक्तं । सुव्यक्तनिःशे-
षरणस्य साधोः ॥ ६० ॥ दिव्यायसैरप्यहितप्रयोज्यैः । शस्त्रैर्न शस्तो रण आवयोर्हि ॥ बं-
ध्वोर्मिथोऽप्यात्मवदंगयोर्न । भेदोऽस्ति खेदोदयभेदकारी ॥ ६१ ॥ मिथोऽपि बाह्वोर्नमनान-
मान्यां । जयाजयौ शक्र कलयाव आवां ॥ स्यान्मानसिद्धिश्च न देहपीडा । व्रीडावहा क्री-
डनमात्रतोऽपि ॥ ६२ ॥ हरिस्तदंगीकरणादुदस्त-बाहुर्वभूवाद्भिमानसारः ॥ एकेन दंतेन
यथैकदंत-श्चैकोच्चशाखो डुरिवापवातः ॥ ६३ ॥ वामेन दोष्णाथ विभुर्मृणाल-लीलालसं मा-
धवबाहुनालं ॥ अनामयत्तद्दलगर्वधन्व-धर्माणमात्मोच्चकरेषुरेखं ॥ ६४ ॥ वामं भुजं स्वं वि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




भुरप्युदस्य । व्यथ्राणयत्तस्य विहस्य किंचित् ॥ एकोच्चृसच्छृंग इवाद्रिनाथ-श्चैकोच्चताखः कि-
मु वृक्षजालः ॥ ६५ ॥ सबौजसासावपि नाम्यमानः । कृष्णेन नेषद्व्यनमद् दृढीयान् ॥
प्रभंजनेनातिबलेन वृक्षाः । क्षुभ्यंत एतेन न जातु मेरुः ॥ ६६ ॥ अवेष्टयद्वाहुयुगं हरिः स्वं ।
नेमेर्भुजस्याश्रित एव साक्षात् ॥ शाखामिवांह्रिप्रचयो वटद्रो—र्भोगीव भोगेन च चंदनद्रोः
॥६७॥ तथापि तस्मिन्न नमत्युदारे । वृषाकपिर्द्राक् कपिवल्ललंबे ॥ आकुंचितांह्रिः किल वल्गु-
लीव । कुलायवत्पक्षिविशेषकस्य ॥ ६८ ॥ वैलक्ष्यलक्ष्मत्वमथ क्षणेन । प्रच्छादयन्नच्छहसो मुरा-
रिः ॥ विमुच्य नेमीशभुजं भुजंग—भोगोपमं तं सहसालिलिंग ॥ ६९ ॥ वत्स त्वयाऽतुच्छब-
लेन मन्ये । तृणाय विश्वं जयता तथा मां ॥ कुलं च सर्वेषु कुलेषु मेरु—मिवाद्रिषु प्रोच्चत-
मं निजं हि ॥ ७० ॥ प्रसन्नगंभीरगिरेति नेमि—मालाप्य कृष्णो विससर्ज सद्यः ॥ आहस्म
च प्रस्मितमुत्स्मयाढ्यः । स सीरिणं शंकितचित्तवृत्तिः ॥ ७१ ॥ यद्बंधुरेषोऽस्ति बलैकसिंधु—
स्तत्सिंधुसीमावनिमंडलं किं ॥ न साधयत्यात्मबलं बलेति । नयेद्वृथा शारदवारिदाभः ॥७२॥
ज्ञात्वाशयं सीरपतिः सशंकं । स शार्ङ्गिणः शांतमनाः शशंस ॥ स्वयं ह्ययं त्यक्तसमस्तसं-

For Private And Personal Use Only

गो-ऽनंगोपमर्दी न जवाजिलाषी ॥ ७३ ॥ रागादिरोगापगतो मुमुक्षुः । प्रतीक्षते यः समयं
व्रतस्य ॥ स एव संसारनिबंधनं किं । समीहते राज्यमिदं मदाय ॥ ७४ ॥ अदृष्टचिद्योग-
विजोगजाजो । जवाजिलाषःसुखहेतुरस्ति ॥ मरावनासादितचूतवृक्षो । जनोऽजिलाषं कु-
रुते करीरे ॥ ७५ ॥ रामोक्तितोऽपीत्थमसौ मुरारि-स्तथापि नेमेरजिशंकतास्मात् ॥ अंत-
र्निगूढो हि पलालपूले-ऽजिशंकनीयः खलु वह्निरुच्चैः ॥ ७६ ॥

शक्रोऽथ विज्ञाय विजोर्विलासं । विश्वस्य विस्तारितहर्षवासं ॥ त्वरैत्य नत्वा च जिनं
जगाद । कृष्णं जिनौजोधृतचित्तसादं ॥ ७७ ॥ पुंसां त्रिषष्टेरपि वीतरागा । मध्ये जवंत्युत्त-
मवीर्यवर्याः ॥ विश्वस्य विन्यासविधौ समर्था-स्तथापि संसारपराङ्मुखास्ते ॥ ७८ ॥ अ-
स्मादृशा अप्यमराधिनाथा । यस्याग्रतो जांति च किंकराजाः ॥ स विश्वनाथः कथमीहते-
ऽद-स्तुच्छं हि राज्यं क्षणजंगुरं यत् ॥ ७९ ॥ आकर्णयाद्यार्हदुदाहृतं य-ज्ञावी जिनो यादव-
गोत्ररत्नं ॥ द्वाविंश आजन्मविकारमुक्तः । सेत्स्यत्यसौ शांतमनाः कुमारः ॥ ८० ॥ त्वया पु-
राप्यस्य जनातिशायि । तत्तादृशे कर्मणि पौरुषं तत् ॥ दृष्टं ततः किं निजमानसांत-र्विक-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रूपजालं वितनोषि कृष्ण ॥ ८१ ॥ असौ निजं कालममुं कियंतं । प्रपाल्य लोकोद्धरणाय नाथः ॥ चारित्रमादाय पवित्रमूर्त्ति–र्मुक्तिं गमिष्यत्यपुनर्भवाय ॥ ८२ ॥

इति शक्रोक्तमाकर्ण्य । छिन्नसंशय आशये ॥ स्वागसः क्षमयामास । नेमिमालिंगयन् हरिः ॥ ८३ ॥ विमौजसं विसृज्याथ । नेमिमादाय माधवः ॥ ययावंतःपुरे द्वार–पालाना-दिकृदित्यथ ॥ ८४ ॥ नासौ मद्बंधुरेषोऽत्र । निषेध्यः प्रविशन्नहो ॥ सत्यभामादिभिर्भ्रातृ–जा-याभिः सह खेलतु ॥ ८५ ॥ इत्युद्भाव्य विसृज्यापि । नेमिं पीतांबरः पुनः ॥ अखेलत पुरं-ध्रीभि–र्निर्विकारं च नेम्यपि ॥ ८६ ॥ ग्रीष्मेऽन्यदा तपत्यर्के । जलसंपर्कतर्कभृत् ॥ जगाम रैवते शार्ङ्गी । सनेमिर्युवतीसखः ॥ ८७ ॥ विविशुस्तत्र सरसी–नीरेषु सुदतीजनाः ॥ तद-धिष्ठायिदेवीवत् । प्रेरिताः शार्ङ्गपाणिना ॥ ८८ ॥ जलास्फालनसंजात–कंकणध्वनिरच्युते ॥ पुपोष स्मरभूपाल–तूर्यनादमुदं चिरं ॥ ८९ ॥ काचित्कुंकुमपिंडेन । निजघान हरेरुरः ॥ सरागां कुर्वती प्रोच्चैः । पर्वताधित्यकामपि ॥ ९० ॥ भ्रक्लज्जलयंत्रांबु–धाराभिः कापि मा-धवं ॥ कादंबिनीव सिंचंती । ऊरश्चैलमिव व्यधात् ॥ ९१ ॥ एवं क्रीडारसे कामं । प्रसरत्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च्युतः प्रियाः ॥ प्रेरयामास नेमेस्त–त्क्रीडानर्महेतवे ॥ ९२ ॥ ताः परावर्त्य वेगेनो–द्धस्त-
शृंगा मृगेक्षणाः ॥ आछोटयन् पयोभिर्दिक्–विभागेन च नेमिनं ॥ ९३ ॥ उत्प्लुतंत्यः पय-
स्पर्द्धो–भिन्नस्तनघटाः स्त्रियः ॥ चुचुकाग्रश्रवद्वारि । नेमेरुरसि चिक्षिपुः ॥ ९४ ॥ नेमिरप्य-
विकारः सन् । कृतप्रतिकृतैश्चिरं ॥ चिक्रीड तासु हस्ताग्र–हतवारिभरैरलं ॥ ९५ ॥ खेलंतं
नेमिनं दृष्ट्वा । हृष्टो दामोदरश्चिरं ॥ रमित्वा हंसवत्तीर–माश्रयद्वल्लभावृतः ॥ ९६ ॥

निरगान्नेमिरप्यंभो–मध्याद्ध्यास्त तत्तटं ॥ भामादत्तासनश्चोचे । रुक्मिण्या नर्मपूर्वकं
॥ ९७ ॥ किं देवर वृथा जन्म । भार्याविरहितो निजं ॥ एकाकी वंठवत्कुंठ । नयसि त्वंप-
रिग्रहः ॥ ९८ ॥ षोडशस्त्रीसहस्राणां । भोक्तुर्विष्णोरसि प्रियः ॥ बंधुस्तदेकामपि नो । स्वी-
कुर्वन्न हि लज्जसे ॥ ९९ ॥ ततो जांबवती प्राह । क्लीबोऽयं सखि देवरः ॥ किं च गृहव्ययो-
द्विग्न–स्तत्तदर्जनवर्जितः ॥ १०० ॥ आद्यास्तीर्थकृतः सर्वे । भुक्तराज्या गृहाश्रमाः ॥ प्रव्रज्य
निर्वृतिं प्रापु–र्नूतनोऽयं हि तीर्थकृत् ॥ १ ॥ साग्रहं भामयाप्येव–मुक्तो नेमिर्व्यचिंतयत् ॥
अहो भवाब्धौ पतिताः । पातयंति परानपि ॥ २ ॥ वाङ्मात्रेणानुमंतव्य–स्तदमीषां मया-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 



भद्रः ॥ बलेन साधयिष्यामि । पश्चादप्यात्मकांक्षितं ॥ ३ ॥ विमृश्येति विभुः प्राह । करिष्ये वः समीहितं ॥ लोकास्तेऽवसरज्ञा हि । ये भवंति स्वकर्मणां ॥ ४ ॥ हृष्टस्ततो हृषीकेशो । गजमारोप्य नेमिनं ॥ महोत्सवैः प्रियायुक्तो । द्वारिकामधिजग्मिवान् ॥ ५ ॥ समुद्रविजयायाख्य–च्छ्रीशिवायै च नेमिनः ॥ प्रियास्वीकारमाकार–प्रोक्तमप्यच्युतः पुनः ॥६॥ भामा स्वभगिनीं राजी–मतीं लावण्यसंपदां ॥ जगाद योग्यां श्रीनेमेः । सर्वस्त्रीगर्वतस्करीं ॥ ७ ॥ स्वयमुत्थाय गोविंदः । साश्चर्यजनवीक्षितः ॥ उग्रसेननृपागारं । जगामाथ जनाधिपः ॥ ८ ॥ अभ्युत्थायोग्रसेनोऽपि । तं निवेश्य वरासने ॥ स्वं प्रशंसन् गदापाणिं । पप्रच्छागमकारणं ॥ ९ ॥ हरिर्जगाद मद्बंधो–र्ममाधिकगुणस्पृशः ॥ नेमेर्वधूस्तव सुता । राजीमत्यस्तु कांक्षिता ॥ १० ॥

अथोग्रसेनः सानंदो । निजगाद गदाधरं ॥ इदं गृहमियं लक्ष्मी–स्तवैवात्रार्थना हि का ॥ ११ ॥ अभ्युत्थायाथ गोविंदः । समुद्रविजयाय तत् ॥ निवेद्याजूहवल्लब्ध–प्रत्ययं क्रोष्टुकिं नरैः ॥ १२ ॥ कृष्णपृष्टोऽथ वैवाह्यं । लग्नं क्रोष्टुकिरुज्जगौ ॥ श्रावणश्वेतषष्ठ्यां च । 



For Private And Personal Use Only

वधूवरविवृद्धये ॥ १३ ॥ सत्कृत्य क्रोष्टुकिं कृष्णो । व्यसृजद्भक्तिपूर्वकं ॥ आख्यत्तदुग्रसेनाय
। ततो द्वावप्यसज्जतां ॥ १४ ॥ विवाहासन्नदिवसे । कृष्णोऽपि द्वारिकापुरीं ॥ प्रत्यट्टं च प्रति-
द्वारं । रचयामास तोरणान् ॥ १५ ॥ उच्चैः शृंगारयामासु-र्मंचान् रत्नमयान् जनाः ॥ त-
दंतरेषु मुमुचु-र्गंधवद्धूपजा घटाः ॥ १६ ॥ अथो दशार्हा मुशली । शार्ङ्गी च श्रीशिवामुखाः
॥ रोहिणीदेवकीरेव-त्याद्या ज्ञामासुखा अपि ॥ १७ ॥ सर्वाः संस्थापयामासुः । प्राङ्मुखं
नेमिमासने ॥ स्नपयामासतुः प्रीत्या । स्वयं च बलशार्ङ्गिणौ ॥ १८ ॥ युग्मं ॥ स्नानांते ने-
मिनं सिंहा-सने संस्थाप्य शार्ङ्गभृत् ॥ नाराचधारिणं बद्ध-प्रतिसरमथो व्यधात् ॥ १९ ॥
गत्वोग्रसेनवेश्मांत-र्बालां राजीमतीं हरिः ॥ कौसुंभवसनां तद्व-दध्यवासयदादरात् ॥ २० ॥
अथ प्रातस्तु गोशीर्ष-चंदनालिप्तविग्रहः ॥ श्वेतस्रग्हारवसन-श्वामरछत्रमंडितः ॥ २१ ॥ पु-
रोगैः कोटिभिर्भूप-कुमारैर्वक्रवीक्षितः ॥ श्रीनेमिः श्वेततुरग-मारुरोह रथं वरं ॥ २२ ॥ श्री-
नेमेः पार्श्वतोऽभूवन् । गजारूढा महीभुजः ॥ पृष्ठे दशार्हा गोविंदो । मुशली चावतस्थिरे
॥ २३ ॥ तत्पृष्ठे शिबिकारूढाः । सर्वाश्चांतःपुरस्त्रियः ॥ अभूवन् भूषणोद्भिन्न-किरणैर्द्योतितां-

वराः ॥ २४ ॥ नुच्चार्यमाणैर्धवलै–र्नृत्यन्निर्नर्त्तकीजनैः ॥ पठन्निर्बंदिन्निर्वाद्य–मानैस्तूर्यैरनेकशः
॥ २५ ॥ वीक्ष्यमाणोऽक्षिकोटीन्निः । स्तूयमानः कवीश्वरैः ॥ वर्ण्यमानो रामान्नि–श्चिंत-
यन् नवनाटकं ॥ २६ ॥ चचाल नगवान्नेमिः । स्वगृहाद्राजवर्त्मनि ॥ नपोग्रसेनसदनं । प-
श्यन् सुरकृतोत्सवं ॥ २७ ॥ [redacted] ॥ इतो राजीमती स्नाता । सर्वान्नरणनूषिता ॥ श्वेत-
स्रग्वसना पूर्ण–मासीरात्रिरिवोडुविनी ॥ २८ ॥ सवयस्कसखीवृंद–वृता पद्मेव साज्जिनी ॥
वरागमनतूर्याणि । श्रुत्वोत्फुल्लांगकान्नवत् ॥ २९ ॥ [redacted] ॥ न्नावज्ञाथ सखी प्राह । धन्ये
राजीमति त्वया ॥ किमाराद्धे जिनस्तीर्थे । यल्लब्धोऽयं वरो वरः ॥ ३० ॥ यस्मै देवा नम-
स्यंति । यः प्रभुर्जगतामपि ॥ तदागमनतूर्याणि । श्रूयंते शृणु सुंदरि ॥ ३१ ॥ यद्यप्यंतः स्थि-
तं नेमिं । पश्यंत्यपि च पश्यसि ॥ आगच्छंतं तथाप्येनं । पश्यामश्चेत्प्रसीदसि ॥ ३२ ॥

इति श्रुत्वा समं तान्नि–र्मंजीररणितैः स्मरं ॥ जीवयंती गवाक्षांतः । प्राप राजीमती
द्रुतं ॥ ३३ ॥ जगाद स्फारिताक्षीं तां । सखी सखि विलोकय ॥ त्रैलोक्यसुंदरो नेमि–रिति
त्वत्पतिरग्रतः ॥ ३४ ॥ मिलंती चामरे नेमि–मुखज्योत्स्ना विन्नाव्यते ॥ गंगोर्मिसंपृक्तजला

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



। यमुनेव तरंगिणी ॥ ३५ ॥ नेमेः शिरसि संपूर्ण–शर्वरीश्वरसोदरं ॥ छत्रं धत्ते सितांभोज–
लुब्धहंसश्रियं सखि ॥ ३६ ॥ दृष्ट्वा राजीमती दृष्ट्या । नेमिं त्रिभुवनोत्तरं ॥ दध्यौ चेन्मत्प-
तिर्नेमि–स्तदा भाग्यं विजृंभितं ॥ ३७ ॥ स्फुरणाद् दक्षिणांगस्य । तदैवाचिंत्य साऽशुभं ॥
जगादाशकुनादालि । जाने नेमिः सुदुर्लभः ॥ ३८ ॥ साप्युवाच प्रतिहतं । शांतं सख्यशु-
भं निजं ॥ नेमिरायात एवात्रा–ध्यक्षे संदेह एष कः ॥ ३९ ॥ अथ नेमिरथः प्राप । भो-
जवेश्म तदा रयात् ॥ प्राणिनां चाशृणोन्नेमिः। करुणस्वरमस्मरः ॥ ४० ॥ संविदानोऽपि भ-
गवान् । पप्रच्छ निजसारथिं ॥ किमेष पशुसंघातः । करुणं रौति चाग्रतः ॥ ४१ ॥ स जगाद
नमन् स्वामि–न्नमी यदुभिराहृताः ॥ विवाहे भोज्यसात्कर्त्तुं । किं न वेत्ति विभुः स्वयं ॥४२॥
तदुक्त्या स दयाधारो । दूनोंतर्जगतां विभुः ॥ अचिंतयदहो विश्वं । सर्वं तत्वार्थवर्जितं ॥४३॥
यदन्यजनवद्बंधु–स्नेहपाशनियंत्रितैः ॥ अस्माभिरपि कर्मेद–मीदृगारभ्यते हहा ॥ ४४ ॥
आपातमात्रसौख्याय । कः कुर्यात्कार्यमीदृशं ॥ क्षणोद्योतकृते कः स्वं। दहेन्मंदिरमग्निना ॥
॥ ४५ ॥ तदलं बंधुवर्गस्य । स्नेहेन विषयेण मे ॥ प्रस्थितस्य शिवागार–मर्गलेनैव पाप्म-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ना ॥ ४६ ॥ इत्यालोच्य विभुः सूत–माह रथ्यान् निवर्त्तय ॥ त्यक्त्वाहं मानवीं मुक्ति–मुद्गो-
द्धानंतसौख्यदां ॥ ४७ ॥



व्यावर्त्तितरथं नेमि–मालोक्याथ यदूत्तमः ॥ समुद्रविजयः स्वेन्न–मंतरेऽक्लिपकुन्मनाः
॥ ४८ ॥ वत्सातुन्नमते स्वन्न । सदुत्सवमये क्षणे ॥ त्वयेदं बंधुवर्गस्या–रभ्यते दुःखदायि किं
॥ ४९ ॥ इतः शिवापि नीरंगी–जन्नास्याश्रुविमिश्रदृक् ॥ मनोरथद्रुं मे वत्स । मा न्नांक्षी-
रिति वागिता ॥ ५० ॥ कृष्णरामावपि श्रुत्वा । चलितं नेमिनं गृहात् ॥ स्यंदनं नेमिनाथ-
स्य । परिवव्रतुरुत्सुकौ ॥ ५१ ॥ अन्येऽपि भ्रातरः सर्वा । मातरस्तमवेष्टयन् ॥ तारका इव
शीतांशुं । सपुण्यमिव संपदः ॥ ५२ ॥ तैर्वृत्त विभुरात्मानं । मेने मुक्तिपथांतरा ॥ साम्य-
चित्तहरैः स्वैरं । मोहस्तेनानुगैरिव ॥ ५३ ॥ शिवासमुद्रविजया–वाहतुर्वत्स किं त्वया ॥ क्रि-
यतेऽस्मत्कलंकाय । स्वांगीकृतविमर्दनात् ॥ ५४ ॥ आबाल्यादपि नस्तात । त्वया पूर्णो म-
नोरथः ॥ शिखां तस्याधुनापि त्वं । समुद्धर परिग्रहात् ॥ ५५ ॥ अथो जगाद गोविंद–स्त-
न्नावमविदन्नदः ॥ अत्र पुण्यक्षणे वंधो । किं ते वैराग्यकारणं ॥ ५६ ॥ वात्सल्यामृतकुल्या-

॥ ७४१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





न्नौ । पितरौ ते वयं पुनः ॥ तव कल्याणनिर्माण–प्रवीणाः पार्श्ववर्तिनः ॥ ५७ ॥ राजीव-
लोचना राजी–मत्यपि त्वयि रागिणी ॥ सत्यप्येवं कथं खेदो–न्नेदस्त्वां व्यथयत्यलं ॥५८॥ न्नचे
स्वाम्यपि नो पितृ–र्बंधुन्यो मेऽरतिः क्वचित् ॥ किंतु संसारकांतारे । बिन्नेमि विषयारितः
॥ ५९ ॥ अनादिन्नवभुक्तास्ते । न्नवंति च नवा नवाः ॥ एष्वतृप्तः पुनर्जंतु–र्न्नवे न्नमति मू-
ढधीः ॥ ६० ॥ हितमिन्नत चेद्यूयं । मयि वात्सल्यशालिनः ॥ दीक्षार्थमनुमन्यध्वं । तदा मां
न्नवकातरं ॥ ६१ ॥ इत्याकर्ण्य विन्नोर्वाचं । हेतुयुक्तां यदूत्तमाः ॥ किंचिद्वक्तुमनीशास्ते–
ऽन्नूवन्न्यंचितकंधराः ॥ ६२ ॥ लोकांतिकास्तदैवैत्य । देवाः सारस्वता विभुं ॥ नत्वोचुर्न्नगवं-
स्तीर्थं । प्रवर्त्तय दयोदयिन् ॥ ६३ ॥ तदैव स्यंदनं त्यक्त्वा । न्नगवान् शक्रदेशितैः ॥ अमरै-
राहृतैर्द्रव्यै–र्दानं दातुमना ययौ ॥ ६४ ॥

राजीमती तु तत् श्रुत्वा । स्फुर्जथुप्रहतिप्रन्नं ॥ तदैव गतचैतन्या । लुलोठ धरणीतले
॥ ६५ ॥ सखीशतसमानीत–शीतद्रवैः क्षणादथ ॥ गतमूर्छा लुलत्केशा । विललापेति सा
न्नृशं ॥ ६६ ॥ निजार्जितेन न्नाग्येन । ज्ञातस्त्वं दुर्लन्नः पुरा ॥ स्वीकुर्वता नु वाक्येन । मां ॥७४१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वया साधु नाचरि ॥ ६७ ॥ नांगीकुर्वंति तत्कर्म । संतोऽलं पालितुं न यत् ॥ शुभ्नं वाप्य-
शुभ्नं वापि । स्वीकृतं पालयंति ते ॥ ६८ ॥ यथा रागो मयि स्वामिं-स्तथा मुक्तौ च मा
कृथाः ॥ मत्यागान्मुक्तिमाप्नोषि । मुक्तेस्त्यागान्न किंचन ॥ ६९ ॥ इत्यालपंत्यास्तस्यास्तु ।
भोग्यकर्मात्रुटत्तदा ॥ साम्ना सख्यस्तु तद्दुःखं । किंचित्किंचिन्न्यवर्त्तयन् ॥ ७० ॥ स्वामी य-
थार्थदानेन । कल्पद्रुरिव जंगमः ॥ वनीपककुलान्यब्दं । यावत्प्रीणयत्ततः ॥ ७१ ॥ विज्ञा-
यावधिनाथेंद्रा-स्तदैवैत्य दिवो मुदा ॥ जन्माभिषेकवद्दीक्षा-भिषेकं चक्रुरीशितुः ॥ ७२ ॥
नाभ्नोत्तरकुरौ भक्त्या । शिबिकायां सुरासुरैः ॥ क्लृप्तायां जगतामीश । आरोहणविधिं व्य-
धात् ॥ ७३ ॥ धृतसर्वायुधः शक्रै-र्वीज्यमानश्च चामरैः ॥ हरिमुख्यनृपैः प्रीत्या । पूज्यमा-
नोऽनुगामिभिः ॥ ७४ ॥ वीक्ष्यमाणो जनव्रातैः । स्तूयमानः सुरासुरैः ॥ गीयमानगुणः स्व-
र्ग-नागस्त्रीमानुषैरपि ॥ ७५ ॥ त्रिजगद्विस्मयं कुर्वन् । सर्वाभरणभूषितः ॥ स्वामी रैवत-
कोद्यानं । सहस्राम्रमशिश्रयत् ॥ ७६ ॥ युग्मं ॥

शिबिकाया अथोत्तीर्य । नेमिराभरणादिकं ॥ मुमोच चाग्रहीत्प्रीत्यै । हरिर्भक्तिभरा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नतः ॥ ७७ ॥ त्रिशत्यब्दमिते जन्म–दिनात्काले गते विभुः ॥ श्रावणस्य श्वेतषष्ठ्यां । पूर्वाह्ने चित्रगे विधौ ॥ ७८ ॥ कृतषष्टतपाः पंच–मुष्टिकं लोचमाचरत् ॥ केशान् शक्रो न्यधात्क्षीर–वार्द्धौ वासस्तु तन्नुजे ॥ ७९ ॥ युग्मं ॥ निरुद्वे तुमुले स्वामी । सामायिकमशिश्रयत् ॥ मनःपर्ययसंज्ञं तु। जज्ञे ज्ञानं तुरीयकं ॥ ७९ ॥ तद्वज्जग्राह नृपानां। सहस्त्रं व्रतमन्वमुं ॥ शक्रकृष्णादयो नेमिं । नत्वा चागुः स्वमाश्रयं ॥ ८० ॥ द्वितीयेऽह्न्यथ गोष्टांत–वंरदत्तद्विजौकसि ॥ पारणं परमान्नेन । चकार परमेश्वरः ॥ ८१ ॥ तत्रापि पंच दिव्यानि । विदधुर्विबुधेश्वराः॥ अन्यतस्तु विभुः कर्म–क्षयाय विजहार च ॥८२॥ व्रतादथ चतुःपंचा–शदहस्सु गतेष्वगात् ॥ सहस्राम्रवनं नेमि–र्वेतसाश्रयमाप च ॥ ८३ ॥ ध्यानांतरजुषस्तत्रा–श्विन्यमायां विन्नोरथ ॥ घातिकर्मक्षयाज्जज्ञे । केवलं त्वाष्ट्रगे विधौ ॥ ८४ ॥ सद्यः सुरेंद्राश्चलिता–सनास्तत्रैयरुर्मुदा ॥ चक्रुः समवसरणं । तं चान्वपयदीशिता ॥ ८५ ॥ अथोद्यानपतिर्गत्वा । द्वारिकां प्रणिपत्य च ॥ ज्ञानं शशंस श्रीनेमे–रुत्पन्नं मुरवैरिणे ॥ ८६ ॥ दत्वा तस्योचितं दानं । दशार्हैरपरैः समं ॥ मातृबंध्वंगनापुत्रैः । सोत्सवं स गिरिं ययौ ॥ ८७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्र प्रदक्षिणीकृत्य । नत्वा स्तुत्वा च नेमिनं ॥ निषसादानुशक्रं स । यथार्हमपरेऽपि च ॥
॥ ८८ ॥ सर्वे निजेभ्यो भुवनेभ्य एयु—रन्येऽपि देवा जिनभक्तिभाजः ॥ अथो मिथः स्वी-
यसमृद्धियोगा—त्स्पर्द्धापराःस्वस्वपदे निषेदुः ॥ ८९ ॥ इतश्च तच्छासनकाननौघ—पुण्यांबुदो-
त्पन्नतडित्प्रभायाः ॥ कुष्मांडिकायाश्चरितं सुचारु । प्रारभ्यते विघ्ननिघातनिघ्नं ॥ ९० ॥ श्री-
नेमिनाथांह्रिसरोजभृंगी । योगीश्वरी प्रार्थितकामधेनुः॥ अंबा जनांबा त्रिदशी सुखाय । भू-
यात्करालंबिवराम्रलुंबी ॥ ९१ ॥ समग्रराष्ट्राभरणं सुराष्ट्र । सिद्धोज्जयंताद्रिशिरोद्वयाढ्यः ॥
भूस्वर्जयात् श्वभ्रमधो विधाय । मुक्तोपमो योऽखिलतीर्थकेषु ॥ ९२ ॥ तत्रोज्जयंतस्य हि दा-
क्षिणात्ये । दाक्षिण्ययुक्तं च नयप्रपन्नं ॥ ऋद्ध्या कुबेरोपममर्त्ययुक्तं । पुरं कुबेराभिधमस्ति
शस्तं ॥ ९३ ॥ यत्रोच्चसौधाग्रगता मनुष्या । यक्षापभांगःकणवाहिभिस्ते । मरुद्भिरीषच्चपलैश्च
मोचा—दलैः श्रमांभो विलयं नयंति ॥ ९३ ॥ चित्रावलोकाद्विकसज्जनाक्षि—पद्मानि सद्मानि
वनानि तानि ॥ यत्रोच्चशालः कृतवैरिमालः । प्रासाद आपादितपापसादः ॥ ९४ ॥ चैत्येषु
चैत्येषु निषेव्य मूर्ती—र्यत्रार्हतां चित्रमयी रमायाः ॥ षट्कर्मशर्माणि नराः सुभक्त्या । यु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्तया लभंतेऽशुभकर्मघातात् ।। ९५ ।। तत्पाति पोकारियशोभिहारि–गुणोऽरिकुंभींद्रविदारि-
सिंहः ।। कृष्णो नृपो यादववंशरत्न–मयत्नसंपन्नसमीहितार्थः ।। ९६ ।। तत्राभवद्भूरिगुणा-
भिरामः । षट्कर्मसंसाधनपूर्णकामः ।। विप्रो जिनांह्रिस्मरणैकवप्र–संरक्षितद्वादशसद्व्रतश्रीः
।। ९७ ।। रत्नत्रयाधार इहास्ति धर्म–स्तच्चिह्नसूत्रत्रयभूषितांगः ।। साधूक्तसूक्तामृतसिक्तबोधि
–र्दुर्दैवभट्टोऽद्भुतहृद्यविद्यः ।। ९९ ।। [illegible] ।। तत्सूनुरूनीकृतवादिविद्यो–ऽभूद्देवलाकुक्षिसरो-
मरालः ।। लोकप्रियः स्वस्य गुणेन सोम–भट्टाभिधो बुद्धिनिधानमान्यः ।। १०० ।। मुखेंदुना
धिक्कृतचंद्रबिंबा । बिंबाधराराधितशीलधर्मा ।। शर्मास्पदं पत्युरसत्यहीना । तस्यांबिकाख्या
समभूत्कलत्रं ।।१।। लक्ष्मीश्चला वाक्यफला च वाणी । शशांकलेखा कुटिला च खस्था ।।
सापत्न्यशल्या च शची ततोंबा । केनोपमीयेत सुवृत्तयुक्ता ।। २ ।। दिवं गते तज्जनके जिनें-
द्र–धर्मोऽपि सोमस्य दिवं जगाम ।। अंबा तु तत्संगतितो बभार । भद्रैकभावत्वमुदारबुद्धिः
।।३।। अथान्यदा श्राद्धदिने दिनेशे । समाश्रयत्यंबरमध्यदेशं ।। मासोपवासोऽद्भुतकर्महर्म्य–मु-
निद्वयं सोमगृहानवापत् ।। ४ ।। तपःक्षमाभ्यामिव पुष्पदंतौ । दक्षौ महारोगचिकित्सक-

॥३४६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वात् ॥ जीवेंदुजौ वा विबुधेंद्रसेव्यौ । तौ वीक्ष्य हर्षं समवापदंबा ॥ ५ ॥ अचिंतयच्चांतर-
नंतभक्ति-रिमौ मुनी क्षांतिधुनीगिरीशौ ॥ अगण्यपुण्येन गृहांगणं मे-ऽलंचक्रतुः पर्वदिनेऽ-
द्य सद्यः ॥ ६ ॥ शर्मास्पदं पर्व ममाद्य सर्व-सुखान्यसंख्यानि तु पुण्यलब्धौ ॥ दुग्धाब्धि-
धौते इव लोचने मे-ऽभूतां सुपूते मुनिदर्शनेन ॥ ७ ॥ आर्याप्यनार्यास्ति गृहे न मे न । दा-
नं ह्यदत्वा रतिमेति चित्तं ॥ शुभानि धान्यानि च धाममध्ये । मुनी ततोऽमू प्रतिलाभयामि
॥८॥ इत्यंतरा हर्षभरादुदश्रू-रोमांचितांगी सहसासनात्सा ॥ उत्थाय चान्नानि करे गृहीत्वा ।
तत्वादिदं भक्तिभरादवोचत् ॥९॥ युवामवामप्रकृती कृतीशौ । शंके कृतैस्तैः सुकृतैर्मयैव ॥प्रा-
प्तौ गृहान्मे कृपया ततो नु । गृह्णीतमन्नानि भवामि पुण्या ॥ १० ॥ वीक्ष्यैव चित्तान्नविशुद्धि-
मस्या । दधार पात्रं मुनिरर्घ्यपात्रः ॥ अंबापि तस्मै प्रददौ मुदा त-दन्नं गतेर्बीजमिवोत्तमा-
याः ॥ ११ ॥ यदूचतुस्तौ प्रमदेन धर्म-लाभं बलाद्भंजितकल्मषेभं ॥ तेनैव तस्या इभवैरिणे-
व । मुक्ताभिलोभः प्रवितन्यतेस्म ॥ १२ ॥ वाचंयमौ जग्मतुरोकसोऽस्या । न चित्तवृत्तेः शु-
भवृत्तशुक्तेः ॥ कर्मौघघाताद् गृहकर्मणि स्राक् । मंदत्वमासीच्च शुभायतेर्वा ॥ १३ ॥ अथांबि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कायास्तदवेक्ष्य दानं । कृत्येव मूर्त्ता कलहप्रियेव ॥ काचित्तदीयप्रतिवेश्मिनी स्त्रा–गुत्तानपा-
णिः स्वगृहादुदस्थात् ॥ १४ ॥ साचीकृतास्याऽरुणनेत्रपद्मा । वित्रासयंती वचसा जनौघान्
॥ आहत्य हस्तेन कटीतटांतं । वक्तुं कटु प्राक्रमत क्रुधार्त्ता ॥ १५ ॥ स्वातंत्र्यमेतद्वधु ते
धिगस्तु । वस्तु त्वया किंचिदचिंति नैतत् ॥ यत्कव्यहव्याद्यविधाय धान्य–मदा अधन्याय न-
यो न तेऽयं ॥ १६ ॥ श्वश्रूर्न ते सद्मनि यत्त्वयैत–दारभ्यते वैश्यकुलानुरूपं ॥ नाद्यापि पिं-
डः पितृषु द्विजेषु । भोज्यादि न स्वैरविहार एषः ॥ १७ ॥

इत्यारटंती गृहिलेव सोच्चैः । श्वश्रूं तदीयां निकटौकसोऽपि ॥ आकार्य च स्वोक्तिस-
खीं वितेने । वात्येव धूम्यां जगदर्त्तिकर्त्रीं ॥ १८ ॥ त्वया दयाधारतया व्यधायि । नैतच्छुभं
हा यददायि तस्मै ॥ सत्यां मयि त्वत्प्रसरः कथं स्ता–दस्ताघचेतोऽब्धिभृतः सुखाय ॥१९॥
इति द्वयोरंतरगाग्र सांवा । बभार कार्श्यं शशभृत्कलेव ॥ कादंबिनीराहुविभ्रांतरस्था । कंपं
तथश्च हृदि प्रपेदे ॥ २० ॥ इतः स सोमोऽपि न सौम्यवृत्ति–राकार्य विप्रान् स्वगृहानुपेतः
॥ श्रुत्वा तयोरुक्तिमयुक्तकोपः । संतर्जयामास भृशं प्रियां स्वां ॥ २१ ॥ सा सान्निमाना ज-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नवाक्यदूना । मौनान्विता सूनुयुगं गृहीत्वा ॥ स्मृत्वा मनस्याप्तवचो मुनीनां । दीनानना संचरतिस्म गेहात् ॥ २२ ॥ श्वश्वोर्मयाज्ञा न कदाप्यखंडि । पत्युर्हितं न्नक्तियुतं व्यधायि ॥ सर्वाणि कर्माण्यपि शर्महीनं । करोमि गेहस्य विकारवर्जं ॥ २३ ॥ पुण्याद्धि यत्पुण्यतमाय दान-मदायि वाचंयमशेखराय ॥ तच्छ्रेयसे प्रत्युत तेन्य एव । मुधैव मां तत्प्रतिघः क्षिणोति ॥ २४ ॥ पिंमादिन्निश्चेत्तनयप्रदत्तै-र्मृता लन्नंते परमां प्रसत्तिं ॥ तदंबुसेकैर्न्नवितातिशुष्क-स्तरुः स्फुरत्पल्लवपेशलांगः ॥ २५ ॥ मिथ्यात्वमूढैः शुन्नपात्रदान-ममीन्निराकुत्सितमल्पसत्वैः ॥ वैरोचनं मंमलमक्षिरुग्नि-रिव चांइ क्षणदांध्यचित्तैः ॥ २६ ॥ वृथाथवा तेषु मम प्रलापो । मत्कर्मलान्नोऽयमुपस्थितो हि ॥ अतः परं मे गृहवासदास्य-मवश्यनाशं समुपैतु सत्यात् ॥ २७ ॥ तावेव मेऽतः परमस्तु पुण्यौ । मुनी शरण्यौ शरणं न्नवाब्धौ ॥ श्री रैवते दैवतमाकलय्य । नित्यं तपस्यामि कुकर्महान्यै ॥ २८ ॥ इत्यंतरामृश्य सुतं वहंती । एकं कटौ हस्तगतं परं च ॥ विमुच्य शोकं जिनपादपद्म-स्नेहादविध्यातसुन्नक्तिदीपा ॥ ॥ २९ ॥ चित्ते मुनी तौ च गिरिं स्मरंती । विमुक्ततत्तद्गृहवासबंधा ॥ अंबा चचालाचल-

For Private And Personal Use Only

निश्चयालौ । नुन्नेव निःश्वासबलाबलान्निः ॥ ३० ॥ [redacted] ॥

यावत्पुरोपांतमियाय दुःखा–कुला महीदत्तविलोचनांबा ॥ अस्पष्टवर्णं स विवर्णताभा-
ग् । रुरोद तावद्धिभुक्त्कटिस्थः ॥ ३१ ॥ लालाविलास्योऽश्रुविमिश्रनेत्रो–ऽर्भः स चाजल्प-
दनल्पतृष्णः ॥ शुभंकरोऽन्यस्तु विदस्त उच्चै–रुवाच मे भोजनमंब देहि ॥ ३२ ॥ आक्रंदिते-
नेति तयो रवेण । पुनर्नवीभूतशुचाकुलासौ ॥ मुमोच बाष्पाणि विलोचनाभ्यां । भुक्तानि
ताभ्यामिव संप्रविश्य ॥ ३३ ॥ वेश्मार्थनाथे सुखभृत्यवर्गे । देहेऽप्यनीहां दधती वनेऽत्र ॥
विस्मृत्य वाचंयमवाक्यसारैः । शोकं प्रपन्नास्मि जिनांह्रिसेवां ॥ ३४ ॥ बालाविमौ मुग्धमु-
खौ बुभुक्षो–दन्यासमन्यू समयानभिज्ञौ ॥ तदुत्सुकत्वेन ममाशु नाशं । करिष्यतः पूर्वम-
हो स्वघातात् ॥ ३५ ॥ धिग्मां स्वपुत्राभिमतप्रदाना–ऽसहां समग्राशुभकर्मकर्त्रीं ॥ मातः
प्रसीदावनि देहि रंध्रं । यथा तदाश्रित्य नयामि दुःखं ॥ ३६ ॥ भ्रष्टास्मि किं सृष्टरसृष्टियो-
ग्या । तत्तस्थुमग्निप्रभवाखुपत्नी ॥ दुःखानि सर्वाण्यपि चैककाल–मयातरेऽसौ समयोऽस्ति
सद्यः ॥ ३७ ॥ वृथास्त्यरण्ये रुदितं ममाथ । यद्दैवहन्नो दययाश्रितं हि ॥ स्वकर्मभोक्त्री

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





जिनपादपद्म—न्नृंग्यस्मि सर्वं पतितं सहिष्ये ॥ ३८ ॥ इतीरयित्वा निषसाद याव—न्निःश्वासवात्या धुतपार्श्ववृक्षा ॥ तावत्सरोऽन्नांबुन्नृतं पुरस्ता—दस्ताघमालोकयदङ्गगन्नं ॥ ३९ ॥ तथैव पार्श्वद्वितये द्विरेफ—ऊंकारसंरावितकोकिलाच्यां ॥ माकंदकाच्यां परिपाकपिंगा—म्रलुंबिकास्याः करगा व्यधायि ॥ ४० ॥ अपाययत्तज्जलमंजलिच्या—मन्नोजयत्तत्फलमंगजौ सा ॥ वीक्ष्योत्तमं दानफलं च तादृक् । चकार धर्मे रतिमादरेण ॥ ४१ ॥

इतस्तथा तामन्निशप्य कोपा—न्नवान्ननिर्माणविधौ पुरान्नं ॥ नञ्चिष्टवच्चेतसि चिंतयंती । श्वश्रूस्तदीया सदनांतरागात् ॥ ४२ ॥ स्पर्शोपलेनाय इवासनानि । स्पर्शेन कल्याणमयानि मुन्योः ॥ दृष्ट्वान्नपूर्णानि च सर्वतोऽपि । पात्राणि सा प्रीतिमवाप कामं ॥ ४३ ॥ मूढात्मना चंडि यदंविकेयं । रे कोपिता कोऽपि न तावकोऽत्र ॥ दोषः परं दानफलं तवौको—योग्यं न रंकद्विजपुत्रिकासि ॥ ४४ ॥ यदत्र दानं प्रददे तदेत—ददर्शि ते शर्मकरं कलांशं ॥ तस्यास्तु पुण्याङ्गुतवैन्नवाया । न्नावी सुरेशार्च्य नदर्क नच्चैः ॥ ४५ ॥ इत्यंबरोदंतमसौ निशम्य । न्नीतेव निःसृत्य जगाद पुत्रं ॥ पश्यैकसौतर्धनधान्यन्नंगी—मंगीकुरु स्वस्य पुनर्वधूटीं ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ४६ ॥ विशेषकं ॥ वत्सानुनीय त्वरितं ममोच्चैः । प्रीत्यै वधूमानय मानयेमां ॥ विना त-
या मे हृदयं च गेहं । देवार्चयेवासदिवामरौकः ॥ ४७ ॥ निशम्य वाणीमिति मातृवक्त्रा-
त्तत्स्नेहमोहादपि सोत्सुकोऽसौ ॥ तदैव तस्याः पदवीं प्रपेदे । पूरः पयोधेरिव चंद्रिकायाः ।४८।
दृष्ट्वा वने सूनुयुगावलंवि-करद्वयामद्भुततत्प्रभावां ॥ तामाह वाले क्षणमेकमत्र । प्रती-
क्ष मामस्फुटवर्णमित्थं ॥ ४९ ॥ सापि प्रयांती प्रतिशब्दमस्य । स्खलन्नदीनूरुहकोटरांतः ॥
निशम्य वक्रीकृतवक्त्रपद्मा । पृष्टे तमैक्षिष्ट समापतंतं ॥ ५० ॥ अये मयि क्रुद्ध इवैष केन
। संतर्जितोऽकारणवैरिणेव ॥ प्रभंजनेनाग्निरिवाभ्युपैति । कं प्रार्थयेऽहं शरणं वनेऽत्र ॥५१॥
प्रसह्य मामेष विधृत्य घातै-र्विडंबयिष्यत्यदयोऽधुनैव ॥ त्रातास्ति कोऽप्यत्र न किं करोमि।
निःस्वामिकेवांबरसंभ्रवेव ॥५२॥ जिजीविषा कास्तु ममाथवा किं। गृहस्थवासेन च दास-
वृत्त्या ॥ यद्दानवित्तं नियतं मयार्जि । तदेव मे स्तात्परलोकयाने ॥ ५३ ॥ हंता ह्यसौ मां तु
कदर्थनाभि-स्त्यजामि तत्पूर्वमसून् स्वयं स्वान् ॥ इत्थं विमृश्यावटतीरमाप्य। तस्थौ मुमू-
र्षुः पतनेन साथ ॥ ६४ ॥ भूयाज्जिनांह्री शरणं च सिद्धा । मुनी च तौ मे धुतपापभारौ ॥ ॥७५१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दयोदयोद्धारवरो हि धर्म–स्तद्दानमाहात्म्यविजृंभणेन ॥ ५५ ॥ द्विजे दरिद्रे कृपणे च भिल्ले । म्लेच्छे कलंकिन्यधमे परस्मिन् ॥ कुलिंगबंगालकुरौ च कच्छे । सिंध्वादिदेशेषु च मा जनिर्मे ॥ ५६ ॥ अर्थित्वमूर्खत्वमविस्वकार्प–ण्यत्वानि मिथ्यात्वबलाधिपत्वं ॥ विषास्त्रमद्यादिरसापणत्वं । सत्वक्रयो मास्तु भवांतरेऽपि ॥ ५७ ॥ देवादिरत्नत्रयज्ञातृतार्च्ये । दातर्यधीशे च शुभाशुभज्ञे ॥ कुले सुराष्ट्रमगधे च कीर–काश्मीरदिग्दक्षिणजे च देशे ॥ ५८ ॥ ममावतारोऽस्तु धनित्वदातृ–त्वारोग्यताक्षप्रगुणत्वमस्तु ॥ सत्वानुकंपार्त्तजनस्य रक्षा । योगाश्रयो दानभवप्रभावात् ॥ ५९ ॥ कृत्वेति सत्याश्रयणं सती सा । विश्राम्य चित्तं जिनपादपद्मे ॥ युता सुताभ्यां सहसैव झंपा–मदात्तदा साहसशोभितांगा ॥ ६० ॥ कुलकं ॥ तद्रूपमुन्मुच्य नटीव वेषां–तरं गता व्यंतरदेवसेव्या ॥ बभूव देहद्युतिपूरिताशा । सूनुद्वयानंदिमुखारविंदा ॥ ६१ ॥ मामेति जल्पन्नयमभ्युपैति । यावत्पुरस्ताच्च व्यलोकयत्तां ॥ विशीर्णदेहावयवां सपुत्रां । कूपांतरा खेदमवाप चोच्चैः ॥ ६२ ॥ अकाल एवेदमकल्पि बाले । त्वया कथं रोषवशेन सद्यः ॥ अभूवमीदृग् जड एष तत्किं । विदुष्यपि त्वं कृतवत्यदो हा ॥ ६३ ॥ किं

॥ ७५३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जीवितेनेह कलंकितेन । त्वया विना मानिनि निष्फलेन ॥ गत्वा गृहान् स्वस्य मुखं जनानां । कथं कथं दर्शयिता हताशः ॥ ६३ ॥ कलत्रपुत्रांगजमृत्युदुःख–दूनस्य मे सौख्यकरो हि मृत्युः ॥ सर्वस्य नाशे सहसाभ्युपेते । सर्वोऽपि नाशं सममेव यातु ॥ ६५ ॥ दुःखातुरोऽसाविति चिंतयित्वा । तामेव संस्मृत्य तदैव कूपे । झंपामदान्मृत्युमवाप्य चासी–दंबासनेभारिसुरोऽवधिज्ञः ॥ ६६ ॥ कलापकं ॥

इतस्तथैणाधिपवाहनां तां । सूनुद्वयान्यूनमुदावदातां ॥ तत्कालजाताम्ररणत्पिकालि–मालासमालोकनदत्तरागां ॥ ६७ ॥ उद्यन्नभोरत्नकराभदेह–द्युतिहतान्यत्रिदशप्रभौघां ॥ मुखेंदुहस्तैरिव शुभ्रवस्त्रै–र्विभूषितांगावयवप्रदेशां ॥ ६८ ॥ मुखांशुपीयूषपयोधिमध्ये । खेलन्मुखाक्षिद्वयदंतरत्नां ॥ भ्रूमूलनासाद्भुतवंशपत्र–समाधरौष्ठां वरकंबुकंठीं ॥ ६९ ॥ तां वीक्ष्य सर्वावयवानवद्यां । सद्भूषणैर्भूषितदेहदेशां ॥ उपास्यमानां सुरसुंदरीभि–र्नवावतारातिशयिप्रभावां ॥ ७० ॥ पाशाम्रलुंब्यौ दधती कराभ्यां । वामेतराभ्यां तनयांकुशौ च ॥ वामांगगाभ्यां कनकप्रभाभ्यां । वरप्रदानप्रवणार्थवार्णीं ॥ ७१ ॥ भक्त्योल्लसन्मूर्त्तिरुदारराग: । संगो-

For Private And Personal Use Only

प्य पाणिह्नितयेन वेत्रं ॥ वेत्री सुरस्तां प्रणिपत्य हर्षा–द्वक्तुं तदा प्राक्रमतामितोक्तिः ॥७१॥ कुलकं ॥ देवि त्वया पूर्वभवे तपांसि । दानानि तीर्थाश्रयणानि कानि ॥ कृतानि यद्व्यंतरसुंदरीणां । जातासि नः स्वामिनि सेवनीया ॥ ७२ ॥ तदुक्तिमाकर्ण्य कृतावधाना । स्वर्दूपमं पूर्वभवं विलोक्य ॥ तस्मै निवेद्यापि तथा जिनांह्री । असस्मरद्योगयुतेव मौनात् ॥ ॥ ७४ ॥ तदैव देवैः परिक्लृप्तयान–संगीतकाकर्णनदत्तकर्णा ॥ उद्योतयंती ककुभः क्षणेन । श्रीरैवताद्रिं समवाप सांबा ॥ ७५ ॥

इतस्तदैवाविरभूदरिष्ट–नेमेर्वरं ज्ञानमुदस्तकर्म ॥ गत्वा च वेगेन सभासु तस्या–शृणोदुदारामिति धर्मवाणीं ॥ ७६ ॥ धर्मो जगद्बंधुरकारणेन । धर्मो जगद्वत्सल आर्त्तिहर्त्ता ॥ क्षेमंकरोऽस्मिन् भुवने हि धर्मो । धर्मस्ततो भक्तिभरेण सेव्यः ॥ ७७ ॥ सत्पात्रदानं प्रथमात्र शाखा । धर्मद्रुमे शीलमखंडमन्या ॥ ततस्तपोऽपायभरापहारि । भवोपहंत्री शुभभावना च ॥ ७८ ॥ सिद्धोज्जयंतादिसुतीर्थसेवा । देवार्चनं सद्गुरुसेवनं च ॥ अघौघहन्मंत्रपदानि पंच । तदग्रशाखाकुसुमांकुराणि ॥ ७९ ॥ फलं तु मुक्तिः शुभयोगसेवा–निःश्रेणिमाश्रित्य

॥७५५॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदीयमुच्चैः ॥ शमांतरादारुमुदारसत्वै–र्गृह्णीत चित्तानिलकंपहीनं ॥ ८० ॥ विशेषकं ॥ निशम्य वाणीमिति नेमिनस्ते । पणीकृताऽहिंसनधर्मदेहां ॥ सर्वेऽपि तृप्तिं समवापुराप–द्विषार्तिनुद्योगसुधापवित्रां ॥ ८१ ॥ वैराग्यरंगाद्वरदत्तन्नूपो । द्वाभ्यां सहस्रेण च सेवकानां ॥ समं व्रतं प्राप गणेशतां च । दशान्यगच्छेशमुखां जिनस्य ॥ ८२ ॥ प्रवर्त्तिनी न्नूपसुता ततश्चा–न्नूद्यक्षिणी नाम समं पराज्ञिः ॥ दशार्हन्नोजाच्युतसीरिमुख्या–स्तन्नार्य आसंश्च गृहस्थधर्मे ॥ ८३ ॥ संघश्चतुर्धेति च तत्र जात–श्चतुर्गतिध्वांतविघातदीपः ॥ चतुर्वृषागारदृढाद्यधारो । जगद्गुरोर्मुक्तिकलत्रहारः ॥ ८४ ॥ निपीय शक्रो विभुतोंबिकाया–श्चरित्रपीयूषमतिमात्रन्नक्तिः ॥ चकार तामन्यसुरोपरोधा–त्तच्छासनारिष्टनिपिष्टजुष्टां ॥ ८५ ॥

इतोऽन्नवक्षौतमगोत्रजन्मा । गोमेधमुख्याध्वरकारकत्वात् ॥ गोमेधनामा द्विजराट् कलावान् । सुग्रामवासी द्विजलक्षसेव्यः ॥ ८६ ॥ तत्पातकान्नष्टकलत्रपुत्रः । कालक्रमेणोज्झतकुष्टरोगः ॥ मुक्तोऽनुगैरप्यतुलार्त्तिदूनो–ऽकदर्थ्यतोत्पन्नकठोरकीटैः ॥ ८७ ॥ अंगारशय्याखिललीनमूर्तिः । सोऽमन्यतैतन्नरकातिशायि ॥ दुःखं दहद्देहमशेषरोम–कूपाश्रितं मानसमांद्य-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कारि ॥ ८८ ॥ मार्गे लुठंतं श्रवदङ्गपूतिं । लालाविलं शुष्कसमग्रधातुं ॥ दुर्गंधलुब्ध्यागतम-
क्षिकाढ्यं । तं वीक्ष्य कश्चिन्मुनिराह शांतः ॥ ८९ ॥ नद्र त्वयाकारि यदंगिघातो । धर्मैक-
बुध्या कुगुरूक्तिलाजात् ॥ अत्रोग्रपापद्रुसुमं हि लब्ध्वा । फलं पुनः प्राप्स्यसि दुर्गतौ तत्
॥ ९० ॥ ततोऽधुनाप्याश्रय जीवरक्षा–मयं जिनोक्तं शुद्धधर्मसारं ॥ सर्वेषु सत्वेषु निजाप-
राध–क्षांतिं च देह्याश्रय तेषु च त्वं ॥ ९१ ॥ तत्पापशांत्यर्थसमर्थमीड्यं । श्रीरैवताद्रिं स्म-
र मानसांतः ॥ सर्वर्द्धिलुब्धाखिलदेववृंद–सेव्यं जिनौकःशतपूतपृष्ठं ॥ ९१ ॥ इत्युक्तिमासा-
द्य मुनेः स साम्य– पीयूषपूर्णो रहितो विकल्पैः ॥ शांतार्चिरासाद्य मृतिं क्षणेन । यक्षेश्व-
रोऽनूत् प्रवरर्द्धिपूर्णः ॥ ९२ ॥ त्रैलोक्यनाथस्य गुणानसंख्यान् । स्तुवन् पवित्रास्यधरो ब-
भूव ॥ रत्नत्रयाधारवृषाधिवासो । यक्षः स वाक्यान्मुनिपुंगवस्य ॥ ९३ ॥ वामेषु दोष्णु त्रि-
षु शक्तिशूले । दधच्च तद्वत्रकुलं क्रमेण ॥ अन्येषु चक्रं पशुमातुलिंगं । गोमेधनामा मनुजा-
सनः सः ॥ ९४ ॥ अंबेव नक्त्या कृतयानयात–स्तदैव सोऽप्युच्चपरिच्छदः सन् ॥ गत्वा जिनं
रैवतकाद्रिसंस्थं । ननाम तस्योपकृतिं विदानः ॥ ९५ ॥ निशम्य सोऽपीशवचः प्रबुद्धः । श-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





क्रार्थितोबिव वज्ञार नेमेः ॥ सद्भासने सर्वसमीहितार्थ–दाता ह्यधिष्टातृपदं जनानां ॥ ९६ ॥
इतश्च नेमिनं नत्वा । सुरेंद्रो रचितांजलिः ॥ अपृछद्वरदत्तोऽन्नूत् । केन पुण्येन तेऽनुगः
॥ ९७ ॥ कृपावान् विभुरप्याख्य–ज्ञ्योद्बोधकृते ततः ॥ उत्सर्पिण्यामतीतायां । सागरोऽर्ह-
स्तृतीयकः ॥ ९८ ॥ वरज्ञानधरः पृथ्वीं । पावयन् स्वांह्रिरेणुज्ञिः ॥ समवासरङ्कुद्याने । चं-
पापुर्याः पवित्रगीः ॥ ९९ ॥ युग्मं ॥ लोकपुंसो विचारस्या–वसरे विश्वविश्ववित् ॥ स ज-
गाद शिवागार–विचारमिति पावनं ॥ ३०० ॥ पंचचत्वारिंशल्लक्ष–योजनायामविस्तृता ॥
उत्तानछत्राकृतिज्नृ–दस्ति सिद्धिशिलोज्ज्वला ॥ १ ॥ चतुर्विंशतिमे ज्ञागे । सिद्धास्तत्र निरं-
जनाः ॥ अनंतानंतचिद्रूपाः । संति न प्रच्यवंति च ॥ २ ॥ अनंतमचलं शांतं । शिवं सं-
ख्यातिगं महत् ॥ अक्षयारूपमव्यक्तं । तत्स्वरूपं जिनोऽभुते ॥ ३ ॥ स्वसंवेद्यमिदं मुक्ति–
सुखं न वचनातिथि ॥ लज्जते कर्मणां नाशा–ज्जनो योगपवित्रितः ॥ ४ ॥ इतः पंचमकल्पे- ॥३५८॥
शः । श्रुत्वा वाणीं जगद् गुरोः ॥ मंदः स्वर्गसुखे नाथं । प्रणिपत्य व्यजिज्ञपत् ॥ ५ ॥ स्वा-
मिन् ममापि संसार–ज्रांतिरस्तमुपेष्यति ॥ कदापि शिवसौख्यस्य । संगतिर्ज्ञाविनी न वा ॥६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्वाम्यप्यथाह ब्रह्मेंद्र । भाविनोऽरिष्टनेमिनः ॥ द्वाविंशस्यावसर्पिण्यां । भाविन्यां गणभृत्पदं ॥ ७ ॥ प्राप्य संबोध्य भविकान् । रैवताचलमंडनः ॥ त्वं योगयुक्त्या मुक्त्याख्य—पदं प्राप्स्यस्यसंशयं ॥ ८ ॥ युग्मं ॥ स ब्रह्मेंद्रो निशम्येति । प्रमोदोत्फुल्ललोचनः ॥ नत्वा जिनं स्वकल्पेऽगा—द्भृशं मय्यनुरागवान् ॥ ९ ॥ स्वस्योपकारं विज्ञाया—ऽस्मत्तोऽस्मद्ध्यानधारकः ॥ रत्नसारैरधान्मेऽसौ । मूर्तिं नेत्रामृतांजनं ॥ १० ॥ संगीतकं तदग्रेऽपि । चकारानिशमप्यसौ ॥ अपूजयत्रिसंध्यं तां । नित्यार्हत्प्रतिमामिव ॥ ११ ॥ इत्यायुर्निजमापूर्य । स तद्ध्यानैकमानसः ॥ लब्ध्वोत्तरोत्तरभवान् । वरदत्तोऽभवत्त्विह ॥ १२ ॥ यदनेन कृतास्माकं । मूर्त्तिः संपूजितापि च ॥ तत्फलेन गणेशत्वं । लब्ध्वा मुक्तिमुपेष्यति ॥ १३ ॥

तत्सामयिक इत्याथ । ब्रह्मेंद्रोऽथ नमन् विभुं ॥ जगाद साद्यापि विभो। पूज्यतेऽर्चा हि वो मया ॥ १४ ॥ मत्पूर्वैरपि सा शक्रै—र्भक्त्याराध्य स्तुता नता ॥ अधुना तु त्वदादेशा—त्कृत्रिमां वेद्मि नापरे ॥ १५ ॥ विभुरप्याह तच्छक्र । मूर्त्तिमानयतामिह ॥ नित्यार्चारहिता नान्या । कल्पे भवति भूमिवत् ॥ १६ ॥ स्वाम्यादेशादुपादाय । शक्रस्तां शीघ्रमाययौ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृष्णस्त्वर्चाकृते नाम्रा–त्तामर्चां लब्धवान्मुदा ॥ १७ ॥ जगाद विष्णुर्मच्चैत्ये । स्थापितेयं
मयात्र किं ॥ कालं स्थास्यत्यथान्यत्र । क्व च पूजामवाप्सति ॥ १८ ॥ ज्रवाच स्वाम्यपीयं
ते । प्रासादे त्वत्पुरावधि ॥ पूजामाप्स्यत्यतः शैले । कांचनाख्ये सुरैः कृतां ॥ १९ ॥ द्विस-
हस्रीमतिक्रम्य । वर्षाणामतिदुःखदां ॥ अस्मन्निर्वाणसमया–दंबादेशाद्गणिग्वरः ॥२०॥ ततो-
ऽप्यानीय रत्नाह्व । एनां संपूजयिष्यति ॥ पुना रैवतकेऽत्रैव । सप्रासादां सुवासनः ॥ २१ ॥
॥ युग्मं ॥ स्थात्वा लक्षं सहस्राश्च । समास्तिस्रः शतद्वयं ॥ पंचाशतिं तथात्रासौ । तिरो-
धास्यत्यतः पुनः ॥ २२ ॥ एकांतदुःखमाकाले । ततोंबैनां पयोधिगां ॥ कृत्वार्चयिष्यति घनं ।
ततोऽन्येऽपि सुरा हरे ॥ २३ ॥ स कः पुण्यतमो ज्ञावी । योऽर्चां रत्नोऽर्चयिष्यति ॥ विज्ञप्त
इति कृष्णेन । जगद्गुरुरुवाच तु ॥ २४ ॥ त्वत्स्थापितार्चाविगमा–द्विमलो नाम पार्थिवः
॥ ज्ञविष्यत्यत्र जैनेंद्र–धर्मधुर्धरणोद्धुरः ॥ २५ ॥ स रैवते मुख्यशृंगे । चित्रवर्णविनिर्मितां
॥ अस्मन्मूर्त्तिं स्थापयिता । प्रासादे काष्टकूटजे ॥ २६ ॥

तस्यामेवार्च्यमानायां । सुराष्ट्रायां च निवृतौ ॥ कांपील्याख्ये पुरे ज्ञावी । नाम्ना रत्नो

॥ ७६० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वणिग्धनी ॥ २७ ॥ द्वादशाब्दीं ततः कृष्ण । दुष्कालोऽत्र पतिष्यति ॥ घनः प्राणिगणः प्रा-
ण-प्रयाणं हि विधास्यति ॥ २८ ॥ स्थितिहीनस्तु रत्नोऽपि । त्यक्त्वा देशममुं स्यात् ॥ दे-
शाद्देशांतरं गच्छन् । काश्मीरे स्थितिमेष्यति ॥ २९ ॥ स तत्रोपार्ज्य वित्तानि । गृहीतुं तत्फ-
लं व्ययात् ॥ इच्छन् संघजनं भक्त्या-र्थयिष्यति जिनार्चने ॥ ३० ॥ विशेषोत्साहितस्तैस्तु ।
रत्नो हर्षभरोज्ज्वलः ॥ देवालयस्थमर्हंत-मर्चयन् संघशोभितः ॥ ३१ ॥ पुरे पुरे जिनौकां-
सि । नूतनान्यपि कारयन् ॥ पूजयन् गुरुमानंद-सूरिं स हि चलिष्यति ॥ ३२ ॥ युग्मं ॥
भूतव्यंतरवेताल-रक्षोयक्षोद्भवं पथि ॥ प्रत्यूहमंबिकाध्याना-त्स संघस्य हरिष्यति ॥ ३३ ॥
क्रमेण स्वपुरं प्राप्या-मंत्र्य संघं च भक्तितः ॥ शत्रुंजये जिनं नत्वा । रैवतेऽत्र समेष्यति॥३४॥
अस्मद्ज्ञानपदेऽस्माक-मर्चयन् प्रतिमां मुदा ॥ आरुह्यति महाशृंग-मंगरंगत्सुखोन्मुखः
॥ ३५ ॥ गच्छंश्छत्रशिलाधस्ताद् । द्रक्ष्यत्यस्याः सुकंपनं ॥ आकार्याथ गुरून् भक्त्या । तद्धे-
तुमपि प्रक्ष्यति ॥ ३६ ॥ गुरवोऽवधिना ज्ञात्वा । वक्ष्यंत्येवं तमादरात् ॥ तीर्थभ्रंशोऽप्यथो-
द्धार-स्त्वयैव भवितात्र हि ॥ ३७ ॥ व्याहरिष्यति रत्नश्रे-ष्ठी तीर्थभंगो मया विभो ॥ तदलं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्र यानेन । नमस्याम्यत्रगो जिनं ॥ ३८ ॥ त्वत्तो न तीर्थविध्वंसः । किंतु त्वदनुगांगितः ॥
भावी त्वत्तोऽधिकः सोऽपि । तीर्थोद्धारो जिनोदितः ॥ ३९ ॥ निशम्येति गुरोर्वाणीं । सोत्स-
वं संघनायकः ॥ कारयिष्यति संघस्य । प्रवेशं तीर्थमानवैः ॥ ४० ॥ इतः सहर्षाः सर्वेऽपि ।
गजेंद्रपदसंज्ञकात् ॥ कुंडाद्धृतपानीयैः । शुद्धैः स्नास्यंति सत्वरं ॥ ४१ ॥ ततः प्रमोदपूर्णां-
गाः । धौतवासांसि बिभ्रतः ॥ तत्तोयपूर्णकलशा–स्ते विक्ष्यंति जिनालयं ॥ ४२ ॥ देववर्यै-
र्वार्यमाणा । अतज्ञाषाविदोऽथ ते ॥ लेपमूर्त्तिं ममांज्ञोऽद्भिः । स्नापयिष्यंति संमदात् ॥ ४३ ॥
तदंद्भः स्पर्शनादेव । लेपमूर्त्तिर्गलिष्यति ॥ अत्यार्द्रमृत्पिंड इव । स्थास्यत्यासनगा क्षणात् ॥
॥ ४४ ॥ तां वीक्ष्य रत्नः शोकाग्नि–संशुष्यद्धर्मपल्वलः ॥ तदैव मूर्छित इव । भावी किंकर्तृ-
ताजडः ॥ ४५ ॥ तीर्थध्वंसकरं धिग्मां । धिग्मेऽज्ञातृत्वमीदृशं ॥ धिगज्ञानानुगव्रातं । तीर्थ-
ध्वंसकरं हि यत् ॥ ४६ ॥ आगतानामिहास्माक–मासीत्सद्भक्तिजं फलं ॥ येन तीर्थोद्धृतिं त्य-
क्त्वा । तीर्थध्वंसोऽभवद्दृहा ॥ ४७ ॥ कैः कैर्दानैस्तपोभिर्वा । हनिष्याम्येनसं ह्यहः ॥ भृत्या-
नामपराधे य–त्स्वामिदंडः प्रकीर्त्तितः ॥ ४८ ॥ चिंताभिरथवामूर्त्ति–रलं व्यर्थाभिरागसि ॥

ममास्तु शरणं नेमि–नाथोऽतःपरमीदृशः ॥ ४९ ॥
इत्युक्त्वा सोऽखिलैर्लोकै–र्वार्यमाणोऽपि मां स्मरन् ॥ दृढासने निराहारो । निषीदिष्य-
ति सत्ववान् ॥ ५० ॥ कुलकं ॥ निषेदुषोऽथो तस्येत्थ–मुपसर्गेऽप्यकंपिनः ॥ निराहारस्य
मासांते । भविष्यत्यंबिका पुरः ॥ ५१ ॥ अंबादर्शनसंजात–सम्मदः स क्षणादपि ॥ स्वतपः-
प्रत्ययं ज्ञात्वा–भ्युत्थानं च विधास्यति ॥ ५२ ॥ वदिष्यत्यंबिकाप्येवं । वत्स त्वं किं विषीद-
सि ॥ धन्योऽसि तीर्थयात्राभि–रेनान् पुण्यानि लंभयन् ॥ ५३ ॥ प्राचीनविगमाल्लेपः । प्र-
त्यब्दं नूतनो भवेत् ॥ प्रतिष्ठापदमेषोऽस्ति । शंकुः पुनरभंगभृत् ॥ ५४ ॥ संचारय पुनर्लेपं
। प्रतिष्ठामपि कारय ॥ पूर्वत्यागादंशुकानि । नूतनानि भवंति हि ॥ ५५ ॥ अथ वक्ष्यति र-
त्नोऽपि । मैवं मातर्वचो वद ॥ जातोऽस्मि पापवानेव । पूर्वमूर्त्तिविभंगतः ॥ ५६ ॥ तवादे-
शान्नवं लेपं । यदि संचारयाम्यहं ॥ तथाप्यन्योऽपि कोऽप्यज्ञो–ऽहमिव ध्वंसयिष्यति ॥५७॥
तदभंगां परां मूर्त्तिं । प्रसन्नार्पय कांचन ॥ येनांभःस्नात्रपूजाभिः । प्रीयते जनमानसं ॥
॥ ५८ ॥ इत्यनाकर्णितामिव । कृत्वा तद्गिरमंबिका ॥ तिरोधास्यत्यसौ तीव्र–निश्चयस्तु त-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 पिष्यति ॥ ५९ ॥ तस्योपसर्गसंसर्गान् । क्षोन्नाय रचयिष्यति ॥ अंबा स तु महासत्वः । 
स्मरिष्यत्येव मां दृढः ॥ ६० ॥ ततः कुष्मांडिनी साक्षा–दूर्जत्पंचास्यवाहना ॥ उद्योतयंती
 सर्वाशा–स्तत्पुरः स्थास्यति स्थिरा ॥ ६१ ॥ तुष्टास्मि वत्स सत्वेन । तीव्रेणानेन तेऽधुना ॥
मनोऽन्निलषितं स्वस्य । मार्गयस्व ममाग्रतः ॥ ६२ ॥ इति तस्या वचः श्रुत्वा । स एवं
व्याहरिष्यति ॥ तीर्थोद्धारं विना नान्यो । मातर्मेऽस्ति मनोरथः ॥ ६३ ॥ युग्मं ॥ वज्रमूर्त्तें
विन्नोः कांचि–द्देहि मे शाश्वतास्ति या ॥ यामर्चयंतींबुपूरैः । पूरयंति जना मुदं ॥ ६४ ॥
ततो वदिष्यत्यंबापि । तीर्थोद्धारकरो न्नवान् ॥ गदितो गतरागैस्त–द्देहि सार्द्धं मयादृतः ॥
॥ ६५ ॥ विनैव मत्पदन्यासं । मान्यतो निक्षिपेद्दृशं ॥ इति श्रुत्वा तदैवासौ । तत्पृष्टे च ल-
गिष्यति ॥ ६६ ॥ ततोंबा शिखराण्यन्या–न्यपसव्येन मुंचती ॥ पूर्वस्यां दिशि हेमाद्रौ । सि-
द्धेन्नास्यं वदिष्यति ॥ ६७ ॥ चैत्यस्य कांचनाख्यस्य । रक्षार्थमसि नाकिन्निः ॥ मुक्तः स्व- 
न्नक्त्या पिहित–द्वारमुद्धाटय द्रुतं ॥ ६८ ॥

इत्यादेशादंबिकायाः । स तदुद्धाटयिष्यति ॥ तदैव तत्कांतिन्नरो । बहिरुद्योतयिष्यति ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ६ए ॥ घटवक्त्रोपमं द्वारां–तरंबा विछ्यति क्षणात् ॥ सूचीबद्धगुणाकारो । रत्नोऽपि श्रा-
वकाग्रणीः ॥ ७० ॥ तत्र स्थितांबा विंबानि । प्रत्येकं दर्शयंत्यदः ॥ तं वदिष्यति वत्सैषां । क-
र्तृन् शृणु समाहितः ॥ ७१ ॥ सौधर्मपतिना नीलो–पलैरेतद्विनिर्मितं ॥ धरणेनाहिनाचैतत् ।
पद्मरागाश्मन्निर्वरैः ॥ ७२ ॥ अमूनि ज्ञरतादित्य–यशोबाहुबलिमुखैः ॥ विधाय रत्नमाणि-
क्यैः । पूजितानि निरंतरं ॥ ७३ ॥ ब्रह्मेंद्रैरिदमुद्दाम–रत्नमाणिक्यसारजं ॥ चिरमप्यार्चि कढपे
स्वे । शाश्वतप्रतिमोपमं ॥ ७४ ॥ अमूनि कृष्णसीरिन्ज्यां । कारितान्यर्चितान्यपि ॥ एषु य-
द्रोचते तुज्यं । तद्गृहाण मदाज्ञया ॥ ७५ ॥ अथो रत्नमणीहेम–मयान्यस्मिन् जिघृक्षति ॥
वदिष्यत्यंबिका वत्स । गृहाणामूनि मा शृणु ॥ ७६ ॥ कालेऽतो दुःषमानाम्नि । लोको न्नाव्य-
तिनिर्घृणः ॥ सत्यशौचदयाहीनो । गुरुदेवार्च्यनिंदकः ॥ ७७ ॥ न्यायहिनाः परद्रव्य–परदा-
राकृतादराः ॥ भूपा म्लेछाश्च ज्ञूपीठे । ज्ञविष्यंत्यपि तस्कराः ॥ ७८ ॥ निर्मर्यादाः कदाप्येते
लोज्ञादाशातनां ततः ॥ करिष्यंति मयि क्वापि । गतायां शून्यमंदिरे ॥ ७ए ॥ तस्मादुद्धा-
रतो हान्याः । पश्चात्तापो ज्ञविष्यति ॥ नाज्ञूतायां तथा लक्ष्म्यां । गतायां सहसा यथा ॥८०॥



For Private And Personal Use Only

तदिदं ब्रह्मशक्रस्य । सुस्थिरं बिंबमावह ॥ विद्युद्वह्निजलायोऽश्म–कुलिशैरप्यभंगुरं ॥ ८१ ॥
मेति व्याहृत्य तत्कांतिं । स्तृतां द्वादशयोजनीं ॥ माययाच्छाद्य तद्वेषो–पलकत्वं विधास्यति
॥ ८२ ॥ तत्सूक्ष्मतंतुनिर्बध्ध्वा । तमंबा कथयिष्यति ॥ यत्र मोक्ष्यसि तत्रैतत् । स्थास्य-
त्यद्रिरिव स्थिरं ॥ ८३ ॥

अनुशास्येति तं दत्वा । बिंबमंबा व्रजिष्यति ॥ सोऽप्यन्यककुन्नालोक–हीनस्तच्च हरि-
ष्यति ॥ ८४ ॥ युग्मं ॥ क्रमादस्खलदंहिस्त–दुद्वहंस्तूलवत्पथि ॥ प्रासादद्वारमासाद्य । चिं-
तामिति करिष्यति ॥ ८५ ॥ मुक्त्वेदमत्र मध्यस्थ–पूर्वबिंबविलेपनं ॥ हत्वैतत्स्थापयाम्यंत–
रिति मोक्ष्यति तत्र सः ॥ ८६ ॥ यावत्प्रमार्ज्य चैत्यांत–रेषोऽभ्येष्यति संमदात् ॥ तावत्त-
न्मेरुवत्तत्र । ध्रुवमालोकयिष्यति ॥ ८७ ॥ मर्त्यकोटिभिरप्येत–न्नैव चालिष्यते यदा ॥ तदा-
सौ पूर्ववत्तीव्रं । तपिष्यति तपः स्थिरः ॥८८॥ सप्तोपवासपर्यंते । स्वप्नेंबा दर्शयिष्यति ॥ व्या-
हरिष्यत्यपि स्वैरं । किमिदं वत्स तन्यते ॥ ८९ ॥ यत्र मोक्ष्यसि तत्रैव । स्थास्यतीदं वचो
मम ॥ विस्मृत्येति त्वयामोचि । कथमत्रैव शाश्वतं ॥ ९० ॥ मा कुरु त्वं वृथायासं । ध्रुवं

॥७६६॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मेरुसुनिश्चलं ॥ न चलिष्यत्यदो देव–दानवैरप्यतः पदात् ॥ ९१ ॥ प्रासादमेव व्यावृत्य । पश्चिमाभिमुखं कुरु ॥ यथा त्वंपश्चिमं पुण्यं । तावकं भावि शाश्वतं ॥ ९२ ॥ अन्यत्र भाविनस्तीर्थो–द्धारा भूयांस एव हि ॥ भवानेवात्र तीर्थस्यो–द्धारकृद्धिंबवत् स्थिरः ॥ ९३ ॥ अंबा तमनुशास्येति । वरं दत्वातितोषभृत् ॥ तिरोधास्यति वेगेन । तथा सोऽपि करिष्यति ॥ ॥ ९४ ॥ अथ रत्नः समं संघै–हर्षोत्कर्षभरोद्धुरः ॥ तथैव विहिते चैत्ये । प्रतिष्टां कारयिष्यति ॥ ९५ ॥ सूरिमंत्रपदाकृष्टै–र्दैवतैः सूरिभिस्तदा ॥ तद्बिंबमपि चैत्यं च । साधिष्टायि करिष्यति ॥ ९६ ॥ ततः सोऽष्टविधामर्चां । कृत्वा दत्वा महाध्वजं ॥ भक्तिनम्रो मुदोदारो । मामिति स्तोष्यति ध्रुवं ॥ ९७ ॥ जयानंत जगन्नाथ । जयाव्यक्त निरंजन ॥ चिदानंदमय स्वामिन् । जय त्रैलोक्यतारक ॥ ९८ ॥ जंगमे स्थावरे देहे । सदा त्वमसि शाश्वतः ॥ अप्रच्युतो ह्यनुत्पन्नो । धात्वामयविवर्जितः ॥ ९९ ॥ त्रिदशैरप्यचाल्योऽसि । सुरासुरनरार्चितः ॥ अचिंत्यमहिमोदार–विनिर्जितरिपुव्रजः ॥ ४०० ॥ छत्रत्रयीमिलच्चारु–चामरद्वयवीजितः ॥ प्रातिहार्यश्रियोदार । विश्वाधार नमोऽस्तु ते ॥ १ ॥ इत्यभिष्टुत्य रोमांची । पंचांगस्पृष्ट-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भूतलः ॥ साक्षादिव स मां पश्यन् । मूर्त्तिं तां प्रणमिष्यति ॥ २ ॥ तत्कंठे स्वयमेवाथ । पारिजातसुमस्रजं ॥ अंबा निधास्यति समं । क्षेत्रपालमुखामरैः ॥ ३ ॥ ततः स कृतकृत्यः सन् । वसन् सौराष्ट्रमंडले ॥ सप्तक्षेत्रोप्तसद्बीज—फलं मोक्षमवाप्स्यति ॥ ४ ॥

इत्थं स रत्नः प्रतिमां । कृष्ण पूजयिता मम ॥ जावी त्वमपि तीर्थस्यो—द्धारतस्तीर्थकृत्किल ॥ ५ ॥ तदाकर्ण्य विज्ञोर्वाणीं । कृष्णः संजातसंमदः ॥ ज्ञानस्थाने विज्ञोश्चैत्यं । कारयामास शिल्पिभिः ॥ ६ ॥ गणभृन्निर्विभोर्वासै—रपि प्रातिष्ठपत् स तत् ॥ कृष्णोऽथ जलयात्रायै । सुरमर्त्यान्न्यमंत्रयत् ॥ ७ ॥ वाद्यमानेषु वाद्येषु । कुंजहस्तांगनाजनैः ॥ समं परिवृतो देवैः । कृष्णः कुंडान्यगाहत ॥ ८ ॥ पूर्वमैरावते कुंडे । गत्वा तन्निर्णयाय सः ॥ पप्रच्छ शक्रं गोविंद । एतन्नामार्थ एष कः ॥ ९ ॥ जगाद प्रहरिः पूर्व—मायाते जरतेश्वरे ॥ तत्कालेऽड्रोऽत्र विदधे । कुंडमेतद्दिग्नाधिपात् ॥ १० ॥ चतुर्दशसहस्राणां । नदीनां वारिराशयः ॥ पेतुरस्मिंस्ततः पूतं । कुंडं कश्मलघात्यदः ॥ ११ ॥ पयसास्य जिनो येन । स्वयं स्नात्वा च स्नापितः ॥ तेन कर्ममलैर्लिप्तः । स्वात्मा पावित एव च ॥ १२ ॥ कासश्वासारुचिग्लानि—



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रसूत्युदरजा रुजः ॥ नश्यंत्यस्यांबुपानेन । वाह्या आंतरगा इव ॥ १३ ॥ इदं तु धरणेंद्रेण । नागेनाकारि पावनं ॥ एतच्च चमरेंद्रेण । स्वयुग्येन कलापिना ॥ १४ ॥ एतयोरंबुन्निरपि । जंगमं स्थावरं विषं ॥ क्षयश्वासादयो रोगा । विध्वंत्यसहिष्णवः ॥ १५ ॥ न्नूर्भुवस्वस्त्रयीराज्यं । न दूरेऽप्यनयोर्जलैः ॥ यः स्नाति जिनमात्मानं । चातिशुद्धमना न्नवन् ॥ १६ ॥ अमूनि वलिसूर्येंदु–निर्मितान्यपराण्यपि ॥ कुंडानि कश्मलहरा–एयथ तन्नैः पयोऊरैः ॥ १७ ॥ अंबया न्नरतोद्धार–संख्यात्विदमदीपि यत् ॥ तेनांबाकुंममधुना । वैशिष्टाख्यमजायत ॥ ॥ १८ ॥ हरिः पुनर्हरिं प्राह । को विशिष्टोऽन्नवन्महान् ॥ यन्नाम्नालोपि तत्पूर्वं । नाम देव्याः सुपावनं ॥ १९ ॥

अथो जगाद सौधर्म–पतिः शृणु हरे कथां ॥ विशिष्टस्य जिनस्याब्ज–वचोमधुविमिश्रितं ॥ २० ॥ आसीदष्टमविष्णौ क्ष्मां । पालयत्यब्धिगां तटे ॥ विशिष्टनामा प्रावाजां । पतिस्तीव्रतपाः क्वचित् ॥ २१ ॥ वेदवेदांगविज्ञानन्–कौटिल्यकुशलां कलां ॥ सोऽर्च्यते कार्यतो लोकैः । कंदमूलफलांबुभुक् ॥ २२ ॥ उटजाजिरविस्तारि–नीवाराहारकारिणीं ॥ सोऽ-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्यदा लकुटेनेणीं । न्यहन्मंदपदो रुषा ॥ २३ ॥ तेन घातेन सा दीर्णो–दरभ्रस्यच्छिशूत्करा ॥
॥ लोलखुरोत्कीरत्पृथ्वी । प्राणांस्तत्याज पीडिता ॥ २४ ॥ तदालोक्य विशिष्टोऽपि । कष्ट-
मंतरदूयत ॥ अहस्यत जनैर्बाल–स्त्रीघातक इति द्रुतं ॥ २५ ॥ प्रायश्चित्तचिकीः सोऽपि ।
पापज्ञीरुर्गतानुगः ॥ नदीहृदगिरिग्राम–वार्द्धिष्वभ्रमदभ्रवत् ॥ २६ ॥ अष्टषष्ठिमितान्येवं । ती-
र्थान्येष विहृत्य च ॥ मन्यमानो निजं शुद्धं । पुनः स्वपदमाप्तवान् ॥ २७ ॥ ततः कश्चिद्भ्र-
मन् जैन–मुनिर्ज्ञानपवित्रितः ॥ तस्योटजतटं प्राप्य । स्थिरोऽस्थात्प्रतिमाधरः ॥ २८ ॥ इ-
तश्च पर्यंतपुर–वासिनो मुनिमागतं ॥ ज्ञात्वैत्य ज्ञक्तितो नेमुः । संशयध्वांतज्ञास्करं ॥ २९ ॥
व्याख्यायमानं सर्वेषां । श्रुत्वा पूर्वज्ञवान्मुनिं ॥ विशिष्टोऽन्येत्य पप्रछ । तत्कर्मास्ति ममाद्य
न ॥ ३० ॥ मुनिराह कथं शैल–नदीभ्रमणमात्रतः ॥ निविर्डं याति तत्कर्म । विना क्षेत्रं
विना तपः ॥ ३१ ॥ क्लेश एव हि मिथ्यात्व–तीर्थभ्रमणतो ज्ञवेत् ॥ विना रैवतकं शैलं ।
तत्तत्पापव्ययपोहकं ॥ ३२ ॥ विशिष्टोऽप्यथ पप्रछ । मुने क्षेत्रं तपो हि यत् ॥ त्वयाख्यायि
समग्रं तद् । ब्रूहि मत्पापशांतये ॥ ३३ ॥ मुनिराह सुराष्ट्राख्ये । देशे क्षेत्रं हि रैवतः ॥ पं-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चाक्रनिग्रहोऽरिष्ट–नेमेराराधनं तपः ॥ ३४ ॥ अस्ति चेत्पापतो नीति–र्मतिः पुण्येऽतिनिर्म-
ला ॥ सत्कृत्याप्तिप्रतिभुवं । तदैवतमन्निश्रय ॥ ३५ ॥
श्रुत्वेत्युत्फुल्लनयनो । विशिष्टः शिष्टबोधिभृत् ॥ चंडालपाटकमिव । तदाश्रमपदं जहै ॥
॥ ३६ ॥ तमालश्यामलं नेमिं । स्फुरत्तेजोऽग्निज्वासितं ॥ संस्मरन्मनसा साम्या–दैवताद्रिम-
वाप सः ॥ ३७ ॥ शृंगं प्रदक्षिणीकृत्य । मुख्यं त्रिर्जीवन्नासुरः ॥ उत्तरस्याः स पद्याया ।
मार्गेणारोहदद्रिपं ॥ ३८ ॥ मुक्त्वा दक्षिणतश्छत्र–शिलामंबागिरेरधः ॥ अंबाकुंडमवाप्यासौ
। तज्जलैः स्नानमातनोत् ॥ ३९ ॥ कुर्वन् स्नानं हृदंभोजे । ध्यायन् स्फटिकनिर्मलं ॥ आ-
र्हन्त्यं स महः प्राप । सद्ध्यानध्येयविस्मृतिं ॥ ४० ॥ यावत्स्नात्वा बहिर्याति । तावदाकाशगी-
रिति ॥ अनूज्जातोऽसि शुद्धस्त्वं । मुने हत्याविवर्जितः ॥ ४१ ॥ अंबाकुंडजलस्नान–ध्यान-
युक्तस्य तेऽशुभं ॥ प्रक्षीणं सकलं कर्म । ततो नेमिं समाश्रय ॥ ४२ ॥ इत्यंबरगिरं श्रुत्वा
। विशिष्टो हृष्टमानसः ॥ तदैव नेमिनाथौको–मध्ये नेमिं नमोऽकरोत् ॥ ४३ ॥ अन्निष्टुत्या-
पि सद्भक्त्या । ध्यात्वा तं च समाधिना ॥ तप्त्वा तत्र तपोऽत्यर्थं–मवधिज्ञानमाप सः ॥४४॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पूर्वमेव धरन् वेषं । जिनध्यानपरायणः ॥ क्रमादवाप देवत्वं । परमर्द्धिपवित्रितं ॥ ४५ ॥ यत्कृष्णात्र विशिष्टस्य । हत्यादोषोऽनशत्ततः ॥ तन्नाम्नैवेदमाख्यातं । कुंडं लोकेषु पावनं ॥ ॥ ४६ ॥ वातव्याध्यश्मरीमेह–कुष्टदद्रुमुखामयाः ॥ नश्यंत्यस्यांबुसंसर्गा—त्सद्यस्त्यापि दुस्तरा ॥ ४७ ॥

श्रुत्वेति कृष्णः कुंडानां । प्रभावं तादृशं हरेः ॥ आदाय तेषां चांभांसि । नेमिमंदिरमासवान् ॥ ४८ ॥ समर्मिश्रैर्विभोः स्नात्रं । कर्पूरागुरुचंदनैः ॥ विधाय पूजां विधिव–द्विष्णुराराात्रिकं व्यधात् ॥ ४९ ॥ भक्तिदामोदरे बद्ध । इति दामोदराभिधां ॥ दामोदराभिधे द्वारे । स स्वमूर्त्तिमकारयत् ॥ ५० ॥ विशेषादधिकां भक्तिं । ज्ञापयन् स्वस्य मूर्द्धनि ॥ दधार नेमिनोबिंबं । कृष्णो द्वाःस्थोऽभवत्स्वयं ॥ ५१ ॥ यत्रामुचद्विभुर्वस्त्रं । तत्र वस्त्रापथाभिधे ॥ तीर्थेऽभूत्कालमेघाख्यः । शास्ता क्षेत्रपतिर्गिरौ ॥ ५२ ॥ अमलत्वविधानेन । प्राणिनां स्वजलप्लुतैः ॥ तटिन्याममलकीर्त्तौ । भवोऽभूद्देवताधिपः ॥ ५३ ॥ इतः कर्णाटदेशेऽभू–च्चक्रपाणिर्नराधिपः ॥ प्रियंगुमंजरीनाम । तत्पत्नी च गुणोज्ज्वला ॥ ५४ ॥ सान्यदासूत तनयां ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir







नारीदेहां मनोहरां ॥ कपिवक्त्रां च तां वीक्ष्य। राजा चित्ते विसिस्मये ॥ ५५ ॥ रिष्टशंकी नृपः शांति—कर्म सर्वत्र निर्ममे ॥ चैत्ये चैत्ये च देवानां । पूजां पात्रार्चनं तथा ॥ ५६ ॥ नित्यं नित्यं नृपागारे । वर्द्धयंती श्रियं तु सा ॥ क्रमादंगेषु लावण्य—मपुषत्सुभगोत्तमा ॥५७॥ सौभाग्यमंजरी नाम्ना । चतुःषष्टिकलाकला ॥ सान्यदा जनकोत्संग—मलंचक्रे सभासु च ॥ ॥ ५८ ॥ इतो वैदेशिकः कश्चि—त्प्राप्तो नृपसभां तदा ॥ चकार सर्वतीर्थानां । महिमोत्कीर्त्तनं वरं ॥ ५९ ॥ पुंडरीकाद्रिमाहात्म्य—मुक्त्वा रैवतभूभृतः ॥ इत्युज्जगार संसार—तारणं पुण्यकारणं ॥ ६० ॥ राजन् रैवतकशैल—न्नमीलत्पुण्यसंचयः ॥ निर्मीलद्दुःखदारिद्यो । जयत्यजय एनसा ॥ ६१ ॥ सर्वकल्याणनिर्माण—प्रवीणे रैवते गिरौ ॥ भवद्वयेऽपि नो भीति—र्दारिद्यस्य तथैनसः ॥ ६२ ॥ तत्र शृंगाणि पूतानि । नद्यो निर्झरणानि च ॥ धातवो भूरुहाः सर्वे । सुखाय सकलांगिनां ॥ ६३ ॥ देवाः सेवापरा नेमे—र्यत्र प्राप्ताः सुपावने ॥ स्वर्गस्य सुखसर्गस्य । न स्मरंत्यपि भूपते ॥ ६४ ॥ सौभाग्यमंजरी सेति । शृण्वंती रैवतप्रथां ॥ क्रमादासादयामास । मूर्छां पूर्वभवस्मृतिं ॥ ६५ ॥ शीतोपचारनिचयैः। क्रमादवाप्तचेतना॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





जगाद पितरं दुःखा—तुरं सेति प्रमोदनाक् ॥ ६६ ॥ ममाद्य मंगलं तात। शृण्वत्र किल कारणं ॥ प्राग्नवे रैवते शैले—ऽनूवमेका कपिप्रिया ॥ ६७ ॥

सदा चापल्यतस्तत्र । विवेकविमुखा सती ॥ अत्रमं सर्वशृंगेषु । नूरुहेषु नदीष्वपि ॥ ॥ ६८ ॥ मुख्यशृंगात् प्रतीच्यां तु । नद्यस्त्यमलकीर्त्तिका ॥ नानाहृदप्रन्नावाढ्या । नेमिहृष्टिपवित्रिता ॥ ६९ ॥ सा कपी सर्ववृक्षेषु । त्रमंती स्वेछया किल ॥ जातिचापल्यतस्तत्रा—गमत्कपिकुलैर्वृता ॥ ७० ॥ तत्कालाद्य महावल्ली—वितानैर्बद्धकंठिका ॥ जहौ क्षणादसौ प्राणां—स्तिर्यग्नवकलंकितान् ॥ ७१ ॥ तीर्थवासादहं राजन् । जातास्मि तव नंदना ॥ वपुर्वैचित्र्यामेतत्तु । शृणु चित्रकरं मम ॥ ७२ ॥ लतापाशनिबद्धाया—स्तस्या यत्सकलं वपुः ॥ गलित्वामलकीर्त्तौ हि । नद्यां वक्त्रं विनापतत् ॥ ७३ ॥ जातास्मि तेन सर्वांग—स्फुरल्लावण्यमंडिता ॥ बिनर्मि च कपिवक्त्रं । तन्नदीजलवर्जितं ॥ ७४ ॥ मन्निरस्तत्र संस्थं त—न्नद्यां तस्यां क्षिप प्रन्नो ॥ यथा विडंबनाहीनं । निजं जन्म नयाम्यहं ॥ ७५ ॥ अनेन रैवताख्यान—श्रावणात्स्मारितास्मि यत् ॥ तन्मद्बंधुरसौ नूनं । पितर्मान्यस्त्वया घनं ॥ ७६ ॥ इ-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ति पूर्वभवं श्रुत्वा । सुतायाः प्रीतमानसः ॥ नरैर्नराधिपो नद्यां । तच्छिरोऽपातयद् द्रुतं ॥७७॥
सा तदैव मुखेनेंदुं । जिगाय शुभलोचना ॥ राजा तु तीर्थमाहात्म्यं । दृष्ट्वा चित्ते विसिस्म-
ये ॥ ७८ ॥ संसारविमुखा साथ । निषिध्य पितरं बलात् ॥ स्वविवाहोत्सुकं चेले । प्रति रै-
वतपर्वतं ॥ ७९ ॥ तपस्यंती तपस्तीव्रं । सा जिनध्यानतत्परा ॥ बहून्यशुभकर्माणि । क्षमा-
दक्षिपदुन्मनाः ॥ ८० ॥ तीर्थमोहान्मृता साभू-त्तत्रैव व्यंतरामरी ॥ तन्नदीह्रदमास्थाय ।
संघविघ्नौघनाशिनी ॥ ८१ ॥ अथ तत्प्रभवे तीर्थे । पृथु माहात्म्यमभूत् क्षितौ ॥ सा च व्यंतर-
देव्यासी-त्तदा सर्वसुरानुगा ॥ ८२ ॥ इंद्रः कोणे च वायव्ये । पुरीमिंद्राभिधं निजं ॥ विधाय
मूर्ध्ना नेमिं च-धरन्नस्थादरिष्टनुत् ॥ ८३ ॥ ब्रह्मेंद्रोऽथ निजां मूर्त्तिं । द्वारे स्मरनामनि ॥
व्यधान्नेमिजिनध्यान-पूतः संघस्य वृद्धये ॥ ८४ ॥ नंदनेंद्रोऽथ रुद्रोऽभू-न्मल्लिनाथाभिधो
बली ॥ गिरिद्वारे जिनध्यान-पूतमानसवासनः ॥ ८५ ॥ अस्थान्महाबलद्वारे । बलभद्रः
स्वयं बली ॥ शिरश्छत्रीकृतजिन-पादपद्मगतातपः ॥ ८६ ॥ द्वारेऽस्थाद्बकुलाख्ये तु । स्वयं
वायुर्महाबलः ॥ प्रत्यूहतृणसंघातं । सहसोद्धाययन् जने ॥ ८७ ॥ तत्रोत्तरकुरुस्थाना-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्तस्थुः सप्तापि मातरः ॥ द्वारे बदर्याः स्वस्वास्त्र–हतप्रत्यूहशात्रवाः ॥ ८८ ॥ केदाराख्ये तु केदार–नामा रुद्रोऽहिरक्षकः ॥ एवमाशासु सर्वास्वा–सन्नष्टौ त्रिदशोत्तमाः ॥ ८९ ॥ प्रातिहार्या यथा चाष्टौ । जिने तद्वद्गिरावपि ॥ अत्राष्टौ देवतास्तद्वत् । प्रतिहारा गदायुधाः ॥९०॥ सर्वेऽपि मूर्ध्ना नेमीश–पादपद्मपवित्रिताः ॥ महाप्रभाववित्रस्त–प्रत्यूहव्यूहनिर्मलाः ॥ ९१ ॥ सर्वेऽप्यसंख्यत्रिदशाः । पूर्यमाणसमीहिताः ॥ नानायुधयानभृतो–ऽभुवन् भविकवत्सलाः ॥ ॥ ९२ ॥ मुख्यशृंगोत्तरेणासी–न्मेघनादो महाबलः ॥ इप्सितदोऽभवद्भक्त–मेघनादोऽभिरक्षिता ॥ ९३ ॥ सिंहनादस्यस्तु पूर्वस्यां । सिंहनादोऽपि दक्षिणे ॥ एतैश्चतुर्भिस्तच्छृंगं । चतुर्मुखमिवाभवत् ॥ ९४ ॥ मुख्यशृंगाच्चतुर्दिक्षु । द्वे द्वे ये शिखरे लघू ॥ तत्र तत्र मृतो दग्धो। मर्त्यः स्यात्त्रिदशोत्तमः ॥ ९५ ॥ तत्र स्थितास्तपस्यंतो । नेमिध्यानपरायणाः॥ लब्ध्वाष्टसिद्धीर्मनुजाः । प्राप्नुवंत्यव्ययं पदं ॥ ९६ ॥

छायाकल्पद्रुमास्तत्र । वल्ल्यो वांछितदानदाः ॥ रसकूप्यः कृष्णचित्राः । संति लभ्याः स्वपुण्यतः ॥ ९७ ॥ प्रतिद्रुमं प्रति सरः । प्रतिकूपं प्रतिह्रदं ॥ प्रतिस्थानं सुरा आसन् । ने-

For Private And Personal Use Only

मिथ्यानपरायणाः ॥ ९८ ॥ हारांतर्नायक इव । तन्मध्योच्चशिरःस्थिता ॥ सिंहासनांबा स-
मभूत्संघस्येष्टार्थदायका ॥ ९९ ॥ यत्रस्थेन भगवता । नेमिनालोकितं पुराक् ॥ आलोक-
नाख्यं तच्छृंग—मभूत्तद्विवपावितं ॥ ५०० ॥ अंबा गिरेर्दक्षिणतो । यक्षो गोमेधनामभूत् ॥ त-
स्थौ सर्वास्त्रसंरुद्ध—युद्धोद्धुररिपुव्रजः ॥ १ ॥ उत्तरेण महाज्वाला—भिधा देवी प्रसन्नदृक् ॥ अ-
स्यात्संघस्य विघ्नौघ—निवारणपटीयसी ॥ २ ॥ यत्र मुक्तं च लात्तं च । पूजायंते च शार्ङ्गि-
णा ॥ छत्रं सासीच्छिला लोके । नाम्ना छत्रशिलेति च ॥ ३ ॥ बहून्येवं हि शृंगाणि । कंदरा
अपि भूरिशः ॥ शिश्रियुर्बहवो देवा । जिनसेवापरायणाः ॥ ४ ॥ स्थानेष्वेवं समग्रेष्व—धि-
ष्ठितेषु सुरैरथ ॥ गिरिर्जातः सुरमय । इव स्वर्गान्मनोहरः ॥ ५ ॥ अथोत्तीर्य सुराः सर्वे ।
कृतकृत्या जिनाधिपं ॥ नत्वा स्वं स्वं पदं प्रापुः—पुनरागमनोत्सुकाः ॥ ६ ॥ उत्तरन्नथ कृ-
ष्णोऽपि । सतृष्णः पुण्यकर्मणि ॥ पथि विंडुगुहामध्ये । मुनिमेकमलोकयत् ॥ ७ ॥ तदैव हृ-
ष्टहृदयो । हृषीकेशो नमन्मुनिं ॥ तदुक्तं चोज्जयंताद्रेः । प्रभावमशृणोद् घनं ॥ ८ ॥ चारु-
त्वं च गिरेः पश्यं—स्तत्रस्थोऽथ जनार्दनः ॥ व्यलोकयद्गिरिं वायु—कोणेऽपृच्छच्च तं मुनिं ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ९ ॥ मुनिराद्दोज्जयंताद्रि–शिर इत्यज्ञिधानतः ॥ अयं ह्यतोऽप्युमाशंभु—रिति नाम्ना ज्ञविष्यति ॥ १० ॥

तथाहि वैताढ्यगिरौ । रुद्रो विद्याबलात्ततः ॥ रुद्राज्ञिधो महीं सर्वा–माक्रमिष्यति खेचरः ॥ ११ ॥ ज्रमेति वल्लन्ना तस्य । जीवितव्यमिवापरं ॥ ज्ञविष्यत्यनवद्यांगी । बहुनारीपतेरपि ॥ १२ ॥ जनस्तन्नीतितः सर्व–स्तद्भांत्यै शंभुमित्यमुं ॥ न्नदीयं सोमं सन्नक्त्या । ध्यास्यतीष्टसुरेंद्रवत् ॥ १३ ॥ स्वध्यातॄणामसौ तुष्टो । दास्यत्यज्ञिमतं सदा ॥ जनस्तेन विशेषात्तं । सदैवाप्यर्चयिष्यति ॥ १४ ॥ नगारामनदीचैत्य–स्थानेषु स रमन्मुदा ॥ न्नज्जयंतशिरस्येत्यो–मया सह तपिष्यति ॥ १५ ॥ चारणर्षिमतस्तत्र । स्थितं ज्ञक्त्या नमस्यति ॥ तस्योपदेशमासाद्य । स पापाद्विरमिष्यति ॥ १६ ॥ दुःखश्रेर्विषयस्याद्यं । मूलं नारीं विदन्नुमां ॥ त्यक्त्वा सहस्राब्रिंदौ स । कंदरायां तपिष्यति ॥ १७ ॥ तद्योगरहितोमापि । तत्प्रवृत्तिमजानती ॥ तपिष्यति तपस्तीव्रं । स्थिता ब्रिंदुशिलोपरि ॥ १८ ॥ तद्ध्यानयोगसंतुष्टा । साक्षाद्भूयेप्सितं वरं ॥ अस्या निश्चलचित्ताया । गौरीविद्या प्रदास्यति ॥ १९ ॥ तद्वरात्स्वं पतिं ज्ञात्वा । गत्वा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तमतिरूपिणी ॥ क्षोभयिष्यति सा ध्याना-न्नार्याः क्षुभ्येत को न हि ॥ २० ॥ तथैव स पुनस्तस्यां । प्रेममग्नो रमिष्यति ॥ तन्नाम्ना प्रथिते शैले-ऽस्मिन्नुमाशंभुनामनि ॥ २१ ॥ सहस्रबिंदौ यत्तेन । नेमिराराधितो जिनः ॥ तेनार्हन् भविता सोऽय-मुत्सर्पिण्यां सुरार्चितः ॥ २२ ॥ कृष्णोऽपीति मुनेः श्रुत्वा । नत्वा तं च जिनेश्वरं ॥ परिवारयुतोऽप्याप-त्पुनः स्वां द्वारिकां पुरीं ॥२३॥ प्रबोधयन्नथ स्वामी । गिरिनिर्भविकमानवान्॥ विजहार धरापीठे । सहस्रांशुरिवांगवान् ॥ २४ ॥

राजीमत्यथ संविग्ना । श्रीनेमेर्व्रतमासदत् ॥ वसुदेवं विनान्येऽपि । दशार्हाः प्राव्रजंस्तदा ॥ २५ ॥ रथनेमिमहानेमि-मुख्या अन्येऽपि सूनवः ॥ यदूनां प्राव्रजंस्तीव्रं ।तपोऽपि निरमापयन् ॥ २६ ॥ अभूत्तस्यामथो पुर्यां । स्थापत्या नाम काचन ॥ सार्थवाही तत्सुतश्च । स्थापत्यासूनुरित्यपि ॥ २७ ॥ स द्वात्रिंशत्प्रियानाथ-स्तथा सुखशताश्रयः ॥ निनाय सुबहून्युच्चै-र्दिनानि त्रिदशोपमः ॥ २८ ॥ सोऽन्यदा भवदावाग्नि-शमिनं नेमिनो वचः ॥ शुश्राव विषयग्रामा-द्विमुखश्चाभवत्क्षणात् ॥ २९ ॥ दीक्षायै जननीं स्वस्य । प्रणश्यत्कर्मवं-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धनः ॥ स च स्थापत्यांगजन्मा । प्रार्थयद्विविधाग्रहः ॥ ३० ॥ स्वापतेयभृतं सापि । स्थाल-
मादाय माधवं ॥ व्यजिज्ञपत्स्वपुत्रस्य । दीक्षादानोदिताग्रहं ॥ ३१ ॥ कृष्णोऽपि भवतृष्णा-
क-द्वचस्तस्य पुरो जगौ ॥ स चात्यंतविरक्तत्वा-त्तत्वात्तन्मन्यतेस्म न ॥ ३२ ॥ ततो हृष्टो
हृषीकेशो । दीक्षादानाभिलाषिणां ॥ पुर्यांघोषयदाह्वाना-कुरं तमनुयायिनां ॥ ३३ ॥ ततः स-
हस्रं पुरुषा । अमिलन् व्रतकांक्षिणः ॥ समं तैरथ तस्यापि । कृष्णो दीक्षोत्सवं व्यधात् ॥ ३४ ॥
स च नेमिजिनध्यान-निधानाधिपतिर्यतिः ॥ श्रुतज्ञानधरो जज्ञे । क्रमात्तैर्यतिभिः समं ॥
॥ ३५ ॥ जीवाजीवादितत्वज्ञं । स्वामी सूरिपदे न्यधात् ॥ सोऽपि तैर्यतिभिः सार्द्धं । विज-
हार धरातले ॥ ३६ ॥ स्थापत्यासूनुराचार्यो । विहरन् शैलके पुरे ॥ व्यधादणुव्रतधरं । शी-
लकं नाम पार्थिवं ॥ ३७ ॥ ततः सौगंधिकापुर्यां । वनस्थः स प्रसिद्धिभाक् ॥ सुदर्शनेन भ-
क्तेन । परिव्राजां नमस्कृतः ॥ ३८ ॥ स श्रेष्टी धर्ममाकर्ण्य । तस्माज्जीवदयामयं ॥ जग्रा-
हाग्रहतः को हि । चिंतारत्नं न कांक्षति ॥ ३९ ॥ परिव्राड् तद्गुरुः पूर्वः । शुकः शिष्यस-
हस्रयुक् ॥ देशांतरादुपायात-स्तं पुरं भृशमुत्सुकः ॥ ४० ॥ अन्यादृशमिवालोक्य । सुदर्श-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नमुवाच सः ॥ गुरोः पार्श्वेऽन्निनः कस्मा-दयमासादितो वृषः ॥ ४१ ॥ स जगाद चतुर्ज्ञान-धरः शीलगुणोज्ज्वलः ॥ दयामये गुरुर्धर्मे । स्थापत्यासूनुरत्र मे ॥ ४२ ॥ सुदर्शनेन तैः शिष्यै-र्नीलाशोकवने वृतः ॥ शुकस्तं मुनिमालोक्यो-पन्यासे प्रश्नमाददे ॥ ४३ ॥ अनेकांतार्णवावर्त्त-भ्रस्यत्पदततिः शुकः ॥ क्रमान्निरुत्तरश्चक्रे । स्थापत्यासूनुसूरिणा ॥ ४४ ॥ सोऽर्हन्मतामृतस्वाद-लोलुपः शिष्यसंयुतः ॥ जग्राह चारुचारित्रं । क्रमात्सूरिपदं तथा ॥ ४५ ॥ स्वकालमथ विज्ञाय । स्थापत्यासूनुरश्रमः ॥ पुंडरीकाचले प्रापा—नशनं ज्ञवन्नीरुकः ॥ ॥ ४६ ॥ मासांते तीर्थमाहात्म्या-ज्जिनध्यानपरायणः ॥ परिवारयुतः प्राप । स्थापत्यापत्यमक्षयं ॥ ४७ ॥ विहरन् स शुकाचार्यः । शैलकाख्यं पुरं गतः ॥ अदीक्षयच्छीलकं तं । मंत्रिपंचशतीयुतं ॥ ४८ ॥ अधीतद्वादशांगोऽथ । शैलकोऽपि महातपाः ॥ प्राप्तसूरिपदः पृथ्वीं पादन्यासैरपावयत् ॥ ४९ ॥ शुकन्नट्टारकोऽप्येवं । विहृत्य वसुधां चिरं ॥ शत्रुंजये महातीर्थे-ऽनशनात्प्राप केवलं ॥ ५० मासांते ज्येष्टराकायां । सहस्रमुनिमंडितः ॥ सिद्धानंतचतुष्कोऽसौ । सिद्धानां पदमासदन् ॥ ५१ ॥ इतः श्रीशैलकाचार्यः । कालातिक्रांतन्नोजनात् ॥ रोगा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्रांतवपुः प्राप । शैलकं नाम पत्तनं ॥ ५२ ॥ मंडुकस्तत्सुतो राजा । ज्ञात्वायातं मुनीश्वरं ॥ परिवारयुतो गत्वा । प्रणनाम सुभक्तिमान् ॥ ५३ ॥ पुण्यपोषकरां वाणीं । तोषन्नृन्मंडुको नृपः ॥ निशम्य स्वगुरोर्धर्मं । जग्राह श्रावकोचितं ॥ ५४ ॥ शुष्कमांसरसं कृष्णं । तं नत्वा नृपतिर्जगौ ॥ युष्मदादेशतः शुद्धै–श्चिकित्साम्येष वो गुरो ॥ ५५ ॥ तदादेशमथ प्राप्य । वैद्यैरेनं महीपतिः ॥ अचिकित्सयदात्मान–मपि दुष्कर्मरोगतः ॥ ५६ ॥ रसगृध्रममुं ज्ञात्वा । मुक्त्वा पंथकशिष्यकं ॥ विजहारान्यतः सार–स्तत्परीवार आरतः ॥ ५७ ॥ अन्यदा कार्त्तिके मासि । राकायां स हि पंथकः ॥ प्रतिक्रामन् प्रगे सुप्तं । मूर्ध्नाजागरयद्गुरुं ॥ ॥ ५८ ॥ को मां जागरयत्युच्चै–रुच्चरन् गुरुरुच्छितः ॥ पंथकोऽपि तथालोक्य । विनयादित्यवोचत ॥ ५८ ॥ धिग्मया क्षामणादंभा–च्चतुर्मासिकपारणे ॥ यूयं जागरिताः पूज्या–स्तत्क्षमध्वं क्षमापराः ॥ ५९ ॥ तस्येति विनयं वीक्ष्य । गुरुश्चेतसि लज्जितः ॥ निनिंदात्मानमत्यर्थं । तथा चारित्रदूषकं ॥ ६० ॥ धिग्मया रसनेंद्रेण । निर्जितेनाजितात्मना ॥ आनिन्ये धर्मरत्नस्य । मालिन्यं शिथिलत्वतः ॥ ६१ ॥ प्रतिक्रमयितानेन । निद्रातंद्रविनिर्गमात् ॥ द्विधा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जागरितोऽस्म्येष । गतमोहांधकारतः ॥ ६२ ॥ इत्यात्मगर्हणायुक्तो । मुक्तदोषपरिग्रहः॥ संसक्तः परिवारेण । विजहार स भूतलं ॥ ६३ ॥ अनुगृह्य घनं लोकं । श्रीशैलकगुरुर्गुरुः ॥ गत्वा शत्रुंजये तीर्थे। जग्राहानशनं सुधीः ॥ ६४ ॥ मुनिपंचशतीयुक्तः । केवलज्ञाननिर्मलः ॥ मासांते स शिवागार–मशृंगारयदात्मना ॥ ६५ ॥ स्थापत्यासुतशुकशैलकादिवाचं–यमपतयो यदिह शिवं च लेभिरे ते ॥ तेनोच्चैरिदमतितीर्थमादिवंद्यं । नाम्नापि प्रबलकुकर्ममर्मभेदि ॥ ६५ ॥

इतश्च पांडवा नेमेः । श्रुत्वा शत्रुंजयप्रथां ॥ स्वजन्म सार्थकं कर्तुं । चक्रुर्यात्रामनोरथं ॥ ६६ ॥ पांडुः स्वर्गादथागत्य । प्रीत्या तानित्यभाषत ॥ मनोरथोऽयं भो वत्साः । शुभोदर्को विभाव्यते ॥ ६७ ॥ पुंडरीकाचले यात्रां । कुर्वंतु विशदाशयाः ॥ साहाय्यमेष कर्त्तास्मि । महापुण्यवतां हि वः ॥ ६८ ॥ इत्यादेशं पितुः प्राप्य । पांडवाः प्रीतिशालिनः ॥ तदैव भूपतीन् सर्वा–स्तद्यात्रायै न्यमंत्रयन् ॥ ६९ ॥ सहर्षास्तेऽथ भूपालाः । स्वऋद्ध्या हस्तिनापुरं ॥ प्रापुर्बहुपरिवाराः । सत्कृताः पांडुसूनुभिः ॥ ७० ॥ सुदिनेऽथ मणीबिंबं । स्वर्णदेवालयस्थि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तं ॥ पांमवास्ते पुरस्कृत्य । चेलुः सबलवाहनाः ॥ ७१ ॥ साधर्मिकाणां वात्सल्यं । गुरुझा-
नजिनार्चनं ॥ भ्रष्टार्हद्भुवनोद्धारं । कुर्वाणाः प्राचलंश्च ते ॥ ७२ ॥ सुराष्ट्रदेशपर्यंते । कृष्णो-
ऽपि यदुन्निः समं ॥ समेत्यामिलदानंदा—त्पांमवैः प्रीतिशालिन्निः ॥ ७३ ॥ तीर्थपूजां संघ-
पूजां । कृत्वा च विधिनाथ ते ॥ शत्रुंजयं महाशैलं । मुदारुरुहुरुच्चकैः ॥ ७४ ॥ मुख्यं शृंगं
च वृक्षं च । त्रिःप्रादक्षिणयन्नथ ॥ नेमुस्ते पाडुकां न्नर्तुः । पूजितां च सुरासुरैः ॥ ७५ ॥ या-
वन्मिथो दत्तबाहू—वासुदेवतपःसुतौ ॥ वरदत्तगुरूपेतौ । चैत्यं प्राविशतां मुदा ॥ ७६ ॥ ताव-
त्त्रस्तदृशत्संधि—प्ररूढातितृणांकुरं ॥ देहं जराक्रांतमिव । तच्चैत्यं तावपश्यतां ॥ ७७ ॥ग्गुर्भं॥
मध्ये च न्नगवद्बिंबं । तथालोक्यातिदुःखतः ॥ अदूयेतां मनाग्मर्म—कृंतनादिव धार्मिकौ ॥
॥ ७८ ॥ धर्मसूनुं हरिः प्राह । कालमाहात्म्यतोऽप्यदः ॥ जज्ञे सुजर्जरं तीर्थं । कुर्वतो राज्य-
मावयोः ॥ ७९ ॥ ततः पाडुसुरोऽन्येत्य । प्राह कृष्णं प्रसन्नदृक् ॥ सर्वत्र कर्मणि न्नवा—नलं-
कर्मीणविक्रमः ॥ ८० ॥ त्वया च रैवतोद्धारः । पुराधायि सुमेधसा ॥ मत्सूनवे पुंडरीको—द्धा-
रपुण्यं ददस्व तत् ॥ ८१ ॥ प्राह कृष्णोऽपि संप्रीतो । युष्मदन्त्यर्थनात्र का ॥ एते यूयं वयं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ह्येते । न पुराप्यंतरं क्वचित् ॥ ७२ ॥ ततः स त्रिदशः प्रीतः । प्रशंसन् कृष्णमानसं ॥ युधिष्ठिराय दत्वाथ । मणिं वेगात्तिरोदधे ॥ ७३ ॥

ततः शिल्पिभिरानंदा–द्धर्मसूनुर्विभोर्वरं ॥ अकारयन्महाचैत्यं । नित्यचैत्यनिभं शुभं ॥ ७४ ॥ पारिजातद्रुशाखाभिः । शंकुं निर्माय निर्मलं ॥ तं मणिं भगवन्मूर्त्ति–हृदये सोऽध्यरोपयत् ॥७५॥ ततः सुगंधिभिर्द्रव्यै–र्दिव्यैः शिल्पिभिरर्हतः ॥ स निर्मापयदानंदा–द्बिंबं पांडुतनूरुहः ॥ ७६ ॥ तद्भक्तिरागरक्तं किं । पुण्यांशूदयमत्किमु ॥ भक्तिसीमंतिनीभाल–कुंकुमाभं च तद्बभौ ॥ ७७ ॥ ततः श्रीवरदत्तेन । सुलग्ने गणधारिणा ॥ तच्चैत्यमपि बिंबं च । धर्मसूः प्रत्यतिष्ठपत् ॥ ७८ ॥ विश्वालंकरणस्यापि । नृपोऽलंकरणोत्करं ॥ रचयामास तस्योच्चै–रलंकर्तुं निजं कुलं ॥ ७९ ॥ पूजामथ व्यधात्पूर्ण–कामः सोऽष्टविधां प्रभोः ॥ महाध्वजं ददौ चैत्ये । परमं धर्मलक्षणं ॥ ८० ॥ यथाकाममविश्रांतं । दानं दत्वा च याचकान् ॥ अपूजयच्च श्रीसंघ–मनघं तीर्थमादिमं ॥ ८१ ॥ शक्रोत्सवं च निर्माय । चामरछत्रमोक्षणं ॥ आरात्रिकां चकाराथ । दानं प्रादात्तपःसुतः ॥ ८२ ॥ विधायेत्यखिलं कर्म । धर्म्यं धर्मसुतस्त-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तः ॥ सर्वानुमोदितो नूपै–रवारोहत्समं नगात् ॥ ए३ ॥ चंद्रप्रन्नासे श्रीचंद्र–प्रन्नं नेमिं च
रैवते ॥ अर्बुदे च युगादीशं । ततो नेमुः समाहिताः ॥ ए४ ॥ वैन्नारेऽप्यथ सम्मेते । चतु-
र्विंशतिमर्हतां ॥ दशत्रिकनिबद्धान्निः । पूजान्निस्तेऽप्युपागमन् ॥ एए ॥ संघाधिपतिकर्त्तव्यं
। विधायेत्थममी शुन्नं ॥ पुण्यपूतांतराः प्रापुः । क्रमेण द्वारिकां पुरीं ॥ ए६ ॥ द्वारिकायां
हरिं मुत्त्वा। सत्कृतस्तेन नूपणैः॥ विसृज्य नृपतीन् सर्वान् । पांडुसूः स्वपुरं ययौ ॥ए७॥
व्यधायि पांडवैरित्थं । श्रीशत्रुंजयपर्वते ॥ उद्धारो निजपुण्यस्यो–द्धारवन्मंगलप्रदः ॥ एG ॥
अथान्यदा पुनः स्वामी । सहस्राम्रवनांतरा ॥ समवासरदेत्यापि । कृष्णस्तं च नमोऽकरोत्
॥ एए ॥ पप्रच्छ द्वारिकेयं स–मृद्धा देवविनिर्मिता ॥ यदवश्च स्वयं नाश–मायास्यंत्यथवान्य-
तः ॥ ६०० ॥ स्वामी जगाद शांबाद्यै–र्मद्यांधैस्तव नंदनैः ॥ हतो द्वीपायनो धक्ष्य–त्यवश्यं
द्वारिकां पुरीं ॥ १ ॥ जराकुमारात्स्वभ्रातु–स्तवापि मरणं ननु ॥ श्रुत्वेति कृष्णो दूनोंत–
र्नत्वा नाथं ययौ पुरीं ॥ २ ॥ जराकुमारस्तत् श्रुत्वा । न्नर्त्सितोऽशेषयादवैः ॥ जगाम कृ-
ष्णरक्षार्थे । दूरं च वनवास्यन्नूत् ॥ ३ ॥ द्वीपायनोऽपि लोकोक्त्या । तदाकर्ण्यान्यतो ययौ



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ कृष्णोऽपि स्वपुरान्मद्यं । चिक्षेप गिरिगह्वरे ॥ ४ ॥ कादंबर्यां कंदरायां । सा तीरकुसुमो-
त्करैः ॥ स्थिता काले बभूवाति-मदकृद्गंधमात्रतः ॥ ५ ॥ शांबोऽन्यदाप्यटंस्तत्र । गंधमाघ्रा-
य लोलुपः ॥ पायं पायमतृप्तः सन् । तामवर्णयदुच्चकैः ॥ ६ ॥ घूर्णमानास्तयान्येऽपि । कु-
मारा गिरिगह्वरे ॥ भ्रमंतो ददृशुर्द्वीपा-यनं ध्यानजुषं द्विषं ॥ ७ ॥ असावस्मत्पुरीं दग्धा ।
यदून् हंता च तद् द्रुतं ॥ हन्यतामेष एवात्र । हनिष्यति हतः कथं ॥ ८ ॥ ते शांबेनेति
नियुक्ताः । कुमारास्तं क्रुधातुराः ॥ लकुटैर्यष्टिभिर्मुष्ट्या । कुट्टयित्वा ययुः पुरीं ॥ ९ ॥ त-
दाकर्ण्य च लोकोक्त्या । दूनोंतः पुंडरीकदृक् ॥ तदैव सीरिणा सार्द्धं । गत्वा तमनुकूलयत् ॥
॥ १० ॥ दुर्विनीतैर्मम सुतै-रेतन्मद्याद्विचेष्टितं ॥ क्षमस्वाद्य क्षमाधार । न कोपस्त्वादृशा-
मयं ॥ ११ ॥ न कुप्यंते मनाक् संतः । पीडिता अपि बालिशैः ॥ किं राहुं पीडितोऽपींदुः ।
करैर्दहति जातुचित् ॥ १२ ॥

द्वीपायनोऽप्यथ प्राह । वृथा कृष्ण तवार्थना ॥ निदानं द्वारिकां दग्धुं । मयाकारि पु-
रास्तितः ॥ १३ ॥ युवां विनापरे सर्वे । यदवोऽप्यत्र वह्निना ॥ धक्ष्यंते नियमाज्जात-मलं चा-

For Private And Personal Use Only

॥७८८॥

टूक्तिपाटवैः ॥ १४ ॥ नन्नाव्यमन्यथा न्नावी–त्यामृशन् माधवो ययौ ॥ तपस्व्यपि निदानेन
। मृत्वा वह्निष्वजायत ॥ १५ ॥ द्वितीयेऽह्न्यथ गोविंदः । स्वपुर्यामित्यघोषयत् ॥ निपिष्टये ह्य-
रिष्टस्य । जना धर्मेषु तिष्टत ॥ १६ ॥ तद्वदस्थाज्जनः सर्वः । सर्वज्ञो विहरन्नथ ॥ उपेत्य सम-
वासार्षी–त्तत्र रैवतकाचले ॥ १७ ॥ कृष्णोऽन्येत्य जिनं नत्वा । मोहविद्राविणीं गिरं ॥ अ-
शृणोत्तेन प्रद्युम्न–शांबाद्याश्च प्रवव्रजुः ॥ १८ ॥ रुक्मिणीजांबवत्याद्या । बह्वयश्च यदुयोषितः
॥ जगृहुर्व्रतमन्याश्च । श्रावकत्वं सुवासनाः ॥ १९ ॥ पप्रछ च हरिः स्वामिन् । कदा मे न-
गरक्षयः ॥ स्वाम्याह द्वादशाब्दांते । रुष्टो धक्ष्यति सोऽसुरः ॥ २० ॥ तत् श्रुत्वा विमनाः
कृष्णो । ययौ स्वां नगरीं विभुः ॥ अन्यतो विजहारांशु–रिवाज्ञानांधकारनुत् ॥ २१ ॥ कृ-
ष्णादेशेन सर्वोऽपि । विशेषाद्धर्मवानभूत् ॥ द्वीपायनासुरः सोऽपि । स्वावकाशमलोकयत् ॥
॥ २२ ॥ उद्विग्नो द्वादशाब्दांते । तपस्सु सकलो जनः ॥ मद्यमांसाशनः स्वेछा–विहारी स-
मजायत ॥ २३ ॥ छलवान् सोऽमरः पुर्या–मुत्पातानुपकल्पयन् ॥ वात्याभिस्तृणकाष्टानि ।
चिक्षेपांतस्तथा जनान् ॥ २४ ॥ षष्टिं बाह्याः कुलकोटी–र्द्विसप्ततिं तु मध्यगाः ॥ संपीड्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्वारिकापुर्यां । सोऽसुरोऽग्निमदीपयत् ॥ २५ ॥ दह्यमानाः सुरात् सर्वे-ऽप्यास्फलंतः परस्परं ॥ अशक्ता गंतुममुंचन् । प्राणान् वेश्मधनैः सह ॥ २६ ॥ वसुदेवो देवकी च । रोहिणी च समाधिना ॥ अग्निनानशनं प्राप्य । स्वयं देवत्वमासदन् ॥ २७ ॥ बलविष्णू तु देवोक्त्या । बहिर्नीत्वा निजां पुरीं ॥ जीर्णोद्यानस्थितावूर्ध्वं । दह्यमानामपश्यतां ॥ २८ ॥ ज्वालामालाकुलामेतां । द्रष्टुमप्यक्षमाविमौ ॥ उद्दिश्य पांडुमथुरां । पांडवानभिचेलतुः ॥ २९ ॥ षण्मासीं यावदप्येषा । सलोका द्वारिकापुरी ॥ दग्धाग्निना प्लाविता च । पयःपूरेण वार्धिना ॥ ॥ ३० ॥ हस्तिकल्पं पुरं प्राप । भक्तानयनहेतवे ॥ विशन् बलस्तदीशेना-च्छदंतेनाभ्यवेष्टयत ॥ ३१ ॥ स्वक्ष्वेडाहूतकृष्णोऽथ । बलं तं सबलं नृपं ॥ विजित्यामोचयत्तत्र । बुभुजाते तु तौ बहिः ॥ ३२ ॥ गच्छन्नथाग्रतः कृष्णः । सतृट् जलकृते बलं ॥ प्रैषीत्स्वयं तु वृक्षाधः । सुष्वापांशुकसंवृतः ॥ ३३ ॥

इतश्च स जरासूनु-र्मृगयेन निवर्त्तयन् ॥ पीतांबरं न्यदन् पादे । मृगबुद्ध्या शरेण सः ॥ ३४ ॥ अथोत्थायाह कृष्णोऽहं । हतः केनास्मि पत्रिणा ॥ छलेन स स्वमाख्यातु । गोत्रं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाम च सत्वरं ॥ ३५ ॥ वृकांतरस्थो जारेयो–ऽप्याह हंहो जरासुतः ॥ जराकुमारोऽहं शा-
र्ङ्गि–रक्षार्थं वनमाश्रितः ॥ ३६ ॥ द्वादशाब्दी ममात्राज्र–न्नापश्यं मानुषं क्वचित् ॥ कोऽसि
तत्त्वं ब्रवीष्येवं। यो हि मद्घातपीडितः ॥ ३७ ॥ कृष्णोऽप्यवोचदेह्येहि । यत्कृते वनवास्यन्नूः
॥ स एवास्मि हरिस्तत्ते । प्रयासोऽयमज्रूद्वृथा ॥ ३८ ॥ न्नवितव्यमिदं सत्यं । नात्र ते दूषणं
मनाक् ॥ याहि याहि बलो हन्या–न्नचेत्त्वां मद्वधक्रुधा ॥ ३९ ॥ अन्निज्ञानं कौस्तुन्नं मे ।
गृहाण व्रज पांम्वान् ॥ प्रवृत्तिं कथयेः सर्वां । सहायास्तव संतु ते ॥ ४० ॥ इत्युक्तोऽपि स
जारेयः । कथंचिच्च न्यवर्त्तयत् ॥ घातार्त्तितश्च गोविंदः । कुलेश्यामाप च क्षणात् ॥ ४१ ॥
तया विपद्य तृतीया–मवनीमापदच्युतः ॥ पूरितायुः सहस्राब्दीं । यावद्यादवनायकः ॥ ४२ ॥
इतश्च पुत्रपुटके–नादायांबु हली क्षणात् ॥ आगतोऽपश्यदनुजं । शयानमवनीतले ॥ ४३ ॥
सुखं सुप्तोऽयमिति स । बुद्ध्या तस्थौ क्षणं बलः ॥ विशतीर्मक्षिकाः कृष्ण–वक्त्रे वीक्ष्य त्व-
दूयत ॥ ४४ ॥ अश्रुवंतममुं स्नेहात् । पुनः पुनरधूनयत् ॥ ज्ञात्वा परासुं च बलो । मुमूर्छ च
रुरोद च ॥ ४५ ॥ तद्घातकं वने पश्यन् । यदा नापश्यदुच्चकैः ॥ सिंहनादेन स तदा । कंपय-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





द्रूरुहांगिनः ॥ ४६ ॥ स्नेहात्तं स्कंधमारोप्य । स बभ्राम वनाद्वनं ॥ क्षणाच्च मुक्त्वा मृडुन्नि
–र्वचोन्निरुदलापयत् ॥ ४७ ॥

षण्मासीमतिचक्राम । स एवं स्नेहमोहितः ॥ ततस्तत्सारथिर्देवी–भूतः सिद्धार्थ आय-
यौ ॥ ४८ ॥ बहुभ्रष्टरथोद्धार–स्थलारोपितवीरुधः ॥ दग्धडुसेकादमरो । रामं किंचिदबोधय-
त् ॥ ४९ ॥ तत्तन्निदर्शनाद्रामो–ऽनुजं मृतममन्यत ॥ स्वं निवेद्यामरः सोऽपि । तत्स्नेहं तम-
मोचयत् ॥ ५० ॥ बलस्तेनैव देवेन । समं देहस्य शार्ङ्गिणः ॥ संस्कारमकरोत्सिंधु–संगमे
वह्निदारुभिः ॥ ५१ ॥ चारणर्षिरथोऽभ्येत्य । श्रीनेमिप्रहितो बलं ॥ संबोध्यादीक्षयत्सोऽपि।
तुंगिकाशिखरं ययौ ॥ ५२ ॥ रामर्षिरन्यदा डुंगं । पारणाय विशन् स्त्रियं ॥ स्वरूपमोहिता-
मन्ने । बध्नंतीं घटशंकया ॥ ५३ ॥ दृष्ट्वोद्विग्नः स्वदेहेऽपि । मया नातःपरं पुरि ॥ वेशनीय-
मिति प्राप्या–भिग्रहं वनवास्यभूत् ॥ ५४ ॥ युग्मं ॥ तपस्यतोऽथास्य मुनेः। साम्यभ्राजो-
ऽनुभावतः ॥ सिंहव्याघ्रादयो जीवा। दुष्टत्वं तत्यजुर्निजं ॥ ५५ ॥ कश्चिदेको मृगः पूर्व–भ-
वसंबद्ध एत्य तं ॥ सदैव शिष्यवत्तस्य । पर्युपास्तिमधान्मुदा ॥ ५६ ॥ रथकृत्यन्यदैकस्मिन्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्राप्तेऽत्र नृपकर्मणे ॥ पारणार्थमगादेण–पुरस्सरमसौ मुनिः ॥ ५७ ॥ रथकृत्तं निरीक्ष्याति–मुमुदे स्वं ननंद च ॥ अन्नैर्विशुद्धैरामर्षि। भक्त्या स प्रत्यलाभयत् ॥ ५८ ॥ तद्दातृत्वं च पात्रत्वं । मुनेर्भक्त्याभिनंदयन् ॥ हर्षाश्रुमिश्रनयनो । मृगस्तस्थौ धृतोन्मुखः ॥ ५९ ॥ अर्द्धछिन्नेन तरुणा । पतता ते त्रयो मृताः ॥ पद्मोत्तरविमानांत–र्ब्रह्मकल्पेऽभवन् सुराः ॥ ६० ॥ तुंगीशृंगे तपस्तप्तं । यत्र रामर्षिणा महत् ॥ तेन तीर्थमिदं सर्व–कल्मषक्षालनक्षमं ॥ ६१ ॥ तुंगीगिरिर्महातुंगः । कुरंगेनापि यत्र हि ॥ प्रापि स्वर्गे सुरंगत्वं । तपोदानानुमोदनात् ॥ ॥ ६२ ॥ यस्तत्र नेमिनं भक्त्या । त्रिसंध्यं नमति प्रभुं ॥ भवत्रयांतराप्नोति । स मुक्तिसुखसंगतिं ॥ ६३ ॥

प्रद्युम्नसांबप्रमुखाः । कुमारास्तेऽथ नेमिनं ॥ आराधयंतो विधिवत् । प्रापुरित्यनुशासनं ॥ ६४ ॥ वत्सा गच्छत सिद्धाद्रिं । कुगतिद्वारमुद्रकं ॥ तत्र वो ध्यानयुक्तानां । मुक्तिलाभो भविष्यति ॥ ६५ ॥ इति स्वामिगिरं श्रुत्वा । ते सार्द्धा हि त्रिकोटयः ॥ मुनयस्तं मुदा नत्वा । चेलुः शत्रुंजयंप्रति ॥ ६६ ॥ राजादनीं जिनं चापि । मुक्त्वा दक्षिणतोऽथ ते ॥ तस्यैव



For Private And Personal Use Only

सप्तमे शृंगे । तस्मू रैवतकांतिके ॥ ६७ ॥ तत्रासनसमालीना । जिताक्षाः साम्यसंगताः ॥
श्वासप्रश्वासयोर्नाशा–न्निरेरुट्टंकिता इव ॥ ६८ ॥ क्षणादर्हन्मयं ज्योति–र्ध्यात्वाथ लयलान्न-
तः ॥ ध्यातृध्येयध्यानन्नेदं । मुक्त्वा ज्ञानं च लेन्निरे ॥ ६९ ॥ [illegible] ॥ अशेषाण्यपि कर्मा-
णि । क्षिप्त्वा ते क्रमयोगतः ॥ अव्याबाधं पदं प्रापु–र्मुक्तिसंज्ञं महोज्ज्वलं ॥ ७० ॥ अध्यु-
ष्टा कोटिरप्येवं । शृंगे सन्नद्दसंज्ञके ॥ मुक्तिं यत्रापुरापन्न–तन्नतानां दहेन्मनः ॥ ७१ ॥ सि-
द्धिसौधांगणं शैलः । सत्यं यत्रागतैर्नरैः ॥ कपर्द्दिगोमेघदेवा–रिकोद्योगात्तदाप्यते ॥ ७२ ॥
इतश्च स जरासूनुः । पांडवानेत्य कौस्तुन्नं ॥ दर्शयन् द्वारिकादाहा–दिकं सर्वं शशंस च ॥
॥ ७३ ॥ पांम्वा अपि तच्छोका–त्संसाराब्धिं तितीर्षवः ॥ प्रव्रज्यायानसंगत्यै । तद्दिभुं विभु-
मस्मरन् ॥ ७४ ॥ नेमिरप्यथ सर्वज्ञो । धर्मघोषं महामुनिं ॥ प्रैषीत्पांम्वबोधाय । मुनिपं-
चशतीयुतं ॥ ७५ ॥ पांम्वा अपि तं नंतुं । परिवारयुता द्रुतं ॥ ऐयरुर्देशनां चापि । शुश्रुवु- ॥७९३॥
र्मोहनाशनीं ॥ ७६ ॥ तेऽथ नत्वा मुनिं स्वस्व–न्नवान् पप्रच्छुरादरात् ॥ ज्ञात्वा ज्ञानेन मु-
निर–प्याख्यद्गंन्नीरया गिरा ॥ ७७ ॥ पुर्यासन्नचले पूर्वं । बांधवाः पंच कर्षुकाः ॥ परस्पर-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रीतिरसां-बुध्यंबुमनुजा इव ॥ ७८ ॥ सुरतिः शांतनुर्देवः । सुमतिस्तु सुभद्रकः ॥ इति ना-
मभिरासंस्ते । विख्याताः स्वगुणैरपि ॥ ७९ ॥

अन्यदा ते भवोद्विग्ना । मग्ना दारिद्र्यकर्दमे ॥ यशोधरमुनेर्वाक्यैः । प्रव्रज्यास्थालमा-
सदन् ॥ ८० ॥ निस्पृहा निजदेहेऽपि । तपोऽर्ककिरणैरलं ॥ गुरुग्रीष्मोद्भवैः कर्म-पल्वलं ते
व्यशोषयन् ॥ ८१ ॥ कनकावलिनामाद्यः । परो रत्नावलीं तपः ॥ मुक्तावलीं पुनर्देव-स्तुर्यः
सिंहनिकेतनं ॥ ८२ ॥ आचाम्लवर्द्धमानाख्यं । सुभद्रोऽपि तपोऽकरोत् ॥ महाव्रतानीव पं-
चा-भूवन् पंचाक्षनिग्रहात् ॥ ८३ ॥ युग्मं ॥ कर्मदेहं धातुदेहं । शोषयित्वा तपोऽग्निना ॥ ते
प्रांतेऽनशनान्मृत्वा-ऽनुत्तरे नाकिनोऽभवन् ॥ ८४ ॥ ततश्च्युत्वा पांडुसुता । भवंतस्तेऽभव-
न्निह ॥ अस्मिन्नेव भवे मुक्ति-लाभो वो भविताद्भुतः ॥ ८५ ॥ इति श्रुत्वातिसंवेगा-दासन्नां
मुक्तिमिच्छवः ॥ परीक्षितं न्यधू राज्ये । प्रव्रज्यां जगृहुर्गुरोः ॥ ७६ ॥ कुंत्यपि द्रौपदी दीक्षां
प्रापतुर्भिन्नबंधने ॥ पंच ते च तपश्चक्रु-र्नानाभिग्रहभूषिताः ॥ ८७ ॥ आर्यानार्येषु देशेषु ।
नेमेर्विहरतः सतः ॥ चतुर्विंशतिसहस्रा । मुनेः सप्त शतानि च ॥ ८८ ॥ चत्वारिंशत्सहस्रा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





णि । व्रतिनीनां सुमेधसां ॥ श्रावकाणां लक्षमेकं । नवषष्टिसहस्रयुक् ॥ ८९ ॥ श्राविकाणां त्रिलक्ष्येको–नचत्वारिंशत्सहस्रयुक् ॥ एवमासीद्विभोः सर्वः । परिवारः स्वबोधितः ॥ ९० ॥ निर्वाणसमयं ज्ञात्वा । स्वस्यासन्नं जगद्विभुः ॥ सुरासुरनरध्येयो । रैवताचलमाप्तवान् ॥९१॥ पर्यंतदेशनां तत्र । जगद्विभुरसूत्रयत् ॥ प्रबुद्धाश्च जनाः केचि–त्प्रव्रज्यां जगृहुस्ततः ॥९२॥ अथानशनमापेदे । पादपोपगमं प्रभुः ॥ चलितासनाश्च शक्रा–स्तत्राभ्येयुः शुचाकुलाः ॥९३॥ त्वाष्ट्रे शुचिसिताष्टम्यां । शैलेसीध्यानतो विभुः ॥ निर्वृतो मुनिभिः सार्धं । षट्त्रिंशैः पंचभिः शतैः ॥ ९३ ॥ शक्रैः संभूय कल्पद्रु–काष्ठैररिष्टनेमिनः ॥ मुनीनामपि देहानां । विदधे वह्निसंस्कृतिः ॥ ९४ ॥

नंदिश्वरेऽथ निर्माया–ष्टाह्निमाखंमला महं ॥ पुनः स्वपदमासेदु–र्जिनध्यानपरायणाः ॥ ॥ ९५ ॥ यत्र दीक्षाज्ञानमोक्ष–मयं कल्याणकत्रयं ॥ श्रीनेमेरभवन्नौमि । तं श्रीरैवतपर्वतं ॥ ९७ ॥ यत्रार्हतामेकमपि । भवेत्कल्याणकं किल ॥ तत्तीर्थं मुनयः प्राहु–रुज्जयंतस्ततोऽधिकः ॥ ९८ ॥ पवित्रा भगवत्पादैः । रैवताचलरेणवः ॥ पुनंति विश्वं संसक्ताः । शुद्धिकृच्चृ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





र्णजा इव ॥ ९९ ॥ पर्वताः सर्व एवैते । जलस्थलखचारिणः ॥ जीवाः संत्यत्र ये शैले । भ-
वत्रयमुमुक्षवः ॥७००॥ भूरुहा दृषदो भूमि-वाय्वंब्वग्निशरीरिणः ॥ अचेतना अपि शिवं । या-
तारोऽत्र कियद्भवैः ॥ १ ॥ सर्पिर्घृताभ्यां ध्माता य-न्मृत्तिका गुरुयोगतः ॥ हेमत्वं लभते त-
स्य । महिमा वर्ण्यते कथं ॥ २ ॥ तपःक्षमाभ्यां संयुक्त-स्तथा साम्यरसप्लुतः ॥ त्यक्त्वा
धातुमयं देहं । देही प्राप्नोति शाश्वतं ॥ ३ ॥ यथा स्पष्टमयः स्पर्शो-पलेनाप्नोति हेमतां ॥
तथास्य स्पर्शतो देही । भवेच्चिन्मयरूपभाक् ॥ ४ ॥ मलयाद्रौ यथान्येऽपि । यांति चंदन-
तां द्रुमाः ॥ तथात्र पापिनोऽप्यंगि-गणा यांति प्रपूज्यतां ॥ ५ ॥ बंधवोऽथ विभोरष्टौ । म-
हिष्योऽपि च शार्ङ्गिणः ॥ राजीमती च भूयांसः । परेऽपि प्रययुः शिवं ॥ ६ ॥ विहरंतोऽथ
ते पांडु-नंदना हस्तिकल्पके ॥ पुरे जनाज्जिनाधीश-निर्वाणं शुश्रुवुस्तदा ॥ ७ ॥ तदाक-
र्ण्य शुचाक्रांता । रैवतं दक्षिणे व्यधुः ॥ ययुश्च पुंडरीकाद्रिं । प्रापुरनशनं तथा ॥ ८ ॥ क्रमा-
द् घातीनि कर्माणि । क्षिप्त्वा मात्रा समं च ते ॥ अंतकृत्केवलालोका । निःश्रेयसमशिश्रय-
न् ॥ ९ ॥ पांडवानामनुप्रापु-र्मुनिपंचशतानि च ॥ सहस्रे द्वे शिवागारं । प्राप्तानंतचतुष्टयाः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ १० ॥ द्रौपदी पंचमं कल्प—मवापानल्पपुण्यभृत् ॥ अन्ये तु मुनयः केचि—च्छिवं स्वर्गं च केचन ॥ ११ ॥

इतश्च नारदः श्रुत्वा । द्वारिकादाहमीशितुः ॥ यदूनां च क्षयं दूनो । ययौ शत्रुंजयं गिरिं ॥ १२ ॥ निंदन्नविरतिं स्वस्य । युगादीशं नमन् जिनं ॥ शृंगे तत्रैव जग्राहा—नशनं जनवनाशनं ॥ १३ ॥ स चतुःशरणं कृत्वा । चत्वारि मंगलान्यपि ॥ चतुरस्त्रिकशुद्ध्या स । कषायान् चतुरोऽमुचत् ॥ १४ ॥ चतुःशाखं श्रयन् धर्मं । चतुर्थं ध्यानमास्थितः ॥ चतुर्थमपि तस्यांशं । लब्ध्वागात्पंचमीं गतिं ॥ १५ ॥ उत्सर्पिण्यवसर्पिण्यो—रित्येवं नारदा गिरौ ॥ शत्रुंजये ययुः सिद्धि—मनंतध्यानयोगतः ॥ १६ ॥ इत्थं श्रीरैवताद्रिप्रभवपृथुतरोदारमाहात्म्यमेतत् । पुण्यं किंचित्सुरेंड प्रकटितमिह तत् सिद्धशैलानुसारि ॥ शेषोद्धारस्थितिं वा शृणु मसृणमना नाशिनीमंहसां या—मस्मद्वाणीश्रवंतीश्रवदमृतभवां भावतो भावितात्मा ॥१७॥

इत्याचार्यश्रीधनेश्वरसूरिविरचिते श्रीशत्रुंजयमहातीर्थमाहात्म्ये श्रीनेमिदीक्षाज्ञाननिर्वाणपांडवोद्धारादिवर्णनो नाम त्रयोदशमः सर्गः समाप्तः ॥ श्रीरस्तु ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





## ॥ चतुर्दशमः सर्गः प्रारभ्यते ॥

फणामणिकराग्रस्य । मुखेंदोर्नखदीधितेः ॥ तमस्त्रिजगतो यातं । स पार्श्वः पातु वो जिनः ॥ १ ॥ जंबूद्वीपेऽत्र भरते । पुरी वाणारसी वरा ॥ गंगानुबिंबनात्स्वःपू–रिवासौ राजवत्यभूत् ॥ २ ॥ ऐक्ष्वाको भारते वंशे । यशश्छत्रो गुणालयः ॥ तत्रासीदश्वसेनाख्यो । जिनाज्ञाकलितो नृपः ॥ ३ ॥ अभिरामगुणोद्दामा । वामाऽवामाशयाजनि ॥ सर्ववामाशिरोरत्नं । शीलधामास्य वल्लभा ॥ ४ ॥ सान्यदा यामिनीयामे । तुर्ये वर्यसुखाकरान् ॥ शयाना शयनीयेऽद्रा–पश्यत्स्वप्नांश्चतुर्दश ॥ ५ ॥ चैत्रे सितौ चतुर्थ्यां भे । विशाखायां जिनेश्वरः ॥ तद्गर्भे प्राणतादागा–दुद्योतश्च जगत्त्रये ॥ ६ ॥ पूर्णेऽथ काले पौषस्य । दशम्यां मैत्रभे सुतं ॥ सासुत श्यामलं सर्प–ध्वजमिड्यं सुरासुरैः ॥ ७ ॥ देवीभिर्देववृंदैश्च । कृते मेरौ महोत्सवे ॥ भूपोऽपि विभवोत्कर्षा–त्सहर्षस्तं व्यधाद्दहु ॥ ८ ॥ अंबास्मिन् गर्भगे पार्श्वे । सर्पं सर्पंतमैक्षत ॥ इतीव निर्ममे तस्य । पार्श्व इत्यभिधां पिता ॥ ९ ॥ अल्पदोषभृदित्या-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्तैं । वाच्यं तेनानुभूय च ॥ सर्वदोषमुचा मुक्तं । युक्ता तत्र विचारणा ॥ १० ॥ पित्राग्रहा-त्स तारुण्ये । नरवर्मनृपात्मजां ॥ प्रभावतीं महोत्साहा–दूढवान् सत्प्रभावतीं ॥ ११ ॥ प-रिव्राजकमन्येद्युः । कठं शठतपोमठं ॥ हठात् स बोधयामास । धूमार्त्तादिनिदर्शनात् ॥१२॥ ज्वालाकुलस्त्यजन् प्राणान् । सर्पः पार्श्वावलोकनात् ॥ अभूत् श्वभ्रपतिर्नाम्ना । धरणोऽक-रुणोश्रितः ॥ १३ ॥ ॥ निंद्यमानः कठो लोकै–र्हिंसामिश्रकुकर्मभृत् ॥ वहन् पार्श्वे रुषं मृ-त्वा । मेघमाल्यसुरोऽभवत् ॥ १४ ॥

त्रिंशदब्दीमतिक्रम्य । लोकांतिकसुरार्चितः ॥ दत्वा संवत्सरं दानं । प्रभुर्दीक्षोत्सुकोऽज-नि ॥ १५ ॥ पौषे सितौ च राधाया–मेकादश्यां कृताष्टमः ॥ प्रागंशेऽह्नि विभुर्दीक्षा–मग्रही-त्रिशतीनृपैः ॥ १६ ॥ मनःपर्यवसंज्ञे च । ज्ञाने जाते विभोः सुराः ॥ नत्वा स्वं स्वं पदं प्रा-पुः । स्मरंतो मानसे जिनं ॥ १७ ॥ द्वितीयेऽह्नि कोपकटे । सन्निवेशे जगत्प्रभुः ॥ चकार प-रमान्नेन । पारणं धन्यवेश्मनि ॥ १८ ॥ विहरन् कलिगिरौ कुंड–समस्य सरसस्तटे ॥ का-दंबर्यामटव्यां स । कायोत्सर्गमदात्प्रभुः ॥ १९ ॥ महीधरो गजः पातुं । जलं तत्र समागतः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दृष्ट्वा विभुं पूर्वभव–स्मरणात्सेवतेस्म सः ॥ २० ॥ अपि पार्श्वस्थिता देवाः । संगीतकमसूत्र-
यन् । त्रिसंध्यं वांगणे ॥ प्राप्ते कल्पद्रौ क भदासते ॥ २१ ॥ विभौ गतेंगराजस्तु । नंतुं तत्राग-
मद्विभुं ॥ अप्रेक्ष्यातिविषण्णोऽभू–द्भ्रष्टचिंतामणिरिव ॥ २२ ॥ मूर्छालुं तमिति प्रेक्ष्य । नृपं
तत्प्रीतिहेतवे ॥ तत्र चक्रुः सुरा मूर्ति । नवहस्तमितां प्रभोः ॥ २३ ॥ मृतः कालवशाद्धस्ती
। तत्राभूद्व्यंतरामरः ॥ सोऽप्यन्ये च मनःकामं । तद्भक्तानामपूरयन् ॥ २४ ॥ अंगराजोऽ-
पि हृष्टः सन् । व्यधात्प्रासादमुच्चकैः ॥ कलिकुंडमिति ख्यातं । तीर्थमेतत्तदाद्यभूत् ॥ २५ ॥
कलौ गिरौ कुंडतटे । प्रतिमां यो जगत्प्रभोः ॥ पश्यति स्मरति प्रीत्या–र्चयत्यस्येहितं भवे-
त् ॥ २६ ॥ महातीर्थमिदं देवै–र्भक्त्याधिष्ठितमीप्सितं ॥ दत्ते भवद्वयस्यापि । मंत्रध्याना-
त्ततोऽधिकं ॥ २७ ॥ लब्ध्वा सद्गुरुतो धर्मं । कलिकुंडस्य योऽर्हतः ॥ ध्यायत्यशंकचित्तः सं-
स्तस्य दूरे न सिद्धयः ॥ २८ ॥ क्षुद्रोपसर्गैर्यो ध्यायन् । क्षुभ्यत्यपि कदाचन ॥ स सिंहजे-
ता गोमायु–फेत्कृतैरिव नश्यति ॥ २९ ॥ ब्रह्मचारी मिताहारी । दांतो विजितशात्रवः ॥
जपन् मंत्रं गुरोर्वाक्या–दचिरात्सिद्धिमाप्नुयात् ॥ ३० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इतो विभुः शिवपुर्यां । वने कौशांबके ददौ ॥ कायोत्सर्गमियायाशु । धरणस्तत्र वंदितुं ॥ ३१ ॥ व्युदस्यतेऽनेन मम । जवताप इतीव सः ॥ प्रज्ञोरुपर्यधान्नागः । स्वफणातपवारणं ॥ ३२ ॥ अंतःपुरीजनैरग्रे । विज्ञोः संगीतकं व्यधात् ॥ तादृशानां हि सन्नक्ति–वल्लयेवं पल्लवत्यपि ॥ ३३ ॥ तदादि सा पुरी जज्ञे–ऽहिछत्रेत्यन्निधानतः ॥ यथा यथा महांतः स्यु–र्यत्र स्यात्तत्तथैव हि ॥ ३४ ॥ गत्वा तत्राहिछत्रायां । यो नमत्यनिशं जिनं ॥ स नम्यते जगल्लोकै–र्लब्ध्वा पदमखंम्कितं ॥ ३५ ॥ तस्थावथ विज्ञू राज–पुरे प्रतिमया स्थिरः ॥ आगत्येश्वरजूपेन । वंदितश्चातिसंमदात् ॥ ३६ ॥ ज्ञात्वा पूर्वजवं स्वामि–दर्शनाच्छुजदर्शनः ॥ तत्राकार्षिन्महोत्तुंगं । प्रासादं पृथिवीपतिः ॥ ३७ ॥ स्वस्य प्राग्जवमूर्त्तिं च । कौर्कुटीमीश्वरो व्यधात् ॥ यत्तदाद्यजवत्तीर्थं । कुर्कुटेश्वरमित्यदः ॥ ३८ ॥ सुराः सन्निहितास्तद्धि । तीर्थमाविश्य तस्थुषः ॥ तद्ध्यातृणां सदा कामं । व्यधुः कल्पडुमा इव ॥ ३९ ॥ यस्तत्रस्थं जिनं ध्याय–त्यनिशं जक्तिजासुरः ॥ किंकरंति सुरास्तस्य । पूर्णकामस्य वेश्मनि ॥ ४० ॥ इतश्च विहरन्नाथ–स्तापसाश्रमसन्निधौ ॥ पुरासन्ने व्यधात्कायो–त्सर्गं जेत्तुं कुकर्मणां ॥ ४१ ॥ इतो



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दशभवारातिः । कमठासुर उपेत्य च ॥ उपसर्गान् छलान्वेषी । कर्तुमारताद्भुतान् ॥ ४२ ॥ द्वी-
पिद्विपद्विपाराति-वेतालव्यालवृश्चिकैः ॥ अप्यक्षोभ्यं विभुं ज्ञात्वा । विचकार पयोमुचः॥४३॥
उन्मूलयन् द्रुमान् गच्छ-शैलानुन्नाययन् बलात् ॥ कल्पांतारंभकारीव । ववौ वायुः सुदुःस-
हः ॥ ४४ ॥ स्फोटयन् वसुधां शैलान् । पाटयंस्त्रासयन् गजान् ॥ जगर्ज निष्ठुरं मेघः । प्र-
भुक्षोभकरः किमु ॥ ४५ ॥ स्वस्य प्रवेशयोग्यां किं । गर्त्तां कुर्वन्निवांबुदः ॥ धारासारैर्महा-
तीव्रै-र्ववर्षाशनिभृद्भृशं ॥ ४६ ॥ न श्वभ्रेषु न गर्त्तासु । न नदीनिर्झरेष्वपि ॥ तमोवत्तज्जलं क्वा-
पि । न ममौ सर्वतो लुठत् ॥ ४७ ॥ यथाशनिर्यथा विद्युत् । यथा वारि प्रसर्पते ॥ तथा त-
था विभोर्ध्यान-प्रदीपस्तु प्रवर्धते ॥ ४८ ॥ न स्थिरायां न भूध्रेषु । विभौ स्थैर्यमभूत्तदा ॥
यदकंपत तेऽप्युच्चै-र्न प्रभुर्ध्यानतो मनाक् ॥ ४९ ॥ प्रवर्धन्नंबुपूरोऽथ । नीचगाम्यपि यो भृ-
शं ॥ तत्संगादिव सोऽप्युच्चै-र्विभोर्नासापुटं ययौ ॥ ५० ॥

इतो धरणनागस्य । तत्संगादिव विष्टरं ॥ अकंपतोऽभ्रलहाब्धौ । पोतवत्सोऽप्यचिंतयत्
॥ ५१ ॥ अचाल्यं मेरुवत्केन । मदासनमचालि रे ॥ वज्रेणाद्य शिरस्तस्य । हत्वा संचूर्ण-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



याम्यहं ॥ ५२ ॥ कोपाटोपादिति ध्यात्वा । युंक्ते ध्यानं स यावता ॥ तावत्तथास्थं स्वविभु-मपश्यच्चाप्यदूयत ॥ ५३ ॥ तदैव सपरीवार-स्तत्रैत्यादिशरीरभृत् ॥ फणाछत्रमधान्नोगी-कोर्धरन् स्वामिनं स हि ॥ ५४ ॥ संगीतकं विभोरग्रे-ऽसूत्रयत्तद्वधूजनः ॥ समवृत्तिर्विभुश्चासीद् । द्वयोरपि स दोषमुक् ॥ ५५ ॥ व्यरमत्स यदा वृष्टे-र्न तदा धरणः क्रुधा ॥ स्वभृत्यानादिशन्मंक्षु । विपक्षक्षयदक्षिणान् ॥ ५६ ॥ मेघमाली स तान् दृष्ट्वा । कोपारुणविलोचनान् ॥ ढुतं ढुत्वा विभोः पादा-नशिश्रयदमंदधीः ॥ ५७ ॥ संजद्दाराब्दवृंदं त-त्तन्नक्तयोवाच सोऽसुरः ॥ अनात्मज्ञेन यत् स्वामिन् । मयाचरि क्षमस्व तत् ॥ ५८ ॥ दासोऽतःपरमस्मीश । तव विश्वजनप्रभोः ॥ त्वं सदा तु दयाधारो । विशेषादपि तां कुरु ॥ ५९ ॥ त्रैलोक्यत्राणभृन्नाथ । यन्मां मर्षितवान् भवान् ॥ तद्धियैव क्षिपन् सूर्यः । खद्योतं किं न लज्जते ॥ ६० ॥ कठोऽपीभमभूत्स्वामि-सेवको धरणेंद्रवत् ॥ धरणानुमतितः संघे । प्रत्यूहव्यूहनाशनः ॥ ६१ ॥ धरणेंद्रकठाद्यास्ते । बभूवुः पार्श्वशासने ॥ महोत्सवकरास्तत्र-त्समीहितविधानतः ॥ ६२ ॥ गतेष्वथ विभुं नत्वा । तेषु स्वं स्वं पदं प्रति ॥ स्वामी विहर्तुमन्यत्र ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ययौ तीर्थीकृताश्रयः ॥ ६३ ॥

अथ काशीवने चैत्र–चतुर्थ्यां धातकीतले ॥ राधायां चतुरशीतौ । गतेऽह्न्याप स केवलं ॥ ६४ ॥ सुरासुरैः समवस–रणे कृते जगद्विभुः ॥ चकार देशनां पुण्य–नाट्यनांदीं जगन्मुदे ॥ ६५ ॥ अश्वसेनमुखास्तत्र । नरेशाः परिवव्रजुः ॥ वामाप्रभावतीमुख्या । नार्यश्च जिनबोधिताः ॥ ६६ ॥ हस्तिसेनमुखाः केचित् । सम्यक्त्वं च प्रपेदिरे ॥ तत्रार्योऽपि स्फुरच्छील–कमलोन्मीलनांशुभाः ॥ ६७ ॥ आर्यदत्तमुखास्तस्य । बभूवुर्दश सूरयः ॥ मूर्तास्ते यतिधर्मस्ये–वांशा बभुरुपासकाः ॥ ६८ ॥ संपन्नोऽतिशयैः स्वामी । विजहार धरातले ॥ स्थाने स्थानेऽपि तीर्थानि । कुर्वन्नंहिनिवेशनात् ॥ ६९ ॥ आससाद च तीर्थेशं । क्रमाच्छत्रुंजयं विभुः ॥ आद्यार्हन्निव भव्यानां । तत्प्रभावमसूत्रयत् ॥ ७० ॥ विभुव्याख्यानतः सर्प–नकुलेभकुरंगकाः ॥ प्रबुद्धाः प्रययुस्तत्र । स्वर्गं साम्यसमाश्रयाः ॥ ७१ ॥ रैवतादिषु शृंगेषु । विहृत्य त्रिजगत्प्रभुः ॥ पुनः काशीमवासीत्स । त्रिदशैः सेवितक्रमः ॥ ७२ ॥ हस्तिसेनोऽथ तद्बंधु–स्तत्रैत्य विभुमानमत् ॥ सुरेंद्रा अपि संभूय । भक्तिनुन्नाः समाययुः ॥ ७३ ॥ इतः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




कृपालुरीशोऽपि । तेषां तारणकारणे ॥ सर्वज्ञाशानुयायिन्या । गिराऽज्ञत देशनां ॥ ७४ ॥ शत्रुंजयः सुरेशार्चा । संघपत्वं च सद्गुरुः ॥ सम्यक्त्वं शीलसाम्ये च । शिवसौख्याय सप्तकं ॥ ७५ ॥ अनंतज्ञवसंज्ञूत–कुःकृतद्रोहकृद्गिरिः ॥ शत्रुंजयः सिद्धिपदं । शाश्वतः सेव्यते न कैः ॥ ७६ ॥ रागद्वेषद्विषद्व्रात–हर्त्ता वंद्यपदांबुजः ॥ जिनो व्रजिनसंघातं । पूजितो हंति देहिनां ॥ ७७ ॥ अर्जयंस्तीर्थकृद्गोत्रं । स्वगोत्रं च पवित्रयन् ॥ लंज्ञयन्नपरान् पुण्यं । संघेशः सेव्यते न कैः ॥ ७८ ॥ मिथ्यात्वधर्मसंघूर्णि–जनं सम्यग्वचोऽमृतैः ॥ निर्वापयन् गुरुर्ध्यातः । पातकांतकरोंगिनां ॥ ७९ ॥ तावज्जीवो भ्रमत्यत्र । ज्ञवे मिथ्यात्वमोहितः ॥ सम्यक्त्वं न स्पृशत्येष । यावन्निःशेषपापनुत् ॥ ८० ॥

जलत्यग्निर्विषं सर्वं । पीयूषत्यही रज्ज्वति ॥ किंकरंति सुरा यस्मा–त्तच्छीलं सेव्यमंगिन्निः ॥ ८१ ॥ स्वज्ञाववैरिणोऽप्यंगि–गणा यद्वैरवर्जिताः ॥ मित्रंत्यन्योऽन्यमासेव्यं । साम्यं सिद्धिनिबंधनं ॥ ८२ ॥ सप्तैते सप्तनरक–ध्वांतज्ञित्सप्तसप्तिज्ञाः ॥ एकोत्तरसप्तकर्म–समासेव्य शिवाप्तये ॥ ८३ ॥ हस्तिसेनो निशम्येति । ज्ञक्त्योत्थाय नमन् जिनं ॥ कृतांजलिपुटः संघ–



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पतित्वं प्रार्थयन्मुदा ॥ ८४ ॥ ईशाहतैर्जिनेशोऽपि । वासाक्षतकरैरमुं ॥ प्रातिष्ठिपत्स्वयं सं-
घ–पतिमुत्सवमंदिरं ॥ ८५ ॥ स तदैव समं संघै–र्देवालयमनुव्रजन् ॥ पूर्वसंघपवन्मार्गे ।
चार्चतिस्म जिनान् गुरून् ॥ ८६ ॥ शत्रुंजयमपि प्राप्य । नदीभ्यो जलमाहरत् ॥ महोत्स-
वैर्युगादीश–मस्नपन्मृन्मयो ऽभवन् ॥ ८७ ॥ शृंगे शृंगेऽपि चैत्यानि । कारयन् वित्तवृष्टिमान्
॥ स हि पुण्यघनः संघ–मर्चतिस्म महोदयी ॥ ८८ ॥ चंद्रप्रभासे श्रीशैले । गिरिनारगिरा-
वपि ॥ नत्वा स्तुत्वा च तीर्थेशान् । दानं पंचविधं ददौ ॥ ८९ ॥ क्षेत्रेषु सप्तसु स्वं स । स्व-
बीजमिति निक्षिपन् ॥ निश्रेयःफललब्धौ श्राग् । भावांभोभिरासिंचयत् ॥ ९० ॥ धर्मं चतु-
र्विधं ध्यात्वा । चलितस्तं पथि प्रभुं । नत्वा काशीमयासीत्सो–ऽवासीद्वासीमचैत्यकृत् ॥ ९१ ॥
जिनश्चित्ते गुरुर्नेत्रे । वाचि तत्वं श्रुतौ श्रुतं ॥ करे दानं शिरस्याज्ञा । धार्मिणस्तस्य सर्वदा
॥ ९२ ॥ इतो विहरतोऽभूवन् । सहस्रा विंशतिर्विभोः ॥ शतानि च नव प्राप्त–लब्धयो व्रतिनो
गणे ॥ ९३ ॥ सहस्रास्त्रिंशतिः साष्टा । व्रतिनीनां च श्रावकाः ॥ लक्षं सहस्रा आसंस्ते ।
चतुःषष्टिमिताः प्रभोः ॥ ९४ ॥ सप्तसप्तिसहस्राणि । त्रयो लक्षाश्च श्राविकाः ॥ विभुस्वह-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्तविन्यस्त—धर्माणोह्यपरे न हि ॥ ९५ ॥ आयुर्वर्षशतं प्रपाल्य जगवान् सम्मेतशैलं गतो। मासेनानशनेन कर्मविलयं कृत्वा त्रयस्त्रिंशता ॥ सार्धं तैः श्रमणैः सिताष्टमदिने मासे शुचौ निर्वृतो। राधायां त्रिदशैः कृतांत्यकरणः श्रीपार्श्वनाथो जिनः ॥ ९६ ॥ श्रीहस्तिसेनोऽपि निजं तनूजं। महारथे युज्यमथो विधाय ॥ शत्रुंजये साम्यसमाश्रयेण। समाश्रयत्सिद्धिसुखं शांतः ॥ ९७ ॥ ये सिद्धा मुनयोऽपि संघपतयस्तीर्थोद्धृतिप्रह्विणः। केचित्ते सुरराजतेऽत्र कथिताः कालेऽवसर्पेत्यपि ॥ अस्मत्तोऽपि च ये हि जाविन इहैकांतं महादुःखिनो। यावत्तानपि जावज्ञासुरमनाः पुण्यान् शृणु प्रस्तुतान् ॥ ९८ ॥ श्रीशत्रुंजयशैलराजचरितं श्रोतुश्च वक्तुस्त्रिधा। शुद्ध्या बुद्धिविवर्द्धनं रविरिवाऽज्ञानांध्यनुन्निर्मलं ॥ रुग्दारिद्र्यविषापमृत्युशमनं पीयूषवत्स्वादु यत्। कृत्वा कर्मनिषूदनं किल ददात्यानंदमुच्चैः पदं ॥ ९९ ॥ इतो वैजारमस्माकं। गतानां वचसा नृपः ॥ कृत्वा यात्रां श्रेणिकोऽपि। चैत्यान्यत्र पुरेऽपि च ॥ ॥ १०० ॥ अस्मन्निर्वाणतो वर्षै—स्त्रिभिः सार्धाष्टमासकैः ॥ धर्मविप्लावकः शक्र। पंचमारो जविष्यति ॥ १ ॥ ततः शतैश्चतुर्भिः षट्—षष्टिभिर्वत्सरैर्दिनैः ॥ पंचचत्वारिंशतापि। विक्र-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मार्को महीमिमां ॥ २ ॥ सिद्धसेनोपदेशेना–नृणीकृत्य जिनोक्तवत् ॥ अस्मत्संवत्सरं लु-प्त्वा । स्वं तमाविष्करिष्यति ॥ ३ ॥ युग्मं ॥

इतश्च कांपिल्यपुरे । सुरेशार्हद्गृहार्हते ॥ भविता भावडश्रेष्ठी । व्यवहारिशिरोमणिः ॥ ४ ॥ भवित्री भावला नाम । तत्पत्नी तीव्रशीलभा ॥ धर्माश्रिता क्षांतिरिव । रेजे या भावडानुगा ॥५॥ गृहव्रतं पालयतो–स्तयोर्यास्यंति वासराः ॥ सुखमाकालवत्स्वैर–धर्मकर्मसमाश्रयात् ॥ ॥ ६ ॥ चंचलाचंचला लक्ष्मीः । स्वलक्ष्मकलितालयात् ॥ पालितापि चिरं तस्य । पलास्य-त्यपि पश्यतः ॥ ७ ॥ यातेऽपि द्रविणे सत्वं । न तयोर्यास्यति क्वचित् ॥ सत्वसाध्या हि यत्सर्वाः । क्रियाः पुंसां मनीषिताः ॥ ८ ॥ अल्पवेषधरो ह्यल्प–सङ्गोऽल्पस्वमान् पुनः ॥ सोऽनल्पभावभृद्धर्मे । कर्त्ता हट्टार्जनाद्ययं ॥ ९ ॥ त्रिसंध्यं जिनमर्चित्वा । नमिष्यति गुरू-नसौ ॥ द्वयोर्हि संध्ययोर्भक्त्या । प्रतिक्रंस्यति निर्मलः ॥ १० ॥ अन्यदा विहरंतौ द्वा–वैष्य-तस्तद्गृहान् मुनी ॥ भावला प्रतिलाभ्याथ । प्रक्ष्यति स्वधनागमं ॥ ११ ॥ विदित्वाथ तयो-रेको । व्याहरिष्यति तामिति ॥ विक्रेतुरद्य तुरगी । ग्राह्या बहुधनाप्तये ॥ १२ ॥ सावद्यम- ॥८०८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





प्यदोऽस्माभि–रुक्तं बहुशुभाय ते ॥ त्वत्सूनुस्तु ततो भव्या–त्तीर्थमप्युद्धरिष्यति ॥ १३ ॥
सा नंस्यत्यथ तौ हृष्टा । धर्मलाभाशिषं च तौ ॥ दत्वा स्वाश्रयमासाद्य । गुरुपादान् श्रयिष्यतः ॥ १४ ॥ सा च हट्टं गृहात्प्राप्ता । तुरगीक्रयिकं नरं ॥ दृष्ट्वा पत्युर्मुनेर्वाक्यं । वक्ष्यतीदृग् हितप्रदं ॥ १५ ॥ किंचिदुद्धाररौक्येण । क्रयेणाश्वीं स भावडः ॥ गृहिष्यति गृहायातां । कामधेनुमिवांगिनीं ॥१६॥ मुक्त्वा सर्वाणि कर्माणि । स तामेव श्रयिष्यति ॥ शुभोदर्कं हि यद्वस्तु । पाल्यते सर्वयत्नतः ॥ १७ ॥ समये साथ सर्वांग–स्फुरल्लक्षणलक्षितं ॥ नभैःश्रवोऽनुजन्मान–मिवाश्वं प्रसविष्यति ॥ १८ ॥ त्रिहायनः किशोरोऽथ । स स्वतेजोभिरंशुवत् ॥ राजस्पृहायै भविता । तत्तज्ज्ञनिवेदितः ॥ १९ ॥
तपनोऽथ नृपोऽभ्येत्य । तद्गृहान् स्वयमुत्सुकः ॥ तस्मै लक्षत्रयं दत्वा । वित्तमश्वं गृहिष्यति ॥ २० ॥ सोऽपि तद्वित्तैरश्वी–र्भूयसीः संगृहिष्यति ॥ तत्तुरगरत्नानां । खानीर्दारिद्र्यनाशिनीः ॥ २१ ॥ सप्तभिः सप्तिभिः सप्त–सप्तिर्भुवनमेककं ॥ भयोतयत्यदःसूनु–स्त्रिलोकीं द्योतयिष्यति ॥ २२ ॥ इति चास्य भविष्यंति । त्रिगुणास्ते ततोऽपि च ॥ क्र-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मादस्याः क्रमक्रांत–दिक्चक्रा बहुविक्रमाः ॥ २३ ॥ युग्मं ॥ सर्वेषामधिपं ज्ञात्वा । विक्रमार्कं स भावडः ॥ तानेकवर्णानादाय । करिष्यत्यस्य ढौकनं ॥ २४ ॥ तुष्टोऽथ विक्रमादित्य–स्तस्य सौराष्ट्रमंडले ॥ द्वादशान्यपुरोपेतां । दाता मधुमतीं पुरीं ॥ २५ ॥ वाद्यमानेषु वाद्येषु । छत्रचामरचिह्नितः ॥ पठद्भिर्मागधैः सारं । गायद्भिर्गायनीजनैः ॥ २६ ॥ हयवृंदैर्जनव्रातै–र्वृतो मधुमतीं पुरीं ॥ उत्तोरणामथाभ्येत्य । भावडो वेक्ष्यति स्वकां ॥ २७ ॥ युग्मं ॥ तस्मिन्नेव क्षणे तस्य । भार्या पूर्वेव भास्करं ॥ लक्षणव्यंजनोपेतं । प्रसविष्यति नदंनं ॥२८॥ संपद्वेलोदितस्तस्या––नंदवार्द्धिमुखेंदुना ॥ सूनोरमंदमुद्वेलो । न केनापि स्खलिष्यति ॥२९॥ पुत्रागतिश्रुतिप्रीतः। प्रविश्य स्वपुरं रयात् ॥ ददद्दानमसौ दीनान् । दयया तोषयिष्यति ॥३०॥

प्रसीदिष्यंति सर्वाशा । वायुर्वास्यति सौख्यकृत् ॥ सचराचरजीवानां । मनः शांतिमुपेष्यति ॥ ३१ ॥ स स्वसूनोरनूनोच्च–भाग्यभासुरवर्ष्मणः ॥ कर्त्ता स्वगोत्रानुमतं । गोत्रं जावड इत्यथ ॥ ३२ ॥ युग्मं ॥ स लाल्यमानो धात्रीभि–स्तत्पयःपानपोषितः ॥ सुरभूरुहवत्पित्रोः । पूरयिष्यति वांछितं ॥ ३३ ॥ निमित्तज्ञोक्तभूभागे । शुद्धे स्वविभवोदयात् ॥ भावडो-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ऽन्यां पुरीं नाम्ना। तेनैव स्थापयिष्यति ॥ ३४ ॥ इष्टं संजायते पुण्यात् । पुण्यदास्तु जिनेश्वराः ॥ आसन्नपुण्यदस्तेषु । श्रीवीरः परमेश्वरः ॥ ३५ ॥ इतीव तत्र सोऽस्माकं । प्रासादं कारयिष्यति ॥ पार्श्वे च पौषधागारं । धर्मध्यानविधीच्छया ॥ ३६ ॥ युग्मं ॥ मुक्त्वाथ रिंखनविधिं । पादचंक्रमणक्रमः ॥ कुमारः पंचवार्षीयः। कलाभ्यासं विधास्यति ॥ ३७ ॥ स्थिते मध्यं वयस्तस्मिं—स्तत्पितुर्मनसि तथा ॥ तद्योग्यकन्याचिंता च । प्रवेशं हि करिष्यति ॥ ॥ ३८ ॥ विज्ञाय कांपील्यपुरे । स्वजातीयान् सहस्रशः ॥ तत्तल्लक्षणदक्षं स । स्वं शालं प्रेषयिष्यति ॥ ३९ ॥ इतः स गच्छन् कांपिल्यं । शत्रुंजयतले पथि ॥ घेटीग्रामे निशामेका—मुषिष्यति निमित्ततः ॥ ४० ॥

इतस्तत्र पुरे सूर—स्तज्जातीयो वणिग्वरः ॥ वसत्यस्य सुतारत्नं । सुशीलेति भविष्यति ॥ ४१ ॥ लब्धवाणीवरा सा तु । देवस्त्रीसमविग्रहा ॥ स्वगृहाजिरमासाद्य । तमीक्षिष्यति कौतुकात् ॥ ४२ ॥ मातुलो जावडस्यापि । तारास्विव शशिप्रभां ॥ कन्यास्वन्यासु तां वीक्ष्य । स विस्मयमवाप्स्यति ॥ ४३ ॥ ज्ञात्वा तन्नाम तद्गोत्रं । तामाकार्य निमित्तवित् ॥ त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





त्संगेऽप्यधिरोप्यैत–त्तातमाह्वयिता जनात् ॥ ४४ ॥ ग्रामोचितामुपादायो–पदां सूरोऽपि तत्क्षणात् ॥ तं नमस्तेन चालिंग्या–सिष्यते निजसन्निधौ ॥ ४५ ॥ तद्भास्य मधुरैर्वाक्यै–स्तं सानंदं स कोविदः ॥ कन्यां स्वभागिनेयार्थं । मार्गयिष्यति तत्समां ॥ ४६ ॥ स्वाशक्त्या नम्रवदनो । यावत्सूरो भविष्यति ॥ तावत् स्मित्वा स्वयं कन्या । तमेवं व्याहरिष्यति ॥ ४७ ॥ योऽभिजातो भृशं कर्त्ता । मच्चतुःप्रश्ननिर्णयं ॥ स वरोऽस्तु ममानर्घ्यो । नोचेत्कर्त्तास्मि सत्तपः ॥ ४८ ॥ इति तदुक्तिमाकर्ण्य । स प्रमोदपरः कर्नी ॥ सकुलामपि तां लात्वा । पुरमेष्यति सत्वरः ॥ ४९ ॥

तत् श्रुत्वा भावडोऽप्युच्चैः । कौतुकोत्तालमानसः ॥ आदाय स्वजनानस्म–च्चैत्ये स्थास्यति पुत्रवान् ॥ ५० ॥ विभूषितांगी कन्यापि । वृता तत्स्वजनैर्घनैः ॥ चैत्यमेत्य जनान् सर्वान् । चक्षुषालोकयिष्यति ॥ ५१ ॥ सर्वत्र भ्रमणात् खिन्न–मिव तच्चक्षुरुच्चकैः ॥ जावडयुनि लावण्य–सरस्याश्रममेष्यति ॥ ५२ ॥ इषत्स्मितोच्छ्वासहृक्ता । मनोरथरथस्थितं ॥ सा सुशीला सुशीलाभि–र्वाणीभिस्तं वदिष्यति ॥ ५३ ॥ धर्मार्थकाममोक्षाख्या–नमून् शास्त्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समर्चितान् ॥ चतुरः पुरुषार्थान् मे । पुरश्चतुर वर्णय ॥ ५४ ॥ सर्वशास्त्रपयोराशि–मंथरः स कुमारराट् ॥ मंदरक्षुब्धपाथोधि–ध्वनिरेवं वदिष्यति ॥ ५५ ॥ तत्वरत्नत्रयाधारः । सर्वजंतुहितप्रदः ॥ चारित्रलक्षणो धर्मः । कस्य शर्मकरो न हि ॥ ५६ ॥ हिंसास्तेयपरद्रोह–मोहक्लेशविवर्जितः ॥ सप्तक्षेत्रोपयोगी स्या–दर्थोऽनर्थविनाशकः ॥ ५७ ॥ जातिस्वभावगुण–भृ–त्सुप्राप्यकरणः क्षणं ॥ धर्मार्थाबाधकः कामो । दंपत्योर्भावबंधनं ॥ ५८ ॥ कषायदोषापगतः । साम्यवान् जितमानसः ॥ शुक्लध्यानमयः स्वात्मा–ध्यक्षो मोक्ष उदीरितः ॥ ५९ ॥ सेति निर्णयमासाद्य । भारत्यनुमितं मुदा ॥ स्वचक्षुःषट्पदाधारां । तत्कंठे मोक्षति स्रजं ॥ ॥ ६० ॥ हर्षोत्कर्षान्मनःप्रीत्या । पितृभ्यां शुभवासरे ॥ तयोः कारिष्यते कामं । विवाहोऽन्योऽन्यरक्तयोः ॥ ६१ ॥ कदाचिद्योगतो रात्रि–शशिनोर्देहगाययोः ॥ हीयमानाधिकत्वाच्च । न तयोरुपमाभवत् ॥ ६२ ॥ धनार्जने रिपुध्वंसे । चतुरश्चतुरः पृथक् ॥ उपायान् कुर्वतस्तस्य । सेत्स्यंत्यर्थास्त्रयश्चतुः ॥ ६३ ॥

कियत्यपि गते काले । भावमेऽत्र दिवं गते ॥ भावमः स्वपुरीमेतां । धर्मवत्पालयिष्य-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ति ॥ ६४ ॥ दुःखमाकालमाहात्म्या–न्मुँझलानां बलं बलात् ॥ पयोधिपूरवत्पृथ्वीं । प्लाव-
यित्वा गृहिष्यति ॥ ६५ ॥ गोधान्यधनबालस्त्री–मध्यमांत्योत्तमान् जनान् ॥ सौराष्ट्रकच्छ-
लाटादीन् । लात्वा यास्यंति मुझलाः ॥ ६६ ॥ स्वस्वोचितेषु कार्येषु । वर्णान् संस्थाप्य मुझ-
लाः ॥ दत्वा बहूनि वित्तानि । योजयिष्यंति मंडले ॥ ६७ ॥ तत्रापि जावडः श्रेष्ठी । सर्व-
वस्तुषु कोविदः ॥ अर्जयिष्यति वित्तानि । धर्माणीव विचारवान् ॥ ६८ ॥ आर्यदेश इव स्वी-
य–ज्ञातिमेकत्र वासयन् ॥ तत्रापि चैत्यमस्माकं । कारयिष्यति धर्मवान् ॥६९॥ आर्याना-
र्येषु देशेषु । विहरंतो मुनीश्वराः ॥ तत्रायास्यंति सानंदो । वंदिष्यति च जावडः ॥ ७० ॥
धर्मव्याख्याक्षणे सिद्ध–शैलोच्चमहिमोदये ॥ पंचमारे जावडाख्य–स्तीर्थोद्धर्तेति श्रोष्यति ॥
॥ ७१ ॥ ततः प्रणम्य सानंदो । मुनीनेवं स प्रक्ष्यति ॥ स जावडोऽहमन्यो वा । यस्तीर्थो-
द्धारकृद् गुरो ॥ ७२ ॥ उपयोगेन विज्ञाय । गुरुस्तु व्याहरिष्यति ॥ अब्रूवन् पुंडरीकाधि–
ष्ठातारो हिंसकाः क्रमात् ॥ ७३ ॥ मद्यमांसासक्तैस्तैस्तु । पंचाशद्योजनावधि ॥ परितः
पुंडरीकाद्रि–रुद्धसं प्रवितन्यते ॥ ७४ ॥ यस्तं चावधिमुल्लंघ्य । भ्रमत्यर्वाग् जनः क्वचित् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कपर्दी यक्षो मिथ्यात्वी । तं हिनस्त्यतिरोषणः ॥ ७५ ॥ अपूज्यो नगवान् जातः । श्रीयुगादिजिनेश्वरः ॥ समयेऽस्मिंस्तदुद्धारे । नाग्यवांश्च नवानहो ॥ ७६ ॥ कारितं बाहुबलिना। बिंबं श्रीप्रथमप्रनोः ॥ चक्रेश्वरीं सुरीं नक्त्या । मार्गय त्वं जिनोदितः ॥ ७७ ॥

इति श्रुत्वा गुरुं नत्वा । प्रमोदोत्फुल्ललोचनः ॥ जावडः स्वगृहान् गत्वा । जिनमार्चिष्यति ध्रुवं ॥ ७८ ॥ कृत्वा बलिविधानं च । संतोष्य क्षुद्रदैवतं ॥ मनस्याधाय चक्रेशां । तपिष्यति समाहितः ॥ ७९ ॥ मासिकात्तपसः प्रांते । तुष्टा चक्रेश्वरी सुरी ॥ साक्षाद्भूत्वा महापुंसं । तमेवं व्याहरिष्यति ॥ ८० ॥ याहि तक्षशिलाद्रंगं । जगन्मल्लं च तत्प्रभुं ॥ संन्नाष्य धर्मचक्राग्रे । बिंबमार्हतमीक्ष्यसि ॥ ८१ ॥ जिनोदितो नवान् नाग्य-नासुरो मत्प्रसादतः ॥ विधास्यति महातीर्थो-द्धारं सारं सुधर्मिणां ॥ ८२ ॥ आकर्ण्य कर्णपीयूष-निन्नमेतद्वचः स शाक् ॥ चलिष्यति चोपतक्ष-शिलां देवीं स्मरन् हृदि ॥ ८३ ॥ प्राभृतैर्बहुन्निर्नृपं । संतोष्य प्रतिमां विन्नोः ॥ देव्योपदिष्टां स श्रेष्ठी । प्रीतिमान् प्रार्थयिष्यति ॥ ८४ ॥ लब्ध्वा प्रसादं नूपाला-द्धर्मचक्रमुपेत्य च ॥ नक्त्या प्रदक्षिणीकृत्या-र्चयिष्यति समाहितः ॥ ८५ ॥

For Private And Personal Use Only

कियत्यपि गते काले । ज्योत्स्नाक्तमिव निर्मलं ॥ ऋषभस्वामिनो बिंबं । पुंडरीकद्वयान्वितं
॥ ८६ ॥ मूर्तं तत्सुकृतमिव । दृक्पीयूषनिभं पुरः ॥ आविर्भविष्यति रया—भाग्यात्किं नोप-
लभ्यते ॥ ८७ ॥ युग्मं ॥ पंचामृतैः स संस्नाप्य । पूजयित्वा जगद्विभुं ॥ रथेऽधिरोप्य पुर्यं-
त—र्नैष्यत्युत्सपूर्वकं ॥ ८८ ॥ साहाय्यं भूपतेर्लब्ध्वा । तत्रस्थान्निजगोत्रिणः ॥ पुरस्कृत्यैक-
भक्तेना—नुतीर्थं स चलिष्यति ॥ ८९ ॥ भूमिकंपमहाघात—निर्घाताग्निप्रदीपनं ॥ मिथ्यादृ-
कसुरसंबद्धं । विघ्नव्यूहं पदे पदे ॥ ९० ॥ भाग्योदयाद्विलुप्यासौ । सौराष्ट्रामंडले क्रमात् ॥
निजां पुरीं मधुमती—मलमासादयिष्यति ॥ ९१ ॥ युग्मं ॥ इतश्च पूर्वं तेनैव । पूरितान्यभ-
वन् किल ॥ वाहनानि महाचीण—चीणभोटान् प्रतिस्फुटं ॥ ९२ ॥ भ्रमित्वा वायुवशतः ।
स्वर्णद्वीपं समासदन् ॥ अग्निदाहात्सुवर्णत्वा—न्निश्चितं पोतधारिभिः ॥ ९३ ॥ अष्टादशापि
पोतास्ते । भृतास्तद्धातुभिर्भृशं ॥ प्रवेशकाल एवास्य । समेष्यंति सुभाग्यतः ॥ ९४ ॥ त्रि-
भिर्विशेषकं ॥ नत्वैकोऽथ नरः प्राप्तं । पुरीपरिसरे मुनिं ॥ श्रीवज्रस्वामिनामानं । तस्माया-
वेदयिष्यति ॥ ९५ ॥ द्वितीयस्तु द्वादशाब्द—प्रांते पोतानुपागतान् ॥ कथयिष्यति सानंदः ।

स्वर्णधातुन्नृतानन्नि ॥ ९६ ॥ ताभ्यां दोलितचित्तः सन् । स एवं चिंतयिष्यति ॥ क्व लक्ष्मी-
र्लक्ष्मीकृत्पापा । क्व स पुण्यो मुनिर्ननु ॥ ९७ ॥ नंस्ये पूर्वं वज्रमुनिं । श्रोष्ये तद्वचनान्य-
पि ॥ यत्तद्दर्शनतोऽपि स्या—न्न दूरे जगतोऽपि सा ॥ ९८ ॥ इत्यामृश्य स धन्यात्मा—जंगमं
तीर्थमागतं ॥ महोत्सवैः समं लोकै—स्तं वंदिष्यति जावडः ॥ ९९ ॥ स्वर्णान्नोजांतरस्थस्य
। वज्रस्यास्यैंदुदत्तदृक् ॥ निषीदिष्यत्यसौ याव—त्तावदुद्योतयन् दिशः ॥ २०० ॥ विद्युद्दंडमि-
व व्योम्नि । दर्शयन् जनचित्रकृत् ॥ दिवोऽन्येत्य सुरो नत्वा । मुनिमेवं वदिष्यति ॥ १ ॥ शु-
ष्मे ॥ स्वामिन् सुकर्मणः सूनु—स्तीर्थमानपुरेशितुः ॥ नाम्ना कपर्दी दुर्दांतो । मद्यपोऽहं पुरा-
न्नवं ॥ २ ॥ कृपाकूपारन्नवता । प्रत्याख्यानप्रकाशनात् ॥ शत्रुंजयस्मृतेः पंच—परमेष्टिपदा-
दपि ॥ ३ ॥ न्नहृतोऽस्मि पतन् श्वन्ने । मद्यपानन्नवैनसा ॥ यथा तथा शृणु स्वामिन् । त-
वोपकृतिलक्षणं ॥ ४ ॥ [illegible] ॥ मद्यपानरसे मग्नं । मामालोक्य कृपापरैः ॥ प्रत्याख्यानाव-
लंबो यो । ददे पूज्यैस्तमासदं ॥ ५ ॥ अन्यदा चंडशालायां । न्नशासनमधिश्रितः ॥ अपिबं
सह नारीन्नि—र्नाम्ना कादंबरीं सुरां ॥ ६ ॥ चषकारोपिते मद्ये—ऽस्मरं यावत्तवाकरं ॥ ताव-

ह्यकुनिजग्धाहि—गरलं तत्र चापतत् ॥ ७ ॥ अजानन्नपिवं तद्धि । विषाच्चामूर्छमुच्चकैः ॥ अ-
स्मरं च महामंत्रं । पश्यंस्त्वामेव सर्वतः ॥ ८ ॥ निंदन् स्वव्यसनं भूपो—भूयस्त्वामेव संस्म-
रन् ॥ मंत्रोच्चारपरो मृत्वा । यक्षेष्वभवमीदृशः ॥ ९ ॥ नाम्ना कपर्दी यक्षोऽहं । यक्षलक्षैर-
नुश्रितः ॥ विश्वोद्धारक्षमः स्वामिन् । ब्रूहि किं करवाणि तत् ॥ १० ॥ विनयोदारमित्युक्त्वा
॥ सर्वाभरणभूषितः ॥ पाशांकुशमातुलिंगा—क्षधारिदोश्चतुष्टयः ॥ ११ ॥ गजारूढो निधाने-
शैः । सेवितः सर्वतोऽमरैः सुवर्णवर्णभृद्देहो । निषीदिष्यति तत्पुरः ॥ १२ ॥ युग्मं ॥ वज्र-
स्वामी ततः सिद्धा—द्रिप्रभावमुदीर्य तं ॥ श्रुतज्ञानधरस्त्वेवं । जावडं व्याहरिष्यति ॥ १३ ॥
यात्रां कुरु महाभाग । तीर्थमेतत्समुद्धर ॥ वयं च यक्षस्त्वदाज्ञया—देतत्कार्यावलंबिनः ॥१४॥
इति श्रुत्वा स उत्थाय । वस्तूत्तार्य च वाहनात् ॥ कल्याणकामनः कृत्वा । कल्याणं
स चलिष्यति ॥ १५ ॥ ततः पूर्वदिने पूर्व—रक्षकाः सिद्धभूभृतः ॥ ज्वरयिष्यंति संघेश—पत्नीं
जयमतीं सतीं ॥ १६ ॥ वज्रस्वामी तु दृग्दाना—च्चिकित्सिष्यति सत्तपाः ॥ क्षपा किरति हि
ध्वांतं । भास्करस्तु व्यपोहति ॥ १७ ॥ यक्षलक्षैर्वृतो व्योम्नि । कपर्दी दुष्टनाकिनां ॥ समाप-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तंति विघ्नानि । निर्दंस्यत्यतिदुःसहः ॥ १८ ॥ वायुना जलदं वायुं । गिरिणा पविना गिरिं ॥ गजं सिंहेन सिंहं च । सरभेण मुनीश्वरः ॥१९॥ वह्निं तोयेन तोयं च । वह्निनाहिं गुरुत्मता निर्दंस्यत्यसुरोत्पन्नां । श्रीवज्रो विघ्नसंततिं ॥ २० ॥ युग्मं ॥ क्रमादादिपुरं प्राप्ते । श्रीसंघे ते सुराधमाः ॥ कंपयिष्यंति शैलेंद्रं । वातोद्धुतद्रुपत्रवत् ॥ २१ ॥ श्रीवज्रः शांतिकं कृत्वा । तीर्थतोयाकृतैः शुभैः ॥ आहत्य शैलमाक्षेपात् । करिष्यति पुनर्ध्रुवं ॥ २२ ॥ भगवत्प्रतिमामग्रे । कृत्वा संघेऽधिरोहति ॥ शैलेंद्रे वज्रनिर्दिष्टा—हनि ध्वनति दुंदुभौ ॥ २३ ॥ शाकिनीभूतवेताल—रक्षःकुग्रहसंग्रहान् ॥ भीषणान् दर्शयिष्यंति । मिथ्यात्विसुरसंचयाः ॥ २४ ॥ युग्मं ॥ वज्रस्वामिकपर्दिभ्यां । विघ्नध्वांते हते सति ॥ पुष्पदंताभ्यामिव स । शैलशृंगमुपेष्यति ॥ २५ ॥ कीकसास्थिवसारक्त—खुरकेशपलादिभिः ॥ छिन्नमालोक्य ते शैलं । विषीदिष्यंति मानवाः ॥ २६ ॥ आनाय्य नद्या वारीणि । नरैः श्रीजावडः क्षणात् ॥ स्वचित्तमिव शैलेशं । क्षालयिष्यति निर्मलः ॥ २७ ॥ प्रासादान् पतितान् भ्रष्टान् । सतृणान् वायुकंपितान् ॥ दृष्ट्वा संघाधिपः काम—मरतिं लप्स्यते मुहुः ॥ २८ ॥ निशायामुषिते संघे । तत्रै-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वासुरसंचयः ॥ रथस्थां प्रतिमां भर्तु–रवारोहयिता गिरेः ॥ २९ ॥ प्रातर्मंगलनादेन । प्रबु-
द्धो जावडः सुधीः ॥ अदृष्ट्वा प्रतिमां भर्तु–र्विषीदिष्यति निर्भरं ॥ ३० ॥ तद्विज्ञायोपयोगेन।
वज्रो यक्षस्य तस्य तां ॥ दर्शयिष्यति आनंदी । स चारोहयिता पुनः ॥ ३१ ॥

पुना रात्रौ प्रसुप्तेषु । तेषु मिथ्यात्विनः सुराः ॥ गिरेरुत्तारयिष्यंति । यावदुल्लंघितं दि-
वा ॥ ३२ ॥ प्रातः संघजना एनां । प्रापयिष्यंति पर्वतं ॥ अनिर्विण्णाः सुरास्ते तु । पुनर्ने-
ष्यंति भूतले ॥ ३३ ॥ इत्येकविंशतिघस्राः । कृतप्रतिकृतैस्तयोः ॥ यास्यंति न पुनः कश्चि-
द्विजिष्यति चाग्रहात् ॥ ३४ ॥ रात्रावाकार्य यक्षेशं । वज्रस्वामी च जावडं ॥ व्याहरिष्य-
ति यद्यक्ष । स्मर शक्तिं वदानुगान् ॥ ३५ ॥ व्याप्य व्योम सुरैः सार्धं । तिष्ठासुरतृणानलः ॥
मन्मंत्राश्रितगात्रस्त्व–मजेयो वज्रवत्परैः ॥ ३६ ॥ सन्नार्यस्त्वं तु संघेश । चतुर्धाधर्मधारकः
॥ ध्यायन्नादिजिनं पंच–परमेष्टिं स्मरन् हृदि ॥ ३७ ॥ रथाग्रचक्रपर्यंते । प्रतिमास्थैर्यकृत्स्त्र-
प ॥ समर्था अपि ते नालं । युवां लंघयितुं मनाक् ॥ ३८ ॥ [illegible] ॥ अस्माभिः सह संघो-
ऽयं । सर्वो बालाबलादिकः ॥ आप्रभातं प्रतिमया । तिष्ठत्वादिजिनं स्मरन् ॥ ३९ ॥ इति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रुत्वा गुरोर्वाक्यं । सर्वेऽपि स्वस्वकर्मणि ॥ त्वरिष्यंति स्वयं वज्रो । ध्याने स्थास्यति निश्चलः ॥ ४० ॥ फेत्कारान् कलितारावान् । कुर्वंतोऽप्यसुरा घनाः ॥ न प्रवेशं क्वचित्पापा । लप्स्यंते ध्यानपुण्यतः ॥ ४१ ॥ प्रकाशयति मार्त्तंडे । प्रातः पुण्यप्रकाशकः ॥ पूर्णध्यानो गुरुर्वज्र—स्तथावत्तच्च द्रक्ष्यति ॥ ४२ ॥ ततो मंगलतूर्याणि । वादयंतः समंततः ॥ प्रतिमां प्रापयिष्यंति । प्रासादे तेऽतिसम्मदात् ॥ ४३ ॥

ततो वज्रश्च संघेश—स्तत्पत्नी च महाधराः ॥ चैत्यमाविश्य यत्नेन । प्रमृक्ष्यंति विसंस्थुलं ॥ ४४ ॥ दुष्टदैवतनाशाय । वज्रो ध्यानसमाधिना ॥ सर्वत्राक्षतविक्षेपा—च्छांतिकं प्रविधास्यति ॥ ४५ ॥ पूर्वः कपर्दी पूर्वां तां । मूर्त्तिमध्यास्य कोपनः ॥ प्रस्थास्यत्यसुरैः कैश्चि—द्वृतोऽनर्थविधित्सया ॥४६॥ अस्पह्णामिमां बाह्ये । दृढां मध्येऽत्र नूतनां ॥ स्थापयामीति बुद्ध्या ता—मुद्धरिष्यति जावडः ॥ ४७ ॥ श्रीवज्रस्वामिना मंत्रैः । स्तंभितः सोऽसुरव्रजः ॥ तमुपद्रोतुमीशो न । पूत्करिष्यति दारुणं ॥४८॥ तेनोच्चैर्ध्वनिनाव्योम—व्याप्नुवानेन खेचराः ॥ दिग्दंतिभिः समं दूरं । दूरान्नक्ष्यंति भीतितः ॥ ४९ ॥ कंपिष्यति क्षितिः शैलैः । सममंबु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धिवीचिवत् ॥ एष्यंति मूर्छां सर्वेऽपि । गजासिंहनरोरगाः ॥ ५० ॥ प्रासादाः कुट्टिमान्याशु ।
पतिष्यंति सभूरुहाः ॥ शैलोऽपि च द्विधा भावी । दक्षिणोत्तरखंमतः ॥ ५१ ॥ विना वज्रं
भावमं च । तत्पत्नीं च परे नराः ॥ विचेतना भविष्यंति । लुठंतो विगतासुवत् ॥ ५२ ॥ त-
थास्थितं जनं वीक्ष्य । कपर्दी वज्रबोधितः ॥ दधद्वज्रं करे धास्य–त्यसुरं तर्जयन् भृशं॥५३॥
बिभ्यन् पूर्वकपर्दी द्राक् । नंष्टा पाथोनिधेस्तटे ॥ चंद्रप्रभासक्षेत्रांतः । स्थास्यत्यपरनामभृत्
॥ ५४ ॥ ततो जनं बोधयितु–मादिमूर्तेर्विभोरिति ॥ अधिष्टातॄन् वज्रगुरु–र्व्याहरिष्यति सा-
मगीः ॥ ५५ ॥ भावडानीतबिंबं तु । प्रासादांतर्निषीदतु ॥ बिंबेनानेन सहिता । भवंतश्चात्र
सुस्थिताः ॥ ५६ ॥ आदौ नतिः स्नात्रपूजे । ध्वजारात्रिकमंगलं ॥ विधाय मुख्यनाथेऽस्मिं–
स्ततोऽप्यस्मिन् करिष्यते ॥ ५७ ॥ अस्यैव मुख्यनाथस्य । भवत्वाज्ञा सदा स्थिरा ॥ इह-
गुरीतिभिदो भूयात् । कपर्दी मूर्द्धभेदकः ॥ ५८ ॥ शुभोदर्कामिमामाज्ञां । दत्वा वज्रो गुरुः
सुरान् ॥ सुस्थान् कर्त्ता करिष्यंति । तेऽपि लोकान् प्रमोदिनः ॥ ५९ ॥ ततो जयजयाराव–
पूर्वमंगलनिःस्वनैः ॥ प्रतिष्टाया महस्तत्र । भावी प्रकटदैवतः ॥ ६० ॥ गुरौ या भक्तिरर्चा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 या । जिने दानं च यन्महत् ॥ भावनायाः प्रमोदो यो । नैर्मल्यं यच्च मानसे ॥ ६१ ॥ त- 
त्सर्वं च बभूवास्मिन् । जावकेऽन्यत्र न क्वचित् ॥ यादृग्गोपयसि स्वाद–स्तादृक् तक्रे क-
 थं भवेत् ॥ ६२ ॥ युग्मं ॥
अथ ध्वजाभिरोपाय । सद्भार्यः संघनायकः ॥ मुक्त्योकोदेहलीतुल्यं । प्रासादाग्रं श्रयि-
ष्यति ॥ ६३ ॥ अहो धन्योऽस्मि संसारे–ऽप्यहो भाग्यं ममाद्भुतं ॥ यदन्यदुष्करस्तीर्थो–द्धार-
श्चक्रे मयानघः ॥ ६४ ॥ मद्भाग्यैर्लब्धिसंपन्नः । संसारार्णवतारकः ॥ प्रत्यूहव्यूहभिद्वज्र–स्वा-
मी गुरुरभून्मम ॥ ६५ ॥ श्रीबाहुबलिना ध्यातं । सत्प्रभावं महर्द्धिमत् ॥ दुःप्राप्यमन्यैर्लब्धं
य–द्बिंबं तत्रापि भाग्यवान् ॥ ६६ ॥ शत्रुंजयं महातीर्थं । दुःप्रापं मुक्तिदं ह्यदः ॥ सुप्राप्यं
यन्मया चक्रे । ततोऽधिकतरोदयः ॥ ६७ ॥ श्रीवज्रबोधितो यक्षः । प्रत्यक्षोऽमरकोटिभिः ॥
कपर्दी विघ्नमर्दी मे । तत्र भाग्योदयो महान् ॥ ६८ ॥ मानुष्यभववृक्षस्य । मुख्यं फलमि- 
दं ननु ॥ यत्संघं पुरतः कृत्वा । नम्यतेऽत्र जिनेश्वरः ॥ ६९ ॥ प्रभातमद्यैव मम । सफलं मे-
ऽद्य जन्म च ॥ अद्यैव देवता तुष्टा । अद्याभूच्च सुमंगलं ॥ ७० ॥ कृत्वेदमद्भुतं पुण्यं । पुनः

For Private And Personal Use Only

कर्मवशोऽगवान् ॥ आर्त्तरौद्रादिभिर्ध्यानैः । स्वं कलंकयतीह हा ॥ ७१ ॥ भववासममुं मु-
क्त्वा । जिनध्यानपरायणः ॥ क्षिपामि यदि कर्माणि । तदा सिद्धिर्ममाग्रतः ॥ ७२ ॥ तयो-
रित्थं चिंतयतो-र्भावनाभावितात्मनोः ॥ निष्कलंकं शुभध्यानं । क्षणादाविर्भविष्यति ॥७३॥
कु[illegible] ॥ बाहुल्याद्धर्षसंपत्ते-रायुषः क्षयतोऽपि तौ ॥ प्राप्य हृत्स्फोटनं कल्पं । प्राप्स्येते तु-
र्यमुच्चकैः ॥ ७४ ॥ उत्तमे तु तयोर्देहे । आदाय व्यंतरामराः ॥ क्षेप्स्यंति क्षीरपाथोधौ । क्ष-
णादक्षीणवासनाः ॥ ७५ ॥

इतः शत्रुंजये जाज-नागस्तस्यैव नंदनः ॥ तावनालोक्य संघश्च । विषीदिष्यति निर्भरं ॥ ७६ ॥ तयोर्वृत्तांतमावेद्य । चक्रेश्वर्यपि हर्षदं ॥ इष्टोक्तियुक्तिभिरमू-नुच्चैराश्वासयिष्यति ॥ ॥ ७७ ॥ जाजनागोऽथ तं संघं । पुरस्कृत्य गुरूक्तितः ॥ रैवताद्रिषु शैलेषु । नमिष्यति जि-नान्मुदा ॥ ७८ ॥ कारयित्वाथ चैत्यानि । स सर्वत्र शुभोदयः ॥ पालयिष्यति चाचारं । पै-तृकं सर्वकर्मसु ॥ ७९ ॥ विक्रमादित्यतस्तीर्थे । जावडस्य महात्मनः ॥ अष्टोत्तरशताब्दांते भाविन्युद्धृतिरुत्तमा ॥ ८० ॥ कियत्यपि गते काले । ततो विद्याबलादलं ॥ बौद्धाः संबोध्य

भूपालान्। दुर्जयाः परवादिभिः ॥८१॥ विलुप्य शासनान्यन्या—न्यात्मधर्मं जगत्यपि ॥ स्था-
पर्यंतो ग्रसिष्यंति । तीर्थानि सकलान्यपि ॥८२॥ ॥ इतश्च लब्धिसंपन्नः । सर्वदेवमयो गु-
रुः॥ शशिगच्छांबुधिशशी । सूरिर्भावी धनेश्वरः ॥८३॥ सोऽनेकतपसा पुण्यो । वल्लभीपुरनाय-
कं ॥ शिलादित्यं जिनमते । बोधयिष्यति पावने ॥ ८४ ॥ निर्वास्य मंडलाद्बौद्धान् । शिला-
दित्येन सूरिराट् ॥ कारयिष्यति तीर्थेषु । शांतिकं चैत्यसंचयं ॥ ८५ ॥ सप्तसप्ततिमब्दाना—
मतिक्रम्य चतुःशतीं ॥ विक्रमार्काच्छिलादित्यो । भविता धर्मवृद्धिकृत् ॥ ८६ ॥ ततः कुमार-
पालस्तु । बाहडो वस्तुपालकः ॥ समराद्या भविष्यंति । शासनेऽस्मिन् प्रभावकाः ॥ ८७ ॥
भूपा म्लेछा भविष्यंति । द्रव्यलुब्धाश्च मंत्रिणः ॥ निजाचारपरिभ्रष्टा । लोकाः प्रायोऽन्यवं-
चकाः ॥ ८८ ॥ गीतार्था लिंगिनः केचित् । केचिदाचारवर्जिताः ॥ सादरा अपविद्यासु ।
विद्यासु न च भाविनः ॥ ८९ ॥ ततो मन्निवृतेरब्द—शतेष्वेकोनविंशतौ ॥ चतुर्दशसु याते-
षु । वर्षेषु म्लेछनंदनः ॥ ९० ॥ चैत्राष्टम्यां नृपो विष्टौ । पाटलीपुत्रपत्तने ॥ भावी कल्कि-
चतुर्वक्त्र—रुद्रनामत्रयान्वितः ॥ ९१ ॥ ॥ तदा च मथुरापुर्य—कस्मान्मुशलिकृष्णयोः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ पतिष्यत आयतने । वाताहतजरद्द्रुवत् ॥ ८२ ॥ भविष्यंतीतयः सप्त—भयं गंधरसक्षयः ॥ दुर्भिक्षं च तदा राज—विरोधोऽरिष्टकोटयः ॥ ८३ ॥ षट्त्रिंशद्वत्सरां तेऽसौ। राजा कल्की भविष्यति ॥ खातयिष्यति नंदस्य । राज्ञः स्तूपान् हिरण्मयान् ॥ ८४ ॥ अर्थार्थी खानयित्वा च । पुरीं वित्तं गृहिष्यति ॥ करदानखिलान् भूपा—नात्मनः स विधास्यति ॥ ८५ ॥ खन्यमाने पुरे धेनु—र्लग्नदेवीति नामतः ॥ आविर्भविष्यति मुनीन् । पीडयंती शिलामयी ॥ ॥८६॥ तदरिष्टं भविष्यंत्या । वृष्टेर्हेतुं च केचन ॥ विज्ञायान्यत्र यास्यंति। स्थास्यंत्यन्ये तु तत्र च ॥ ८७ ॥ लात्तान्यलिंगिदंभोऽसौ । जैनर्षीनपि मार्गयन् ॥ कल्की कोपात्पुरीदेवै—र्जलादेव निषेत्स्यते ॥ ८८ ॥ वृष्ट्याथाब्दः सप्तदशा—होरात्राणि पुरं क्षणात् ॥ प्लावयिष्यति कल्की च । सूरिः प्रातिपदः क्रियान् ॥ ८९ ॥ संघलोकः कियानुच्चैः । स्थास्यति स्थलमूर्द्धनि ॥ अपरे तु प्रयास्यंति पूरेण पयसांपतिं ॥ ९० ॥ ~~युग्मं~~ ॥ नंदद्रव्येण स पुरीं । नूतनां कारयिष्यति ॥ पंचाशदब्दीं च ततः । सुभिक्षं भावि धर्मवत् ॥ १ ॥ अथासन्नावसानस्तु । कल्की पाखंभिभिः परैः ॥ लिंगानि त्याजितैर्जैना—नुपद्रोष्यति दुष्टधीः ॥ २ ॥ सूरिः प्राति-



For Private And Personal Use Only

पदः संघः । कायोत्सर्गं प्रदास्यति ॥ विप्ररूपेण शक्रोऽपि । चलितासन एष्यति ॥ ३ ॥ भ-
क्तिप्रत्युक्तिभिर्वार्य-माणोऽपि न विरंस्यति ॥ यदा कल्की तदा शक्र-घातात्पंचत्वमेष्यति ॥
॥ ४ ॥ षडशीतिवत्सराणी-मायुः संपूर्य कल्किराट् ॥ नारको नरकावन्यां । दुरंतायां भवि-
ष्यति ॥ ५ ॥ शक्रः कल्किसुतं दत्तं । राज्ये पैत्र्येऽधिरोप्य च ॥ अनुशिष्यार्हतं धर्मं । संघं
नत्वा गमिष्यति ॥ ६ ॥ जानन् पापफलं तादृक् । दत्तः शक्रानुयोगतः ॥ सूरेः प्रातिपदस्यो-
क्त्या-ऽर्हच्चैत्यानि विधास्यति ॥ ७ ॥ पुरस्कृत्य ततः संघं । गुरुं दत्तः क्षितीश्वरः ॥ शत्रुंज-
यादितीर्थेषु । यात्रोध्धारे करिष्यति ॥ ८ ॥ त्रिखंडे भारते ग्रामे । पुरे खेटे च कर्बटे ॥ पत्त-
ने च गिरौ तीर्थे-ऽप्यार्यानार्येऽपि मंडले ॥ ९ ॥ अर्हदायतनान्युच्चैः । कारयिष्यति दत्तराट्
॥ पालयिष्यति गुर्वाज्ञा-मर्हिंसानिरतः सदा ॥ १० ॥ युग्मं ॥

वर्षिष्यति घनः काले । भविष्यंति न चेतयः ॥ गोमहिष्यश्वसंकीर्णं । विश्वं च सुरस-
भवत् ॥ ११ ॥ राजानो न्यायनिष्णाता । मंत्रिणो जनताहिताः ॥ लोकाः समृध्धधर्माणो । द-
त्ते राज्यं प्रकुर्वति ॥ १२ ॥ पंचमारकपर्यंतं । यावदेवमतः परं ॥ प्रवृत्तिर्जिनधर्मस्य । भवि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ष्यति निरंतरा ॥ १३ ॥ अतःपरं दुःखमाया । जना धर्मविवर्जिताः ॥ निःस्त्राः स्वल्पायुषो रोग–ग्रस्ताः करनिपीडिताः ॥ १४ ॥ अर्थलुब्धाश्च राजानो । रताश्चौर्येऽतिभीषणाः ॥ कुशीलाः कुलनार्योऽपि । ग्रामाः प्रेतवनोपमाः ॥ १५ ॥ निर्लज्जा निर्दया लोका । गुरुदेवादिनिंदकाः ॥ भविष्यंति क्रमाद्दीन–हीनसत्वा नराः खलु ॥ १६ ॥ आचार्यो दुःप्रसहाख्यः । फल्गुश्रीरिति साध्व्यपि ॥ श्रावको नागिलो नाम । सत्यश्रीः श्राविका पुनः ॥ १७ ॥ विमलवाहन इति राट् । मंत्री च सुमुखाभिधः ॥ अपश्चिमभाविनो हि । दुःखमायां हि भारते ॥ १८ गुरुदुःप्रसहादेशा–द्राजा विमलवाहनः ॥ विमलाद्रिविहारं । यात्रां चापि करिष्यति ॥ १९ ॥ करद्वयप्रमाणांगा । विंशत्यब्दायुषो नराः ॥ केचिद्धर्मरताः प्रायो । निर्धर्मा भाविनो घनाः ॥ २० ॥ द्वादशाब्दीं गृहे नीत्वा–ष्टाब्दीं दुःप्रसहो व्रते ॥ पर्यंतेऽष्टमभक्तेन । सौधर्मं कल्पमेष्यति ॥२१॥ पूर्वाह्णेऽथ चरित्रस्य । मध्याह्ने राजधर्मणः ॥ अपराह्णे क्षयो वह्नेः । क्रमादित्थं भविष्यति ॥ २२ ॥ इत्थं च दुःखमा वर्ष–सहस्राण्येकविंशतिः ॥ एकांतदुःखमाकालो–ऽप्येवंमानो भविष्यति ॥ २३ ॥ तदा च पशुवल्लोका । निर्लज्जा बिलवासिनः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मत्स्यादाश्च जविष्यंति । बीजमात्रकृते किल ॥ ३४ ॥ शत्रुंजयोऽपि शैलेंद्र—स्तदा सप्तकरो-
न्नतः ॥ जविष्यत्येवोत्सर्पिण्यां । पूर्ववद्वृद्धिमेष्यति ॥ ३५ ॥ तत्राप्याद्यार्हतस्तीर्थे । पद्मना-
जस्य पूर्ववत् ॥ उद्धारोऽपि च तन्मूर्त्ती—राजादन्यप्यसौ तथा ॥ ३६ ॥ जविष्यत्येष शैलेंद्र—
स्तारयिष्यति देहिनः ॥ कीर्त्तनाद्दर्शनात्स्पर्शा—ज्ञिनवत्कलितोदयः ॥ ३७ ॥ यतः ॥ डुरितज-
रविकारध्वांतविध्वंसबद्धः । सुकृतशतसुलज्यः क्षुज्यदर्त्तिप्रहंता ॥ असममहिमपात्रं मोक्षदः
शस्तपुण्यो । जयति गिरिवरेंद्रः पुंडरीकः सुजद्रः ॥ ३८ ॥ सकलकरणबोधोद्बोधजाग्रद्विवेके
। निजमनसि सदा यैर्वीतरागोऽध्यरोपि ॥ जवशतजवपुण्यैर्लज्यते पुंडरीकः । सकृदपि नर-
नाथैः सेवितुं तैस्त्रिशुद्ध्या ॥ ३९ ॥ क्षणमपि गिरौ स्थित्वा योऽत्र प्रयात्यतिदूरतः । स ज-
वति जने पुण्यः सेव्यो ह्यलब्धजनाचले ॥ स च जिनपतिं त्यक्त्वा नान्यं जजत्यविशंकितः
। श्रयति नु सुधीर्लब्ध्वा चिंतामणिं किमु कर्करान् ॥ ३९ ॥

कलयसि कथं पीडां पापाङ्कशं किमु तप्यसे । वृतनियमजैर्दुःखैरात्मा कथं बहु युज्य-
ते ॥ अथ गिरिममुं रागद्वेषडुमानलसाम्यजाक्। क्षिपसि च यथा कर्माण्युच्चैर्घनं निबिडान्य-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पि ॥ ३० ॥ तावत्पापन्नटस्तनोतु विकटां न्नीतिं ब्रमन् न्नूतले । तावत्संसृतिरासरत्वविरतं शाखाशैतैर्दुर्गमा ॥ यावज्जाग्रदमंदबोधकलितः प्राणी न सिद्धाचले । तीर्थेशं प्रथमं स्मरप्रमथनं ध्यायत्यघौघद्रुहं ॥ ३१ ॥ कस्त्वं रे कलिकाल कान्यहह रे पापानि तृष्णेऽसि का । केऽमी रे विषयाः क्षयाय जगतो युष्माकमुज्जृंन्नितं ॥ पश्यंतु प्रसन्नं निरुद्धकरणैः शत्रुंजयेऽत्र स्थितैर्–युष्मन्मूलविमूलनाय न्नगवान् संसेव्यते योगिन्निः ॥ ३२ ॥ शृंगाण्यस्य गुहातटागविपिनान्यापस्तु कुंडान्यपि । धुन्योऽप्यश्मकणा मृदः सकलमप्यन्यद्यदत्र स्थितं ॥ निश्चैतन्यमपि क्षयाय निबिडस्य स्यान्महापाप्मनः । किं त्वेतस्य निगद्यते निजमनो रुध्वात्र यस्तिष्ठति ॥ ३३ ॥

गदितमेतदमुष्य गिरेर्मया । किमपि सच्चरितं सहजं मनाक् ॥ यदि न्नवंति मुखे रसनाशतं । तदपि नो सकलं खलु पार्यते ॥ ३४ ॥ आयासैर्बहुन्निरलं वचोविलासै–र्ज्ञातृत्वं यदि पापन्नीतिरस्ति ॥ मुक्त्वा तत्सकलकदर्थनां निजस्या–दीशं तं न्नजत सदेह पुंडरीके ॥ ॥ ३५ ॥ इत्थं प्रबोधामृतमंगिवर्गे–ऽन्निवृष्य वीरो विरराम वार्दः ॥ चित्तांतरुत्तामलबीजपु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एष–ऽमोदयं वीक्षितुमुत्सुकः किं ॥३६॥ प्रफुल्लनेत्रैः स्थिरचित्तदेहैः । सर्वैः पपे यद्भगवत्सुवा-
णी ॥ स्थिरास्थिरोन्मेषविमेषिनेद–स्तदान्नवद्व्यापृतनेत्रदेहैः ।३७॥ जातं स्वराविष्कृतसङ्-
साकुलैः । सर्वैः पुरा किं तु तदा मुदाश्रयैः ॥ स्वराकुलैः कैश्चिदनूयतोच्चकै–रन्यैस्तु नागा-
श्रयिनी रसाकुलैः ॥३८॥ पुण्यक्षितिं हर्तुमनूय उत्सुकः । क्षितिं विहर्तुं समनूत्स उत्सुकः
॥ ये चान्नवंश्चाविरताः परेऽपि । बनूवुरत्राविरताश्च ते परे ॥३९॥ देशनामिति विधाय नाय-
को–ऽवातरद्विमलशैलमूर्द्धतः ॥ तेऽपि तीर्थनतिनो नराः सुराः । प्रापुराश्रममथो निजं निजं
॥४०॥ श्रीशत्रुंजयशैलराजमहिमप्रोत्कीर्त्तनाद्यत्कृतं । पुण्यं तेन ममास्तु बोधिरमला मिथ्या-
त्वनिर्नाशिनी ॥ ऊनं चाप्यधिकं प्रमादवशतोऽज्ञानाद्यदूत्सूत्रम–प्युक्तं तत्र ममास्तु दुःकृत-
महो मिथ्या जिनध्यानतः ॥ ४१ ॥ मिथ्यात्वक्षणदाहरोऽरिविजयाज्जातप्रतापोत्करो । न-
व्योद्बोधकरो दुरंतदुरितध्वांतश्रियस्तस्करः ॥ गोन्निः स्वस्य विबोधितांगिकमलः प्रोन्मीलदंशू-
ज्ज्वलः । पायादादिजिनो रविः प्रतिदिनं सिद्धोदयाद्रिस्थितः ॥ ४२ ॥ सूरिः सौगतशेमुषीं
विमुखयन् श्रीचंद्रगच्छांबुधे–श्चन्द्रोऽतंद्रगुणो धनेश्वर इति श्रीसिद्धनूमीनृतः ॥ माहात्म्यं यदु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वंशभूषणमणेरत्याग्रहादार्हत–स्याकार्षिद्बहुहर्षदं नृपशिलादित्यस्य तीर्थोद्धृतेः ॥ ४३ ॥ यावज्जागर्त्ति जैनस्त्रिजगति जनतादत्तशर्मा सुधर्मो । यावच्चाकाशतल्पे कलयत उदयं पुष्पदंतौ तमोंतौ ॥ तत्तत्पुंरत्नवृत्ताश्रय इह वसुधामंडले मंक्षुनाम्न–स्तावन्नंदत्वमंदोदयिविविधरसांभोनिधिर्ग्रंथ एषः ॥ ४४ ॥ श्रीश्रीमान् यदुवंशभूषणमणी राजा शिलादित्य इ–त्याख्यः ख्यातयशा जिनार्चनरतः शत्रुंजयाद्रीशितुः ॥ माहात्म्यं स धनेश्वरं गुरुवरं नत्वोपरोध्य स्वयं । ग्रंथे कारयतिस्म यत्तदस्त्वहरहः संघस्य सर्वेष्टदं ॥ ४५ ॥

॥ इत्याचार्यश्रीधनेश्वरसूरिविरचिते श्रीशत्रुंजयमहातीर्थमाहात्म्ये श्रीपार्श्वनाथादिमहापुरुषसच्चरित्रवर्णनो नाम चतुर्दशमः सर्गः समाप्तः ॥ श्रीरस्तु ॥ ग्रंथाग्रंथ ( १०००० )

॥ समाप्तोऽयं ग्रंथः गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

॥ आ ग्रंथ जामनगरनिवासि पंडित श्रावक हीरालाल हंसराजे पोताना अने परना हितमाटे छापी प्रसिद्ध कर्यो छे. ॥ श्रीरस्तु ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति श्रीशत्रुंजयमाहात्म्यं संपूर्णं ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only